आचार्य जिनसेनने उक्त चौदह गुणस्थानोंमें सुखके तारतम्यका भी विचार किया है। सुख आत्माका गुण है और वह उसमें सदा विद्यमान रहता है परन्तु मोहके उदयसे उसका विभाव परिणमन होता रहता है अतः ज्यों-ज्यों मोहका संपर्क आत्मासे दूर होता जाता है त्यों-त्यों सुख गुण अपने स्वभाव रूप परिणमन करने लगता है। मिथ्यादृष्टि जीवके मोहका पूर्ण उदय है इसलिए उसके सुखका बिलकुल अभाव बतलाया है। मिथ्यादृष्टि जीवके जो विषय सम्बन्धी सुख देखा जाता है वह सुखका स्वाभाविक रूप न होकर वैभाविक रूप ही है। बारहवें गुणस्थानमें मोहका सम्पर्क बिलकुल छूट जाता है इसलिए वहाँ सुख स्वभावरूपमें प्रकट हो जाता है परन्तु वहाँ उस सुखको वेदन करनेके लिए अनन्त ज्ञानका अभाव रहता है इसलिए उसे अनन्त सुख नहीं कहते। केवलज्ञान होनेपर वही सुख अनन्त सुख कहलाने लगता है।

१ ज्ञानावरण, २ दर्शनावरण, ३ वेदनीय, ४ मोहनीय, ५ आयु, ६ नाम, ७ गोत्र और ८ अन्तरायके भेदसे कर्म आठ प्रकारके हैं। इनमेंसे ज्ञानावरण कर्मपटके समान सम्यग्ज्ञानको ढकनेवाला है। दर्शनावरण कर्म द्वारपालके समान श्रेष्ठ दर्शनको रोकनेवाला है। वेदनीय कर्म मधुसे लिप्त तलवारकी तीक्ष्ण धाराके समान माधुर्यको धारण करनेवाला है। मोहकर्म मदिराके समान बुद्धिमें विभ्रम उत्पन्न करनेवाला है। आयुकर्म सुदृढ़ बेड़ीके समान किसी निश्चित गतिमें रोकने वाला है। नामकर्म चित्रकारके समान विचित्र आकारोंकी सृष्टि करनेवाला है। गोत्रकर्म कुम्हारके समान उच्च-नीचका व्यवहार करानेवाला है और अन्तरायकर्म भाण्डारीके समान प्राप्त होने योग्य पदार्थोंमें विघ्न करनेवाला है। इस प्रकार फल देनेवाले आठ प्रकारके कर्मोंसे ये प्राणी मिथ्यादृष्टि गुणस्थानमें निरन्तर बद्ध होते रहते हैं ॥९५-९९॥ दूसरे गुणस्थानसे लेकर अन्तिम गुणस्थान तकके तेरह गुणस्थानोंमें नियमसे जीवोंके

---

१. भाण्डागार क०, भाण्डाकार ख०।

सद्दृष्टिज्ञानचारित्रप्रतिपत्तिपुरःसराः । मोक्षप्राप्तिक्षमा भव्या अभव्यास्तद्विलक्षणाः ॥१०१॥
आसन्नभव्यता हेतोरर्वाग्दर्शिभिरुह्यते । विशुद्धदर्शनज्ञानचरित्रत्रयलक्षणात् ॥१०२॥
सदाप्तवचनादेव बोद्धव्या दूरभव्यता । अभव्यता च भूतानामहेतुविषया ततः ॥१०३॥
जीवस्वभावभावोऽयं भव्याभव्यत्वलक्षणः । [१]एकाधारचुटन्माषकङ्कटुकारममाषवत् ॥१०४॥
अनादिरन्तवान् भव्यव्यक्तीनां भवसागरः । भव्यसन्तानसामान्यविवक्षावदन्तवर्जितः ॥१०५॥
अनादिरपि चानन्तः सन्तानाद् व्यक्तितोऽपि च । अभव्यजीवराशीनां भवव्यसनसागरः ॥१०६॥
भव्याभव्या भवेऽनन्ता जीवराशिद्वये स्थिताः । मिथ्यात्वाद् भुञ्जते दुःखं कालद्रव्यवदक्षयाः ॥१०७॥
द्रव्यपर्यायरूपत्वान्नित्यानित्योभयात्मकाः । मिथ्यात्वासंयमैर्योगैः कषायैः कलुषीकृताः ॥१०८॥
बध्नानाः सततं पाप-कर्म दुर्मोचबन्धनम् । जन्तवः परिवर्तन्ते चतुर्गतिषु दुःखिनः ॥१०९॥
रौद्रध्यानाविलात्मानो बह्वारम्भपरिग्रहाः । मिथ्यात्वाष्टमदक्लिष्टा विशिष्टानिष्टदृष्टयः ॥११०॥
स्वप्रशंसापरा निन्द्याः परनिन्दाभिनन्दिनः । परस्वहरणे लुब्धा भोगतृष्णातिरेकिणः ॥१११॥

भव्यपना ही रहता है और प्रथम गुणस्थानमें भव्यपना तथा अभव्यपना दोनों ही सम्भव हैं ॥१००॥ सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्रकी प्राप्ति पूर्वक जो जीव मोक्ष प्राप्त करनेमें समर्थ हैं वे भव्य कहलाते हैं और जो इनसे विपरीत हैं वे अभव्य कहे जाते हैं ॥१०१॥ जो विशुद्ध सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चारित्ररूपी लक्षणसे युक्त हैं वे आसन्न भव्य हैं और उनकी आसन्नभव्यता आधुनिक पुरुषोंके द्वारा भी जानी जा सकती है। परन्तु दूर भव्यता और अभव्यता सदा आप्त भगवान्‌के वचनोंसे ही जानी जा सकती है क्योंकि वह साधारण प्राणियोंके हेतुका विषय नहीं है अर्थात् साधारण व्यक्ति उसे हेतु द्वारा जान नहीं सकते ॥१०२-१०३॥ यह भव्यत्व और अभव्यत्व भाव जीवका स्वाभाविक—पारिणामिक भाव है तथा एक बर्तनमें भरकर सीजनेके लिए अग्निपर रक्खे हुए सीजनेवाले और न सीजनेवाले उड़दके समान हैं। भावार्थ—भव्यजीव निमित्त मिलनेपर सिद्ध पर्यायको प्राप्त हो जाते हैं और अभव्य जीव बाह्य निमित्त मिलनेपर भी निजकी योग्यता न होनेसे सिद्ध पर्याय नहीं प्राप्त कर पाते ॥१०४॥ भव्यजीवोंका संसार-सागर अनादि और सान्त है तथा सामान्य भव्यजीवोंकी अपेक्षा अनादि अनन्त है ॥१०५॥ अभव्यजीव राशिका संसारसागर व्यक्ति तथा समूह दोनोंकी अपेक्षा अनादि अनन्त है ॥१०६॥ संसारमें जीवोंकी दो राशियाँ हैं एक भव्य और दूसरी अभव्य। ये दोनों ही प्रकारकी राशियाँ अनन्त हैं, मिथ्यात्व कर्मके उदयसे दुःख भोगती रहती हैं और कालद्रव्यके समान अक्षय—अविनाशी हैं अर्थात् जिस प्रकार कालद्रव्यका कभी अन्त नहीं होता उसी प्रकार इन दोनों राशियोंका भी कभी अन्त नहीं होता ॥१०७॥ ये जीव द्रव्यकी अपेक्षा नित्य हैं पर्यायकी अपेक्षा अनित्य हैं तथा एक साथ दोनोंकी अपेक्षा उभयात्मक—नित्यानित्यात्मक हैं, मिथ्यात्व, अविरति, योग और कषायके द्वारा कलुषित हो रहे हैं तथा जिसका छूटना कठिन है ऐसे पापकर्मका निरन्तर बन्ध करते हुए दुःखी हो चारों गतियोंमें घूमते रहते हैं ॥१०८-१०९॥

जिनकी आत्मा निरन्तर रौद्रध्यानसे मलिन है, जो बहुत आरम्भ और परिग्रहसे सहित हैं मिथ्यादर्शन तथा ज्ञानमद, पूजामद आदि आठ मदोंसे क्लेश उठाते हैं, जिनकी दृष्टि अत्यन्त अनिष्टरूप है, जो आत्मप्रशंसामें तत्पर हैं, निन्दनीय हैं, दूसरेकी निन्दासे आनन्द मानते हैं,

१. चुटन्माषाश्च कङ्कटुकारममाषाश्चेति चुटन्माषकङ्कटुकारममाषाः, एकाधाराश्च ते चुटन्माषकङ्कटुकारममाषाश्च, ते तथोक्ताः तेषामिव तद्वत्। एकाधारे एकस्मिन् भाजने एके चुटन्माषाः निष्पन्नाः, अन्ये कङ्कटुकारममाषाः अनिष्पन्नाः तेषामिव।

मधुमांससुराहारा मानुषाः कर्मभूमिजाः । तिर्यञ्चो व्याघ्रसिंहाद्या बन्धका नारकायुषः ॥११२॥
जायन्ते चातिशीतोष्णदह्यमानशरीरिषु । चण्डा नरककुण्डेषु नारकाः षण्डकात्मकाः[1] ॥११३॥
न तद् द्रव्यं न तत् क्षेत्रं न सा कालकलाऽपि च । स्वभावो यत्र दुःखस्य विश्रामो नरकश्रिताम् ॥
लाभः साधारणस्तेषामकाले मरणं न यत् । वल्लभं जीवलोकस्य सुलभं चिरजीवितम् ॥११५॥
रत्नप्रभादिषु ज्ञेयं पृथिवीष्वथ सप्तसु । महातमःप्रभान्तासु प्रमाणमिदमायुषः ॥११६॥
एकस्त्रयस्ततः सप्त दश सप्तदश क्रमात् । द्वाविंशतिस्त्रयस्त्रिंशत् सागराः परमा स्थितिः ॥११७॥
पूर्वात्पूर्वात्परोऽधः स्यात् जघन्या समयाधिका । दशवर्षसहस्राणि प्रथमायां क्षितौ स्थितिः ॥११८॥
क्रोधमानमहामायालोभचिन्तावशीकृताः । आर्तध्यानमहावर्तसततभ्रान्तमानसाः ॥११९॥
तिर्यञ्चो मानुषा देवा नारका वा कुदृष्टयः । तिर्यग्गतिं प्रपद्यन्ते त्रसस्थावरसंकुलाम् ॥१२०॥
पृथिव्यप्कायभेदेषु ते तेजोऽनिलमूर्तिषु । वनस्पतिषु चाश्नन्ति जन्मदुःखं पुनः पुनः ॥१२१॥
कृम्यादिद्वीन्द्रियेष्वेके यूकादित्रीन्द्रियेष्वपि । चतुरिन्द्रियभेदेषु भ्रमन्ति भ्रमरादिषु ॥१२२॥
पञ्चेन्द्रियप्रकारेषु पक्षिमत्स्यमृगादिषु । ते भजन्ते चिरं दुःखं तिर्यग्जन्मनि जन्तवः ॥१२३॥
अन्तर्मुहूर्तकालस्या[2]तिरश्चामवरा स्थितिः । पूर्वकोटीः परा भोगभूमौ पल्योपमत्रयम् ॥१२४॥
स्वभावादार्जवोपेताः स्वभावान्मृदवो मताः । स्वभावाद् भद्रशीलाश्च स्वभावात् पापभीरवः ॥१२५॥

दूसरेका धन हरण करनेके लोभी हैं, जिन्हें भोगोंकी तृष्णा अत्यधिक है, जो मधु मांस और मदिराका आहार करते हैं ऐसे कर्मभूमिके मनुष्य और व्याघ्र, सिंह आदि तिर्यञ्च नरकायुका बन्ध करते हैं ॥११०-११२॥ एवं जहाँ अत्यन्त शीत और उष्णतासे शरीर जल रहे हैं ऐसे नरक-कुण्डोंमें अत्यन्त क्रोधी नारकी उत्पन्न होते हैं। वहाँ इन नारकियोंके खण्ड-खण्ड हो जाते हैं ॥११३॥ वहाँ न वह द्रव्य है, न क्षेत्र है और न वह कालकी कला भी है जहाँ नारकी जीवोंके दुःखका स्वाभाविक विश्राम हो सके ॥११४॥ उन नारकियोंके यदि एक साधारण लाभ है, तो यही कि उनका अकालमें मरण नहीं होता। संसारके समस्त प्राणियोंको चिरकाल तक जीवित रहना प्रिय है सो यह चिरजीवन नारकियोंको सुलभ है ॥११५॥ रत्नप्रभाको आदि लेकर महातमःप्रभा पर्यन्त—सातों पृथिवियोंमें नारकियोंकी आयुका प्रमाण क्रमसे एकसागर, तीन-सागर, सातसागर, दशसागर, सत्रहसागर, बाईससागर और तैंतीससागर जानना चाहिए। यह इनकी उत्कृष्ट स्थिति है ॥११६-११७॥ पूर्व-पूर्व नरकोंकी जो उत्कृष्ट स्थिति है वही एक समय अधिक होनेपर आगामी नरकोंकी जघन्य स्थिति कहलाती है। प्रथम नरककी जघन्य स्थिति दश हजार वर्षकी है ॥११८॥

जो क्रोध मान महामाया और लोभके कारण चिन्तातुर है तथा आर्तध्यानरूपी बड़ी भारी भँवरके कारण जिनका मन निरन्तर घूमता रहता है, ऐसे मिथ्यादृष्टि तिर्यञ्च मनुष्य देव और नारकी त्रसस्थावर जीवोंसे भरी हुई तिर्यञ्चगतिको प्राप्त होते हैं ॥११९-१२०॥ तिर्यञ्चगतिमें जन्म लेने वाले प्राणी पृथिवीकाय, जलकाय, अग्निकाय, वायुकाय और वनस्पतिकायमें बार-बार जन्म लेनेका दुःख भोगते रहते हैं ॥१२१॥ कितने ही कृमि आदि दो इन्द्रियोंमें, यूक आदि तीन इन्द्रियोंमें, भ्रमर आदि चतुरिन्द्रियोंमें और पक्षी, मत्स्य, मृग आदि पञ्चेन्द्रियोंमें चिरकाल तक दुःख भोगते हैं ॥१२२-१२३॥ कर्मभूमिज तिर्यञ्चोंकी जघन्य स्थिति अन्तर्मुहूर्त और उत्कृष्ट एक करोड़ वर्ष पूर्वकी है तथा भोगभूमिज तिर्यञ्चोंकी उत्कृष्ट स्थिति तीन पल्य और जघन्य एक पल्य प्रमाण है ॥१२४॥

जो मनुष्य स्वभावसे ही सरल हैं, स्वभावसे ही कोमल हैं, स्वभावसे ही भद्र हैं,

१. खण्डकात्मकाः म० । २. कालस्य तिरश्चा—म० ।

प्रकृत्या मधुमांसादिसावद्याहारवर्जिताः । अर्जयन्ति शुभमानुष्यं कुमानुष्यं कुकर्मभिः ॥१२६॥
पापनिर्जरणात् कैश्चित् तिर्यग्नारकजन्तुभिः । प्राप्यते प्रियमानुष्यं देवैश्च शुभकर्मभिः ॥१२७॥
मनुष्यत्वेऽपि सम्पूर्णमार्यम्लेच्छकुलाकुले । दुःखमेवेप्सितालाभाद् विप्रयोगात्प्रियैर्जनैः ॥१२८॥
नापि प्राप्तेप्सितार्थानां संयुक्तानां प्रियैर्जनैः । विषयेन्धनदीप्तेच्छापावकानां नृणां सुखम् ॥१२९॥
यदेव जायते नृत्वं केषाञ्चिन्मोक्षकारणम् । आसन्नभव्यसत्त्वानां दर्शनादिनिषेविणाम् ॥१३०॥
तदेव जायतेऽन्येषां दीर्घसंसारकारणम् । सुदूरभव्यसत्त्वानां नरत्वं मुग्धचेतसाम् ॥१३१॥
कर्मभूमिषु सर्वासु भोगभूमिषु च स्थितौ । तिरश्चामिव निश्चेये नृस्थिती च परावरे ॥१३२॥
अब्भक्षा वायुभक्षाश्च मूलपत्रफलाशिनः । उपशान्तधियोऽभ्यस्तकषायेन्द्रियनिग्रहाः ॥१३३॥
तापसा बालतपसः कायक्लेशपरायणाः । अकामनिर्जरायुक्तास्तिर्यञ्चो बन्धरोधिनः ॥१३४॥
भावना व्यन्तरा देवा ज्योतिष्काः कल्पवासिनः । अल्पर्द्धयो हि जायन्ते ते मिथ्यात्वमलीमसाः ॥१३५॥
देवाः कन्दर्पनामानो नित्यं कन्दर्परञ्जिताः । आभियोग्याः सभाऽयोग्याः क्लिष्टाः किल्विषकादयः ॥१३६॥
ते महर्द्धिकदेवानां दृष्ट्वैश्वर्यं महोदयम् । देवदुर्गतिदुःखार्ताः दुःखमश्नन्ति मानसम् ॥१३७॥
सम्यग्दर्शनलाभस्य दुर्लभत्वादभव्यवत् । भव्या अपि निमज्जन्ति भवदुःखमहोदधौ ॥१३८॥
भावनानां भवत्यब्धिः साधिकः परमा स्थितिः । भौमानां पल्यमन्या तु दशवर्षसहस्रिका ॥१३९॥
ज्योतिषां साधिकं पल्यं पल्याष्टांशोऽवरा परा । स्वर्गिणां सागराः पल्यं साधिकं ह्यपरा स्थितिः ॥१४०॥

स्वभावसे ही पाप-भीरु हैं और स्वभावसे ही मधु मांसादि सावद्य आहारके त्यागी हैं वे उत्तम मनुष्य पर्याय प्राप्त करते हैं तथा जो खोटे कर्म करते हैं वे खोटी मनुष्य पर्याय प्राप्त करते हैं ॥१२५-१२६॥ पाप कर्मोंकी निर्जरा होनेसे कितने ही तिर्यञ्च तथा नारकी और शुभ कर्म करनेवाले देव भी उत्तम पर्याय प्राप्त करते हैं ॥१२७॥ आर्य तथा म्लेच्छ कुलसे भरा हुआ मनुष्य जीवन प्राप्त होनेपर भी इच्छित वस्तुकी प्राप्ति नहीं होनेसे तथा प्रियजनोंके साथ वियोग होनेके कारण जीवोंको दुःख ही प्राप्त होता रहता है ॥१२८॥ कितने ही मनुष्योंको यद्यपि इच्छित पदार्थ प्राप्त होते रहते हैं और प्रियजनोंके साथ उनका समागम भी होता रहता है तथापि विषय रूपी ईंधनके द्वारा उनकी इच्छा रूपी अग्नि निरन्तर प्रज्वलित होती रहती है। इसलिए उन्हें सुख प्राप्त नहीं होता ॥१२९॥ जो मनुष्य भव, सम्यग्दर्शनादिको धारण करनेवाले किन्हीं निकट भव्य जीवोंको मोक्षका कारण होता है वही मनुष्य भव, मोहपूर्ण चित्तको धारण करनेवाले दूरानुदूर भव्य जीवोंको दीर्घ संसारका कारण है ॥१३०-१३१॥ समस्त कर्मभूमियों और भोगभूमियोंमें मनुष्योंकी उत्कृष्ट तथा जघन्य स्थिति तिर्यञ्चोंके समान जानना चाहिए ॥१३२॥

जो केवल जल, वायु अथवा वृक्षोंके मूल पत्र तथा फलोंका भक्षण करते हैं, जिनकी बुद्धि अत्यन्त शान्त है, जिन्होंने कषाय तथा इन्द्रियोंके निग्रहका अभ्यास कर लिया है, जो बाल तप करते हैं तथा जो काय क्लेश करनेमें तत्पर रहते हैं, ऐसे तापसी और अकामनिर्जरासे युक्त बन्धनबद्ध तिर्यञ्च, भवनवासी, व्यन्तर, ज्योतिषी तथा अल्प ऋद्धिके धारक कल्पवासी देव होते हैं। ये सब मिथ्या दर्शनसे मलिन होते हैं ॥१३३-१३५॥ इनमें जो कन्दर्प नामके देव हैं वे निरन्तर कामसे आकुलित रहते हैं, आभियोग्य जातिके देव सभामें बैठनेके अयोग्य होते हैं और किल्विषक देव सदा संक्लेशका अनुभव करते रहते हैं ॥१३६॥ ये बड़ी-बड़ी ऋद्धियोंके धारक देवोंके महाभ्युदयसे युक्त ऐश्वर्यको देखकर तथा देव होनेपर भी अपनी दुर्गतिका विचार कर दुःखसे पीड़ित होते हुए मानसिक दुःख उठाते रहते हैं ॥१३७॥ सम्यग्दर्शनकी प्राप्ति दुर्लभ होनेसे भव्य जीव भी अभव्यकी तरह संसारके दुःख रूपी महासागरमें गोता लगाते रहते हैं ॥१३८॥ भवनवासी देवोंकी उत्कृष्ट स्थिति कुछ अधिक एक सागर है, व्यन्तर देवोंकी एक पल्य प्रमाण है और जघन्य स्थिति दस हजार वर्षकी है ॥१३९॥ ज्योतिषी देवोंकी उत्कृष्ट स्थिति कुछ

भव्यसत्त्वैर्यदा कैश्चित् लभ्यन्ते पञ्च लब्धयः । क्षयोपशमसंशुद्धिक्रियाप्रायोग्यदेशनाः ॥१४१॥
अधःप्रवृत्तकरणमपूर्वकरणं तथा । तथाऽनिवृत्तिकरणं विधाय करणं त्रिधा ॥१४२॥
ततो दर्शनमोहस्य विधायोपशमं ततः । क्षयोपशमभावं च क्षयं चात्मविशुद्धितः ॥१४३॥
पूर्वमेवौपशमिकं क्षायोपशमिकं क्रमात् । क्षायिकं तैः समुत्पाद्य सम्यक्त्वमनुभूयते ॥१४४॥
तथा चारित्रमोहस्य क्षयोपशमलब्धितः । चारित्रं प्रतिपद्यामी क्षयं कुर्वन्ति कर्मणाम् ॥१४५॥
ततोऽनन्तसुखं मोक्षमनन्तज्ञानदर्शनम् । अनन्तवीर्यमध्यास्य तेऽधितिष्ठन्ति निर्वृताः ॥१४६॥
ये तु चारित्रमोहस्य नितान्तबलवत्तया । दर्शनादेव निष्कम्पा देवायुष्कस्य बन्धकाः ॥१४७॥
संयतासंयता ये च नराः कल्पेषु तेऽमराः । सौधर्माद्यच्युतान्तेषु सम्भवन्ति महर्द्धयः ॥१४८॥
सरागसंयमश्रेष्ठाः संयता ये तु तेऽनघाः । कल्पे सुरा भवन्त्येके कल्पातीतास्तथा परे ॥१४९॥
नवग्रैवेयकावासा नवानुदिशवासिनः । कल्पातीतास्तथा ज्ञेयाः पञ्चानुत्तरवासिनः ॥१५०॥
इन्द्राद्याः कल्पजा देवा अहमिन्द्राश्च सत्पथे । सुखं सुविहितस्यामी भुञ्जते तपसः फलम् ॥१५१॥
सौधर्मैशानयोरायुः साधिके सागरोपमे । सानत्कुमारमाहेन्द्रकल्पयोः सप्त सागराः ॥१५२॥
[1]दशार्णवोपमायुष्का ब्रह्मब्रह्मोत्तरामराः । लान्तवेऽपि च कापिष्ठे स्युश्चतुर्दश सागराः ॥१५३॥

अधिक एकपल्य है, जघन्य स्थिति पल्यके आठवें भाग प्रमाण है और स्वर्गवासी देवोंकी उत्कृष्ट स्थिति तेतीस सागर तथा जघन्य स्थिति कुछ अधिक एक पल्य प्रमाण है ॥१४०॥

जब कोई भव्य जीव, क्षयोपशम, विशुद्धि, प्रायोग्य, देशना तथा अधःकरण, अपूर्वकरण और अनिवृत्तिकरणके भेदसे तीन प्रकारकी करण लब्धि इन पञ्च लब्धियोंको प्राप्त करता है तब वह आत्म-विशुद्धिके अनुसार दर्शन-मोहनीय कर्मका उपशम, क्षयोपशम अथवा क्षयकर सर्व प्रथम औपशमिक, फिर क्षायोपशमिक और तदनन्तर क्रमसे क्षायिक सम्यक्त्व उत्पन्न कर उसका अनुभव करता है ॥१४१–१४४॥ सम्यक्त्व प्राप्त करनेके बाद कितने ही भव्य जीव चारित्र मोह-के क्षयोपशमसे चारित्र प्राप्त कर कर्मोंका क्षय करते हैं तदनन्तर निर्वाणको प्राप्त कर अनन्त सुख, अनन्त ज्ञान, अनन्त दर्शन और अनन्त वीर्यसे युक्त होते हुए मोक्षमें निवास करते हैं ॥१४५–१४६॥ जो भव्य जीव चारित्र मोहकी अत्यन्त प्रबलतासे चारित्र नहीं धारण कर पाते हैं वे निश्चल सम्यक्त्वके प्रभावसे ही देवायुका बन्ध कर लेते हैं ॥१४७॥ इसी प्रकार जो मनुष्य संयतासंयत अर्थात् देश चारित्रके धारक हैं वे सौधर्मसे लेकर अच्युत स्वर्ग तकके कल्पोंमें बड़ी-बड़ी ऋद्धियोंके धारक देव होते हैं ॥१४८॥ जो मनुष्य सराग संयमसे श्रेष्ठ तथा निर्दोष संयमके धारक हैं, उनमेंसे कितने ही कल्पवासी देव होते हैं और कितने ही कल्पातीत देव ॥१४९॥ नव ग्रैवेयक, नव अनुदिश तथा पञ्च अनुत्तर विमानोंमें रहनेवाले देव कल्पातीत कहलाते हैं ॥१५०॥ कल्पवासी देव इन्द्रादिकके भेदसे अनेक प्रकारके हैं और कल्पातीत देव केवल अहमिन्द्र कहलाते हैं—उनमें भेद नहीं होता। इन सभीने सन्मार्गमें चलकर जो उत्तम तप किया था वे देवगतिमें उसके फलस्वरूप सुखका उपभोग करते हैं ॥१५१॥ सौधर्म ऐशान स्वर्गमें देवोंकी आयु कुछ* अधिक दो सागर, सानत्कुमार माहेन्द्र स्वर्गमें कुछ अधिक सात

१. दशसागरप्रमितायुष्काः ।

* कुछ अधिक आयु घातायुष्क जीवोंकी अपेक्षा है। इसका सम्बन्ध बारहवें स्वर्गतक ही रहता है, क्योंकि घातायुष्क जीवोंको उत्पत्ति यहींतक होती है। जो उपरितन स्वर्गों की आयु बाँधकर पीछे संक्लेश रूप परिणाम हो जानेके कारण नीचेके स्वर्गों में उत्पन्न होते हैं वे घातायुष्क कहलाते हैं। इनकी आयु निश्चित आयुसे आधा सागर अधिक होती है।

आयुः शुक्रमहाशुक्रकल्पयोः षोडशाब्धयः । शतारे च सहस्रारे तथाऽष्टादश सागराः ॥१५४॥
विंशत्यब्धिसमायुष्का आनतप्राणतामराः । आरणाच्युतयोर्देवा द्वाविंशत्यब्धिजीविनः ॥१५५॥
एकोत्तरा तु वृद्धिः स्यान्नवग्रैवेयकेष्वियम् । उत्कृष्टस्थितिरेषोर्ध्वं साधिका त्वपरा स्थितिः ॥१५६॥
नवस्वनुदिशेषु स्याद् द्वात्रिंशत्सागरोपमा । परा स्थितिर्जघन्या स्यादेकत्रिंशत्पयोधयः ॥१५७॥
त्रयस्त्रिंशदुदन्वन्तः पराऽनुत्तरपञ्चके । सर्वार्थसिद्धितोऽन्यत्र द्वात्रिंशदपरा स्थितिः ॥१५८॥
पल्यानि पञ्च सौधर्मे देवीनां परमा स्थितिः । आसहस्रारकल्पात्तु तान्येव द्व्यधिकानि तु ॥१५९॥
ततः सप्तभिराधिक्ये पञ्च पञ्चाशदुच्यते । पल्यानि स्वल्पकालास्ताः परतस्तु न योषितः ॥१६०॥
उपपादश्च सर्वासां कर्मशक्तिनियोगतः । कल्पवासीसुरस्त्रीणामाद्ये कल्पद्वये सदा ॥१६१॥
ज्योतिषो भावना भौमाः सौधर्मैशानवासिनः । देवाः कायप्रवीचारास्तीव्रमोहोदयत्वतः ॥१६२॥
सानत्कुमारमाहेन्द्रकल्पद्वयसमुद्भवाः । देवाः स्पर्शप्रवीचाराः मध्यमोहोदयत्वतः ॥१६३॥
ब्रह्मब्रह्मोत्तरोद्भूताः कान्ताः लान्तवकल्पजाः । देवा रूपप्रवीचाराः कापिष्टप्रभवास्तथा ॥१६४॥
देवाः शुक्रमहाशुक्रशतारस्थितयस्तथा । सहस्रारोद्भवाः शब्दप्रवीचारा भवन्त्यमी ॥१६५॥
आनतप्राणतोद्भूता आरणाच्युतवासिनः । देवा मनःप्रवीचारा मन्दमोहोदयत्वतः ॥१६६॥
परतस्त्वप्रवीचारा यावत्सर्वार्थसिद्धिजाः । शमप्रधानशर्माढ्या मोहाव्यक्तोदयत्वतः ॥१६७॥

सागर, ब्रह्म ब्रह्मोत्तर स्वर्गमें कुछ अधिक दश सागर, लान्तव-कापिष्ट स्वर्गमें कुछ अधिक चौदह सागर, शुक्र महाशुक्र स्वर्गमें कुछ अधिक सोलह सागर, शतार-सहस्रारमें कुछ अधिक अठारह सागर, आनत-प्राणत स्वर्गमें बीस सागर और आरण अच्युत स्वर्गमें बाईस सागर प्रमाण आयु है ॥१५२–१५५॥ नव ग्रैवेयकोंमें एक-एक सागर बढ़ती हुई आयु है अर्थात् प्रथम ग्रैवेयकमें बाईस सागरकी आयु है और आगेके ग्रैवेयकोंमें एक-एक सागरकी बढ़ती हुई नौवें ग्रैवेयकमें इकतीस सागरकी हो जाती है। पूर्व-पूर्व स्वर्गोंकी जो उत्कृष्ट स्थिति है वही एक समय अधिक होनेपर आगे-आगेके स्वर्गोंकी जघन्य स्थिति होती है ॥१५६॥ नव अनुदिशोंमें बत्तीस सागर प्रमाण उत्कृष्ट स्थिति है और एक समय अधिक इकतीस सागर जघन्य स्थिति है ॥१५७॥ पञ्च अनुत्तर विमानोंमें तेतीस सागरकी उत्कृष्ट स्थिति है और सर्वार्थसिद्धिको छोड़कर बाकी चार अनुत्तरोंमें जघन्य स्थिति एक समय अधिक बत्तीस सागर प्रमाण है। सर्वार्थसिद्धिमें जघन्य स्थिति नहीं होती, वहाँ सब एक ही समान स्थितिके धारक होते हैं ॥१५८॥ सौधर्म स्वर्गमें देवियोंकी उत्कृष्ट स्थिति पाँच पल्य प्रमाण है। उसके आगे सहस्रार स्वर्गतक प्रत्येक स्वर्गमें दो दो सागर अधिक है। उसके आगे सात-सात सागर अधिक है। इस तरह सोलहवें स्वर्गमें पचपन पल्यकी आयु है। उसके आगे स्त्रियोंका सद्भाव नहीं है ॥१५९–१६०॥ कर्मोंकी सामर्थ्यसे समस्त कल्पवासिनी देवियोंका उत्पाद सदा पहले और दूसरे स्वर्गमें ही होता है ॥१६१॥ मोहका तीव्र उदय होनेसे ज्योतिषी, भवनवासी, व्यन्तर और सौधर्म तथा ऐशान स्वर्गके निवासी देव कामसे मैथुन करते हैं ॥१६२॥ मोहका मध्यम उदय होनेसे सानत्कुमार और माहेन्द्र स्वर्गके देव स्पर्श मात्रसे प्रवीचार करते हैं अर्थात् वहाँके देव-देवियोंकी काम बाधा परस्परके स्पर्श मात्रसे शान्त हो जाती है ॥१६३॥ ब्रह्म ब्रह्मोत्तर लान्तव और कापिष्ट स्वर्गके देव, रूप मात्रसे प्रवीचार करते हैं अर्थात् वहाँके देव देवियोंका रूप देखने मात्रसे सन्तुष्ट हो जाते हैं ॥१६४॥ शुक्र, महाशुक्र, शतार और सहस्रार स्वर्गके देव शब्दसे प्रवीचार करते हैं। अर्थात् वहाँके देव देवियोंके शब्द सुनने मात्रसे सन्तुष्ट हो जाते हैं ॥१६५॥ मोहका उदय अत्यन्त मन्द होनेसे आनत, प्राणत, आरण और अच्युत स्वर्गके देव मनसे प्रवीचार करते हैं। अर्थात् वहाँके देव मनमें देवियोंका ध्यान आने मात्रसे सन्तुष्ट हो जाते हैं ॥१६६॥ उसके आगे सर्वार्थसिद्धि तकके देव मोहका उदय अव्यक्त होनेसे प्रवीचार रहित हैं अर्थात् उन्हें कामकी बाधा उत्पन्न ही

[1]यथा स्थित्या तथा द्युत्या प्रभावेन सुखेन ते । विशुद्ध्यापि च लेश्यानामिन्द्रियावधिगोचरैः ॥१६८॥
[2]उपर्युपरि सौधर्मात् पूर्वतः पूर्वतोऽधिकाः । अल्पा गतितनूत्सेधैरभिमानपरिग्रहैः ॥१६९॥
मुक्तिमूलमहानर्घ्यरत्नत्रयाप्रयत्नसाधनम् । ध्यानस्वाधीनसर्वार्थं भुक्त्वा ते वैबुधं सुखम् ॥१७०॥
दिवश्च्युता विदेहेषु भरतैरावतेषु वा । कर्मभूमिविभागेषु भवन्ति पुरुषोत्तमाः ॥१७१॥
षट्खण्डप्रभवः केचिन्निधिरत्नोपलक्षिताः । सिद्धिसौख्यानुसन्धानसमर्थचरमक्रियाः ॥१७२॥
केचिद् द्वित्रिभवाश्चान्ये बलाः स्वर्गापवर्गिणः । निदानिनस्तु तत्रान्ये केशवप्रतिशत्रवः ॥१७३॥
केचित् पूर्वभवाभ्यस्तशुभषोडशकारणाः । [3]कीर्त्यास्तीर्थंकृतो भूत्वा प्रभवन्ति जगत्त्रये ॥१७४॥
सम्यक्त्वस्थिरमूलस्य ज्ञानकाण्डधृतात्मनः । चारित्रस्कन्धबन्धस्य नयशाखोपशाखिनः ॥१७५॥
नृसुरश्रीप्रसूनस्य जिनशासनशाखिनः । सेवितस्य लभन्तेऽग्रे ते निर्वाणमहाफलम् ॥ १७६॥[युग्मम्]
परमानन्दरूपं ते निर्वाणफलसम्भवम् । सारसौख्यरसं प्राप्ताः सिद्धाः तिष्ठन्ति निर्वृताः ॥१७७॥
इत्थमाकर्ण्य सा धर्मं भुवनत्रयपद्मिनी । मोक्षमार्गार्कसम्पर्कात् चकासेति प्रमोदिनी ॥१७८॥
प्राक् प्रशस्तानुरागाढ्या धर्मश्रवणतो दधुः । लोकास्त्रयोऽग्निशुद्धाच्छरत्नजातिचयश्रियम् ॥१७९॥
सद्धर्मदेशना जैनी जगत्त्रयतनूभृताम् । भ्रान्तिशेषरजः शेषमभ्राली[4]वाभ्यशीशमत्[6] ॥१८०॥

नहीं होती। वहाँके अहमिन्द्र शान्ति प्रधान सुखसे युक्त होते हैं ॥१६७॥ सौधर्म स्वर्गसे लेकर ऊपर-ऊपरके देव, पूर्व-पूर्वकी अपेक्षा स्थिति, द्युति, प्रभाव, सुख, लेश्याओंकी विशुद्धता, इन्द्रिय तथा अवधि ज्ञानके विषयकी अपेक्षा अधिक-अधिक हैं तथा गति, शरीरकी ऊँचाई, अभिमान और परिग्रहकी अपेक्षा हीन-हीन हैं ॥१६८-१६९॥ मुक्तिके कारणभूत महा अमूल्य रत्नत्रयके प्रभावसे जिसकी सिद्धि अयत्न साध्य होती है तथा जहाँ इच्छा करते ही समस्त पदार्थोंकी सिद्धि हो जाती है ऐसे देवों सम्बन्धी सुख भोगकर वे देव स्वर्गसे च्युत हो विदेह, भरत और ऐरावत इन कर्मभूमियोंमें उत्तम पुरुष अथवा नारायण उत्पन्न होते हैं ॥१७०-१७१॥ कितने ही देव, नौनिधियों और चौदह रत्नोंसे सहित छह खण्डोंके प्रभु होते हैं अर्थात् चक्रवर्ती होते हैं। इनकी अन्तिम क्रियाएँ मोक्ष सुख प्राप्त करनेमें समर्थ होती हैं ॥१७२॥ कितने ही दो-तीन भव धारण कर मोक्ष चले जाते हैं, कोई बलभद्र होते हैं, और वे स्वर्ग अथवा मोक्ष जाते हैं तथा पूर्व भवमें निदान बाँधनेवाले कितने ही लोग नारायण एवं प्रतिनारायण होते हैं ॥१७३॥ जिन्होंने पूर्व भवमें शुभ सोलह कारण भावनाओंका अभ्यास किया है ऐसे कितने ही लोग कीर्तिके धारक तीर्थंकर होते हैं और वे तीनों जगत्का प्रभुत्व प्राप्त करते हैं ॥१७४॥ सम्यग्दर्शन ही जिसकी स्थिर जड़ है, जो ज्ञान रूप पिंडपर टिका हुआ है, चारित्र रूपी स्कन्धको धारण करनेवाला है, नय रूपी शाखाओं और उपशाखाओंसे सहित है तथा मनुष्य और देवोंकी लक्ष्मी रूप जिसमें फूल लग रहे हैं ऐसे जिनशासन रूपी वृक्षकी जो सेवा करते हैं वे उसके अग्रभाग-पर स्थित निर्वाण रूपी महाफलको प्राप्त होते हैं ॥१७५-१७६॥ निर्वाण रूपी फलमें उत्पन्न होने-वाले परमानन्द स्वरूप श्रेष्ठ सुख रूपी रसको प्राप्त हुए सिद्ध परमेष्ठी निर्वाणको प्राप्त हो सिद्धा-लयमें सदा विद्यमान रहते हैं ॥१७७॥ इस प्रकारका धर्मोपदेश सुनकर वह लोकत्रय रूपी कमलिनी, मोक्ष मार्ग रूपी सूर्यके संसर्गसे प्रमुदित हो सुशोभित हो उठी ॥१७८॥ जो पहलेसे ही प्रशस्त अनुरागसे सहित थे ऐसे तीनों लोकोंके जीव धर्म श्रवण कर अग्निसे शुद्ध हुए निर्मल जातिके रत्न समूहकी शोभा धारण कर रहे थे ॥१७९॥ जिस प्रकार मेघमाला अवशिष्ट धूलिके

१. स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः त० सू० च० अ०। २. गतिशरीरपरिग्रहाभिमानतो हीनाः त० सू० च० अ०। ३. कीर्तनीयाः प्रशस्ता इत्यर्थः। ४. बल—म०। ५. मेघमालेव। ६. शमयामास।

अथ दिव्यध्वनेरन्ते जैनस्य तदनन्तरम् । चक्रुस्तदनुसन्धानं देवा दुन्दुभिनिःस्वनाः ॥१८१॥
पुष्पवृष्टिं प्रवर्षन्तो रत्नवृष्टिं च तुष्टुवुः । देवास्तत्र वनोद्देशे मुनिमेकं महामुनिम् ॥१८२॥
तं निशम्य मुनिश्रेष्ठं पूज्यमानं सुरेश्वरैः । श्रेणिको गौतमं नत्वा पप्रच्छ बहुविस्मयः ॥१८३॥
भगवन् ! ब्रूहि किंनामा मुनिः सुरगणैरयम् । पूज्यते पूज्य ! किंवंशः प्राप्तो वाऽद्य किमद्भुतम् ॥१८४॥
गदतिस्म ततस्तस्मै विस्मिताय गतस्मयाः[1] । [2]आगमानुमितिज्ञाप्यविज्ञेयः श्रुतकेवली ॥१८५॥
श्रीमतोऽस्य महाराज ! शृणु श्रेणिक सन्मतेः । मुनेर्नाम च वंशं च माहात्म्यं च वदामि ते ॥१८६॥
जितशत्रुः क्षितौ ख्यातो धरित्रीपतिरत्र यः । प्राप्त एव धरित्रीश ! भवतः श्रोत्रगोचरम् ॥१८७॥
हरिवंशनभोभानुरभिभूतनृपस्थितिः । राज्यश्रियं परित्यज्य प्राव्राजीज्जिनसन्निधौ ॥१८८॥
तपो दुष्करमन्येषां बाह्यमाध्यात्मिकं च सः । कृत्वा प्राप्तोऽद्य घात्यन्ते[3] केवलज्ञानमद्भुतम् ॥१८९॥
तेनायममरैः सर्वैर्जैनमार्गोपबृंहकैः । स पुनर्बोधिलाभार्थं भक्तितोऽभ्यर्चितो यतिः ॥१९०॥
पुनः प्रणम्य भक्त्याऽसौ समुद्भूतकुतूहलः । पृच्छति स्म गणाधीशमिति श्रेणिकभूपतिः ॥१९१॥
क एष भगवान् ! वंशो हरिशब्दोपलक्षितः । जातः कदा क्व वा कीदृशः को वास्य प्रभवः पुमान् ॥१९२॥
कियन्तः समतिक्रान्ताः[4] प्रजारक्षणदक्षिणाः । धर्मार्थकाममोक्षाढ्या हरिवंशक्षितीश्वराः ॥१९३॥
इह भारतजातानां जिनानां चक्रवर्तिनाम् । हलिनां वासुदेवानां तथा चैषां प्रतिद्विषाम् ॥१९४॥

समूहको शान्त कर देती है उसी प्रकार जिनेन्द्र भगवान्‌की सद्धर्मदेशना जगत्त्रयके जीवोंकी समस्त भ्रान्तिको शान्त कर देती है ॥१८०॥

अथानन्तर जिनेन्द्र भगवान्‌की दिव्यध्वनिके बाद देवोंने उसका अनुसन्धान किया। तथा कुछ देव, दुन्दुभिके समान शब्द करते, पुष्पवृष्टि एवं रत्नवृष्टि करते हुए वनके एक देशमें स्थित एक महामुनिकी स्तुति करने लगे ॥१८१-१८२॥ इन्द्रोंके द्वारा पूजित उन श्रेष्ठ मुनिका नाम सुनकर अत्यधिक आश्चर्यसे युक्त राजा श्रेणिकने गौतम स्वामीको नमस्कार कर पूछा ॥१८३॥ कि हे भगवन् ! हे पूज्य ! कृपाकर कहिए कि देवलोग जिनकी पूजा कर रहे हैं ऐसे ये मुनि किस नामके धारक हैं ? इनका क्या वंश है ? और आज किस अतिशयको प्राप्त हुए हैं ? १८४॥ तदनन्तर जिनका अहंकार नष्ट हो गया था और जिन्होंने आगम तथा अनुमानके द्वारा जानने योग्य पदार्थोंको जान लिया था ऐसे श्रुतकेवली श्रीगौतम स्वामी, आश्चर्यसे भरे हुए राजा श्रेणिकसे कहने लगे कि ॥१८५॥ हे महाराज श्रेणिक ! मैं सद्बुद्धिके धारक इन श्रीमान् मुनिराजका नाम, वंश और माहात्म्य सब तुम्हारे लिए कहता हूँ सो श्रवण कर ॥१८६॥ हे पृथिवीपते ! इस पृथिवीपर जो जितशत्रु नामका प्रसिद्ध राजा था वह आपके कर्णगोचर हुआ होगा ॥१८७॥ जो हरिवंशरूपी आकाशका सूर्य था, जिसने अन्य राजाओंकी स्थितिको अभिभूत कर दिया था, जिसने राज्यलक्ष्मीका परित्याग कर जिनेन्द्रदेवके समीप प्रव्रज्या—दीक्षा धारण की थी तथा जिसने अन्य लोगोंके लिए कठिन बाह्य और आभ्यन्तर तप किया था आज वही राजा जितशत्रु घातिया कर्मोंको नष्ट कर आश्चर्य उत्पन्न करनेवाले केवलज्ञानको प्राप्त हुआ है ॥१८८-१८९॥ इसीलिए जिनमार्गकी प्रभावना करनेवाले समस्त देवोंने मिलकर रत्नत्रयकी प्राप्तिके लिए भक्तिपूर्वक इन मुनिराजकी पूजा की है ॥१९०॥

तदनन्तर जिसे कुतूहल उत्पन्न हो रहा था ऐसे श्रेणिक राजाने भक्तिपूर्वक पुनः प्रणामकर गणधरसे इस प्रकार पूछा कि हे भगवन् ! यह हरिवंश कौन है ? कब और कहाँ उत्पन्न हुआ है ? तथा इसका मूल कारण कौन पुरुष है ? ॥१९१-१९२॥ प्रजाकी रक्षा करनेमें समर्थ तथा धर्म, अर्थ, काम और मोक्षसे सहित ऐसे हरिवंशमें कितने राजा हो चुके हैं ? ॥१९३॥ यह कह

---

१. गतगर्वः । २. आगमानुमानेन शाप्यो ज्ञातव्यो ज्ञेयो यस्य स० । ३. घातिकर्मक्षयानन्तरम् । ४. उत्पद्योत्पद्य गता ।:

शृणोमि चरितं सर्वं वंशानां च समुद्भवम् । लोकालोकविभागोक्तिपूर्वकं वक्तुमर्हसि ॥१६५॥
जगाद गौतमः स्थाने[1] राजन् ! प्रश्नस्त्वया कृतः । शृणु सर्वं यथावत्ते कथयामि यथायथम् ॥१६६॥

शार्दूलविक्रीडितम्

त्रैलोक्यस्य सुखासुखानुभवनाधिष्ठानभूमेः स्थिरं,
संस्थानं प्रथमं तथैव विविधान् वंशावतारांस्ततः ।
भव्यार्थं हरिवंशसम्भवमतस्तद्वंशजान् भूपतीन्,
श्रीमच्छ्रेणिक ! कीर्तयामि भवते शुश्रूषवे श्रूयताम् ॥१६७॥

स्रग्धरा

[2]भव्यस्त्वाद्विप्रकृष्टेष्वपि च तनुभृतो देशकालस्वभावै-
र्भावेष्वाप्तोपदेशाद्विदधति विधिवन्निश्चयं निश्चितार्थम् ।
सद्दृष्टीनां हि मोहः प्रभवति भुवने तावदेवार्थदृष्टौ
यावन्नाभ्युदेति प्रथितजिनरविज्ञानभास्वन्मरीचिः ॥१६८॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ श्रेणिकप्रश्नवर्णनो नाम तृतीयः सर्गः ॥ ३ ॥

राजा श्रेणिकने पुनः कहा कि मैं इस भरत क्षेत्रमें उत्पन्न हुए तीर्थङ्करों, चक्रवर्तियों, बलभद्रों, नारायणों और प्रतिनारायणोंका समस्त चरित, वंशोंकी उत्पत्ति और लोकालोकका विभाग सुनना चाहता हूँ सो आप कहनेके योग्य हैं ॥१६४-१६५॥

यह सुन, गौतम स्वामीने कहा कि हे राजन् ! तूने ठीक प्रश्न किया है तू सब ठीक-ठीक श्रवण कर मैं यथायोग्य कहता हूँ ॥१६६॥ हे श्रीमन् ! हे श्रेणिक ! मैं सर्वप्रथम सुख-दुःख भोगनेके स्थानभूत तीन लोकका स्थिर आकार कहता हूँ। फिर विविध वंशोंके अवतारकी बात करूँगा तदनन्तर मनोहर अर्थसे युक्त हरिवंशकी उत्पत्ति कहूँगा और तत्पश्चात् श्रवण करनेके इच्छुक तेरे लिए हरिवंशमें उत्पन्न हुए राजाओंका कीर्तन करूँगा ॥१६७॥ भव्य जीव, श्रीआप्त भगवान्के उपदेशसे देश-काल और स्वभावसे दूरवर्ती पदार्थोंका भी विधिवत् यथार्थ निश्चय कर लेते हैं। यथार्थमें सम्यग्दृष्टि मनुष्योंका मोह, इस संसारमें पदार्थोंका ठीक-ठीक स्वरूप देखनेमें तभी तक अपना प्रभाव रख पाता है जब तक कि ज्ञानरूपी देदीप्यमान किरणोंसे युक्त श्रीजिनेन्द्र देवरूपी सूर्यका उदय नहीं होता ॥१६८॥

इस प्रकार जिसमें अरिष्टनेमिके पुराणका संग्रह किया गया है ऐसे श्रीजिनसेनाचार्य प्रणीत हरिवंश पुराणमें श्रेणिक प्रश्न वर्णन नामका तृतीय सर्ग समाप्त हुआ ॥३॥

---

१. युक्तः । २. भव्यत्वादिप्रकृष्टे—म० ।

चतुर्थः सर्गः

सर्वतोऽनन्तविस्तारमनन्तस्वप्रदेशकम् । द्रव्यान्तरविनिर्मुक्तमलोकाकाशमिष्यते ॥१॥
न लोक्यन्ते यतस्तस्मिन् जीवाजीवात्मकाः परे । भावा[1]स्ततस्तदुद्गीतमलोकाकाशसंज्ञया ॥२॥
न गतिर्न स्थितिस्तत्र जीवपुद्गलयोस्तयोः । निमित्तयोरभूतत्वात्[2] धर्माधर्मास्तिकाययोः ॥३॥
अनाद्यनिधनस्तस्य मध्ये लोको व्यवस्थितः । असंख्येयप्रदेशात्मा लोकाकाशविमिश्रितः ॥४॥
कालः पञ्चास्तिकायाश्च सप्रपञ्चा इहाखिलाः । लोक्यन्ते येन तेनायं लोक इत्यभिलप्यते ॥५॥ [युग्मम्]
वेत्रासनमृदङ्गोरुझल्लरीसदृशाकृतिः । अधश्चोर्ध्वं च तिर्यक् च यथायोग्यमिति त्रिधा ॥६॥
मुरजार्धमधोभागे तस्योर्ध्वं मुरजो यथा । आकारस्तस्य लोकस्य किं त्वेष चतुरस्रकः ॥७॥
कटिस्थकरयुग्मस्य वैशाखस्थानवर्तिनः[3] । बिभर्ति पुरुषस्यायं संस्थानमचलस्थितेः ॥८॥
अधोलोकस्य सप्ताधः स्वविस्तारेण रज्जवः । प्रदेशहानितो रज्जुस्तिर्यग्लोकेऽवशिष्यते ॥९॥
ऊर्ध्वं प्रदेशवृद्ध्यातः पञ्च ब्रह्मोत्तरान्तरे । ततः प्रदेशहान्योर्ध्वं रज्जुरेकावशिष्यते ॥१०॥
आयामस्तु त्रिलोकानां स्याच्चतुर्दशरज्जवः । सप्ताधो मन्दरादूर्ध्वं सार्धं तेनैव सह ताः ॥११॥
चित्राधोभागतो रज्जुर्द्वितीयान्ते समाप्यते । द्वितीयातस्तृतीयान्ते चतुर्थ्यन्ते ततोऽपरा ॥१२॥
पञ्चम्यन्ते चतुर्थी च षष्ठ्यन्ते पञ्चमी ततः । सप्तम्यन्ते च षष्ठी सा लोकान्ते सप्तमी स्थिता ॥१३॥

अथानन्तर सब ओरसे जिसका अनन्त विस्तार है, जिसके अपने प्रदेश भी अनन्त हैं तथा जो अन्य द्रव्योंसे रहित है वह अलोकाकाश कहलाता है ॥१॥ यतश्च उसमें जीवाजीवात्मक अन्य पदार्थ नहीं दिखाई देते हैं इसलिए वह अलोकाकाश इस नामसे प्रसिद्ध है ॥२॥ गति और स्थितिमें निमित्तभूत धर्मास्तिकाय अधर्मास्तिकायका अभाव होनेसे अलोकाकाशमें जीव और पुद्गलकी न गति ही है और न स्थिति ही है ॥३॥ उस अलोकाकाशके मध्यमें असंख्यातप्रदेशी तथा लोकाकाशसे मिश्रित अनादि लोक स्थित है ॥४॥ काल द्रव्य तथा अपने अवान्तर विस्तारसे सहित अन्य समस्त पञ्चास्तिकाय यतश्च इसमें दिखाई देते हैं इसलिए यह लोक कहलाता है ॥५॥ यह लोक नीचे, ऊपर और मध्यमें वेत्रासन, मृदङ्ग और बहुत बड़ी झालरके समान है अर्थात् अधोलोक वेत्रासन—मूँढाके समान है, ऊर्ध्वलोक मृदङ्गके तुल्य है और मध्यलोक जिसे तिर्यक् लोक भी कहते हैं झालरके समान है ॥६॥ नीचे आधा मृदङ्ग रख कर उसपर यदि पूरा मृदङ्ग रखा जाय तो जैसा आकार होता है वैसा ही लोकका आकार है किन्तु विशेषता यह है कि यह लोक चतुरस्र अर्थात् चौकोर है ॥७॥ अथवा कमरपर हाथ रख तथा पैर फैलाकर अचल-स्थिर खड़े हुए मनुष्यका जो आकार है उसी आकारको यह लोक धारण करता है ॥८॥ अपने विस्तारकी अपेक्षा अधोलोक नीचे सात रज्जु प्रमाण है, फिर क्रम-क्रमसे प्रदेशोंमें हानि होते-होते मध्यम लोकके यहाँ एक रज्जु विस्तृत रह जाता है ॥९॥ इसके ऊपर प्रदेश वृद्धि होते-होते ब्रह्मब्रह्मोत्तर स्वर्गके समीप पाँच रज्जु प्रमाण है। तदनन्तर उसके आगे प्रदेश हानि होते-होते लोकके अन्तमें एक रज्जु प्रमाण विस्तृत रह जाता है ॥१०॥ तीनों लोकोंकी लम्बाई चौदह रज्जु प्रमाण है। सात रज्जु सुमेरु पर्वतके नीचे और सात रज्जु उसके ऊपर है ॥११॥ चित्रा पृथिवीके अधोभागसे लेकर द्वितीय पृथिवीके अन्त तक एक रज्जु समाप्त होती है, इसके आगे तृतीय पृथिवीके अन्त तक द्वितीय रज्जु, चतुर्थ पृथिवीके अन्त तक तृतीय रज्जु, पञ्चम पृथिवीके अन्त तक चतुर्थ रज्जु, षष्ठ पृथिवीके अन्त तक पञ्चम रज्जु,

---

१. पदार्थाः । २. अविद्यमानत्वात् । ३. प्रसारितजङ्घाद्वयोर्ध्वस्थितस्य ।

चित्राधोदेशतस्तूर्ध्वं सार्धा रज्जुः समाप्यते । ऐशानान्ते ततः सार्धा माहेन्द्रान्ते तु तिष्ठति ॥१४॥
ततः कापिष्ठकल्पाग्रे रज्जुरेकावतिष्ठते । सा सहस्रारकल्पाग्रे ततोऽप्येका समाप्यते ॥१५॥
आरणाच्युतकल्पान्तवर्तिनी सा ततोऽपरा । सप्तमी तु ततो रज्जुरूर्ध्वलोकान्तनिष्ठिता ॥१६॥
रज्जुः प्रथमरज्ज्वन्ते सा षड्भिः सप्तभागकैः । अधोलोकस्य विस्तारो लोकविद्भिरुदाहृतः ॥१७॥
रज्जू द्वितीयरज्ज्वन्ते पञ्चभिः सप्तभागकैः । तिस्रस्तृतीयरज्ज्वन्ते चतुर्भिः सप्तभागकैः ॥१८॥
चतस्रस्तुर्यरज्ज्वन्ते सप्तभागैस्त्रिभिर्युताः । पञ्च पञ्चमरज्ज्वन्ते सप्तभागद्वयेन ताः ॥१९॥
षडेताः सप्तभागेन षष्ठरज्ज्वन्तगोचरे । सप्त सप्तमरज्ज्वन्ते विस्तारो रज्जवः स्मृताः ॥२०॥
ऊर्ध्वं च सार्धरज्ज्वन्ते रज्जू द्वे सप्तभागकैः । पञ्चभिः सह विस्तारो लोकस्य परिकीर्तितः ॥२१॥
परतः सार्धरज्ज्वन्ते सप्तभागैस्त्रिभिर्युताः । चतस्रो रज्जवो ज्ञेयो विस्तारो जगतस्ततः ॥२२॥
ततोऽर्धरज्जुपर्यन्ते ब्रह्मोत्तरमूर्धनि । विस्तारो रज्जवः पञ्चभुवनस्य निरूपितः ॥२३॥
कापिष्ठाग्रेऽर्धरज्ज्वन्ते सप्तभागै त्रिभिः सह । चतस्रो रज्जवो व्यासो जगतः प्रतिपादितः ॥२४॥

सप्तम पृथिवीके अन्त तक षष्ठ रज्जु और लोकके अन्त तक सप्तम रज्जु समाप्त होती है अर्थात् चित्रा पृथिवीके नीचे छह रज्जुकी लम्बाई तक सात पृथिवियाँ और उसके नीचे एक रज्जुके विस्तारमें निगोद तथा वातवलय हैं ॥१२–१३॥ यह तो चित्रा पृथिवीके नीचेका विस्तार बतलाया अब इसके ऊपर ऐशान स्वर्ग तक डेढ़ रज्जु, उसके आगे माहेन्द्र स्वर्गके अन्त तक फिर डेढ़ रज्जु, फिर कापिष्ठ स्वर्ग तक एक रज्जु, तदनन्तर सहस्रार स्वर्ग तक एक रज्जु, उसके आगे आरण अच्युत स्वर्ग तक एक रज्जु और उसके ऊपर ऊर्ध्व लोकके अन्त तक एक रज्जु इस प्रकार कुल सप्त रज्जु समाप्त होती हैं ॥१४–१६॥

चित्रा पृथिवीके नीचे प्रथम रज्जुके अन्तमें जहाँ दूसरी पृथिवी समाप्त होती है वहाँ लोकके जाननेवाले आचार्योंने अधोलोकका विस्तार एक रज्जु तथा द्वितीय रज्जुके सात भागोंमेंसे छह भाग प्रमाण बतलाया है ॥१७॥ द्वितीय रज्जुके अन्तमें जहाँ तीसरी पृथिवी समाप्त होती है वहाँ अधोलोकका विस्तार दो रज्जु पूर्ण और एक रज्जुके सात भागोंमेंसे पाँच भाग प्रमाण बताया है। तृतीय रज्जुके अन्तमें जहाँ चौथी पृथिवी समाप्त होती है वहाँ अधोलोकका विस्तार तीन रज्जु और एक रज्जुके सात भागोंमेंसे चार भाग प्रमाण बतलाया है ॥१८॥ चतुर्थ रज्जुके अन्तमें जहाँ पाँचवीं पृथिवी समाप्त होती है वहाँ अधोलोकका विस्तार चार रज्जु और एक रज्जुके सात भागोंमेंसे तीन भाग प्रमाण कहा गया है, पञ्चम रज्जुके अन्तमें जहाँ छठवीं पृथिवी समाप्त होती है वहाँ अधोलोकका विस्तार पाँच रज्जु और एक रज्जुके सात भागोंमेंसे दो भाग प्रमाण बतलाया है, षष्ठ रज्जुके अन्तमें जहाँ सातवीं पृथिवी समाप्त होती है वहाँ अधोलोकका विस्तार छह रज्जु और एक रज्जुके सात भागोंमेंसे एक भाग प्रमाण है तथा सप्तम रज्जुके अन्तमें जहाँ लोक समाप्त होता है वहाँ अधोलोकका विस्तार सात रज्जु प्रमाण कहा गया है ॥१९–२०॥

चित्रा पृथिवीके ऊपर डेढ़ रज्जुकी ऊँचाईपर जहाँ दूसरा ऐशान स्वर्ग समाप्त होता है वहाँ लोकका विस्तार दो रज्जु पूर्ण और एक रज्जुके सात भागोंमेंसे पाँच भाग प्रमाण कहा गया है ॥२१॥ उसके ऊपर डेढ़ रज्जु और चलकर जहाँ माहेन्द्र स्वर्ग समाप्त होता है वहाँ लोकका विस्तार चार रज्जु और एक रज्जुके सात भागोंमेंसे तीन भाग प्रमाण बताया गया है ॥२२॥ उसके आगे आधी रज्जु और चलकर जहाँ ब्रह्मोत्तर स्वर्ग समाप्त होता है वहाँ लोकका विस्तार पाँच रज्जु प्रमाण कहा गया है ॥२३॥ उसके ऊपर आधी रज्जु और चलकर जहाँ कापिष्ठ स्वर्ग समाप्त होता है वहाँ लोकका विस्तार चार रज्जु और एक रज्जुके सात भागोंमेंसे तीन भाग

ततोऽर्धरज्जुमानान्ते महाशुक्राग्रवर्तिनि । षट् सप्तभागसंयुक्तास्तिस्रो व्यासो जगद्गतः ॥२५॥
अर्धरज्ज्ववसानेऽतः सहस्रारान्तमिश्रिते । द्विसप्तभागसंयुक्ता व्यासस्तिस्रोऽस्य रज्जवः ॥२६॥
प्राणताग्रार्धरज्ज्वन्ते पञ्चसप्तांशमिश्रिते । द्वे रज्जू जगतो व्यासो व्यासविद्भिः प्रकाशितः ॥२७॥
अच्युतान्तार्धरज्ज्वन्ते सप्तभागेन सम्मिते । द्वे रज्जू रज्जुरेवान्तरज्ज्वन्ते लोकमस्तके ॥२८॥
अधोलोकोरुजङ्घादिस्तिर्यग्लोककटीतटः । ब्रह्मब्रह्मोत्तरोरस्को माहेन्द्रान्तस्तु मध्यभाग् ॥२९॥
आरणाच्युतसुस्कन्धो द्विपर्यन्तमहाभुजः । नवग्रैवेयकग्रीवोऽनुदिशोदग्रहनुद्वयः ॥३०॥
पञ्चानुत्तरसद्वक्त्रः सिद्धक्षेत्रललाटभृत् । सिद्धजीवश्रिताकाशदेशविस्तीर्णमस्तकः ॥३१॥
स्वोदरस्थितनिःशेषपुद्गलादिपदार्थकः । अपौरुषेय एवैष सल्लोकपुरुषः स्थितः ॥३२॥
घनोदधिरिमं लोकं घनवातश्च सर्वतः । तनुवातश्च तिष्ठन्ति त्रयोऽप्यावेष्ट्य वायवः ॥३३॥
आद्यो गोमूत्रवर्णोऽत्र मुद्गवर्णस्तु मध्यमः । सम्पृक्तानेकवर्णोऽन्त्यो बहिर्वलयमारुतः ॥३४॥
दण्डाकारा घनीभूता ऊर्ध्वाधोभागभागिनः । भङ्गराकृतयो लोकपर्यन्तेषु प्रभञ्जनाः ॥३५॥
योजनानां सहस्राणि प्रत्येकं विंशतिः स्मृताः । अधोविस्तारतस्तूर्ध्वं त्रयोऽप्यूनैकयोजनाः ॥३६॥
दण्डाकारपरित्यागे यथाक्रममयी पुनः । सप्तपञ्चचतुःसंख्या योजनानि वितन्वते ॥३७॥
प्रदेशहानितः पञ्च चत्वारि त्रीणि च क्रमात् । बाहुल्यं योजनान्येषां तिर्यग्लोके भवत्यतः ॥३८॥

प्रमाण बतलाया गया है ॥२४॥ उसके आगे आधी रज्जु और चलकर जहाँ महाशुक्र स्वर्ग समाप्त होता है वहाँ लोकका विस्तार तीन रज्जु और एक रज्जुके सात भागोंमेंसे छह भाग प्रमाण कहा गया है ॥२५॥ इसके ऊपर आधी रज्जु और चलकर जहाँ सहस्रार स्वर्गका अन्त आता है वहाँ लोकका विस्तार तीन रज्जु और एक रज्जुके सात भागोंमेंसे दो भाग प्रमाण बतलाया गया है ॥२६॥ इसके आगे आधी रज्जु और चलकर जहाँ प्राणत स्वर्गका अन्त आता है वहाँ लोकका विस्तार दो रज्जु और एक रज्जुके सात भागोंमेंसे पाँच भाग प्रमाण कहा गया है ॥२७॥ इसके ऊपर आधी रज्जु और चलकर जहाँ अच्युत स्वर्ग समाप्त होता है वहाँ लोकका विस्तार दो रज्जु और एक रज्जुके सात भागोंमेंसे एक भाग प्रमाण बतलाया है और इसके आगे सातवीं रज्जुके अन्तमें जहाँ लोककी सीमा समाप्त होती है वहाँ लोकका विस्तार एक रज्जु प्रमाण कहा गया है ॥२८॥ तीनों लोकोंमें अधोलोक तो पुरुष की जङ्घा तथा नितम्बके समान है, तिर्यग्लोक कमरके सदृश है, माहेन्द्र स्वर्गका अन्त मध्य अर्थात् नाभिके समान है, ब्रह्म-ब्रह्मोत्तर स्वर्ग छातीके समान है, तेरहवाँ, चौदहवाँ स्वर्ग भुजाके समान है, आरण-अच्युत स्वर्ग स्कन्धके समान है, नव ग्रैवेयक ग्रीवाके समान है, अनुदिश उन्नत ठोंड़ीके समान है, पञ्चानुत्तर विमान मुखके समान है, सिद्ध क्षेत्र ललाटके समान है और जहाँ सिद्ध जीवोंका निवास है ऐसा आकाश प्रदेश मस्तकके समान है ॥२९-३१॥ जिसके मध्यमें जीवादि समस्त पदार्थ स्थित हैं ऐसा यह लोकरूपी पुरुष अपौरुषेय ही है—अकृत्रिम ही है ॥३२॥ घनोदधि, घनवात और तनुवात ये तीनों वातवलय इस लोकको सब ओरसे घेरकर स्थित हैं ॥३३॥ आदिका घनोदधि वातवलय गोमूत्रके वर्णके समान है, बीचका घनवातवलय मूँगके समान वर्णवाला है और अन्तका तनुवातवलय परस्पर मिले हुए अनेक वर्णोंवाला है ॥३४॥ ये वातवलय दण्डके आकार लम्बे हैं, घनीभूत हैं, ऊपर नीचे तथा चारों ओर स्थित हैं, चञ्चलाकृति हैं तथा लोकके अन्ततक वेष्टित हैं ॥३५॥ अधोलोकके नीचे तीनों वलयोंमेंसे प्रत्येकका विस्तार बीस-बीस हजार योजन है और लोकके ऊपर तीनों वातवलय कुछ कम एक योजन विस्तारवाले हैं ॥३६॥ अधोलोकके नीचे तीनों वातवलय दण्डाकार हैं और ऊपर चलकर जब ये दण्डाकारका परित्याग करते हैं अर्थात् लोकके आजू-बाजूमें खड़े होते हैं तब क्रमशः सात, पाँच और चार योजन विस्तारवाले रह जाते हैं ॥३७॥ तदनन्तर प्रदेशोंमें हानि होते-होते मध्यम लोकके यहाँ इनका विस्तार क्रमसे पाँच,

प्रदेशवृद्धितः सप्त पञ्च चत्वारि च क्रमात् । योजनान्युपर्यायन्ते ब्रह्मब्रह्मोत्तरान्तिके ॥३९॥
पुनः प्रदेशहान्यैवं पञ्च चत्वारि च क्रमात् । त्रीणि चैव भवन्त्येषां योजनानि शिवान्तके ॥४०॥
अर्धयोजनबाहुल्यो मस्तकेषु घनोदधिः । घनवातस्तदर्धः स्यात्तनुवातस्तदूनकः ॥४१॥
भ्राजते वातवलयैः सर्वतस्त्रिभिरावृतः । कवचैरिव लोकस्तैर्महालोकजिगीषया ॥४२॥
अत्र रत्नप्रभाद्येयं द्वितीया शर्कराप्रभा । प्रथिता पृथिवी लोके तृतीया बालुकाप्रभा ॥४३॥
पङ्कप्रभा चतुर्थी तु पञ्चमी पृथिवी तथा । धूमप्रभा विनिर्दिष्टा षष्ठी चापि तमःप्रभा ॥४४॥
महातमःप्रभा भूमिः सप्तमी च घनोदधौ । वलयाधिष्ठिताः ह्येताः सप्ताधोऽधो व्यवस्थिताः ॥४५॥
गोत्राख्यया तु ताः ख्याता घर्मा वंशा यथाक्रमम् । मेघाञ्जनाप्यरिष्टा च मघवी माघवीति च ॥४६॥
लक्षैका योजनानां स्यात् सहाशीतिसहस्रिका । त्रिभिर्भागैर्विभक्तं च बाहुल्यं प्रथमक्षितेः ॥४७॥
योजनानां सहस्राणि खरभागेऽत्र षोडश । अशीतिः पङ्कबहुले चतुर्भिरधिकानि तु ॥४८॥
तथैवाब्बहुले भागे बाहुल्यं सुविनिश्चितम् । शाक्तेऽशीतिसहस्राणि योजनानि जिनेशिनाम् ॥४९॥
तं पङ्कबहुलं भागं भासयन्ति यथायथम् । रक्षसामसुराणां च निवासा रत्नभासुराः ॥५०॥
खरभागं नवानां तु वासा भवनवासिनाम् । भूषयन्ति महाभासा बहुभेदाः स्वयंप्रभाः ॥५१॥
चित्राख्यं पटलं पूर्वं वज्राख्यं तु ततः परम् । वैडूर्याख्यं ततो ज्ञेयं लोहिताङ्काख्यमप्यतः ॥५२॥
मसारगल्वगोमेद[1]प्रवालपटलान्यतः । ज्योती रसाञ्जनाख्ये च तथैवाञ्जनमूलकम् ॥५३॥
अङ्कस्फटिकसंज्ञे च चन्द्राभाख्यं च वर्चकम् । बहुशिलामयं चेति पटलानि हि षोडश ॥५४॥
एकैकस्य तु बाहुल्यं सहस्रगुणयोजनम् । पटलस्य तदात्मासौ खरभागः प्रभासुरः ॥५५॥

चार और तीन योजन रह जाता है ॥३८॥ तदनन्तर प्रदेशोंमें वृद्धि होनेसे ब्रह्म-ब्रह्मोत्तर नामक पाँचवें स्वर्गके अन्तमें क्रमशः सात, पाँच और चार योजन विस्तृत हो जाते हैं ॥३९॥ पुनः प्रदेशोंमें हानि होनेसे मोक्ष स्थानके समीप क्रमसे पाँच, चार और तीन योजन विस्तृत रह जाते हैं ॥४०॥ तदनन्तर लोकके ऊपर पहुँच कर घनोदधि वातवलय आधा योजन अर्थात् दो कोस, घनवात वलय उससे आधा अर्थात् एक कोस और तनुवातवलय उससे कुछ कम अर्थात् पन्द्रह-से पचहत्तर धनुष प्रमाण विस्तृत है ॥४१॥ तीनों वातवलयोंसे घिरा हुआ यह लोक ऐसा जान पड़ता है मानो महालोक जीतनेकी इच्छासे कवचोंसे ही आवेष्टित हुआ हो ॥४२॥

इस लोकमें पहली रत्नप्रभा, दूसरी शर्कराप्रभा, तीसरी बालुकाप्रभा, चौथी पङ्कप्रभा, पाँचवीं धूमप्रभा, छठवीं तमःप्रभा और सातवीं महातमःप्रभा ये सात भूमियाँ हैं। ये सातों भूमियाँ तीनों वातवलयोंपर अधिष्ठित तथा क्रमसे नीचे-नीचे स्थित हैं। अन्तमें चलकर ये सभी अधोलोकके नीचे स्थित घनोदधिवातवलय पर अधिष्ठित हैं ॥४३-४५॥ इन पृथिवियोंके रूढ़ि नाम क्रमसे घर्मा, वंशा, मेघा, अञ्जना, अरिष्टा, मघवी और माघवी भी हैं ॥४६॥ पहली रत्नप्रभा पृथिवी एक लाख अस्सी हजार योजन मोटी है तथा खर भाग, पङ्क भाग और अब्बहुल भाग इन तीन भागोंमें विभक्त है ॥४७॥ पहला खर भाग सोलह हजार योजन मोटा है, दूसरा पङ्क भाग चौरासी हजार योजन मोटा है और तीसरा अब्बहुल भाग अस्सी हजार योजन मोटा है ॥४८-४९॥ पङ्क भागको राक्षसों तथा असुरकुमारोंके रत्नमयी देदीप्यमान भवन यथा क्रमसे सुशोभित कर रहे हैं ॥५०॥ तथा खर भागको नौ भवनवासियोंके महाकान्तिसे युक्त, स्वयं जगमगाते हुए नाना प्रकारके भवन अलंकृत कर रहे हैं ॥५१॥ खर भागके १ चित्रा, २ वज्रा, ३ वैडूर्य, ४ लोहिताङ्क, ५ मसारगल्व, ६ गोमेद, ७ प्रवाल, ८ ज्योति, ९ रस, १० अञ्जन, ११ अञ्जनमूल, १२ अङ्क, १३ स्फटिक, १४ चन्द्राभ, १५ वर्चस्क और १६ बहु-शिलामय ये सोलह पटल हैं ॥५२-५४॥ इनमेंसे प्रत्येक पटलकी मोटाई एक-एक हजार योजन

१. गोमेध—क० ।

विज्ञेयाः पङ्कबहुलाच्छेषाः षडपि भूमयः । स्वस्वबाहुल्यहीनैकरज्ज्वायामनिजान्तराः ॥५६॥
द्वात्रिंशदथ बाहुल्यमष्टाविंशतिरेव च । चतुर्विंशतिरप्यासां विंशतिः षोडशाष्ट च ॥५७॥
योजनानां सहस्राणि षण्णामपि यथाक्रमम् । पृथिवीनां विनिर्दिष्टं दृष्टतत्त्वैर्जिनेश्वरैः ॥५८॥
दशानामसुरादीनां प्रथमायां च सद्मनाम् । संख्या सा प्रतिपत्तव्या परिपाट्या व्यवस्थिता ॥५९॥
चतुःषष्टिः स्मृता लक्षा अशीतिश्चतुरुत्तरा । द्वासप्ततिस्तथा लक्षाः षण्णां षट्सप्ततिस्ततः ॥६०॥
भवनानां तथा लक्षा नवतिश्च षडुत्तरा । चैत्यालयाश्च विज्ञेयाः प्रत्येकं सद्मसंख्यया ॥६१॥
चतुर्दश सहस्राणि षोडशापि यथाक्रमम् । भूतानां राक्षसानां च सन्ति सद्मान्यधो भुवः ॥६२॥
असुरा नागनामानः सुपर्णास्तनयामराः । द्वीपोदधिकुमाराश्च तथैव स्तनितामराः ॥६३॥
विद्युत्कुमारनामानो दिक्कुमारास्तथाऽपरे । देवा अग्निकुमाराश्च कुमारा वायुपूर्वकाः ॥६४॥
मणिद्युमणिनित्याभे पाताले निवसन्ति ते । यथायथं निवासेषु देवा भवनवासिनः ॥६५॥
असुराणां च तत्रायुः साधिकः सागरः स्मृतः । तथा नागकुमाराणां ज्ञेयं पल्योपमत्रयम् ॥६६॥
तत् सुपर्णकुमाराणां सार्धं पल्योपमद्वयम् । द्वयं द्वीपकुमाराणां शेषाणां पल्यमर्धभाक् ॥६७॥
असुराणां धनूंषि स्यादुत्सेधः पञ्चविंशतिः । भौमैर्दशैव शेषाणां ज्योतिषां सप्त तत्त्वतः ॥६८॥
सौधर्मैशानयोर्देवाः सप्तहस्तोच्छ्रयास्ततः । एकार्धहानौ सर्वार्थसिद्धौ हस्तोऽवशिष्यते ॥६९॥
अतः परं प्रवक्ष्यामि शृणु श्रेणिक ! लेशतः । सप्तानामपि भूमीनां क्रमेण नरकालयान् ॥७०॥

है तथा देदीप्यमान खर भाग इन सोलह पटल स्वरूप ही है ॥५५॥ पङ्क भागसे शेष छह भूमियोंका अपना-अपना अन्तर अपनी-अपनी मोटाईसे कम एक-एक रज्जु प्रमाण है ॥५६॥ समस्त तत्त्वोंको प्रत्यक्ष देखनेवाले श्री जिनेन्द्र देवने द्वितीयादि पृथिवियोंकी मोटाई क्रमसे बत्तीस हजार, अट्ठाईस हजार, चौबीस हजार, बीस हजार, सोलह हजार और आठ हजार योजन बतलाई है ॥५७-५८॥

प्रथम पृथिवीमें असुरकुमार आदि दसभवनवासी देवोंके भवनोंकी संख्या निम्न प्रकार जानना चाहिए—असुर कुमारोंके चौंसठ लाख, नागकुमारोंके चौरासी लाख, गरुडकुमारोंके बहत्तर लाख, द्वीपकुमार, उदधिकुमार, मेघकुमार, दिक्कुमार, अग्निकुमार और विद्युत्कुमार इन छह कुमारोंके छिहत्तर लाख तथा वायुकुमारोंके छियानबे लाख भवन हैं। ये सब भवन श्रेणि रूपसे स्थित हैं तथा प्रत्येकमें एक-एक चैत्यालय हैं ॥५९-६१॥ पृथिवीके नीचे भूतोंके चौदह हजार और राक्षसोंके सोलह हजार भवन यथाक्रमसे स्थित हैं ॥६२॥ जहाँ मणिरूपी सूर्यकी निरन्तर आभा फैली रहती है ऐसे पाताल लोकमें असुरकुमार, नागकुमार, सुपर्णकुमार, द्वीपकुमार, उदधिकुमार, स्तनितकुमार, विद्युत्कुमार, दिक्कुमार, अग्निकुमार और वायुकुमार ये दस प्रकारके भवनवासी देव यथायोग्य अपने-अपने भवनोंमें निवास करते हैं ॥६३-६५॥ उनमें असुरकुमारोंकी उत्कृष्ट-आयु कुछ अधिक एक सागर, नागकुमारोंकी तीन पल्य, सुपर्णकुमारोंकी अढ़ाई पल्य, द्वीपकुमारोंकी दो पल्य और शेष छह कुमारोंकी डेढ़ पल्य प्रमाण है ॥६६-६७॥ असुरकुमारोंकी ऊँचाई पच्चीस धनुष, शेष नौ प्रकारके भवनवासियों तथा व्यन्तरोंकी दस धनुष और ज्योतिषी देवोंकी सात धनुष है ॥६८॥ सौधर्म और ऐशान स्वर्गके देवोंकी ऊँचाई सात हाथ है। उसके आगे एक तथा आधा हाथ कम होते-होते सर्वार्थसिद्धिमें एक हाथकी ऊँचाई रह जाती है। भावार्थ—पहले दूसरे स्वर्गमें सात हाथ, तीसरे चौथे स्वर्गमें छह हाथ, पाँचवें, छठवें, सातवें, आठवें स्वर्गमें पाँच हाथ, नौवें, दसवें, ग्यारहवें, बारहवें स्वर्गमें चार हाथ, तेरहवें, चौदहवेंमें साढ़े तीन हाथ, पन्द्रहवें सोलहवें स्वर्गमें तीन हाथ, अधोग्रैवेयकोंमें अढ़ाई हाथ, मध्यम ग्रैवेयकोंमें दो हाथ, उपरि ग्रैवेयकोंमें तथा अनुदिश विमानोंमें डेढ़ हाथ और अनुत्तर विमानोंमें एक हाथ ऊँचाई है ॥६९॥ गौतम स्वामी कहते हैं कि हे श्रेणिक ! अब इसके आगे संक्षेपसे रत्नप्रभा आदि सातों भूमियोंके बिलोंका यथाक्रमसे वर्णन करता हूँ सो सुन ॥७०॥

अबन्त्यब्बहुले भागे घर्मायां नारकाश्रयाः । योजनानां सहस्रं तु मुक्त्वोर्ध्वाधोविभागयोः ॥७१॥
अयमेव क्रमो ज्ञेयः शेषास्वपि च भूमिषु । सप्तम्यां मध्यदेशेऽमी सन्ति क्रोशपञ्चके ॥७२॥
लक्षा नरकभेदानां स्युस्त्रिंशत्पञ्चविंशतिः । तासु पञ्चदशैवैता दश तिस्रस्तथैव च ॥७३॥
पञ्चोनापि च लक्षैका पञ्च चैव यथाक्रमम् । लक्षाश्चतुरशीतिः स्युस्तेषां संग्रहसंख्यया ॥७४॥
त्रयोदश यथासंख्यमेकादश नवापि च । सप्त पञ्च त्रयश्चैकः प्रस्तारास्तासु भूमिषु ॥७५॥
सीमन्तको मतः पूर्वो नरको रौरुकस्ततः । भ्रान्तोद्भ्रान्तौ च सम्भ्रान्तः परोऽसम्भ्रान्त एव च ॥७६॥
विभ्रान्तश्च तथा त्रस्तो घर्मायां त्रसितः परः । वक्रान्तश्चाप्यवक्रान्तो विक्रान्तश्चेन्द्रकाः स्मृताः ॥७७॥
स्तरकः स्तनकश्चैव मनको वनकस्तथा । घाटसंघाटनामानौ जिह्वाख्यो जिह्विकाभिधः ॥७८॥
लोलश्च लोलुपश्चापि तथाऽन्यस्तनलोलुपः । वंशायामिन्द्रका ह्येते जिनैरेकादशोदिताः ॥७९॥
तप्तश्च तपितश्चान्यस्तपनस्तापनः परः । पञ्चमश्च निदाघाख्यः षष्ठः प्रज्वलितो मतः ॥८०॥
तथैवोज्ज्वलितो ज्ञेयस्ततः सञ्ज्वलितोऽष्टमः । सम्प्रज्वलित इत्यन्यस्तृतीयायां नवेन्द्रकाः ॥८१॥
आरस्तारश्च मारश्च वर्चस्कस्तमकस्तथा । खडः खडखडश्चेति चतुर्थ्यां सप्त वर्णिताः ॥८२॥
तमो भ्रमो झषोऽन्तश्च तामिस्रश्चेत्यमी स्मृताः । इन्द्रका नगराकाराः पञ्चम्यां पञ्च संहिताः ॥८३॥
हिमवर्दललल्लकाख्यः षष्ठ्यामपीन्द्रकाः । सप्तम्यामप्रतिष्ठानमेकमेवेन्द्रकं विदुः ॥८४॥
ज्ञेया ह्येकोनपञ्चाशदिन्द्रकाः संयुतास्त्वमी । अधोऽधो न्यूनका द्वाभ्यामुपर्युपरि वृद्धयः ॥८५॥
सीमन्तके चतुर्दिक्षु प्रत्येकं नारकालयाः । तिष्ठन्त्येकोनपञ्चाशत् श्रेणिबद्धा महान्तराः ॥८६॥
तावन्त एव चैकोनाः श्रेणिबद्धाः विदिक्षु च । प्रत्येकं बहवस्तेभ्यस्ताभ्योऽन्यत्र प्रकीर्णकाः ॥८७॥

घर्मा नामक पहिली पृथिवीके अब्बहुल भागमें ऊपर-नीचे एक-एक हजार योजन छोड़कर नारकियोंके बिल हैं। यही क्रम शेष पृथिवियोंमें भी समझना चाहिए, किन्तु सातवीं पृथिवीमें पैंतीस कोशके विस्तारवाले मध्य देशमें बिल हैं ॥७१–७२॥ पहली पृथिवीमें तीस लाख, दूसरीमें पच्चीस लाख, तीसरीमें पन्द्रह लाख, चौथीमें दस लाख, पाँचवींमें तीन लाख, छठवींमें पाँच कम एक लाख, सातवींमें पाँच और सातोंमें सब मिलाकर चौरासी लाख बिल हैं ॥७३–७४॥ उन पृथिवियोंमें क्रमसे तेरह, ग्यारह, नौ, सात, पाँच, तीन और एक प्रस्तार अर्थात् पटल हैं॥७५॥ घर्मा पृथिवीके तेरह प्रस्तारोंमें क्रमसे निम्नलिखित तेरह इन्द्रक बिल हैं—१ सीमन्तक, २ नारक, ३ रौरुक, ४ भ्रान्त, ५ उद्भ्रान्त, ६ संभ्रान्त, ७ असंभ्रान्त, ८ विभ्रान्त, ९ त्रस्त, १० त्रसित ११ वक्रान्त, १२ अवक्रान्त और १३ विक्रान्त ॥७६–७७॥ श्री जिनेन्द्र देवने वंशा नामक दूसरी पृथिवीके ग्यारह प्रस्तारोंमें निम्नाङ्कित ग्यारह इन्द्रक बिल बतलाये हैं—१ तरक, २ स्तनक ३ मनक, ४ वनक, ५ घाट, ६ संघाट, ७ जिह्वा, ८ जिह्वक, ९ लोल, १० लोलुप और ११ स्तन-लोलुप ॥७८–७९॥ तीसरी मेघा पृथिवीके नौ प्रस्तारोंमें निम्न प्रकार नौ इन्द्रक बिल बतलाये हैं—१ तप्त, २ तपित, ३ तपन, ४ तापन, ५ निदाघ, ६ प्रज्वलित, ७ उज्ज्वलित, ८ संज्वलित और ९ संप्रज्वलित ॥८०–८१॥ चौथी पृथिवीके सात प्रस्तारोंमें क्रमसे निम्नलिखित सात इन्द्रक बिल हैं—१ आर, २ तार, ३ मार, ४ वर्चस्क, ५ तमक, ६ खड और ७ खडखड ॥८२॥ पाँचवीं पृथिवीके पाँच प्रस्तारोंमें निम्नलिखित पाँच इन्द्रक बिल हैं—१ तम, २ भ्रम, ३ झष, ४ अन्त और ५ तामिस्र। ये इन्द्रक बिल नगरोंके आकार हैं ॥८३॥ छठवीं पृथिवीमें १ हिम, २ वर्दल और ३ लल्लक ये तीन इन्द्रक बिल हैं ॥८४॥ सातों पृथिवियोंके सब इन्द्रक मिलकर उनचास हैं। ऊपरसे नीचेकी ओर प्रत्येक पृथिवीमें दो-दो कम होते जाते हैं और नीचेसे ऊपरकी ओर प्रत्येक पृथिवी-में दो-दो अधिक होते जाते हैं ॥८५॥ प्रथम पृथिवीके प्रथम प्रस्तार सम्बन्धी सीमन्तक इन्द्रक बिलकी चारों दिशाओंमें प्रत्येकमें उनचास-उनचास श्रेणिबद्ध बिल हैं और ये परस्पर बहुत भारी अन्तरको लिये हुए हैं ॥८६॥ इसी सीमन्तक बिलकी चार विदिशाओंमें प्रत्येकमें अड़तालीस अड़तालीस श्रेणिबद्ध बिल हैं। इन श्रेणियों तथा श्रेणिबद्ध बिलोंके सिवाय बहुतसे प्रकीर्णक बिल

एकैको हीयते चाधः सीमन्तनरकादिषु । चतुःशेषोऽप्रतिष्ठानो न श्रेणी न प्रकीर्णकाः ॥८८॥
शतं षण्णवतं दिक्षु चतुरूनं विदिक्षु तत् । सीमन्तकस्य तन्मिश्रमष्टाशीतं शतत्रयम् ॥८९॥
शतं द्वानवतं दिक्षु साष्टाशीति विदिक्षु तत् । कुण्डानां नरकस्यैतद् युक्त्वाशीत्या शतत्रयम् ॥९०॥
अष्टाशीतं शतं दिक्षु चतुरूनं विदिक्षु तत् । रौरुकस्य विमिश्रं तद् द्वासप्तत्या शतत्रयम् ॥९१॥
शतं चतुरशीतिश्च भ्रान्ते दिक्षु विदिक्षु तत् । साशीति नारकं मिश्रं चतुःषष्ट्या शतत्रयम् ॥९२॥
साशीतिकं शतं दिक्षु षट्सप्तत्या विदिक्षु तत् । षट्पञ्चाशद्विमिश्रं स्यादुद्भ्रान्तस्य शतत्रयम् ॥९३॥
षट्सप्तत्या शतं दिक्षु द्वासप्तत्या विदिक्षु तत् । द्व्यूनपञ्चाशता मिश्रं सम्भ्रान्तस्य शतत्रयम् ॥९४॥
द्वासप्तत्या शतं दिक्षु साष्टषष्ट्या विदिक्षु तत् । असम्भ्रान्तस्य मिश्रं तच्चत्वारिंशं शतत्रयम् ॥९५॥
साष्टषष्टिशतं दिक्षु चतुःषष्ट्या विदिक्षु तत् । द्वात्रिंशं तद्द्वयं युक्तं विभ्रान्तस्य शतत्रयम् ॥९६॥
चतुःषष्ट्या शतं दिक्षु शतं षष्ट्या विदिक्षु च । त्रस्तस्य तद्द्वयं मिश्रं चतुर्विंशं शतत्रयम् ॥९७॥
शतं षष्ट्याधिकं दिक्षु षट्पञ्चाशं विदिक्षु तत् । त्रसितस्य समायुक्तं षोडशाग्रं शतत्रयम् ॥९८॥
षट्पञ्चाशं शतं दिक्षु द्वापञ्चाशं विदिक्षु तत् । वक्रान्तस्य समायुक्तमष्टोत्तरशतत्रयम् ॥९९॥
द्विपञ्चाशं शतं दिक्षु चत्वारिंशं सहाष्टभिः । विदिक्षु मिश्रितं तत्स्यादवक्रान्ते शतत्रयम् ॥१००॥

भी हैं ।।८७।। इन सीमन्तक आदि नरकोंमें नीचे-नीचे क्रम-क्रमसे एक-एक विल कम होता जाता है इस प्रकार सातवीं पृथिवीके अप्रतिष्ठान नामक इन्द्रकको चार दिशाओंमें एक-एकके क्रमसे केवल चार विल हैं । वहाँ न श्रेणी है और न प्रकीर्णक विल ही हैं ।।८८।। इस प्रकार प्रथम पृथिवीके प्रथम सीमन्तक इन्द्रककी चार दिशाओंमें एक सौ छियानवे, चार विदिशाओंमें एक सौ बानबे और सब मिलाकर तीन सौ अठासी श्रेणीबद्ध विल हैं ।।८९।। दूसरे प्रस्तारके नारक इन्द्रककी चार दिशाओंमें एक सौ बानबे, चार विदिशाओंमें एक सौ अठासी और सब मिलाकर तीन सौ अस्सी श्रेणिबद्ध विल हैं ।।९०।। तीसरे प्रस्तारके रौरुक इन्द्रककी चार दिशाओंमें एक सौ अठासी, चार विदिशाओंमें एक सौ चौरासी और सब मिलाकर तीन सौ बहत्तर श्रेणिबद्ध विल हैं ।।९१।। चौथे प्रस्तारके भ्रान्त नामक इन्द्रककी चार दिशाओंमें एक सौ चौरासी, विदिशाओंमें एक सौ अस्सी और सब मिलाकर तीन सौ चौसठ श्रेणिबद्ध विल हैं ।।९२।। पाँचवें प्रस्तारके उद्भ्रान्त नामक इन्द्रक विलकी चार दिशाओंमें एक सौ अस्सी, विदिशाओंमें एक सौ छिहत्तर और सब मिलाकर तीन सौ छप्पन श्रेणिबद्ध विल हैं ।।९३।। छठवें प्रस्तारके सम्भ्रान्त नामक इन्द्रक विलकी चार दिशाओंमें एक सौ छिहत्तर, विदिशाओंमें एक सौ बहत्तर और सब मिलाकर तीन सौ अड़तालीस श्रेणिबद्ध विल हैं ।।९४।। सातवें प्रस्तारके असम्भ्रान्त नामक इन्द्रक विलकी चारों दिशाओंमें एक सौ बहत्तर, विदिशाओंमें एक सौ अड़सठ और सब मिलाकर तीन सौ चालीस श्रेणीबद्ध विल हैं ।।९५।। आठवें प्रस्तारके विभ्रान्त नामक इन्द्रक विलकी चार दिशाओंमें एक सौ अड़सठ, विदिशाओंमें एकसौ चौसठ और सब मिलाकर तीन सौ बत्तीस श्रेणीबद्ध विल हैं ।।९६।। नौवें प्रस्तारके त्रस्त नामक इन्द्रक विलकी चार दिशाओंमें एक सौ चौसठ, विदिशाओंमें एक सौ साठ और सब मिलाकर तीन सौ चौबीस श्रेणिबद्ध विल हैं ।।९७।। दसवें प्रस्तरके त्रसित नामक इन्द्रक विलकी चार दिशाओंमें एक सौ साठ, विदिशाओंमें एक सौ छप्पन और सब मिलाकर तीन सौ सोलह श्रेणिबद्ध विल हैं ।।९८।। ग्यारहवें प्रस्तारके वक्रान्त नामक इन्द्रक विलकी चार दिशाओंमें एक सौ छप्पन, विदिशाओंमें एक सौ बावन और सब मिलाकर तीन सौ आठ श्रेणिबद्ध विल हैं ।।९९।। बारहवें प्रस्तरके अवक्रान्त नामक इन्द्रक विलकी चार दिशाओंमें एकसौ बावन, विदिशाओंमें एक सौ अड़तालीस और सब मिलाकर तीन सौ श्रेणिबद्ध विल हैं ।।१००।।

१. सल्लका म०, ख० ।

चत्वारिंशं शतं दिक्षु विक्रान्तस्य सहाष्टभिः । चत्वारिंशं चतुर्भिस्तद् विदिक्षु परिकीर्तितम् ॥१०१॥
द्वयं तत्र समायुक्तं द्वयं द्वानवतं शतम् । इन्द्रके नरकाणां स्यात् परिवारस्त्रयोदशे ॥१०२॥
श्रेणिबद्धान्यमूनि स्युः सहस्राणीन्द्रकैः सह । त्रयस्त्रिंशच्चतुःशत्या चत्वारि समुदायतः ॥१०३॥
ये लक्षास्त्रिंशदेकोना नवतिः पञ्च पञ्चभिः । सहस्राणि शतैस्तेऽपि ससषष्ट्या प्रकीर्णकाः ॥१०४॥
चत्वारिंशं शतं दिक्षु चतुर्भिस्तरकस्य तत् । विदिक्षु चतुरूनं द्वे अशीत्या चतुरन्तया ॥१०५॥
चत्वारिंशं शतं दिक्षु षट्त्रिंशं तु विदिक्षु तत् । स्तनकस्य समस्तं तत् षट्सप्तत्या शतद्वयम् ॥१०६॥
षट्त्रिंशं हि शतं दिक्षु द्वात्रिंशं तु विदिक्षु तत् । मनकस्य समस्तं तत् साष्टषष्टि शतद्वयम् ॥१०७॥
द्वात्रिंशं हि शतं दिक्षु स्वष्टाविंशं विदिक्षु तत् । वनकस्य समस्तं तत् षष्ट्या युक्तं शतद्वयम् ॥१०८॥
अष्टाविंशं शतं दिक्षु चतुर्विंशं विदिक्षु तत् । घाटस्यापि समस्तं तत् द्वापञ्चाशं शतद्वयम् ॥१०९॥
चतुर्विंशं शतं दिक्षु विंशमेव विदिक्षु तत् । सङ्घाटस्य चतुर्युक्तं चत्वारिंशं शतद्वयम् ॥११०॥
दिक्षु विंशं शतं ज्ञेयं षोडशाग्रं विदिक्षु तत् । जिह्वाख्यस्य समस्तं तत् षट्त्रिंशं हि शतद्वयम् ॥१११॥
षोडशाग्रं शतं दिक्षु द्वादशाग्रं विदिक्षु तत् । जिह्वकाख्यस्य युक्तं स्यादष्टाविंशं शतद्वयम् ॥११२॥
द्वादशाग्रं शतं दिक्षु विदिक्ष्वष्टोत्तरं शतम् । लोलस्यापि समस्तं तत् विंशत्यग्रं शतद्वयम् ॥११३॥
अष्टोत्तरशतं दिक्षु विदिक्षु चतुरुत्तरम् । लोलुपस्य समस्तं तत् द्वादशाग्रं शतद्वयम् ॥११४॥
चतुर्भिश्च शतं दिक्षु विदिक्षु शतमायतम् । स्तनलोलुपाख्यस्य चतुर्युक्तं शतद्वयम् ॥११५॥

अष्टापञ्चाशदुत्सेधो धनूंषि त्र्यङ्गुलानि च । त्रयः सप्तमभागाश्च षडेऽपि प्रकटस्थिताः ॥३३१॥
द्विषष्टिस्तु धनूंषि द्वौ हस्तौ षडषडे मतः । उत्सेधः सुप्रसिद्धो यश्चतुर्थे नरके सताम्[1] ॥३३२॥
तमोनामनि चोत्सेधः कोदण्डाः पञ्चसप्ततिः । सप्ताशीतिरसौ दण्डा द्वौ हस्तौ भवति भ्रमे ॥३३३॥
वपुषो नारकीयस्य झषे शतधनूंषि सः । अन्धे द्वादशमिश्राणि तानि हस्तद्वयं मतम् ॥३३४॥
तमिस्रेऽपि च तान्येव पञ्चविंशतिदण्डकैः । उत्सेधो वर्णितो योऽसौ पञ्चमे नरके बुधैः ॥३३५॥
षट्षष्ट्या शतकोदण्डा द्वौ हस्तौ षोडशाङ्गुली । उत्सेधो वर्णितः पूर्णो हिमनामनि चेन्द्रके ॥३३६॥
द्विशत्यष्टौ च कोदण्डा हस्तोऽष्टावङ्गुलान्यपि । उत्सेधः शास्त्रनेत्राढ्यैर्वर्दलेऽपि विलोकितः ॥३३७॥
शतद्वयं च पञ्चाशद्धनूंष्येव स भासितः । लल्लके नरके षष्ठे निष्ठितार्थैयं दृश्यते ॥३३८॥

नामक नौवें प्रस्तारमें ऊँचाईका प्रमाण इकतीस धनुष तथा एक हाथ प्रमाण कहा जाता है। इस प्रकार तीसरी पृथिवीमें नारकियोंकी ऊँचाईका वर्णन किया ॥३२५॥

चौथी पृथिवीके आर नामक प्रथम प्रस्तारमें पैंतीस धनुष, दो हाथ, बीस अंगुल और एक अंगुलके सात भागोंमें चार भाग प्रमाण ऊँचाई कही गई है ॥३२६॥ तार नामक दूसरे प्रस्तारमें चालीस धनुष, सत्रह अंगुल और एक अंगुलके सात भागोंमें एक भाग प्रमाण नारकियों-की ऊँचाई है ॥३२७॥ मार नामक तीसरे प्रस्तारमें चवालीस धनुष, दो हाथ, तेरह अंगुल और एक अंगुलके सात भागोंमें पाँच भाग प्रमाण ऊँचाई मानी गई है ॥३२८॥ वर्चस्क नामक चौथे प्रस्तारमें विद्वानोंने शरीरकी ऊँचाई उनचास धनुष, दश अंगुल और एक अंगुलके सात भागोंमें दो भाग प्रमाण बतलाई है ॥३२९॥ तमक नामक पाँचवें प्रस्तारमें त्रेपन धनुष, दो हाथ, छः अंगुल और एक अंगुलके सात भागोंमें छः भाग प्रमाण ऊँचाई कही गई है ॥३३०॥ षड नामक छठवें प्रस्तारमें अठावन धनुष, तीन अंगुल और एक अंगुलके सात भागोंमें तीन प्रमाण ऊँचाई प्रकट की गई है ॥३३१॥ और षडषड नामक सातवें प्रस्तारमें बासठ धनुष, दो हाथ ऊँचाई प्रसिद्ध है। इस प्रकार चौथी पृथिवीमें विद्यमान नारकियोंकी ऊँचाईका वर्णन किया है ॥३३२॥

पाँचवीं पृथिवीके तम नामक प्रथम प्रस्तारमें नारकियोंके शरीरकी ऊँचाई पचहत्तर धनुष बतलाई है। भ्रम नामक दूसरे प्रस्तारमें सत्तासी धनुष और दो हाथ है ॥३३३॥ झष नामक तीसरे प्रस्तारमें नारकियोंके शरीरकी ऊँचाई सौ धनुष कही गई है। अन्ध नामक चौथे प्रस्तारमें एक सौ बारह धनुष तथा दो हाथ है ॥३३४॥ और तमिस्र नामक पाँचवें प्रस्तारमें एक सौ पचीस धनुष है। इस प्रकार पाँचवीं पृथिवीमें विद्वानोंने ऊँचाईका वर्णन किया है ॥३३५॥

छठवीं पृथिवीके हिम नामक प्रथम प्रस्तारमें नारकियोंके शरीरकी ऊँचाई एक सौ छयासठ धनुष, दो हाथ तथा सोलह अंगुल बतलाई है ॥३३६॥ वर्दल नामक दूसरे प्रस्तारमें शास्त्ररूपी नेत्रोंके धारक विद्वानोंने नारकियोंकी ऊँचाई दो सौ आठ धनुष, एक हाथ और छः अंगुल प्रमाण देखी है ॥३३७॥ और लल्लक नामक तीसरे प्रस्तारमें नारकियोंकी ऊँचाई दो सौ पचास धनुष बतलाई है। इस प्रकार कृतकृत्य सर्वज्ञ देवने छठवीं पृथिवीमें ऊँचाईका वर्णन किया ॥३३८॥

---

१. शती म० ।

उत्सेधस्त्वप्रतिष्ठाने पञ्चचापशतानि सः । निश्चितो निश्चितज्ञानैः सप्तमे नरके च यः ॥३३९॥
सप्तसु प्रतिबोद्धव्यः प्रथितः प्रथमादिषु । अवधेर्विषयस्तासु पृथिवीषु यथाक्रमम् ॥३४०॥
योजनं तु त्रयः क्रोशाः सार्धा क्रोशत्रयं तथा । सार्धौ तौ तद्‌द्वयं सार्धः क्रोशः क्रोशश्च निश्चितः ॥३४१॥
क्रोशार्द्धं मृत्तिकागन्धः प्रथमे पटले व्रजेत् । तदधोऽधः क्रोशस्यार्द्धं वर्द्धते पटलं प्रति ॥३४२॥
पृथिव्योराद्ययोर्युक्ता जीवाः कापोतलेश्यया । तृतीयायां तथैवोर्ध्वमधस्तान्नीललेश्यया ॥३४३॥
अधश्चोर्ध्वं च सम्बद्धाश्चतुर्थ्यां नीललेश्यया । तथैवोपरि पञ्चम्यामधस्ते कृष्णलेश्यया ॥३४४॥
षष्ठ्यां च कृष्णयैवोर्ध्वमधः परमकृष्णया । सप्तम्यामुभयत्रामी क्लिष्टाः परमकृष्णया ॥३४५॥
स्पर्शेनोष्णेन बाध्यन्ते नारका भूचतुष्टये । पञ्चम्यामुष्णशीताभ्यां शीतेनैवान्ययोर्भुवोः ॥३४६॥
आकारेणोष्ट्रिकाकुम्भीकुस्थलीमुद्गरोपमाः । मृदङ्गनाडिकाकारा निगोदा[1] पृथिवीत्रये ॥३४७॥
गोगजाश्वादिभस्त्राब्जपुटसन्निभाः । ते चतुर्थ्यां च पञ्चम्यां नारकोत्पत्तिभूमयः ॥३४८॥
केदाराकृतयः केचित्कल्लरीमल्लकोपमाः । केचिन्मयूरकाकारा निगोदास्तेऽन्ययोर्भुवोः ॥३४९॥
एकद्वित्रिकगव्यूतियोजनव्याससङ्गताः । शतयोजनविस्तीर्णास्तेषूत्कृष्टास्तु वर्णिताः ॥३५०॥
उच्छ्रायो वस्तुतस्तेषां विस्तारः पञ्चताडितः । निगोदानां समस्तानामिति वस्तुविदो विदुः ॥३५१॥

सातवीं पृथिवीमें एक ही अप्रतिष्ठान नामका प्रस्तार है सो उसमें सन्देहरहित ज्ञानके धारक आचार्योंने नारकियोंकी ऊँचाई पाँच सौ धनुष प्रमाण निश्चित की है ॥३३९॥

प्रथम पृथिवीको आदि लेकर उन सातों पृथिवियोंमें यथाक्रमसे अवधिज्ञानका विषय इस प्रकार जानना चाहिए ॥३४०॥ पहली पृथिवीमें अवधिज्ञानका विषय एक योजन अर्थात् चार कोश, दूसरीमें साढ़े तीन कोश, तीसरीमें तीन कोश, चौथीमें अढ़ाई कोश, पाँचवींमें दो कोश, छठवींमें डेढ़ कोश और सातवींमें एक कोश प्रमाण है ॥३४१॥ प्रथम पृथिवी सम्बन्धी पहले पटलकी मिट्टीकी दुर्गन्ध आध कोश तक जाती है और उसके नीचे प्रत्येक पटलके प्रति आधा-आधा कोश अधिक बढ़ती जाती है ॥३४२॥ पहली और दूसरी पृथिवीमें रहनेवाले नारकी कापोत लेश्यासे युक्त हैं। तीसरी पृथिवीके ऊर्ध्व भागमें रहनेवाले कापोत लेश्यासे और अधोभागमें रहनेवाले नील लेश्यासे सहित हैं ॥३४३॥ चौथी पृथिवीके ऊपर-नीचे दोनों स्थानोंपर तथा पाँचवीं पृथिवीके ऊपरी भागमें नील लेश्यासे युक्त हैं और अधोभागमें कृष्ण लेश्यासे सहित हैं ॥३४४॥ छठवीं पृथिवीके ऊर्ध्वभागमें कृष्ण लेश्यासे, अधोभागमें परमकृष्ण लेश्यासे और सातवीं पृथिवीके ऊपर नीचे दोनों ही जगह रहनेवाले परमकृष्ण लेश्यासे संक्लिष्ट हैं अर्थात् संक्लेशको प्राप्त होते रहते हैं ॥३४५॥ प्रारम्भकी चार भूमियोंमें रहनेवाले नारकी उष्ण स्पर्शसे, पाँचवीं भूमिमें रहनेवाले उष्ण और शीत दोनों स्पर्शोंसे तथा अन्तकी दो भूमियोंमें रहनेवाले केवल शीत स्पर्शसे ही पीड़ित रहते हैं ॥३४६॥ प्रारम्भकी तीन पृथिवियोंमें नारकियोंके उत्पत्ति-स्थान कुछ तो ऊँटके आकार हैं कुछ कुम्भी (घड़िया), कुछ कुस्थली, मुद्गर, मृदङ्ग और नाड़ीके आकार हैं ॥३४७॥ चौथी और पाँचवीं पृथिवीमें नारकियोंके जन्मस्थान अनेक तो गौके आकार हैं, अनेक हाथी घोड़े आदि जन्तुओं तथा धोंकनी, नाव और कमलपुटके समान हैं ॥३४८॥ अन्तिम दो भूमियोंमें कितने ही खेतके समान, कितने ही झालर और कटोरोंके समान, और कितने ही मयूरोंके आकारवाले हैं ॥३४९॥ वे जन्मस्थान एक कोश, दो कोश, तीन कोश और एक योजन विस्तारसे सहित हैं। उनमें जो उत्कृष्ट स्थान हैं वे सौ योजन तक चौड़े कहे गये हैं ॥३५०॥ उन समस्त उत्पत्ति स्थानोंकी ऊँचाई अपने विस्तारसे पँचगुनी है ऐसा वस्तु स्वरूपको जाननेवाले आचार्य जानते हैं ॥३५१॥ समस्त इन्द्रक बिल तीन द्वारोंसे युक्त तथा तीन कोणों-वाले हैं। इनके सिवाय जो श्रेणीबद्ध और प्रकीर्णक निगोद हैं उनमें कितने ही दो द्वारवाले

१. नारकोत्पत्तिस्थानानि ।

सर्वेऽप्येकनिगोदास्ते त्रिद्वाराश्च त्रिकोणकाः । द्विव्येकपञ्चसप्तान्यद्वारकोणास्ततः परे ॥३५२॥
संख्येयव्यासयुक्तानां निगोदानां निजान्तरम् । गव्यूतयः षडल्पं स्यादनल्पं द्वादशैव ताः ॥३५३॥
असंख्येयप्रमाणानामसंख्यं महदन्तरम् । योजनानां सहस्राणि सप्तैवाल्पमन्तरम्[1] ॥३५४॥
[2]त्रिगव्यूतिचतुर्भागसप्तयोजनमात्रकम् । घर्मानिगोदजा जीवा समुत्पत्य पतन्त्यधः ॥३५५॥
[3]गव्यूतिद्वितयं सार्धं सपञ्चदशयोजनम् । वंशानिगोदजन्मानः समुत्पत्य पतन्त्यधः ॥३५६॥
एकत्रिंशत्तु गव्यूत्या योजनानि नभस्तले । मेघानिगोदजा जीवाः समुल्लंघ्य पतन्त्यधः ॥३५७॥
द्विषष्टियोजनान्यूर्ध्वं गव्यूतिद्वयमुद्गताः । निपतन्त्युग्रदुःखार्तास्तेऽञ्जनाजनिगोदजाः ॥३५८॥
पञ्चविंशतिसम्मिश्रशतयोजनमातुराः । समुत्पत्य पतन्त्येव पञ्चमीस्था निगोदजाः ॥३५९॥
पञ्चाशता विमिश्रं तु योजनानां शतद्वयम् । वियदुत्पत्य षष्ठीस्थनिगोदोत्थाः पतन्त्यधः ॥३६०॥
सप्तमीस्थनिगोदोत्थाः सपञ्चशतयोजनम् । अध्वानमूर्ध्वमुत्पत्य पतन्ति वसुधातले ॥३६१॥
असुरा आतृतीयान्तं योधयन्ति परस्परम् । प्रयुध्यते स्वयं तेऽपि ज्ञात्वा वैरं पुरातनम् ॥३६२॥
कुन्तक्रकचशूलाद्यैर्नानाशस्त्रैस्तनूद्भवैः । खण्डं खण्डं विधीयन्ते पीडयन्ति परस्परम् ॥३६३॥
[4]सूतकस्येव सङ्घातः शरीरस्य प्रजायते । यावदायुःस्थितिस्तेषां न तावन्मरणं भवेत् ॥३६४॥
शारीरं मानसं दुःखमन्योऽन्योदीरितं खलु । सहन्ते नारका नित्यं पूर्वपापविपाकतः ॥३६५॥

दुकोने, कितने ही तीन द्वारवाले तिकोने, कितने ही पाँच द्वारवाले पँचकोने और कितने ही सात द्वारवाले सतकोने हैं ॥३५२॥ इनमें संख्यात योजन विस्तारवाले बिलोंका अपना जघन्य अन्तर छः कोश और उत्कृष्ट अन्तर बारह कोश है ॥३५३॥ एवं असंख्यात योजन विस्तारवाले बिलोंका उत्कृष्ट अन्तर असंख्यात योजन तथा जघन्य अन्तर सात हजार योजन है ॥३५४॥

घर्मा नामक पहली पृथिवीके उत्पत्ति-स्थानोंमें उत्पन्न होनेवाले नारकी जीव जन्मकालमें जब नीचे गिरते हैं तब सात योजन सवा तीन कोश ऊपर आकाशमें उछलकर पुनः नीचे गिरते हैं ॥३५५॥ दूसरी वंशा पृथिवीके निगोदोंमें जन्म लेनेवाले नारकी पन्द्रह योजन अढ़ाई कोश आकाशमें उछलकर नीचे गिरते हैं ॥३५६॥ तीसरी मेघा पृथिवीमें जन्म लेनेवाले जीव इकतीस योजन एक कोश आकाशमें उछलकर नीचे गिरते हैं ॥३५७॥ चौथी अञ्जना पृथिवीके निगोदोंमें जन्म लेनेवाले जीव बासठ योजन दो कोश उछलकर नीचे गिरते हैं और तीव्र दुःखसे दुःखी होते हैं ॥३५८॥ पाँचवीं पृथिवीके निगोदोंमें जन्म लेनेवाले नारकी अत्यन्त दुःखी हो एकसौ पच्चीस योजन आकाशमें उछलकर नीचे गिरते हैं ॥३५९॥ छठवीं पृथिवीमें स्थित निगोदोंमें जन्म लेनेवाले जीव दो सौ योजन आकाशमें उछलकर नीचे गिरते हैं ॥३६०॥ और सप्तमी पृथिवीमें स्थित निगोदोंमें उत्पन्न हुए जीव पाँच सौ धनुष ऊँचे उछलकर पृथिवी तलपर नीचे गिरते हैं ॥३६१॥ तीसरी पृथिवी तक असुरकुमार देव नारकियोंको परस्पर लड़ाते हैं। इसके सिवाय वे नारकी पुराने वैर भावको जानकर स्वयं भी लड़ते रहते हैं ॥३६२॥ विक्रिया शक्तिके द्वारा अपने शरीरसे ही उत्पन्न होनेवाले भाले, करौंत तथा शूल आदि नाना शस्त्रोंसे उन नारकियोंके खण्ड-खण्ड कर दिये जाते हैं और परस्पर एक दूसरेको पीड़ा पहुँचाते हैं ॥३६३॥ खण्ड-खण्ड होनेपर भी पारेके समान उनके शरीरके टुकड़ोंका पुनः समूह बन जाता है और जब तक उनकी आयुकी स्थिति रहती है तब तक उनका मरण नहीं होता ॥३६४॥ ये नारकी पूर्व कृत

१. अतः परं म० ख० पुस्तकयोः अयं श्लोकोऽधिकोऽस्ति—"क्रोशत्रयं सतुर्यांशं योजनानां च सप्तकम् । समुत्पतन्ति घर्मायां शेषास्तु द्विगुणोत्तरम् ।" २. एष श्लोकः ड० पुस्तके नास्ति । ३. नपुस्तके एतस्य श्लोकस्य स्थाने निम्नाङ्कितः श्लोकोऽस्ति—'यजिनं पञ्चदशकं सार्धक्रोशद्वयं तथा । समुच्छलन्ति वंशायां पतन्ति च निगोदजाः । ४. पारदस्येव ।

क्षारोष्णतीव्रसन्नावनदीवैतरणीजलात् । [1]दुर्गन्धान्मृन्मयाहारा[2]द्दुःखं भुञ्जन्ति दुःसहम् ॥३६६॥
अक्ष्णोर्निमीलनं यावन्नास्ति सौख्यं च जातुचित् । नरके पच्यमानानां नारकाणामहर्निशम् ॥३६७॥
स्युस्तेषामशुभतराः परिणामाः शरीरिणाम् । लिङ्गं नपुंसकाख्यं स्यात् संस्थानं हुण्डसंज्ञकम् ॥३६८॥
आगामितीर्थकर्तॄणां तथैवोपशमैनसाम् । उपसर्गाहृतिं भक्त्या कुर्वन्त्यत्यायने[3] सुराः ॥३६९॥
चत्वारिंशत्सहाष्टाभिर्घटिकाः प्रथमक्षितौ । अन्तरं नारकोत्पत्तेरन्तरज्ञैः स्फुटीकृतम् ॥३७०॥
सप्ताहश्चैव पक्षः स्यान्मासो मासौ यथाक्रमम् । चत्वारोऽपि च षण्मासा विरहः षट्सु भूमिषु ॥३७१॥
तीव्रमिथ्यात्वसंयुक्ता बह्वारम्भपरिग्रहाः । पृथिवीस्ताः प्रपद्यन्ते तिर्यञ्चो मानुषास्तथा ॥३७२॥
आद्यामसंज्ञिनो यान्ति द्वितीयां च प्रसर्पिणः । पक्षिणश्च तृतीयायां चतुर्थ्यां च भुजङ्गमाः ॥३७३॥
पञ्चमीमपि सिंहास्तु षष्ठीमपि च योषितः । प्रयान्ति प्राणिनः पापाः सप्तमीं मत्स्यमानुषाः ॥३७४॥
सप्तम्युद्वर्तितो यायात्तामेवानन्तरं सकृत् । षष्ठीतो निर्गतो द्विस्तां पञ्चमीं त्रिष्वथ व्रजेत् ॥३७५॥
चतुर्थीं च चतुर्वारान् प्रपद्येत ततश्च्युतः । तृतीयां पञ्चकृत्वोऽपि तस्या एव समागतः ॥३७६॥
द्वितीयायां च षट्कृत्वः सप्तकृत्वस्तथाऽसुमान् । प्रथमाया विनिर्यातः प्रथमायां प्रजायते ॥३७७॥
सप्तमीतो विनिर्यातः संज्ञितिर्यक्त्वभाक् पुनः । संख्येयायुर्वृतो याति नरकं तनुमद्गणः[4] ॥३७८॥
षष्ठीतस्तु विनिर्यातो लभते नैव संयमम् । तं लभेतापि पञ्चम्या निर्वाणं न तु तद्भवे ॥३७९॥
लभेतापि च निर्वाणं चतुर्थीनिःसृतः पुनः । निश्चयेनैव नैवाङ्गी तीर्थकृत्त्वं प्रपद्यते ॥३८०॥

पाप कर्मके उदयसे निरन्तर एक दूसरेके द्वारा दिये हुए शारीरिक एवं मानसिक दुःखको सहते रहते हैं ॥३६५॥ वे खारा गरम तथा अत्यन्त तीक्ष्ण वैतरणी नदीका जल पीते हैं और दुर्गन्धि युक्त मिट्टीका आहार करते हैं इसलिए निरन्तर असह्य दुःख भोगते रहते हैं ॥३६६॥ रात-दिन नरकमें पचनेवाले नारकियोंको निमेष मात्र भी कभी सुख नहीं होता ॥३६७॥ उन नारकियोंके निरन्तर अत्यन्त अशुभ परिणाम रहते हैं । तथा नपुंसक लिङ्ग और हुण्डक संस्थान होता है ॥३६८॥ जो आगामी कालमें तीर्थङ्कर होनेवाले हैं तथा जिनके पापकर्मोंका उपशम हो चुका है । देव लोग भक्तिवश छः माह पहलेसे उनके उपसर्ग दूर कर देते हैं ॥३६९॥ अन्तरके जाननेवाले आचार्योंने प्रथम पृथिवीमें नारकियोंकी उत्पत्तिका अन्तर अड़तालीस घड़ी बतलाया है ॥३७०॥ और नीचेकी छह भूमियोंमें क्रमसे एक सप्ताह, एक पक्ष, एक मास, दो मास, चार मास और छह मासका विरह—अन्तरकाल कहा है ॥३७१॥ जो तीव्र मिथ्यात्वसे युक्त हैं तथा बहुत आरम्भ और बहुत परिग्रहके धारक हैं ऐसे तिर्यञ्च और मनुष्य उन पृथिवियोंको प्राप्त होते हैं अर्थात् उनमें उत्पन्न होते हैं ॥३७२॥ असंज्ञी पञ्चेन्द्रिय पहली पृथिवी तक जाते हैं, सरकनेवाले दूसरी पृथिवी तक, पक्षी तीसरी तक, सर्प चौथी तक, सिंह पाँचवीं तक, स्त्रियाँ छठवीं तक और तीव्र पाप करनेवाले मत्स्य तथा मनुष्य सातवीं पृथिवी तक जाते हैं ॥३७३–३७४॥ सातवीं पृथिवीसे निकला हुआ जीव यदि पुनः अव्यवहित रूपसे सातवींमें जावे तो एक बार, छठवींसे निकला हुआ छठवींमें दो बार, पाँचवींसे निकला हुआ पाँचवींमें तीन बार, चौथीसे निकला हुआ चौथीमें चार बार, तीसरीसे निकला हुआ तीसरीमें पाँच बार, दूसरीसे निकला हुआ दूसरीमें छः बार और पहलीसे निकला हुआ पहलीमें सात बार तक उत्पन्न हो सकता है ॥३७५–३७७॥ सातवीं पृथिवीसे निकला हुआ प्राणी नियमसे संज्ञी तिर्यञ्च होता है तथा संख्यात वर्षकी आयुका धारक हो फिरसे नरक जाता है ॥३७८॥ छठवीं पृथिवीसे निकला हुआ जीव संयमको प्राप्त तो हो सकता है पर मोक्ष प्राप्त नहीं कर सकता ॥३७९॥ चौथी पृथिवीसे निकला हुआ मोक्ष प्राप्त कर सकता है परन्तु निश्चयसे तीर्थङ्कर नहीं हो सकता ॥३८०॥

---

१. दुर्गन्धा म०, २. मृन्मयाहाराः म० । ३. अन्तिमषण्मासेषु । ४. प्राणिसमूह ।

तृतीयायाः द्वितीयाया प्रथमायाश्च निःसृतः । तीर्थकृत्त्वं लभेतापि देही दर्शनशुद्धितः ॥३८१॥
बलकेशवचक्रित्वं परिहृत्यैव मन्त्यवः । नरत्वं प्रतिपद्येरन् नरकेभ्यो विनिर्गताः ॥३८२॥
अधोलोकविभागस्ते संक्षेपेण मयोदितः । तिर्यग्लोकविभागस्य शृणु श्रेणिक ! संग्रहम् ॥३८३॥

शार्दूलविक्रीडितम्

सूर्याचन्द्रमसामगोचरमधोलोकान्धकारं बुधाः[1]
[2]प्रध्वंस्याऽऽप्तवचःप्रदीपविभवैः सर्वत्रगैः सर्वदा ।
पश्यन्तः प्रभवन्ति तत्त्वमिति किं चित्रं त्रिलोक्यां[3] कृता-
वालोके जिनभानुना विरचिते ध्वान्तस्य वा क्व स्थितिः ॥३८४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ अधोलोकसंस्थानवर्णनो नाम चतुर्थः सर्गः ॥४॥

तीसरी दूसरी और पहली पृथिवीसे निकला हुआ जीव सम्यग्दर्शनकी शुद्धतासे तीर्थङ्कर पद प्राप्त कर सकता है ॥३८१॥ नरकोंसे निकले हुए जीव बलभद्र, नारायण और चक्रवर्ती पद छोड़कर ही मनुष्य पर्याय प्राप्त कर सकते हैं अर्थात् मनुष्य तो होते हैं पर बलभद्र नारायण और चक्रवर्ती नहीं हो सकते ॥३८२॥ गौतम स्वामी कहते हैं कि हे श्रेणिक ! इस प्रकार मैंने संक्षेपसे तेरे लिए अधो लोकके विभागका वर्णन किया। अब तू तिर्यग्लोक—मध्यम लोकके विभागका वर्णन सुन ॥३८३॥

बुद्धिमान् मनुष्य सब समय, सर्वत्र व्याप्त रहनेवाले, जिनेन्द्र भगवान्के वचन रूपी उत्तम दीपकोंकी सामर्थ्यसे सूर्य और चन्द्रमाके अगोचर अधोलोकके अन्धकारको नष्टकर वस्तुके यथार्थ स्वरूपको देखते हुए प्रभुत्वको प्राप्त होते हैं इसमें क्या आश्चर्य है ? क्योंकि तीन लोकमें जिनेन्द्र रूपी सूर्यके द्वारा प्रकाशके उत्पन्न होनेपर अन्धकारका सद्भाव कहाँ रह सकता है ? ॥३८४॥

इस प्रकार जिसमें अरिष्टनेमिके पुराणका संग्रह किया गया है ऐसे जिनसेनाचार्य प्रणीत हरिवंशपुराणमें अधोलोकका वर्णन करनेवाला चौथा सर्ग समाप्त हुआ ॥४॥

१. बुधः म० । २. प्रध्वस्तास । ३. त्रिलोकाकृता-म०, त्रिलोक्याकृता-ख०, घ०, ङ० ।

पञ्चमः सर्गः

तनुवातान्तपर्यन्तस्तिर्यग्लोको व्यवस्थितः । लक्षितावधिरूर्ध्वाधो मेरुयोजनलक्षया ॥१॥
तत्रैवास्मिन्नसंख्येयसागरद्वीपवेष्टितः । जम्बूद्वीपः स्थितो वृत्तो जम्बूपादपलक्षितः ॥२॥
विस्तारेणार्णवस्पर्शी[1] वज्रवेदिकयाऽऽवृतः । महामेरुमहानाभिर्लक्षयोजनलक्षया[2] ॥३॥
[3]तिस्रो लक्षाः परिक्षेपः स्यात्सहस्राणि षोडश । योजनानि त्रिगव्यूतिर्द्विशती सप्तविंशतिः ॥४॥
अष्टविंशतिसन्मिश्रं तथैवान्यं धनुःशतम् । त्रयोदशाङ्गुलानि स्युः साधिकार्धाङ्गुलानि तु ॥५॥
कोटीशतानि सप्त स्युः कोट्यो नवतिः स्फुटाः । षट्पञ्चाशत्तथा लक्षा नवतिश्चतुरुत्तरा ॥६॥
सहस्रगुणिता द्वीपे शतं पञ्चाशताधिकम् । योजनानि विभक्तेऽस्मिन् गणितस्य पदं विदुः ॥७॥
क्षेत्राणि सन्ति सप्ताऽत्र मेरुरेकः कुरुद्वयम् । जम्बूश्च शाल्मलीवृक्षौ षडेव कुलपर्वताः ॥८॥
महासरांसि षट् तेषु महानद्यश्चतुर्दश । द्विषट् विभङ्गनद्यश्च [4]वक्षारागाश्च विंशतिः ॥९॥
राजधान्यश्चतुस्त्रिंशद्रौप्याद्रिवृषभाद्रयः । अष्टाषष्टिर्गुहा वृत्तविजयार्धचतुष्टयम् ॥१०॥
तथा त्रीणि सहस्राणि पुनः सप्तशतान्यपि । चत्वारिंशत्पुराणि स्युर्विद्याधरमहीभृताम् ॥११॥
एतैः सर्वैरयं द्वीपो दीप्यते द्विगुणैरिमैः । यथाऽसौ धातकीखण्डः पुष्करार्धश्च सर्वतः ॥१२॥
भारतं दक्षिणं तत्र क्षेत्रं हैमवतं परम् । हरिक्षेत्रं विदेहं च रम्यकं च तथा परम् ॥१३॥

तनुवातवलयके अन्त भाग तक तिर्यग्लोक अर्थात् मध्यलोक स्थित है। मेरु पर्वत एक लाख योजन विस्तारवाला है। उसी मेरु पर्वत द्वारा ऊपर तथा नीचे इस तिर्यग्लोककी अवधि निश्चित है। भावार्थ—मेरु पर्वत कुल एक लाख योजन विस्तारवाला है। उसमें एक हजार योजन तो पृथिवीतलसे नीचे है और निन्यानबे हजार योजन पृथिवीतलसे ऊपर है। तिर्यग्लोक की सीमा इसी मेरु पर्वतसे निश्चित है अर्थात् तिर्यग्लोक पृथिवीतलके एक हजार योजन नीचे-से लेकर निन्यानबे हजार योजन ऊँचाई तक है ॥१॥ इसी मध्यम लोकमें असंख्यात द्वीप-समुद्रोंसे वेष्टित गोल तथा जम्बू वृक्षसे युक्त जम्बू द्वीप स्थित है ॥२॥ यह जम्बू द्वीप लवण समुद्रका स्पर्श करनेवाला है, वज्रमयी वेदिकासे घिरा हुआ है, महामेरु रूपी नाभिसे युक्त है अर्थात् महामेरु इसके मध्यभागमें अवस्थित है तथा एक लाख योजन विस्तारवाला है ॥३॥ जम्बू द्वीपकी परिधि तीन लाख सोलह हजार दो सौ सत्ताईस योजन तीन कोश एक सौ अट्ठाईस धनुष और साढ़े तेरह अंगुल है ॥४-५॥ विभाग करनेपर गणितज्ञ मनुष्य इस जम्बू-द्वीपका घनाकार क्षेत्र सात सौ नब्बे करोड़ छप्पन लाख, चौरानबे हजार एक सौ पचास योजन बतलाते हैं ॥६-७॥ इस जम्बू द्वीपमें सात क्षेत्र, एक मेरु, दो कुरु, जम्बू और शाल्मली नामक दो वृक्ष, छह कुलाचल, कुलाचलोंपर स्थित छह महासरोवर, चौदह महानदियाँ, बारह विभङ्गा नदियाँ, बीस वक्षार गिरि, चौंतीस राजधानी, चौंतीस रूप्याचल, चौंतीस वृषभाचल, अड़सठ गुहाएँ, चार गोलाकार नाभि गिरि और तीन हजार सात सौ चालीस विद्याधर राजाओंके नगर हैं। ऊपर कही हुई इन सभी चीजोंसे यह जम्बू द्वीप अत्यधिक सुशोभित है। जम्बू द्वीपसे दूने क्षेत्र तथा मेरु आदिसे दूसरा धातकीखण्ड द्वीप देदीप्यमान है और पुष्करार्ध भी धातकीखण्डके समान समस्त क्षेत्रों तथा पर्वतों आदिसे युक्त है ॥८-१२॥ जम्बू द्वीपमें

१. स्पर्धि म० । २. -नाभिलक्षयोजन -म० । ३. जम्बूद्वीपस्य सूक्ष्मपरिधिः ३१६२२७ योजनानां कोशाः १२८ धनूंषि १३½ अङ्गुलानि च वर्तते । ४. वक्षागाराश्च म० ।

हैरण्यवतमित्यन्यत् स्यादैरावतमुत्तरम् । विस्तारेणाविदेहान्तं क्षेत्रं क्षेत्राच्चतुर्गुणम् ॥१४॥
प्रथमो हिमवानन्यो महाहिमवदाह्वयः । पर्वतो निषधो नीलो रुक्मी च शिखरी गिरिः ॥१५॥
पूर्वस्मादुत्तरो भूभृद् विस्तारेण चतुर्गुणः । निषधं यावदाख्याता दक्षिणैरुत्तराः समाः ॥१६॥
क्षेत्रस्याद्यस्य विस्तारः सपञ्चशतयोजनः । षड्विंशतिस्तथा भागः षट् चाप्येकोनविंशतेः ॥१७॥
जम्बूद्वीपस्य विष्कम्भे नवत्या च शतेन च । विभक्ते भारतस्यायं विस्तारो भवति स्फुटः ॥१८॥
क्षेत्राद् द्विगुणविस्तारः पर्वतः क्षेत्रमप्यतः । आविदेहमतस्तस्य वृद्धिवच्च परिक्षयः ॥१९॥
मध्येभारतमन्योऽद्रिरन्तप्राप्ताम्बुधिद्वयः । भाति विद्याधरावासो विजयार्द्ध इति श्रुतः ॥२०॥
पञ्चविंशतिरुत्सेधः षट् सपादान्यधः स्थितः । योजनान्यस्य पञ्चाशद्विस्तारो रजतात्मनः ॥२१॥

भरत, हैमवत, हरि, विदेह, रम्यक, हैरण्यवत और ऐरावत ये सात क्षेत्र हैं। इनमें भरत क्षेत्र-सबसे दक्षिणमें है और ऐरावत क्षेत्र उत्तरमें है। प्रारम्भसे लेकर विदेह क्षेत्र तकके क्षेत्र विस्तारकी अपेक्षा पूर्व क्षेत्रसे चौगुने-चौगुने विस्तारवाले हैं। भावार्थ—भरत क्षेत्रसे चौगुना विस्तार हैमवत क्षेत्रका है, हैमवत क्षेत्रसे चौगुना विस्तार हरि क्षेत्रका है और हरि क्षेत्रसे चौगुना विस्तार विदेह क्षेत्रका है। विदेह क्षेत्रसे आगेके क्षेत्रोंका विस्तार चौथा भाग है अर्थात् विदेह क्षेत्रके विस्तारसे चौथा भाग विस्तार रम्यक क्षेत्रका है, रम्यक क्षेत्रसे चौथा भाग विस्तार हैरण्यवतका है और उससे चौथा भाग विस्तार ऐरावत क्षेत्रका है ॥१३-१४॥ हिमवान् , महाहिमवान् , निषध, नील, रुक्मी और शिखरी ये छह कुलाचल हैं। इनमें आगे-आगेका कुलाचल पूर्व-पूर्व कुलाचलसे चौगुने-चौगुने विस्तार वाला है। यह क्रम निषध कुलाचल तक ही चलता है। इसके आगे उत्तरके तीन कुलाचल दक्षिणके कुलाचलोंके समान कहे गये हैं ॥१५-१६॥ प्रथम भरत क्षेत्रका विस्तार पाँच सौ छब्बीस योजन तथा एक योजनके उन्नीस भागोंमें छह भाग प्रमाण है ॥१७॥ जम्बू द्वीपकी चौड़ाई—एक लाख योजनमें यदि एक सौ नब्बे योजनका भाग दिया जाय तो भरत क्षेत्रका उक्त विस्तार स्पष्ट हो जाता है। भावार्थ—भरत क्षेत्रका जो विस्तार ५२६$\frac{६}{१९}$ योजन बतलाया है वह जम्बू द्वीपके विस्तारका एक सौ नब्बेवाँ भाग है ॥१८॥ क्षेत्रसे पर्वत दूने विस्तारवाला है और पर्वतसे क्षेत्र दूने विस्तारवाला है। दूने विस्तारका यह क्रम विदेह क्षेत्र तक चलता है उसके आगेके क्षेत्र और पर्वतोंका विस्तार ह्रासको लिये हुए है अर्थात् आगेके क्षेत्र और पर्वत अर्ध-अर्ध विस्तारवाले हैं ॥१९॥* भरत क्षेत्रके ठीक मध्य भागमें विजयार्ध नामसे प्रसिद्ध एक दूसरा पर्वत सुशोभित है। इसके दोनों अन्तभाग पूर्व और पश्चिमके दोनों समुद्रोंको प्राप्त हैं तथा इसपर विद्याधरोंका निवास है ॥२०॥ यह पर्वत पृथिवीसे पच्चीस योजन ऊँचा है सवा छह योजन पृथिवीके नीचे स्थित है, पचास योजन चौड़ा है और चाँदीके समान सफेद वर्णवाला है ॥२१॥

१. मुत्तमं म० । २. निषधो म० ।

* क्षेत्र और पर्वतोंका विस्तार निम्नलिखित है—

१ भरत क्षेत्र	५२६$\frac{६}{१९}$ योजन	२ हिमवत् पर्वत	१०५२$\frac{१२}{१९}$ योजन
३ हैमवत क्षेत्र	२१०५$\frac{५}{१९}$ योजन	४ महाहिमवत् पर्वत	४२१०$\frac{१०}{१९}$ योजन
५ हरिक्षेत्र	८४२१$\frac{१}{१९}$ योजन	६ निषध पर्वत	१६८४२$\frac{२}{१९}$ योजन
७ विदेह क्षेत्र	३३६८४$\frac{४}{१९}$ योजन	८ नील पर्वत	१६८४२$\frac{२}{१९}$ योजन
९ रम्यक क्षेत्र	८४२१$\frac{१}{१९}$ योजन	१० रुक्मी पर्वत	४२१०$\frac{१०}{१९}$ योजन
११ हैरण्यवत क्षेत्र	२१०५$\frac{५}{१९}$ योजन	१२ शिखरी पर्वत	१०५२$\frac{१२}{१९}$ योजन
१३ ऐरावत क्षेत्र	५२६$\frac{६}{१९}$ योजन		

योजनानि क्षितेरूर्ध्वं दशोत्पत्य दशोपरि । विस्तीर्णे पर्वतायामे श्रेण्यौ विद्याधराश्रिते ॥२२॥
दक्षिणस्यां महाश्रेण्यां पञ्चाशन्नगराणि च । उत्तरस्यां [1] पुरः षष्टिस्त्रिविष्टपपुरोपमाः [2] ॥२३॥
योजनानि दशातीत्य पुनः सन्ति पुराण्यतः । सुराणामाभियोग्यानां क्रीडायोग्यान्यनेकशः ॥२४॥
पुनरुत्पत्य पञ्चोर्ध्वं दशयोजनविस्तृता । श्रेणी तु पूर्णभद्राख्या विजयार्द्धसुराश्रिता ॥२५॥
सिद्धायतनकूटं प्राक् दक्षिणार्द्धकमेव च । खण्डकादिप्रपातं च पूर्णभद्रं ततः परम् ॥२६॥
विजयार्द्धकुमाराख्यं मणिभद्रं ततः परम् । तामिस्रगुहकं चान्यदुत्तरार्द्धं च नामतः ॥२७॥
अन्ते वैश्रवणाख्यं तु भान्ति तानि दधन्ति तम् । नगाग्रे नवकूटानि क्रोशषड्योजनोच्छ्रितिम् ॥२८॥
मूले तन्मात्रमेवैषां मध्येऽप्यूनानि पञ्च तु । साधिकान्युपरि त्रीणि विस्तारस्तेषु भाषितः ॥२९॥
सिद्धायतनकूटे च सिद्धकूटमितीरितम् । पूर्वाभिमुखमाभाति जिनायतनमुज्ज्वलम् ॥३०॥
उच्छ्रायस्तस्य पादोनः क्रोशः क्रोशार्द्धविस्तृतिः । आयामः क्रोश एव स्यात्प्रासादस्याविनाशिनः ॥३१॥
ज्याऽसौ नवसहस्राणि सप्तशत्यपि चाष्टभिः । चत्वारिंशद् कला द्विःषट् भारतार्द्धे तु दक्षिणा ॥३२॥
धनुःपृष्ठं पुनस्तस्याः षट्षष्टिः सप्तशत्यपि । सहस्राणि नव ज्यायाः साधिका च कलोदितम् ॥३३॥
योजनानां शते द्वे तु साष्टत्रिंशत्कलात्रयम् । धनुषोऽनन्तरस्येयमिषुर्भवति पुष्कला ॥३४॥
सहस्राणि दशामीषां सप्तशत्यपि विंशतिः । एकादशकला ज्यासौ विजयार्द्धनगोत्तरा ॥३५॥
ज्याया दशसहस्राणि धनुःसप्तशतीरितम् । त्रिचत्वारिंशदप्यस्याः कलाः पञ्चदशाधिकाः ॥३६॥
योजनानां प्रसिद्धेषुरष्टाशीतं शतद्वयम् । उत्तरा विजयार्द्धस्य तिस्रश्चापि कलाः कलाः ॥३७॥
चूलिका विजयार्द्धस्य योजनानां चतुःशती । षडशीतिर्मनागूना जिनेशैन प्रकीर्तिता [3] ॥३८॥

पृथिवीसे दश योजन ऊपर चलकर इस पर्वतकी दो श्रेणियाँ हैं जो पर्वतके ही समान लम्बी हैं तथा जिनमें अनेक विद्याधरोंका निवास है ॥२२॥ दक्षिण महाश्रेणीमें पचास और उत्तर महाश्रेणीमें साठ नगर है, ये सब नगर स्वर्गपुरीके समान हैं ॥२३॥ यहाँसे दश योजन और ऊपर चलकर आभियोग्य जातिके देवोंकी क्रीड़ाके योग्य अनेक नगर स्थित हैं ॥२४॥ यहाँसे पाँच योजन और ऊपर चढ़कर एक पूर्णभद्र नामकी श्रेणी है जो दश योजन चौड़ी है तथा विजयार्ध नामक देवसे आश्रित है अर्थात् जहाँ विजयार्ध देवका निवास है ॥२५॥ इस विजयार्ध पर्वतपर नौ कूट हैं जिनमें पहला सिद्धायतन, दूसरा दक्षिणार्धक, तीसरा खण्डकप्रपात, चौथा पूर्णभद्र, पाँचवाँ विजयार्धकुमार, छठवाँ मणिभद्र, सातवाँ तामिस्रगुहक, आठवाँ उत्तरार्ध और नौवाँ वैश्रवण कूट है। ये नौ कूट पर्वतके अग्रभागपर सुशोभित हैं तथा सवा छह योजन ऊँचाईको धारण करते हैं ॥२६-२८॥ इन पर्वतोंका विस्तार मूलमें सवा छह योजन, मध्यमें कुछ कम पाँच योजन और ऊपर कुछ अधिक तीन योजन कहा गया है ॥२९॥ सिद्धायतन कूटपर पूर्व दिशाकी ओर सिद्धकूट नामसे प्रसिद्ध अत्यन्त उज्ज्वल जिनमन्दिर सुशोभित है ॥३०॥ इस अविनाशी जिनमन्दिरकी ऊँचाई पौन कोश, चौड़ाई आध कोश और लम्बाई एक कोश है ॥३१॥ भरत क्षेत्रके अर्ध भागमें विजयार्ध पर्वतकी दक्षिण प्रत्यञ्चा नौ हजार सात सौ अड़तालीस योजन और बारह कला प्रमाण विस्तृत है ॥३२॥ प्रत्यञ्चाके धनुःपृष्ठका विस्तार नौ हजार सात सौ छयासठ योजन तथा कुछ अधिक एक कला प्रमाण कहा गया है ॥३३॥ इस निकटस्थ धनुषका बाण दो सौ अड़तीस योजन और तीन कला प्रमाण है ॥३४॥ विजयार्ध पर्वतकी उत्तर प्रत्यञ्चा दश हजार सात सौ सत्ताईस योजन तथा ग्यारह कला प्रमाण है ॥३५॥ इस उत्तर प्रत्यञ्चाका धनुःपृष्ठ दश हजार सात सौ तैंतालीस योजन तथा कुछ अधिक पन्द्रह कला प्रमाण है ॥३६॥ विजयार्धके इस उत्तर धनुःपृष्ठका बाण दो सौ अठासी योजन तथा तीन कला प्रमाण है ॥३७॥ जिनेन्द्रदेवने विजयार्ध पर्वतकी चूलिका कुछ कम चार सौ छयासी योजन

१. पुनः म०, क० । २. स्वर्गपुरीसन्निभाः । ३. भागा द्वादश कीर्तिताः म० ।

पूर्वापरान्तयोरद्रेरष्टाशीतिं चतुःशती । प्रमाणं भुजयोरस्य भागाः षोडश चाधिकाः ॥३९॥
षट्कला भरतज्योना सैका सप्ततिरीरिता । चतुःशतीविमिश्राणि सहस्राणि चतुर्दश ॥४०॥
चतुर्दशसहस्राणि पञ्चशत्या तु विंशतिः । अष्टाभिर्भारतं भागा धनुरेकादशाधिकाः ॥४१॥
शतानि पञ्चविंशत्या सह षड्भिश्च षट् कलाः । प्रसिद्धेयमिषुर्माप्या धनुषस्तस्य भारती ॥४२॥
अष्टादशशती प्रोक्ता चूलिका पञ्चसप्ततिः । अर्धसप्तमभागाश्च साधिका भरतक्षितेः ॥४३॥
सहस्रमेकमष्टौ च शतानि नवतिर्द्वयम् । साधिकार्धाष्टमांशाश्च पूर्वापरभुजप्रमा ॥४४॥
शतयोजनमानः स्यादुच्छ्रायो हिमवद्गिरेः । अवगाहस्तु तस्यैव पञ्चविंशतियोजनः ॥४५॥
योजनानां सहस्रं तु द्वापञ्चाशत्समन्वितम् । द्वादशापि कलाः प्रोक्ता विस्तारो हिमवद्गिरेः ॥४६॥
चतुर्विंशतिरस्याद्रेः सहस्राणि शतान्यपि । नव द्वात्रिंशता ज्या स्यादीषदूनकलोत्तरा ॥४७॥
पञ्चविंशतिरस्यैव सहस्राणि शतद्वयम् । योजनानि धनुस्त्रिंशच्चतस्रः साधिका कलाः ॥४८॥
सहस्रं पञ्चशत्येकमष्टासप्ततिरेव च । कला चाष्टादशैवाद्रेरिषुरेषोऽस्य भाषिता ॥४९॥
योजनानां सहस्राणि पञ्च तानि शतद्वयम् । त्रिंशच्चूलिकाऽस्याद्रेर्भागाः सप्त च साधिकाः ॥५०॥
पञ्चैवास्य सहस्राणि पञ्चाशच्च शतत्रयम् । साधिकार्धेन तौ बाहू भागाः पञ्चदशाधिकाः ॥५१॥
भान्त्येकादश कूटानि हैमस्य हिमवद्गिरेः । शिखरेऽस्य निविष्टानि पंक्त्या पूर्वपरात्मना ॥५२॥
सिद्धायतनकूटं प्राक् हिमवत्कूटमप्यतः । कूटं भरतसंज्ञं स्यादिलाकूटं ततः परम् ॥५३॥
गङ्गाकूटं श्रियः कूटं रोहितास्यादिकं च तत् । सिन्धुकूटं सुरादेवीकूटं हैमवतं च यत् ॥५४॥
कूटं वैश्रवणाख्यं तु पाश्चात्यं परिकीर्तितम् । पञ्चविंशतिरुच्छ्रायः सर्वेषां योजनानि तु ॥५५॥
पञ्चविंशतिरेव स्याद् विस्तारो मूलगोचरः । अर्द्धत्रयोदशाग्रेऽन्तः[1] पादोनैकोनविंशतिः ॥५६॥

बतलाई है ॥३८॥ विजयार्ध पर्वतकी पूर्व-पश्चिम भुजाओंका विस्तार चार सौ अठासी योजन तथा कुछ अधिक सोलह कला प्रमाण है ॥३९॥ भरत क्षेत्रकी प्रत्यञ्चा चौदह हजार चार सौ इकहत्तर योजन और कुछ कम छह कला है ॥४०॥ इसका धनुःपृष्ठ चौदह हजार पाँच सौ अट्ठाईस योजन तथा ग्यारह कला प्रमाण है ॥४१॥ भरतक्षेत्र सम्बन्धी धनुःपृष्ठके बाणका विस्तार पाँच सौ छब्बीस योजन और छह कला प्रमाण प्रसिद्ध है ॥४२॥ भरत क्षेत्रकी चूलिका अठारह सौ पचहत्तर योजन तथा कुछ अधिक साढ़े छह भाग बतलाई है ॥४३॥ इसकी पूर्व-पश्चिम भुजाओंका विस्तार एक हजार आठ सौ बानवे योजन तथा कुछ अधिक साढ़े सात भाग है ॥४४॥ हिमवान् कुलाचलकी ऊँचाई सौ योजन, गहराई पच्चीस योजन और चौड़ाई एक हजार बावन योजन तथा बारह कला प्रमाण कही गई है ॥४५–४६॥ इस हिमवत् कुलाचल-की प्रत्यञ्चाका प्रमाण चौबीस हजार नौ सौ बत्तीस योजन तथा कुछ कम एक कला प्रमाण बतलाया है ॥४७–४८॥ इसका बाण एक हजार पाँच सौ अठहत्तर योजन तथा अठारह कला प्रमाण कहा है ॥४९॥ हिमवत्कुलाचलकी चूलिकाका विस्तार पाँच हजार दो सौ तीस योजन तथा कुछ अधिक सात कला है ॥५०॥ इसकी पूर्व-पश्चिम दोनों भुजाओंका विस्तार पाँच हजार तीन सौ पचास योजन साढ़े पन्द्रह भाग है ॥५१॥ इस सुवर्णमय हिमवत् कुलाचलकी शिखर-पर पूर्वसे पश्चिम तक पंक्ति रूपसे स्थित ग्यारह कूट सुशोभित हो रहे हैं ॥५२॥ उन कूटोंके नाम इस प्रकार हैं—१. सिद्धायतनकूट, २. हिमवत्कूट, ३. भरतकूट, ४. इलाकूट, ५. गङ्गाकूट, ६. श्रीकूट, ७. रोहितकूट, ८. सिन्धुकूट, ९. सुरादेवीकूट, १०. हैमवतकूट और ११. वैश्रवणकूट। इन सभी कूटोंकी ऊँचाई पच्चीस योजन प्रमाण है ॥५३–५५॥ इन सबका मूलमें पच्चीस योजन, मध्यमें पौने उन्नीस योजन और ऊपर साढ़े बारह योजन विस्तार है ॥५६॥

---

१. दशाग्रे तु म० ।

द्वे सहस्रे शतं पञ्च योजनानि तु पञ्चभिः । भागै हैमवतस्यापि विष्कम्भः पुष्कलो मतः ॥५७॥
सप्तत्रिंशत्सहस्राणि चतुःसप्तति षट्शती । ज्याऽपि हैमवतस्यान्ते न्यूनाः षोडश ताः कलाः ॥५८॥
साष्टत्रिंशत्सहस्राणि सप्तशत्यपि नोदिता । चत्वारिंशच्चतुर्ज्याया दशास्याः साधिकाः कलाः[1] ॥५९॥
षट्त्रिंशच्च शतानि स्यादशीतिश्चतुरुत्तरा । योजनानि कलाश्चास्य चतस्रो धनुषस्त्विषुः ॥६०॥
चूलिका चैकसप्तत्या त्रिषष्टिशतयोजना । साधिकैः सप्तभिर्भागैः क्षेत्रस्यास्योपवर्णिता ॥६१॥
सप्तषष्टिशतान्यस्याः पञ्चपञ्चाशता भुवः । योजनानि भुजामानं साधिकाश्च त्रयोंऽशकाः ॥६२॥
सहस्राणि तु चत्वारि दशोत्तरशतद्वयम् । दशभागाश्च विस्तारो महाहिमवतो गिरेः ॥६३॥
ऊर्ध्वं च पुनरुद्यातो योजनानां शतद्वयम् । पञ्चाशतमधो यातो धरिण्यां धरिणीधरः ॥६४॥
त्रिपञ्चाशत्सहस्राणि योजनानि शतानि च । नवैकत्रिंशदेतस्य ज्या षट् भागाश्च साधिकाः ॥६५॥
पञ्चाशच्च सहस्राणि सप्ताऽस्य द्विशती धनुः । त्रिनवत्या सह ज्यायाः साधिकाश्च [2]दशांशकाः ॥६६॥
धनुषोऽस्य सहस्राणि सप्त साष्टशतानि तु । चतुर्नवतियुक्तानि भागाश्चेषुश्चतुर्दश ॥६७॥
एकाशीतिशतानि स्यादष्टाविंशतिरेव च । चत्वारोऽर्द्धाधिका भागाश्चूलिकाऽस्य महीभृतः ॥६८॥
सहस्राणि नव द्वे तु शते षट्सप्ततिर्नव । भागा भुजद्वयं तस्य साधिकार्द्धकलाधिकाः ॥६९॥
अष्टार्जुनमयस्यास्य कूटानि शिखरे गिरेः । रत्नरञ्जितसानूनि नित्यानि सन्ति भान्ति च ॥७०॥
सिद्धायतनकूटं स्यान्महाहिमवदादिकम् । कूटं हैमवतं कूटं रोहिता कूटमप्यतः ॥७१॥
ह्रीकूटं हरिकान्तादि हरिवर्षादिकं हि तत् । वैडूर्यकूटमप्येषां पञ्चाशद्योजनोच्छ्रितिः ॥७२॥
पञ्चाशद्योजनो मौलो[3] विष्कम्भो मध्यगोचरः । सप्तत्रिंशत्तथार्द्धं च मस्तके पञ्चविंशतिः ॥७३॥

इसके आगे दूसरा हैमवत क्षेत्र है इसका विस्तार दो हजार एक सौ पाँच योजन तथा पाँच कला प्रमाण माना गया है ॥५७॥ इसकी प्रत्यञ्चा सैंतीस हजार छह सौ चौहत्तर योजन तथा कुछ कम सोलह कला प्रमाण है ॥५८॥ इस प्रत्यञ्चाका धनुषपृष्ठ अड़तीस हजार सात सौ चालीस योजन तथा कुछ अधिक दश कला प्रमाण है ॥५९॥ और इसका बाण तीन हजार छह सौ चौरासी योजन तथा चार कला है ॥६०॥ इसकी चूलिका छह हजार तीन सौ इकहत्तर योजन तथा कुछ अधिक सात कला है ॥६१॥ पूर्व-पश्चिम भुजाओंका मान छह हजार सात सौ पचपन योजन और कुछ अधिक तीन भाग है ॥६२॥

इसके आगे महाहिमवान् कुलाचल है इसका विस्तार चार हजार दो सौ दश योजन तथा दश कला है ॥६३॥ यह पर्वत पृथिवीसे दो सौ योजन ऊपर उठा है तथा पचास योजन पृथिवीके नीचे गया है ॥६४॥ इसकी प्रत्यञ्चाका विस्तार त्रेपन हजार नौ सौ इकतीस योजन तथा कुछ अधिक छह कला है ॥६५॥ इस प्रत्यञ्चाके धनु:पृष्ठका विस्तार सत्तावन हजार दो सौ तिरानबे योजन तथा कुछ अधिक दश अंश है ॥६६॥ इसके बाणकी चौड़ाई सात हजार आठ सौ चौरानबे योजन तथा चौदह भाग है ॥६७॥ इस महाहिमवान् पर्वतकी चूलिका आठ हजार एक सौ अट्ठाईस योजन तथा साढ़े चार कला है ॥६८॥ इसकी दोनों भुजाएँ नौ हजार दो सौ छिहत्तर योजन तथा साढ़े नौ कला प्रमाण हैं ॥६९॥ चाँदीके समान श्वेतवर्णवाले इस पर्वतके शिखरपर रत्नोंसे शिखरोंको अनुरंजित करनेवाले उत्तम एवं स्थायी आठ कूट सुशोभित हो रहे हैं ॥७०॥ उन कूटोंके नाम इस प्रकार हैं—१. सिद्धायतनकूट, २. महाहिमवत्कूट, ३. हैमवत कूट, ४. रोहिता कूट, ५. ह्री कूट, ६. हरिकान्त कूट, ७. हरिवर्ष कूट और ८. वैडूर्य कूट। सब कूटोंकी ऊँचाई पचास योजन प्रमाण है ॥७१–७२॥ मूलमें इन कूटोंका विस्तार पचास योजन, मध्यमें साढ़े सैंतीस योजन और ऊपर पचीस योजन है ॥७३॥

---

१. सकलाः कलाः ख० । २. दशान्तकाः म० । ३. मूले भवो मौलः ।

स्यादष्टौ हि सहस्राणि चतुःशत्येकविंशतिः । हरिवर्षस्य विस्तारो भागश्चैकोनविंशतेः ॥७४॥
शतानि नव सैकानि सहस्राणि त्रिसप्ततिः । ज्यापि चास्य विशेषेण भागाः सप्तदशाधिकाः ॥७५॥
अस्याश्चतुरशीतिश्च सहस्राणि पुनर्भवेत् । षोडशाऽपि धनुर्ज्यायाश्चतस्रः साधिकाः कलाः ॥७६॥
षोडशाऽस्य सहस्राणि योजनानां शतत्रयम् । इषुः पञ्चदश ज्ञेया सह पञ्चदशांशकैः ॥७७॥
सहस्राणि नवान्यानि शतानि नव चूलिका । पञ्चाशीतिश्च पञ्चांशाः सहार्द्धकलया तु सा ॥७८॥
त्रयोदशसहस्राणि त्रिशती षष्टिरेककम् । साधिकार्धाधिकार्धाः षट् भागास्तत्र भुजप्रमा ॥७९॥
द्वाचत्वारिंशदष्टौ च शतान्यन्यानि षोडश । सहस्राणि च भागौ द्वौ विष्कम्भो निषधस्य च ॥८०॥
उच्छ्रायः पुनरस्य स्याद् योजनानां चतुःशती । अवगाहस्त्वधो भूमेः शतयोजनमात्रकः[1] ॥८१॥
चतुर्नवतिसंख्यानि सहस्राणि शतं तथा । षट्पञ्चाशद्द्विभागौ च साधिकौ ज्याऽस्य भूभृतः ॥८२॥
लक्षैकाऽत्र सहस्राणि चतुर्विंशतिरंशकाः । साधिका नव चापं षट्चत्वारिंशच्छतत्रयम् ॥८३॥
धनुषोऽस्य त्रयस्त्रिंशत्सहस्राणि शतं तथा । सप्तपञ्चाशदेव स्यादिषुः सप्तदशांशकाः ॥८४॥
तथा दशसहस्राणि शतं स्यात्सप्तविंशतिः । साधिकौ च परौ भागौ चूलिका निषधस्य सा ॥८५॥
विंशतिश्च सहस्राणि पञ्चषष्टियुतं शतम् । साधिकार्धाधिकौ भागौ प्रमाणं भुजयोरिह ॥८६॥
तपनीयमयस्यास्य निषधस्यापि मूर्धनि । भासन्ते नवकूटानि सर्वरत्नमरीचिभिः ॥८७॥
सिद्धायतनकूटं च कूटं तन्निषधादिकम् । हरिवर्षादिकं पूर्वविदेहादिकमेव तत् ॥८८॥
ह्रीकूटं धृतिकूटं च शीतोदाकूटमेव च । विदेहकूटमित्येकं रुचकं नवमं मतम् ॥८९॥
उच्छ्रायो योजनशतं विष्कम्भश्चापि मूलजः । पञ्चाशन्मस्तकेऽमीषां मध्येऽसौ पञ्चसप्ततिः ॥९०॥

इसके आगे हरिवर्ष क्षेत्र है इसका विस्तार आठ हजार चार सौ इक्कीस योजन तथा एक योजनके उन्नीस भागोंमेंसे एक भाग प्रमाण है ॥७४॥ इसकी प्रत्यञ्चाका विस्तार तेहत्तर हजार नौ सौ एक योजन और सत्रह कला है ॥७५॥ इस प्रत्यञ्चाका धनुःपृष्ठ आठ हजार चार सौ सोलह योजन तथा कुछ अधिक चार कला है ॥७६॥ इसके बाणका विस्तार सोलह हजार तीन सौ पन्द्रह योजन तथा पन्द्रह कला है ॥७७॥ इसकी चूलिका नौ हजार नौ सौ पचासी योजन तथा साढ़े पाँच कला है ॥७८॥ और इसकी भुजाओंका प्रमाण तेरह हजार तीन सौ इकसठ योजन साढ़े छह कला है ॥७९॥

इसके आगे निषध पर्वत है इसका विस्तार सोलह हजार आठ सौ बयालिस योजन तथा एक योजनके उन्नीस भागोंमें दो भाग प्रमाण है ॥८०॥ इसकी ऊँचाई चार सौ योजन है और पृथिवीके नीचे गहराई सौ योजन प्रमाण है ॥८१॥ इस पर्वतकी प्रत्यञ्चा चौरानबे हजार एक सौ छप्पन योजन तथा अधिक दो कला है ॥८२॥ इसका धनुःपृष्ठ एक लाख चौबीस हजार तीन सौ छियालीस योजन तथा कुछ अधिक नौ कला है ॥८३॥ इस धनुःपृष्ठके बाणका विस्तार तैंतीस हजार एक सौ सतावन योजन तथा सत्रह कला है ॥८४॥ इस निषध कुलाचलकी चूलिका दश हजार एक सौ सत्ताईस योजन तथा कुछ अधिक दो कला है ॥८५॥ इसकी भुजाओंका प्रमाण बीस हजार एक सौ पैंसठ योजन तथा कुछ अधिक अढ़ाई कला है ॥८६॥ इस स्वर्णमय निषधाचलके मस्तकपर नौ कूट हैं जो कि सब प्रकारके रत्नोंकी किरणोंसे सुशोभित हो रहे हैं ॥८७॥ उन कूटोंके नाम इस प्रकार हैं—१ सिद्धायतन कूट, २ निषध कूट, ३ हरिवर्ष कूट, ४ पूर्व विदेह कूट, ५ ह्री कूट, ६ धृति कूट, ७ सीतोदा कूट, ८ विदेह कूट और ९ रुचक कूट ॥८८-८९॥ इन सबकी ऊँचाई और मूलकी चौड़ाई सौ योजन है। बीचकी चौड़ाई पचहत्तर योजन और मस्तक—ऊर्ध्व भागकी चौड़ाई पचास योजन है ॥९०॥

१. मात्रकाः म० ।

त्रयस्त्रिंशत्सहस्राणि विदेहस्य च षट्शती । तथा चतुरशीतिश्च विस्तारश्चतुरंशकाः ॥९१॥
ज्या स्याच्छतसहस्राणि योजनानि प्रमाणतः । जम्बूद्वीपप्रमाणेन कृतस्पर्धेव साम्यतः ॥९२॥
अष्टापञ्चाशदिष्टानि सहस्राणि शतं धनुः । त्रयोदशैककलांशाः साधिकार्धेन षोडश ॥९३॥
पञ्चाशच्च सहस्राणि योजनानीषुरिष्यते । महतो धनुषस्तस्य महती[1] युज्यते हि सा ॥९४॥
द्वे सहस्रे शतैर्युक्ते नवभिश्चैकविंशतिः । साधिकाष्टादशांशाश्च विदेहार्धस्य चूलिका ॥९५॥
त्र्यशीतिश्च शतान्यष्टौ सहस्राणीह षोडश । त्रयोदशांशकाः पादः साधिकश्च भुजाद्वयम् ॥९६॥
प्रमाणं दक्षिणार्धे यद् द्वीपस्य प्रतिपादितम् । बोध्यं तदुत्तरार्धेऽपि क्षेत्रपर्वतगोचरम् ॥९७॥
ज्यायां ज्यायां विशुद्धायां शेषार्धं चूलिका स्मृता । चापे चापे विशुद्धेऽर्धं तथा पार्श्वभुजा हि सा ॥९८॥
वैडूर्यमयनीलस्य सिद्धायतननामकम् । नीलकूटं च तत्पूर्वविदेहाद्युपरि स्थितम् ॥९९॥
सीताकूटं चतुर्थं स्यात्कीर्तिकूटं च पञ्चमम् । नरकान्तादिकं षष्ठं ततोऽपरविदेहकम् ॥१००॥
रम्यकाद्यष्टमं कूटमपदर्शनकं त्विह । उच्छ्रायमूलमध्यान्तविष्कम्भो निषधेषु यः ॥१०१॥
रौक्मस्य रुक्मिणोऽप्यग्रे सिद्धायतनमादितः । रुक्मिकूटं द्वितीयं स्यात् तृतीयं रम्यकादिकम् ॥१०२॥
नारीकूटं तुरीयं तु बुद्धिकूटं तु पञ्चमम् । रूप्यकूटं परं कूटं हैरण्यवतपूर्वकम् ॥१०३॥
मणिकाञ्चनकूटं च सामान्योच्छ्रायतस्तु ते । मूलमध्याग्रविस्तारैर्महाहिमवति स्थितैः ॥१०४॥
कूटान्येकादशैवाग्रे हैमस्य शिखरिश्रुतेः । सिद्धायतनमाद्यं स्यात् कूटं शिखरिपूर्वकम् ॥१०५॥
हैरण्यवतकूटं च सुरदेवीपुरःसरम् । रक्तालक्ष्मीसुवर्णादिकूटानि च यथाक्रमम् ॥१०६॥
तथा रक्तवती कूटं गन्धदेव्यास्ततः परम् । तथैरावतकूटं च पारचार्यं मणिकाञ्चनम् ॥१०७॥

इसके आगे विदेह क्षेत्र है इसका विस्तार तैंतीस हजार छह सौ चौरासी योजन तथा एक योजनके उन्नीस भागोंमें चार भाग प्रमाण है ॥९१॥ इसकी प्रत्यञ्चाका प्रमाण मानो समानताके कारण स्पर्धा करनेवाले जम्बू द्वीपके बराबर एक लाख योजन है ॥९२॥ इसके धनुः-पृष्ठका विस्तार एक लाख अंठावन हजार एक सौ तेरह योजन तथा कुछ अधिक साढ़े सोलह कला है ॥९३॥ बाणका विस्तार पचास हजार योजन है सो ठीक ही है क्योंकि उतने बड़े धनुषका उतना बड़ा बाण होना उचित हो है ॥९४॥ विदेहार्धकी चूलिका दो हजार नौ सौ इक्कीस योजन तथा कुछ अधिक अठारह कला है ॥९५॥ इसकी दोनों भुजाओंका विस्तार सोलह हजार आठ सौ तेरासी योजन तथा सवा तेरह कलासे कुछ अधिक है ॥९६॥ जम्बू द्वीपके दक्षिणार्ध भागमें क्षेत्र तथा पर्वत आदिका जो प्रमाण बतलाया है वही उत्तरार्ध भागमें भी जानना चाहिए ॥९७॥ प्रत्यञ्चा, धनुःपृष्ठ, बाण, भुजा तथा चूलिकाका जो विस्तार दक्षिणार्धमें बतलाया गया है वही शेषार्धमें भी है ॥९८॥ उत्तरार्धके पर्वतोंमें जो विशेषता है उसे बतलाते हैं—विदेह क्षेत्रके आगे जो वैडूर्यमणिमय नील पर्वत है उसके ऊपर निम्नलिखित नौ कूट हैं—१ सिद्धायतन कूट, २ नील कूट, ३ पूर्व विदेह कूट, ४ सीताकूट, ५ कीर्ति कूट, ६ नरकान्तककूट, ७ अपर विदेह कूट, ८ रम्यक कूट और ९ अपदर्शन कूट। इन सब कूटोंकी ऊँचाई तथा मूल मध्य और ऊर्ध्व भागकी चौड़ाई निषधाचलके कूटोंके समान है ॥९९-१०१॥ रुक्मी पर्वत चाँदीका है उसके अग्रभागपर निम्नलिखित आठ कूट हैं—पहला सिद्धायतन कूट, दूसरा रुक्मि कूट, तीसरा रम्यक कूट, चौथा नारी कूट, पाँचवाँ बुद्धि कूट, छठवाँ रूप्य कूट, सातवाँ हैरण्यवत कूट और आठवाँ मणिकाञ्चनकूट। इन सबकी सामान्य ऊँचाई मूल मध्य तथा अग्र भागका विस्तार महाहिमवान् पर्वतके कूटोंके समान जानना चाहिए ॥१०२-१०४॥ शिखरी पर्वत सुवर्णमय है उसके अग्रभागपर निम्नलिखित ग्यारह कूट हैं—१ सिद्धायतन कूट, २ शिखरी कूट, ३ हैरण्यवत कूट, ४ सुरदेवी कूट, ५ रक्ता कूट, ६ लक्ष्मी कूट, ७ सुवर्ण कूट, ८ रक्तवती

१. महिती म० ।

हिमवत्कूटतुल्यानि तानि कूटानि शोभया । आदिमध्यान्तविस्तारैरुच्छ्रायेण च चारुणा ॥१०८॥
तथैरावतमध्यस्थविजयार्द्धस्य मूर्धनि । हठन्ते[1] नवकूटानि सुरत्नमणिसत्कूटैः ॥१०९॥
सिद्धायतनकूटं स्यादुत्तरार्धाभिधानकम् । तामिस्रगुहकूटं च मणिभद्रमतः परम् ॥११०॥
विजयार्धकुमाराख्यं पूर्णभद्राख्यमन्यतः । खण्डकादिप्रपातं च दक्षिणार्धं च नामतः ॥१११॥
नवमं तु तथाख्यातं कूटं वैश्रवणश्रुतिः । तानि सर्वाणि तुल्यानि भारतीयैः प्रमाणतः ॥११२॥
पूर्वापरायतानां हि षण्णां तत्कुलभूभृताम् । सप्तक्षेत्रविभक्तॄणामेकैकस्योभयान्तयोः ॥११३॥
सर्वर्तुकुसुमाकीर्णफलभारनतद्रुमैः । हारिणौ[2] पक्षिसङ्घातमधुकृन्मधुरस्वनैः[3] ॥११४॥
अर्द्धयोजनविस्तीर्णौ विचित्रमणिवेदिकौ । भवतो वनखण्डौ द्वौ पर्वतायामसम्मितौ ॥११५॥
अर्धयोजनमानस्तु वेदिकोत्सेध इष्यते । वेदकैर्व्यासतस्तस्य व्यासः पञ्चधनुःशती ॥११६॥
[4]सुरत्नपरिणामानि नानावर्णानि सर्वतः । वेदिकोचितदेशेषु तोरणानि भवन्ति च ॥११७॥
भूभृतामुपरि ज्ञेया सर्वतः पद्मवेदिका । मणिरत्नमयी दिव्या गव्यूतिद्वयमुच्छ्रिता ॥११८॥
गृहद्वीपसमुद्राणां भूनदीह्रदभूभृताम् । वेदिकोत्सेधविस्तारौ तिर्यग्लोके स्थिताविमौ ॥११९॥
तेषां तु मध्यदेशेषु पूर्वापरसमायताः । षण्महाकुलशैलानां षड् महान्तो ह्रदाः स्थिताः ॥१२०॥
पद्मश्चापि महापद्मस्तिगिञ्छः केसरी ह्रदः । सुमहापुण्डरीकश्च पुण्डरीकश्च नामतः ॥१२१॥
चतुर्दश विनिर्गत्य सरितः पूर्वसागरम् । तेभ्यो विशन्ति सप्तैव सप्तैवापरसागरम् ॥१२२॥

कूट, ९ गन्धदेवी कूट, १० ऐरावत कूट और ११ मणिकाञ्चन कूट । ये सब कूट शोभा, मूल-मध्य और अन्त सम्बन्धी विस्तार तथा सुन्दर ऊँचाईसे हिमवत् पर्वतके कूटोंके समान हैं ॥१०५-१०८॥ ऐरावत क्षेत्रके मध्यमें जो विजयार्ध पर्वत है उसके अग्रभागपर भी नौ कूट हैं जो कि उत्तमोत्तम रत्न तथा मणियोंके समूहसे देदीप्यमान हो रहे हैं । उन कूटोंके नाम इस प्रकार हैं—१ सिद्धायतन कूट, २ उत्तरार्ध कूट, ३ तामिस्रगुह कूट, ४ मणिभद्र कूट, ५ विजयार्ध कुमार कूट, ६ पूर्णभद्र कूट, ७ खण्डकप्रपात कूट, ८ दक्षिणार्ध कूट और ९ वैश्रवण कूट । ये सब कूट प्रमाणकी अपेक्षा भरत क्षेत्र सम्बन्धी विजयार्धपर स्थित कूटोंके तुल्य हैं ॥१०९-११२॥ सात क्षेत्रोंका विभाग करनेवाले तथा पूर्वसे पश्चिम तक लम्बे जिन छह कुलाचलोंका वर्णन पहले कर आये हैं उनमेंसे प्रत्येकके दोनों अन्त भागमें वन खण्ड सुशोभित हैं । ये वन खण्ड समस्त ऋतुओंके फूलोंसे भरे तथा फलोंके भारसे नम्रीभूत वृक्षों और पक्षि-समूह तथा भ्रमरोंके मधुर शब्दोंसे मनोहर हैं, आधा योजन विस्तृत हैं, चित्र-विचित्र मणियोंकी वेदिकाओंसे सहित हैं और पर्वतके लम्बाईके बराबर हैं ॥११३-११५॥ व्यास—विस्तारके रहस्यको जाननेवाले आचार्योंने इन वन खण्डोंकी वेदिकाकी ऊँचाई आधा योजन और चौड़ाई पाँच सौ धनुष बतलाई है ॥११६॥ वेदिकाओंके ऊपर योग्य स्थानोंपर चारों ओर उत्तमोत्तम रत्नोंसे निर्मित नाना रंगके तोरण हैं ॥११७॥ कुलाचलोंके ऊपर चारों ओर मणि तथा रत्नोंसे बनी हुई दिव्य तथा दो कोश ऊँची पद्म-वेदिका है ॥११८॥ मध्य लोकमें गृह, द्वीप, समुद्र, पृथिवी, नदी, ह्रद और पर्वतोंकी जो वेदिकाएँ हैं उनकी ऊँचाई और विस्तार भी इसी प्रकार समझना चाहिए अर्थात् सबकी ऊँचाई आधा योजन और चौड़ाई पाँच सौ धनुष हैं ॥११९॥

उक्त छह महाकुलाचलोंके मध्यभागमें पूर्वसे पश्चिम तक लम्बे छह विशाल सरोवर हैं ॥१२०॥ उनके नाम इस प्रकार हैं—१ पद्म, २ महापद्म, ३ तिगिञ्छ, ४ केसरी, ५ महापुण्डरीक और ६ पुण्डरीक ॥१२१॥ उन सरोवरोंसे चौदह नदियाँ निकली हैं जिनमें सात तो पूर्व

१. हठन्ति ख०, म० । उत्तिष्ठन्ति-इत्यर्थः, 'हठ' प्लुतिशठत्वयोः । २. मनोहरौ । ३. मधुपस्वनैः म० । ४. उत्तमरत्ननिर्मितानि ।

गङ्गा सिन्धुश्च रोहा[1] च रोहितास्या हरित् सरित् । हरिकान्ता च सीता च सीतोदाऽपि च नामतः ॥१२३॥
नारी च नरकान्ता च तथैव परिवर्णिता । सुवर्णकूलया साकं रूप्यकूला पराऽपगा ॥१२४॥
रक्तया सह रक्तोदा ताश्च सर्वा यथायथम् । नदीबहुसहस्रैस्तु भवन्ति सहिताः क्षितौ ॥१२५॥
सहस्रयोजनायामः पद्मः पञ्चशतानि च । योजनानि स विस्तीर्णो दश स्यादवगाहतः ॥१२६॥
हिमवद्वेदिकातुल्या परिक्षिपति वेदिका । समन्ततस्तमापूर्णं शुभशीतलवारिणा ॥१२७॥
योजनादुच्छ्रित[2]विष्कम्भं पुष्करं पुष्करेऽम्भसः । निष्क्रम्य योजनार्धं तु काशते क्रोशकर्णिकम् ॥१२८॥
द्विगुणद्विगुणायामविष्कम्भादौ ह्रदान्तरे । दक्षिणोत्तरभागस्थे पुष्कराणि चकासते ॥१२९॥
पुष्करेषु वसन्त्युच्चैः प्रासादेषु यथाक्रमम् । श्रीह्रियौ धृतिकीर्त्यौ च बुद्धिलक्ष्म्यौ च देवताः ॥१३०॥
ताश्च पल्योपमायुष्काः सौधर्मेन्द्रस्य दक्षिणाः । ऐशानस्योत्तरा देव्यः ससामानिकसंसदः ॥१३१॥
गङ्गा पूर्वेण पद्मस्य द्वारेणानुनगं गता । सिन्धुरप्यपरेणास्य रोहितास्योत्तरेण तु ॥१३२॥
महापद्मह्रदात् रोहा हरिकान्ता च निःसृता । हरिता सह सीतोदा तिगिञ्छह्रदतस्तथा ॥१३३॥
केशरीह्रदतः सीता नरकान्ता च निर्गता । नारी च रूप्यकूला च सा महापुण्डरीकतः ॥१३४॥
सुवर्णकूलया रक्ता रक्तोदा पुण्डरीकतः । द्वारेण तोरणोद्भासा विनिःक्रान्ता महानदी ॥१३५॥
षड् योजनानि गव्यूतं व्यासो वज्रमुखस्य सः । अवगाहोऽर्द्धगव्यूतं गङ्गाया निर्गमे स्मृतम् ॥१३६॥
योजनानि नवोद्विद्धमष्टांशत्रितयं तथा । तोरणं तत्र विज्ञेयं विचित्रमणिभास्वरम् ॥१३७॥

सागरमें प्रवेश करती हैं और सात पश्चिम सागरमें ॥१२२॥ उन नदियोंके नाम इस प्रकार हैं—१ गङ्गा, २ सिन्धु, ३ रोहा (रोहित्), ४ रोहितास्या, ५ हरित्, ६ हरिकान्ता, ७ सीता, ८ सीतोदा, ९ नारी, १० नरकान्ता, ११ सुवर्णकूला, १२ रूप्यकूला, १३ रक्ता और १४ रक्तोदा। ये सब नदियाँ पृथिवीतलपर हजारों सहायक नदियोंसे युक्त हैं ॥१२३–१२५॥ पद्म सरोवर एक हजार योजन लम्बा, पाँच सौ योजन चौड़ा और दश योजन गहरा है ॥१२६॥ शुभ एवं शीतल जलसे भरे हुए इस सरोवरको हिमवत्कुलाचलकी वेदिकाके तुल्य एक वेदिका चारों ओरसे घेरे हुए है ॥१२७॥ इस पद्म सरोवरमें एक योजन विस्तारवाला कमल है। यह कमल पानीसे निकलकर आधा योजन ऊपर उठा हुआ है, तथा एक कोशकी उसकी कर्णिका सुशोभित है ॥१२८॥ दक्षिण तथा उत्तर भागमें जो अन्य सरोवर हैं उनकी लम्बाई चौड़ाई आदि पूर्व पूर्वके सरोवरोंसे दुगुनी दुगुनी है तथा उन सब सरोवरोंमें कमल सुशोभित हैं ॥१२९॥ कमलोंपर जो ऊँचे-ऊँचे भवन बने हुए हैं उनमें यथाक्रमसे श्री, ह्री, धृति, कीर्ति, बुद्धि और लक्ष्मी नामकी देवियाँ निवास करती हैं ॥१३०॥ ये सब देवियाँ एक पल्यकी आयुवाली हैं। इनमें दक्षिण भागकी देवियाँ सौधर्मेन्द्रकी और उत्तर भागकी देवियाँ ऐशानेन्द्रकी आज्ञाकारिणी हैं। ये सब सामानिक देवोंकी सभासे सहित हैं ॥१३१॥

पद्म सरोवरके पूर्व द्वारसे गङ्गा, पश्चिम द्वारसे सिन्धु और उत्तर द्वारसे रोहितास्या नदी निकली है। ये नदियाँ सरोवरसे निकलकर कुछ दूर तक पर्वतपर ही बहती हैं ॥१३२॥ महापद्मसरोवरसे रोहा और हरिकान्ता, तिगिञ्छसे हरित् और सीतोदा, केशरी सरोवरसे सीता और नरकान्ता, महापुण्डरीक सरोवरसे नारी और रूप्यकूला और पुण्डरीक सरोवरसे सुवर्णकूला, रक्ता और रक्तोदा नदी निकली हैं। इन नदियोंके निकलनेके द्वार तोरणोंसे सुशोभित हैं ॥१३३–१३५॥ जिस वज्रमुख द्वारसे गङ्गा निकलती है उसका विस्तार छह योजन और एक कोश है तथा उसकी गहराई आधे कोशकी है ॥१३६॥ उस द्वारपर चित्र-विचित्र मणियोंसे देदीप्यमान एक तोरण बना हुआ है जो नौ योजन तथा एक योजनके आठ भागोंमें

---

१. रोहिच ख०, म० । २. योजनोच्छ्रित-म० ।

प्राच्य पञ्चशतीं प्राचीमावर्तेन निवर्त्य च । गङ्गाकूटादपाचीं सा भारतव्यासमागता ॥१३८॥
शतयोजनमाकाशं चाधिकं चातिलङ्घ्य सा । व्यपतत्पर्वताद्दूरे पञ्चविंशतियोजने ॥१३९॥
[1]षड्योजनीं सगव्यूतां विस्तीर्णां वृषभाकृतिः । जिह्विका [2]योजनार्द्धं तु बाहुल्यायामतो गिरौ[3] ॥१४०॥
तयैव पतिता गङ्गा गोशृङ्गाकारधारिणी । श्रीगृहाग्रेऽभवद् भूमौ दशयोजनविस्तृता ॥१४१॥
षष्टियोजनविस्तीर्णं वज्रकुण्डमुखं भुवि । अवगाहो दशास्यापि मध्ये द्वीपो व्यवस्थितः ॥१४२॥
अष्टयोजनविष्कम्भः सोऽम्भसः क्रोशयोर्द्वयम् । उत्थितस्तस्य चाम्योऽस्ति मूर्ध्नि वज्रमयोऽचलः ॥१४३॥
चत्वारि च गिरिर्द्वे च तथैकं च दशोन्नतिः । योजनानि स विस्तीर्णो मूले मध्ये च मूर्धनि ॥१४४॥
शिखरे च गिरेस्तस्य मूले मध्ये च मस्तके । त्रीणि द्वे च सहस्रं च विस्तारेण धनूंषि तु ॥१४५॥
अन्तः पञ्चशतायामं तदर्द्धं चापि विस्तृतम् । द्विसहस्रधनुस्तुङ्गं भाति वज्रमयं गृहम् ॥१४६॥
अशीतिधनुरुद्विद्धं चत्वारिंशच्च विस्तृतम् । तत्र वज्रकपाटाख्यं द्वारं वज्रमयं गृहे ॥१४७॥
यात्वा दक्षिणतः कुण्डात् क्वचित् कुण्डलगामिनी । गुहायां विजयार्द्धस्य विस्तृता [5]साष्टयोजनीम् ॥१४८॥
चतुर्दशसहस्रैस्तु प्रवेशे सरितामसौ । सार्द्धद्विषष्टिविष्कम्भा प्रविष्टा पूर्वसागरम् ॥१४९॥

तीन भाग प्रमाण ऊँचा है ॥१३७॥ गङ्गा नदी अपने निर्गम स्थानसे निकलकर पाँच सौ योजन तो पूर्व दिशाकी ओर बही है फिर बलखाती हुई गङ्गा कूटसे लौटकर दक्षिणकी ओर भरत क्षेत्रमें आई है ॥१३८॥ वह गङ्गा कुछ अधिक सौ योजन आकाशसे उलंघकर पर्वतसे पच्चीस योजनकी दूरीपर गिरी है ॥१३९॥

हिमवत् पर्वतके दक्षिण तटपर एक जिह्विका नामकी प्रणाली है जो छह योजन तथा एक कोश चौड़ी है, दो कोश ऊँची तथा उतनी ही लम्बी है और वृषभाकार अर्थात् गोमुखके आकारकी है ॥१४०॥ इस प्रणाली द्वारा गङ्गा, गोशृङ्गका आकार धारण करती हुई श्रीदेवीके भवनके आगे गिरी है और वहाँ भूमिपर इसका विस्तार दश योजन हो गया है ॥१४१॥ भूमिपर साठ योजन चौड़ा तथा दश योजन गहरा एक वज्रमुख नामका कुण्ड है इस कुण्डके मध्यमें एक द्वीप है जो आठ योजन चौड़ा है तथा पानीसे दो कोश ऊँचा है। इस द्वीपके ऊपर एक वज्रमय पर्वत है जो मूलमें चार योजन, मध्यमें दो योजन, तथा अन्तमें एक योजन चौड़ा एवं दश योजन ऊँचा है ॥१४२-१४४॥ उस पर्वतके शिखरपर एक सुशोभित वज्रमय भवन है जो मूलमें तीन हजार, मध्यमें दो हजार और अन्तमें एक हजार धनुष विस्तृत है। तथा भीतर पाँच सौ धनुष लम्बा, दो सौ पचास धनुष चौड़ा और दो हजार धनुष ऊँचा है ॥१४५-१४६॥ उस भवनका अस्सी योजन ऊँचा तथा चालीस योजन चौड़ा वज्रकपाट नामका वज्रमय द्वार है ॥१४७॥ वज्रमुख कुण्डसे दक्षिणकी ओर जाकर कहीं कुण्डलके आकार गमन करती हुई गङ्गा विजयार्ध पर्वतकी गुफामें आठ योजन चौड़ी हो गई है ॥१४८॥ चौदह हजार नदियोंके साथ जहाँ यह गङ्गा पूर्व लवण समुद्रमें प्रवेश करती है वहाँ इसकी चौड़ाई साढ़े बासठ योजन-

१. षड्योजनीं सगव्यूतां म० । २. योजनार्धं ।

३. कोसदुगदीहबहला वसहायारा य जिदिया संघ ।
छज्जोयणं सकोसं तिस्से गंतूण पडिदा सा ॥५८४॥ —त्रिलोकसार
हिमवन्त अन्त मणिमय वरकूड मुहम्मि वसह रूवम्मि ।
पविसित्तु पडइ धारा सय जोयण तुंग सम्मि धवला ॥१४९॥
छज्जोयण सक्कोशा पणालिया वित्थडा मुणेयव्वा ।
आयामेण य णेया वे कोसातेत्तिया बहला ॥१५०॥ —जम्बू० प्रज्ञप्ति

४. ऊर्जितः म० । ५. याष्टयोजनी क० ।

योजनानि त्रिनवति त्रिगव्यूतानि चोच्छ्रितम् । गाधतो योजनार्द्धं स्यात् सरिद्विस्तारतोरणम् ॥१५०॥
सर्वप्रकारतः सिन्धुः समाना गङ्गया ततः । आविदेहाच्च सरितां द्विगुणं जिह्विकादिकम् ॥१५१॥
तोरणान्यवगाहेन समस्तानि समानि तु । वसन्ति तेषु सर्वेषु दिक्कुमार्यो यथायथम् ॥१५२॥
षट्सप्तति कलाषट्कं योजनानां शतद्वयम् । गत्वाऽद्रौ रोहितास्यातो[1] निपत्य श्रीगृहेऽगमत् ॥१५३॥
शतानि षोडशाऽद्रौ तु रोह्या पञ्चयुतानि सा । कलाश्चागम्य पञ्चागाद् गिरेः पञ्चाशदन्तरम् ॥१५४॥
तावदेव गता शैले हरिकान्तोत्तरां दिशम् । समुद्रं पश्चिमं याता प्राप्य कुण्डं शतान्तरम्[2] ॥१५५॥
चतुःसप्ततिसंख्यानि शतानि कलया हरित् । एकविंशतिमागम्य निषधे प्रापतच्छते ॥१५६॥
सीतोदाऽपि गिरिं गत्वा तावदेव चतुःशती । उल्लङ्घ्यापतदद्रेः सा योजनानां शतद्वये ॥१५७॥
तावदेव समागत्य सीताऽसौ नीलपर्वते । तावत्येव समापत्य प्राग्विदेहान् बिभेद च ॥१५८॥
दक्षिणाभिः समा नद्यः षड्भिस्ताश्च षडुत्तराः । यथायोग्यं प्रपाताद्यैः प्रतिपाद्याः प्रतिद्विकम् ॥१५९॥
गङ्गा चैव नदी रोह्या हरित् सीता च पूर्वगाः । नारी सुवर्णकूला च सरक्ताः परगाः पराः ॥१६०॥
श्रद्धावान् विजयावांश्च पद्मवांश्चापि गन्धवान् । मध्ये हैमवतादीनां विजयार्द्धास्तु वर्तुलाः ॥१६१॥
योजनानां सहस्रं स्यान्मूले विस्तृतिरुच्छ्रितिः । तदर्धं मस्तके मध्ये पञ्चाशत् सप्तशत्यपि ॥१६२॥
योजनार्द्धेन न प्राप्ता नद्यो नाभिगिरीनिमान् । गता प्रदक्षिणा सीतासीतोदे मन्दरं यथा ॥१६३॥

की हो गई है ॥१४९॥ गङ्गा जिस तोरण द्वारसे लवण समुद्रमें प्रवेश करती है वह तेरानबे योजन तीन कोश ऊँचा है तथा आधा योजन गहरा है ॥१५०॥

सिन्धु नदी सब प्रकारसे गङ्गा नदीके समान है केवल विशेषता यह है कि यह पश्चिम लवण समुद्रमें मिली है। गङ्गा सिन्धुसे लेकर विदेह क्षेत्र तककी समस्त नदियोंकी जिह्विका आदिका विस्तार दूना-दूना जानना चाहिए ॥१५१॥ समस्त नदियोंके तोरण गहराईकी अपेक्षा समान हैं तथा उन समस्त तोरणोंमें यथायोग्य दिक्कुमारी देवियाँ निवास करती हैं ॥१५२॥ रोहितास्या नदी दो सौ छिहत्तर योजन छह कला पर्वतपर बहती है। तदनन्तर पर्वतसे गिरकर श्री देवीके भवनकी ओर गई है ॥१५३॥ रोह्या नदी एक हजार छह सौ पाँच योजन पाँच कला पर्वतपर बहकर उससे पचास योजन दूर गिरी है ॥१५४॥ इसी प्रकार हरिकान्ता नदी भी महा हिमवान् पर्वतपर एक हजार छह सौ पचास योजन पाँच कला उत्तर दिशाकी ओर बहकर सौ योजन दूर कुण्डमें गिरी है और वहाँसे पश्चिम समुद्रकी ओर गई है ॥१५५॥ हरित् नदी सात हजार चार सौ इक्कीस योजन एक कला निषध पर्वतपर बहकर सौ योजन दूरपर गिरी है ॥१५६॥ सीतोदा नदी भी इतनी ही दूर पर्वतपर बहती है। तदनन्तर चार सौ योजन ऊँचे आकाशको उल्लंघकर पर्वतसे दो सौ योजन दूर गिरती है ॥१५७॥ सीता नदी भी इतनी ही दूर नील पर्वतपर बहती है और इतनी ही दूर आकाशमें उछलकर पूर्व विदेह क्षेत्रको भेदन करती है ॥१५८॥ उत्तर दिशाकी छह नदियाँ दक्षिण दिशाकी छह नदियोंके समान हैं इसलिए उनके प्रपात आदिका वर्णन दो-दो नदियोंके युगल रूपमें यथायोग्य करना चाहिए ॥१५९॥ गङ्गा, रोह्या, हरित्, सीता, नारी, सुवर्णकूला और रक्ता ये सात नदियाँ पूर्व समुद्रकी ओर जाती हैं और शेष सात नदियाँ पश्चिम समुद्रकी ओर ॥१६०॥ हैमवत आदि चार क्षेत्रोंके मध्यमें क्रमसे श्रद्धावान्, विजयावान्, पद्मवान् और गन्धवान् नामके चार गोलाकार विजयार्ध पर्वत हैं ॥१६१॥ ये पर्वत मूलमें एक हजार योजन, मध्यमें सात सौ पचास योजन और मस्तकपर पाँच सौ योजन चौड़े हैं तथा एक हजार योजन ऊँचे हैं ॥१६२॥ इन पर्वतोंका दूसरा नाम नाभि गिरि है जिस प्रकार सीता, सीतोदा नदी मेरु पर्वतकी प्रदक्षिणा देती हुई गई है इसी प्रकार रोह्या, रोहितास्या आदि नदियाँ

१. तस्यान्तो म० । २. शतयोजनानन्तरे ।

प्रासादेषु गिरस्त्येषां स्वातिरप्यरुणः परः । पद्मश्चापि प्रभासश्च व्यन्तरा निवसन्ति ते ॥१६४॥
क्षेत्रपर्वतनद्याद्या येऽत्र द्वीपे प्रकीर्तिताः । द्विगुणा धातकीखण्डे पुष्करार्द्धे च ते स्थिताः ॥१६५॥
[1]द्वीपानतीत्य संख्यातान् जम्बूद्वीपः परः [2]स्थितः । सन्ति तत्र पुरोऽमीषामत्र ये गदिताः सुराः ॥१६६॥
नीलमन्दरमध्यस्था उत्तराः कुरवो मताः । स्थितास्तु देवकुरवः सुमेरुनिषधान्तरे ॥१६७॥
द्वाचत्वारिंशदष्टौ च शतानि व्यासतो मताः । एकादशसहस्राणि कुरवस्ते कलाद्वयम् ॥१६८॥
ज्या च तेषां त्रिपञ्चाशत्सहस्राणि धनुः पुनः । षट्चतुःशतो चाष्टौ दशांशा द्वादशाधिकाः ॥१६९॥
त्रिचत्वारिंशतं सैकसहस्राणि च सप्ततिः । चतुरंशा नवांशाश्च कुरुवृत्तं प्रकीर्तितम् ॥१७०॥
सहस्राणि त्रयस्त्रिंशत् षट्शती चतुरंशकाः । अशीतिश्चतुरग्राऽसौ विदेहक्षेत्रविस्तृतिः ॥१७१॥
मेरोः पूर्वोत्तराशायां सीतायाः पूर्वतः स्थितम् । समीपं नीलशैलस्य जम्बूस्थलमुदीरितम् ॥१७२॥
पञ्चचापशतव्यासा गव्यूतिद्वयमुद्धृता । स्थलस्योपरि पर्येति सर्वतो रत्नवेदिका ॥१७३॥
तस्य पञ्चशती व्यासो मध्ये बाहुल्यमष्ट तु । गव्यूतिद्वितयं चान्ते स्थलस्य परिकीर्तितम् ॥१७४॥
जाम्बूनदमये तत्र पीठिकाष्टोच्छ्रया स्थिता । मूलमध्याग्रविस्तारैर्द्वादशाष्टचतुर्मिता ॥१७५॥
अधोऽधोऽन्या षडेतस्याः परितो मणिवेदिकाः । प्रत्येकमुपरि द्वे द्वे तासां ताः पद्मवेदिकाः ॥१७६॥
मूले गव्यूतिविस्तीर्णः स्कन्धोच्छ्रायद्वियोजनः । अवगाहद्विगव्यूतिः शाखाव्यासाष्टयोजनः ॥१७७॥

भी आधा योजन दूर रहकर इन पर्वतोंकी प्रदक्षिणा देती हुई गई हैं ॥१६३॥ इन पर्वतोंके शिखरोंपर निर्मित भवनोंमें क्रमसे स्वाति, अरुण, पद्म और प्रभास नामके व्यन्तर देव निवास करते हैं ॥१६४॥

जम्बू द्वीपमें जिन क्षेत्र, पर्वत तथा नदी आदिका वर्णन किया है, धातकीखण्ड तथा पुष्करार्धमें वे सब दूने-दूने हैं ॥१६५॥ संख्यात द्वीप समुद्रोंको उल्लंघकर एक दूसरा जम्बू द्वीप भी है। इस जम्बू द्वीपमें जिन देवोंका कथन किया है उस दूसरे जम्बू द्वीपमें भी इन देवोंके नगर हैं ॥१६६॥ नील कुलाचल और सुमेरु पर्वतके मध्यमें जो प्रदेश स्थित हैं वे उत्तरकुरु माने जाते हैं और सुमेरु तथा निषध कुलाचलके बीचके प्रदेश देवकुरु कहे जाते हैं ॥१६७॥ ये दोनों कुरु विस्तारकी अपेक्षा ग्यारह हजार आठ सौ योजन दो कला प्रमाण माने गये हैं ॥१६८॥ इनकी प्रत्यञ्चा त्रेपन हजार और धनुःपृष्ठ छह हजार चार सौ अठारह योजन बारह कला है ॥१६९॥ इन कुरु प्रदेशोंका वृत्तक्षेत्र इकहत्तर हजार एक सौ तैंतालीस योजन तथा एक योजनके नौ अंशोंमें चार अंश प्रमाण है ॥१७०॥

वेदिकासे सहित लवण समुद्र, दो लाख योजन विस्तारवाला है और वह परिखाके समान जम्बू द्वीपको घेरकर स्थित है ॥४३०॥ इसकी परिधि पन्द्रह लाख इक्यासी हजार एक सौ उनतालीस योजनमें कुछ कम है ॥४३१॥ तथा इसके गणितका प्रकीर्णक पद (क्षेत्रफल) अठारह हजार नौ सौ तिहत्तर करोड़, छयासठ लाख, उनसठ हजार छह सौ योजन है ॥४३२-४३३॥ इसकी ऊपर नीचे चौड़ाई दश हजार योजन, गहराई एक हजार योजन और अवस्थित रूपसे ऊँचाई ग्यारह योजन प्रमाण है ॥४३४॥ वह लवणसमुद्र, तटान्तसे पंचानबे हाथ जानेपर एक हाथ, पंचानबे अंगुल जानेपर एक अंगुल और पंचानबे योजन जानेपर एक योजन गहरा है ॥४३५॥ और पंचानबे अङ्गुल, पंचानबे हाथ या पंचानबे योजन जानेपर यह समुद्र सोलह अङ्गुल, सोलह हाथ या सोलह योजन ऊँचा है अर्थात् तटान्तसे पंचानबे अङ्गुल जानेपर

१. जम्बूर्द्ध- म० । २. भूतामरस्य च म० । ३. १८९७३६६५९६०० ।

शुक्ले पञ्चसहस्राणि यावत्तावत् प्रवर्धते । पक्षे प्रहीयते कृष्णे यावदेकादशैव सः ॥४३७॥
त्रिशती च त्रयस्त्रिंशद् योजनानि दिने दिने । त्रिभागं वर्धते वार्धिः शुक्ले कृष्णे च हीयते ॥४३८॥
मक्षिकापक्षसूक्ष्मान्तो वेदिकान्ते पयोनिधिः । स चोर्ध्वं मानतोयस्तु योजनार्धं प्रवर्द्धते ॥४३९॥
षट्षष्टि द्वे शते दण्डा द्वौ हस्तौ षोडशाङ्गुली । शुक्ले कृष्णे च ते स्यातां वृद्धिहानी दिने दिने ॥४४०॥
अधः संक्षेपणी द्रोणी विस्तीर्णोर्ध्वं क्षितौ दिवि । अन्यथा नौपुटाम्भोधिः समो वा यवराशिना ॥४४१॥
अगत्याः पञ्चनवतिं सहस्राणि प्रविश्य तु । मध्ये स्युर्दिक्षु चत्वारि पातालविवराण्यधः ॥४४२॥
प्राच्यां पातालमाशायां प्रतीच्यां वडवामुखम् । कदम्बुकमपाच्यां स्यादुदीच्यां यूपकेसरम् ॥४४३॥
तन्मूलमुखविस्तारः सहस्राणि दश स्मृतः । गाहस्वमध्यविस्तारावेका लक्षेति लक्षितौ ॥४४४॥
कलशलसमानानि पातालानि समन्ततः । बाहुल्यं वज्रकुड्यानां तेषां पञ्च शतानि तु ॥४४५॥
त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतत्रयम् । एकैकोऽत्र विभागः स्याद् योजनानां तु भागवान् ॥४४६॥
ऊर्ध्वभागे जलं तेषां तृतीये केवलं सदा । मूले च बलवान् वायुर्मध्यभागे क्रमेण तौ ॥४४७॥
वायोरुच्छ्वासनिश्वासौ पातालेषु स्वभावजौ । तद्वशादुदकस्योर्ध्वमधश्च परिवर्तनम् ॥४४८॥
भागः पञ्चदशः शुक्ले वायुभिः पूर्यते शनैः । पातालानां जलैः कृष्णे स्थितिः[1] स्यात्पक्षसन्धिषु ॥४४९॥

सोलह अङ्गुल ऊँचा है, पंचानवे हाथ जानेपर सोलह हाथ ऊँचा है और पंचानवे योजन जानेपर सोलह योजन ऊँचा है ॥४३६॥ शुक्ल पक्षमें समुद्रका जल पाँच हजार योजन तक ऊँचा बढ़ जाता है और कृष्ण पक्षमें स्वाभाविक ऊँचाई जो ग्यारह हजार योजन है वहाँ तक घट जाता है ॥४३७॥ शुक्ल पक्षमें समुद्र प्रतिदिन तीन सौ तैंतीस योजन और एक योजनके तीन भाग बढ़ता है तथा कृष्ण पक्षमें उतना ही घटता है ॥४३८॥ वेदिकाके अन्तमें समुद्र मक्षिकाके पङ्खके समान अत्यन्त सूक्ष्म है परन्तु जब उसकी जलमें वृद्धि होती है तब आधा योजन तक बढ़ जाता है ॥४३९॥ शुक्लपक्षमें वेदिकाके अन्तमें प्रतिदिन समुद्रकी वृद्धि दो सौ छयासठ धनुष, दो हाथ और सोलह अङ्गुल होती है और कृष्णपक्षमें प्रतिदिन उतनी ही हानि होती है ॥४४०॥ संकुचित होता हुआ समुद्र नीचे भागमें नावके समान रह जाता है और ऊपर पृथिवीपर विस्तीर्ण हो जाता है तथा आकाशमें इसके विपरीत जुड़ी हुई दो नौकाओंके पुटके समान अथवा जौकी राशिके समान नीचे चौड़ा और ऊपर संकीर्ण हो जाता है ॥४४१॥

वेदीसे पंचानवे हजार योजन भीतर प्रवेश करनेपर चारों दिशाओंमें नीचे चार पाताल-विवर हैं ॥४४२॥ उनमें पूर्व दिशामें पाताल, दक्षिणमें बडवामुख, पश्चिममें कदम्बुक और उत्तरमें यूपकेसर नामका पाताल है ॥४४३॥ इन चारों पातालोंके मूल और अग्रभागका विस्तार दश हजार योजन है तथा गहराई और अपने मध्य भागका विस्तार एक-एक लाख योजन प्रमाण माना गया है ॥४४४॥ ये पाताल-विवर गोलीके समान हैं अर्थात् इनका तल और ऊपरका विस्तार अल्प है तथा मध्यका अधिक है। इनकी वज्रमयी दीवालोंकी मोटाई सब ओरसे पाँच-पाँच सौ योजन है ॥४४५॥ इन विवरोंके तीन-तीन भाग हैं उनमें-से एक भाग तैंतीस हजार तीन सौ तैंतीस योजन और एक कला प्रमाण है ॥४४६॥ इनके तीसरे ऊर्ध्व भागमें केवल जल रहता है, नीचेके भागमें बलवान् वायु रहती है और बीचके भागमें क्रमसे जल तथा वायु दोनों रहते हैं ॥४४७॥ पातालोंमें जो वायु है उसका उच्छ्वास–ऊँचा उठना और निःश्वास–नीचे आना स्वाभाविक है उसीके कारण उनमें जलका ऊँचा-नीचा परिवर्तन होता रहता है अर्थात् जब वायु ऊपर उठती है तब जल ऊपर उठ जाता है और जब वायु नीचे बैठती है तब जल नीचे बैठ जाता है ॥४४८॥ पातालोंका पन्द्रहवाँ भाग शुक्लपक्षमें धीरे-धीरे वायुसे भरता रहता है और कृष्णपक्षमें जलसे। अमावस्या और पूर्णिमाके दिन उनकी

१. स्थितिं स्यात्पक्षसन्धिषु म० ।

लक्षद्वयं सहस्राणि सप्तविंशतिरन्तरम् । शतं सप्ततिरेषां[1] स्यात् पादोनं योजनं पृथक् ॥४५०॥
विदिक्षु क्षुद्रपातालचतुष्कं मुखमूलयोः । सहस्रं विस्तृतं दैर्घ्यमध्यविस्तारतो दश ॥४५१॥
चतुर्णामपि तेषां स्यात्पञ्चाशत्कुड्यविस्तृतिः । एकैकस्य त्रिभागेषु प्रागिवाम्भःप्रभञ्जनौ ॥४५२॥
त्रियोजनसहस्राणि त्रयस्त्रिंशं शतत्रयम् । सत्रिभागं त्रिभागानां प्रत्येकं योजनस्थितिः ॥४५३॥
एकलक्षा सहस्राणि त्रयोदश निजान्तरम् । पञ्चाशीति त्रयोऽष्टांशाः कुण्डानां दिग्विदिक्स्थितम् ॥४५४॥
मुक्तावलीवदेतेषामन्तरालेषु चाष्टसु । समुद्रे क्षुद्रपातालसहस्रमवतिष्ठते ॥४५५॥
सहस्रमवगाहश्च मध्यविष्कम्भ एव च । योजनानां शतं तेषां विस्तारो मुखमूलयोः ॥४५६॥
पञ्चविंशशतं तानि प्रत्येकं चान्तरेऽन्तरे । द्विर्हीनाष्टशती क्रोशः सविशेषस्तदन्तरम्[2] ॥४५७॥
यथायोगपरावृत्तसलिलाप्लवविप्लवाः । पातालौघाः समस्तास्ते क्षुद्राश्च परिकीर्तिताः ॥४५८॥
तटाद्गत्वा सहस्राणि द्वाचत्वारिंशतं समौ । चतुर्दिक्षु सहस्रोच्चैः द्वौ द्वौ स्यातां तु पर्वतौ ॥४५९॥
कौस्तुभः कौस्तुभासश्च पातालस्योभयान्तयोः । राजतावर्धकुम्भाभौ तत्सुरौ विजयश्रियौ ॥४६०॥
उदकश्चोदवासश्च कदम्बुकसमीपगौ । शिवश्च शिवदेवश्च तयोर्देवौ यथाक्रमम् ॥४६१॥
नगौ शङ्खमहाशङ्खौ वडवामुखपार्श्वगौ । शङ्खाभावुदकश्च स्यादुदवासश्च तत्सुरौ ॥४६२॥
उदकोऽप्युदवासोऽपि यूपकेसरपार्श्वगौ । रोहितो लोहिताङ्कश्च तत्सुरौ परिकीर्तितौ ॥४६३॥

स्वाभाविक स्थिति हो जाती है ॥४४९॥ इन पाताल-विवरोंका पृथक्-पृथक् अन्तर दो लाख सत्ताईस हजार एक सौ पौने इकहत्तर योजन है ॥४५०॥

चारों विदिशाओंमें चार क्षुद्र पाताल-विवर हैं इनका ऊपर और नीचे एक-एक हजार तथा मध्यमें दश हजार योजन विस्तार है एवं उनकी ऊँचाई भी दश हजार योजन है ॥४५१॥ इन चारोंकी दीवालोंकी चौड़ाई पचास योजन है तथा प्रत्येकके तीन-तीन भाग हैं और उनमें पूर्वकी भाँति जल तथा वायुका सद्भाव है ॥४५२॥ तीनों भागोंमें प्रत्येक भाग तीन हजार तीन सौ तीस योजन तथा एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥४५३॥ दिशाओं और विदिशाओंके पाताल-विवरोंका परस्पर अन्तर एक लाख तेरह हजार पचासी योजन है ॥४५४॥ लवण समुद्रमें इन आठ पाताल-विवरोंके आठ अन्तरालोंमें एक हजार क्षुद्र पाताल और भी हैं जो मोतियोंकी मालाके समान सुन्दर जान पड़ते हैं ॥४५५॥ इन क्षुद्र पाताल-विवरोंकी गहराई एक हजार योजन है और विस्तार मध्यमें एक हजार योजन तथा ऊपर-नीचे सौ-सौ योजन है ॥४५६॥ ये क्षुद्र पाताल-विवर एक-एक अन्तरालके बीचमें एक सौ पचीस एक सौ पचीस हैं तथा इनका पारस्परिक अन्तर सात सौ अंठानवे योजन एवं कुछ अधिक एक कोश है ॥४५७॥ जिनमें यथायोग्य पानीका प्रवेश तथा निर्गम होता रहता है, ऐसे ये समस्त पाताल-विवरोंके समूह क्षुद्र पाताल कहे गये हैं ॥४५८॥

तटसे बयालीस हजार योजन चलकर चारों दिशाओंमें एक-एक हजार योजन ऊँचे दो-दो पर्वत हैं ॥४५९॥ पूर्व दिशाके पाताल-विवरकी दोनों ओर कौस्तुभ और कौस्तुभास नामके अर्धकुम्भाकार चाँदीके दो पर्वत हैं इनके अधिष्ठाता (उदंग और उदवास) देव विजयदेवके समान वैभवको धारण करनेवाले हैं ॥४६०॥ दक्षिण दिशाके कदम्बुक पातालविवरके समीप उदक और उदवास नामके दो पर्वत हैं। क्रमसे शिव तथा शिवदेव उनके अधिष्ठाता देव हैं ॥४६१॥ पश्चिम दिशाके वडवामुख पातालविवरके समीप शङ्ख और महाशङ्ख नामके दो पर्वत हैं तथा शङ्खके समान आभावाले शिव और शिवदेव नामक देव अधिष्ठाता हैं ॥४६२॥ उत्तर दिशाके भूपकेसर पाताल-विवरके समीप उदक और उदवास ये दो पर्वत हैं तथा रोहित और

१. -रेव ख० । २. तदनन्तरं म० ।

योजनानां तु लक्षैका सहस्राणि च षोडश । अन्तरं पर्वतानां स्यान्निजपातालमूर्धभिः ॥४६४॥
नागवेलन्धरार्धीशा गिरिमस्तकवर्तिषु । वसन्ति नगरेष्वेते नागैर्वेलन्धरैः सह ॥४६५॥
नागानां च सहस्राणि द्विचत्वारिंशदम्बुधौ । लवणाभ्यन्तरां वेलां धारयन्ति नियोगतः ॥४६६॥
द्वासप्ततिसहस्राणि बाह्यां वेलां जलाकुलाम् । धारयन्ति सदा नागा जलक्रीडाकृतादराः ॥४६७॥
अष्टाविंशतिसंख्यानि सहस्राणि यथायथम् । अग्रोदकमुदग्रं[1] तु नागानां धारयन्ति च ॥४६८॥
द्वादशैव सहस्राणि वारिधावपरोत्तरम् । तावत्येव सहस्राणि विस्तृतः सर्वतः समः ॥४६९॥
गोतमो नामतो द्वीपो गोतमस्तस्य चामरः । सोऽपि कौस्तुभदेवेन परिवारादिभिः समः ॥४७०॥
मर्त्यास्त्वेकोरुकाः पूर्वे दक्षिणे तु विषाणिनः । लाङ्गूलिनोऽपरे च स्युरुत्तरेऽभाषकास्तथा ॥४७१॥
विदिक्षु शशकर्णास्तु चतसृष्वपि भाषिताः । एकोरुकोत्तरापाच्योरश्वसिंहमुखाः क्रमात् ॥४७२॥
शष्कुलीकर्णनामानः पार्श्वयोस्तु विषाणिनाम् । श्वमुखा वानरास्या ये ते लाङ्गूलिकपार्श्वयोः ॥४७३॥
अभाषकान्तयोश्चापि शष्कुलीकर्णमानुषाः । गोमुखा मेषवक्त्राः स्युर्विजयार्धोभयान्तयोः ॥४७४॥
हिमवत्प्राक्प्रतीच्योः स्युरुल्काकालमुखा नराः । मेघविद्युन्मुखाः प्राच्यप्रतीच्योः शिखरिश्रुतेः ॥४७५॥
आदर्शगजवक्त्राख्या विजयार्धान्तयोर्मताः । चतुर्विंशतिरेव स्युर्द्वीपाश्चापि तदाश्रयाः ॥४७६॥
गत्वा पञ्चशतीं दिक्षु विदिक्ष्वन्तरदिक्षु च । पञ्चाशतं च ते द्वीपाः षट्शतीं मुख्यपर्वताः ॥४७७॥

लोहितान्तक उनके अधिष्ठाता देव हैं ॥४६३॥ इन पर्वतोंका अपने-अपने पाताल-विवरोंसे एक लाख सोलह हजार योजन अन्तर है ॥४६४॥ इन पर्वतोंके ऊपर अनेक नगर बने हुए हैं उनमें वेलंधर जातिके नागकुमार देवोंके साथ उनके स्वामी निवास करते हैं ॥४६५॥ लवण समुद्रमें बयालीस हजार नागकुमार अपने नियोगके अनुसार उसकी आभ्यन्तर वेलाको धारण करते हैं और बहत्तर हजार नागकुमार जलसे भरी बाह्य वेलाको सदा धारण करते हैं। ये नागकुमार जलक्रीडा करनेमें दृढ़ आदर रखते हैं ॥४६६-४६७॥ अट्ठाईस हजार नागकुमार लवण समुद्रकी उन्नत अग्रशिखाको धारण करते हैं ॥४६८॥

लवण समुद्रकी पश्चिमोत्तर दिशामें बारह हजार योजन दूर चलकर बारह हजार योजन विस्तारवाला एक गोतम नामका द्वीप है। यह द्वीप सब ओरसे सम है तथा गोतम नामका देव उसका अधिष्ठाता है। परिवार आदिकी अपेक्षा गोतम देव कौस्तुभ देवके समान हैं ॥४६९-४७०॥ लवण समुद्रकी पूर्व दिशामें एक टाँगवाले, दक्षिणमें सींगवाले, पश्चिममें पूँछवाले और उत्तरमें गूँगे मनुष्य रहते हैं ॥४७१॥ चारों विदिशाओंमें खरगोशके समान कानवाले मनुष्य कहे गये हैं। एक टाँगवालोंकी उत्तर और दक्षिण दिशामें क्रमसे घोड़े और सिंहके समान मुखवाले मनुष्य रहते हैं ॥४७२॥ सींगवाले मनुष्योंकी दोनों ओर शष्कुलीके समान कानवाले और पूँछ-वालोंकी दोनों ओर क्रमसे कुत्ते और वानरके समान मुखवाले मनुष्य रहते हैं ॥४७३॥ गूँगे मनुष्योंकी दोनों ओर शष्कुलीके समान कानवाले रहते हैं। विजयार्ध पर्वतके दोनों किनारोंपर जो कि पूर्व-पश्चिम समुद्रमें निकले हुए हैं क्रमसे गौ और भेड़के समान मुखवाले रहते हैं ॥४७४॥ हिमवत् पर्वतके पूर्व और पश्चिम कोणोंपर क्रमसे उल्कामुख और कृष्णमुख तथा शिखरी पर्वत-के पूर्व-पश्चिम कोणोंपर मेघमुख और विद्युन्मुख मनुष्य रहते हैं ॥४७५॥ और ऐरावत क्षेत्रमें जो विजयार्ध है उसके दोनों कोणोंपर दर्पण तथा हाथीके समान मुखवाले मनुष्य माने गये हैं। इस प्रकार उक्त चौबीस द्वीप ही ऊपर कहे हुए मनुष्योंके आश्रय हैं ॥४७६॥ दिशाओं और विदिशाओंके अन्तरद्वीप समुद्रतटसे पाँच सौ योजन, अन्तरदिशाओंके साढ़े पाँच सौ योजन और पर्वतोंके कोणवर्ती द्वीप छह सौ योजन आगे चलकर हैं इन द्वीपोंके अग्रभागमें एक-एक

१. -मुदग्रं ख० ।

दिग्गताः शतरुन्द्राः स्युः पञ्चविंशतिमद्रिजाः । रुन्द्रा पञ्चशतं द्वीपा विदिक्ष्वन्तरदिक्षु च ॥४७८॥
ते पञ्चनवतं भागं[1] स्वप्रदेशस्य चाप्लुताः । जलाद्योजनमुद्विद्धवेदिकापरिवारिताः ॥४७९॥
तेनैव षोडशाभ्यस्तमुपरिष्टाज्जलावृताः । सङ्कल्प्याधरं वोर्ध्वं[2] क्षेत्रं वाच्यं जलावृतम् ॥४८०॥
जम्बूद्वीपस्य यावन्तो द्वीपाः निकटवर्तिनः । तावन्तो धातकीखण्ड-द्वीपस्य लवणोदजाः ॥४८१॥
अष्टादशकुलास्तेषु पल्यायुष्काः कुमानुषाः । एकोरुकाः गुहावासाः मृष्टमृद्भोजनास्तु ते ॥४८२॥
शेषपुष्पफलाहाराः वृक्षमूलनिवासिनः । एकान्तराशनाः मृत्वा जायन्ते भौमभावनाः[3] ॥४८३
जम्बूद्वीपजगत्या च समुद्रजगती समा । अभ्यन्तरे शिलापट्टं बहिस्तु वनमालिका ॥४८४॥
चतुर्गुणस्तु[4] विस्तारो द्वीपस्य जलधेस्तथा । सूची भवेस्त्रिभिर्न्यूनः तदन्ते मण्डलेऽखिले ॥४८५॥
विस्ताररहिता सूची चतुर्व्यासगुणा तु या । तावन्तस्तु भवन्त्यस्य जम्बूद्वीपसमांशकाः ॥४८६॥
स्युश्चतुर्विंशतिर्भागा लवणद्वीपसम्मिताः । षड्गुणास्ते परद्वीपे काले सप्तचतुर्गुणाः ॥४८७॥

पर्वत हैं ॥४७७॥ दिशाओंके द्वीप सौ योजन, विदिशाओं तथा अन्तरदिशाओंके पाँच सौ योजन और पर्वतोंके तटान्तवर्ती द्वीप पचीस योजन विस्तारवाले हैं ॥४७८॥ इनका पंचानबेवाँ भाग जलमें डूबा है तथा ये एक योजन जलसे ऊपर उठी हुई वेदिकाओंसे घिरे हुए हैं ॥४७९॥ पंचानबेवें भागको सोलहसे गुणा करनेपर गुणित भागोंके बराबर इनके ऊपर-नीचेका क्षेत्र जलसे आवृत कहना चाहिए ॥४८०॥ लवण समुद्रके जितने अन्तर्द्वीप जम्बूद्वीपके निकटवर्ती हैं उतने ही धातकी खण्डके निकटवर्ती हैं। भावार्थ—दिशाओंमें चार, विदिशाओंमें चार, अन्तरालोंमें आठ और हिमवत् शिखरी तथा दोनों विजयार्ध पर्वतोंके आठ इस प्रकार चौबीस अन्तर्द्वीप जम्बूद्वीपके निकटवर्ती लवणसमुद्रमें हैं तथा चौबीस धातकीखण्डके निकटवर्ती लवण समुद्रमें। सब मिलाकर लवण समुद्रमें ४८ अन्तर्द्वीप हैं ॥४८१॥ उनमें अठारह कुल कुभोग भूमिया जीवोंकी है और वे एक पल्यकी आयुवाले हैं। एक टाँगवाले मनुष्य गुफाओंमें रहते हैं तथा मधुर मिट्टीका भोजन करते हैं ॥४८२॥ शेष मनुष्य फूल और फलोंका आहार करते हैं तथा वृक्षोंके नीचे निवास करते हैं। ये सब एक दिनके अन्तरसे भोजन करते हैं और मरकर व्यन्तर तथा भवनवासी देव होते हैं ॥४८३॥ लवण समुद्रकी जगती (वेदी) जम्बू द्वीपकी जगतीके समान हैं उसके भीतरी भागमें शिलापट्ट हैं और बाहरी भागमें वन-पंक्तियाँ हैं ॥४८४॥ किसी भी द्वीप अथवा समुद्रका जितना विस्तार है उसे चौगुना कर उसमेंसे तीन घटा देनेपर उसके अन्तिम मण्डलकी सूचीका प्रमाण निकलता है ॥४८५॥ इस करणसूत्रके अनुसार लवण समुद्रकी सूची पाँच लाख है उसमेंसे विस्तारके दो लाख घटा देनेपर तीन लाख रहे। उसमें चारका गुणा करनेपर बारह लाख हुए और उसमें विस्तारका प्रमाण जो दो लाख है उसका गुणा करनेपर चौबीस लाख हुए। इस तरह लवण समुद्रके जम्बू द्वीपके बराबर चौबीस खण्ड

१. द्वयप्रवेशस्य म० ।
२. दुगिगमणे पणणउदिग तुंगो सोलगुणमुवरि किं पयदे ।
दुगजोगे दीउदयो सवेदिया जोयणुग्गया जलदो ॥९१५॥ —त्रिलोकसारस्य
३. भवण वइवाण विन्तर जोइस भवणेसु ताण उप्पत्ती ।
ण य अण्णु त्थुपपत्ती बोधव्वा होई णियमेण ॥८५॥
सम्मद्दंसणरयणं जेहिं सुगहियं णरेहिं णारीहिं ।
ते सव्वे मरिऊणं सोहम्माईसु जायंति ॥८६॥ —जम्बू द्वीप प्रज्ञप्ति १० उद्देश
४. दीवस्स समुद्दस्स य विक्खंभं चदुहि संगुणं णियमा ।
तिहि सदसहस्स ऊणा सा सूची सव्वकरणेसु ॥९५॥ —ज० प्र० १० उद्देश

द्वे सहस्रे शतान्यष्टावशीतिरपि चोत्तराः । जम्बूद्वीपसमा भागाः पुष्करद्वीपभाविनः ॥४८८॥
द्वीपोऽपि धातकीखण्डः पर्येति लवणोदधिम् । योजनानां चतुर्लक्षाविस्तीर्णो वलयाकृतिः ॥४८९॥
सूचिरभ्यन्तरा पञ्च-लक्षा नव तु मध्यमा । बाह्या त्रयोदश द्वीपे धातकीखण्डमण्डिते ॥४९०॥
परिधिः पूर्वसूच्यास्तु लक्षाः पञ्चदशोदिताः । एकाशीतिसहस्राणि शतं त्रिंशन्नवाधिकम् ॥४९१॥
स चाष्टाविंशतिर्लक्षाः मध्यायाः षट्सहस्रकैः । चत्वारिंशत्सहस्राणि पञ्चाशद् योजनानि च ॥४९२॥
बाह्यसूच्यास्त्वसौ लक्षाश्चत्वारिंशत्सहैकया । शतानि नव षष्ट्यैकं सहस्राणि दशापि च ॥४९३॥
पूर्वापरौ महामेरोर्द्वौ मेरू भवतोऽस्य च । इष्वाकारौ विभक्तारौ पर्वतौ दक्षिणोत्तरौ ॥४९४॥
सहस्रयोजनव्यासौ द्वीपव्याससमायतौ । उच्छ्रायेणावगाहेन निषधेन समौ च तौ ॥४९५॥
क्षेत्राणि भरतादीनि सप्त षट् कुलपर्वताः । हिमवत्पूर्वका द्वीपे तत्रापि प्रतिमन्दरम्[1] ॥४९६॥
पूर्वैः सहैकनामानः सर्वे नगनदीह्रदाः । समोच्छ्रायावगाहाः स्युस्तेभ्यो द्विगुणविस्तृताः ॥४९७॥
अरन्ध्राकृतान्यङ्कमुखान्यभ्यन्तरे बहिः । क्षुरप्राकृतवन्ति स्युः शैलक्षेत्राणि तानि च ॥४९८॥
लक्षया पर्वतै रुद्धं[2] सहस्राण्यष्टसप्ततिः । द्विचत्वारिंशदष्टौ च शतानि क्षेत्रमत्र च ॥४९९॥
षट् योजनसहस्राणि षट् शतानि चतुर्दश । भरतान्तरविष्कम्भः शतं विंशं नवांशकाः ॥५००॥

हैं। धातकी खण्डमें इससे छह गुने—एक सौ चालीस हैं। कालोदधिमें धातकीखण्डके खण्डोंसे सतगुने—छह सौ बहत्तर हैं और पुष्करार्धमें कालोदधिके खण्डोंसे चौगुने—दो हजार आठ सौ अस्सी हैं ॥४८६-४८८॥ इस प्रकार लवण समुद्रका वर्णन हुआ। अब धातकीखण्डका वर्णन करते हैं—

चार लाख योजन विस्तारवाला चूड़ीके आकार दूसरा धातकीखण्ड द्वीप भी चारों ओरसे लवणसमुद्रको घेरे हुए है ॥४८९॥ धातकी अर्थात् आँवलेके वृक्षोंसे सुशोभित इस धातकीखण्ड द्वीपकी अभ्यन्तर सूची पाँच लाख, मध्यम सूची नौ लाख और बाह्य-सूची तेरह लाख योजनकी है ॥४९०॥ इनमें पूर्व—आभ्यन्तर सूचीकी परिधि पन्द्रह लाख इक्यासी हजार एकसौ उनतालीस योजन है ॥४९१॥ मध्यम सूचीकी परिधि अट्ठाईस लाख छियालीस हजार पचास योजनकी है ॥४९२॥ और बाह्य सूचीकी परिधि इकतालीस लाख दश हजार नौ सौ इकसठ योजनकी है ॥४९३॥ इस द्वीपमें जम्बू द्वीपके महामेरुसे पूर्व और पश्चिम दिशामें दो मेरु पर्वत हैं तथा दक्षिण और उत्तरके भेदसे दो इष्वाकार पर्वत इसका विभाग करनेवाले हैं ॥४९४॥ वे दोनों इष्वाकार पर्वत एक हजार योजन चौड़े, द्वीपकी चौड़ाई बराबर चार लाख योजन लम्बे तथा ऊँचाई और गहराईकी अपेक्षा निषध पर्वतके समान (चार सौ योजन ऊँचे और सौ योजन गहरे) हैं ॥४९५॥ द्वीपके समान इस धातकीखण्डमें भी प्रत्येक मेरुकी अपेक्षा भरतको आदि लेकर सात क्षेत्र तथा हिमवान् आदि छह कुलाचल हैं ॥४९६॥ यहाँके समस्त पर्वत नदी और सरोवर जम्बू द्वीपके पर्वत, नदी और सरोवरके समान नामवाले हैं तथा उन्हींके समान ऊँचाई और गहराईसे युक्त हैं केवल विस्तार उनका दूना-दूना है ॥४९७॥ इस द्वीपके पर्वत और क्षेत्र भीतरकी ओर नौ गाड़ीके पहियेमें लगे आरों तथा उनके बीचके अन्तरके समान हैं और बाहरकी ओर छुराके समान हैं अर्थात् इनका आभ्यन्तर भाग संक्षिप्त और बाह्य भाग विस्तृत है ॥४९८॥ इस धातकीखण्डमें एक लाख अठहत्तर हजार आठ सौ बियालीस योजन प्रमाण क्षेत्र पर्वतोंसे रुका हुआ है ॥४९९॥ भरत क्षेत्रका आभ्यन्तर विस्तार छह हजार छह सौ चौदह योजन तथा

१. परमन्दर म० । २. -रुध्वं म० ।

क्षेत्राणां च भवेच्छेदो द्विशती द्वादशोत्तरा । एकोनत्रिंशतिस्तत्र छेदः पर्वतगोचरः ॥५०१॥
द्वादशैव सहस्राणि तथा पञ्च शतानि च । एकाशीतिश्च षट्त्रिंशत्कला मध्यमविस्तृतिः ॥५०२॥
अष्टादश सहस्राणि पञ्चाशत्यपि सप्त तु । चत्वारिंशद्बहिर्भागाः पञ्च पञ्चाशता शतम् ॥५०३॥
विष्कम्भत्रितयं ज्ञेयमाविदेहं चतुर्गुणम् । क्रमेण परतो हानिर्यावदैरावतक्षितिः ॥५०४॥
पूर्वस्माद् द्विगुणो व्यासो हिमवत्पूर्वकाद्रिषु । द्वादशस्वपि च द्वीपे तेभ्यः पुष्करनामनि ॥५०५॥
भूभृतोऽर्धतृतीयेषु वृक्षावक्षारवेदिकाः । मेरुवर्ज्यं[2] विगाहन्ते चतुर्भागं निजोच्छ्रितेः ॥५०६॥
षड्गुणः स्वावगाहस्तु कुण्डानां विस्तृतिर्भवेत् । नदीह्रदावगाहोऽपि पञ्चाशद्गुणितश्च सा ॥५०७॥
उच्छ्रायश्चैत्यगेहस्य सार्धो ज्ञेयः शताहतः । जम्बूप्रभृतयस्तुल्या महावृक्षा दशापि ते ॥५०८॥
नद्यः सरांस्यरण्यानि कुण्डपद्मा नगा ह्रदाः । अवगाहैः समाः पूर्वैर्विस्तारैर्द्विगुणाः परे[3] ॥५०९॥
चैत्यचैत्यालया ये ते वृषभा नाभिपर्वताः । चित्रकूटादयश्चापि तथा काञ्चनकादयः ॥५१०॥
दिशागजेन्द्रकूटानि यथास्वं वेदिकादयः । व्यासावगाहनोच्छ्रायैः सर्वे द्वीपत्रये समाः ॥५११॥
अर्धयोजनमुद्दिष्टं व्यस्तं पञ्चधनुःशतीम् । प्रत्येकं सर्वकूटानां विदितं रत्नतोरणम् ॥५१२॥
अशीतिश्च सहस्राणि चत्वारि च समुच्छ्रयः । चतुर्णामपि मेरूणां परयोर्द्वीपयोर्भवेत् ॥५१३॥
सहस्रमवगाढाश्च मेदिनीं ते तु मेरवः । सहस्राणि नवव्यस्ता मूले पञ्च शतानि च ॥५१४॥
त्रिंशदेव सहस्राणि द्वाचत्वारिंशता सह । तेषामेव विनिर्दिष्टः परिधिर्मूलगोचरः ॥५१५॥

एक योजनके दो सौ बारह भागोंमें एक सौ उनतीस भाग प्रमाण है ॥५००॥ धातकीखण्ड-द्वीपमें पर्वत रहित क्षेत्रोंके दो सौ बारह खण्ड और पर्वतावरुद्ध क्षेत्रके एक सौ उन्नीस खण्ड होते हैं ॥५०१॥ भरत क्षेत्रके मध्यम भागका विस्तार बारह हजार पाँच सौ इक्यासी योजन छत्तीस भाग है ॥५०२॥ और बाह्य विस्तार अठारह हजार पाँच सौ सैंतालीस योजन एक सौ पचपन भाग है ॥५०३॥ यह तीनों प्रकारका विस्तार विदेह क्षेत्र तकके क्षेत्रोंमें भरत क्षेत्रके विस्तारसे आगे-आगे चौगुना-चौगुना अधिक है और उसके आगे ऐरावत क्षेत्र तक क्रमसे चौगुना-चौगुना कम होता गया है ॥५०४॥ धातकीखण्ड द्वीपमें हिमवान् आदि बारहों पर्वतोंका विस्तार जम्बू द्वीपके पर्वतोंसे दूना-दूना है । इसी प्रकार पुष्करवर द्वीपमें भी उनसे दूना-दूना विस्तार है ॥५०५॥ अढ़ाई द्वीपमें मेरु पर्वतको छोड़कर कुलाचल, वृक्ष, वक्षार पर्वत और वेदिकाओंकी गहराई अपनी ऊँचाईसे चौथा भाग है ॥५०६॥ धातकीखण्डके कुण्डोंका विस्तार उनकी गहराईसे छह गुना, और नदी सरोवरोंका विस्तार उनकी गहराईसे पचास गुना है ॥५०७॥ धातकीखण्डके चैत्यालयोंकी ऊँचाई डेढ़ सौ योजन है और जम्बू आदि दशों महावृक्ष एक समान विस्तारवाले हैं ॥५०८॥ नदी, सरोवर, वन, कुण्ड, पद्म, पर्वत और सरोवर गहराईकी अपेक्षा जम्बू द्वीपकी नदी आदिके समान हैं तथा विस्तारकी अपेक्षा दूने-दूने हैं ॥५०९॥ चैत्य, चैत्यालय, वृषभाचल, नाभिपर्वत, चित्रकूट आदि कांचनगिरि आदि पर्वत, दिग्गजेन्द्रोंके कूट, तथा वेदिका आदि हैं वे सब विस्तार गहराई तथा ऊँचाईकी अपेक्षा तीनों द्वीपोंमें समान हैं ॥५१०–५११॥ धातकीखण्डमें समस्त कूटोंके रत्नमयी तोरण आधा योजन ऊँचे और पाँच सौ धनुष चौड़े हैं ॥५१२॥ धातकीखण्ड और पुष्कर इन दोनों द्वीपोंके चारों मेरु पर्वतोंकी ऊँचाई चौरासी हजार योजन है ॥५१३॥ वे मेरु पर्वत एक हजार योजन नीचे तो पृथिवीमें गहरे हैं और नौ हजार पाँच सौ योजन उनके मूलका विस्तार है ॥५१४॥ उनके मूल भागकी परिधि तीस हजार बियालीस योजन है ॥५१५॥

---

१. वंसधर विरहिदं खलु जं खेत्तं हवदि धादकीसण्डे ।
तस्स दु छेदाणियमा बे चेव सदाणि बाराणि ॥१४॥ ज० प्र० ११ उद्देश्य

२. -मेरुं वर्ज्यं म० । ३. परैः म० ।

नव चैव सहस्राणि चतुःशतयुतानि तु । चतुर्णामपि मेरूणां भूमौ विष्कम्भ इष्यते ॥५१६॥
एकोनत्रिंशदेव स्युः सहस्राणि शतानि च । पञ्चविंशति सप्तैव परिधिर्वसुधातले ॥५१७॥
सहस्रार्धं च गत्वोर्ध्वं नन्दनं स्वंतिविस्तृतम्¹ । पञ्च पञ्चाशतं पञ्चशतीं सौमनसं वनम् ॥५१८॥
पाण्डुकं च सहस्राणि गत्वाष्टाविंशतिः पृथु । चतुर्णवतिसंयुक्ता योजनानां चतुःशती ॥५१९॥
शतान्यर्धचतुर्थानि सहस्राणि नवापि च । नन्दने मन्दरस्यायं विष्कम्भः परिभाषितः ॥५२०॥
सप्तषष्टिसहस्रार्धमेकोनत्रिंशदेव च । सहस्राणि परिक्षेपो नन्दने मन्दराद् बहिः ॥५२१॥
शतान्यर्धचतुर्थानि सहस्राण्यष्ट नन्दनात् । विना मन्दरविष्कम्भः स चाभ्यन्तर ईरितः ॥५२२॥
षड्विंशतिसहस्राणि पञ्चाग्रा च चतुःशती । परिधिर्मन्दरस्यैष नन्दनान्तरगोचरः ॥५२३॥
बाह्यस्त्रीणि सहस्राणि विष्कम्भोऽष्टौ शतानि च । मेरोः सौमनसे सान्तः सहस्रेण विवर्जितः ॥५२४॥
बाह्यस्तस्य सहस्राणि द्वादशैव हि षोडश । मन्दरस्य परिक्षेपो वने सौमनसे स्थितः ॥५२५॥
अष्टौ चैव सहस्राणि तथैवाष्टौ शतानि च । चतुःपञ्चाशदप्यन्तः परिधिस्तस्य तद्वने ॥५२६॥
द्वाषष्ट्यैकं शतं त्रीणि सहस्राणि च पाण्डुके । गव्यूतं साधिकं बोध्यः परिधिर्मेरुभूभृतः ॥५२७॥
नन्दनात् समरुन्द्रोऽद्रिः सहस्राणि दशोपरि । हानिस्तत्र क्रमादेवं वनात्सौमनसादपि ॥५२८॥
दशमो दशमो भागो मूलात्प्रभृति हीयते । प्रदेशाङ्गुलहस्तादिश्चतुर्णां मेरुभूभृताम् ॥५२९॥
पुष्करिण्यः शिला²कूटप्रासादाश्चैत्यचूलिकाः । समानाः पञ्चमेरूणां व्यासावगाहनोच्छ्रयैः ॥५३०॥
शतानि द्वादशैव स्यात्पञ्चविंशति विस्तृतिः । भद्रशालवनस्यैषा धातकीखण्डवर्तिनः ॥५३१॥
लक्षा सप्त सहस्राणि शतान्यष्टौ च दीर्घता । नवसप्ततिरप्यस्य भद्रशालवनस्य तु ॥५३२॥

तथा पृथिवीपरका विस्तार नौ हजार चार सौ योजन है ॥५१६॥ पृथिवी तलपर उनकी परिधि उनतीस हजार सात सौ पचीस योजन है ॥५१७॥ भूमितलसे पाँच सौ योजन ऊपर चलकर अत्यन्त विस्तृत नन्दन वन है तथा पचपन हजार पाँच सौ योजन ऊपर सौमनस वन है ॥५१८॥ सौमनस वनसे अट्ठाईस हजार चार सौ चौरानबे योजनपर जाकर विशाल पाण्डुक वन है ॥५१९॥ नन्दन वनमें मेरुका विस्तार नौ हजार तीन सौ पचास योजन कहा गया है ॥५२०॥ इसी वनमें मेरुकी बाह्य परिधिका विस्तार उनतीस हजार पाँच सौ सड़सठ योजन है ॥५२१॥ नन्दन वनको छोड़कर मेरु पर्वतका भीतरी विस्तार आठ हजार तीन सौ पचास योजन है ॥५२२॥ मेरु पर्वतकी नन्दन वन सम्बन्धी परिधि छब्बीस हजार चार सौ पाँच योजन है ॥५२३॥ सौमनस वनमें मेरु पर्वतका बाह्य विस्तार तीन हजार आठ सौ योजन है और आभ्यन्तर विस्तार इससे एक हजार योजन कम है ॥५२४॥ सौमनस वनमें मेरु पर्वतकी बाह्य परिधि बारह हजार सोलह योजन है ॥५२५॥ और आभ्यन्तर परिधि आठ हजार आठ सौ चौवन योजन है ॥५२६॥ पाण्डुक वनमें मेरु पर्वतकी परिधि तीन हजार एक सौ बासठ योजन तथा कुछ अधिक एक कोश जानना चाहिए ॥५२७। ये चारों मेरु पर्वत नन्दन वनसे दश हजार ऊपर तक जो समरुन्द्र हैं अर्थात् समान चौड़ाईवाले हैं और उसके बाद क्रमसे कम-कम होते जाते हैं। यही क्रम सौमनस वनके आगे भी जानना चाहिए। क्रम यह है कि मूलसे लेकर दश हजार योजनकी वृद्धि होनेपर अङ्गुल हस्त तथा योजनका दसवाँ-दसवाँ भाग कम होता जाता है। अर्थात् दश हजार योजन की ऊँचाईपर एक हजार योजन, दश हाथकी ऊँचाईपर एक हाथ और दश अङ्गुलकी ऊँचाईपर एक अङ्गुल विस्तार कम हो जाता है ॥५२८-५२९॥ पाँचों मेरुओंकी वापियाँ, शिला, कूट, प्रासाद, चैत्य और चूलिकाएँ, चौड़ाई, गहराई और ऊँचाईकी अपेक्षा एक समान हैं ॥५३०॥ धातकीखण्डके भद्रशाल वनकी चौड़ाई बारह सौ पचीस योजन है ॥५३१॥ और इसकी लम्बाई एक लाख सात हजार आठ सौ उन्यासी

---

१. भूति विस्तृतं म०, ङ० । भूमि- ग० । २. शिलाः कूटः प्रासादा—म० ।

षट्पञ्चाशत्सहस्राणि तिस्रो लक्षाः शतद्वयम् । सप्तविंशतिरायामो गन्धमादनविद्युतोः ॥५३३॥
नवषष्टिसहस्राणि लक्षाः पञ्च शतद्वयम् । एकोनषष्टिरायामो माल्यवत्सौमनस्ययोः ॥५३४॥
द्वे लक्षे च सहस्राणि त्रयोविंशतिरेव च । कुलाद्र्यन्ते कुरुव्यासः शतं पञ्चाशदष्ट च ॥५३५॥
तिस्रो लक्षाः सहस्राणि नवतिः सप्त चाष्ट तु । शतानि सप्त नवतिर्भागा द्वानवतिस्त्वयम् ॥५३६॥
वक्रायामः कुरूणां स्यादामेरोराकुलाचलात् । पूर्वार्धेऽपि च पश्चार्द्धे धातकीखण्डमण्डले ॥५३७॥
तिस्रो लक्षाः सहस्राणि षट्षष्टिः षट् शतान्ययम् । ऋज्वायामः कुरूणां स्यादशीतिरुभयान्तयोः ॥५३८॥
प्रतिमेरु विदेहाश्च द्वात्रिंशत्पूर्ववन्मताः । पूर्वे पूर्वविदेहाख्या अपरे त्वपरे स्थिताः ॥५३९॥
पूर्वस्मान्मन्दरात्पूर्वः कच्छाजनपदोऽवधिः । अपरादपरः सूच्या विजयो गन्धमालिनी ॥५४०॥
एकादशैव लक्षा हि सा सूचिः पञ्चविंशतिः । सहस्राणि शतं तस्मादष्टापञ्चाशता सह ॥५४१॥
लक्षाश्चास्याः परिक्षेपः पञ्चत्रिंशत्प्रकाशितः । द्वाषष्टिश्चाष्टपञ्चाशत्सहस्राणि प्रमाणतः ॥५४२॥
पद्मादिर्गृह्यते सूचीमङ्गलावत्यधिष्ठिता । सा पूर्वापरयोर्मेर्वोरन्तराले तु या स्थिता ॥५४३॥
लक्षाः षट् च सहस्राणि चतुःसप्ततिरष्ट च । शतानि योजनानां सा द्वाचत्वारिंशता सह ॥५४४॥
एकविंशतिलक्षाश्च चतुस्त्रिंशत्सहस्रकैः । त्रिंशदष्टौ पुनस्तस्याः सूच्याः परिधिरिष्यते ॥५४५॥
व्यापी विजयविस्तारः सहस्राणि नवात्र हि । षट्शती त्रितयं च स्यादष्टभागाश्रयस्तथा ॥५४६॥
स्वायामः क्षेत्रवक्षारविभङ्गसरितां त्रिधा । सदेवरमणानां स्यादादिमध्यान्तभेदतः ॥५४७॥
कच्छाख्यविजयायामः पञ्चलक्षाः सहस्रकैः । नवभिः पञ्चशत्याद्यः सप्तत्या द्विशतांशकैः ॥५४८॥
विजयायामवृद्ध्याद्यो युक्तो मध्योऽस्य जायते । मध्येऽपि च तदायामो युक्तोऽन्त्योऽन्यादिकेष्वपि ॥५४९॥

योजन है ॥५३२॥ धातकीखण्डके गन्धमादन और विद्युद् गजदन्त पर्वतोंकी लम्बाई तीन लाख छप्पन हजार दो सौ सत्ताईस योजन है ॥५३३॥ तथा माल्यवान् और सौमनस्य गजदन्तोंकी लम्बाई पाँच लाख उनहत्तर हजार दो सौ उनसठ योजन है ॥५३४॥ कुलाचलोंके समीप कुरुक्षेत्रका विस्तार दो लाख तेईस हजार एक सौ अंठावन योजन है ॥५३५॥ धातकी खण्ड द्वीपके पूर्वार्ध और पश्चिमार्ध दोनों भागोंमें मेरु पर्वतसे लेकर कुलाचलों तक कुरु प्रदेशोंकी वक्र लम्बाई तीन लाख सत्तानवे हजार आठ सौ सत्तानवे योजन और बानबे भाग है ॥५३६–५३७॥ और दोनों ओर सीधी लम्बाई तीन लाख छयासठ हजार छह सौ अस्सी योजन है ॥५३८॥ जिस प्रकार जम्बू द्वीपमें एक मेरु पर्वतके बत्तीस विदेह हैं उसी प्रकार धातकीखण्डमें भी प्रत्येक मेरुकी अपेक्षा बत्तीस-बत्तीस विदेह हैं। इनमें पूर्वकी ओर पूर्व विदेह और पश्चिमकी ओर पश्चिम विदेह स्थित हैं ॥५३९॥ मेरु पर्वतसे पूर्वमें कच्छा नामका देश है और पश्चिममें सूचीसे युक्त गन्धमालिनी देश है। वह सूची ग्यारह लाख पच्चीस हजार एक सौ अंठावन योजन है ॥५४०–५४१॥ इस सूचीकी परिधि पैंतीस लाख अंठावन हजार बासठ योजन प्रमाण है ॥५४२॥ पद्मा देशको आदि लेकर मङ्गलावती देश तक वह सूची ली जाती है जो पूर्व पश्चिम मेरु पर्वतोंके अन्तरालमें स्थित है ॥५४३॥ यह सूची छह लाख चौहत्तर हजार आठ सौ बयालीस योजन प्रमाण है ॥५४४॥ इस सूचीकी परिधिका प्रमाण इक्कीस लाख चौंतीस हजार अड़तीस योजन है ॥५४५॥ इसके देशका विस्तार नौ हजार छह सौ तीस योजन तथा एक योजनके आठ भागोंमें तीन भाग प्रमाण है ॥५४६॥ क्षेत्र, वक्षारगिरि, विभङ्गा नदी और देवारण्य इनकी लम्बाई आदि मध्य और अन्तके भेदसे तीन-तीन प्रकारकी है ॥५४७॥ कच्छा देशकी आदि लम्बाई पाँच लाख नौ हजार पाँच सौ सत्तर योजन तथा एक योजनके दो सौ बारह भागोंमें दो सौ भाग है ॥५४८॥ इसकी आदि लम्बाईमें देशकी

१. कुलाद्यन्ते म० । २. शते म० ।

पूर्वस्य विजयस्याद्रेरायामः सरितोऽपि वा । अन्त्यो यः स परस्याद्यो विजयादेर्व्यवस्थितः ॥५५०॥
विजयायामवृद्धिश्च सहस्रं तु चतुर्गुणम् । शतानि पञ्च चाशीतिश्चत्वारि च समीरिता ॥५५१॥
वक्षारायामवृद्धिस्तु सप्तसप्ततिसंयुता । चतुःशतीतिसंख्याता षष्टिश्च सकला कलाः ॥५५२॥
सा विभङ्गनदीवृद्धिः शतमेकोनविंशतिः । कलाश्चैव द्विपञ्चाशदिति वृद्धिविदो विदुः ॥५५३॥
सप्तशत्या सहस्रे द्वे तथाशीतिर्नवाधिका । देवारण्यायते वृद्धिर्वर्ण्या द्वानवतिः कलाः ॥५५४॥
स्थानक्रमात्त्रिकं द्वे च षट् चत्वारि नवद्विकम् । पद्माजनपदायामः शतं षण्णवतिः कलाः ॥५५५॥
आद्यो यो वृद्धिहीनोऽसौ मध्यो मध्योऽन्त एव हि । वक्षारक्षेत्रनद्यादौ वेद्यमेवं यथाक्रमम् ॥५५६॥
अन्योन्याभिमुखा देशा वक्षारनगसिन्धवः । तटयोः सदृशायामाः सीतासीतोदयोः स्थिताः ॥५५७॥
पूर्वान्मन्दरतः पूर्वैर्विदेहैरपरैरिमैः । पाश्चात्यादपरे पूर्वे ते समाः स्युर्यथाक्रमम् ॥५५८॥
चत्वारिंशच्च चत्वारस्तद्द्वीपे शतमेव च । जम्बूद्वीपसमाः खण्डा गणितस्य समं पुनः ॥५५९॥
कोटीनामेकलक्षा स्यात्सहस्राणि त्रयोदश । शतान्यष्टौ तथैका सा चत्वारिंशच्च कोटयः ॥५६०॥
नवभिर्नवतिर्लक्षा पञ्चाशत्सप्तभिः सह । सहस्राणि शतैः षड्भिरेकषष्ट्युत्तरैस्तथा ॥५६१॥
द्वीपं च धातकीखण्डं परिक्षिपति सर्वतः । द्वीपद्विगुणविस्तारः कालः कालोदसागरः ॥५६२॥
तस्यैकनवतिर्लक्षाः सहस्राणि च सप्ततिः । षट्शती साधिका पञ्च पर्यन्तपरिधिर्मतः ॥५६३॥
षट् शतानि च कालोदे द्वासप्ततिरितस्ततः । जम्बूद्वीपसमाः खण्डाः पण्डितैरिह पिण्डिताः ॥५६४॥
पञ्च लक्षास्तु कोटीनामेकत्रिंशत्सहस्रकैः । शतद्वयं द्विषष्टिश्च कोटयः प्रकटाः स्थिताः ॥५६५॥
लक्षाश्चैव चतुःषष्टिर्नवषष्टिसहस्रकैः । कालोदधावशीतिश्च गणितस्य पदं मतम् ॥५६६॥

लम्बाई मिला देनेपर मध्य लम्बाई हो जाती है और मध्य लम्बाईमें देशकी लम्बाई मिल जानेपर अन्त लम्बाई हो जाती है। यही क्रम पर्वतादिकमें जानना चाहिए ॥५४९॥ पूर्वमें देश, वक्षार पर्वत और विभङ्ग नदीकी जो अन्त्य लम्बाई है वही आगेके देश, वक्षार पर्वत और विभङ्ग नदीकी आदि लम्बाई है ॥५५०॥ देशकी आयामवृद्धि चार हजार पाँच सौ चौरासी योजन कही गई है ॥५५१॥ वक्षार गिरियोंकी आयाम वृद्धि चार सौ सतहत्तर योजन साठ कला है ॥५५२॥ विभङ्ग नदियोंकी आयामवृद्धि एक सौ उन्तीस योजन बावन कला है ऐसा वृद्धिके जाननेवाले आचार्य कहते हैं ॥५५३॥ और देवारण्यकी वृद्धि दो हजार सात सौ नवासी योजन बानवे कला है ॥५५४॥ पद्मा देशकी लम्बाई दो लाख चौरानबे हजार छह सौ तेईस योजन एक सौ छियानबे कला है ॥५५५॥ यहाँके वक्षार पर्वत, क्षेत्र तथा नदी आदिकी आयाम-वृद्धि हीन जो आदि लम्बाई है वही इनकी मध्य लम्बाई है और आयामवृद्धि हीन जो मध्य लम्बाई है वही इनकी अन्त्य लम्बाई यथाक्रमसे जानने योग्य है ॥५५६॥ देश वक्षारगिरि और विभङ्ग नदियाँ सीता सीतोदा नदियोंके दोनों तटोंपर आमने-सामने स्थित हैं तथा एक समान आयामके धारक हैं ॥५५७॥ पश्चिम मेरुसे पूर्व और पश्चिममें जो विदेह हैं वे क्रमशः पूर्व मेरुसे पूर्व तथा पश्चिमके विदेहोंके समान हैं ॥५५८॥ इस धातकीखण्डमें जम्बूद्वीपके समान एक-एक लाख विस्तारवाले एक सौ चौवालीस खण्ड हैं और समस्त धातकीखण्ड द्वीपका क्षेत्र-फल एक लाख तेरह हजार आठ सौ इकतालीस करोड़ निन्यानबे लाख संतावन हजार छह सौ इकसठ योजन है ॥५५९-५६१॥ इस प्रकार धातकीखण्डका वर्णन किया। अब कालोदधिका वर्णन करते हैं—

धातकीखण्ड द्वीपसे दूने विस्तारवाला काले रङ्गका कालोदधि सागर धातकीखण्ड द्वीपको सब ओरसे घेरे हुए है ॥५६२॥ इसकी परिधि एकानबे लाख सत्तर हजार छह सौ पाँच योजनसे कुछ अधिक मानी गई है ॥५६३॥ विद्वानोंने कालोदधि समुद्रमें जहाँ-तहाँ जम्बू-द्वीपके समान एक लाख योजन विस्तारवाले छह सौ बहत्तर खण्ड संकलित किये हैं ॥५६४॥ कालोदधि समुद्रका समस्त क्षेत्रफल पाँच लाख उनहत्तर हजार अस्सी योजन है ॥५६५-५६६॥

कालोदे दिशि निश्चेयाः प्राच्यामुदकमानुषाः । अपाच्यामश्वकर्णास्तु प्रतीच्यां पक्षिमानुषाः ॥५६७॥
उदीच्यां गजकर्णाश्च शूकरास्या विदिक्षु तु । उष्ट्रकर्णाश्च गोकर्णाः प्राच्येभ्यो दक्षिणोत्तराः ॥५६८॥
गजकर्णाश्वकर्णानां मार्जारास्यास्तु पार्श्वयोः । पक्षिणां गजवक्त्राश्च कर्णप्रावरणाः स्थिताः ॥५६९॥
शिशुमारमुखाश्चैव मकरामुखास्तथा । विजयार्द्धद्वयोपान्त्ये कालोदजलधौ स्थिताः ॥५७०॥
मर्त्या हिमवतोऽग्रे वृकव्याघ्रमुखाः स्थिताः । शृगालर्क्षमुखाश्चाग्रे शिखरिश्रुतिभूभृतः ॥५७१॥
स्थिता द्वीपिमुखाश्चाग्रे भृङ्गाराराजतागयोः । बाह्याभ्यन्तरयोरन्तर्जगत्योर्द्वीप्यमानवाः ॥५७२॥
आयुर्वर्णगृहाहारैः समा गत्यापि लावणैः । सहस्रमवगाढास्ते द्वीपाश्छिन्नतटाम्बुधौ ॥५७३॥
कालोदस्याः प्रवेशेन द्वीपाः पञ्चशताधिकाः । मता द्विगुणविस्तारा लावणेभ्यः कुमानुषैः ॥५७४॥
चतुर्विंशतिरन्तःस्थास्तावन्तश्च बहिः स्थिताः । लवणोदस्थितैः सर्वैः द्वीपाः षण्णवतिस्तु ते ॥५७५॥
कालोदं पुष्करद्वीपः परिष्कृत्य द्विमन्दरः । स्थितो द्विगुणविष्कम्भः पृथुपुष्करलाञ्छनः ॥५७६॥
मानुषक्षेत्रमर्यादा मानुषोत्तरभूभृता । परिच्छिन्नस्तु तस्यार्द्धः पुष्करार्द्धस्ततो मतः ॥५७७॥

कालोदधि समुद्रकी पूर्व दिशामें पानीके समान मुखवाले, दक्षिण दिशामें घोड़ेके समान कानवाले, पश्चिम दिशामें पक्षियोंके समान मुखवाले और विदिशाओंमें शूकरके समान मुखवाले मनुष्य रहते हैं। पूर्व दिशामें जो पानीके समान मुखवाले मनुष्य रहते हैं उनके दक्षिण और उत्तरमें—दोनों ओर क्रमसे ऊँट तथा गौके समान कानवाले मनुष्य रहते हैं। गजकर्ण और अश्वकर्ण मनुष्योंकी दोनों ओर बिल्लीके समान मुखवाले तथा पक्षियोंके समान मुखवालोंकी दोनों ओर हाथीके समान मुखवाले मनुष्य स्थित हैं। इन मनुष्योंके कान इतने लम्बे होते हैं कि ये उन्हींको ओढ़-बिछाकर सो जाते हैं ॥५६७–५६९॥ कालोदधि समुद्रमें विजयार्ध पर्वतके जो दो छोर निकले हुए हैं उनपर शिशुमारके समान तथा मगरके समान मुखवाले मनुष्य रहते हैं ॥५७०॥ हिमवान् पर्वतके दोनों छोरोंपर भेड़िया और व्याघ्रके समान मुखवाले तथा शिखरी पर्वतके दोनों भागोंपर शृगाल और भालूके समान मुखवाले मनुष्य स्थित हैं ॥५७१॥ ऐरावत क्षेत्र सम्बन्धी विजयार्ध पर्वतके दोनों भागोंपर चीता तथा भृङ्गार (झारी) के समान मुखवाले और बाह्य एवं आभ्यन्तर जगतीपर चीतेके समान मुखवाले मनुष्य निवास करते हैं। ये समस्त मनुष्य आयु, वर्ण, गृह, आहार और गतिकी अपेक्षा लवण समुद्रके मनुष्योंके समान हैं, ये द्वीप एक हजार योजन गहरे हैं तथा जहाँ स्थित हैं वहाँ समुद्रका तट कटा हुआ है ॥५७२–५७३॥ कालोदधिमें स्थित रहनेवाले ये द्वीप प्रवेशकी अपेक्षा पाँच सौ योजनसे अधिक हैं अर्थात् दिशाओंके द्वीप समुद्र तटसे पाँच सौ योजन प्रवेश करनेपर, विदिशाओंके द्वीप पाँच सौ पचास योजन प्रवेश करनेपर और अन्तर्दिशाओंके द्वीप छह सौ योजन प्रवेश करनेपर स्थित हैं। इन सभीका विस्तार लवण समुद्रके द्वीपोंसे दूना माना गया है तथा कुमानुष कुभोग भूमिया जीव इनमें रहते हैं ॥५७४॥ चौबीस द्वीप कालोदधिकी आभ्यन्तर (धातकीखण्डकी समीपवर्ती) सीमामें और चौबीस द्वीप बाह्य (पुष्करार्द्धकी समीपवर्ती) सीमामें स्थित हैं। इस प्रकार कालोदधिमें अड़तालीस हैं। लवण समुद्रके अड़तालीस द्वीपोंके साथ मिलकर सब अन्तर्द्वीप छियानबे हो जाते हैं ॥५७५॥ इस प्रकार कालोदधिका वर्णन किया। अब पुष्कर द्वीपका वर्णन करते हैं—

जिसकी पूर्व-पश्चिम दिशाओंमें दो मेरु हैं, कालोदधिकी अपेक्षा जिसका दूना विस्तार है और जो पुष्कर अर्थात् कमलके विशाल चिह्नसे युक्त है ऐसा पुष्करवर द्वीप कालोदधिको चारों ओरसे घेरकर स्थित है ॥५७६॥ पुष्करवर द्वीपका अर्धभाग, मनुष्य क्षेत्रकी सीमा

१. शृगालाश्च म०।

इष्वाकाराद्रिणाप्येव दक्षिणेनोत्तरेण च । विभक्तो भिद्यते द्वेधा स पूर्वश्चापि पश्चिमः ॥५७८॥
प्रत्येकं मेरुमध्यौ तौ धातकीखण्डखण्डवत् । क्षेत्रपर्वतनद्याद्यैः पूर्वनामभिरन्वितौ ॥५७९॥
चत्वारिंशत्सहस्राणि सहस्रं पञ्चशत्यपि । सप्ततिर्नव चांशास्तु त्रिसप्तत्युत्तरं शतम् ॥५८०॥
भरताभ्यन्तरविष्कम्भो मध्यो द्वादशयोजनैः । त्रिपञ्चाशत्सहस्राणि शतैः पञ्चभिरेव च ॥५८१॥
भागाश्चास्य शतं प्रोक्ता नवतिश्च नवापि च । बाह्योऽपि भाष्यते तस्य विष्कम्भो भरतस्य तु ॥५८२॥
पञ्चषष्टिसहस्राणि योजनानि चतुःशतैः । षट् चत्वारिंशदेतानि भागाश्चास्मै त्रयोदश ॥५८३॥
आविदेहं च विष्कम्भाद् वर्षाद् वर्षं चतुर्गुणम् । गणितज्ञैर्विनिर्दिष्टं पर्वताद्‌पि पर्वतः ॥५८४॥
एका कोटिः पुनर्लक्षा द्वाचत्वारिंशदेव ताः । त्रिंशच्चापि सहस्राणि योजनानां शतद्वयम् ॥५८५॥
साधिकैकान्नपञ्चाशद् योजनानि बहिर्भवः । पुष्करार्धस्य सर्वस्य परिधिः परिभाषितः ॥५८६॥
तिस्रो लक्षाः सहस्राणि पञ्च पञ्चाशदद्रिभिः । रुद्धं क्षेत्रं शतैः षड्भिरशीत्या चतुरन्तया ॥५८७॥
वैताढ्यवृत्तवैताढ्यास्तथा[1] वर्षधरादयः । निजोत्सेधावगाहाभ्यां तैर्जम्बूद्वीपजैः समाः ॥५८८॥
धातकीखण्डजेभ्यस्तु[2] विष्कम्भा द्विगुणा मताः । पुष्करार्द्धे समौ प्राग्भ्यामिष्वाकारौ च मन्दरौ ॥५८९॥
मानुषक्षेत्रविष्कम्भश्चत्वारिंशच्च पञ्च च । लक्ष्यास्त्वर्धतृतीयौ तौ द्वीपौ वार्धिद्वयान्वितौ ॥५९०॥
योजनानां सहस्रं तु सप्तशत्येकविंशतिः । उच्छ्रायः सच्छ्रियस्तस्य मानुषोत्तरभूभृतः ॥५९१॥
सक्रोशोऽपि च सत्रिंशदवगाहश्चतुःशती । द्वाविंशत्या सहस्रं तु मूलविस्तार इष्यते ॥५९२॥
त्रयोविंशतियुक्तानि मध्ये सप्त शतानि तु । विस्तारोऽस्योपरि प्रोक्तश्चतुर्विंशश्चतुःशती ॥५९३॥
कोटी तु परिधिर्लक्षा द्विचत्वारिंशदस्य च । षट्त्रिंशच्च सहस्राणि सप्तशत्या त्रयोदश ॥५९४॥

निश्चित करनेवाले मानुषोत्तर पर्वतसे घिरा हुआ है इसलिए पुष्करार्ध माना गया है ॥५७७॥ यह द्वीप उत्तर और दक्षिण दिशामें पड़े हुए इष्वाकार पर्वतोंसे विभक्त है इसलिए इसके पूर्व पुष्करार्ध और पश्चिम पुष्करार्ध इस प्रकार दो भेद हो जाते हैं ॥५७८॥ इन दोनों ही खण्डोंके मध्यमें धातकीखण्डके समान मेरु पर्वत हैं तथा पहलेके ही समान नामवाले क्षेत्र पर्वत तथा नदी आदिसे दोनों खण्ड युक्त हैं ॥५७९॥ पुष्करार्धके भरत क्षेत्रका आभ्यन्तर विस्तार इकतालीस हजार पाँच सौ उन्यासी योजन तथा एक सौ तेहत्तर भाग है। मध्य विस्तार त्रेपन हजार पाँच सौ बारह योजन एक सौ निन्यानवे भाग है और बाह्य विस्तार पैंसठ हजार चार सौ छियालीस योजन तेरह भाग कहा जाता है ॥५८०-५८३॥ गणितज्ञ आचार्योंने विदेह क्षेत्र तक पूर्व क्षेत्रसे आगेके क्षेत्रका और पूर्व भवनसे आगेके पर्वतका चौगुना विस्तार बतलाया है ॥५८४॥ समस्त पुष्करार्धकी बाह्य परिधि एक करोड़ ब्यालीस लाख तीस हजार दो सौ उनचास योजनसे कुछ अधिक कही गई है ॥५८५-५८६॥ पुष्करार्धका तीन लाख पचपन हजार छह सौ चौरासी योजन प्रमाण क्षेत्र पर्वतोंसे रुका हुआ है ॥५८७॥ पुष्करार्धके विजयार्ध नाभिगिरि तथा कुलाचल आदि अपनी-अपनी ऊँचाई और गहराईकी अपेक्षा जम्बू द्वीपके विजयार्ध आदिके समान हैं ॥५८८॥ परन्तु विस्तारकी अपेक्षा धातकीखण्डके विजयार्ध आदिके दूने-दूने हैं। पुष्करार्धके दोनों इष्वाकार तथा दोनों मेरु धातकीखण्डके इष्वाकार और मेरुओंके समान हैं ॥५८९॥ अढ़ाई द्वीप तथा लवणोदधि और कालोदधि ये दो समुद्र मनुष्यक्षेत्र कहलाते हैं। इसका विस्तार पैंतालीस लाख योजन है ॥५९०॥ उत्तम शोभासे सम्पन्न मानुषोत्तर पर्वतकी ऊँचाई एक हजार सात सौ इक्कीस योजन है ॥५९१॥ गहराई चार सौ तीस योजन एक कोश है। मूल विस्तार एक हजार बाईस योजन, मध्य विस्तार सात सौ तेईस योजन और उपरितन भागका विस्तार चार सौ चौबीस योजन है ॥५९२-५९३॥ मानुषोत्तरकी परिधिका विस्तार एक करोड़ बयालीस

---

१. वृत्तवेदाढ्या म० । २. खण्डकेभ्यस्तु क०, म० ।

अन्तश्छिन्नतटो भाति बहिर्वृद्धिक्रमोन्नतिः । सोऽभ्यन्तरमुखा[1]सीनमृगाधिपतिविभ्रमः ॥५९५॥
चतुर्दशगुहाद्वारदत्तनिर्गमनो गिरिः । [2]पुष्करोदं नयत्येव पूर्वापरनदीवधूः ॥५९६॥
पञ्चाशद्योजनायामास्तदर्धव्याससंगताः । अर्धयोजनसंयुक्तसप्तत्रिंशत्समुच्छ्रिताः ॥५९७॥
अष्टोच्छ्रायचतुर्व्यासगृहद्वारोपशोभिताः । चत्वारो मूर्ध्नि तस्याद्रेश्चतुर्दिक्षु जिनालयाः ॥५९८॥
तत्प्रदक्षिणवृत्तानि प्राच्यादिषु दिशासु च । इष्टदेशनिविष्टानि कूटान्यष्टादशाचले ॥५९९॥
तानि पञ्चशतोत्सेधमूलविस्तारवन्ति तु । शते चार्धतृतीये द्वे विस्तृतान्यपि चोपरि ॥६००॥
त्रीणि त्रीणि हि कूटानि चतुर्दिक्षु विदिक्षु तु । चत्वारि वज्रमैशान्यामाग्नेय्यां तपनीयकम् ॥६०१॥
प्राच्यां दिशि तु वैडूर्ये यशस्वान् वसति प्रभुः । अश्मगर्भे यशस्कान्तः सुपर्णानां यशोधरः ॥६०२॥
सौगन्धिके ततोऽपाच्यां रुचके नन्दनस्तथा । लोहिताक्षे पुनः कूटे नन्दोत्तर इतीरितः ॥६०३॥
तस्यामशनिघोषोऽपि वसत्यञ्जनके दिशि । सिद्धश्चाञ्जनमूले तु प्रतीच्यां कनके पुनः ॥६०४॥
क्रमणो मानुषाख्यस्तु कूटे रजतनामनि । उदीच्यां स्फटिके कूटे सुदर्शन इति श्रुतः ॥६०५॥
अङ्के मोघः प्रवालेऽस्यां सुप्रबुद्धो वसत्यसौ । तपनीये सुरः स्वातिर्वज्रे तु हनुमानपि ॥६०६॥
निषधस्पृष्टभागस्थे रत्नाख्ये पूर्वदक्षिणे । वेणुदेव इति ख्यातः पन्नगेन्द्रो वसत्यसौ ॥६०७॥

लाख छत्तीस हजार सात सौ तेरह है ॥५९४॥ यह मानुषोत्तर भीतरकी ओर छिन्नतट टाँकीसे कटे हुएके समान एक सदृश है और इसका बाह्य भाग पिछली ओरसे क्रमसे ऊँचा उठता गया है अतः भीतरकी ओर मुखकर बैठे हुए सिंहके समान उसका आकार जान पड़ता है ॥५९५॥ यह पर्वत चौदह गुफा रूपी दरवाजोंके द्वारा निकलनेका मार्ग देकर पूर्व-पश्चिमकी नदी रूपी स्त्रियोंको पुष्करोदधिके पास भेजता रहता है ॥५९६॥ जिन गुफाओंसे नदियाँ निकलती हैं वे पचास योजन लम्बी पच्चीस योजन चौड़ी और साढ़े सैंतीस योजन ऊँची हैं ॥५९७॥ मानुषोत्तर पर्वतके उपरितन भागपर चारों दिशाओंमें आठ योजन ऊँचे और चार योजन चौड़े गृह-द्वारोंसे सुशोभित चार जिनालय हैं ॥५९८॥ इसी मानुषोत्तर पर्वतकी पूर्वादि दिशाओंमें प्रदक्षिणा रूपसे इष्ट स्थानोंपर बने हुए अठारह कूट हैं ॥५९९॥ ये कूट पाँच सौ योजन ऊँचे हैं। इनके मूल भागका विस्तार पाँच सौ योजन और ऊर्ध्वभागका ढाई सौ योजन है ॥६००॥ मानुषोत्तर पर्वतकी चारों दिशाओंमें तीन-तीन तथा विदिशाओंमें चार❀ कूट हैं। इन चारके सिवाय ऐशान दिशामें वज्रकूट और आग्नेय दिशामें तपनीयक कूट और भी हैं ॥६०१॥ पूर्व दिशाके वैडूर्य नामक पहले कूटपर यशस्वान् देव, दूसरे अश्मगर्भकूटपर यशस्कान्त और तीसरे सौगन्धिक कूटपर सुपर्णकुमारोंका स्वामी यशोधर देव रहता है। तदनन्तर दक्षिण दिशाके रुचक कूटपर नन्दन, लोहिताक्ष कूटपर नन्दोत्तर और अंजन कूटपर अशनिघोष देव रहता है। पश्चिम दिशाके अञ्जनमूल कूटपर सिद्ध देव, कनक कूटपर क्रमण देव और रजत कूटपर मानुष नामका देव रहता है। उत्तर दिशाके स्फटिक कूटपर सुदर्शन, अङ्क कूटपर मोघ और प्रवाल नामक कूटपर सुप्रबुद्ध देव रहता है। आग्नेय विदिशाके पूर्वोक्त तपनीयक कूटपर स्वाति देव तथा ऐशान दिशाके वज्रक कूटपर हनुमान् नामका देव रहता है। मानुषोत्तर पर्वतके पूर्व-दक्षिण कोणमें निषधाचलसे स्पृष्ट भागमें रत्न नामका कूट है और उसपर नागकुमारोंका स्वामी वेणुदेव रहता

१. सुखासीन म० । २. पुष्करो नन्दयत्येष म० ।

❀ ऐशान और आग्नेय विदिशामें दो-दो तथा नैऋत्य और वायव्यमें एक-एक इस प्रकार विदिशाओंमें ६ तथा दिशाओंमें १२ कुल मिलाकर १८ कूट बनाये हैं। इनमें चार सिद्धायतन कूट और मिला देनेपर २२ कूट होते हैं।

नीलाद्रिस्पृष्टभागस्थे पूर्वोत्तरदिगावृते । सर्वरत्ने सुपर्णेन्द्रो वेणुदारी वसत्यसौ ॥६०८॥
निषधस्पृष्टभागस्थं दक्षिणापरदिग्गतम् । वेलम्बं चातिवेलम्बो [1]वरुणोऽधिवसत्यसौ ॥६०९॥
नीलाद्रिस्पृष्टभागस्थमपरोत्तरदिग्गतम् । प्रभञ्जनं तु तन्नामा वातेन्द्रोऽधिवसत्यसौ ॥६१०॥
इत्यनेकाद्भुताकीर्णः सौवर्णो मानुषक्षितेः । प्राकार इव भात्येष मानुषोत्तरपर्वतः ॥६११॥
विद्याधरा न गच्छन्ति नर्षयः प्राप्तलब्धयः । समुद्घातोपपाताभ्यां विनात्मानुत्तरं गिरेः ॥६१२॥
जम्बूद्वीपं यथा क्षारः कालोदोऽब्धिः परं यथा । द्वीपं तथैव पर्येति पुष्करोदोऽपि पुष्करम् ॥६१३॥
वारुणीवरनामानं वारुणीवरसागरः । ततः क्षीरवरद्वीपं ख्यातः क्षीरोदसागरः ॥६१४॥
ततो घृतवरद्वीपं षष्ठं घृतवरोदधिः । ततश्चेक्षुवरद्वीपं पर्येतीक्षुरसोदधिः ॥६१५॥
नन्दीश्वरवरद्वीपं नन्दीश्वरवरोदधिः । अष्टमं चाष्टमः ख्यातः परिक्षिपति सर्वतः ॥६१६॥
अरुणं नवमं द्वीपं सागरोऽरुणसंज्ञकः । अरुणोद्भासनामानमरुणोद्भाससागरः ॥६१७॥
द्वीपं तु कुण्डलवरं स कुण्डलवरोदधिः । ततः शङ्खवरद्वीपं स शङ्खवरसागरः ॥६१८॥
रुचकादिवरद्वीपं रुचकादिवरोदधिः । भुजगादिवरद्वीपं भुजगादिवरोदधिः ॥६१९॥
द्वीपं कुशवरं नाम्ना ख्यातः कुशवरोदधिः । द्वीपं क्रौञ्चवरं चापि स क्रौञ्चवरसागरः ॥६२०॥
द्विगुणद्विगुणव्यासा यथैते द्वीपसागराः । नामभिः षोडश ख्याताः असंख्येयास्ततः परे ॥६२१॥
आषोडशादतीत्यान्यानसंख्यान् द्वीपसागरान् । द्वीपो [2]मनःशिलाभिख्यो हरितालस्ततः परः ॥६२२॥
सिन्दूरः श्यामको द्वीपस्तथैवाञ्जनसंज्ञकः । द्वीपो हिङ्गुलकाभिख्यस्ततो रूपवरः परः ॥६२३॥
सुवर्णवरनामाऽतो द्वीपो वज्रवरस्ततः । वैडूर्यवरसंज्ञश्च परो नागवरस्तथा ॥६२४॥

है। पूर्वोत्तर कोणमें नीलाचलसे स्पृष्ट भागमें सर्वरत्न नामका कूट है उसपर गरुडकुमारोंका इन्द्र वेणुदारी रहता है। दक्षिण-पश्चिम कोणमें निषधाचलसे स्पृष्ट भागमें वेलम्ब नामका कूट है उसपर वरुणकुमारोंका अधिपति अतिवेलम्ब देव रहता है। तथा पश्चिमोत्तर दिशामें नीलाचलसे स्पृष्टभागमें प्रभञ्जन नामका कूट है और उसके ऊपर वायुकुमारोंका इन्द्र प्रभञ्जन नामका देव रहता है ॥६०२–६१०॥ इस प्रकार अनेक आश्चर्योंसे भरा हुआ यह सुवर्णमय मानुषोत्तर पर्वत मनुष्य क्षेत्रके कोटके समान जान पड़ता है ॥६११॥ समुद्घात और उपपादके सिवाय विद्याधर तथा ऋद्धि प्राप्त मुनि भी इस पर्वतके आगे नहीं जा सकते ॥६१२॥

जिस प्रकार जम्बूद्वीपको लवण समुद्र घेरे हुए है उसी प्रकार पुष्करवर द्वीपको पुष्करवर समुद्र घेरे हुए है ॥६१३॥ उसके आगे वारुणीवर द्वीपको वारुणीवर सागर, क्षीरवर द्वीपको क्षीरोदसागर, घृतवर द्वीपको घृतवर सागर, इक्षुवर द्वीपको इक्षुवर सागर, आठवें नन्दीश्वर द्वीपको नन्दीश्वरवर सागर, नौवें अरुण द्वीपको अरुणसागर, अरुणोद्भास द्वीपको अरुणोद्भास सागर, कुण्डलवर द्वीपको कुण्डलवर सागर, शङ्खवर द्वीपको शङ्खवर सागर, रुचकवर द्वीपको रुचकवर सागर, भुजगवर द्वीपको भुजगवर सागर, कुशवर द्वीपको कुशवर सागर, और क्रौञ्चवर द्वीपको क्रौञ्चवर सागर ये सब ओरसे घेरे हुए हैं। जिस प्रकार दूने-दूने विस्तारवाले इन सोलह द्वीप सागरोंका नामोल्लेख पूर्वक वर्णन किया है उसी प्रकार दूने-दूने विस्तारवाले असंख्यात द्वीप सागर इनके आगे और हैं ॥६१४–६२१॥ सोलहवें द्वीप सागरके आगे असंख्यात द्वीप सागरोंका उल्लङ्घन कर १ मनःशिल नामका द्वीप है उसके बाद २ हरिताल, ३ सिन्दूर, ४ श्यामक, ५ अञ्जन, ६ हिङ्गुलक, ७ रूपवर, ८ सुवर्णवर, ९ वज्रवर, १० वैडूर्यवर, ११ नागवर, १२ भूतवर, १३ यक्षवर, १४ देववर

१. वरुणेन्द्रो वसत्यसौ म० । २. मतः शिलोऽभिख्यो म० ।

द्वीपो भूतवरश्चाब्धिस्ततो यक्षवरस्ततः । स्यातो देववरो द्वीपः परश्चेन्दुवरस्ततः ॥६२५॥
स्वयम्भूरमणाभिख्यौ सर्वान्त्यौ द्वीपसागरौ । षोडशैतेऽब्धिभिः सार्द्धं स्वनामसमनामभिः ॥६२६॥
राशिद्वयान्तराले स्युरसंख्या द्वीपसागराः । अनादिशुभनामानः सान्तरस्थितमूर्तयः ॥६२७॥
लवणो लवणस्वादस्तन्नामा वारुणीरसः । घृतक्षीररसौ द्वौ च कालोदान्त्यौ शुभोदकौ ॥६२८॥
मधूदकोभयास्वादः पुष्करोदः स्वभावतः । शेषास्त्विक्षुरसास्वादाः सर्वेऽपि जलराशयः ॥६२९॥
लवणोदे महामत्स्याः सम्मूर्च्छनजमूर्तयः । नवयोजनदीर्घाः स्युस्तीरे मध्ये द्विरायताः ॥६३०॥
नदीमुखेषु कालोदे ते त्वष्टादशयोजनाः । षट्त्रिंशद्योजना मध्ये गर्भजास्तु तदर्धकाः ॥६३१॥
[1]स्वयम्भूरमणेऽप्यादौ ते पञ्चशतयोजनाः । सहस्रयोजना मध्ये मत्स्याद्या नान्यसिन्धुषु ॥६३२॥
मानुषोत्तरपर्यन्ता जन्तवो विकलेन्द्रियाः । अन्त्यद्वीपार्द्धतः सन्ति परस्तात्ते यथा परे ॥६३३॥
द्वीपो वापि समुद्रो वा विस्तारेणैकलक्षया । सर्वेभ्यः समतीतेभ्यः परस्तेभ्योऽतिरिच्यते ॥६३४॥
अर्धमन्दरविष्कम्भात् स्वयम्भूरमणाम्बुधेः । अन्तः प्राप्य स्थितायास्तु रज्ज्वा मध्यमिदं विदुः ॥६३५॥
गुणितं पञ्चसप्तत्या सहस्रमवगाह्य तु । स्वयम्भूरमणाम्भोधिं रज्जुमध्यमवस्थितम् ॥६३६॥

१५ इन्दुवर तथा सबसे अन्तिम स्वयंभूरमण द्वीप तथा स्वयंभूरमण सागर हैं। ये सभी द्वीप अपने समान नामवाले सागरोंसे वेष्टित हैं ॥६२२-६२६॥ आदिके सोलह और अन्तके सोलह इन दोनों राशियोंके बीच अनादि कालिक शुभ नामोंको धारण करनेवाले असंख्यात द्वीप और असंख्यात सागर हैं। इनमें द्वीपोंके बीच सागरका और सागरोंके बीच द्वीपका अन्तर विद्यमान है अर्थात् द्वीपके बाद सागर और सागरके बाद द्वीप इस क्रमसे इनका सद्भाव है ॥६२७॥ इन समुद्रोंमें लवणसमुद्रके जलका स्वाद नमकके समान है, वारुणीवर समुद्रके जलका स्वाद वारुणी—शराबके तुल्य है, घृतवर और क्षीर समुद्रका जल क्रमसे घृत और दूधके समान है। कालोदधि और अन्तिम-स्वयंभूरमणका जल पानीके समान है। पुष्करवर समुद्र मधु और पानी दोनोंके स्वादसे युक्त है तथा बाकी समस्त समुद्र इक्षुरसके समान स्वादवाले हैं ॥६२८-६२९॥ लवण समुद्रके तीरपर सम्मूर्च्छन जन्मसे उत्पन्न हुए महामच्छ नौ योजन लम्बे हैं तथा मध्यमें इससे दूने अर्थात् अठारह योजन लम्बे हैं। कालोदधि समुद्रमें नदियोंके प्रवेश स्थानपर अठारह योजन और मध्यमें छत्तीस योजन लम्बे हैं। गर्भ जन्मसे उत्पन्न होनेवाले मच्छोंकी लम्बाई संमूर्च्छनज मत्स्योंसे आधी है ॥६३०-६३१॥ स्वयंभूरमण समुद्रके तीरपर मच्छोंकी लम्बाई पाँच सौ योजन और मध्यमें एक हजार योजन है। लवण समुद्र कालोदधि और स्वयंभूरमण इन तीन समुद्रोंके सिवाय अन्य समुद्रोंमें मच्छ आदि जलचर जीव नहीं हैं ॥६३२॥ इस ओर विकलेन्द्रिय जीव (दो इन्द्रिय, तीन इन्द्रिय, चार इन्द्रिय) मानुषोत्तर पर्वत तक ही रहते हैं। उस ओर स्वयम्भूरमण द्वीपके अर्ध भागसे लेकर अन्त तक पाये जाते हैं ॥६३३॥ यदि किसी द्वीप या सागरका विस्तार जानना है तो उसके पहले जो भी द्वीप और सागर निकल चुके हैं उन सबके विस्तारको इकट्ठा कर लीजिए उससे एक लाख योजन अधिक विस्तार उस विवक्षित द्वीप या सागरका होता है ॥६३४॥ मेरु पर्वतकी अर्ध चौड़ाईसे लेकर स्वयंभूरमण समुद्रके अन्त तक आधी राजू होती है। इस आधी राजूका मध्य स्वयंभूरमण समुद्रमें पचहत्तर हजार योजन प्रवेश करनेपर होता है। भावार्थ—समस्त मध्यम लोकका विस्तार एक राजू है। मेरु पर्वतकी जो चौड़ाई है उसके अर्ध भागसे लेकर स्वयम्भूरमण समुद्रके अन्त तक आधी राजू होती है। आधी राजूके आधे भागमें आधा जम्बूद्वीप तथा असंख्यात द्वीप सागर और अन्तिम स्वयम्भू-

१. जलयरजीवा लवणे काले यंतिम सयंभुरमणे य ।
कम्म महीपडिबद्धे ण हि सेसे जलयरा जीवा ॥३२०॥ —त्रिलोकसारस्य

अनावृतप्रभुर्यक्षो जम्बूद्वीपस्य रक्षकः । सुस्थितो लवणाम्भोधेरधिपः प्रतिपादितः ॥६३७॥
धातकीखण्डनाथौ तु प्रभासप्रियदर्शनौ । कालश्चापि महाकालः कालोदजलधीश्वरौ ॥६३८॥
पद्मश्च पुण्डरीकश्च पुष्करद्वीपनामकौ[1] । चक्षुष्मांश्च सुचक्षुश्च मानुषोत्तरशैलपौ[2] ॥६३९॥
श्रीप्रभश्रीधरौ नाथौ पुष्करोदस्य वारिधेः । वारुणीवरभूमीशौ वरुणो वरुणप्रभः ॥६४०॥
वारुणीवरवार्धीशौ मध्यमध्यमसंज्ञकौ । पाण्डुरः पुष्पदन्तश्च तौ क्षीरवरभूमिपौ ॥६४१॥
वार्धेः क्षीरवरस्येशौ विमलो विमलप्रभः । प्रभू घृतवरद्वीपे सुप्रभश्च महाप्रभः ॥६४२॥
कनकः कनकाभश्च नाथौ घृतवरोदधेः । तथैवेक्षुरसद्वीपे पूर्णपूर्णप्रभौ सुरौ ॥६४३॥
देवौ गन्धमहागन्धौ नाथाविक्षुरसोदधेः । नन्दीश्वरवरद्वीपे नन्दिनन्दिप्रभौ तथा ॥६४४॥
प्रभू भद्रसुभद्रौ तु नन्दीश्वरवरोदधेः । अरुणद्वीपपौ देवावरुणश्चारुणप्रभः ॥६४५॥
सुगन्धसर्वगन्धाख्यावरुणाब्धेरधीश्वरौ । द्वौ द्वौ द्वीपाधिपावेवं परतो दक्षिणोत्तरौ ॥६४६॥
कोटीशतं त्रिषष्ट्यग्रमशीतिश्चतुरुत्तराः । लक्षा नन्दीश्वरद्वीपो विस्तीर्णो वर्णितो जिनैः ॥६४७॥
षट्त्रिंशच्च सहस्रं च कोट्यो नियुतानि[3] च । द्वादशैव सहस्रे द्वे तथा सप्त शतानि च ॥६४८॥
योजनानि त्रिपञ्चाशदान्तरः परिधिः स च । नन्दीश्वरवरद्वीपसम्भवो परिभाषितः ॥६४९॥
द्वासप्तत्युत्तरं कोटी सहस्रद्वितयं[4] तथा । नियुतानि त्रयस्त्रिंशच्चत्वा सहितं शतम् ॥६५०॥
पञ्चाशच्च सहस्राणि चतुर्भिरधिकानि च । बहिः परिधिरेष स्यादष्टमद्वीपसम्भवी ॥६५१॥
मध्ये तस्य चतुर्दिक्षु चत्वारोऽञ्जनपर्वताः । तुङ्गाश्चतुरशीतिं ते व्यस्ताश्चाधःसहस्रगाः ॥६५२॥
पटहाकृतयश्चित्रा वज्रमूलाः प्रभोज्ज्वलाः । भ्राजन्ते पर्वताः सर्वे सर्वतस्ते मनोहराः ॥६५३॥
सुकृष्णशिखराः शैलास्ते जाम्बूनदमूर्तयः । विकिरन्ति परां कान्तिं दिङ्मुखेषु यथायथम् ॥६५४॥

रमण समुद्रके पचहत्तर हजार योजन तकका प्रदेश आता है, बाकी आधी राजूमें स्वयम्भूरमण समुद्रका अवशिष्ट भाग है ॥६३५–६३६॥ जम्बू द्वीपका रक्षक अनावृत्त यक्ष है, लवण समुद्रका स्वामी सुस्थित देव कहा गया है ॥६३७॥ धातकीखण्डके स्वामी प्रभास और प्रियदर्शन, कालोदधिके काल और महाकाल, पुष्करवर द्वीपके पद्म और पुण्डरीक, मानुषोत्तर पर्वतके चक्षुष्मान् और सुचक्षु, पुष्करवर समुद्रके श्रीप्रभ और श्रीधर, वारुणीवर द्वीपके वरुण और वरुणप्रभ, वारुणीवर समुद्रके मध्य और मध्यम, क्षीरवर द्वीपके पाण्डुर और पुष्पदन्त, क्षीरवर समुद्रके विमल और विमलप्रभ, घृतवर द्वीपके सुप्रभ और महाप्रभ, घृतवर समुद्रके कनक और कनकाभ, इक्षुवर द्वीपके पूर्ण और पूर्णप्रभ, इक्षुवर समुद्रके गन्ध और महागन्ध, नन्दीश्वर द्वीपके नन्दी और नन्दिप्रभ, नन्दीश्वर समुद्रके भद्र और सुभद्र, अरुण द्वीपके अरुण और अरुणप्रभ और अरुण समुद्रके सुगन्ध और सर्वगन्ध, देव स्वामी हैं। इसी प्रकार आगे भी प्रत्येक द्वीप और सागरके दो-दो देव स्वामी हैं। उनमें एक दक्षिणका और दूसरा उत्तरका स्वामी है ॥६३८–६४६॥

जिनेन्द्र भगवान्ने आठवें नन्दीश्वर द्वीपका विस्तार एक सौ तिरसठ करोड़ चौरासी लाख योजन कहा है ॥६४७॥ नन्दीश्वर द्वीपकी आभ्यन्तर परिधि एक हजार छत्तीस करोड़ बारह लाख दो हजार सात सौ योजन है तथा बाह्य परिधि दो हजार बहत्तर करोड़ तैंतीस लाख चौवन हजार एक सौ नब्बे योजन है ॥६४८–६५१॥ नन्दीश्वर द्वीपके मध्यमें चारों दिशाओंमें चार अञ्जनगिरि हैं। ये पर्वत चौरासी हजार योजन ऊँचे, उतने ही चौड़े और एक हजार योजन गहरे हैं ॥६५२॥ ये सभी पर्वत ढोलके आकार हैं, चित्र-विचित्र हैं, वज्रमय मूलके धारक हैं, प्रभासे उज्ज्वल हैं और सब ओरसे मनको हरण करते हुए देदीप्यमान हैं ॥६५३॥ सुन्दर काले शिखरोंसे युक्त वे सुवर्णमयी पर्वत, दिशाओंमें सब ओर अपनी उत्तम कान्ति बिखेरते

---

१. नामको म० । २. शैलयोः म० । ३. लक्षाणि । ४. सहस्रं द्वितयं म० ।

गत्वा योजनलक्षाः स्युर्महादिक्षु महीभृताम् । चतस्रस्तु चतुष्कोणा वाप्यः प्रत्येकमक्षयाः ॥६५५॥
सहस्रपत्रसंछन्नाः स्फटिकस्वच्छवारयः । विचित्रमणिसोपाना [1] विनक्राद्याः सवेदिकाः ॥६५६॥
अवगाहः पुनस्तासां योजनानां सहस्रकम् । आयामोऽपि च विष्कम्भो जम्बूद्वीपप्रमाणकः ॥६५७॥
नन्दा नन्दवती चान्या वापी नन्दोत्तरा परा । नन्दीघोषा च पूर्वाद्रेर्दिक्षु प्राच्यादिषु स्थिताः ॥६५८॥
सौधर्मेन्द्रस्य भोग्याद्या द्वितीयैशानभोगिनः । तृतीया चमरेन्द्रस्य चतुर्थी तु बलेरसौ ॥६५९॥
विजया वैजयन्ती च जयन्ती चापराजिता । दक्षिणाञ्जनशैलस्य दिक्षु पूर्वादिषु क्रमात् ॥६६०॥
शक्रस्य लोकपालानां पूर्वा तु वरुणस्य सा । क्रमाद् यमस्य सोमस्य भोग्या वैश्रवणस्य च ॥६६१॥
पाश्चात्याञ्जनशैलस्य पूर्वादिदिगवस्थिताः । अशोका सुप्रबुद्धा च कुमुदा पुण्डरीकिणी ॥६६२॥
भोग्याद्या वेणुदेवस्य वेणुतालेस्ततः परा । धरणस्य तृतीया तु भूतानन्दस्य चोत्तरा ॥६६३॥
उदीच्याञ्जनशैलस्य प्राच्याद्या सुप्रभङ्करा । सुमनाश्च दिशासु स्यादानन्दा च सुदर्शना ॥६६४॥
ऐशानलोकपालस्य वरुणस्य यमस्य च । सोमस्य च कुबेरस्य भोग्यास्तास्तु यथाक्रमम् ॥६६५॥
पञ्चषष्टिसहस्राणि चत्वारिंशच्च पञ्च च । अन्तरं षोडशानां स्यादान्तरं योजनानि तु ॥६६६॥
मध्यान्तराणि लक्षैका चत्वारि च सहस्रकैः । द्वियोजनाधिकानि स्युस्तासां वै षट्शतानि च ॥६६७॥
बाह्यान्तराणि लक्षे द्वे त्रयोविंशतिरेव च । सहस्राणि तथैव स्युरेकषष्ट्या च षट्शती ॥६६८॥
तासां मध्येषु वापीनां जाम्बूनदमयाः स्थिताः । षोडशार्जुनमूर्धानो नाम्ना दधिमुखाद्रयः ॥६६९॥
सहस्रमवगाढास्तु तदेव दशसङ्गुणम् । पटहाकृतयो व्यस्ता व्यायताश्च समुच्छ्रिताः ॥६७०॥
परितस्ताश्चतस्रोऽपि वापीर्वनचतुष्टयम् । प्रत्येकं तत्समायामं तदर्धव्याससङ्गतम् ॥६७१॥

तेभ्यः कारणभूतेभ्यः समयस्य समुद्भवः । कारणेन विना कार्यं न कदाचित् प्रजायते ॥११॥
स्वत एवाऽसतो जन्म कार्यस्य यदि जायते । स्वत एव हि किं न स्याद् खरशृङ्गस्य सम्भवः ॥१२॥
न कालादन्यतो हेतोः कालकार्यसमुद्भवः । न हि सञ्जायते जातु शालिबीजाद् यवाङ्कुरः ॥१३॥

रूप, रस, गन्ध और स्पर्शसे रहित व हलका व भारी और वर्तना लक्षणसे युक्त कालद्रव्य है। वह मुख्य और गौणके भेदसे दो प्रकारका है ॥१॥ जिस प्रकार जीव और पुद्गलके गमन करनेमें धर्म द्रव्य, ठहरनेमें अधर्म द्रव्य और समस्त द्रव्योंको अवगाह देनेमें आकाश द्रव्य निमित्त है उसी प्रकार समस्त द्रव्योंकी वर्तना—षड् गुणी हानि वृद्धि रूप परिणमनमें निश्चय कालद्रव्य निमित्त है ॥२॥ जिस प्रकार धर्म-अधर्म और आकाशद्रव्यका आगमदृष्टिसे निश्चय काल द्रव्यका भी निश्चय करना चाहिए ॥३॥ जीव और पुद्गलोंका परिणमन नाना प्रकारका होता है और गौण कालकी प्रवृत्ति मुख्य कालके कारण है ॥४॥ समस्त पदार्थोंमें जो परिणाम क्रिया परत्व और अपरत्व रूप परिणमन होते हैं वे अपने-अपने अन्तरङ्ग तथा बहिरङ्ग निमित्तोंसे ही सब ओर प्रवृत्त होते हैं ॥५॥ उन अन्तरङ्ग, बहिरङ्ग निमित्तोंमें अन्तरङ्ग निमित्त तो वस्तुकी अपनी योग्यता है जो सदा उसमें स्थित रहती है और बाह्य निमित्त निश्चय कालद्रव्य है ऐसा तत्त्वदर्शी आचार्योंने निश्चित किया है ॥६॥ परस्परके प्रवेशसे रहित कालाणु पृथक्-पृथक् समस्त लोकको व्याप्तकर राशि रूपमें स्थित हैं ॥७॥ द्रव्यार्थिक नयकी अपेक्षा कालाणुओंमें विकार नहीं होता इसलिए उत्पाद व्ययसे रहित होनेके कारण वे कथञ्चित् नित्य हैं और अपने स्वरूपमें स्थित हैं ॥८॥ अगुरु लघु गुणके कारण उन कालाणुओंमें प्रत्येक समय परिणमन होता रहता है तथा परपदार्थके सम्बन्धसे वे विकारी हो जाते हैं इसलिए पर्यायार्थिक नयकी अपेक्षा कथञ्चित् अनित्य भी है ॥९॥ भूत, भविष्य और वर्तमान रूप तीन प्रकारके समयका कारण होनेसे वे कालाणु तीन प्रकारके माने गये हैं और अनन्त समयोंके उत्पादक होनेसे अनन्त भी कहे जाते हैं ॥१०॥ उन कारणभूत कालाणुओंसे समयकी उत्पत्ति होती है सो ठीक ही है क्योंकि कारणके बिना कभी कार्य उत्पन्न नहीं होता ॥११॥ यदि असद्भूत कार्यकी उत्पत्ति कारणके बिना स्वयं ही होती है तो फिर गधेके सींगकी उत्पत्ति स्वयं ही क्यों नहीं हो जाती ? ॥१२॥ कालके सिवाय अन्य कारणसे काल रूप कार्यकी उत्पत्ति नहीं होती क्योंकि धानके बीजसे कभी जौका अंकुर

जायते भिन्नजातीयो हेतुर्यत्राऽपि कार्यकृत् । तत्राऽसौ सहकारी स्यात् मुख्योपादानकारणः ॥१४॥
[1]युक्त्यागमबलादेवमनतीन्द्रियदर्शिनः । सद्भावं मुख्यकालस्य प्रतिपद्य व्यवस्थितः ॥१५॥
समयावलिकोच्छ्वास[2]प्राणस्तोकलवादिकः । व्यवहारस्तु विज्ञेयः कालः कालज्ञवर्णितः ॥१६॥
परिणामं प्रपन्नस्य गत्या सर्वजघन्यया । परमाणोर्निजाक्रान्तस्वप्रदेशव्यतिक्रमः ॥१७॥
कालेन यावतैव स्यादविभागः स भाषितः । समयः समयाभिज्ञैर्निरुद्ध[3]परमान्यतः ॥१८॥
तैरेवावलिकासङ्ख्यैः सङ्ख्याताभिस्तु भाषितौ । ताभिरुच्छ्वासनिश्वासौ तावुभौ प्राण इष्यते ॥१९॥
प्राणाः सप्त पुनः स्तोकः सप्तस्तोका भवेल्लवः । ते सप्त सप्ततिः सन्तो मुहूर्तस्त्रिंशदेव ते ॥२०॥
अहोरात्रं भवेत्पक्षस्तानि पञ्चदशैव तौ । मासो मासावृतुस्तेषां त्रितयं त्वयनं तथा ॥२१॥
अयनद्वयमब्दं स्यात् पञ्चाब्दानि युगं पुनः । युगद्वयं दशाब्दानि शतं तानि दशाहतौ ॥२२॥
भवेद्वर्षसहस्रं तु शतं चापि दशाहतम् । दशवर्षसहस्राणि तद्देव दशताडितम् ॥२३॥
ज्ञेयं वर्षसहस्रं तु तच्चापि दशसङ्गुणम् । पूर्वाङ्गं तु तदभ्यस्तमशीत्या चतुरग्रया ॥२४॥
तत्तद्गुणं च पूर्वाङ्गं पूर्वं भवति निश्चितम् । पूर्वाङ्गं तद्गुणं तच्च पूर्वसंज्ञं तु तद्गुणम् ॥२५॥
नियुताङ्गं परं तस्मान्नियुतं च ततः परम् । कुमुदाङ्गं ततश्च स्याद् कुमुदं तु ततः परम् ॥२६॥
पद्माङ्गं पद्ममप्यस्मात् नलिनाङ्गं तथैव च । नलिनं कमलाङ्गं च कमलं चाप्यतः परम् ॥२७॥
तुट्याङ्गं तुटयमप्यस्मादटटाङ्गं ततोऽपि च । अटटं चाममाङ्गं स्यादममं चाप्यतः परम् ॥२८॥

उत्पन्न नहीं होता ॥१३॥ जहाँ कहीं भिन्न जातीय कारण कार्य उत्पादक होता है वहाँ वह सहकारी कारण ही होता है। कार्यकी उत्पत्तिमें मुख्य कारण उपादान है और सहकारी कारण उसका सहायक होता है ॥१४॥ इस प्रकार जो अतीन्द्रियदर्शी नहीं हैं अर्थात् स्थूल पदार्थको ही जानते हैं उनके लिए युक्ति और आगमके बलसे मुख्यकालका सद्भाव बताकर उसे व्यवस्थित किया है ॥१५॥ समय, आवलि, उच्छ्वास, प्राण, स्तोक और लव आदिको व्यवहार-काल जानना चाहिए ऐसा समयके ज्ञाता आचार्योंने वर्णन किया है ॥१६॥ सर्वजघन्य गतिसे परिणामको प्राप्त हुआ परमाणु जितने समयमें अपने द्वारा प्राप्त स्वर्गीय प्रदेशका उल्लंघन करता है उतने समयको समय-शास्त्रके ज्ञाता आचार्योंने समय कहा है। यह समय अविभागी होता है तथा परकी मान्यताको रोकनेवाला है ॥१७–१८॥

असंख्यात समयकी एक आवली होती है, संख्यात आवलियोंका एक उच्छ्वास निश्वास होता है, दो उच्छ्वास निश्वासोंका एक प्राण होता है। सात प्राणोंका एक स्तोक होता है, सात स्तोकोंका एक लव होता है, सत्तर लवोंका एक मुहूर्त होता है, तीस मुहूर्तोंका एक दिन-रात होता है, पन्द्रह दिन-रातका एक पक्ष होता है, दो पक्षका एक मास होता है, दो मासकी एक ऋतु होती है, तीन ऋतुओंका एक अयन होता है, दो अयनोंका एक वर्ष होता है, पाँच वर्षोंका एक युग होता है, दो युगोंके दश वर्ष होते हैं, इसमें दशका गुणा करनेपर सौ वर्ष होते हैं, इसमें दशका गुणा करनेपर हजार वर्ष होते हैं, इसमें दशका गुणा करनेपर दश हजार वर्ष होते हैं, इसमें दशका गुणा करनेपर एक लाख वर्ष होते हैं इसमें चौरासीका गुणा करनेपर एक पूर्वाङ्ग होता है, चौरासी लाख पूर्वाङ्गोंका एक पूर्व, चौरासी लाख पूर्वोंका एक नियुताङ्ग, चौरासी लाख नियुताङ्गोंका एक नियुत, चौरासी लाख नियुतोंका एक कुमुदाङ्ग, चौरासी लाख कुमुदाङ्गोंका एक कुमुद, चौरासी लाख कुमुदोंका एक पद्माङ्ग, चौरासी लाख पद्माङ्गोंका एक पद्म, चौरासी लाख पद्मोंका एक नलिनाङ्ग, चौरासी लाख नलिनाङ्गोंका एक नलिन, चौरासी लाख नलिनोंका एक कमलाङ्ग, चौरासी लाख कमलाङ्गोंका एक कमल, चौरासी लाख कमलोंका एक तुट्याङ्ग, चौरासी लाख तुट्याङ्गोंका एक तुट्य, चौरासी लाख तुट्योंका एक अटटाङ्ग, चौरासी लाख

१. युक्तागम- म०, क० । २. -कोच्छ्वासः प्राण म० । ३. निरुद्धः परमास्थितः म० ।

ऊहाङ्गमूहमप्यस्माल्लताङ्गं च लताह्वयम् । महालताङ्गसंज्ञं स्यात् कालवस्तु महालता ॥२९॥
शिरःप्रकम्पितं प्रोक्तं ततो हस्तप्रहेलिका । चर्चिकेत्यादिकः कालः सङ्ख्येयः परिभाषितः ॥३०॥
वर्षसङ्ख्याव्यतिक्रान्तः कालोऽसंख्येय इष्यते । पल्यसागरसङ्ख्यानं कल्पानन्तादिभेदवान् ॥३१॥
[1]आदिमध्यान्तनिर्मुक्तं निर्विभागमतीन्द्रियम् । मूर्तमप्यप्रदेशं च परमाणुं प्रचक्षते ॥३२॥
एकदैकं रसं वर्णं गन्धं स्पर्शावबाधकौ । दधत् स वर्ततेऽभेद्यः शब्दहेतुरशब्दकः ॥३३॥
आशङ्क्या नार्थतत्त्वज्ञैर्नभोंऽशानां समन्ततः । षट्केन युगपद्योगात्परमाणोः षडंशता ॥३४॥
स्वल्पाकाशषडंशाश्च परमाणुश्च संहताः । सप्तांशाः स्युः कुतस्तु स्यात्परमाणोः षडंशता ॥३५॥
वर्णगन्धरसस्पर्शैः पूरणं गलनं च यत् । कुर्वन्ति स्कन्धवत्तस्मात् पुद्गलाः परमाणवः ॥३६॥
[2]अनन्तानन्तसङ्ख्यानपरमाणुसमुच्चयः । अवसंज्ञादिकासंज्ञा स्कन्धजातिस्तु जायते ॥३७॥
ताभिरष्टाभिरप्युक्ता संज्ञासंज्ञादिका तथा । ताभिरप्यष्ट संज्ञाभिस्तुटिरेणुः स्फुटीकृतः ॥३८॥

अटटाङ्गोंका एक अटट, चौरासी लाख अटटोंका एक अममाङ्ग, चौरासी लाख अममाङ्गोंका एक अमम, चौरासी लाख अममोंका एक ऊहाङ्ग, चौरासी लाख ऊहाङ्गोंका एक ऊह, चौरासी लाख ऊहोंका एक लताङ्ग, चौरासी लाख लताङ्गोंकी एक लता, चौरासी लाख लताङ्गोंका एक महा लताङ्ग, चौरासी लाख महालताङ्गोंकी एक महालता, चौरासी लाख महालताओंका एक शिरः-प्रकम्पित, चौरासी लाख शिरःप्रकम्पितोंकी एक हस्त प्रहेलिका और चौरासी लाख प्रहेलिकाओंकी एक चर्चिका होती है। इस प्रकार चर्चिका आदिको लेकर संख्यात काल कहा गया है ॥१९-३०॥ जो वर्षोंकी संख्यासे रहित है वह असंख्येय काल माना जाता है इसके पल्य, सागर, कल्प तथा अनन्त आदि अनेक भेद हैं ॥३१॥

जो आदि मध्य और अन्तसे रहित है, निर्विभाग है, अतीन्द्रिय है और मूर्त होनेपर भी अप्रदेश—द्वितीयादिक प्रदेशोंसे रहित है उसे परमाणु कहते हैं ॥३२॥ वह परमाणु एक कालमें एक रस, एक वर्ण, एक गन्ध और परस्परमें बाधा नहीं करनेवाले दो स्पर्शोंको धारण करता है, अभेद्य है, शब्दका कारण है और स्वयं शब्दसे रहित है ॥३३॥ पदार्थके स्वरूपको जाननेवाले लोगोंको ऐसी आशंका नहीं करनी चाहिए कि सब ओरसे एक समय आकाशके छह अंशोंके साथ सम्बन्ध होनेसे परमाणुमें षडंशता है ॥३४॥ क्योंकि ऐसा माननेपर आकाशके छोटे-छोटे छह अंश और एक परमाणु सब मिलकर सप्तमांश हो जाते हैं अब परमाणुमें षडंशता कैसे हो सकती है? ॥३५॥ क्योंकि परमाणु रूप, गन्ध, रस और स्पर्शके द्वारा पूरण तथा गलन करते रहते हैं इसलिए स्कन्धके समान परमाणु पुद्गल द्रव्य हैं ॥३६॥ अनन्तानन्त परमाणुओंके समूह-को अवसंज्ञ कहते हैं। ये अवसंज्ञ आदि स्कन्धकी ही जातियाँ हैं ॥३७॥ आठ अवसंज्ञाओंकी

---

१. अंतादिमज्झहीणं अपदेशं इंदियेहिं णहु गज्झं ।
जं दव्वं अविभत्तं तं परमाणुं वदंति जिणा ॥९८॥ —त्रै० प्र०

२. परमाणूहिं अणंताणंतेहिं बहुविहेहिं दव्वेहिं ।
अवसण्णासण्णोत्ति सो खंधो होइ णामेण ॥१०२॥
उवसण्णासण्णो वि य गुणिदो अट्ठेहि होदि णामेण ।
सण्णासण्णो त्ति तदो दु इदि खंधो पमाणट्ठं ॥१०३॥
अट्ठेहिं गुणिदेहिं सण्णासण्णेहिं होदि तुडिरेणु ।
तित्तियमेत्तहदेहिं तुडिरेणूहिं पि तसरेणु ॥१०४॥
तसरेणू रथरेणू उत्तमभोगावणीए बालग्गं ।
मज्झिमभोगखिदीए घोलं पि जहण्ण भोगखिदिवालं ॥१०५॥ इत्यादि —त्रै० प्र०

एतैरष्टबालाग्रैरेकमेकाग्रमानसैः । कर्मभूमिमनुष्याणां बालाग्रमिति भासितम् ॥३९॥
तैरष्टाभिर्भवेल्लिक्षा ताभिर्यूका तथाष्टभिः । यूकाभिस्तु यवोऽष्टाभिर्यवैरष्टाभिरङ्गुलम् ॥४०॥
उत्सेधाङ्गुलमेतत्स्यादुत्सेधोऽनेन देहिनाम् । अल्पावस्थितवस्तूनां प्रमाणं च प्रगृह्यते ॥४१॥
प्रमाणाङ्गुलमेकं स्यात् तत्पञ्चशतसङ्गुणम् । प्रथमस्यावसर्पिण्यामङ्गुलं चक्रवर्तिनः ॥४२॥
वोध्यं यथास्वमुत्सेधव्यासादि महतः पुनः । द्वीपसागरशैलादेः प्रमाणाङ्गुलसम्मितम् ॥४३॥
स्वे स्वे काले मनुष्याणामङ्गुलं स्वाङ्गुलं मतम् । मीयते तेन तच्छत्रभृङ्गारनगरादिकम् ॥४४॥
त्रिविधाङ्गुलषट्कः स्यात् पादः पादद्वयं पुनः । वितस्तिस्तद्द्वयं हस्तस्तद्द्वयं किष्कुरिष्यते ॥४५॥
दण्डः किष्कुद्वयं दण्डः धनुर्नाड्या समा मताः । अष्टौ दण्डसहस्राणि योजनं परिभाषितम् ॥४६॥
प्रमाणयोजनव्यासस्वावगाहं विशेषवत् । त्रिगुणं परिवेषेण क्षेत्रं पर्यन्तभित्तिकम् ॥४७॥
सप्ताहान्ताविरोमाग्रैरापूर्य कठिनीकृतम् । तदुद्धार्यमिदं पल्यं व्यवहाराख्यमिष्यते ॥४८॥
एकैकस्मिंस्ततो रोम्णि प्रत्यब्दशतमुद्धृते । यावताऽस्य क्षयः कालः पल्यं व्युत्पत्तिमात्रकृत् ॥४९॥
असङ्ख्येयाब्दकोटीनां समयै रोमखण्डितम् । प्रत्येकं पूर्वकं तत्स्यात्पल्यमुद्धारसंज्ञकम् ॥५०॥

एक संज्ञा-संज्ञा कही गई है, आठ संज्ञा-संज्ञाओंका एक त्रुटिरेणु प्रकट किया गया है ॥३८॥ आठ* त्रुटिरेणुओंका एक त्रसरेणु, आठ त्रसरेणुओंका एक रथरेणु, आठ रथरेणुओंका एक उत्तम भोगभूमिज मनुष्यके बालका अग्रभाग, उत्तमभोगभूमिज मनुष्यके आठ बालाग्रभागोंका एक मध्यमभोग भूमिज मनुष्यका बालाग्र और आठ मध्यमभोगभूमिज मनुष्यके बालाग्रोंका एक जघन्य भोगभूमिज मनुष्यका बालाग्र होता है] जघन्य भोगभूमिज मनुष्योंके आठ बालाग्रोंका एक कर्मभूमिज मनुष्यका बालाग्र होता है, इन आठ बालाग्रोंकी एक लीख, आठ लीखोंका एक जूंआ, आठ जुंओंका एक जौ और आठ जौका एक उत्सेधाङ्गुल होता है। इस उत्सेधाङ्गुलसे जीवोंके शरीरकी ऊँचाई और छोटी वस्तुओंका प्रमाण ग्रहण किया जाता है ॥३९-४१॥ उत्सेधाङ्गुलमें पाँच सौका गुणा करनेपर एक प्रमाणाङ्गुल होता है। यह प्रमाणाङ्गुल अवसर्पिणीके प्रथम चक्रवर्तीका अङ्गुल है ॥४२॥ इस अङ्गुलसे बड़े-बड़े द्वीप समुद्र आदिकी ऊँचाई चौड़ाई आदि यथायोग्य जानी जाती है ॥४३॥ अपने-अपने समयमें मनुष्योंका जो अङ्गुल है वह स्वाङ्गुल माना गया है इसके द्वारा छत्र, कलश तथा नगर आदिका विस्तार नापा जाता है ॥४४॥ छह अङ्गुलोंका एक पाद होता है, दो पादोंकी एक वितस्ति, दो वितस्तियोंका एक हाथ और दो हाथोंका एक किष्कु होता है ॥४५॥ दो किष्कुओंका एक दण्ड, धनुष अथवा नाड़ी होती है, आठ हजार दण्डोंका एक योजन कहा गया है ॥४६॥

एक ऐसा क्षेत्र (गर्त)बनाया जाय जो एक प्रमाण योजन बराबर लम्बा-चौड़ा तथा गहरा हो, जिसकी परिधि इससे कुछ अधिक तिगुनी हो तथा जिसके चारों तरफ दीवालें बनाई गई हों ॥४७॥ इस क्षेत्रको एकसे लेकर सात दिन तककी भेड़के बालोंके ऐसे टुकड़ोंसे जिनके कि दूसरे टुकड़े न हो सकें ऊपर तक कूट-कूट कर भरा जाय। इस गर्तको व्यवहारपल्य कहते हैं ॥४८॥ सौ-सौ वर्षके बाद एक-एक बालका टुकड़ा उस गर्तसे निकालनेपर जितने समयमें वह खाली हो जाय उतने समयको व्यवहारपल्योपम काल कहते हैं ॥४९॥ तदनन्तर उन्हीं बालके टुकड़ोंमें प्रत्येक टुकड़ेके, असंख्यात करोड़ वर्षोंमें जितने समय हैं उतने टुकड़े बुद्धिसे कल्पित टुकड़ोंसे पूर्वोक्त प्रमाणवाले गर्तको भरा जाय। इस भरे हुए गर्तको उद्धारपल्य कहते हैं और

---

१. रोमखण्डितैः म०, ग० ।

* कोष्ठकान्तर्गत भावको सूचित करनेवाले श्लोक सम्पादनके लिए प्राप्त चारों हस्तलिखित तथा एक मुद्रित पाँचों प्रतियोंमें नहीं है परन्तु है आवश्यक। इसलिए उनका प्रासङ्गिक अनुवाद दिया गया है।

कोटीकोट्यो दशामीषां[1] पल्यानां सागरोपमा । ताभ्यामर्द्धतृतीयाभ्यां द्वीपसागरसम्मितिः[2] ॥५१॥
[3]सोऽध्वा द्विगुणितो रज्जुस्तनुवातोभयान्तभाक् । निष्पद्यते[4] त्रयो लोकाः प्रमीयन्ते बुधैस्तथा ॥५२॥
असङ्ख्यवर्षकोटीनां समयै रोमखण्डितैः । उद्धारपल्यमद्धाख्यं स्यात्कालोऽद्धाभिधीयते ॥५३॥
कालः पल्योपमाख्योऽसौ समयं समयं प्रति । क्षीयमाणः प्रमाणार्थमायुषो विनियुज्यते ॥५४॥
कोटीकोट्यो दशामीषां जायते सागरोपमा । सैषा संसारिणां चाभिरायुःकर्मभवस्थितिः ॥५५॥
कोटीकोट्यो दशैतासां प्रत्येकमवसर्पिणी । उत्सर्पिणी च कालाः षट् प्रत्येकमनयोः समाः ॥५६॥
अवसर्पति वस्तूनां शक्तिर्यत्र क्रमेण सा । प्रोक्ताऽवसर्पिणी सार्था साऽन्यथोत्सर्पिणी तथा ॥५७॥
सुषमासुषमाऽऽद्या स्यात् द्वितीया सुषमा समा । दुःषमासुषमाऽऽद्या स्यात् सुषमादुःषमादिका ॥५८॥
दुःषमा चावसर्पिण्यामतिदुःषमया सह । ता एव प्रतिलोमाः स्युरुत्सर्पिण्यां च षट् समा ॥५९॥
कोटीकोटयश्चतस्रश्च तिस्रो द्वे च यथाक्रमम् । आदितस्तिसृणां तासां प्रमाणं सागरोपमाः ॥६०॥
द्वाचत्वारिंशदब्दानां सहस्रैः परिवर्जिता । कोटीकोटीसमुद्राणां तुरीयस्य यथाक्रमम् ॥६१॥
[5]तानि वर्षसहस्राणि विभक्तानि समं भवेत् । पञ्चमस्य च षष्ठस्य प्रमाणं कालवस्तुनः ॥६२॥
कल्पस्ते[6] द्वे तथार्थानां वृद्धिहानिमती स्थितिः । भरतैरावतक्षेत्रेष्वन्येष्वपि ततोऽन्यथा ॥६३॥

एक-एक समयमें एक-एक टुकड़ा निकालनेपर जितने समयमें वह गर्त खाली हो जाय उतने समयको उद्धारपल्योपम काल कहते हैं ॥५०॥ दश कोड़ाकोड़ी उद्धारपल्योंका एक उद्धार सागर होता है और ढाई उद्धार सागरोपम काल अथवा पच्चीस कोड़ाकोड़ी उद्धारपल्योंके बालोंके जितने टुकड़े हों उतने द्वीपसागरोंका प्रमाण है ॥५१॥ द्वीपसागरोंका जो अध्वा अर्थात् एक दिशाका विस्तार है उसे दुगुना करनेपर रज्जुका प्रमाण निकलता है। यह रज्जु दोनों दिशाओंके तनुवातवलयके अन्त भागको स्पर्श करती है। विद्वान् लोग इसके द्वारा तीन लोकोंका प्रमाण निकालते हैं ॥५२॥ उद्धार पल्यके रोम खण्डोंके असंख्यात करोड़ वर्षोंके समय बराबर बुद्धि द्वारा खण्ड कल्पित किये जावें और उनसे पूर्वोक्त गर्तको भरा जाय। इस गर्तको अद्धा पल्य कहते हैं। उनमें से एक-एक समयके बाद एक-एक टुकड़ाके निकालनेपर जितने समयमें वह खाली हो जाय उतने समयको अद्धापल्योपम काल कहते हैं। आयुका प्रमाण बतलानेके लिए इसका उपयोग होता है ॥५३-५४॥ दश कोड़ाकोड़ी अद्धापल्योंका एक अद्धासागर होता है, इसके द्वारा संसारी जीवोंकी आयु, कर्म तथा संसारकी स्थिति जानी जाती है ॥५५॥ दश कोड़ाकोड़ी अद्धासागरोंकी एक अवसर्पिणी तथा उतने ही सागरोंकी एक उत्सर्पिणी होती है। इनमें प्रत्येकके छह-छह भेद हैं ॥५६॥ जिसमें वस्तुओंकी शक्ति क्रमसे घटती जाती है उसे अवसर्पिणी और जिसमें बढ़ती जाती है उसे उत्सर्पिणी कहते हैं। इनका अवसर्पिणी और उत्सर्पिणी नाम सार्थक है ॥५७॥ १ सुषमासुषमा, २ सुषमा, ३ सुषमादुःषमा, ४ दुःषमासुषमा, ५ दुःषमा और ६ दुःषमादुःषमा ये अवसर्पिणीके छह भेद हैं और इससे उल्टे अर्थात् १ दुःषमा-दुःषमा, २ दुःषमा, ३ सुषमादुःषमा, ४ दुःषमासुषमा, ५ सुषमा और ६ सुषमासुषमा ये छह उत्सर्पिणीके भेद हैं ॥५८-५९॥ प्रारम्भके तीन कालोंका प्रमाण क्रमसे चार कोड़ाकोड़ी सागर, तीन कोड़ाकोड़ी सागर और दो कोड़ाकोड़ी सागर है ॥६०॥ चौथे कालका प्रमाण बयालीस हजार वर्ष कम एक कोड़ाकोड़ी सागर है और पाँचवें तथा छठवें कालका प्रमाण इक्कीस-इक्कीस हजार वर्ष प्रमाण है ॥६१-६२॥ जिस प्रकार दश कोड़ाकोड़ी सागरका अवसर्पिणी काल है उसी प्रकार दश कोड़ाकोड़ी सागरका उत्सर्पिणी काल है। अवसर्पिणी और उत्सर्पिणी दोनों

१. दशैतेषां क० । २. द्वीपसागरप्रमाणम् । ३. द्वीपसागराणामेकस्मिन् दिशि मर्यादामार्गः अध्वा कथ्यते । ४. निष्पद्यन्ते म०, ग०, ङ०, क० । ५. द्वाचत्वारिंशद्वर्षसहस्राणि विभक्तानि द्विधाकृतानि अर्थात् एकविंशतिवर्षसहस्राणि । ६. उत्सर्पिण्यवसर्पिण्यौ ।

आद्येषु त्रिषु कालेषु कल्पवृक्षविभूषिता । भोगभूमिरियं भूमिर्भोगभूमिस्तु भारती ॥६४॥
युग्मधर्मभुजो भूत्वा तेष्वाद्यो जगत्प्रजाः । षट्चतुर्द्विसहस्राणि धनूंषि वपुषोच्छ्रिताः ॥६५॥
आयुस्त्रिद्व्येकपल्यैस्तु तुल्यं तासां यथाक्रमम् । देवोत्तरकुरुक्षेत्रहरिहैमवतेष्विव ॥६६॥
प्रोद्यदादित्यवर्णाभाः पूर्णचन्द्रसमप्रभाः । प्रियङ्गुश्यामवर्णाश्च तेषु स्त्रीपुरुषास्त्रिषु ॥६७॥
[1]पृष्ठकाण्डकसङ्ख्यानं षट्पञ्चाशं शतद्वयम् । अष्टाविंशं शतं तेषां चतुःषष्टिर्यथाक्रमम् ॥६८॥
दिव्यं बदरमात्राक्षमात्रं च भोजनम् । तथाऽमलकमात्रं च चतुस्त्रिद्विदिनैस्त्रिषु ॥६९॥
तत्त्रिकालनियोगेन धरित्रीयं नियन्त्रिता । त्रिभेदानां तदा धत्ते नित्यभोगभुवां स्थितिम् ॥७०॥
रत्नप्रभा यथा भाति पृथिवीयमवस्थितैः । एषा तथा स्फुरद्रत्नपटलैरुपरिस्थितैः ॥७१॥
इन्द्रनीलादिभिर्नीलैः कृष्णैर्जात्यञ्जनादिभिः । पद्मरागादिकैः रक्तैः पीतैर्हेमादिभिः परैः ॥७२॥
श्वेतैर्मुक्तादिभिर्भूमिर्मयूखाक्रान्तदिङ्मुखैः । पञ्चवर्णैश्चिता रत्नैः स्वर्गभूरिव शोभते ॥७३॥
चन्द्रकान्तशिलाऽऽस्योर्वी विद्रुमाधरपल्लवा । ललनेव तदाऽऽभाति रत्नकाञ्चनकञ्चुका ॥७४॥
चन्द्रकान्तांशवः शीताः सूर्यकान्तांशवोऽन्यथा । विश्लिष्यन्त्यत्र नाश्लिष्टाः शीतोष्णव्यथिता इव ॥७५॥

मिलकर कल्प काल कहलाते हैं। इन दोनों कालोंके समय भरत ऐरावत क्षेत्रमें पदार्थोंकी स्थिति हानि और वृद्धिको लिये हुए होती है। इन दो क्षेत्रोंके सिवाय अन्य क्षेत्रोंमें पदार्थोंकी स्थिति हानिवृद्धिसे रहित—अवस्थित है ॥६३॥ प्रारम्भके तीन कालोंमें भरत क्षेत्रकी यह भूमि भोग-भूमि कहलाती है जो कि यथार्थमें नाना प्रकारके भोगोंकी भूमि—स्थान भी है ॥६४॥ उन तीनों कालोंके प्रारम्भमें मनुष्य क्रमसे छह हजार, चार हजार और दो हजार धनुष ऊँचे रहते थे तथा स्त्री-पुरुषोंकी उत्पत्ति युगल रूपमें—साथ ही साथ होती थी ॥६५॥ उस समय उनकी आयु देवकुरु, उत्तरकुरु, हरिवर्ष तथा हैमवत क्षेत्रके मनुष्योंके समान क्रमसे तीन पल्य, दो पल्य और एक पल्यके तुल्य होती थी ॥६६॥ उन तीन कालोंमें स्त्री-पुरुष क्रमसे उदित होते हुए सूर्यके समान, पूर्णचन्द्रके समान और प्रियङ्गु पुष्पके समान आभावाले होते थे ॥६७॥ उनकी पीठकी हड्डियोंकी संख्या पहले कालमें दो सौ छप्पन, दूसरे कालमें एक सौ अट्ठाईस और तीसरे कालमें चौंसठ थी ॥६८॥ उनका पहले कालमें चार दिनके अन्तरसे बेरके बराबर, दूसरे कालमें दो दिनके अन्तरसे बहेड़ाके बराबर और तीसरे कालमें दो दिनके अन्तरसे आँवलेके बराबर दिव्य—कल्पवृक्षोत्पन्न आहार होता था ॥६९॥ उन तीन कालोंके नियोगसे नियन्त्रित यह भारतवर्षकी भूमि उस समय क्रमशः तीन प्रकारकी स्थायी भोगभूमियोंकी रीतिको ग्रहण करती थी अर्थात् उस समय यहाँकी व्यवस्था शाश्वती उत्तम, मध्यम और जघन्य भोगभूमियोंके समान थी ॥७०॥ जिस प्रकार रत्नप्रभा पृथिवी, स्थायी लगे हुए रत्नोंके पटलोंसे सुशोभित है उसी प्रकार भरत क्षेत्रकी यह भूमि भी उस समय ऊपर स्थित देदीप्यमान रत्नोंके पटलोंसे सुशोभित होती है ॥७१॥ अपनी किरणोंसे दिशाओंको व्याप्त करनेवाले इन्द्रनील आदि नीलमणि, जात्यञ्जन आदि कृष्णमणि, पद्मराग आदि लालमणि, हेम आदि पीले मणि और मुक्ता आदि सफेद मणि इस प्रकार पाँच वर्णके मणियोंसे व्याप्त हुई यह भूमि उस समय स्वर्गभूमिके समान सुशोभित हो रही थी ॥७२-७३॥ चन्द्रकान्तमणि जिसका मुख था, मूँगा जिसके ओठ थे तथा रत्न और स्वर्ण जिसकी चोली थे ऐसी यह भूमि उस समय किसी स्त्रीके समान सुशोभित होती थी ॥७४॥ चन्द्र-कान्त मणिकी किरणें शीतल होती हैं और सूर्यकान्त मणिकी उष्ण। परन्तु यहाँ दोनों ही एक दूसरेसे मिलकर अलग-अलग नहीं होती थीं जिससे ऐसा जान पड़ता था मानो चन्द्रकान्तकी किरणें ठण्डसे पीड़ित थीं इसलिए सूर्यकान्तकी उष्ण किरणोंको नहीं छोड़ना चाहती थीं और

---

१. पृष्ठास्थिचयानां संख्या एतेन पदेन वेदितव्या।

परस्परकराश्लेषरागमूर्च्छितमूर्तिभिः । मणिजातिविशेषैर्भूर्भाति प्रेमवशैरिव ॥७६॥
पञ्चवर्णसुखस्पर्शसुगन्धरसशब्दकैः । संच्छन्ना राजते क्षोणी तृणैश्च चतुरङ्गुलैः ॥७७॥
पूर्णैर्दधिमधुक्षीरघृतेक्षुरससज्जलैः । रत्नरोधोभिरत्यर्थमभाद् दिव्यवापीसरोवरैः ॥७८॥
नानावर्णमणिच्छन्नैः सौवर्णैः प्राणिसौख्यदैः । रम्यैः क्षोणीधरैः क्षोणी भ्राजते नितरां सदा ॥७९॥
ज्योतिर्गृहप्रदीपाङ्गैस्तूर्यभोजनभाजनैः । वस्त्रमाल्याङ्गभूषाङ्गैर्मद्याङ्गैश्च द्रुमैरभात् ॥८०॥
ज्योतिरङ्गद्रुमा ज्योतिश्छन्नचन्द्रार्कमण्डलाः । अहोरात्रकृतं भेदं भिन्दन्तो भान्ति सन्ततम् ॥८१॥
सोद्यानभूमयश्चित्राः प्रासादाः बहुभूमयः । गृहाङ्गद्रुमखण्डोत्था मण्डयन्ति नभोऽङ्गणम् ॥८२॥
विशालायतशाखाभिः पद्मकुड्मलपल्लवान् । धारयन्ति प्रदीपाभान् प्रदीपाङ्गमहीरुहाः ॥८३॥
चतुर्विधं शुभं वाद्यं ततं च विततं घनम् । सुषिरं च सृजन्त्यत्र तूर्याङ्गद्रुमजातयः ॥८४॥
षड्रसान्यतिमृष्टानि चतुर्भेदानि भोगिनाम् । भोजनाङ्गद्रुमा नानाभोजनानि सृजन्ति ते ॥८५॥
पात्राणि स्थालकं चोलसौवर्णादीन्यनेकशः । भाजनानि विचित्राणि भाजनाङ्गाः सृजन्त्यलम् ॥८६॥
पट्टचीनदुकूलानि वस्त्राणि विविधानि वै । बिभ्राणाः स्कन्धशाखासु भान्ति वस्त्राङ्गपादपाः ॥८७॥

सूर्यकान्तकी किरणें गर्मीसे पीड़ित हैं इसलिए चन्द्रकान्तकी शीतल किरणोंको नहीं छोड़ना चाहती थीं ॥७५॥ जिस प्रकार प्रेमके वशीभूत हुए मनुष्य परस्पर कराश्लेष अर्थात् हाथोंका आलिङ्गन करते हैं और राग अर्थात् प्रेमसे उनके शरीर मूर्च्छित रहते हैं, उसी प्रकार यहाँके नाना प्रकारके मणि भी परस्पर कराश्लेष अर्थात् किरणोंका आलिङ्गन करते हैं और राग अर्थात् रङ्गसे उनकी आकृति मूर्च्छित—वृद्धिंगत होती रहती है। इस प्रकार जो प्रेमके वशीभूतके समान जान पड़ते थे ऐसे मणियोंसे यह भूमि अत्यधिक सुशोभित हो रही थी ॥७६॥ जिनका वर्ण पाँच प्रकारका था, स्पर्श सुखकारी था तथा गन्ध, रस और शब्द जिनके उत्तम थे ऐसे चार अंगुल प्रमाण तृणोंसे ढकी हुई यहाँकी भूमि सुशोभित हो रही थी ॥७७॥ जो दही, मधु, दूध, घी और ईखके समान स्वादवाले उत्तम जलसे भरे हुए थे तथा जिनके तट रत्ननिर्मित थे ऐसी सुन्दर-सुन्दर बावड़ियों और सरोवरोंसे वह भूमि अत्यधिक सुशोभित थी ॥७८॥ रङ्ग-विरङ्गे मणियोंसे आच्छादित एवं प्राणियोंको सुख देनेवाले सुवर्णमय सुन्दर पर्वतोंसे यह भूमि सदा अत्यधिक सुशोभित रहती थी ॥७९॥ १ ज्योतिरङ्ग, २ गृहाङ्ग, ३ प्रदीपाङ्ग, ४ तूर्याङ्ग, ५ भोजनाङ्ग, ६ भाजनाङ्ग, ७ वस्त्राङ्ग, ८ माल्याङ्ग, ९ भूषणाङ्ग और १० मद्याङ्ग जातिके कल्पवृक्षोंसे वह भूमि सदा सुशोभित रहती थी ॥८०॥ जिन्होंने अपनी कान्तिसे चन्द्रमा और सूर्यके मण्डलको आच्छादित कर रखा था ऐसे ज्योतिरङ्ग जातिके कल्पवृक्ष दिन-रातका भेद दूर करते हुए सदा सुशोभित रहते थे ॥८१॥ जो बाग-बगीचोंसे सहित थे तथा जिनमें अनेक खण्ड थे ऐसे गृहाङ्ग जातिके कल्पवृक्षोंसे उत्पन्न हुए नाना प्रकारके वृक्ष आकाश रूपी आँगनको सुशोभित कर रहे थे ॥८२॥ प्रदीपाङ्ग जातिके कल्पवृक्ष अपनी लम्बी-चौड़ी शाखाओंसे दीपकके समान आभावाले कमलकी बोड़ियोंके आकार नये-नये पत्तोंको धारण कर रहे थे ॥८३॥ यहाँ जो तूर्याङ्ग जातिके कल्पवृक्ष थे वे तत, वितत, घन और सुषिरके भेदसे चार प्रकारके शुभ बाजोंको सदा उत्पन्न करते रहते थे ॥८४॥ भोजनाङ्ग जातिके कल्पवृक्ष भोगी मनुष्योंके लिए छह प्रकारके रसोंसे परिपूर्ण, अत्यन्त स्वादिष्ट तथा अन्न, पान, खाद्य और लेह्यके भेदसे चार भेदवाले नाना प्रकारके भोजनको उत्पन्न करते रहते थे ॥८५॥ भाजनाङ्ग जातिके कल्पवृक्ष मणि एवं सुवर्णादिसे निर्मित थाली, कटोरा आदि अनेक प्रकारके बर्तन उत्पन्न करते थे ॥८६॥ वस्त्राङ्ग जातिके कल्पवृक्ष अपनी पीड तथा शाखाओंपर पाट, चीनी तथा रेशम आदिके बने हुए नाना प्रकारके वस्त्र धारण करते हुए

१. रत्नभासुराः क० ।

मालतीमल्लिकाद्युत्थकुसुमग्रथितानि तु । भान्ति माल्यानि बिभ्राणा माल्याङ्गधरणीरुहाः ॥८८॥

हारकुण्डलकेयूरकटिसूत्रादिभिश्चिताः । भूषणैर्भूषिताङ्गाश्च भान्ति स्त्रीपुरुषोचितैः ॥८९॥

मद्यभेदाः प्रसन्नाद्या मदशक्तेर्विधायकाः । सम्पाद्यन्ते नरस्त्रीणां हृद्या मद्याङ्गपादपैः ॥९०॥

दशधाकल्पवृक्षोत्थं भोगं युग्मानि भुञ्जते । दशाङ्गभोगचक्रेशभोगतोऽभ्यधिकं तदा ॥९१॥

तदा स्त्रीपुंसयुग्मानां गर्भान्निर्लुठितात्मनाम् । दिनानि सप्त गच्छन्ति निजाङ्गुष्ठावलेहनैः ॥९२॥

रंगतामपि सप्तैव सप्तास्थिरपराक्रमैः । स्थिरैश्च सप्त तैः सप्त कलासु च गुणेषु च ॥९३॥

कालेन तावता तेषां प्राप्तयौवनसम्पदाम् । सम्यक्त्वग्रहणेऽपि स्याद् योग्यता सप्तभिर्दिनैः ॥९४॥

स्त्रीपुंसलक्षणैः पूर्णा विशुद्धेन्द्रियबुद्धयः । कलागुणविदग्धास्ता रमन्ते नीरुजा प्रजाः ॥९५॥

नरा देवकुमाराभा नार्यो देवाङ्गनोपमाः । वर्णगन्धरसस्पर्शशब्दवेषमनोरमाः ॥९६॥

श्रोत्रं गीतरवे रूपे चक्षुर्घ्राणं सुसौरभे । जिह्वा सुखरसास्वादे सुस्पर्शे स्पर्शनं तनोः ॥९७॥

अन्योन्यस्य तदासक्तं दम्पतीनां निरन्तरम् । स्तोकमपि न सन्तृप्तं मनोऽधिष्ठितमिन्द्रियम् ॥९८॥

मिथुनानि यथा नृणां रमन्ते प्रेमनिर्भरम् । तथा कल्पद्रुमाहारैस्तिरश्चां तृप्तचेतसाम् ॥९९॥

क्वचित्सैंहं क्वचिन्नैभं क्वचिदौष्ट्रं च शौकरम् । क्वचित् क्रीडन्ति वैयाघ्रं मिथुनं मदमन्थरम् ॥१००॥

गवाश्वमहिषादीनां मिथुनानि मिथस्तदा । मर्त्यायुःप्रमितायूंषि रंरम्यन्ते निजेच्छया ॥१०१॥

आर्यामाह नरो नारीमार्यं नारी नरं निजम् । भोगभूमिनरस्त्रीणां नाम साधारणं हि तत् ॥१०२॥

उत्तमा जातिरेकैव चातुर्वर्ण्यं न षट्क्रियाः । न स्वस्वामिकृतः पुंसां सम्बन्धो न च लिङ्गिनः॥१०३॥

सुशोभित होते थे ॥८७॥ माल्याङ्ग जातिके कल्पवृक्ष मालती, मल्लिका आदिके ताजे फूलोंसे गुँथी हुई मालाओंको धारण करते हुए सुशोभित हो रहे थे ॥८८॥ भूषणाङ्ग जातिके कल्पवृक्ष स्त्री-पुरुषोंके योग्य हार, कुण्डल, बाजूबन्द तथा मेखला आदि आभूषणोंसे व्याप्त हो सुशोभित थे ॥८९॥ और मद्याङ्ग जातिके कल्पवृक्षोंके द्वारा स्त्री-पुरुषोंके लिए प्रिय तथा उनकी मदशक्तिको उत्पन्न करनेवाले प्रसन्ना आदि नाना प्रकारके मद्य उत्पन्न किये जाते थे ॥९०॥ उस समय वहाँ स्त्री-पुरुषोंके युगल दश प्रकारके कल्पवृक्षोंसे उत्पन्न चक्रवर्तीके दशाङ्ग भोगोंसे भी अधिक भोगोंका उपभोग करते थे ॥९१॥ उस समय गर्भसे उत्पन्न हुए स्त्री-पुरुषों (युगलियों) के सात दिन तो अपना अँगूठा चूसते-चूसते व्यतीत हो जाते थे, तदनन्तर सात दिन रेंगते हुए, सात दिन लड़खड़ाती हुई गतिसे, सात दिन स्थिर गतिसे, सात दिन कला तथा अनेक गुणोंके अभ्यास-से और सात दिन यौवन रूप सम्पदाके प्राप्त करनेमें व्यतीत होते थे । उसके बाद सातवें सप्ताह-में उन्हें सम्यग्दर्शन ग्रहण करनेकी योग्यता आती थी ॥९२-९४॥ स्त्री-पुरुषोंके उत्तमोत्तम लक्षणों-से युक्त, विशुद्ध इन्द्रिय और बुद्धिके धारक, कला और गुणोंमें चतुर एवं रोगोंसे रहित उस समयके लोग आनन्दसे क्रीड़ा करते थे ॥९५॥ वर्ण, गन्ध, रस, स्पर्श और वेषके द्वारा मनको आनन्दित करनेवाले वहाँके लोग देवकुमारोंके समान तथा वहाँकी स्त्रियाँ देवाङ्गनाओंके समान जान पड़ती थीं ॥९६॥ उस समय स्त्री-पुरुषोंके कान परस्परके संगीत शब्दोंमें, चक्षु रूपके देखनेमें, घ्राण सुगन्धिके ग्रहण करनेमें, जिह्वा मुखके रसास्वादमें और स्पर्शन शरीरके उत्तम स्पर्शके ग्रहण करनेमें निरन्तर आसक्त रहते थे । उनके मन तथा इन्द्रियाँ रञ्चमात्र भी सन्तुष्ट नहीं होती थीं ॥९७-९८॥ जिस प्रकार मनुष्योंके जोड़े कल्पवृक्ष सम्बन्धी आहारोंसे सन्तुष्ट हो प्रेमपूर्वक क्रीड़ा करते हैं उसी प्रकार सन्तुष्ट चित्तके धारक तिर्यंचोंके जोड़े भी प्रेमपूर्वक क्रीड़ा करते थे ॥९९॥ उस समय कहीं सिंहोंके युगल, कहीं हाथियोंके युगल, कहीं ऊँटोंके युगल, कहीं शूकरोंके युगल, और कहीं मदसे धीमी चाल चलनेवाले व्याघ्रोंके युगल क्रीड़ा करते थे ॥१००॥ कहीं मनुष्योंके बराबर आयुको धारण करनेवाले गाय, घोड़े और भैंसोंके जोड़े अपनी इच्छानुसार अत्यधिक क्रीड़ा करते थे ॥१०१॥ वह पुरुष स्त्रीको आर्या और स्त्री पुरुषको आर्य कहती थी । यथार्थमें भोग भूमिज स्त्री-पुरुषोंका यह साधारण नाम है ॥१०२॥ उस समय सबकी एक ही उत्तम जाति होती

मध्यस्था एव सर्वत्र न मित्राणि न शत्रवः । प्रकृत्याल्पकषायित्वाद्यान्ति चायुःक्षये दिवम् ॥१०४॥
सुखमृत्युः क्षुतेः पुंसो जृम्भारम्भेण च स्त्रियाः । जन्मबद्धस्य प्रेमस्य युगलस्य सहैव सः ॥१०५॥
अथ ज्ञात्वा गणाधीशः श्रेणिकस्य मनोगतम् । भोगभूमिसमुत्पत्तिनिमित्तमवर्णीदिति ॥१०६॥
कर्मभूमिगता मर्त्याः प्रकृत्याल्पकषायिणः । अत्र ते पात्रदानात् स्युर्भोगभूमिषु मानुषाः ॥१०७॥
सम्यक्त्वज्ञानचारित्रतपःशुद्धिपवित्रिताः । मध्यस्थाः शत्रुमित्रेषु सन्तो हि पात्रमुत्तमम् ॥१०८॥
मध्यमं तु भवेत्पात्रं संयतासंयता जनाः । जघन्यमुदितं पात्रं सम्यग्दृष्टिरसंयतः ॥१०९॥
त्रिविधेऽपि बुधः पात्रे दानं दत्त्वा यथोचितम् । भोगभूमिसुखं दिव्यं भुङ्क्ते भूत्वा तु मानुषः ॥११०॥
सुक्षेत्रे विधिवत्क्षिप्तं बीजमल्पमपि व्रजेत् । वृद्धिं यथा तथा पात्रे दानमाहारपूर्वकम् ॥१११॥
शाल्यीक्षुक्षेत्रनिक्षिप्तं यथा मिष्टं पयो भवेत् । धेनुभिश्च यथा पीतं क्षीरत्वं प्रतिपद्यते ॥११२॥
तथैवाल्परसास्वादमन्नपानौषधादिकम् । पात्रदत्तं परत्र स्यादमृतास्वादमक्षयम् ॥११३॥
निवृत्ताः स्थूलहिंसादेर्मिथ्यादृग्ज्ञानवृत्तयः । कुपात्रमिति विज्ञेयमपात्रमनिवृत्तयः ॥११४॥
कुपात्रदानतो भूत्वा तिर्यञ्चो भोगभूमिषु । सम्भुञ्जतेऽन्तरं द्वीपं कुमानुषकुलेषु वा ॥११५॥
असत्क्षेत्रे यथा क्षिप्तं बीजमल्पफलं फलेत् । कुपात्रेऽपि तथा दत्तं दानं दात्रे कुभोगभाक् ॥११६॥
ऊषरक्षेत्रनिक्षिप्तशालिर्नश्यति मूलतः । यथाऽत्र विफलं दानं कुपात्रपतितं तथा ॥११७॥

है, वहाँ न ब्राह्मणादि चार वर्ण होते हैं व असि, मषी आदि छह कर्म होते हैं, न सेवक और स्वामीका सम्बन्ध होता है और न वेषधारी ही होते हैं ॥१०३॥ वहाँके मनुष्य सब विषयोंमें मध्यस्थ रहते हैं, वहाँ न मित्र होते हैं और न शत्रु । एवं स्वभावसे ही अल्पकषायी होनेके कारण आयु समाप्त होनेपर सब नियमसे देव पर्यायको ही प्राप्त होते हैं ॥१०४॥ जन्मसे ही जिसका प्रेमभाव परस्परमें निबद्ध रहता था ऐसे पुरुषकी मृत्यु छींक आनेसे तथा स्त्रीकी मृत्यु जिमहाई लेने मात्रसे सुखपूर्वक हो जाती थी ॥१०५॥

अथानन्तर गणधर देव श्रेणिकका मनोभिप्राय जानकर भोगभूमिमें उत्पन्न होनेके कारण इस प्रकार कहने लगे ॥१०६॥ कर्म-भूमिके जो मनुष्य स्वभावसे ही मन्दकषाय होते हैं वे पात्र-दानके प्रभावसे भोगभूमिमें मनुष्य होते हैं ॥१०७॥ जो सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक् चारित्र और सम्यक् तपकी शुद्धिसे पवित्र हैं तथा शत्रु और मित्रोंपर मध्यस्थ भाव रखते हैं ऐसे साधु उत्तम पात्र कहलाते हैं ॥१०८॥ संयमासंयमको धारण करनेवाले श्रावक मध्यम पात्र हैं और अविरत सम्यग्दृष्टि जघन्य पात्र कहे जाते हैं ॥१०९॥ उक्त तीनों प्रकारके पात्रोंमें यथायोग्य दान देकर बुद्धिमान् मनुष्य भोगभूमिमें आर्य होकर वहाँका दिव्य सुख भोगता है ॥११०॥ जिस प्रकार उत्तम क्षेत्रमें विधि-पूर्वक बोया हुआ छोटा भी बीज वृद्धिको प्राप्त होता है उसी प्रकार पात्रके लिए दिया हुआ आहार आदि दान भी वृद्धिको प्राप्त होता है ॥१११॥ जिस प्रकार धान और ईखके खेतमें पड़ा हुआ जल मीठा हो जाता है और गायोंके द्वारा पीया हुआ पानी दूध पर्यायको प्राप्त हो जाता है उसी प्रकार पात्रके लिए दिया हुआ अल्प रसवाला अन्न, पान तथा औष-ध्यादिकका दान परभवमें अविनाशी तथा अमृतके समान स्वादसे युक्त हो जाता है ॥११२-११३॥ जो स्थूल हिंसा आदिसे निवृत्त हैं परन्तु मिथ्यादृष्टि, मिथ्याज्ञान और मिथ्या-चारित्रके धारक हैं वे कुपात्र कहलाते हैं और जो स्थूल हिंसा आदिसे भी निवृत्त नहीं हैं उन्हें अपात्र जानना चाहिए ॥११४॥ कुपात्र दानके प्रभावसे मनुष्य, भोगभूमियोंमें तिर्यञ्च होते हैं अथवा कुमानुष कुलोंमें उत्पन्न होकर अन्तर द्वीपोंका उपभोग करते हैं ॥११५॥ जिस प्रकार खराब खेतमें बोया हुआ बीज अल्प फलवाला होता है उसी प्रकार कुपात्रके लिए दिया हुआ दान भी दाताको कुभोग प्राप्त करानेवाला होता है ॥११६॥ जिस प्रकार ऊषर क्षेत्रमें बोया हुआ धान समूल नष्ट हो जाता है, उसी प्रकार कुपात्रके लिए दिया हुआ दान भी निष्फल हो जाता है ॥११७॥

[1]अम्बु निम्बद्रुमे रौद्रं कोद्रवे मदकृद् यथा । विषं व्यालमुखे क्षीरमपात्रे पतितं तथा ॥११८॥
सुपात्रे सुफलं दानं कुपात्रे कुफलं भवेत् । अपात्रे दुःखदं तस्मात्पात्रेभ्यः प्रतिपादयेत् ॥११९॥
यात्युपाधिवशाद् भेदं निर्मलः स्फटिकोपलः । यथा तथा च दानार्थं प्रतिग्राहकभेदतः ॥१२०॥
सम्यग्दृष्टिः पुनः पात्रे स्वपरानुग्रहेच्छया । दानं दत्वा विशुद्धात्मा स्वर्गमेव गृही व्रजेत् ॥१२१॥
अथ कालद्वयेऽतीते क्रमेण सुखकारणे । पल्याष्टभागशेषे च तृतीये समवस्थिते ॥१२२॥
क्रमेण क्षीयमाणेषु कल्पवृक्षेषु भूरिषु । क्षेत्रे कुलकरोत्पत्तिं शृणु श्रेणिक ! साम्प्रतम् ॥१२३॥
गङ्गासिन्धुमहानद्योर्मध्ये दक्षिणभारते । चतुर्दश यथोत्पन्नाः क्रमेण कुलकारिणः ॥१२४॥
प्रतिश्रुतिरभूदाद्यस्तेषां कुलकरप्रभुः । महाप्रभावसम्पन्नः स्वभवस्मरणान्वितः ॥१२५॥
तस्य काले प्रजा दृष्ट्वा पौर्णमास्यां सहैव खे । आकाशगजघण्टाभे द्वे चन्द्रादित्यमण्डले ॥१२६॥
आकस्मिकभयोद्विग्नाः स्वमहोत्पातशङ्किताः । प्रजाः सम्भूय पप्रच्छुस्तं प्रभुं शरणागताः ॥१२७॥
नरप्रधान ! कावेतावपूर्वौ गगनान्तयोः । [2]दृश्येते मण्डलाकारावकाण्डे नो भयङ्करौ ॥१२८॥
अहो दुःसहमस्माकमकस्मात् भयमुद्गतम् । किं महाप्रलयः प्राप्तः प्रजानामेव दुस्तरः ॥१२९॥
इति पृष्टः प्रभुः प्राह शुचं मुञ्चत हे प्रजाः । न किञ्चिद् भयमस्माकं स्वस्था भवत कथ्यते ॥१३०॥
प्रभामण्डलसंवीतमेतदादित्यमण्डलम् । प्रतीच्यां वीक्ष्यते भद्रा ! प्राच्यां भोरचन्द्रमण्डलम् ॥१३१॥

जिस प्रकार नीमके वृक्षमें पड़ा हुआ पानी कड़ुआ हो जाता है, कोदोंमें दिया हुआ पानी मद-कारक हो जाता है और सर्पके मुखमें पड़ा हुआ दूध विष हो जाता है, उसी प्रकार अपात्रके लिए दिया हुआ दान विपरीत फलको करनेवाला हो जाता है ॥११८॥ चूँकि सुपात्रके लिए दिया हुआ दान सुफलको देनेवाला है, कुपात्रके लिए दिया हुआ दान कुफलको देनेवाला है और अपात्रके लिए दिया हुआ दान दुःख देनेवाला है अतः पात्रके लिए ही दान देना चाहिए ॥११९॥ जिस प्रकार निर्मल स्फटिकमणि उपाधिके वशसे भेदको प्राप्त होता है उसी प्रकार पात्रके भेद-से दानका फल भी भेदको प्राप्त हो जाता है ॥१२०॥ निर्मल अभिप्रायको धारण करनेवाला सम्यग्दृष्टि गृहस्थ यदि पात्रके लिए दान देता है तो वह नियमसे स्वर्ग ही जाता है ॥१२१॥

अथानन्तर सुखके कारणभूत जब प्रारम्भके दो काल बीत गये और पल्यके आठवें भाग बराबर तीसरा काल बाकी रह गया तथा कल्पवृक्ष जो पहले अधिक मात्रामें थे क्रम-क्रमसे कम होने लगे तब इस क्षेत्रमें कुलकरोंकी उत्पत्ति हुई। हे श्रेणिक ! मैं इस समय उन्हीं कुल-करोंकी उत्पत्ति कहता हूँ तू श्रवण कर ॥१२२-१२३॥ गङ्गा और सिन्धु महानदियोंके बीच दक्षिण भरत क्षेत्रमें क्रमसे चौदह कुलकर उत्पन्न हुए थे ॥१२४॥ उन कुलकरोंमें पहला कुलकर प्रतिश्रुति था। वह महा प्रभावसे सम्पन्न था तथा अपने पूर्वभवके स्मरणसे सहित था ॥१२५॥ उसके समय प्रजाके लोग पौर्णमासीके दिन आकाशमें एक साथ, आकाशरूपी हाथीके दो घंटाओंके समान आभावाले चन्द्र और सूर्य-मण्डलको देखकर अपने ऊपर आनेवाले किसी महान् उत्पातसे शङ्कित हो आकस्मिक भयसे उद्विग्न हो उठे तथा सब एकत्रित हो प्रतिश्रुति कुलकरकी शरणमें जाकर उससे पूछने लगे ॥१२६-१२७॥ कि हे नररत्न ! आकाशके दोनों छोरोंपर, मण्डलाकार तथा असमयमें हम लोगोंको भय उत्पन्न करनेवाले ये दो कौन अपूर्व पदार्थ दीख रहे हैं ? ॥१२८॥ अहो ! हम लोगोंके लिए यह अकस्मात् ही दुःसह भय प्राप्त हुआ है। क्या यह प्रजाके लिए दुस्तर महाप्रलय ही आ पहुँचा है ? ॥१२९॥ इस प्रकार पूछे जानेपर स्वामी प्रतिश्रुतिने कहा कि हे प्रजाजनो ! भय छोड़ो, हमारे लिए कुछ भी भय प्राप्त नहीं हुआ है। आप लोग स्वस्थ रहिए। ये जो दिखाई दे रहे हैं मैं उनका कथन करता हूँ ॥१३०॥ हे भद्रपुरुषो ! यह पश्चिममें प्रभाके समूहसे व्याप्त सूर्य-मण्डल

---

१. अम्बु निम्बद्रुमे क०, ख० । २. दृश्यते म० ।

ज्योतिश्चक्राधिपावेतौ सूर्याचन्द्रमसौ स्थितौ[1] । मेरुप्रदक्षिणौ[2] नित्यं भ्रमन्तौ भ्रमणात्मकौ ॥१३२॥
चतुर्विधेषु देवेषु ज्योतिर्देवकदम्बकम् । खे करोत्यनयोर्नित्यमनुभ्रमणमीशयोः ॥१३३॥
ज्योतिरङ्गमहावृक्षप्रभाच्छादितविग्रहौ । प्रागन्यत्र विदेहेभ्यो न गतौ दृष्टिगोचरम् ॥१३४॥
तेजोहीनेऽधुना लोके ज्योतिरङ्गप्रभाक्षये । जिगीषयेव चन्द्रार्कौ स्थितौ प्रकटविग्रहौ ॥१३५॥
अहोरात्रादिको भेदो भवत्यर्कवशादिह । अथुनेन्दुवशाद् व्यक्तिः पक्षयोः शुक्लकृष्णयोः ॥१३६॥
शीतदीधितिरस्ताभो घर्मदीधितिना दिवा । न स्पष्टः स्पष्टतामेति ज्योतिश्चक्रसखो निशि ॥१३७॥
पूर्वजन्मनि युष्माभिर्दृष्टपूर्वाविमौ स्फुटम् । विदेहेषु यतस्तस्मान्नाद्य वोऽपूर्वदर्शनौ ॥१३८॥
दृष्टश्रुतानुभूतस्य वस्तुनः सति दर्शने । माभूदुत्पातशङ्का वो निर्भया भवत प्रजाः ॥१३९॥
कालस्वभावभेदेन स्वभावो भिद्यते[3] ततः । द्रव्यक्षेत्रप्रजावृत्तवैपरीत्यं प्रजायते ॥१४०॥
अव्यवस्थानिवृत्त्यर्थमतः परमतः प्रजाः । हा मा धिक्कारतो भूताः तिस्रो वै दण्डनीतयः ॥१४१॥
मर्यादोल्लङ्घनेच्छस्य कथञ्चित्कालदोषतः । दोषानुरूपमायोज्याः स्वजनस्य परस्य वा ॥१४२॥
नियन्त्रितो जनः सर्वस्तिसृभिर्दण्डनीतिभिः । दृष्टदोषभयत्रस्तो दोषेभ्यो विनिवर्तते ॥१४३॥
रक्षणार्थमनर्थेभ्यः प्रजानामर्थसिद्धये[4] । प्रमाणमिह कर्तव्याः प्रणीता दण्डनीतयः ॥१४४॥
प्रासादेषु यथास्थानं मिथुनान्यकुतोभयम् । अनुस्मृत्यावतिष्ठन्त्वस्मदीयमनुशासनम् ॥१४५॥
[5]इत्युक्ता प्रतिपद्याऽऽशु वचस्तस्य प्रजापतेः । श्रुत्वा तस्थुर्यथास्थानं प्रजातप्रमदाः प्रजाः ॥१४६॥

और यह पूर्व दिशामें चन्द्र-मण्डल दिखाई दे रहा है ॥१३१॥ ये सूर्य और चन्द्रमा समस्त ज्योतिश्चक्रके स्वामी हैं, भ्रमणशील हैं और निरन्तर मेरु पर्वतकी प्रदक्षिणा देते हुए घूमते रहते हैं ॥१३२॥ चार प्रकारके देवोंमें जो ज्योतिषी देवोंका समूह है वह आकाशमें निरन्तर अपने इन दोनों स्वामियोंके पीछे-पीछे भ्रमण करता रहता है ॥१३३॥ पहले इनका आकार ज्योतिरङ्ग जातिके महावृक्षोंकी प्रभासे आच्छादित था इसलिए ये विदेह क्षेत्रको छोड़ अन्यत्र दृष्टिगोचर नहीं थे ॥१३४॥ इस समय लोक, ज्योतिरङ्ग वृक्षोंकी प्रभा क्षीण हो जानेसे तेजरहित हो गया है इसलिए उसे जीतनेकी इच्छासे ही मानो चन्द्रमा और सूर्य अपने शरीरको प्रकटकर स्थित हैं ॥१३५॥ अब पृथिवीपर सूर्यके भेदसे दिन-रातका भेद होगा और चन्द्रमाके द्वारा शुक्ल पक्ष और कृष्ण पक्ष प्रकट होंगे ॥१३६॥ दिनके समय चन्द्रमा सूर्यके द्वारा अस्त जैसा हो जाता है, स्पष्ट नहीं दिखाई देता और रात्रिके समय स्पष्टताको प्राप्त हो जाता है। यह चन्द्रमा समस्त ज्योतिश्चक्रका सखा है ॥१३७॥ तुम लोगोंने पूर्व जन्मके समय विदेह क्षेत्रमें इन्हें अच्छी तरह देखा है इसलिए आज इनका दिखना तुम्हारे लिए अपूर्व नहीं है ॥१३८॥ पहले देखी सुनी और अनुभवमें आई वस्तुका दर्शन होनेपर आप लोगोंको उत्पातकी आशङ्का नहीं होनी चाहिए। हे प्रजाजनो! तुम सब निर्भय होओ—उत्पातका भय छोड़ो ॥१३९॥ कालके स्वभावमें भेद होनेसे पदार्थोंका स्वभाव भिन्न रूप हो जाता है और उसीसे द्रव्य क्षेत्र तथा प्रजाके व्यवहारमें विपरीतता आ जाती है ॥१४०॥ इसलिए हे प्रजाजनो! अब इसके आगे अव्यवस्था दूर करनेके लिए हा, मा और धिक् ये तीन दण्डकी धाराएँ स्थापित की जाती हैं ॥१४१॥ यदि कोई स्वजन या परजन काल दोषसे मर्यादाके लाँघनेकी इच्छा करता है तो उसके साथ दोषोंके अनुरूप उक्त तीन धाराओंका प्रयोग करना चाहिए ॥१४२॥ तीन धाराओंसे नियन्त्रणको प्राप्त हुए समस्त मनुष्य इस भयसे त्रस्त रहते हैं कि हमारा कोई दोष दृष्टिमें न आ जाय। और इसी भयसे वे दोषोंसे दूर हटते रहते हैं ॥१४३॥ अनर्थोंसे बचनेके लिए तथा प्रजाकी भलाईके लिए आप लोगोंको ये निश्चित की हुई दण्डकी धाराएँ स्वीकृत करनी चाहिए ॥१४४॥ हमारी आज्ञाका स्मरणकर अब सब युगल निर्भय हो यथास्थान महलोंमें निवास करें ॥१४५॥ इस प्रकार कहने-

१. स्थितं म० । २. प्रदक्षिणां म० । ३. विद्यते म० । ४. हितसिद्धये । ५. इत्युक्त्वा म० ।

प्रतिश्रुतं वचस्ताभिर्यतस्तस्य गुरोर्यथा । प्रथमं प्रथितस्तस्मात्स पृथिव्यां प्रतिश्रुतिः ॥१४७॥
पल्यस्य दशमं भागं जीवित्वाऽसौ प्रतिश्रुतिः । पुत्रं सन्मतिमुत्पाद्य जीवितान्ते दिवं [1]सृतः ॥१४८॥
स रक्षन् पितृमर्यादां प्रजानां सम्मतो यतः । ततः सन्मतिनामायं कुलकारी कलालयः ॥१४९॥
पल्यस्य शततमं भागं स प्रतिजीव्य निजस्थितिम् । पुत्रं क्षेमङ्कराभिख्यमुत्पाद्य त्रिदिवं गतः ॥१५०॥
प्रजानां च तदा जाताः सिंहव्याघ्रविभीषिकाः[2] । सोऽपि क्षेमं ततः कृत्वा प्राप्तः क्षेमङ्करश्रुतिम् ॥१५१॥
सहस्रभागमाजीव्य पल्यस्यासौ प्रजाप्रभुः[3] । पुत्रं क्षेमन्धराभिख्यं जनयित्वा गतो दिवम् ॥१५२॥
क्षेमन्धरः स मत्वार्यस्थितिं कुलकरो गुरोः । सहस्रभागमाजीव्य पल्यस्य दशसङ्गुणम् ॥१५३॥
सूनुं सीमङ्करं नाम्ना समुत्पाद्य ययौ दिवम् । वृक्षलुब्धप्रजानां च स सीमामकरोत् प्रभुः ॥१५४॥
लक्षभागं स पल्यस्य जीवित्वा स्वर्गगोऽभवत् । सीमन्धरो यथार्थाख्यस्तत्सुतो दशताडितम् ॥१५५॥
तत्पुत्रो वाहनीकृत्य चिक्रीड विपुलद्विपान् । यतस्ख्यातः स भूम्नाऽभूत् नाम्ना विपुलवाहनः ॥१५६॥
कोटीभागं स पल्यस्य जीवित्वा स्वर्गमाश्रितः । चक्षुष्मानिति तत्सूनुरजनिष्ट जनप्रभुः ॥१५७॥
पुत्रचक्षुर्मुखालोकाच्चक्षुर्मत्वा भियाऽभया । आयुष्मत् प्रजया गीतश्चक्षुष्मानित्यसौ प्रभुः ॥१५८॥
कोटीभागं स पल्यस्य दशताडितमीडितः । भुक्त्वा भोगमुदात्तोऽपि[4] [5]स्वरितोऽभूत्स्थितिक्षये ॥१५९॥

पर सब लोगोंने प्रतिश्रुति कुलकरके वचन शीघ्र ही स्वीकृत किये और सब बड़ी प्रसन्नतासे यथा-स्थान महलोंमें रहने लगे ॥१४६॥ जिस प्रकार गुरुके वचन स्वीकृत किये जाते हैं उसी प्रकार प्रजाने चूँकि उसके वचन स्वीकृत किये थे इसलिए वह पृथिवीपर सर्वप्रथम प्रति श्रुति इस नाम-से प्रसिद्ध हुआ था ॥१४७॥ यह प्रतिश्रुति कुलकर, पल्यके दशवें भाग तक जीवित रहकर तथा सन्मति नामके पुत्रको उत्पन्नकर आयुके अन्तमें स्वर्ग गया ॥१४८॥ सन्मति कुलकर पिताकी मर्यादाकी रक्षा करता था, प्रजाको अतिशय मान्य था और अनेक कलाओंका घर था इसलिए सन्मति इस नामसे प्रसिद्ध हुआ था ॥१४९॥ वह सन्मति पल्यके सौवें भाग जीवित रहकर तथा क्षेमङ्कर नामक पुत्रको उत्पन्न कर स्वर्ग गया ॥१५०॥ उसके समयमें प्रजाको सिंह तथा व्याघ्रोंसे भय उत्पन्न होने लगा था उससे उनका कल्याण कर वह क्षेमङ्कर इस नामको प्राप्त हुआ था ॥१५१॥ यह प्रजाका स्वामी पल्यके हजारवें भाग जीवित रहकर तथा क्षेमन्धर नामक पुत्रको उत्पन्न कर स्वर्ग गया ॥१५२॥ वह क्षेमन्धर पिताकी आर्य मर्यादाकी रक्षा करनेवाला था और पल्यके दश हजारवें भाग जीवित रहकर तथा सीमङ्कर नामक पुत्रको उत्पन्नकर स्वर्ग गया। इसके समयमें कल्पवृक्षोंकी संख्या कम हो गई थी इसलिए उनकी लोभी प्रजामें परस्पर कलह होने लगी थी। इसने उनकी सीमा निर्धारित की थी इसलिए यह सीमङ्कर इस सार्थक नामको धारण करता था। यह पल्यके लाखवें भाग जीवित रहकर स्वर्गगामी हुआ और इसके सीमन्धर इस सार्थक नामको धारण करनेवाला पुत्र हुआ। वह पल्यके दश लाखवें भाग जीवित रहकर स्वर्ग गया। इसके विपुलवाहन नामका पुत्र हुआ, यह बड़े-बड़े हाथियोंको वाहन बनाकर उनपर अत्यधिक क्रीड़ा करता था इसलिए विपुलवाहन इस नामका धारी हुआ था ॥१५३-१५६॥ वह पल्यके करोड़वें भाग जीवित रहकर स्वर्ग गया और उसके चक्षुष्मान् नामका पुत्र हुआ ॥१५७॥ पहले माता-पिता, पुत्रका मुख तथा चक्षु देखे विना ही मर जाते थे पर इसके समय पुत्रका मुख और चक्षु देखकर मरने लगे इससे प्रजाको कुछ भय उत्पन्न हुआ परन्तु इसने उन सबके भयको दूर किया इसलिए कुछ अधिक काल तक जीवित रहनेवाली प्रजाने इसे 'चक्षुष्मान्' इस नामसे सम्बोधित किया ॥१५८॥ स्तुतिको प्राप्त हुआ वह चक्षुष्मान् पल्यके दश करोड़वें भाग तक भोग भोगकर आयु समाप्त होनेपर स्वर्ग गया। वह यद्यपि उदात्त=उदात्त नामका स्वर था तो भी

१. स्मृतः म० । २. व्याघ्रादिभीषकाः म० । ३. प्रजां प्रभुः म० । ४. उदात्तो महान् अन्यत्र उदात्तः स्वर उच्यते । ५. स्वर् इतः=स्वर्गं गतः, अन्यत्र स्वरितस्वर उच्यते शब्दच्छलेन ।

तदपत्यं यशस्वीति स्वकालेऽपत्यनामकया । प्रजयायोजयत्प्रायो योजितो [1] यशसाऽरुणा ॥१६०॥
कोटीभागं स पल्यस्य शतसङ्गुणितं प्रभुः । जीवित्वोत्पाद्य सत्पुत्रमभिचन्द्रं दिवं गतः ॥१६१॥
तत्कालेऽपत्यमुत्क्षिप्य प्रजा रमयति स्म यत् । अभिचन्द्रमतः प्राप्तस्तोऽभिचन्द्र इति श्रुतिम् ॥१६२॥
कोटीभागं स पल्यस्य सहस्रगुणितं गुणी । सञ्जीव्योत्पाद्य चन्द्राभं तनयं प्रययौ दिवम् ॥१६३॥
कोटीभागं सहस्रं तु तस्यायुर्दशसङ्गुणम् । पल्यस्य मरुदेवं स मासं पुत्रमलालयत् ॥१६४॥
मरुदेवस्य काले च मातः पितरिति ध्वनिम् । शुश्राव शिशुयुग्मस्य प्रथमं मिथुनं कलम् ॥१६५॥
एकमेवासृजत्पुत्रं प्रसेनजितमत्र सः । युग्मसृष्टेरिहैवोर्ध्वमितो स्वपनिर्गीषया ॥१६६॥
प्रसेनजितमायोज्य प्रस्वेदलवभूषितम् [2] । विवाहविधिना वीरः प्रधानकुलकन्यया ॥१६७॥
कोटीभागसहस्रं स पल्यस्य शतसङ्गुणम् । सञ्जीव्य मरुदेवोऽपि महतां लोकमुपयौ ॥१६८॥
पूर्वकोट्यायुषं नाभिं प्रसेनजिदजीजनत् । नाभिच्छेदव्यवस्थायाः कर्तारं स्वर्गगामिनम् ॥१६९॥
दशानां कोटिलक्षाणां पल्यांशानामथांशकम् । जीवित्वा कालधर्मेण प्रसेनजिदितो दिवम् ॥१७०॥
शतान्यष्टादशोत्सेधो धनूंष्यासन्प्रतिश्रुतेः । त्रयोदश तु पुत्रस्य पौत्रस्याष्टशतान्यतः ॥१७१॥
परतः क्रमहानिस्तु धनुषां पञ्चविंशतेः । स पञ्चविंशतिः शेषा नाभेः पञ्चधनुःशती ॥१७२॥
आद्यसंस्थानसङ्घातगम्भीरोदारमूर्तयः । स्वपूर्वभवविज्ञाना मनवस्ते चतुर्दश ॥१७३॥

स्वरित=स्वरित नामका स्वर हुआ था यह विरोध है। परिहार पक्षमें वह उदात्त–महान् था और स्वरितः=स्वर् इतः—स्वर्ग गया था ॥१५९॥ चक्षुष्मान्‌का पुत्र यशस्वी हुआ। इसने अपने समयमें प्रजाको पुत्रका नाम रखना सिखाया इसलिए प्रजाने इसे विस्तृत यशसे युक्त किया अर्थात् इसका यशस्वी यह नाम रक्खा ॥१६०॥ वह पल्यके सौ करोड़वें भाग जीवित रहकर तथा अभिचन्द्र नामक उत्तम पुत्रको उत्पन्न कर स्वर्ग गया ॥१६१॥ उसके समयमें प्रजा अपनी सन्तानको ऊपर उठा चन्द्रमाके सामने क्रीड़ा कराती थी इसलिए वह अभिचन्द्र इस नामको प्राप्त हुआ था ॥१६२॥ वह गुणवान् कुलकर पल्यके हजार करोड़वें भाग जीवित रहकर तथा चन्द्राभ नामक पुत्रको उत्पन्न कर स्वर्ग गया ॥१६३॥ चन्द्राभने पल्यके दश हजार करोड़वें भाग तक जीवित रहकर मरुदेवको उत्पन्न किया। वह अपने मरुदेव पुत्रको एक मास तक खिलाता रहा अनन्तर स्वर्गको प्राप्त हुआ ॥१६४॥ मरुदेवके समय स्त्री-पुरुष अपनी सन्तानके मुखसे 'हे माँ', 'हे पिता' इस प्रकारके मनोहर शब्द सुनने लगे थे ॥१६५॥ पहले यहाँ युगल सन्तान उत्पन्न होती थी परन्तु इसके आगे युगल सन्तानकी उत्पत्तिको दूर करनेकी इच्छासे ही मानो मरुदेवने प्रसेनजित् नामक अकेले पुत्रको उत्पन्न किया था ॥१६६॥ इसके पूर्व भोगभूमिज मनुष्योंके शरीरमें पसीना नहीं आता था परन्तु प्रसेनजित्‌का शरीर जब कभी पसीनाके कणोंसे सुशोभित हो उठता था। वीर मरुदेवने अपने पुत्र प्रसेनजित्‌को विवाह विधिके द्वारा किसी प्रधान कुलकी कन्याके साथ मिलाया था ॥१६७॥ अन्तमें मरुदेव पल्यके लाख करोड़वें भाग तक जीवित रहकर स्वर्ग गया ॥१६८॥ तदनन्तर प्रसेनजित्‌ने एक करोड़ पूर्वकी आयुवाले, जन्म कालमें बालकोंकी नाल काटनेकी व्यवस्था करनेवाले थे, तथा स्वर्गगामी नाभिराज पुत्रको उत्पन्न किया ॥१६९॥ पल्यके दश लाख करोड़वें भाग तक जीवित रहकर आयु समाप्त होनेपर प्रसेनजित् स्वर्ग गया ॥१७०॥

प्रथम कुलकर प्रतिश्रुतिकी ऊँचाई अठारह सौ धनुष थी, इसके पुत्र दूसरे कुलकर सन्मतिकी तेरह सौ धनुष थी, प्रतिश्रुतिके पौत्र—तीसरे कुलकर क्षेमङ्करकी आठ सौ धनुष थी और इसके आगे प्रत्येककी पचीस-पचीस धनुष कम होती गई है। इस तरह अन्तिम कुलकर नाभिराजकी ऊँचाई पाँच सौ पचीस धनुष थी ॥१७१-१७२॥ ये चौदह कुलकर समचतुरस्र संस्थान

१. यशसा उरुणा = विशालेन यशसाऽरुणा म० । २. प्रस्वेदमलभूषितम् म० ।

चक्षुष्मांश्च यशस्वी च तथैवासौ प्रसेनजित् । त्रयः कुलकराः प्रोक्ताः प्रियङ्गुश्यामरोचिषः ॥१७४॥
चन्द्राभश्चन्द्रगौराभस्तथैव प्रथितः प्रभुः । कथिता दश शेषास्ते सन्तप्तकनकप्रभाः ॥१७५॥
मर्यादारक्षणोपायहामाधिक्कारनीतयः । प्रजानां जनकाभास्ते प्रभवः प्रतिभाधिकाः ॥१७६॥
इत्थं कुलकरोत्पत्तिः सकला कथिता नृप । नाभेयस्याद्भुतोत्पत्तिं शृणु पापविनाशिनीम् ॥१७७॥

शिखरिणीवृत्तम्

जगद्व्याप्तं षड्भिर्द्रव्यैरनुपचरितैर्व्याप्तमखिलं
तदप्यर्हंज्ज्ञानादधिकमभियुक्तैरधिगतम्[1][2] ।
यतः कालाद्यर्थे घनमपि क्षुणात्यन्धतमसं
जिनादित्यालोकः स्थिरपरिणतः श्रीमदुदयः ॥१७८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कालकुलकरोत्पत्तिवर्णनो नाम सप्तमः सर्गः ।

और वज्रवृषभ नाराचसंहननसे युक्त गम्भीर तथा उदार शरीरके धारक थे, इनको अपने पूर्व भवका स्मरण था तथा इनकी मनुसंज्ञा थी ॥१७३॥ इन कुलकरोंमें चक्षुष्मान्, यशस्वी और प्रसेनजित् ये तीन कुलकर प्रियङ्गु पुष्पके समान श्याम कान्तिके धारक थे, चन्द्राभ चन्द्रमाके समान गौरवर्ण था, और बाकी दश तपाये हुए स्वर्णके समान प्रभासे युक्त थे ॥१७४-१७५॥ ये चौदहों राजा मर्यादाकी रक्षाके उपायभूत 'हा', 'मा' और 'धिक्' इन तीन प्रकारकी दण्डनीतियोंको अपनाते थे, प्रजाके पिताके तुल्य थे और अत्यधिक प्रतिभाशाली थे ॥१७६॥ गौतम स्वामी कहते हैं कि हे राजन्! इस तरह मैंने समस्त कुलकरोंकी उत्पत्ति कही । अब नाभिराजाके पुत्र भगवान् आदिकी पापनाशिनी कथा सुन ॥१७७॥ यद्यपि यह समस्त संसार छह अकृत्रिम द्रव्योंसे व्याप्त है तो भी उद्यमशील आचार्योंने उसे अरहन्त भगवान्‌के दिव्य ज्ञानके प्रभावसे जान लिया है सो ठीक ही है क्योंकि नित्य और श्रीसम्पन्न उदयको धारण करनेवाला जिनेन्द्र रूपी सूर्यका प्रकाश, काल आदि द्रव्योंके विषयमें जो गाढ़ अन्धकार है उसे भी क्षणभरमें नष्ट कर देता है ॥१७८॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें कालद्रव्य तथा कुलकरोंकी उत्पत्तिका वर्णन करनेवाला सातवाँ सर्ग समाप्त हुआ ।

---

१. तदप्यर्हत्ज्ञाना- ख० । २. ऋषीश्वरैः ज्ञातम् ।

अष्टमः सर्गः

श्रीमतामनुरूपं यः परिणाममनुस्सृतः । मननात् मनुजार्थस्य मनुसंज्ञामनुस्सृतः ॥१॥
प्रक्षीणः कल्पवृक्षात्मा मध्येदक्षिणभारतम् । नाभेरपि स एवाभूत् प्रासादः पृथिवीमयः ॥२॥
शातकुम्भमयस्तम्भो विचित्रमणिभित्तिकः । पुष्पविद्रुममुक्तादिमालाभिरुपशोभितः ॥३॥
सर्वतोभद्रसंज्ञोऽसौ प्रासादः सर्वतो मतः । सैकाशीतिपदः शालवाप्युद्यानाद्यलङ्कृतः ॥४॥
स्वस्थानमेककोऽनल्पकल्पवृक्षैर्वृतः क्षितौ । अध्यतिष्ठदधिष्ठातुः स नाभेरनुभावतः ॥५॥
अथ नाभेरभूद्देवी[1] मरुदेवीति वल्लभा । देवी शचीव शक्रस्य शुद्धसन्तानसम्भवा ॥६॥
अभ्युन्नतौ पदाङ्गुष्ठौ प्रोल्लसन्नखमण्डलौ । यस्या रेजतुरुच्चैव ललाटस्य दिदृक्षया ॥७॥
उन्नताग्रसमस्निग्धतनुताम्रनखांशुभिः । कुट्टिमे कुरुतां यस्याः क्रमौ कुरवकश्रियम् ॥८॥
श्लिष्टाङ्गुलिदलौ गूढगुल्फौ कान्तिजलप्लवम्[2] । समौ कूर्मोन्नतौ यस्याः पादपद्मौ प्रचक्रतुः ॥९॥
यस्याश्च चरणौ चारुमत्स्यशङ्खादिलक्षणौ । क्रीडास्वेव प्रियस्पर्शात्स्वेदसम्बन्धसङ्गिनौ ॥१०॥
आनुपूर्व्यसुवृत्ते च जङ्घे रोमशिरोज्झिते । लावण्यरसवर्णाढ्ये शरधी पुष्पधन्वनः ॥११॥
जानुनी मृदुनी यस्या गूढसन्धानवर्तिनी । ददतुः प्रियगात्राणां मृदुस्पर्शकृतं सुखम् ॥१२॥
आसाराः कदलीस्तम्भाः कर्कशाः करिणां कराः । परिणाहगुणत्वेऽपि यदूर्वोः सदृशा न ते ॥१३॥

अथानन्तर ऊपर जिन नाभिराजका कथन किया गया है वे श्रीमान् पुरुषोंके अनुरूप परिणामको प्राप्त थे तथा समस्त पुरुषार्थोंका मनन करनेसे मनु कहलाते थे ॥१॥ उस समय दक्षिण भरत क्षेत्रमें कल्पवृक्षरूप प्रासाद अन्यत्र नष्ट हो गये थे परन्तु राजा नाभिराजका जो कल्पवृक्षरूप प्रासाद था वही पृथिवी निर्मित प्रासाद बन गया था ॥२॥ राजा नाभिराजके उस प्रासादका नाम सर्वतोभद्र था, उसके खम्भे स्वर्णमय थे, दीवालें नाना प्रकारकी मणियोंसे निर्मित थीं, वह पुखराज, मूँगा तथा मोती आदिकी मालाओंसे सुशोभित था, इक्यासी खण्डसे युक्त था और कोट, वापिका तथा बाग-बगीचोंसे अलंकृत था ॥३-४॥ वह अधिष्ठाता नाभिराजके प्रभावसे अकेला ही अनेक कल्पवृक्षोंसे आवृत था तथा पृथिवीके मध्य अपने स्थानपर अधिष्ठित था ॥५॥

अथानन्तर राजा नाभिराजकी मरुदेवी नामकी पटरानी थी। वह शुद्ध कुलमें उत्पन्न हुई थी तथा जिस प्रकार इन्द्रको इन्द्राणी प्रिय होती है उसी प्रकार राजा नाभिराजको प्रिय थी ॥६॥ जिनके नख अत्यन्त चमकदार थे ऐसे उसके उठे हुए दोनों पैरोंके अँगूठे ऐसे जान पड़ते थे मानो ललाटके देखनेकी इच्छासे ही ऊपरकी ओर उठ रहे हों ॥७॥ उसके दोनों चरण, उन्नत अग्रभागसे युक्त, सम, स्निग्ध, पतले और लाल-लाल नखोंकी किरणोंसे फर्स-पर कुरवककी शोभा उत्पन्न कर रहे थे ॥८॥ जिनकी अङ्गुलियाँ रूपी कलिकाएँ परस्परमें सटी हुई थीं, जिनकी गाँठें छिपी हुई थीं और जो कछुओंके समान उन्नत थे, ऐसे उसके दोनों चरण-कमल कान्तिरूपी जलमें मानो तैर ही रहे थे ॥९॥ सुन्दर मच्छ तथा शङ्ख आदिके लक्षणोंसे युक्त जिसके चरण, क्रीड़ाओंके समय ही पतिका स्पर्श पाकर पसीनाके सम्बन्धसे युक्त होते थे अन्य समय नहीं ॥१०॥ अनुक्रमिक गोलाईसे युक्त, तथा रोम एवं नसोंसे रहित उसकी दोनों जङ्घाएँ सौन्दर्य रससे भरे हुए मानो कामदेवके दो तरकश ही हैं ॥११॥ गूढ़ सन्धिसे युक्त जिसके दोनों कोमल घुटने पतिके अवयवोंको कोमल स्पर्श जन्य सुख प्रदान करते थे ॥१२॥ केलेके स्तम्भ

---

१. महादेवीति म० । २. जलप्लवौ म० ।

ऊरू स्निग्धौ नितम्बश्च कुकुन्दरमनोहरः[1] । गुरुर्जघनभारश्च यस्याः सादृश्यमत्यगात् ॥१४॥
प्रदक्षिणकृतावर्तं गम्भीरं नाभिमण्डलम् । रोमराजिकृतासङ्गं यस्या नाभेरमून्मुदे ॥१५॥
अरोमशं कृशं मध्यं यस्यास्त्रिवलिभङ्गुरम् । बभौ वृत्तसमोत्तुङ्गघनस्तनभरादिव ॥१६॥
कठिनस्तनचक्राभ्यां यस्या मृदुभियोरसा । प्रक्रीडच्चक्रवाकाभ्यां सरितेव विराजितम् ॥१७॥
रक्तहस्ततलौ श्रेष्ठप्रकोष्ठमणिबन्धनौ । स्वंसौ मृदुभुजौ यस्याः कामपाशौ बभूवतुः ॥१८॥
शङ्खावर्तसमग्रीवा प्रवालाधरपल्लवा । दन्तमुक्ताफलोद्योता सिन्धोर्वेलेव या बभौ ॥१९॥
संरक्ततालुजिह्वाग्रमन्तरास्यमराजत । [2]यस्या वाचि प्रवृत्तायां कोकिलस्वननिस्वनम् ॥२०॥
प्रियामुखमिवात्मीयं दिदृक्षोः प्रेयसो मुखम् । सम्मुखौ भवतो यस्याः कपोलाविव दर्पणौ ॥२१॥
सनासिकाऽतिमध्यस्था[3] समा समपुटाप्यभात् । स्पर्धिन्योर्वारयन्तीव दृशोरन्योन्यदर्शनम् ॥२२॥
त्रिवर्णाब्जनिभे यस्या दर्शने दीर्घदर्शने । मन्त्रस्य मन्त्रणायेव कर्णमूलमुपाश्रिते ॥२३॥
तनुरेखभ्रुवौ यस्या न दूरे न च संहते । समारोपितचापाभे शुशुभाते शुभावहे ॥२४॥
न नतस्य न तुङ्गस्य[4] सादृश्यस्य सिसृक्षया[5] । यस्या ललाटपट्टस्य [6]नार्धेन्दोरभवत् स्थितिः ॥२५॥
कुण्डलोज्ज्वलगण्डस्य यत्कर्णयुगलस्य तु । नोपमा मांसलस्यासीत् कोमलस्य समस्य तु ॥२६॥

सार रहित हैं और हाथीके शुण्डादण्ड कठोर स्पर्शसे युक्त हैं अतः विस्ताररूपी गुणोंसे युक्त होनेपर भी दोनों ऊरु देवीकी जाँघोंके समान नहीं थे ॥१३॥ जिसके कूल्हे, गर्तविशेषसे मनोहर नितम्ब और स्थूल जघन सादृश्यसे परे थे अर्थात् अनुपम थे ॥१४॥ जिसकी आवर्त—जलभँवरके समान गोल, गहरी एवं रोमराजिसे युक्त नाभि, राजा नाभिराजके हर्षका कारण थी ॥१५॥ जिसकी रोम रहित, पतली एवं त्रिवलिसे युक्त कमर ऐसी जान पड़ती थी मानो गोल, सम, ऊँचे और स्थूल स्तनोंके भारसे ही झुक रही हो ॥१६॥ जिस प्रकार मन्द भयके साथ क्रीड़ा करते हुए चकवा-चकवियोंके युगलसे नदी सुशोभित होती है उसी प्रकार जिसका वक्षःस्थल कठोर स्तनोंके मण्डलसे सुशोभित हो रहा था ॥१७॥ जिनकी हथेलियाँ लाल-लाल थीं, जिनकी कोहनी और कलाई उत्तम थीं और जिनके कन्धे शोभास्पद थे ऐसी उसकी दोनों कोमल भुजाएँ कामपाशके समान जान पड़ती थीं ॥१८॥ उसकी ग्रीवा शङ्खके आवर्तके समान थी, अधर पल्लव मूँगाके समान थे और दाँत मोतियोंके समान प्रकाशमान थे इसलिए वह समुद्रकी वेलाके समान सुशोभित हो रही थी ॥१९॥ जिसका तालु और जिह्वाका अग्रभाग अत्यन्त लाल था ऐसा उसका अन्तर्मुख सुशोभित था और जब उससे शब्द निकलते थे तब वह कोकिलाके शब्दको भी अशब्द कर देता था—फीका बना देता था ॥२०॥ प्रियाके मुखके समान जब नाभिराज अपना मुख देखनेकी इच्छा करते थे तब सामने स्थित मरुदेवीके दोनों कपोल दर्पणके समान हो जाते थे ॥२१॥ ठीक बीचमें स्थित सम और समान पुटवाली उसकी नासिका ऐसी जान पड़ती थी मानो स्पर्धा करनेवाले दोनों नेत्रोंके पारस्परिक दर्शनको रोक ही रही थी ॥२२॥ सफेद, काले और लाल इन तीन वर्णके कमलोंके समान जिसके बड़े-बड़े नेत्र किसी मन्त्रकी सलाह करनेके लिए ही मानो कानोंके समीप तक गये थे ॥२३॥ जिसकी पतली भौंहें न दूर थीं और न पास ही थीं। शुभ लक्षणोंसे युक्त थीं तथा चढ़ाये हुए धनुषके समान सुशोभित थीं ॥२४॥ जिसका ललाटपट्ट न अधिक नीचा था और न अधिक ऊँचा था इसलिए उसका सादृश्य प्राप्त करनेके लिए अर्ध-चन्द्रकी सामर्थ्य नहीं थी ॥२५॥ जिसके कानोंका युगल अपने कुण्डलोंसे गालोंको उज्ज्वल बना रहा था, स्थूल था, कोमल था और समान था अतः

१. 'कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे' इत्यमरः। २. यस्यां म०। ३. -भिमध्यस्था म०।
४. सादृश्यसिसृक्षया म०। ५. स्रष्टुमिच्छा सिसृक्षा तया। ६. नार्धेन्दु- म०।

नीलकुञ्चितसुस्निग्धसूक्ष्मकेशकलापिनः । समस्य शिरसो यस्याः शोभा वाक्पथमत्यगात् ॥२७॥
अखण्डमण्डलश्चन्द्रो मुखमण्डलशोभया । यस्याः पराजितः प्रापदाधिनेवातिपाण्डुताम् ॥२८॥
षोडशाल्पकलावस्था द्वासप्ततिकलोज्ज्वला । इन्दुमूर्त्योपमीयेत सा कथं सकलङ्कया ॥२९॥
चतुःषष्टिगुणोत्कृष्टा मार्दवातिशया कथम् । सा चतुर्गुणया तुल्या पृथिव्या कठिनात्मना ॥३०॥
स्निग्धाभिरपि सुस्निग्धा सौष्ठवाम्भा अकात्मभिः । कथं साऽन्यप्रणेयाभिरद्भिरप्युपमीयते ॥३१॥
तद्वद्भासुररूपापि कथं वा दहनात्मिका । भेजे[1] तेजोमयी मूर्तिस्तन्मूर्तेरुपमानताम् ॥३२॥
दर्शनस्पर्शनाभ्यां या नाभेरतिसुखावहा । स्पर्शमात्रसुखाहर्त्र्या वायुमूर्त्या कथं समा ॥३३॥
अशून्यहृदयस्पर्शा भर्तुर्या स्पर्शशून्यया । साऽकाशात्मिकया शक्त्या शुद्धयाऽपि कथं समा ॥३४॥
चतुर्दशविधं यस्याः कल्पपादपकल्पितम् । अङ्गप्रत्यङ्गसङ्गेन भूषणं भूष्यतां गतम् ॥३५॥
भुञ्जानस्य तया नाभेर्भोगं स्वर्लोकसन्निभम् । वक्तुं शक्तौ यदि व्यक्तं वक्ता [2]शुक्रो बृहस्पतिः ॥३६॥
अथ तीर्थकृतामाद्ये स्वर्गात् सर्वार्थसिद्धितः । तयोः प्रागेव षण्मासान् वृषभेऽवतरिष्यति ॥३७॥
दिवः पतितुमारब्धा वसुधारा गृहाङ्गणे । प्रत्यहं धनदोन्मुक्ता पुरुहूतनिदेशतः ॥३८॥
श्रीलक्ष्मीधृतिकीर्त्याद्या नवतिर्नव चार्ययुः । प्राग्विद्युद्दिक्कुमार्योऽपि दिग्विदिग्भ्यः ससम्भ्रमाः ॥३९॥

उसकी कहीं भी उपमा नहीं थी ॥२६॥ काले घुँघराले चिकने और महीन केशोंके समूहसे युक्त जिसके सुन्दर शिरकी शोभा वचन-मार्गको उल्लंघन कर गई थी ॥२७॥ जिसके मुख-मण्डलकी शोभासे पराजित हुआ पूर्णचन्द्र मानसिक व्यथासे ही मानो अत्यन्त सफेदीको प्राप्त हो गया था ॥२८॥ चन्द्रमाकी मूर्ति सोलह कलाओंसे युक्त है और मरुदेवी बहत्तर कलाओंसे सहित थी, चन्द्रमाकी मूर्ति कलंक सहित है और मरुदेवी अत्यन्त उज्ज्वल थी अतः चन्द्रमाकी मूर्ति-से उसकी तुलना कैसे हो सकती है ? ॥२९॥ मरुदेवी चौसठ गुणोंसे युक्त थी और पृथिवी मात्र चार गुणोंको धारण करनेवाली है। मरुदेवी कोमलताके अतिशयको प्राप्त थी और पृथिवी अत्यन्त कठिन है अतः यह उसके तुल्य कैसे हो सकती है ? ॥३०॥ यद्यपि जल स्निग्ध है—कुछ-कुछ चिकनाईसे युक्त है पर मरुदेवी सुस्निग्धा—अत्यधिक चिकनाईसे युक्त थी (पक्ष-में पति-विषयक स्नेहसे सहित थी), जल जड़रूप है, मूर्ख है—(पक्षमें पानीरूप है) और मरुदेवी कलाओंमें निपुण थी, जल, अन्यप्रणेया—दूसरेके द्वारा ले जाने योग्य है और मरुदेवी *अन्य प्रणेया नहीं थी*—स्वावलम्बा थी अतः उसकी जलके साथ उपमा कैसे हो सकती है ? ॥३१॥ यद्यपि अग्नि मरुदेवीके समान भास्वर रूप है परन्तु साथ ही दाहमयी भी है अतः वह मरुदेवीके शरीरकी उपमाको कैसे प्राप्त हो सकती है ? ॥३२॥ मरुदेवी, दर्शन और स्पर्श दोनोंके द्वारा नाभिराजको अतिशय सुख देनेवाली थी परन्तु वायु मात्र स्पर्शके द्वारा सुख पहुँचाती थी अतः वह वायुके समान कैसे हो सकती थी ? ॥३३॥ मरुदेवी पतिके हृदयका स्पर्श करनेवाली थी जबकि आकाश स्पर्शसे शून्य है अतः वह शुद्ध होनेपर भी आकाशरूपी शक्तिके सदृश कैसे हो सकती है ? ॥३४॥ कल्पवृक्षोंसे उत्पन्न हुए चौदह प्रकारके आभूषण जिसके अङ्ग-प्रत्यङ्गका सम्बन्ध पाकर भूष्यताको प्राप्त हुए थे। भावार्थ—आभूषणोंने उसके शरीरको विभूषित नहीं किया था किन्तु उसके शरीरने ही आभूषणोंको विभूषित किया था ॥३५॥ उस मरुदेवीके साथ स्वर्ग लोकके समान भोग भोगनेवाले राजा नाभिका यदि स्पष्ट वर्णन करनेके लिए कोई समर्थ है, तो वक्ता शुक्र और बृहस्पति ही समर्थ हैं अन्य नहीं ॥३६॥

अथानन्तर जब प्रथम तीर्थंकर भगवान् वृषभदेव सर्वार्थसिद्धि विमानसे च्युत हो राजा नाभिराज और मरुदेवीके यहाँ अवतार लेंगे उसके छह माह पूर्वसे ही उनके घरके आँगनमें इन्द्र-की आज्ञासे कुबेरके द्वारा छोड़ी हुई रत्नोंकी धारा आकाशमें पड़ने लगी ॥३७–३८॥ श्री, लक्ष्मी,

१. मेने म० । २. शुक्रबृहस्पती म०, क० ।

प्रयुज्य प्रणतिं तुष्टा जिनपित्रोर्भविष्यतोः । स्वनियोगागमं स्वं च पाकशासनशासनात्[1] ॥४०॥
प्रत्येकं शासनं देव्यो मरुदेव्या महादरात् । प्रतीयुर्देवि ! देह्याज्ञां नन्द जीवेति सद्गिरः ॥४१॥
रूपयौवनलावण्यसौभाग्यादिगुणार्णवम् । वर्णयन्ति तदा काश्चिदाश्चर्यं परमं श्रिताः ॥४२॥
अक्षरालेख्यगान्धर्वगणितागमपूर्वकम् । कलाकौशलमन्यास्तु प्रशंसन्ति समन्ततः ॥४३॥
दर्शयन्ति स्वयं काश्चित् तन्त्रीवीणादिकौशलम् । गायन्ति मधुरं गेयं काश्चित्कर्णरसायनम् ॥४४॥
शोभनाभिनयं काश्चिद् शृङ्गारादिरसोत्कटम् । हावभावविलासिन्यो नृत्यन्ति नयनामृतम् ॥४५॥
हस्तसंवाहने काश्चिद् पादसंवाहने पराः । अङ्गसंवाहने काश्चित् व्यापृता मृदुपाणयः ॥४६॥
अङ्गाभ्यङ्गविधौ काश्चिद् काश्चिदुद्वर्तने पराः । काश्चिन्मज्जनके काश्चित्स्नानवस्त्रनिपीलने[2] ॥४७॥
सद्गन्धानयने काश्चित् तत्समालभने पराः । काश्चिच्चित्राम्बराधाने परिधानविधौ पराः ॥४८॥
काश्चिद्भूषास्रगाधाने काश्चिद्देहप्रसाधने । दिव्यान्नानयने काश्चित् काश्चिद्भोजनकर्मणि ॥४९॥
शय्यासनविधौ काश्चित् काश्चित्ताम्बूलढौकने । काश्चित्पतद्ग्रहे व्यग्राः काश्चिच्च गृहकर्मणि ॥५०॥
दर्पणग्रहणे काश्चिच्चामरग्रहणे पराः । छत्रस्य ग्रहणे काश्चिद् व्यजनग्रहणे पराः ॥५१॥
अङ्गरक्षापरा देव्यः खड्गव्यग्राग्रपाणयः । ग्रहरक्षःपिशाचेभ्यो रक्षन्त्यः प्रतिजाग्रति ॥५२॥
अभ्यन्तरगृहद्वारे काश्चित्काश्चिद्बहिर्भुवः[3] । असिचक्रगदाशक्तिहेमवेत्रकराः स्थिताः ॥५३॥

धृति, कीर्ति आदि निन्यानबे विद्युत्कुमारी और दिक्कुमारी देवियाँ भी छह माह पहलेसे बड़े हर्षके साथ दिशाओं और विदिशाओंसे आ गई ॥३९॥ उन्होंने आकर बड़े सन्तोषसे जिनेन्द्र भगवान्के होनहार माता-पिताको नमस्कार किया और हम इन्द्रकी आज्ञासे स्वर्गलोकसे यहाँ आई हैं, इस प्रकार अपना परिचय दिया ॥४०॥ हे देवि ! आज्ञा दो, समृद्धिसम्पन्न होओ, और चिर काल तक जीवित रहो इस प्रकारकी उत्तम वाणीको बोलती हुई वे देवियाँ महान् आदरके साथ मरुदेवीके आदेशकी प्रतीक्षा करने लगीं ॥४१॥ उस समय परम आश्चर्यको प्राप्त हुई कितनी ही देवियाँ मरुदेवीके रूप, यौवन, सौन्दर्य और सौभाग्य आदि गुणोंके सागरका वर्णन करती थीं ॥४२॥ कितनी ही देवियाँ मरुदेवीके अक्षर-विज्ञान, चित्र-विज्ञान, संगीत-विज्ञान, गणित-विज्ञान और आगम-विज्ञानको आदि लेकर उसके कला-कौशलकी प्रशंसा करती थीं ॥४३॥ कितनी ही देवियाँ स्वयं अपनी तन्त्री तथा वीणा आदि विषयक चतुराई दिखलाती थीं । कितनी ही कानोंके लिए रसायन स्वरूप मधुर गान गाती थीं ॥४४॥ हाव, भाव और विलाससे भरी हुई कितनी ही देवियाँ सुन्दर अभिनयसे युक्त, शृङ्गारादि रसोंसे उत्कट और नेत्रोंके लिए अमृत स्वरूप मनोहर नृत्य करती थीं ॥४५॥ कोमल हाथोंको धारण करनेवाली कितनी ही देवियाँ मरुदेवीके हाथ दाबनेमें, कितनी ही पैर दाबनेमें तथा कितनी ही अन्य अङ्गोंके दाबनेमें लग गई थीं ॥४६॥ कितनी ही शरीरपर तेलका मर्दन करनेमें, कितनी ही उबटन लगानेमें, कितनी ही स्नान करानेमें और कितनी ही स्नानके वस्त्र निचोड़नेमें तत्पर थीं ॥४७॥ कोई उत्तम गन्धके लानेमें, कोई उसका लेप लगानेमें, कोई चित्र-विचित्र वस्त्र सँभालनेमें, और कोई वस्त्र पहिनानेमें लग गई ॥४८॥ कोई आभूषण तथा मालाओंके लानेमें, कोई शरीरकी सजावटमें, कोई दिव्य भोजनके लानेमें और कोई भोजन करानेमें व्यग्र थी ॥४९॥ कोई विस्तर तथा आसनके बिछानेमें, कोई पान लगानेमें, कोई पीकदान रखनेमें, कोई गृह-सम्बन्धी कार्यमें, कोई दर्पण उठानेमें, कोई चमर ग्रहण करनेमें, कोई छत्र लगानेमें और कोई पङ्खा झलनेमें तत्पर थी ॥५०-५१॥ कितनी ही देवियाँ हाथमें तलवार ले अङ्ग-रक्षा करनेमें तत्पर रहती थीं एवं ग्रह, राक्षस और पिशाचोंसे रक्षा करती हुई जागृत रहती थीं ॥५२॥ कितनी ही देवियाँ घरके भीतरी द्वारपर और कितनी ही बाह्य द्वारपर तलवार, चक्र, गदा, शक्ति और स्वर्णमय छड़ी हाथमें लेकर खड़ी थीं ॥५३॥

१. इन्द्राज्ञया । २. निपीडने । ३. -र्भुः म०, क० ।

इति नक्तंदिवं दृष्ट्वा देवताभिरनुष्ठितम् । आत्मनः शासनं लोके परेषामतिदुर्लभम् ॥५४॥
निश्चितत्राऽपि षण्मासान् पतन्त्या वसुधारया । नाभिना मरुदेव्या च प्राप्स्यंस्तीर्थंकरोद्भवः ॥५५॥
अथासौ सौम्यताराभिरभितः कृतसेवना । मरुदेवी सुरस्त्रीभिश्चन्द्रलेखेव हारिणी ॥५६॥
शरदभ्रावलीशुभ्रे प्रासादेऽगुरुधूपिते । नानोपधानकाधाने शयाना शयने विधौ ॥५७॥
निधीनिव निशाशेषे ददर्श शुभसूचकान् । क्रमेण षोडशस्वप्नानिमान् दुर्लभदर्शनान् ॥५८॥
प्रभूतदानधाराग्रकरपुष्करधारिणम् । गीयमानं शुचिं भृङ्गैर्दानार्थिभिरिवेश्वरम् ॥५९॥
सुप्रसिद्धध्वनिविक्षिप्तप्रतिपक्षं शुभोदयम् । शुभं भद्राकृतिं धीरं वृषं वृषमिवोन्नतम् ॥६०॥
मत्तेभं तमिवान्वेष्टुं मदगन्धेन सूचितम् । सिंहमुत्थितमद्राक्षीन्नखदंष्ट्रासटोत्कटम् ॥६१॥
चित्ररत्नघटाटोपघनघोषघनाघनैः[1] । श्रियोऽभिषेकमम्भोजे नवाम्भोभिरिवाघनैः ॥६२॥
नानापुष्पघने दीर्घे श्रीमाले सौरभोत्कटे । सम्भूयेव च सर्वर्तुश्रीभिः सेवार्थमुद्धृते ॥६३॥

इस प्रकार लोकमें जो दूसरोंके लिए दुर्लभ थी, ऐसी देवियों द्वारा अपनी आज्ञाकी पूर्ति देखकर तथा लगातार छह माहसे पड़ती हुई रत्नधारासे राजा नाभिराज और मरुदेवीने निश्चय कर लिया कि हमारे यहाँ सबके द्वारा प्रार्थनीय तीर्थङ्करका जन्म होगा ॥५४-५५॥

अथानन्तर मनोहर ताराओंसे सेवित चन्द्रकलाके समान अनेक देवियोंसे सेवित मनोहराङ्गी मरुदेवी, शरद् ऋतुकी मेघावलीके समान सफेद एवं अगुरु चन्दनसे सुवासित राजभवनमें नाना गद्दा-तकियोंसे युक्त चन्द्र तुल्य शय्यापर शयन कर रही थी कि उसने रात्रिके पश्चिम भागमें निधियोंके समान शुभ सूचक, इन दुर्लभ सोलह स्वप्नोंको क्रमसे देखा ॥५६-५८॥ प्रथम ही उसने सफेद हाथी देखा, ऐसा हाथी कि जो अत्यधिक मदकी धारासे गीली सूँड़ और उसके अग्रभागको धारण कर रहा था तथा मदके अर्थी भ्रमर जिसके आस-पास गुञ्जार कर रहे थे। वह हाथी किसी राजाके समान जान पड़ता था क्योंकि जिस प्रकार राजाके कर पुष्कर—हस्त कमल अत्यधिक दानके संकल्पके लिए गृहीत जलकी धारासे गीले रहते हैं उसी प्रकार उस हाथीके कर पुष्कर—सूँड़ और उसके नथने अत्यधिक दान—मद जलकी धारासे गीले थे और जिस प्रकार राजाके समीप खड़े दानके अर्थीजन उसकी स्तुति किया करते हैं उसी प्रकार दान—मदके अर्थी भ्रमर उसके समीप गुञ्जार कर रहे थे ॥५९॥ दूसरी बार उसने भद्र आकृतिको धारण करनेवाला एक धीर-वीर बैल देखा। वह बैल ठीक धर्मके समान जान पड़ता था क्योंकि जिस प्रकार धर्म अपनी मधुर देशनासे एकान्तवादी प्रतिपक्षियोंको पराजित कर देता है उसी प्रकार वह बैल भी अपनी दुन्दुभिध्वनिसे प्रतिपक्षी बैलोंको पराजित कर रहा था, जिस प्रकार धर्म शुभ अभ्युदयको देता है उसी प्रकार वह बैल भी शुभ अभ्युदयको सूचित करनेवाला था। जिस प्रकार धर्म भद्राकृति—मङ्गलकारी होता है उसी प्रकार वह बैल भी भद्राकृति—उत्तम आकृतिका धारक था, जिस प्रकार धर्म धीर-धी बुद्धिको प्रेरणा करनेवाला है उसी प्रकार वह बैल भी धीर-गम्भीर था और जिस प्रकार धर्म उन्नत—उत्कृष्ट होता है उसी प्रकार वह बैल भी उन्नत—ऊँचा था ॥६०॥ तीसरी बार तीक्ष्ण नख, दंष्ट्रा और सटा (गरदनके बालों) से युक्त एक सिंह देखा। वह सिंह ऐसा जान पड़ता था मानो पहले स्वप्नमें दिखे हाथीके मदकी गन्ध पा उसे ढूँढ़नेके लिए ही तैयार खड़ा हो ॥६१॥ चौथी बार उसने नाना रत्नमयी घड़ोंके विशाल शब्दसे युक्त मदोन्मत्त हाथियोंके द्वारा कमलपर बैठी लक्ष्मीका अभिषेक देखा। लक्ष्मीका वह अभिषेक ऐसा जान पड़ता था मानो इन्द्रधनुषसे उपलक्षित एवं घनघोर गर्जना करनेवाले मेघ नूतन जलसे पृथिवीका ही अभिषेक कर रहे हों ॥६२॥ पाँचवीं बार उसने नाना पुष्पोंसे व्याप्त तथा अत्यन्त सुगन्धित दो बड़ी-बड़ी मालाएँ देखीं। वे मालाएँ ऐसी जान पड़ती थीं मानो समस्त ऋतुओंकी

१. घनाघना मत्तगजा मेघाश्च (इति क० प्रतिटिप्पण्याम्)।

अधोमुखमयूखौघदण्डमातपवारणम्[1] । ताराभरणयोत्क्षिप्तं श्यामयेवेन्दुमण्डलम् ॥६४॥
सन्ध्यारागाङ्गरागाढ्यं पूर्वाशाङ्गनयारुणम् । सिन्दूरारुणितं कुम्भं मङ्गलार्थमिवोद्धृतम् ॥६५॥
मीनौ कृतजलक्रीडौ हृतात्मोदरशोभयोः । नेत्रयोश्चलयोर्दातुमुपालम्भमिवागतौ ॥६६॥
हारिणौ वारिणा पूर्णौ विशालौ कलशौ घनौ । सौवर्णौ स्वोपमौ द्रष्टुं स्तनभाराविवोद्धृतौ ॥६७॥
[2]सोद्दण्डपुण्डरीकौघं राजहंसमनोहरम् । [3]रथपादातिनादाढ्यं सरः सैन्यमिवोर्जितम् ॥६८॥
[4]प्रमीनमिथुनोन्मेषमकराद्युरुराशिभिः । प्रपूर्णितमिवाकाशं वर्धमानं महार्णवम् ॥६९॥
सावष्टम्भभुजस्तम्भैः प्रौढदृष्टिभिरुन्मुखैः । सिंहैर्हेमासनं व्यूढं मनुराजैर्जगद् यथा ॥७०॥
स्वर्गसौन्दर्यसन्दर्भमिव दर्शयितुं नृणाम् । विमानं कलगीताभिर्देवकन्याभिराहृतम् ॥७१॥

लक्ष्मीने मिलकर मरुदेवीकी सेवाके लिए उन मालाओंको बनाकर ऊपर उठा रक्खा हो ॥६३॥ छठवीं बार उसने चन्द्रमण्डलको देखा। वह चन्द्रमण्डल ऐसा जान पड़ता था मानो तारा रूपी आभूषणोंसे युक्त रात्रिरूपी स्त्रीके द्वारा ऊपर उठाया हुआ छत्र ही हो। ऐसा छत्र कि जिसकी नीचेकी ओर आनेवाली किरणोंका समूह ही दण्डका काम दे रहा था ॥६४॥ सातवीं बार उसने सन्ध्याकी लालिमा रूपी अङ्गरागसे युक्त उदित होता हुआ सूर्य देखा। वह सूर्य ऐसा जान पड़ता था मानो पूर्व दिशारूपी स्त्रीने मङ्गलके लिए सिन्दूरसे रँगा हुआ कलश ही ऊपर उठाया हो ॥६५॥ आठवीं बार उसने जलके भीतर क्रीड़ा करते हुए दो मीन देखे। वे मीन ऐसे जान पड़ते थे मानो अपने उदरकी शोभाको हरनेवाले चञ्चल नेत्रोंका उलाहना देनेके लिए ही मरुदेवीके पास आये हों ॥६६॥ नौवीं बार उसने जलसे भरे हुए दो स्वर्णमय विशाल कलश देखे। वे कलश ऐसे जान पड़ते थे मानो अपनी उपमा धारण करनेवाले माताके स्तनोंको देखनेके लिए ही ऊपर उठे हों ॥६७॥ दशवीं बार उसने एक ऐसा सरोवर देखा जो किसी बलिष्ठ सेनाके समान जान पड़ता था। क्योंकि जिस प्रकार सेना, सोद्दण्डपुण्डरीकौघ—ऊपर उठे दण्डोंसे युक्त छत्रोंके समूहसे सहित होती है उसी प्रकार वह सरोवर भी सोद्दण्डपुण्डरीकौघ—ऊँचे-ऊँचे डण्ठलोंसे युक्त श्वेत कमलोंके समूहसे सहित था। जिस प्रकार सेना, राजहंस मनोहर—उत्तम राजाओंसे मनोहर होती है उसी प्रकार वह सरोवर भी राजहंस मनोहर—हंस* विशेषोंसे सुन्दर था। और जिस प्रकार सेना, रथ पादातिनादाढ्य—रथके पहियोंकी विशाल चीत्कारसे युक्त होती है उसी प्रकार वह सरोवर भी रथपादातिनादाढ्य—चकवाक पक्षियोंके अत्यधिक शब्दसे युक्त था ॥६८॥ ग्यारहवीं बार उसने बढ़ता हुआ एक ऐसा महासमुद्र देखा जो ठीक आकाशके समान जान पड़ता था क्योंकि जिस प्रकार आकाश, मीन, मिथुन, मकर आदि राशियोंसे युक्त होता है—उसी प्रकार महासमुद्र भी उत्तम मीन युगलोंकी उछल-कूद तथा मगर-मच्छ आदिकी विशाल राशिसे पूर्ण था ॥६९॥ बारहवीं बार उसने एक सुवर्णमय सिंहासन देखा। वह सिंहासन जिस प्रकार सबल भुजाओंके धारक, प्रौढ़ दृष्टिसे युक्त एवं कार्य करनेमें तत्पर कुलकरोंके द्वारा जगत् धारण किया जाता है उसी प्रकार मजबूत भुज स्तम्भोंसे युक्त, प्रौढ दृष्टिसे सहित एवं ऊपरकी ओर मुख किये हुए सिंहोंके द्वारा धारण किया गया था ॥७०॥ तेरहवीं बार उसने एक विमान देखा जो ऐसा जान पड़ता था मानो मनुष्यों को स्वर्गलोकका सौन्दर्य दिखलानेके लिए सुन्दर

---

१. मयूखोग्रदण्ड म०। २. सौद्दण्डपुण्डरीकौघराज- म०। ३. रथपादाः चक्रवाकाः तेषामतिनादेन दीर्घशब्देन आढ्यं सहितम्। ४. प्रकर्षेण मीना मत्स्यास्तेषां मिथुनानि तेषामुन्मेषः। मकरादीनामुरुराशिश्च तैः, पक्षे राशिविशेषैः।

* राजहंसास्तु ते चञ्चूचरणैर्लोहितैः सिताः—जिनकी चोंच और चरण लाल होते हैं बाकी सफेद होते हैं, ऐसे हंस राजहंस कहलाते हैं।

नागलोकं विजित्येव नागेन्द्रभवनं श्रिया । नागकन्याभिरुद्भूतं शेषलोकजिगीषया ॥७२॥
अभ्रंलिहं निरभ्रेऽपि विद्युदिन्द्रधनुःश्रियम् । खे सृजन्तं महारत्नराशिं प्रांशुभिरंशुभिः ॥७३॥
सुप्रसन्नं भ्रमज्ज्वालं निर्धूमेन्धनपावकम् । प्रचलत्पुष्पिताद[1]भ्रकिंशुकोत्करविभ्रमम् ॥७४॥
[2]खण्डस्वप्नानिमान् दृष्ट्वा दध्रेऽनन्तरमात्मनि । जिनं सा वृषरूपेण प्रविष्टं मुखवर्त्मना ॥७५॥
सुस्वप्नदर्शनानन्दं स्वामिनी यन्नवं मया । प्रापितेति कृतार्थेव काऽपि निद्रासखी निरैत् ॥७६॥
विबुध्यस्व विबुद्धार्थे विवर्धस्व विवर्धने । विजयस्व जयश्रीशे देवि पूर्णमनोरथे ॥७७॥
इत्यादयो विबोधाय दिक्कुमारीभिरीरिताः । याताः स्वयं विबुद्धायाः केवलं मङ्गलं गिरः ॥७८॥
दोषाकरः कलङ्क्येव निःकलङ्कगुणाकरम् । दृष्ट्वेव मुखचन्द्रं ते ह्रिया भवति निष्प्रभः ॥७९॥
तवैव गृहमुद्योत्यं दशनप्रभयाऽधुना । इतीव स्फुरितव्याजात् प्रदीपाः [3]स्वं हसन्त्यमी ॥८०॥
अत्यन्तमुखरागाढ्या क्षणरञ्जितविद्विषा । प्रस्खलत्खलमैत्रीव वन्ध्या सन्ध्या विरज्यते ॥८१॥
स्वभावमत्सरारम्भा व्यापिकोदयमेष्यतः[4] । प्रभा रवेरवन्ध्यार्था साधोर्मैत्रीव वर्द्धते ॥८२॥

गीत गानेवाली देवकन्याएँ उसे पृथिवीपर ले आई हों ॥७१॥ चौदहवीं बार उसने नागेन्द्रका भवन देखा जो ऐसा जान पड़ता था मानो वह अपनी शोभासे नागलोकको तो जीत चुका था अब अन्य लोकोंको जीतनेकी इच्छासे ही नागकन्याएँ उसे पृथिवीपर ऊपर लाई हों ॥७२॥ पन्द्रहवीं बार उसने आकाशमें महारत्नोंकी एक ऐसी राशि देखी जो अपनी उन्नत किरणोंके द्वारा मेघ रहित आकाशमें बिजली और इन्द्रधनुषसे शोभित मेघकी रचना कर रही थी ॥७३॥ और सोलहवीं बार उसने अत्यन्त निर्मल एवं घूमती हुई ज्वालाओंसे युक्त, निर्धूम अग्नि देखी। वह अग्नि ऐसी जान पड़ती थी मानो चञ्चल फूलोंसे युक्त पलाशके बड़े-बड़े वृक्षोंका समूह ही हो ॥७४॥ इस प्रकार पृथक्-पृथक् दिखनेवाले इन सोलह स्वप्नोंको देखकर रानी मरुदेवीने उसके बाद बैलके रूपमें मुख मार्गसे प्रविष्ट हुए जिनेन्द्र भगवान्को भीतर धारण किया ॥७५॥

मैं स्वामिनीको उत्तम स्वप्नोंके देखनेका नूतन आनन्द प्राप्त करा चुकी हूँ इसलिए कृत-कृत्य हुईकी तरह रानी मरुदेवीकी निद्रारूपी सखी कहीं भाग निकली ॥७६॥ महारानी मरुदेवी स्वप्न-दर्शनके बाद स्वयं जाग गई थीं इसलिए दिक्कुमारियोंके द्वारा उसके जगानेके लिए 'हे पदार्थोंको जाननेवाली माता! जागो, हे वृद्धिरूपिणी माता! वृद्धिको प्राप्त होओ, हे जयलक्ष्मी-की स्वामिनि! पूर्ण मनोरथोंवाली माता! जयवन्त रहो' इत्यादि कहे गये वचन केवल मङ्गल-रूपताको प्राप्त हुए थे ॥७७-७८॥ हे माता! यह चन्द्रमा दोषाकर—दोषोंकी खान (पक्षमें निशाकर) और कलङ्की—दोषयुक्त (पक्षमें काले चिह्नसे युक्त) है अतः तुम्हारे निष्कलङ्क और गुणोंकी खान भूत मुखचन्द्रको देखकर लज्जासे ही मानो प्रभा-रहित हो गया है ॥७९॥ अब तो यह घर तुम्हारे ही दाँतोंकी प्रभासे प्रकाशित है—हम लोगोंकी आवश्यकता नहीं, यह विचार-कर ही मानो ये दीपक स्फुरणके बहाने अपने आपकी हँसी कर रहे हैं ॥८०॥ हे माता! यह प्रातः संध्या, दुष्टकी चञ्चल मित्रताके समान राग-रहित होती जा रही है अर्थात् जिस प्रकार दुष्टकी मित्रता प्रारम्भमें रागसे सहित होती है और क्षणभर बाद ही शत्रुओंको अनुरञ्जित करने लगती है उसी प्रकार यह प्रातः सन्ध्या पहले तो राग अर्थात् लालिमासे सहित थी और अब क्षणभर बाद लालिमासे रहित हुई जा रही है। जिस प्रकार दुष्टकी मित्रता वन्ध्या—निष्फल रहती है—उससे किसी कार्यकी सिद्धि नहीं होती उसी प्रकार यह प्रातः संध्या भी वन्ध्या है—इससे किसी कार्यकी सिद्धि दृष्टिगत नहीं हो रही है ॥८१॥ और यह उदित होते हुए सूर्य-की प्रभा सज्जनकी मित्रताके समान उत्तरोत्तर बढ़ती चली जा रही है। क्योंकि जिस प्रकार सज्जनकी मित्रता प्रारम्भमें मत्सर-युक्त होनेके कारण फीकी रहती है और आगे चलकर खूब

१. पुष्पितादभ्रात् किंशुको म० । २. सान्तरान् वा । ३. त्वं म० । ४. -मेष्यति क० ।

भास्वराम्बरभूषैषा भाति भास्वद्विशेषका । पुरन्ध्रीरिव पूर्वाशा मङ्गलाय तवोद्गता ॥८३॥
दीर्घां नीत्वा निशामेषा दीर्घिकास्विनदर्शने[1] । तुष्टा स्वान् घटयत्येव चक्रवाकी कलारवान् ॥८४॥
त्वत्पादन्यासलीलायामार्गणार्थमिवाकुलम् । त्वामुत्थापयते कूजत्कलहंसकुलं कलम् ॥८५॥
घूर्णिता मृदुवातेन धृताभिनयमूर्तयः । भवत्या दर्शयन्तीव नृत्तारम्भममी द्रुमाः ॥८६॥
दिङ्मुखानि प्रसन्नानि चेष्टितानीव तेऽधुना । सुप्रभातमिदं देवि मुञ्च शय्यामनिन्दिते ॥८७॥
इति बन्दिजनैर्वन्द्या साऽमुञ्चत् शुचिविग्रहा । शय्यां पुष्पतरङ्गाढ्यां हंसीव सिकतास्थलीम् ॥८८॥
धौतवासं[2] गृहीत्वाऽसौ धौतच्छाया विनिर्गता । शुशुभे शारदाम्भोदात् तन्वीव शशिनः कला ॥८९॥
श्रीविद्युद्दिक्कुमारीभिः प्रत्यग्रकृतभूषणा । साऽन्तर्गर्भाऽन्तिकं याता घनश्रीर्नाभिभूभृतः ॥९०॥
भद्रासनस्थितायाऽस्मै क्रमेण स्वासनस्थिता । श्रीरिवावेदयत् स्वप्नान् सत्कराम्भोजकुड्मला ॥९१॥
स्वप्नार्थं सोऽवधार्यैतां जगाद दयिते ध्रुवम् । संक्रान्तोऽद्य त्रिलोकानां नाथस्तीर्थंकरस्त्वयि ॥९२॥
न दूराल्पफलप्राप्तावीदृशं स्वप्नदर्शनम् । अतोऽद्यैव प्रतीतो मे भवत्यां गर्भसम्भवः ॥९३॥
षण्मासवसुवृष्ट्या च देवतापरिचर्यया । सूचिता जिनसम्भूतिर्या साद्य फलिताऽऽवयोः ॥९४॥

फैल जाती है उसी प्रकार सूर्यकी प्रभा पहले मन्द होती है और आगे चलकर खूब फैल जाती है—सर्वत्र व्याप्त हो जाती है। जिस प्रकार सज्जनकी मित्रता सार्थक है उसी प्रकार सूर्यकी प्रभा सार्थक है ॥८२॥ भास्वर-अम्बर—देदीप्यमान आकाश ही जिसका आभूषण है (पक्षमें जिसके वस्त्र और आभूषण देदीप्यमान हैं तथा भास्वद्विशेषका—सूर्य ही जिसका तिलक है (पक्षमें देदीप्यमान तिलकसे युक्त है) ऐसी यह पूर्व दिशा सौभाग्यवती स्त्रीके समान मानो तुम्हारा मंगल करनेके लिए ही उद्यत हुई है ॥८३॥ वापिकाओंमें लम्बी रात बितानेके बाद अब सूर्यका दर्शन हुआ है इसलिए यह चकवी प्रसन्न हो अपने मधुर शब्द कर रही है अथवा मधुर शब्द करनेवाले आत्मीय जनोंको इकट्ठा कर रही है ॥८४॥ इधर मधुर शब्द करता हुआ यह कलहंसोंका समूह तुम्हें उठा रहा है जिससे ऐसा जान पड़ता है मानो तुम्हारे पादनिक्षेपकी लीलाको देखनेके लिए अत्यन्त उतावला हो रहा है ॥८५॥ जो मन्द-मन्द वायुसे हिल रहे हैं, तथा अभिनयकी मुद्राको धारण किये हैं ऐसे ये वृक्ष, आपके लिए मानो अपने नृत्यका आरम्भ ही दिखला रहे हैं ॥८६॥ हे माता ! इस समय समस्त दिशाएँ तुम्हारी चेष्टाके समान निर्मल हो गई हैं एवं सुन्दर प्रभातकाल हो गया है, इसलिए हे अनिन्दिते देवि ! शय्याको छोड़ो ॥८७॥ इस प्रकार बन्दीजनोंके द्वारा वन्दनीय, एवं निर्मल शरीरको धारण करनेवाली महारानी मरुदेवीने शय्याको उस प्रकार छोड़ा जिस प्रकार कि हंसी नदीके रेतीले तटको छोड़ती है ॥८८॥ उज्ज्वल कान्तिको धारण करनेवाली मरुदेवी धुले हुए वस्त्रको ग्रहणकर जब शयनागारसे बाहर निकली तब शरद् ऋतुके मेघसे बाहर निकली चन्द्रमाकी पतली कलाके समान सुशोभित होने लगी ॥८९॥ विद्युत्कुमारी और दिक्कुमारी देवियोंने जिसे नवीन-नवीन आभूषण पहिनाये थे तथा जो अन्तर्गतगर्भा होनेसे गृहीतजला मेघमालाके समान जान पड़ती थी ऐसी मरुदेवी नाभिराजारूपी पर्वतके समीप गई ॥९०॥ जो शोभामें लक्ष्मीके समान जान पड़ती थी ऐसी मरुदेवी वहाँ जाकर अपने आसनपर बैठी और हस्तकमल जोड़, भद्रासनपर बैठे हुए महाराजसे क्रम-पूर्वक स्वप्नोंका वर्णन करने लगी ॥९१॥

स्वप्नोंका फल समझकर महाराज नाभिराजने उससे कहा कि हे प्रिये ! निश्चय ही आज तुम्हारे गर्भमें तीन लोकके नाथ तीर्थंकरने अवतार लिया है ॥९२॥ दूरवर्ती तथा अल्प फलकी प्राप्तिके समय ऐसे स्वप्न नहीं दिखते इसलिए मुझे विश्वास है कि आज ही आपके गर्भ रहा है ॥९३॥ लगातार छह माससे होनेवाली रत्नोंकी वर्षा और देवताओंके द्वारा की हुई शुश्रूषासे

---

१. सूर्यदर्शने सति । २. धौतेवासं म० ।

सर्वथा सर्वकल्याणभाजनात्मजजन्मना । प्रिये ! त्वमचिरेणैव जगदानन्दयिष्यसि ॥९५॥
इति सुस्वप्नफलं श्रुत्वा सद्यः सम्भूतमात्मनि । मुमुदेऽतितरां देवी दीप्तिं कान्तिं च बिभ्रती ॥९६॥
तृतीयकालशेषेऽसावशीतिश्चतुरुत्तरा । पूर्वलक्षास्त्रिवर्षाष्टमासपक्षयुतास्तदा ॥९७॥
स्वर्गावतरणं जैनमाषाढबहुलस्य तु । द्वितीयामुत्तराषाढनक्षत्रेऽत्र जगन्नुतम् ॥९८॥
वर्धमाने क्रमाद् गर्भे वर्धते वपुषो वपुः । तस्यास्त्रिवलिशोभाया भङ्गभीत्येव नोदरम् ॥९९॥
गौरवातिशयाधानी दधाना त्रिजगद्गुरुम् । लाघवातिशयं देहे दध्रे चित्रमिदं परम् ॥१००॥
सन्तापहेतुरन्तःस्थो मातुर्माभूत् सुनिश्चलः । ज्ञानवान् स जिनो भानुर्यथाऽप्सु प्रतिबिम्बितः ॥१०१॥
ज्ञाननेत्रैः त्रिभिः पश्यन् विश्वं मासानसौ सुखम् । नवगर्भगृहेऽतिष्ठद्दिक्कुमारीविशोधिते ॥१०२॥
पूर्णेषु तेषु मासेषु निपतद्वसुवृष्टिषु । जिनं सा सुषुवे देवी सोत्तराषाढसन्निधौ ॥१०३॥
प्राच्या इव विशुद्धाया विशुद्धस्फटिकोपमात् । घनोदराद्विनिःक्रान्तो जिनः सूर्य इवाबभौ ॥१०४॥
जातकर्मणि कर्तव्ये व्यापृता लघुदेवताः । अन्तरङ्गा हि कर्तव्ये व्याप्रियन्ते जगत्यरम् ॥१०५॥
विजया वैजयन्ती च जयन्ती चापराजिता । नन्दा नन्दोत्तरा नन्दी नन्दीवर्धनया सह ॥१०६॥
आलोलकुण्डलालोकविलसद्गण्डमण्डलाः । एतास्ता दिक्कुमार्योऽष्टौ तस्थुर्भृङ्गारपाणयः ॥१०७॥
सुस्थिता प्रणिधान्या सुप्रबुद्धा च यशोधरा । लक्ष्मीमती तथैवान्या कीर्तिमत्युपवर्णिता ॥१०८॥

हम दोनोंको जिनेन्द्रदेवके जिस जन्मकी सूचना मिली थी वह आज सफल हुई ॥९४॥ हे प्रिये ! निश्चय ही समस्त कल्याणोंके पात्र रूप पुत्रको उत्पन्न कर तुम शीघ्र ही संसारको आनन्दित करोगी ॥९५॥ इन उत्तम स्वप्नोंका फल अपने-आपमें शीघ्र ही संघटित हो चुका है, यह सुन दीप्ति और कान्तिको धारण करती हुई मरुदेवी बहुत ही प्रसन्न हुई ॥९६॥ तीसरे कालमें जब चौरासी लाख पूर्व तीन वर्ष साढ़े आठ माह बाकी रहे थे तब आषाढ़ कृष्ण द्वितीयाके दिन उत्तराषाढ़ा नक्षत्रमें समस्त जगत्के द्वारा नमस्कृत श्री जिनेन्द्रदेवका स्वर्गावतरण हुआ था ॥९७-९८॥ क्रम-क्रमसे गर्भमें वृद्धि होनेपर माताका शरीर भी बढ़ गया परन्तु त्रिवलिकी शोभा कहीं नष्ट न हो जाय इस भयसे मानो उसके उदरमें वृद्धि नहीं हुई ॥९९॥ माता मरुदेवी स्वयं अत्यधिक गौरवसे सुशोभित थी और उसपर तीनों जगत्के गुरु—भारी (पक्षमें श्रेष्ठ) जिनेन्द्र देवको धारण कर रही थी, फिर भी वह शरीरमें अत्यधिक लघुताका अनुभव करती थी यह बड़े आश्चर्यकी बात थी ॥१००॥ मैं गर्भमें स्थिर रहकर माताके सन्तापका कारण न बनूँ यह जानकर ही मानो जिन-बालक गर्भमें अत्यन्त निश्चल रहते थे। माताके गर्भमें उनका निवास वैसा ही था जैसा कि जलमें प्रतिबिम्बित सूर्यका होता है ॥१०१॥ मति, श्रुत और अवधि इन तीन ज्ञानरूपी नेत्रोंके द्वारा जगत्को देखते हुए जिन बालक, दिक्कुमारियोंके द्वारा शुद्ध किये हुए गर्भमें नौ माह तक सुखसे स्थित रहे ॥१०२॥

तदनन्तर नौ माह पूर्ण होनेपर जब लगातार रत्नोंकी वर्षा हो रही थी तब उत्तराषाढा नक्षत्रके समय माताने जिन-बालकको उत्पन्न किया ॥१०३॥ जिस प्रकार निर्मल पूर्व दिशामें विशुद्ध स्फटिकके तुल्य मेघ मण्डलके मध्यसे निकला हुआ सूर्य सुशोभित होता है उसी प्रकार माता मरुदेवीके स्फटिकके समान स्वच्छ गर्भसे निकले हुए जिन-बालक सुशोभित हो रहे थे ॥१०४॥ उस समय वहाँ जो देवियाँ थीं वे शीघ्र ही करने योग्य जातकर्ममें लग गईं सो ठीक ही है क्योंकि जो अन्तरङ्ग व्यक्ति होते हैं वे संसारमें शीघ्र ही अपने करने योग्य काममें लग जाते हैं ॥१०५॥ चञ्चल कुण्डलोंके प्रकाशसे जिनके कपोल सुशोभित हो रहे थे ऐसी १ विजया, २ वैजयन्ती, ३ जयन्ती, ४ अपराजिता, ५ नन्दा, ६ नन्दोत्तरा, ७ नन्दी और ८ नन्दीवर्धना ये आठ दिक्कुमारी देवियाँ हाथोंमें झारियाँ लिये हुए खड़ी थीं ॥१०६-१०७॥ नाना प्रकारके आभरणोंसे सुशोभित १ सुस्थिता, २ प्रणिधान्या, ३ सुप्रबुद्धा, ४ यशोधरा, ५ लक्ष्मीमती, ६ कीर्तिमती,

वसुन्धरा तथा चित्रा चित्राभरणभास्वराः । दिक्कुमार्य इमा अष्टौ तस्थुर्दर्पणपाणयः ॥१०९॥
इला सुरा पृथिव्याख्या पद्मावत्यपि काञ्चना । सीता नवमिकाऽन्या च दिक्कन्या भद्रकाभिधा ॥११०॥
अष्टौ मुदाः प्रकृष्टाङ्गप्रभाभासितदिङ्मुखाः । धवलान्यातपत्राणि धारयन्ति स्म विस्मिताः ॥१११॥
ह्रीः श्रीः धृतिः परा सा च वारुणी पुण्डरीकिणी । अलम्बुसाम्बुजास्यश्रीर्मिश्रकेशीति विश्रुताः ॥११२॥
¹कनत्कनकदण्डानि ²कनत्कनककुण्डलाः । चामराणि गृहीत्वाष्टौ दिक्कुमार्यः स्थिता इमाः ॥११३॥
चित्रा कनकचित्रा च सूत्रामणिरिमा बभुः । त्रिशिराश्च कृतोद्योता विद्युत्कन्यास्तडित्प्रभा ॥११४॥
विजया वैजयन्ती च जयन्ती चापराजिता । इमा विद्युत्कुमारीणां चतस्रः प्रमुखाः स्थिताः ॥११५॥
रुचका दिक्कुमारीणां प्रधाना रुचकोज्ज्वला । रुचकाभाश्चतस्रस्ता रुचकप्रभया सह ॥११६॥
जातकर्म जिनस्यैताश्चक्रुरष्टौ यथाविधि । जातकर्मणि निष्णाताः सर्वत्र जिनजन्मनि ॥११७॥
आचेलुश्चलमौलीनां काले तस्मिन् सुरेशिनाम् । त्रैलोक्येऽप्यासनान्याशु जिनोद्भूतिप्रभावतः ॥११८॥
प्रणेमुरहमिन्द्रास्तं प्रयुक्तावधयो जिनम् । तत्रस्थाः सिंहपीठेभ्यो गत्वा सप्तपदान्यरम्³ ॥११९॥
लोके भावनदेवानां शङ्खध्वनिरभूत्स्वयम् । व्यन्तराणां रवो भेर्या ज्योतिषां सिंहनिस्वनः⁴ ॥१२०॥
घण्टारणन्महाघोषः कल्पलोकमतीतनत् । किंकर्तव्यत्वसंमुग्धं त्रैलोक्यमभवत्क्षणम् ॥१२१॥
आसनस्य प्रकम्पेन दध्यौ विस्मितधीस्तदा । सौधर्मेन्द्रश्चलन्मौलिर्धूत्वा मूर्धानमुन्नतम् ॥१२२॥
अतिबालेन मुग्धेन स्वतन्त्रेणाशुकारिणा । निर्भयेन विशङ्केन केनेदमप्यनुष्ठितम् ॥१२३॥

---

७ वसुन्धरा और ८ चित्रा ये आठ दिक्कुमारी देवियाँ हाथोंमें दर्पण लिये हुए खड़ी थीं ॥१०८-१०९॥ अपने शरीरकी श्रेष्ठ प्रभासे दिशाओंको सुशोभित करनेवाली १ इला, २ सुरा, ३ पृथिवी, ४ पद्मावती, ५ काञ्चना, ६ सीता, ७ नवमिका और ८ भद्रका ये आठ दिक्कुमारी देवियाँ आश्चर्यचकित हो सफेद छत्र धारण कर रही थीं ॥११०-१११॥ देदीप्यमान स्वर्णके कुण्डलोंको धारण करनेवाली १ ह्री, २ श्री, ३ धृति, ४ वारुणी, ५ पुण्डरीकिणी, ६ अलम्बुसा, ७ अम्बुजास्यश्री और ८ मिश्रकेशी ये आठ दिक्कुमारी देवियाँ देदीप्यमान सुवर्णमय दण्डोंसे युक्त चामर लेकर खड़ी थीं ॥११२-११३॥ बिजलीके समान प्रभावाली १ चित्रा, २ कनकचित्रा, ३ सूत्रामणि और ४ त्रिशिरा इन चार विद्युत्कुमारी देवियोंने सर्वत्र प्रकाश ही प्रकाश कर दिया था ॥११४॥ १ विजया, २ वैजयन्ती, ३ जयन्ती और ४ अपराजिता ये चार देवियाँ विद्युत्कुमारियोंमें प्रमुख थीं ॥११५॥ १ रुचका, २ रुचकोज्ज्वला, ३ रुचकाभा और ४ रुचकप्रभा ये चार देवियाँ दिक्कुमारियोंमें प्रधान थीं ॥११६॥ इन आठ देवियोंने विधिपूर्वक जिनेन्द्रदेवका जातकर्म किया था। ये देवियाँ जातकर्ममें अत्यन्त निपुण हैं और सब जगह जिनेन्द्र देवका जातकर्म ये ही देवियाँ करती हैं ॥११७॥ उस समय तीनों लोकोंमें जो इन्द्र थे, जिनेन्द्र जन्मके प्रभावसे उन सबके मुकुट चञ्चल हो गये और सबके आसन कम्पायमान हो उठे ॥११८॥ अवधिज्ञानका प्रयोग करनेवाले अहमिन्द्र अपने-अपने निवासस्थानोंमें ही स्थिर रहे, मात्र उन्होंने सिंहासनोंसे सात डग चलकर जिनेन्द्र भगवान्‌को शीघ्र ही परोक्ष नमस्कार किया ॥११९॥ भवनवासी देवोंके लोकमें अपने-आप शङ्खोंका शब्द, व्यन्तरोंके लोकमें भेरीका शब्द और ज्योतिषी देवोंके लोकमें सिंहोंके शब्द होने लगे ॥१२०॥ श्रेष्ठ घण्टाओंके जोरदार शब्दने कल्पवासी देवोंके लोकको व्याप्त कर लिया। उस समय तीनों लोक 'क्या करना चाहिए' यह विचार करनेमें तत्पर हो गये ॥१२१॥ उस समय आसनके कम्पायमान होनेसे जिसकी बुद्धि चकित हो गई थी ऐसा सौधर्मेन्द्र मुकुट हिलाकर तथा ऊँचे मस्तकको कँपाकर विचार करने लगा कि उत्पन्न बालक, मूर्ख, स्वच्छन्द, सहसा कार्य करनेवाले निर्भय एवं शङ्कारहित किस व्यक्तिने यह कार्य किया

---

१. क्वणत् म० । २. क्वणत् म० । ३. अरं शीघ्रं सप्तपदानि गत्वा । सप्तपदान्यरम् म० ।
४. निस्वनाः म० ।

देवदानवचक्रस्य स्वपराक्रमशालिनः । कथञ्चित्प्रतिकूलस्य यः समर्थः कदर्थने ॥१२४॥
इन्द्रः पुरन्दरः शक्रः कथं न गणितोऽधुना । सोऽहं कम्पयताऽनेन सिंहासनमकम्पनम् ॥१२५॥
सम्भावयामि नेदृक्प्रभावं भुवनत्रये । प्रभुं तीर्थङ्करादन्यमिति मत्वा श्रितोऽवधिम् ॥१२६॥
ततो विस्फुरितेनायमवधिज्ञानचक्षुषा । तं तीर्थंकरमुत्पन्नमाद्यमैक्षिष्ट भारते ॥१२७॥
आसनादवतीर्याशु क्रान्त्वा सप्तपदानि सः । जयतां जिन इत्युक्त्वा प्रणनाम कृताञ्जलिः ॥१२८॥
पुनश्चासनमारुह्य समाज्ञापयति स्म सः । ध्यानानन्तरमागम्य स्थितं सेनापतिं पुरः ॥१२९॥
अस्यामाद्योऽवसर्पिण्यां जातस्तीर्थकरोऽधुना । गन्तव्यं भारतं देवैर्बोध्यन्तां[1] ते त्वया त्विति ॥१३०॥
स्वाम्यादेशे कृते तेन चेलुः सौधर्मवासिनः । देवैश्चाच्युतपर्यन्ताः स्वयम्बुद्धाः सुरेश्वराः ॥१३१॥
यथास्वस्वं निमित्तेभ्यः प्रतिबुद्धाः प्रहर्षिणः । निश्चेलुर्निजलोकेभ्यो ज्योतिर्व्यन्तरभावनाः ॥१३२॥
गजाश्वरथसत्कृष्टपदातिवृषभैस्तदा । गन्धर्वनर्तकीमिश्रैः सप्तानीकैश्चितं नभः ॥१३३॥
महिषाद्यैश्च नावाद्यैः खड्गाद्यैर्गरुडादिभिः । शिविकाश्वोष्ट्रमकरद्विपहंसादिभिस्तथा ॥१३४॥
दशानामसुरादीनां कुमाराणां यथाक्रमम् । सप्तानीकैर्नभो व्याप्तं बभासे नितरां तदा ॥१३५॥
विमानानि समारूढा गोवृषान् गवयान् रथान् । अश्वान् शरभशार्दूलान् मकरान् करभान् सुराः ॥१३६॥
वराहमहिषान् सिंहान् पृषतान् द्वीपिनो द्विपान् । चमरान् हरिणांश्चारुहरुरून् केचिद् गरुत्मतः ॥१३७॥

है ? ॥१२२–१२३॥ अपने पराक्रमसे सुशोभित देव-दानवोंका समूह भी यदि कदाचित् प्रतिकूल हो जावे तो उसे भी जो नष्ट करनेमें समर्थ है ऐसा मैं इन्द्र, शक्र या पुरन्दर हूँ फिर मेरे अकम्पित आसनको कम्पित करनेवाले इस मूर्खने इस समय मुझे कुछ क्यों नहीं समझा ? १२४–१२५॥ मैं तीनों लोकोंमें तीर्थंकरके सिवाय किसी दूसरे प्रभुको ऐसे प्रभावसे युक्त नहीं समझता हूँ, ऐसा विचारकर उसने अवधिज्ञानका आश्रय लिया ॥१२६॥

तदनन्तर सौधर्मेन्द्रने प्रकट हुए अवधिज्ञान रूपी नेत्रके द्वारा भरत क्षेत्रमें उत्पन्न हुए प्रथम तीर्थङ्करको देख लिया ॥१२७॥ उसने शीघ्र ही आसनसे उतरकर तथा सात डग आगे जाकर 'जिनेन्द्र भगवान्‌की जय हो' यह कहते हुए हाथ जोड़कर उन्हें प्रणाम किया ॥१२८॥ तद-नन्तर सिंहासनपर आरूढ़ हो सौधर्मेन्द्रने विचार करते ही नमस्कार कर सामने खड़े हुए सेनापति-को आदेश दिया कि 'इस समय इस अवसर्पिणीके प्रथम तीर्थङ्कर उत्पन्न हो चुके हैं अतः समस्त देवोंको भरतक्षेत्र चलना है'। तुम यह सूचना सबके लिए दे दो ॥१२९–१३०॥ सेनापतिके द्वारा स्वामीका आदेश सुनाये जाते ही सौधर्म स्वर्गमें रहनेवाले समस्त देव चल पड़े। तथा अच्युत स्वर्ग तकके समस्त इन्द्र स्वयं ही इस समाचारको जान देवोंके साथ बाहर निकले ॥१३१॥ अपने-अपने स्थानोंमें होनेवाले निमित्तोंसे जिन्हें जिनेन्द्र जन्मका समाचार ज्ञात हुआ था, ऐसे हर्षसे भरे हुए ज्योतिषी व्यन्तर और भवनवासी देव अपने-अपने स्थानोंसे बाहर निकले ॥१३२॥ उस समय १ हाथी, २ घोड़ा, ३ रथ, ४ पैदल सैनिक, ५ बैल, ६ गन्धर्व और नर्तकी इन सात प्रकार-की सेनाओंसे आकाश व्याप्त हो गया था ॥१३३॥ असुर कुमार आदि दश प्रकारके भवनवासी देवोंकी भैंसा, नौका, गेंडा, हाथी, गरुड़, पालकी, घोड़ा, ऊँट, मगर, हाथी और हंसको आदि लेकर क्रमसे जो सात प्रकारकी सेनाएँ थीं उन सबसे व्याप्त हुआ आकाश उस समय अत्यन्त सुशोभित हो रहा था ॥१३४–१३५॥ उन देवोंमें कितने ही देव विमानोंमें बैठे थे, कितने ही बैलोंपर, कितने ही रोझोंपर, कितने ही रथोंपर, कितने ही घोड़ोंपर, कितने ही अष्टापद और शार्दूलोंपर, कितने ही मगरोंपर, कितने ही ऊँटोंपर, कितने ही वराह और भैंसोंपर, कितने ही सिंहोंपर, कितने ही हरिणोंपर, कितने ही चीतोंपर, कितने ही हाथियोंपर, कितने ही सुरागायोंपर, कितने ही सामान्य हरिणोंपर, कितने ही श्याम हरिणोंपर, कितने ही गरुड़ोंपर, कितने ही तोताओं-

1. बोध्यतामिति म० ।

शुकान् परभृतान् क्रौञ्चान् कुररान् शिखिकुक्कुटान् । परे पारावतान् हंसान् सकारण्डवसारसान् ॥१३८॥
चक्रवाकबलाकौघान् बकादीन् समधिष्ठिताः । चतुर्देवनिकायास्ते सह जग्मुरितस्ततः ॥१३९॥
श्वेतच्छत्रैर्ध्वजैश्चित्रैश्चामरैः फेनपाण्डुरैः । कुर्वाणाः सर्वमाकाशं समाकीर्णं निरन्तरम् ॥१४०॥
भेरीदुन्दुभिशङ्खादिरवापूरितविष्टपम् । नृत्यगीतैर्युतं रेजे देवागमनमद्भुतम् ॥१४१॥
सौधर्मेन्द्रस्तदारूढो गजानीकाधिपं गजम् । ऐरावतं विकुर्वाणमाकाशाकारवद्वपुः ॥१४२॥
प्रोद्दन्तान्तरनिष्क्रान्तकरास्फारितपुष्करम् । प्रोद्वंशाङ्कुरमध्योद्यद्भोगीन्द्रमिव भूधरम् ॥१४३॥
कर्णचामरशङ्खाङ्कं कक्षानक्षत्रमालिनम् । बलाकाहंसविद्युद्भिरिव भ्रान्तं[1] मरुत्पथम्[2] ॥१४४॥
आरूढवारणेन्द्राणामिन्द्राणां निवहैर्युतः । जन्मक्षेत्रं जिनस्यासौ पवित्रं प्राप्तवान् सुरैः ॥१४५॥
नभसोऽवतरन्ती वै सा सुरासुरसन्ततिः । कुबेरकृतमद्राक्षीत् पुरं स्वर्गमिव क्षितौ ॥१४६॥
वप्रप्राकारपरिखापरिक्षेपमनोहरम् । सोद्यानकाननारामसरोवापीविराजितम् ॥१४७॥
इन्द्रनीलमहानीलवज्रवैडूर्यभित्तयः । प्रासादाः पद्मरागादिप्रभाढ्या यत्र रेजिरे ॥१४८॥
सुराणामसुराणां च तत्पुरश्रीविलोकिनाम् । मनोऽभूद्[3] दूरितोत्कण्ठं स्वर्गपातालजश्रियः ॥१४९॥
यतः साकमितं यत्प्राक् सुरासुरजगत्त्रयम् । पुरं तत्कीर्तिमत्तस्मात्साकेतमिति कीर्तितम् ॥१५०॥

पर, कितने ही कोकिलाओंपर, कितने ही क्रौञ्च पक्षियोंपर, कितने ही कुररोंपर, कितने ही मयूरों और मुर्गोंपर, कितने ही कबूतरों, हंसों, कारण्डव और सारसोंको, कितने ही चकवा और बलाकाओंके समूहपर और कितने ही बगुला आदि जीवोंपर बैठे थे। इस प्रकार उस समय चारों निकायके देव इधर-उधर जा रहे थे ॥१३६-१३९॥ सफेद छत्रों, नाना प्रकारकी ध्वजाओं, और फेनके समान सफेद चमरोंसे समस्त आकाशको व्याप्त करते हुए वे चारों निकायके देव जहाँ-तहाँ चल रहे थे ॥१४०॥ भेरी, दुन्दुभि तथा शङ्ख आदिके शब्दोंसे जिसने समस्त लोकको भर दिया था तथा जो नृत्य और गीतसे युक्त था, ऐसा वह देवोंका आश्चर्यकारी आगमन अत्यधिक सुशोभित हो रहा था ॥१४१॥

उस समय सौधर्मेन्द्र, हाथियोंकी सेनाके अधिपति तथा आकाशके समान अपने शरीरकी विक्रिया करनेवाले ऐरावत हाथीपर आरूढ़ था ॥१४२॥ वह ऐरावत, दोनों खीसोंके बीच उठी हुई सूँड़के अग्रभागको फैलाये हुए था, अतएव जिसके बाँसोंके अंकुरोंके बीच सर्पराज ऊपरकी ओर उठ रहा था, ऐसे पर्वतके समान जान पड़ता था ॥१४३॥ वह ऐरावत ठीक आकाशके समान जान पड़ता था क्योंकि जिस प्रकार आकाश, बलाका, हंस और बिजलियोंसे युक्त होता है, उसी प्रकार वह हाथी भी कर्ण, चामर, शङ्ख तथा कक्षामें लटकती हुई नक्षत्रमालासे युक्त था ॥१४४॥ अन्य—दूसरे गजराजोंपर बैठे हुए इन्द्रोंके समूहसे युक्त सौधर्मेन्द्र, समस्त देवोंके साथ-साथ जिनेन्द्र भगवान्के पवित्र जन्मक्षेत्रको प्राप्त हुआ ॥१४५॥ आकाशसे उतरती हुई उस सुर और असुरोंकी पङ्क्तिने पृथिवीपर कुबेरके द्वारा निर्मित नगरको ऐसा देखा मानो स्वर्ग ही हो ॥१४६॥ वह नगर धूलिके बन्धान, कोट और परिखाके चक्रसे मनोहर था तथा उद्यान, वन, आराम, सरोवर और वापिकाओंसे अलंकृत था ॥१४७॥ इन्द्रनील, महानील, हीरा और वैडूर्यमणिकी दीवालोंसे युक्त तथा पद्मराग आदि मणियोंकी प्रभासे परिपूर्ण वहाँके भवन अत्यधिक सुशोभित हो रहे थे ॥१४८॥ उस नगरकी शोभा देखनेवाले सुर और असुरोंका मन स्वर्ग तथा पाताल सम्बन्धी शोभाके देखनेकी उत्कण्ठा दूर कर चुका था ॥१४९॥ क्योंकि सुर, असुर आदि तीनों जगत्के जीव वहाँ पहले एक साथ पहुँचे थे इसलिए वह कीर्तिशाली नगर उस समयसे 'साकेत' इस नामसे प्रसिद्ध हुआ था ॥१५०॥

---

१. तान्तं म० । २. महत्पथम् म० । ३. दुरितोत्कण्ठ- म० ।

ततः समं पुरं देवैस्त्रिःपरीत्य पुरन्दरः । प्रविश्य जिनमानेतुमादिदेश शचीं शुचिम् ॥१५१॥
लब्धादेशा जनन्याः सा प्रविश्य प्रसवालयम् । सुखनिद्रां विधायान्यं शिशुं च सुरमायया ॥१५२॥
प्रणम्य जिनमादाय चकार करयोर्हरेः । तद्रूपातिशयं पश्यन् सहस्राक्षो न तृप्तिमैत्[1] ॥१५३॥
आरोप्य जिनमात्माङ्कमैरावतगजे स्थितः । सोऽभ्यभादुदितादित्यः शिखरात्मेव नैषधः ॥१५४॥
छत्रच्छायापटच्छन्नं चामरोत्करवीजितम् । जिनं निनाय देवौघैः सुमेरुशिखरं हरिः ॥१५५॥
समप्रदक्षिणमागत्य पाण्डुकाख्यशिलातले । सिंहासने जिनं शक्रश्चक्रे चक्रेण नाकिनाम् १५६॥
क्षुभिताम्भोधिगम्भीरा भेरीपटहमर्दलाः । ताडिताः समृदङ्गाद्याः सुरैः शङ्खाश्च पूरिताः ॥१५७॥
जगुः किन्नरगन्धर्वाः स्त्रीभिस्तुम्बुरुनारदाः । सविश्वावसवो विश्वे चित्रं श्रोत्रमनोहरम् ॥१५८॥
[2]ततं च विततं चैव घनं सुषिरमप्यकम् । मनोहारि तदा देवैर्वाद्यते स्म चतुर्विधम् ॥१५९॥
हावभावाभिरामं च नृत्यमप्सरसामभूत् । अङ्गहारकृतासङ्गं शृङ्गारादिरसाद्भुतम् ॥१६०॥
इत्थं तत्र महानन्दे देवसङ्घैः प्रवर्तिते । पूरिते प्रतिशब्दैश्च मन्दरे रुन्द्रकन्दरे ॥१६१॥
कृताऽऽकल्पेऽभिषेकार्थं सौधर्मेन्द्रे ससम्भ्रमे । साष्टमङ्गलहस्तासु प्र[3]शस्तामरयोषित्सु ॥१६२॥
[4]सघटैः सुरसङ्घातैर्महावेगैर्महाघनैः । सर्वदिक्षु गतैः क्षिप्रं क्षोभितः क्षीरसागरः ॥१६३॥

तदनन्तर देवोंके साथ-साथ उस नगरकी तीन प्रदक्षिणाएँ देकर सौधर्मेन्द्रने भीतर प्रवेश किया और पवित्र जिनेन्द्रको लानेके लिए इन्द्राणीको आज्ञा दी ॥१५१॥ इन्द्रको आज्ञा पाते ही इन्द्राणीने माताके प्रसूति गृहमें प्रवेश किया और देवकृत मायासे माताको सुखनिद्रामें निमग्न कर उसके पास मायामयी दूसरा बालक लिटा दिया ॥१५२॥ तत्पश्चात् प्रणाम करनेके बाद जिन-बालकको लेकर उसने इन्द्रके हाथोंमें सौंपा। इन्द्रने हजार नेत्र बनाकर उनका अतिशय सुन्दर रूप देखा फिर भी वह तृप्तिको प्राप्त नहीं हुआ ॥१५३॥ जिन बालकको अपनी गोदमें रखकर ऐरावत हाथीपर बैठा हुआ सौधर्मेन्द्र उस समय ऐसा सुशोभित हो रहा था मानो सूर्योदयसे सहित निषधाचलका शिखर ही हो ॥१५४॥ जो छत्रकी छायारूपी वस्त्रसे आच्छादित थे तथा जिनकी दोनों ओर चामरोंके समूह ढोले जा रहे थे, ऐसे जिन बालकको सौधर्मेन्द्र देव-समूहके साथ सुमेरुके शिखरपर ले गया ॥१५५॥ इन्द्रने पहले आकर देव समूहके साथ मेरु पर्वतकी प्रदक्षिणा दी फिर पाण्डुक शिलापर स्थित सिंहासनपर जिन-बालकको विराजमान किया ॥१५६॥ उस समय देवोंने क्षोभको प्राप्त हुए समुद्रके समान गम्भीर शब्दवाले भेरी, पटह, मर्दल तथा मृदङ्ग आदि बाजे बजाये और शङ्ख फूँके ॥१५७॥ किन्नर, गन्धर्व, तुम्बुरु, नारद तथा विश्वावसु जातिके समस्त देव अपनी-अपनी स्त्रियोंके साथ कानों एवं हृदयको हरनेवाले भाँति-भाँतिके गान गाने लगे ॥१५८॥ उस समय देव तत*, वितत, घन और सुषिर नामके चारों मनोहारी बाजे बजा रहे थे ॥१५९॥ हाव-भावसे सुन्दर, अङ्गहारोंसे युक्त तथा शृङ्गारादि रसोंसे आश्चर्य उत्पन्न करनेवाला अप्सराओंका नृत्य हो रहा था ॥१६०॥ इस प्रकार जब वहाँ देव-समूहके द्वारा महान् आनन्द मनाया जा रहा था। लम्बी-चौड़ी गुफाओंसे युक्त मेरु पर्वत उनकी प्रतिध्वनिसे गूँज रहा था, हर्षसे भरा सौधर्मेन्द्र अभिषेकके लिए योग्य वेष धारण कर रहा था, और उत्तम देवाङ्गनाएँ अपने

१. प्राप।
२. ततं वीणादिकं वाद्यं सानद्धं मुरजादिकम्।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ अमरकोषस्य
३. मनोहरदेवस्त्रीषु। ४. सङ्घटैः म०।

*तारके बाजे वीणा आदिको तत कहते हैं। चमड़ेसे मढ़े हुए नगड़ा मृदङ्ग आदि वितत कहलाते हैं। झालर झाँझ मँजीरा आदि काँसेके बाजोंको घन कहते हैं और शङ्ख बाँसुरी आदि सुषिर कहलाते हैं।

क्षीरपूर्णाः सुरैः सिता राजताः करतः करम् । सौवर्णाश्च बभुः कुम्भाश्चन्द्रार्का इव मेरुगाः ॥१६४॥
कुम्भैर्निरन्तराराबैर्बहुदेवसहस्रकैः । क्षीराम्भोभिर्जिनेन्द्रस्य चक्रे जन्माभिषेचनम् ॥१६५॥
ऐन्द्राः कुम्भमहाम्भोदा दुग्धाम्भोऽम्बरवर्षिणः । शिशोर्जिनगिरेरासन् तदाऽऽयासहेतवः ॥१६६॥
जिनोच्छ्वासमुहुः क्षिप्तक्षीरवारिप्लवेरिताः । प्लवन्ते स्म क्षणं देवाः क्षीरौघे मक्षिकौघवत् ॥१६७॥
दृष्टः सुरगणैर्यः प्राग् मन्दरो रत्नपिञ्जरः । स एव क्षीरपूरौघैर्धवलीकृतविग्रहः ॥१६८॥
तदाऽत्यन्तपरोक्षोऽपि प्रत्यक्षः क्षीरवारिधिः । कृतः खेचरसङ्घातैर्जिनजन्माभिषेचने ॥१६९॥
स्नानासनमभून्मेरुः स्नानवारि पयोम्बुधेः । स्नानसम्पादका देवाः स्नानमीदृग् जिनस्य तत् ॥१७०॥
इन्द्रसामानिकानेकलोकपालादयोऽमराः । क्रमेण चक्रुरम्भोभिरभिषेकं पयोम्बुधेः ॥१७१॥
अत्यन्तसुकुमारस्य जिनस्य सुरयोषितः । शच्याद्याः पल्लवस्पर्शसुकुमारकरास्ततः ॥१७२॥
दिव्यामोदसमाकृष्टषट्पदौघानुलेपनैः । उद्वर्तयन्त्यस्ताः प्रापुः शिशुस्पर्शसुखं नवम् ॥१७३॥
ततो गन्धोदकैः कुम्भैरभ्यषिञ्चन् जगत्प्रभुम् । पयोधरभराक्रान्ता वर्षा इव भूभृतम् ॥१७४॥
समं च चतुरस्रं च संस्थानं दधतः परम् । सुवज्रर्षभनाराचसंहातसुघनात्मनः ॥१७५॥
कर्णावक्षतकायस्य कथञ्चिद् वज्रपाणिना । विद्धौ वज्रघनौ तस्य वज्रसूचीमुखेन तौ ॥१७६॥
कृताभ्यां कर्णयोरीशः कुण्डलाभ्यामभात्ततः । जम्बूद्वीपः सुभानुभ्यां सेवकाभ्यामिवान्वितः ॥१७७॥

हाथोंमें अष्ट मङ्गल द्रव्य धारण कर रही थीं, तब महावेगशाली देवोंके समूह घट लेकर विशाल मेघोंके समान समस्त दिशाओंमें फैल गये और उन्होंने क्षीरसागरको क्षोभित कर दिया ॥१६१-१६३॥ क्षीरसे भरे चाँदी और सोनेके कलश देवों द्वारा एक हाथसे दूसरे हाथमें दिये जाकर सुमेरु पर्वतपर पहुँच रहे थे और वे चन्द्र तथा सूर्यके समान सुशोभित हो रहे थे ॥१६४॥ निरन्तर शब्द करनेवाले एवं क्षीर सागरके जलसे भरे हुए कलशोंके द्वारा हजारों देवोंने जिनेन्द्र भगवान्‌का अभिषेक किया ॥१६५॥ उस समय इन्द्रोंके कलशरूपी महामेघ जिनबालक रूपी पर्वतके ऊपर क्षीरोदककी वर्षा कर रहे थे परन्तु वे उन्हें रञ्च मात्र भी खेदके कारण नहीं हुए थे ॥१६६॥ भगवान्‌के श्वासोच्छ्वाससे बार-बार उछाले हुए क्षीरोदकके प्रवाहसे प्रेरित देव, उस क्षीरोदकके समूहमें क्षण भरके लिए मक्खियोंके समूहके समान तैरने लगते थे ॥१६७॥ देवोंके समूहने पहले जिस मेरुको रत्नोंसे पीला देखा वही उस समय क्षीरोदकके पूरसे सफेद दिखने लगा था ॥१६८॥ यद्यपि क्षीरसागर अत्यन्त परोक्ष है तथापि जिनेन्द्रके जन्माभिषेकके समय देवोंके समूहने उसे प्रत्यक्ष कर दिखाया था ॥१६९॥ जिसमें मेरु पर्वत स्नानका आसन था, क्षीर समुद्रका क्षीर स्नान जल था, और देव स्नान करानेवाले थे ऐसा वह भगवान्‌का स्नान था ॥१७०॥ इन्द्र सामानिक तथा लोकपाल आदि अनेक देवोंने क्षीरसागरके जलसे भगवान्‌का क्रम पूर्वक अभिषेक किया था ॥१७१॥

तदनन्तर जिनके हाथ पल्लवोंके समान अत्यन्त सुकुमार थे, ऐसी इन्द्राणी आदि देवियोंने अतिशय सुकुमार जिन-बालकको अपनी दिव्य सुगन्धिसे भ्रमर समूहको आकृष्ट करनेवाले अनुलेपनसे उबटन किया और इस तरह उन्होंने जिन-बालकके स्पर्शसे समुत्पन्न नूतन सुख प्राप्त किया ॥१७२-१७३॥ तदनन्तर पयोधरभार—मेघोंके भारसे नम्रीभूत वर्षा ऋतु जिस प्रकार पर्वतका अभिषेक करती है उसी प्रकार पयोधरभार—स्तनोंके भारसे नम्रीभूत देवियोंने सुगन्धित जलसे भरे कलशों द्वारा भगवान्‌का अभिषेक किया ॥१७४॥ जो परम सुन्दर समचतुरस्र संस्थानको धारण कर रहे थे तथा वज्रर्षभ नाराच संहननसे जिनका शरीर अत्यन्त सुदृढ़ था, ऐसे अक्षतकाय जिन-बालकके वज्रके समान मजबूत कानोंको इन्द्र वज्रमयी सूचीकी नोंकसे किसी तरह वेध सका था ॥१७५-१७६॥ तदनन्तर कानोंमें पहिनाये हुए दो कुण्डलोंसे भगवान् उस तरह सुशोभित हो रहे थे जिस तरह कि सदा सेवा करनेवाले दो सूर्योंसे जम्बूद्वीप

चूलायां स्निग्धनीलायां पद्मरागमणिः कृतः । परभागमसौ लेभे हरिनीलमणौ[1] यथा ॥१७८॥
ललाटपट्टविन्यस्ता सितचन्दनचर्चिका । रराजार्धेन्दुरेखेव सन्ध्यापीताभ्रवर्तिनी ॥१७९॥
सुरत्नहेमकेयूरभूषितौ च भुजौ मृदू । रेजतुः सफणारत्नाविव बालभुजङ्गमौ ॥१८०॥
प्रकोष्ठौ ज्येष्ठमाणिक्यकटकप्रकटप्रभौ । अभातां रत्नशैलस्य तटाविव सुराश्रितौ ॥१८१॥
स्थूलमुक्ताफलेनास्य रेजे हारेण हारिणा । वक्षःस्थलं महीध्रस्य निर्झरेणेव सत्तटम् ॥१८२॥
बभौ प्रालम्बसूत्रेण[2] भास्वद्रत्नमयेन सः । कल्पद्रुम इवाश्लिष्टः कान्तकल्पलतात्मना ॥१८३॥
विचित्रस्योपरिस्थेन कटिसूत्रेण वाससः । बभौ कटीतटीवाद्रेरभ्रस्य तडिदर्चिषा[3] ॥१८४॥
चरणौ मणिसङ्कीर्णरणच्चरणभूषणौ । परस्परसमालापं कुर्वाणाविव रेजतुः ॥१८५॥
मुद्रिकाभरणेनाभाद् रत्नहेमात्मना गलत्[4] । स्वाङ्गुलीबहुलावण्यरक्षामुद्रीकृतेन वा ॥१८६॥
दिग्धश्चन्दनपङ्केन कुङ्कुमस्थासकाचितः । [5]सन्ध्यापीताभ्रलेशाक्तस्फटिकाद्रिरिवाबभौ ॥१८७॥
उत्तरीयाम्बरं स्वच्छं हंसमालोज्ज्वलं सृतः । शुशुभेऽसौ शुभाकारः शरद्धन इवामलः ॥१८८॥
सन्तानपारिजातादिदेवलोकतरूद्भवैः । जलस्थलोद्भवैर्नानासुरभिप्रसवैः शुभैः ॥१८९॥
भद्रशालवनोद्भूतैर्नन्दनवनसम्भवैः । पुष्पैः सौमनसोद्भूतैः सपाण्डुकवनोद्भवैः ॥१९०॥

सुशोभित होता है ॥१७७॥ भगवान्‌की चिकनी एवं नीली चोटीपर धारण किया पद्मराग मणि, ऐसा वर्णोत्कर्षको प्राप्त हो रहा था मानो इन्द्रनील मणिके ऊपर ही धारण किया गया हो ॥१७८॥ भगवान्‌के ललाट पटपर बनाई हुई सफेद चन्दनकी खौर, संध्याके पीले बादलोंके बीच वर्तमान अर्धचन्द्रकी रेखाके समान सुशोभित हो रही थी ॥१७९॥ उत्तम रत्नोंसे खचित स्वर्णमय बाजूबन्दोंसे सुशोभित उनकी दोनों कोमल भुजाएँ फणाके मणियोंसे सहित दो बाल सर्पोंके समान जान पड़ती थीं ॥१८०॥ उत्तम मणिमय कड़ोंसे जिनकी शोभा बढ़ रही थी ऐसी उनकी दोनों कलाइयाँ, देवोंसे आश्रित रत्नाचलके दो तटोंके समान सुशोभित हो रही थीं ॥१८१॥ जिसमें बड़े-बड़े मोती लगे हुए थे ऐसे सुन्दर हारसे उनका वक्षःस्थल उस तरह सुशोभित हो रहा था जिस तरह कि झरनेसे किसी पर्वतका उत्तम तट सुशोभित होता है ॥१८२॥ देदीप्यमान रत्नोंसे निर्मित प्रालम्ब सूत्रसे भगवान् उस तरह सुशोभित हो रहे थे जिस तरह कि सुन्दर कल्पलतासे वेष्टित कल्पवृक्ष सुशोभित होता है ॥१८३॥ रङ्ग-विरङ्गे वस्त्रके ऊपर स्थित कटिसूत्रसे भगवान्‌की कटि ऐसी जान पड़ती थी मानो मेघके ऊपर स्थित बिजलीकी किरणसे शोभित किसी पर्वतकी तटी ही हो ॥१८४॥ जिनमें रुनझुन करनेवाले मणिमय आभूषण पहिनाये गये थे, ऐसे उनके दोनों चरण परस्पर वार्तालाप करते हुएके समान जान पड़ते थे ॥१८५॥ रत्न-जटित स्वर्णमय मुद्रियोंसे वे ऐसे सुशोभित हो रहे थे मानो अपनी अङ्गुलियोंसे टपकते हुए अत्यधिक सौन्दर्यकी रक्षाके निमित्त उनपर मुद्रा (मुहर) ही लगा दी हो ॥१८६॥ पहले तो भगवान्‌पर चन्दनका लेप लगाया और उसके ऊपर केशरके तिलक लगाये गये जिससे वे संध्याकालके पीले-पीले मेघखण्डोंसे युक्त स्फटिकके पर्वतके समान सुशोभित होने लगे ॥१८७॥ स्वच्छ एवं हंसमालाके समान उज्ज्वल उत्तरीय वस्त्रको धारण किये हुए भगवान् शुभ आकारवाले, शरद्‌ऋतुके निर्मल मेघके समान जान पड़ते थे ॥१८८॥ उस समय माला बनानेके कौशलमें अत्यन्त निपुण देवांगनाओंके द्वारा सन्तानक, पारिजात, आदि देवलोकके वृक्षोंसे उत्पन्न पुष्पोंसे, जल-स्थल सम्बन्धी नाना प्रकारके शुभ सुगन्धित पुष्पोंसे तथा भद्रशाल, नन्दन, सौमनस और पाण्डुक वनके पुष्पोंसे गूँथी हुई मुण्डमालाके अग्रभागको अलंकृत करनेवाली मालासे वे सुमेरुके आभूषण भगवान्

---

१. तनौ म० । २. 'कटिभागादवालम्बि प्रालम्बं सूत्रमुच्यते' ॥ इति क० पुस्तके टिप्पणी । ३. तडिदर्चिषः म० । ४. गलत् म०, गलच्च तत्स्वाङ्गुली बहुलावण्यं च तस्य रक्षार्थं मुद्रीकृतेनेव (क०टि०) । ५. सन्ध्याभ्रदभ्रलेशाक्त ख०, घ०, ग० ।

ग्रन्थितेन सुरस्त्रीभिर्माल्यकौशल[1]चुञ्चुभिः । मण्डितो मुण्डमालाग्रमण्डनेनाद्रिमण्डनः ॥१९१॥
भद्रशालो जगत्युच्चैर्जगतामभिनन्दनः । सोऽभात्सौमनसोऽखण्डयशसा पाण्डुकः स्वयम् ॥१९२॥
विशेषको भुवामीशो विशेषकविभूषितः । विशेषतो बभौ देवविशेषकविभूषितः ॥१९३॥
शिशोर्निरञ्जनस्यास्ये स्वञ्जनाञ्जितलोचने । परं जितार्कचन्द्राभिदीप्तिकान्ती बभूवतुः ॥१९४॥
श्रीशचीकीर्तिलक्ष्मीभिः स्वहस्तैः कृतमण्डनः । स तथाऽऽखण्डलादीनां देवानामहरन्मनः ॥१९५॥
ततस्तमृषभं नाम्ना प्रधानपुरुषं सुराः । युगाद्यमभिधायेत्थं शक्राद्याः स्तोतुमुद्यताः ॥१९६॥
मतिश्रुतावधिश्रेष्ठचक्षुषा वृषभ ! त्वया । जातेन भारते क्षेत्रे द्योतितं भुवनत्रयम् ॥१९७॥
नृभवाभिमुखेनैव भवताऽद्भुतकर्मणा । आवर्जितं जगद् येन किं जातस्यैतदद्भुतम् ॥१९८॥
पादाधःस्थापितोत्तुङ्गमानशृङ्गमहागुरुः । महागुरुस्त्वमीशानां शैशवेऽप्यशिशुस्थितिः ॥१९९॥
अस्पृशन्तो भुवं सर्वां पादाग्रैः सुरपर्वताः । पादौ मुकुटकूटोच्चैःशिरोभिस्ते वहन्त्यमी ॥२००॥
मन्त्रशक्तिरियं किन्नु प्रभुशक्तिस्तथाऽथवा । प्रोत्साहशक्तिराहोस्वित् किमप्यन्यन्महाद्भुतम् ॥२०१॥
पौरुषाधिकमानीतं त्वया नाथ जगत्त्रयम् । कथमेकपदे विश्वं विधिनेव विधीयताम् ॥२०२॥

अत्यधिक सुशोभित हो रहे थे ॥१८९–१९१॥ वे भगवान् भद्रशाल, नन्दन, सौमनस और पाण्डुक इन चारों वन-स्वरूप सुशोभित थे। भद्रशाल इसलिए थे कि उनकी शाला अर्थात् प्रासाद भद्र अर्थात् उत्तम था। नन्दन इसलिए थे कि जगत्‌के सब जीवोंको अत्यधिक आनन्दित करनेवाले थे, सौमनस इसलिए थे कि उत्तम हृदयको धारण करनेवाले थे और पाण्डुक इसलिए थे कि वे स्वयं यशसे पाण्डुक—सफेद हो रहे थे ॥१९२॥ जो तीनों लोकोंमें विशेषक अर्थात् तिलकके समान श्रेष्ठ थे, जो विशेषकों अर्थात् तिलकोंके द्वारा सुशोभित थे और जो देव-विशेषक अर्थात् विशिष्ट देवोंके द्वारा विभूषित किये गये थे ऐसे भगवान् उस समय विशेष रूपसे शोभायमान हो रहे थे ॥१९३॥ यद्यपि जिन-बालक स्वयं निरञ्जन—कज्जल (पक्षमें पाप) से रहित थे तो भी उनके मुखपर जो नेत्र थे वे उत्तम अञ्जन—कज्जलसे अलंकृत थे और सूर्य तथा चन्द्रमाकी दीप्ति एवं कान्तिको जीतनेवाले थे ॥१९४॥ श्री, शची, कीर्ति तथा लक्ष्मी नामक देवियोंने अपने हाथोंसे उन्हें उस तरह अलंकृत किया था कि जिससे वे इन्द्रादिक देवोंका मन हरण करने लगे थे ॥१९५॥ तदनन्तर युगके आदिमें हुए उन प्रधान पुरुषका ऋषभ नाम रखकर इन्द्र आदि देव उनकी इस प्रकार स्तुति करनेके लिए तत्पर हुए ॥१९६॥

हे ऋषभदेव ! मति श्रुत और अवधिज्ञान रूपी श्रेष्ठ नेत्रोंको धारण करनेवाले आप यद्यपि भरतक्षेत्रमें उत्पन्न हुए हैं फिर भी आपने तीनों लोकोंको प्रकाशमान कर दिया है ॥१९७॥ हे भगवन् ! जब आप मनुष्य-भवमें आनेके लिए सन्मुख ही थे तभी रत्नवृष्टि आदि अद्भुत कार्य दिखाकर आपने जगत्‌को आधीन कर लिया था फिर अब तो आप मनुष्य-भवमें स्वयं उत्पन्न हुए, अब आश्चर्यकी बात ही क्या है ? ॥१९८॥ हे नाथ ! बहुत बड़े शिखर (पक्षमें मान रूपी शिखर) से युक्त सुमेरु पर्वतको भी आपने अपने पैरके नीचे दबा दिया इसलिए आप समस्त स्वामियोंमें महागुरु अत्यन्त श्रेष्ठ हैं। और बालक अवस्थामें भी बालकों जैसी आपकी चेष्टा नहीं है ॥१९९॥ जो देव रूपी पर्वत अपने चरणोंके अग्रभागसे कभी समस्त पृथिवीका स्पर्श भी नहीं करते वे ही देवरूपी पर्वत अपने मुकुटरूपी ऊँचे शिखरोंसे आपके दोनों चरणोंको धारण कर रहे हैं। सो यह क्या आपकी मन्त्र शक्ति है ? या प्रभु शक्ति है ? या उत्साह शक्ति है ? अथवा कोई दूसरा ही महान् आश्चर्य है ? भावार्थ—जो देव, देवत्वके अभिमानमें चूर होकर पृथिवीको तुच्छ समझते हैं वे ही आपको अपने शिरपर धारण कर रहे हैं, इससे आपका सर्वोपरि प्रभाव सिद्ध है ॥२००–२०१॥ हे नाथ ! पौरुषसे वशमें न होनेवाले तीनों जगत्‌को आपने कैसे विधिके समान

---

१. 'तेन वित्तश्चुञ्चुप्चणपौ' इति चुञ्चुप्प्रत्ययः ।

क्व चेदं सौकुमार्यं ते क्व च कार्कश्यमीदृशम् । नाथान्योन्यविरुद्धार्थसंभवस्त्वयि दृश्यते ॥२०३॥
अष्टोत्तरसहस्रोच्चैर्लक्षणं[1] व्यञ्जनाञ्चितम् । रूपं तवैतदाभाति भूसुरासुरदुर्लभम् ॥२०४॥
रूपातिशयतो लोके प्रथमश्चरमश्च[2] ते । विधत्ते प्रणतं विश्वं विग्रहो[3] विग्रहाद्[4] विना ॥२०५॥
हिरण्यवृष्टिरिष्टाभूद् गर्भस्थेऽपि यतस्त्वयि । हिरण्यगर्भ इत्युच्चैर्गीर्वाणैर्गीयसे ततः ॥२०६॥
सह ज्ञानत्रयेणात्र तृतीयभवभाविना । स्वयम्भूतो यतोऽतस्त्वं स्वयम्भूरिति भाष्यसे ॥२०७॥
व्यवस्थानां विधाता त्वं भविता विविधात्मनाम्[5] । भारते यत्ततोऽन्वर्थं विधातेत्यभिधीयसे ॥२०८॥
अपूर्वः सर्वतो रक्षां कुर्वन् जातः पतिः प्रभो । प्रजानां त्वं यतस्तस्मात् प्रजापतिरितीर्यसे ॥२०९॥
[6]आकन्तीक्षुरसं प्रीत्या बाहुल्येन त्वयि प्रभो । प्रजाः प्रभो यतस्तस्मादिक्ष्वाकुरिति कीर्त्यसे ॥२१०॥
पूर्वः सर्वपुराणानां त्वं महामहिमा महान् । इह दीव्यसि यत्तेन पुरुदेव इतीष्यसे ॥२११॥
भरतासनमध्यास्य त्रैलोक्यैश्वर्यमर्जयत् । युज्यते तत्तवात्यल्पमनन्तैश्वर्ययोगिनः ॥२१२॥
त्वं विधाता स्वयम्बुद्धस्तपसां दुष्करात्मनाम् । सञ्चेता चेतसामुच्चैर्यशसां वाऽतिशायिनाम् ॥२१३॥
श्रेयसो दानधर्मस्य श्रेयोऽर्थं प्राणिनां मुनिः । भुवि दर्शयिता वीरः विशुद्धां पात्रतां स्वयम् ॥२१४॥
त्वमनङ्गभुजङ्गस्य मन्त्रो द्वेषद्विपाङ्कुशः । मोहान्धपटलभ्रान्तिभ्रंशहेतुः प्रभञ्जनः ॥२१५॥

एक साथ अपने आधीन कर लिया ? भावार्थ—जिस प्रकार विधि—नियति तीनों जगत्को अपने आधीन किये हुए है उसी प्रकार आपने भी तीनों जगत्को अपने आधीन कर लिया है, परन्तु यह कार्य पुरुषार्थ साध्य नहीं है, यह तो केवल आपकी अचिन्त्य आत्मशक्तिका ही प्रभाव है ॥२०२॥ हे नाथ ! कहाँ तो यह सुकुमारता ? और कहाँ ऐसी कठोरता ? हे प्रभो ! विरुद्ध पदार्थोंका संभव आपमें ही दीख पड़ता है ॥२०३॥ मनुष्य, देव और दानवोंके लिए दुर्लभ तथा एक हजार आठ व्यञ्जन और लक्षणोंसे युक्त आपका यह रूप अतिशय शोभायमान हो रहा है ॥२०४॥ हे भगवन् ! आपका शरीर चरम—पर्याय धारण करनेकी अपेक्षा अन्तिम है तथा रूपके अतिशयसे प्रथम है—सर्वश्रेष्ठ है और युद्धके बिना ही समस्त विश्वको नम्रीभूत कर रहा है ॥२०५॥ हे नाथ ! जब आप गर्भमें स्थित थे तभी सबको इष्ट हिरण्य—सुवर्णकी वृष्टि हुई थी इसलिए देव आपको हिरण्यगर्भ (हिरण्यं गर्भे यस्य सः) कहते हैं ॥२०६॥ हे प्रभो ! इस भवसे पूर्ण तीसरे भवमें जो तीन ज्ञान प्रकट हुए थे उन्हींके साथ आप यहाँ स्वयं उत्पन्न हुए हैं इसलिए आप स्वयम्भू कहे जाते हैं ॥२०७॥ क्योंकि आप भरत क्षेत्रमें नाना प्रकारकी व्यवस्थाओंके करनेवाले होंगे इसलिए आप विधाता इस सार्थक नामके धारी कहे जाते हैं ॥२०८॥ हे प्रभो ! आप सब ओरसे प्रजाकी रक्षा करते हुए अपूर्व ही प्रभु हुए हैं इसलिए आप प्रजापति कहलाते हैं ॥२०९॥ हे प्रभो ! आपके रहते हुए प्रजा बहुत प्रीतिसे इक्षुरसका आस्वादन करेगी इसलिए आप इक्ष्वाकु कहे जाते हैं ॥२१०॥ आप समस्त पुराण पुरुषोंमें प्रथम हैं, महा महिमाके धारक हैं, स्वयं महान् हैं और यहाँ अतिशय देदीप्यमान हैं इसलिए पुरुदेव कहलाते हैं ॥२११॥ हे भगवन् ! आपने *भरतक्षेत्रके आसनपर आरूढ होकर तीन लोकका* ऐश्वर्य उपार्जित किया है सो *अनन्त* ऐश्वर्यको धारण करनेवाले आपके लिए यह अत्यन्त तुच्छ बात है—आश्चर्यकी बात नहीं है ॥२१२॥ हे प्रभो ! आप स्वयं बुद्ध होकर अतिशय कठिन तपके करनेवाले हैं तथा उत्तम ज्ञान और बहुत भारी यशके संचेता हैं ॥२१३॥ हे विभो ! पृथिवीपर आप धीर-वीर मुनि बनकर प्राणियोंके लिए कल्याणकारी दान, धर्मकी श्रेष्ठता तथा स्वयं निर्दोष पात्रताको दिखलावेंगे । भावार्थ—आप मुनि बनकर लोगोंमें दान-धर्मकी प्रवृत्ति चलावेंगे तथा अपनी प्रवृत्तिसे प्रकट करेंगे कि निर्दोष पात्र कैसे होते हैं ? ॥२१४॥ हे भगवन् ! आप कामरूपी भुजङ्गको नष्ट करनेके लिए मन्त्र हैं, द्वेष रूपी

---

१. लक्षणं म० । २. चरमस्य म० । ३. शरीरं । ४. युद्धात् । ५. विधिनात्मनाम् म० । ६. आस्वादयन्ति ।

प्रशस्तस्तिमितध्यानसुप्तमीनमहाह्रदः । [1]बन्धानन्तरसन्धानघातीन्धनहुताशनः ॥२१६॥
स्नेहानपेक्षकैवल्यप्रदीपद्योतिताखिलः । देशको मोक्षमार्गस्य निसर्गाद् भविता भुवि ॥२१७॥
कालमष्टादशाम्भोधिकोटीकोटीप्रमाणकम् । धर्मनामनि निर्मूलं नष्टे स्रष्टेह भारते ॥२१८॥
स्वर्गापवर्गमार्गस्य मार्गणे भव्यदेहिनाम् । दिग्मोहान्धधियां धीमान् जातस्त्वमुपदेशकः ॥२१९॥
आयन्तेऽभ्युदयश्रीणामाश्रयं निःश्रेयसश्रियः । साम्प्रतं भुवि भव्यौघा नाथ त्वदुपदेशतः ॥२२०॥
प्रमाणनयमार्गाभ्यामविरुद्धेन जन्तवः । त्वदुपज्ञेन मार्गेण प्राप्नुवन्तु पदं प्रियम् ॥२२१॥
प्रणन्तव्यः प्रयत्नेन स्तोतव्यस्त्वं हितार्थिनाम् । स्मर्तव्यः सततं नाथ जगतामुपकारकः ॥२२२॥
प्रणतेस्ते कृती कायो गुणिनां वाग्गुणस्तुतेः । प्रणिनां प्रणिधानेन गुणानां गुणवन्मनः ॥२२३॥
नमस्ते मृत्युमल्लाय नमस्ते भवभेदिने । नमस्ते जरसोऽन्ताय नमस्ते ध्वस्तकर्मणे ॥२२४॥
नमस्तेऽनन्तबोधाय नमस्तेऽनन्तदर्शिने । नमस्तेऽनन्तवीर्याय नमस्तेऽनन्तशर्मणे ॥२२५॥
नमस्ते लोकनाथाय नमस्ते लोकबन्धवे । नमस्ते लोकवीराय नमस्ते लोकवेधसे ॥२२६॥

प्रणाम कर रही हैं ॥३६॥ ये भगवान् ऋषभदेवके समीप नाना ऋद्धियोंके धारक मुनियोंसे युक्त वृषभसेन आदि सत्तर गणधर सुशोभित हो रहे हैं ॥३७॥ हे कान्ते ! यहाँ ये केवलज्ञानी जटाधारी बाहुबली भगवान् विराजमान हैं । ये मुनि अवस्थाको प्राप्त हुए अपने भाइयोंसे घिरे हुए हैं और अनेक वृक्षोंसे घिरे वटवृक्षके समान सुशोभित हो रहे हैं ॥३८॥ हे देवि ! इधर ये तपरूपी लक्ष्मीसे घिरे हुए हमारे पिता सोमप्रभ मुनिराज, अपने छोटे भाई श्रेयान्सके साथ सुशोभित हो रहे हैं ॥३९॥ इधर ये तुम्हारे पिता अकम्पन महाराज एक हजार पुत्रोंके साथ तप-में लीन हैं तथा तपोलक्ष्मीसे अत्यधिक सुशोभित हो रहे हैं ॥४०॥ हे कान्ते ! इधर ये तुम्हारे स्वयंवरमें युद्ध करनेवाले दुर्मर्षण आदि बड़े-बड़े राजा शान्त चित्त होकर तपस्या कर रहे हैं ॥४१॥ हे प्रिये ! यह समस्त आर्यिकाओंकी अग्रणी ब्राह्मी है और यह सुन्दरी है इन दोनोंने कुमारी अवस्थामें ही कामदेवको पराजित कर दिया है ॥४२॥ इधर यह जिनेन्द्र भगवान्के समीप अनेक राजाओंके साथ भरत चक्रवर्ती बैठा है और उधर दूसरी ओर उसकी सुभद्रा आदि रानियाँ अवस्थित हैं ॥४३॥ हे प्रिये ! देखो देखो, कैसा आश्चर्य है कि ये परस्परके विरोधी तिर्यञ्च यहाँ एक साथ मित्रकी तरह बैठे हैं ॥४४॥ इस प्रकार प्राणवल्लभा—सुलोचनाके लिए अरहन्त भगवान्का समवसरण दिखाता हुआ नीतिका वेत्ता कुमार आकाशसे नीचे उतरा और जिनेन्द्र भगवान्की स्तुति करता हुआ विनय-पूर्वक चक्रवर्तीके पास बैठ गया तथा सुलोचना सुभद्राके पास जाकर बैठ गई ॥४५-४६॥ जयकुमारका मोह अत्यन्त सूक्ष्म रह गया था इसलिए वहाँ विस्तृत कथारूपी अमृतसे सहित धर्मका उपदेश सुनकर उसने सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्ररूपी बोधिका लाभ प्राप्त किया ॥४७॥ तदनन्तर अतिशय बुद्धिमान् जयकुमारने स्नेहरूपी सुदृढ़ बन्धनको छेदकर सुलोचनाको समझाया, अनन्तवीर्य नामक पुत्रके लिए अपना राज्य दिया और स्नेहके वशवर्ती चक्रवर्तीके मना करनेपर भी छोटे भाई विजयके साथ जिनेन्द्र-देवके समीप दीक्षा ले ली ॥४८-४९॥ उस समय जयकुमारके साथ एक सौ आठ राजाओंने स्त्री, पुत्र, मित्र तथा राज्यको छोड़कर दीक्षा धारण कर ली ॥५०॥ दुष्ट संसारके स्वभावको जाननेवाली सुलोचनाने अपनी सपत्नियोंके साथ सफेद वस्त्र धारण कर लिये और ब्राह्मी तथा

१. तपसा श्रिया म० ।

द्वादशाङ्गधरो जातः क्षिप्रं मेघेश्वरो गणी । एकादशाङ्गभृज्जाता साऽऽर्यिकाऽपि सुलोचना ॥५२॥
भूचरेषु ततोऽन्येषु खेचरेषु च राजसु । निष्क्रान्तेषु श्रियस्त्यक्त्वा दोषिणीरिव योषितः ॥५३॥
अभूवन् गणिनो भर्तुरशीतिश्चतुरुत्तरा । सहस्राणि गणास्चासन्नशीतिश्चतुरुत्तरा ॥५४॥
आद्यो वृषभसेनोऽन्यः कुम्भो दृढरथो गणी । चतुर्थः शत्रुदमनो देवशर्मा च पञ्चमः ॥५५॥
षष्ठो गणधरो धीमान् धनदेव इतीरितः । नन्दनः सोमदत्तश्च सुरदत्तस्तथा परः ॥५६॥
वायुशर्मा सुबाहुश्च देवाग्निर्द्वादशो गणी । अग्निदेवोऽग्निभूतिश्च[1] चतुर्दश उदीरितः ॥५७॥
तेजस्वी चाग्निमित्रश्च तथा हलधरः श्रुती । महीधरश्च माहेन्द्रो वसुदेवो वसुन्धरः ॥५८॥
तथैवाचलनामाख्यो मेरुश्च जगतीष्यते । भूतिः सर्वसहो यज्ञः सर्वगुप्तस्तथापरः ॥५९॥
द्वौ च सर्वप्रियो देवो विजयश्चापि संज्ञया । परो विजयगुप्तश्च मित्रान्तविजयस्ततः ॥६०॥
विजयश्रीरिति ख्यातः पराख्योऽप्यपराजितः । वसुमित्रोऽपि सेनान्तो वसुसाधुरनीदृशः ॥६१॥
सत्यदेव इति ज्ञेयः सत्यवेदः पुनर्गणी । सर्वगुप्तश्च मित्रश्च सत्यवानिति नामतः ॥६२॥
विनीतः संवरश्चोभावृषिगुप्तर्षिदत्तकौ । यज्ञदेव इति प्रोक्तो यज्ञगुप्तस्तथैव च ॥६३॥
यज्ञमित्रो यज्ञदत्तः स्वायम्भुव इति स्तुतः । भागदत्तो भागफल्गुर्गुप्तफल्गुः प्रकीर्तितः ॥६४॥
तथाऽन्यो गणभृन्नाम्ना मित्रफल्गुः प्रजापतिः । ततः सत्ययशा नाम्ना वरुणो धनवाहिकः[2] ॥६५॥
गणी महेन्द्रदत्तश्च तेजोराशिर्महारथः । विजयश्रुतिरन्यश्च महाबल इति श्रुतः ॥६६॥
सुविशालश्च वज्रश्च वैरनामा ततोऽपरः । सन्ततिश्चन्द्रचूडोऽन्यस्ततो मेघेश्वरः परः ॥६७॥
कच्छश्चापि महाकच्छः सुकच्छोऽतिबलोऽपि च । भद्रावलिश्च विख्यातो नमिश्च विनमिस्तथा ॥६८॥
गणी भद्रबलो नन्दी तथाऽन्यः समुदीरितः । महानुभावसंज्ञश्च नन्दिमित्रश्च नामतः ॥६९॥
तथैव कामदेवश्च चरमोऽनुपमः स्मृतः । वृषभस्य गणिनस्तेऽमी अशीतिश्चतुरुत्तराः ॥७०॥

सुन्दरीके पास जाकर दीक्षा ले ली ॥५१॥ मेघेश्वर जयकुमार शीघ्र ही द्वादशाङ्गके पाठी होकर भगवान्‌के गणधर हो गये और आर्यिका सुलोचना भी ग्यारह अङ्गोंकी धारक हो गई ॥५२॥ तदनन्तर अनेक भूमिगोचरी और विद्याधर राजाओंने जब दोषवती स्त्रियोंके समान लक्ष्मीका त्यागकर दीक्षा धारण कर ली तब भगवान्‌के चौरासी गणधर हो गये और गणोंकी संख्या चौरासी हजार हो गई ॥५३-५४॥ उनमें चौरासी गणधरोंके नाम ये हैं—१ वृषभसेन, २ कुम्भ, ३ दृढरथ, ४ शत्रुदमन, ५ देवशर्मा, ६ धनदेव, ७ नन्दन, ८ सोमदत्त, ९ सुरदत्त, १० वायुशर्मा, ११ सुबाहु, १२ देवाग्नि, १३ अग्निदेव, १४ अग्निभूति, १५ तेजस्वी, १६ अग्निमित्र, १७ हलधर, १८ महीधर, १९ माहेन्द्र, २० वसुदेव, २१ वसुन्धर, २२ अचल, २३ मेरु, २४ भूति, २५ सर्वसह, २६ यज्ञ, २७ सर्वगुप्त, २८ सर्वप्रिय, २९ सर्वदेव, ३० विजय, ३१ विजयगुप्त, ३२ विजयमित्र, ३३ विजयश्री, ३४ पराख्य, ३५ अपराजित, ३६ वसुमित्र, ३७ वसुसेन, ३८ साधुसेन, ३९ सत्यदेव, ४० सत्यवेद, ४१ सर्वगुप्त, ४२ मित्र, ४३ सत्यवान् , ४४ विनीत, ४५ संवर, ४६ ऋषिगुप्त, ४७ ऋषिदत्त, ४८ यज्ञदेव, ४९ यज्ञगुप्त, ५० यज्ञमित्र, ५१ यज्ञदत्त, ५२ स्वायंभुव, ५३ भागदत्त, ५४ भागफल्गु, ५५ गुप्त, ५६ गुप्तफल्गु, ५७ मित्रफल्गु, ५८ प्रजापति, ५९ सत्ययश, ६० वरुण, ६१ धनवाहिक, ६२ महेन्द्रदत्त, ६३ तेजोराशि, ६४ महारथ, ६५ विजय-श्रुति, ६६ महाबल, ६७ सुविशाल, ६८ वज्र, ६९ वैर, ७० चन्द्रचूड, ७१ मेघेश्वर, ७२ कच्छ, ७३ महाकच्छ, ७४ सुकच्छ, ७५ अतिबल, ७६ भद्रावलि, ७७ नमि, ७८ विनमि, ७९ भद्रबल, ८० नन्दी, ८१ महानुभाव, ८२ नन्दिमित्र, ८३ कामदेव और ८४ अनुपम। भगवान् वृषभदेवके ये चौरासी गणधर थे ॥५५-७०॥

१. भूतश्च म० । २. धनवाहकः म०, ख० ।

सङ्घः परिषदि श्रीमान् बभौ सप्तविधस्तदा । विचित्रगुणपूर्णानामृषीणां वृषभेशिनः ॥७१॥
सहस्राणि च चत्वारि तत्र सप्तशतानि च । पञ्चाशच्च महाभागा बभुः [1] पूर्वधरास्तदा ॥७२॥
तावन्त्येव सहस्राणि शतं पञ्चाशतायुतम् । श्रुतस्य शिक्षकाः [2] प्रोक्ताः संयताः संयतात्मकाः ॥७३॥
सहस्राणि नवार्धीता मुनयोऽवधिलोचनाः [3] । विंशतिस्ते सहस्राणि केवलज्ञानलोचनाः [4] ॥७४॥
विंशतिस्ते सहस्राणि षट् शतानि च वैक्रियाः [5] । विक्रियाशक्तियोगेन जयन्तः शक्रमप्यलम् ॥७५॥
द्वादशैव सहस्राणि तथा सप्तशतानि च । पञ्चाशच्च युतास्तत्र मत्या विपुलया [6] बभुः ॥७६॥
तावन्त एव संख्याताः संख्ययाऽसंख्यसद्गुणाः । श्रेतारो हेतुवादज्ञा वादिनः प्रतिवादिनाम् ॥७७॥
सपञ्चाशत्सहस्रास्ता शुद्धशा बभुरार्यिकाः । श्राविकाः पञ्चलक्ष्यस्तास्त्रिलक्षाः श्रावकाश्च ते ॥७८॥
छद्मस्थकालनिर्मुक्तां पूर्वलक्षां जिनेश्वरः । विजहार महीं भव्यान् भवाब्धेस्तारयन् बहून् ॥७९॥

स्रग्धराच्छन्दः

इत्थं कृत्वा समर्थं भवजलधिजलोत्तारणे भावतीर्थं
कल्पान्तस्थायि भूयस्त्रिभुवनहितकृत् क्षेत्रतीर्थं स कर्तुम् ।
स्वाभाव्यादारुरोह श्रमणगणसुरव्रातसत्पूज्यपादः
कैलासाख्यं महीध्रं निषधमिव वृषादित्य इद्धप्रभाढ्यः ॥८०॥

तस्मिन्नद्रौ जिनेन्द्रः स्फटिकमणिशिलाजालरम्ये निषण्णो
योगानां सन्निरोधं सह दशभिरथो योगिनां यैः सहस्रैः ।
कृत्वा कृत्वान्तमन्ते चतुरपरमहाकर्मभेदस्य शर्म-
स्थानं स्थानं स सैद्धं समगमदमलस्रग्धराभ्यर्च्यमानः ॥८१॥

भगवान् वृषभदेवकी सभामें नाना प्रकारके गुणोंसे पूर्ण मुनियोंका सात प्रकारका संघ था ॥७१॥ उनमें चार हजार सात सौ पचास महाभाग तो पूर्वधर थे ॥७२॥ चार हजार सात सौ पचास मुनि श्रुतके शिक्षक थे, ये सब मुनि इन्द्रियोंको वश करनेवाले थे ॥७३॥ नौ हजार मुनि अवधिज्ञानी थे, बीस हजार केवलज्ञानी थे, बीस हजार छह सौ विक्रिया ऋद्धिके धारक थे, ये मुनि अपनी विक्रिया शक्तिके योगसे इन्द्रको भी अच्छी तरह जीतनेवाले थे, बीस हजार सात सौ पचास विपुलमति मनःपर्यय ज्ञानके धारक थे, बीस हजार सात सौ पचास ही असंख्यात गुणोंके धारक; हेतुवादके ज्ञाता तथा प्रतिवादियोंको जीतनेवाले वादी थे, शुद्ध आत्मतत्त्वको जाननेवाली पचास हजार आर्यिकाएँ थीं, पाँच लाख श्राविकाएँ थीं और तीन लाख श्रावक थे ॥७४–७८॥ भगवान्की कुल आयु चौरासी लाख पूर्व वर्षकी थी उसमेंसे छद्मस्थ कालके तेरासी लाख वर्ष पूर्व वर्ष कम कर देनेपर एक लाख पूर्व वर्ष तक उन्होंने अनेक भव्य जीवोंको संसार-सागरसे पार करते हुए पृथिवीपर विहार किया था ॥७९॥ इस प्रकार मुनिगण और देवोंके समूहसे पूजित चरणोंके धारक श्री वृषभ जिनेन्द्र, संसाररूपी सागरके जलसे पार करनेमें समर्थ रत्नत्रयरूप भाव तीर्थका प्रवर्तन कर कल्पान्त काल तक स्थिर रहनेवाले एवं त्रिभुवन जनहितकारी क्षेत्र तीर्थको प्रवर्तनके लिए स्वभाववश (इच्छाके बिना ही) कैलास पर्वतपर उस तरह आरूढ़ हो गये जिस तरह कि देदीप्यमान प्रभाका धारक वृषका सूर्य निषधाचलपर आरूढ़ होता है ॥८०॥ स्फटिक मणिकी शिलाओंके समूहसे रमणीय उस कैलास पर्वतपर आरूढ़ होकर भगवान्ने एक हजार राजाओंके साथ योग निरोध किया और अन्तमें चार अघातिया कर्मोंका अन्त कर निर्मल मालाओंके धारक देवोंसे पूजित हो अनन्त

१–४७५० । २–४१५० । ३–९००० । ४–२०००० । ५–२०६०० । ६–१२७५० ।

उद्भूतः सङ्घोऽस्य [1]मौनः स्फुटभुवनगुरोर्देवदेवस्य देहं
देवौघश्चक्रवर्तिप्रमुखनृपगणश्चातिभक्त्या समेत्य ।
गन्धैः पुष्पैश्च धूपैः सुरभिभिरमलैरक्षतैश्च प्रदीपैः
सम्पूज्यानम्य सम्यग्वृषभजिनगुणश्रीफलं याचते स्म ॥८२॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ वृषभेश्वरपरिनिर्वाणवर्णनो नाम द्वादशः सर्गः ॥१२॥

सुखके स्थानभूत मोक्षस्थानको प्राप्त किया ॥८१॥ मोक्षप्राप्तिके अनन्तर मुनियोंका श्रेष्ठ संघ, देवोंका समूह और चक्रवर्ती आदि प्रमुख राजाओंका समूह—इन सबने तीव्र भक्तिवश आकर गन्ध, पुष्प, सुगन्धित धूप, उज्ज्वल अक्षत और देदीप्यमान दीपकके द्वारा त्रिजगद्गुरु देवादिदेव वृषभदेवके शरीरकी पूजा कर तथा अच्छी तरह नमस्कार कर यही याचना की कि हम-लोगोंको श्री ऋषभ जिनेन्द्रके गुण लक्ष्मीरूपी फलकी प्राप्ति होवे ॥ ८२ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें श्रीवृषभदेवकी निर्वाण-प्राप्तिका वर्णन करनेवाला बारहवाँ सर्ग समाप्त हुआ ॥१२॥

१. मुनीनामयं मौनः 'तस्येदम्' इत्यण् प्रत्ययः ।

त्रयोदशः सर्गः

अनुभूय चिरं लक्ष्मीं भूपतिर्भरतेश्वरः । आदित्ययशसं पुत्रमभिषिच्य भुवो विभुः ॥१॥
दीक्षां जग्राह जैनेन्द्रीमुग्रामात्मपरिग्रहाम् । दुर्निग्रहेन्द्रियग्राममृगनिग्रहवागुराम् ॥२॥
पञ्चमुष्टिभिरुत्पाट्य त्रुट्यद्बन्धस्थितिः कचान् । लोचानन्तरमेवापद् राजन् श्रेणिक ! केवलम् ॥३॥
द्वात्रिंशत्त्रिदशेन्द्रैः[1] स कृतकेवलपूजनः । दीपको मोक्षमार्गस्य विजहार चिरं महीम् ॥४॥
पूर्वलक्षाः कुमारत्वे तस्यायुः सप्तसप्ततिः । साम्राज्ये षट् प्रभोरेका श्रामण्ये विश्वदृश्वनः ॥५॥
शैलं वृषभसेनाद्यैः कैलासमधिरुह्य सः । शेषकर्मक्षयान्मोक्षमन्ते प्राप्तः सुरैः स्तुतः ॥६॥
आदित्ययशसः पुत्रो जातः स्मितयशःश्रुतिः । श्रियं तस्मै वितीर्यासौ तपसा प्राप निर्वृतिम् ॥७॥
बलस्तस्मादभूत्पुत्रः सुबलोऽतो महाबलः । ततोऽतिबलनामा च तस्यामृतबलः सुतः ॥८॥
सुभद्रः सागरो भद्रो रवितेजाः शशी ततः । प्रभूततेजास्तेजस्वी तपनोऽन्यः प्रतापवान् ॥९॥
अतिवीर्यः सुवीर्योऽतस्तथोदितपराक्रमः । महेन्द्रविक्रमः सूर्य इन्द्रद्युम्नो महेन्द्रजित् ॥१०॥
प्रभुर्विभुरविध्वंसो वीतभीर्वृषभध्वजः । गरुडाङ्को मृगाङ्काख्य इत्याद्याः पृथिवीभृतः ॥११॥
आदित्यवंशसम्भूताः क्रमेण पृथुकीर्तयः । सुते न्यस्तभराः प्रापुस्तपसा [2]परिनिर्वृतिम् ॥१२॥

अथानन्तर षट्खण्ड पृथिवीके स्वामी महाराज भरतने चिरकाल तक लक्ष्मीका उपभोगकर अर्ककीर्ति नामक पुत्रका अभिषेक किया और स्वयं अतिशय कठिन आत्मरूप परिग्रहसे युक्त, एवं कठिनाईसे निग्रह करने योग्य इन्द्रियरूपी मृग समूहको पकड़नेके लिए जालके समान जिन-दीक्षा धारण कर ली ॥१-२॥ गौतम स्वामी कहते हैं कि हे राजन् श्रेणिक ! महाराज भरतने अपने समस्त केश पञ्चमुष्टियोंसे उखाड़कर फेंक दिये तथा उनके कर्मबन्धनकी स्थिति इतनी जल्दी क्षीण हुई कि उन्होंने केशलोंचके बाद ही केवलज्ञान प्राप्त कर लिया ॥३॥ तदनन्तर बत्तीसों इन्द्रोंने आकर जिनके केवलज्ञानकी पूजा की थी और जो मोक्षमार्गको प्रकाशित करनेके लिए दीपकके समान थे ऐसे भगवान् भरतने चिरकाल तक पृथिवीपर विहार किया ॥४॥ सर्वदर्शी भगवान् भरतकी आयु भी चौरासी लाख पूर्वकी थी उसमेंसे सतहत्तर लाख पूर्व तो कुमार कालमें बीते, छह लाख पूर्व साम्राज्य पदमें व्यतीत हुए और एक लाख पूर्व उन्होंने मुनि पदमें विहार किया ॥५॥ आयुके अन्त समय वे वृषभसेन आदि गणधरोंके साथ कैलास पर्वतपर आरूढ़ हो गये और शेष कर्मोंका क्षयकर वहींसे उन्होंने मोक्ष प्राप्त किया, देवोंने उनकी स्तुति-वन्दना की ॥६॥

राजा अर्ककीर्तिके स्मितयश नामका पुत्र हुआ। अर्ककीर्ति उसे लक्ष्मी दे तपके द्वारा मोक्षको प्राप्त हुआ ॥७॥ स्मितयशके बल, बलके सुबल, सुबलके महाबल, महाबलके अतिबल, अतिबलके अमृतबल, अमृतबलके सुभद्र, सुभद्रके सागर, सागरके भद्र, भद्रके रवितेज, रवितेजके शशी, शशीके प्रभूततेज, प्रभूततेजके तेजस्वी, तेजस्वीके तपन, तपनके प्रतापवान्, प्रतापवान्के अतिवीर्य, अतिवीर्यके सुवीर्य, सुवीर्यके उदितपराक्रम, उदितपराक्रमके महेन्द्रविक्रम, महेन्द्रविक्रमके सूर्य, सूर्यके इन्द्रद्युम्न, इन्द्रद्युम्नके महेन्द्रजित्, महेन्द्रजित्के प्रभु, प्रभुके विभु, विभुके अविध्वंस, अविध्वंसके वीतभी, वीतभीके वृषभध्वज, वृषभध्वजके गरुडाङ्क और गरुडाङ्कके मृगाङ्क आदि अनेक राजा क्रमसे सूर्यवंशमें उत्पन्न हुए। ये सब राजा विशाल यशके धारक थे

---

१. कल्पवासिनः १२, भवनवासिनः १०, व्यन्तराः ८, सूर्याचन्द्रमसौ इति = ३२। २. मोक्षम्।

मोक्षमिक्ष्वाकवो जग्मुर्भरताद्या निरन्तराः । ते चतुर्दशलक्षास्तु प्रापैकोऽग्रेऽहमिन्द्रताम् ॥१३॥
तथा दशगुणाश्चाष्टौ परिपाट्या नरेश्वराः । मुक्तास्तदन्तरे प्रापदेकैकः सुरनाथताम् ॥१४॥
धीरा राज्यधुरां त्यक्त्वा धृत्वान्तेऽन्ये तपोधुराम् । स्वर्गमेकेऽपवर्गं तु जग्मुरादित्यवंशजाः ॥१५॥
योऽसौ बाहुबली तस्माज्जातः सोमयशाः सुतः । सोमवंशस्य कर्तासौ तस्य सूनुर्महाबलः ॥१६॥
ततोऽभूत्सुबलः सूनुरभूद्भुजबली ततः । एवमाद्याः शिवं प्राप्ताः सोमवंशोद्भवा नृपाः ॥१७॥
पञ्चाशत्कोटिलक्षाश्च सागराणां प्रमाणतः । तीर्थे वृषभनाथस्य तदा वहति सन्तते ॥१८॥
इक्ष्वाकवो द्विधादित्यसोमवंशोद्भवा नृपाः । उग्राद्याः कौरवाद्याश्च मोक्षं स्वर्गं च भेजिरे ॥१९॥
नमेः खेचरनाथस्य रत्नमाली शरीरजः । रत्नवज्रोऽभवत्तस्मात्ततो रत्नरथस्तथा ॥२०॥
रत्नचिह्नाभिधानोऽस्मात् तस्माच्चन्द्ररथः सुतः । वज्रजङ्घो बभूवास्माद् वज्रसेनसुतस्ततः ॥२१॥
सञ्जातो वज्रदंष्ट्रोऽस्मादभूद्वज्रध्वजस्ततः । वज्रायुधश्च वज्रोऽतः सुवज्रो वज्रभृत्पुनः ॥२२॥
वज्राभो वज्रबाहुश्च वज्राङ्को वज्रसुन्दरः । वज्रास्यो वज्रपाणिश्च वज्रभानुश्च वज्रवान् ॥२३॥
विद्युन्मुखः सुवक्त्रश्च विद्युद्दंष्ट्रस्तथैव च । विद्युत्वान् विद्युदाभश्च विद्युद्वेगश्च वैद्युतः ॥२४॥
इत्याद्याः सुतविन्यस्तविभवाः खेचराधिपाः । आद्ये तीर्थे तपः कृत्वा स्वर्गं मोक्षं च भेजिरे ॥२५॥
स्वर्गाग्राद्‍वतीर्याऽथ जातस्तीर्थंकरोऽजितः । [2]नाभेयस्येव तस्यापि पञ्चकल्याणवर्णना ॥२६॥
काले तस्याभवच्चक्री द्वितीयः सगरश्रुतिः । अर्णवनिधिरत्नेशः प्रसिद्धो भरतो यथा ॥२७॥

और पुत्रोंके लिए राज्यभार सौंप तपकर मोक्षको प्राप्त हुए ॥८–१२॥ भरतको आदि लेकर चौदह लाख इक्ष्वाकु वंशीय राजा लगातार मोक्ष गये। उसके बाद एक राजा सर्वार्थसिद्धिसे अहमिन्द्र पदको प्राप्त हुआ, फिर अस्सी राजा मोक्ष गये परन्तु उनके बीचमें एक-एक राजा इन्द्र-पदको प्राप्त होता रहा ॥१३–१४॥ सूर्यवंशमें उत्पन्न हुए कितने ही धीर-वीर राजा अन्तमें राज्यका भार छोड़ और तपका भार धारणकर स्वर्ग गये तथा कितने ही मोक्षको प्राप्त हुए ॥१५॥ भगवान् ऋषभदेवके जो बाहुबली पुत्र थे उनसे सोमयश नामक पुत्र हुआ। वही सोमयश सोमवंश (चन्द्रवंश) का कर्त्ता हुआ। सोमयशके महाबल, महाबलके सुबल और सुबलके भुजबली पुत्र हुआ। इन्हें आदि लेकर सोमवंशमें उत्पन्न हुए अनेक राजा मोक्षको प्राप्त हुए ॥१६–१७॥ इस प्रकार भगवान् वृषभदेवका तीर्थ पृथिवीपर पचास लाख करोड़ सागर तक अनवरत चलता रहा। इस तीर्थकालमें अपनी दो शाखाओं—सूर्यवंश और चन्द्रवंशमें उत्पन्न हुए इक्ष्वाकुवंशीय तथा कुरुवंशीय आदि अनेक राजा स्वर्ग और मोक्षको प्राप्त हुए ॥१८–१९॥

विद्याधरोंके स्वामी राजा नमिके रत्नमाली, रत्नमालीके रत्नवज्र, रत्नवज्रके रत्नरथ, रत्नरथके रत्नचिह्न, रत्नचिह्नके चन्द्ररथ, चन्द्ररथके वज्रजङ्घ, वज्रजङ्घके वज्रसेन, वज्रसेनके वज्रदंष्ट्र, वज्रदंष्ट्रके वज्रध्वज, वज्रध्वजके वज्रायुध, वज्रायुधके वज्र, वज्रके सुवज्र, सुवज्रके वज्रभृत्, वज्रभृत्के वज्राभ, वज्राभके वज्रबाहु, वज्रबाहुके वज्राङ्क, वज्राङ्कके वज्रसुन्दर, वज्रसुन्दरके वज्रास्य, वज्रास्यके वज्रपाणि, वज्रपाणिके वज्रभानु, वज्रभानुके वज्रवान्, वज्रवान्के विद्युन्मुख, विद्युन्मुखके सुवक्त्र, सुवक्त्रके विद्युद्दंष्ट्र, विद्युद्दंष्ट्रके विद्युत्वान्, विद्युत्वान्के विद्युदाभ, विद्युदाभके विद्युद्वेग और विद्युद्वेगके वैद्युत पुत्र हुआ। इन्हें आदि लेकर जो विद्याधर राजा हुए वे भी भगवान् आदिनाथके तीर्थमें पुत्रोंके लिए राज्य-वैभव सौंप तपश्चरण कर यथायोग्य स्वर्ग और मोक्षको प्राप्त हुए ॥२०–२५॥

अथानन्तर सर्वार्थसिद्धिसे च्यवकर दूसरे अजितनाथ तीर्थंकर हुए। इनके पञ्च कल्याणकोंका वर्णन भगवान् ऋषभदेवके समान ही जानना चाहिए ॥२६॥ इनके कालमें सगर नामका

१. एको मुक्तिमन्यः सुरनाथतां पुनरेको मुक्तिमन्य इन्द्रत्वमित्यनेन क्रमेण । २. नाभेयस्यापि म० ।

पुत्राः षष्टिसहस्राणि तस्य दुर्लङ्घितक्रियाः । परस्परमहाप्रीताः प्रख्याताऽद्गुपूर्वकाः[1] ॥२८॥
कृताष्टापदकैलासा दण्डरत्नेन ते क्षितिम् । भिन्दानाः कुपितेनामी नागराजेन भस्मिताः ॥२९॥
संसारस्थितिविज्ञानी पुत्रशोकमुदस्य सः । दीक्षित्वाजितनाथान्ते मोक्षमैत् मुक्तबन्धनः ॥३०॥
ततः सम्भवनाथोऽभूत्ततोऽभूदभिनन्दनः । ततः सुमतिनाथश्च ततः पद्मप्रभो जिनः ॥३१॥
सुपार्श्वश्च जिनेन्द्रोऽस्मात् ततश्चन्द्रप्रभः प्रभुः । पुष्पदन्तः परस्तस्माद्दशमः शीतलस्ततः ॥३२॥

शार्दूलविक्रीडितम्

इक्ष्वाकुः प्रथमः प्रधानमुदगादादित्यवंशस्तत-
स्तस्मादेव च सोमवंश इति यस्त्वन्ये कुरूग्रादयः ।
पश्चाद् श्रीवृषभादभूदृषिगणः श्रीवंश उच्चैस्तरा-
मित्थं ते नृपखेचरान्वययुता वंशास्तवोक्ता मया ॥३३॥
शुद्धे श्रेणिक ! शीतलस्य दशमे तीर्थे वहत्युज्ज्वले
काले केवलदीपकोज्ज्वलजगद्देवेन्द्रदेवागमे ।
योऽद्भूतः प्रकटप्रभावमहतो वंशो हरीणां यथा
वर्ण्यः सोऽपि मया तथा जिनपथे तथ्यो नृपाकर्ण्यताम् ॥३४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ इक्ष्वाकुवंशवर्णनो नाम त्रयोदशः सर्गः ।

दूसरा चक्रवर्ती हुआ यह अक्षीणनिधियों तथा रत्नोंका स्वामी था और भरत चक्रवर्तीके समान प्रसिद्ध था ॥२७॥ इसके अद्गुको आदि लेकर साठ हजार पुत्र थे । ये सभी पुत्र अद्भुत चेष्टाओंके धारक थे और परस्परमें महाप्रीतिसे युक्त थे ॥२८॥ किसी समय ये समस्त भाई कैलास पर्वतपर गये वहाँ आठ पाद स्थान बनाकर दण्डरत्नसे वहाँकी भूमि खोदने लगे परन्तु इस क्रियासे कुपित होकर नागराजने सबको भस्म कर दिया ॥२९॥ चक्रवर्ती सगर संसारकी स्थितिका ज्ञाता था इसलिए पुत्रोंका शोक छोड़ उसने अजितनाथ भगवान्के समीप दीक्षा धारण कर ली और कर्म-बन्धनसे छूटकर मोक्ष प्राप्त किया ॥३०॥ तदनन्तर अजितनाथके बाद संभवनाथ, उनके बाद अभिनन्दन नाथ, उनके बाद सुमतिनाथ, उनके बाद पद्मप्रभ, उनके बाद सुपार्श्वनाथ, उनके बाद चन्द्रप्रभ, उनके बाद पुष्पदन्त और उनके बाद शीतलनाथ हुए ॥३१-३२॥ गौतम स्वामी राजा श्रेणिकसे कहते हैं कि हे श्रेणिक ! सर्व-प्रथम इक्ष्वाकु वंश उत्पन्न हुआ फिर उसी इक्ष्वाकुवंशसे सूर्यवंश और चन्द्रवंश उत्पन्न हुए । उसी समय कुरुवंश तथा उग्रवंश आदि अन्य अनेक वंश प्रचलित हुए । पहले भोगभूमिमें ऋषि नहीं थे परन्तु आगे चलकर भगवान् ऋषभदेवसे दीक्षा लेकर अनेक ऋषि उत्पन्न हुए और उनका उत्कृष्ट श्रीवंश प्रचलित हुआ । इस प्रकार मैंने तेरे लिए अनेक राजाओं और विद्याधरोंके वंशोंका कथन किया ॥३३॥ अब जिस समय शीतलनाथ भगवान्का शुद्ध एवं उज्ज्वल दसवाँ तीर्थ बीत रहा था तथा केवलज्ञानरूपी दीपकसे उज्ज्वल संसारमें इन्द्र और देवोंका आगमन जारी था ऐसे समय महाप्रभावके धारक हरियोंका जो वंश प्रकट हुआ था उसका भी वर्णन करता हूँ । हे राजन् ! जिनमार्गमें इसका जो यथार्थ वर्णन है उसे तू श्रवण कर ॥३४॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त जिनसेनाचार्य रचित हरिवंशपुराणमें इक्ष्वाकुवंशका वर्णन करनेवाला तेरहवाँ पर्व समाप्त हुआ ॥१३॥

---

१. अद्गुः इति ज्येष्ठपुत्रस्य नाम ।

चतुर्दशः सर्गः

अस्ति वत्साभिधो देशो देशेष्विह परेषु यः । सत्यु वत्साकृतिं धत्ते गोदोहे दोग्धृगोचरे[1] ॥१॥
कालिन्दीस्निग्धनीलाम्बुप्रतिबिम्बितसौधभा[2] । कौशाम्बी नगरी तस्य गम्भीरा [3]नाभिरत्यभात् ॥२॥
वप्रप्राकारपरिखाभूषणाम्बरधारिणी । नितम्बस्तनभारार्त्तस्तम्भितेव वधूरभात् ॥३॥
रत्नचित्राम्बरधरा या प्रासादमुखैर्घनान् । वर्षानिशास्विव स्निग्धान् लेढि प्रौढाभिसारिका ॥४॥
[4]दोषाकरकराप्राप्ता रत्नभूषाचिषां चयैः । लेभे बहुल[5]दोषासु परभागं[6] सतीव या ॥५॥
पुर्याः प्रभुरभूत्तस्याः [7]प्रतापप्रभवो नृपः । सवितेव [8]कराक्रान्तदिक्चक्रः सुमुखः सुखी[9] ॥६॥

अथानन्तर जम्बूद्वीपमें एक वत्स नामका देश है जो दूसरे देशोंके विद्यमान रहते हुए दोहनकर्ता जब गायको दुहते हैं तब सचमुच ही वत्स—बछड़ेकी आकृतिको धारण करता है। भावार्थ—जिस प्रकार वत्स गायके दूध निकालनेमें सहायक है उसी प्रकार यह देश भी गौ—पृथिवीसे धन सम्पत्ति निकालनेमें सहायक था ॥१॥ यमुना नदीके स्निग्ध एवं नीले जलमें जिसके महलोंका समूह सदा प्रतिबिम्बित रहता था ऐसी कौशाम्बी नगरी उस वत्स देशकी गहरी नाभिके समान अतिशय सुशोभित थी ॥२॥ वप्र, प्राकार और परिखा रूपी आभूषण तथा अम्बर—आकाश (पक्षमें वस्त्र) को धारण करनेवाली वह नगरी नितम्ब और स्तनोंके भारसे पीड़ित होकर खड़ी हुई स्त्रीके समान जान पड़ती थी ॥३॥ वह नगरी प्रौढ़ अभिसारिकाके समान जान पड़ती थी क्योंकि जिस प्रकार प्रौढ़ अभिसारिका रत्नचित्राम्बरधरा—रत्नोंसे चित्र-विचित्र वस्त्रको धारण करती है उसी प्रकार वह नगरी भी रत्न-चित्राम्बरधरा—रत्नोंसे चित्र-विचित्र आकाशको धारण करती थी, और अभिसारिका जिस प्रकार रात्रिके समय अपने स्नेही जनोंका प्रसन्न मुखसे स्पर्श करती है उसी प्रकार वह नगरी भी वर्षा ऋतु रूपी रात्रिके समय स्निग्ध—नूतन जलसे भरे मेघोंका महलरूपी मुखोंसे स्पर्श करती थी ॥४॥ अथवा वह स्त्री कृष्ण पक्षकी रात्रियोंमें पतिव्रता स्त्रीके समान सुशोभित होती थी क्योंकि जिस प्रकार पतिव्रता स्त्री दोषाकर-कराप्राप्ता—दोषोंकी खान स्वरूप दुष्ट मनुष्योंके हाथसे अस्पृष्ट रहती है उसी प्रकार वह नगरी भी बहुलदोषासु—कृष्ण पक्षकी रात्रिमें दोषाकरकराप्राप्ता—चन्द्रमाकी किरणोंसे अस्पृष्ट थी और पतिव्रता स्त्री जिस प्रकार बहुलदोषासु—अनेक दोषोंसे भरी व्यभिचारिणी स्त्रियोंमें रत्नमय आभूषणोंकी किरणोंके समूहसे उत्कृष्ट शोभाको प्राप्त होती है, उसी प्रकार वह नगरी भी बहुल-दोषासु—कृष्ण पक्षकी रात्रियोंमें रत्नमय आभूषणोंकी किरणोंसे उत्कृष्ट शोभाको प्राप्त थी ॥५॥ उस कौशाम्बी नगरीका स्वामी राजा सुमुख था। वह सुमुख ठीक सूर्यके समान जान पड़ता था क्योंकि जिस प्रकार सूर्य प्रतापप्रभवः—प्रकृष्ट संतापका कारण है उसी प्रकार वह राजा भी प्रताप-प्रभवः—उत्कृष्ट प्रभावका कारण था। जिस प्रकार सूर्य कराक्रान्तदिक्चक्रः—अपनी किरणोंसे दिङ्मण्डलको व्याप्त कर लेता है उसी प्रकार वह राजा भी कराक्रान्तदिक्चक्रः—अपने टेक्ससे

---

१. ख पुस्तके 'दोग्धगोचरे' इति पाठः केनापि 'दुग्धगोचरे' इति रूपेण शोधितः। २. सौधसमूहः। ३. मध्यदेशो नाभिश्च। ४. दोषाकरः दोषवान् मनुष्यः तस्य करेण अप्राप्ता पक्षे दोषाकरश्चन्द्रस्तस्य करैः किरणैः अप्राप्ता। ५. प्रभूतदोषासु स्त्रीषु पक्षे कृष्णपक्षनिशासु। ६. गुणोत्कर्षम्। ७. प्रकृष्टस्तापः प्रतापस्तस्य प्रभवः कारणं पक्षे प्रतापस्य प्रभावस्य प्रभवः कारणं 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इत्यमरः। ८. कराः किरणाः पक्षे राजग्राह्यो बलिः। ९. सुष्ठु खम् आकाशं यस्य स पक्षे सुखमस्यास्तीति सुखी।

वर्णसङ्करविक्षेपि धनुर्येनेन्द्रधनुर्गुणैः । यस्याधिक्षिप्तम[1]क्षिप्तवर्णसङ्करदोषकम् ॥७॥
दर्शनीयतमाङ्गस्य सङ्गतस्य युवश्रिया । अ[2]दृष्टविग्रहेऽनङ्गो रूपेणास्य समः कथम् ॥८॥
धर्मशास्त्रार्थकुशलः कलागुणविशेषवान् । निग्रहेऽनुग्रहे शक्तः प्रजानामनुपालकः ॥९॥
सोऽवरोधमराजीववनराजीमधुव्रतः । ऋतून्मानयति प्राप्तानकृतत्रिगुणक्षतिः ॥१०॥
अथ प्राप्तो वसन्तर्तुः सुमुखद्युतिरुद्यमी । पुष्पपल्लवरागश्रीवनमालामनोहरः ॥११॥
नवपल्लवरागाढ्याश्चूताश्चेतोहरा बभुः । वनमालानुरागस्य सूचकाः सुमुखस्य च ॥१२॥
अज्वलज्ज्वलनज्वालालीलाः किंशुकराशयः । वियुज्येवानुयुक्तानां विमुक्ता विरहाग्नयः ॥१३॥
रणन्नूपुरचार्वङ्गीकोमलक्रमताडितः । नवाशोकयुवोद्भिन्नपल्लवाङ्गरुहो बभौ ॥१४॥
अखण्डमधुगण्डूषपानपूरितदौहृदः । बकुलोऽपूरयत्पुष्पैः प्रमदाजनदौहृदम् ॥१५॥
चक्रे कुरवको यूनां शिलीमुखरवैः सुखम् । सुखिनां यः स एवाभूदितरेषां यथाश्रुतिः[3] ॥१६॥

दिङ्मण्डलको व्याप्त कर रहा था, और जिस प्रकार सूर्य सुखी—उत्तम ख—आकाशसे सहित होता है उसी प्रकार वह राजा भी सुखी—सुखसे सहित था ॥६॥ राजा सुमुखके धनुषने अपने गुणोंसे इन्द्रधनुषको तिरस्कृत कर दिया था क्योंकि राजा सुमुखका धनुष वर्णसंकरविक्षेपि—ब्राह्मण, क्षत्रिय, वैश्य और शूद्र इन वर्णोंके संकर दोषको दूर करनेवाला था और इन्द्रधनुष अक्षिप्तवर्णसंकरदोषकं—लाल, पीले, नीले, हरे आदि वर्णोंके संकर-संमिश्रण रूपी दोषको दूर नहीं कर सका था ॥७॥ तारुण्य-लक्ष्मीसे सहित होनेके कारण राजा सुमुखका शरीर अत्यन्त सुन्दर था अतः जिसका शरीर ही नहीं दिखाई देता ऐसा कामदेव सौन्दर्यमें उसके समान कैसे हो सकता था ॥८॥ वह राजा धर्मशास्त्रके अर्थ करनेमें कुशल था, कला और गुणोंसे विशिष्ट था, दुष्टोंके निग्रह और सज्जनोंके अनुग्रह करनेमें समर्थ था और प्रजाका सच्चा रक्षक था ॥९॥ वह राजा अन्तःपुर रूपी कमलवनकी पंक्तिका भ्रमर था और धर्म, अर्थ, काममें परस्पर बाधा नहीं पहुँचाता हुआ आगत ऋतुओंका सम्मान करता था अर्थात् ऋतुओंके अनुकूल भोग भोगता था ॥१०॥

अथानन्तर किसी समय वसन्त ऋतुका आगमन हुआ। वह वसन्त ऋतु ठीक सुमुख राजाके ही समान जान पड़ती थी क्योंकि जिस प्रकार सुमुख राजा उद्यमी—उद्यमसे सम्पन्न था उसी प्रकार वसन्त ऋतु भी उद्यमी—अपना वैभव बतलानेमें उद्यमसम्पन्न थी, जिस प्रकार राजा सुमुख फूलों और पल्लवोंके रागसे युक्त वनमाला नामक स्त्रीके मनको हरण करनेवाला था उसी प्रकार वसन्त ऋतु भी फूलों और पल्लवोंकी लाल-लाल शोभासे युक्त वनपंक्तियोंसे मनोहर थी ॥११॥ मनुष्योंके मनको हरण करनेवाले आमोंके वृक्ष उस समय नये-नये पल्लवोंकी लालिमासे युक्त हो गये थे जिससे ऐसे जान पड़ते थे मानो राजा सुमुखके लिए वनमाला—वनपंक्ति (पक्षमें वनमाला नामक स्त्री) के अनुरागकी सूचना ही दे रहे हों ॥१२॥ अग्नि-ज्वालाओंकी शोभाको धारण करनेवाले टेसूके वृक्ष ऐसे सुशोभित हो रहे थे मानो विरहके अनन्तर मिले हुए स्त्री-पुरुषोंके द्वारा छोड़ी हुई विरहाग्नि ही हो ॥१३॥ रुनझुन करनेवाले नूपुरोंसे सुन्दर स्त्रीके कोमल पदाघातसे ताड़ित होनेके कारण जिसमें पल्लवरूपी रोमाञ्च निकल आये थे ऐसा अशोक वृक्ष रूपी नवीन युवा उस समय अत्यधिक सुशोभित हो रहा था ॥१४॥ अखण्ड मद्यके कुल्लोंके पान करनेसे जिसका दोहला पूर्ण हो गया था ऐसे वकुल वृक्षने अपने फूलोंसे स्त्री जनोंकी अभिलाषाको पूर्ण कर दिया था ॥१५॥ जो कुरवक वृक्ष सुखी युवाओंके लिए भ्रमरोंके शब्दसे सुख उत्पन्न कर रहा था वही कुरवक दुखी (विरही) युवाओंके लिए सार्थक

१. अक्षिप्तो वर्णसङ्करदोषो येन तत् । इन्द्रधनुषो विशेषणमिदम् । २. अदृष्टविग्रहानङ्गो म० । ३. यथाभुति म० ।

पाटलामोदसुभगां वनश्रीवनितामलम् । चक्रुः पुष्पवतीं फुल्लास्तिलकास्तिलकश्रियः[1] ॥१७॥
जिगीषयेव विकसन्नागसंहतिसन्ततेः[2] । सिंहकेसरसिंहस्य केसरश्रीर्व्यजृम्भत ॥१८॥
मालतीवल्लभां मासश्चिरविश्लेषशोषिताम् । चकाराश्लेषपुष्टाङ्गीं सद्यः पुष्पवतीं मधुः[3] ॥१९॥
हिन्दोलग्रामरागेण रक्तकण्ठाधरश्रियः । [4]दोलायान्दोलनक्रीडाव्यासक्ताः कोमलं जगुः ॥२०॥
उद्यानवनखण्डेषु तत्कालोचितमण्डनाः । स्त्रीसखाः केचिदाभेजुः प्रीत्या पानपरम्पराम् ॥२१॥
प्राग्दूर्वाङ्कुरमास्वाद्य[5] हरिण्यै हरिणो ददौ । तं साऽऽस्वाद्य ददौ तस्मै प्रियाघ्रातोऽपि हि प्रियः ॥२२॥
सल्लकीपल्लवोल्लासिकवलग्रासलालसाम् । स्वाननस्पर्शसौख्यान्धां चकार करिणीं करी ॥२३॥
मधुपानमदोन्मत्तमधुपद्वन्द्वमुत्स्वनम् । मधौ विजृम्भितेऽन्योऽन्यं जिघ्रति स्म वनस्पृहम् ॥२४॥
कोकिलाकलकण्ठीनां गीतं श्रुत्वेव योषिताम् । चुकूज कोकिलस्तोषपोषी तस्य जिगीषया ॥२५॥
मधुपैः परपुष्टैश्च कलकोलाहलाकुलैः । गीयते स्म मधुर्यत्र तत्रान्येषु कथा नु का ॥२६॥

नामका धारक (कु—खोटे रवक—शब्द करानेवाला) था ॥१६॥ उस समय तिलककी शोभाको धारण करनेवाले जो तिलकके फूल चारों ओर फूल रहे थे उन्होंने गुलाबकी सुगन्धिसे सुवासित वनलक्ष्मीरूपी स्त्रीको अत्यधिक पुष्पवती—फूलोंसे युक्त (पक्षमें रजोधर्मसे युक्त) कर दिया था ॥१७॥ जिस प्रकार इधर-उधर घूमते हुए हस्ति-समूहको जीतनेकी इच्छासे सिंहकी केशर (अयाल) सुशोभित होती है उसी प्रकार पुन्नाग-वृक्षोंके समूहको जीतनेकी इच्छासे सिंहकेशर वृक्ष विशेषकी केशर सुशोभित हो रही थी ॥१८॥ जो चिरकालके विरहसे सूख रही थी ऐसी मालती रूपी वल्लभाको चैत्र मासने अपने आलिङ्गनसे शीघ्र ही पुष्ट तथा पुष्पवती—फूलोंसे युक्त (पक्षमें रजोधर्मसे युक्त) बना दिया था। भावार्थ—जिस प्रकार कोई पुरुष चिरकालके वियोगसे कृष अपनी वल्लभाको आलिङ्गनसे पुष्ट कर पुष्पवती (रजोधर्मसे युक्त) बना देता है उसी प्रकार चैत्रमासने चिरकालसे वियुक्त सूखी हुई मालती लता रूपी वल्लभाको अपने आलिङ्गनसे पुष्ट तथा फूलोंसे व्याप्त कर दिया ॥१९॥ उस समय राग-पूर्ण कण्ठ और अतिशय लाल ओठोंको धारण करनेवाले स्त्री-पुरुष, मूला मूलनेकी क्रीड़ामें आसक्त हो हिन्दोल रागमें कोमल गान गा रहे थे ॥२०॥ उस समयके अनुरूप वस्त्राभूषणोंको धारण करनेवाले कितने ही पुरुष अपनी स्त्रियोंके साथ बाग-बगीचोंमें बड़े प्रेमसे मद्यपान करते थे ॥२१॥ हरिण दूबाके अङ्कुरका पहले स्वयं आस्वादन कर हरिणीके लिए देता था और हरिणी भी उसका आस्वादन कर हरिणके लिए वापिस देती थी सो ठीक ही है क्योंकि प्रेमीजनोंके द्वारा सूँघी हुई भी वस्तु प्रिय होती है ॥२२॥ सल्लकी वृक्षके पल्लवोंका हरा-भरा ग्रास खानेमें जिसकी लालसा लग रही थी ऐसी हस्तिनीको हस्तीने अपने मुखके स्पर्शसे समुत्पन्न सुखसे अन्धी कर दिया था—अपने स्पर्शजन्य सुखसे उसके नेत्र निमीलित कर दिये थे ॥२३॥ उस समय वसन्तका विस्तार होनेपर मधुपान सम्बन्धी नशासे उन्मत्त हुए भ्रमर और भ्रमरियोंके जोड़े उच्च शब्द करते हुए तीव्र लालसाके साथ परस्पर एक दूसरेको सूँघ रहे थे ॥२४॥ उस समय हर्षसे पुष्ट हुए कोकिल जहाँ-तहाँ मधुर शब्द कर रहे थे जिससे ऐसा जान पड़ता था मानो कोकिलाओंके समान कलकण्ठी स्त्रियोंका गीत सुनकर उसे जीतनेकी इच्छासे ही शब्द कर रहे हों ॥२५॥ आचार्य कहते हैं कि जहाँ मनोहर कोलाहलसे आकुल भ्रमर तथा कोकिल भी वसन्तके गीत गाते हैं वहाँ दूसरोंकी तो कथा ही क्या है ? ॥२६॥

---

१. तिलकश्रिया म० । २. नागपुन्नागसंहतेः ख०, म० । नागाः पुन्नागवृक्षाः पक्षे हस्तिप्रधानाः । ३. चैत्रमासः । ४. दोलाद्वयं म० । ५. -मासाद्य म० ।

इत्थं राजा मधौ मासे जाते जनमनोहरे । चक्रे वनविहाराय मनो मदनविभ्रमम् ॥२७॥
कृतमण्डनमारूढो द्विपेन्द्रं कृतमण्डनः । अखण्डमण्डलेद्दामच्छत्रच्छन्नार्कमण्डलः ॥२८॥
पूर्यमाणः पुरो निर्यन् नृपैरोघैरिवोदधिः । राजा राजपथं भेजे वन्दिवृन्दस्तुतोऽन्यदा ॥२९॥
वसन्तमिव साक्षात् तं वसन्तं हृदि सन्ततम् । दिदृक्षुः क्षुभिता मंक्षु पौरनारीजनाततिः ॥३०॥
वर्धस्व जय नन्देति कृतनादा कृताञ्जलिः । भूपरूपं पपौ सैषा नेत्राञ्जलिभिराकुला ॥३१॥
तत्र स्त्रीजनमध्यस्थामेकामत्यन्तहारिणीम् । रतिं साक्षादिव प्राप्तामद्राक्षीद् वनितां नृपः ॥३२॥
मुखेन्दौ नेत्रयुग्माब्जे बिम्बोष्ठे कम्बुकण्ठके । स्तनचक्रे कृशे मध्ये गम्भीरे नाभिमण्डले ॥३३॥
सुघने जघने तस्या नितम्बे सकुकुन्दरे । ऊरुजानुलसज्जङ्घापाणिपादे पदे पदे ॥३४॥
लोलां निपतितां दृष्टिं मनसाधिष्ठितां निजाम् । न शशाकोपसंहर्तुं मतिरक्तो नरेश्वरः ॥३५॥
दध्यौ वधूरियं कस्य रूपपाशेन मे मनः । बद्ध्वा मुग्धमृगीनेत्रा समाकर्षति हर्षिणी ॥३६॥
यदीयं नानुभूयेत मया हृदयहारिणी । ततो व्यर्थं ममैश्वर्यं रूपं च नवयौवनम् ॥३७॥
लोकोऽयमेकतो भूयात्सर्वदा दुर्व्यतिक्रमः । अभिलाषोऽन्यदारेषु दुःसहोऽयमथैकतः ॥३८॥
इति ध्यायन्मनश्चक्रे स तस्याहरणे नृपः । अपवादो हि सह्येत रक्तेन न मनोव्यथा ॥३९॥
यशःप्रकाशमानोऽपि लोकज्ञः सोऽत्यमुह्यत । तमः पतनकाले हि प्रभवत्यपि भास्वतः ॥४०॥

इस प्रकार मनुष्योंके मनको हरण करनेवाले चैत्रमासके आनेपर राजा सुमुखने काम-विलाससे परिपूर्ण अपने मनको वन-विहारके लिए उद्यत किया ॥२७॥ तदनन्तर किसी दिन, जिसने नाना प्रकारके आभूषण धारण किये थे, अपने अखण्डमण्डलवाले देदीप्यमान छत्रसे जिसने सूर्यके मण्डलको आच्छादित कर दिया था, जो सजाये हुए हाथीपर आरूढ़ हो नगरसे बाहर निकल रहा था, जिस प्रकार नदियोंके प्रवाह आकर समुद्रमें मिलते हैं उसी प्रकार अनेक राजा आकर जिसके साथ मिल रहे थे तथा वन्दीजनोंके समूह जिसकी स्तुति कर रहे थे ऐसा राजा सुमुख राजमार्गको प्राप्त हुआ ॥२८-२९॥ साक्षात् वसन्तके समान हृदयमें निरन्तर वास करनेवाले राजा सुमुखको देखनेके लिए इच्छुक नगरकी स्त्रियाँ शीघ्र ही क्षोभको प्राप्त हो गईं ॥३०॥ 'हे राजन् ! वृद्धिको प्राप्त होओ, जयवन्त रहो, और 'समृद्धिमान् हो' जो इस प्रकार शब्द कर रही थीं, हाथ जोड़े हुई थीं तथा बड़ी आकुलताका अनुभव कर रही थीं, ऐसी नगरकी स्त्रियोंने नेत्ररूपी अञ्जलियोंके द्वारा राजा सुमुखके सौन्दर्यका पान किया ॥३१॥ राजा सुमुखने उन स्त्रियोंके मध्यमें स्थित एक अत्यन्त सुन्दर स्त्रीको देखा। वह स्त्री ऐसी जान पड़ती थी मानो साक्षात् रति ही आ पहुँची हो ॥३२॥ अतिशय रागको प्राप्त हुआ राजा, उसके मुखचन्द्र, नेत्र कमल, बिम्बके समान लाल-लाल ओठ, शंखतुल्य कण्ठ, स्तनचक्र, पतली कमर, गम्भीर नाभि-मण्डल, सुन्दर जघन, गर्तविशेषसे सुशोभित नितम्ब, जाँघों-घुटनों, पिंडरियों—हाथ एवं पैरोंपर पद-पदमें पड़ती हुई अपनी मनोयुक्त चञ्चल दृष्टिको संकुचित करनेके लिए समर्थ नहीं हो सका ॥३३-३४॥ वह विचार करने लगा कि यह भोली-भाली हरिणीके समान नेत्रोंवाली हर्षसे भरी किसकी स्त्री रूपपाशसे मेरे मनको बाँधकर खींच रही है ॥३६॥ यदि मैं इस हृदयहारिणी स्त्रीका उपभोग नहीं करता हूँ तो मेरा यह ऐश्वर्य, रूप एवं नवयौवन व्यर्थ है ॥३७॥ जिसका सर्वदा उल्लंघन करना कठिन है ऐसा यह लोक तो एक ओर है और जिसका सहन करना अतिशय कठिन है ऐसी परस्त्री विषयक अभिलाषा एक ओर है ॥३८॥ इस प्रकार विचार करते हुए राजा सुमुखने उसके हरण करनेमें मन लगाया सो ठीक ही है क्योंकि रागी मनुष्य अपवाद को तो सह सकता है परन्तु मनकी व्यथाको नहीं सह सकता ॥३९॥ आचार्य कहते हैं कि देखो राजा सुमुख यशसे प्रकाशमान था तथा लोक-व्यवहारका ज्ञाता था फिर भी अत्यन्त मोहको प्राप्त हो गया सो ठीकही है क्योंकि सूर्यके पतनका जब समय आता है तब अन्धकारकी प्रबलता

साऽपि दर्शनतस्तस्य रूपिणः शिथिलाङ्गिका । शशाक न मनो धर्तुं दोलारूढेव कामिनी ॥४१॥
[1]विचित्ररससंस्पर्शप्रादुर्भावफलोदयम् । भावं च प्रकटीचक्रे सानुलुब्धमनोगतम् ॥४२॥
दूरात्कटाक्षविक्षेपि चक्षुरन्ते निकुञ्चितम् । अहृदस्यास्तन्मनो भङ्गि प्रतिचक्षुःप्रयामतः ॥४३॥
अधरस्तनमध्यान्तःश्रोणीचरणवीक्षणैः । परावृत्तेक्षितैश्चक्रे सा तस्य स्मरदीपनम् ॥४४॥
प्रियालापेऽक्षिभिः स्निग्धैरन्योन्यघटितैः कृते । जिह्वा विह्वलयोर्वाचि न लेभेऽवसरं तयोः ॥४५॥
तावारूढौ च दुर्मोचप्रेमबन्धौ मनोरथम् । दुर्लभाश्लेषसम्भोगफललाभार्थमर्थिनौ ॥४६॥
रक्तायाश्चित्तमादाय प्रदायास्यै मनो निजम् । नगर्या निर्ययौ राजा पणबन्धाकृतीव सः ॥४७॥
यमुनोत्तंसमुद्यानं वसन्तस्यावतंसकम् । विवेश जनतानन्दि नरेन्द्रो नन्दनोपमम् ॥४८॥
रम्यं नागलताश्लिष्टैः पुष्पितैः फलितैर्द्रुमैः । क्रमुकैर्नालिकेराद्यैर्दाडिमीकदलीवनैः ॥४९॥
विजहार [2]वने हृद्ये[3] स्त्रीजनैः स निजैर्वृतः । वयस्यैरनुकूलैश्च नृपपुत्रैः सहारमत ॥५०॥
कांचित्कालकलां तस्य क्रीडतो जनसंकुला । शून्येव वनमालाऽऽसीद् वनमालावियोगिनः ॥५१॥
वनमालानुरागेण ह्रियमाणोऽविशत्पुरीम् । क्षितीशः स्थीयते स्वस्थैः परचित्तैः कियच्चिरम् ॥५२॥

हो ही जाती है ॥४०॥ उधर सुन्दर शरीरके धारक राजा सुमुखको देखनेसे उस स्त्रीके भी अङ्ग-अङ्ग ढीले हो गये और वह झूलापर बैठी स्त्रीके समान मनको रोकनेके लिए समर्थ नहीं हो सकी ॥४१॥ उसका मन राजा सुमुखमें अत्यन्त लुभा गया था इसलिए वह नाना प्रकारके रसके स्पर्श और प्रादुर्भाव रूप फलसे सहित भावको प्रकट करने लगी ॥४२॥ जो दूर तक कटाक्ष छोड़ रहा था तथा जिसका अन्तभाग संकोचको प्राप्त था, ऐसा उस स्त्रीका नेत्र, बदलेमें सुमुखकी ओर देखकर उसके चञ्चल मनको हर रहा था ॥४३॥ वह अधर, स्तन, नाभिका मध्यभाग, नितम्ब और चरणोंको दिखानेसे तथा मुड़कर संचारित तिरछी चितवनसे उसके कामको उद्दीपित कर रही थी ॥४४॥ उस समय विह्वलताको प्राप्त हुए दोनोंके स्निग्ध तथा परस्पर मिले हुए नेत्रोंने ही मधुर वार्तालाप कर लिया था इसलिए बेचारी जिह्वाको बोलनेका अवसर ही नहीं मिल सका था ॥४५॥ जिनका प्रेम बन्धन छूट नहीं सकता था ऐसे दोनों स्त्री-पुरुष, दुर्लभ आलिङ्गन, तथा संभोगरूप फलकी प्राप्ति करानेवाले मनोरथपर आरूढ़ हुए। भावार्थ—आलिङ्गन तथा संभोगकी इच्छा करने लगे ॥४६॥ अतिशय अनुरक्त उस स्त्रीका चित्त लेकर और अपना चित्त उसे देकर राजा सुमुख नगरीसे बाहर निकला। उस समय वह ऐसा जान पड़ता था मानो आगामी मिलापके लिए बयाना देकर कृत-कृत्य ही हो गया हो ॥४७॥ नगरीसे निकलकर राजाने यमुनोत्तंस नामक उद्यानमें प्रवेश किया। वह उद्यान, वसन्त ऋतुका आभूषण स्वरूप था, जनताको आनन्दित करनेवाला था और नन्दन वनके समान जान पड़ता था ॥४८॥ वह उद्यान, नागलताओंसे आलिङ्गित फूले-फले सुपारीके वृक्षों और नारियल, अनार तथा केलोंके वनोंसे अतिशय रमणीय था ॥४९॥ अपनी स्त्रियोंसे घिरे हुए राजा सुमुखने उस सुन्दर वनमें विहार किया एवं अनुकूल मित्रों और राज-पुत्रोंके साथ क्रीड़ा की ॥५०॥ वह वहाँ कुछ काल तक क्रीड़ा करता रहा परन्तु वनमालाके वियोगसे उसे वह मनुष्योंसे व्याप्त वनकी पंक्ति शून्य जैसी जान पड़ती थी ॥५१॥ वनमालाके अनुरागसे हरे हुए राजाने लौटकर शीघ्र ही कौशाम्बीपुरीमें प्रवेश किया सो ठीक ही है क्योंकि जिनका चित्त दूसरेमें लग रहा है वे कितनी देर तक स्वस्थ रह सकते हैं? ॥५२॥

---

१. विचित्ररसस्य संस्पर्शप्रादुर्भावौ एव फलं तस्योदयो यस्मात् तं, एवंभूत भावम् । २. वनं क० । ३. हृद्यं क० ।

अपृच्छत्सुमतिर्मन्त्री तमुपांशु विशां विभुम् । विषण्णोऽसि किमद्येश ! कथ्यतामिति सादरः ॥५३॥
एकच्छत्रमिदं राज्यमनुरक्ताः प्रजाः प्रभो । अनुरागप्रतापाभ्यां विभूता भृत्यभूभृतः ॥५४॥
इष्टार्थस्य प्रदानेन प्रीणितोऽर्थिजनोऽखिलः । बहुशाः प्रणयोद्रेकान्मानितास्च प्रसादिना ॥५५॥
धर्मे चार्थे च कामे च प्रार्थितं दुर्लभं न ते । तदित्थं नाथ ! सौस्थित्य[1] मनो दुःखमितं कुतः ॥५६॥
संविभज्य मनोदुःखं सख्यौ प्राणसमे सुखी । सम्पद्यते जनः सर्वं इतीयं जगतः स्थितिः ॥५७॥
तदुच्यतां प्रभोऽद्यैव विदधामि तवेप्सितम् । सुस्थिते हि प्रभौ लोके सुस्थिताः सकलाः प्रजाः ॥५८॥
इत्युक्तः सोऽभ्यधात् सद्यो [2]मयाद्योद्यानयातया । दृष्ट्या परवध्वाऽऽशु विद्ययेव वशीकृतः ॥५९॥
ईदृशी[3] दृक्स्वनेपथ्या प्रायेण भवताऽप्यसौ । लक्षितैव निजं भावं कथयन्ती स्फुटेङ्गितैः ॥६०॥
इति श्रुत्वाऽवदन्मन्त्री लक्षिता लक्षिता विभो । वणिजो वीरकस्यासौ वनमालाभिधा वधूः ॥६१॥
नृपोऽवादीत्तया योगो यदि मेऽद्य न जायते । न मन्ये जीवितं स्वस्य तस्याश्च कुटिलभ्रुवः ॥६२॥
मन्ये दिवसमप्येषा सहते न मया विना । अनयाऽहमपि क्षिप्रं तद्विधत्स्व प्रतिक्रियाम् ॥६३॥
दुर्यशः प्राप्यतेऽमुष्मिन्ननर्थोऽमुत्र मूढधीः । तथापि नेक्षते कार्यं यथैवानिमिषान्धकः[4] ॥६४॥
तत्त्वया न निवार्योऽहमकार्येऽपि प्रवृत्तधीः । पापोपशमनोपायाः सत्येव सति जीविते ॥६५॥
अनुमेने वचो मन्त्री तदन्यायमपि प्रभोः । अत्यभ्यर्णविपत्तीनां मन्त्रिणो हि निवर्तकाः ॥६६॥

सुमति नामक मन्त्रीने एकान्तमें आदरपूर्वक राजासे पूछा कि हे स्वामिन् ! आज आप विषादयुक्त क्यों हैं ? कृपाकर कहिए ॥५३॥ हे प्रभो ! आपका यह एकछत्र राज्य है, प्रजा आपमें अनुरक्त है तथा अन्य राजा अनुराग और प्रतापसे वशीभूत हो आपके दास हो रहे हैं ॥५४॥ अभिलषित वस्तुओंको देकर आपने समस्त याचकोंको सन्तुष्ट कर रक्खा है तथा प्रेमकी अधिकतासे प्रसन्न होकर आपने समस्त स्त्रियोंको सम्मानित किया है ॥५५॥ धर्म, अर्थ तथा काम-विषयक कोई भी वस्तु आपको दुर्लभ नहीं है, इस प्रकार हे नाथ ! सब प्रकारकी कुशलता होनेपर भी आपका मन दुःखी क्यों हो रहा है ? ॥५६॥ सभी लोग प्राणतुल्य मित्रके लिए मनका दुःख बाँटकर सुखी हो जाते हैं यह जगत्‌की रीति है ॥५७॥ इसलिए हे प्रभो ! बतलाइए मैं आज ही आपकी अभिलाषाको पूर्ण करूँगा क्योंकि स्वामीके सुखी रहनेपर ही समस्त प्रजा सुखी रहती है ॥५८॥

मन्त्रीके इस प्रकार कहनेपर राजाने शीघ्र ही कहा कि आज उद्यानको जाते समय मैंने एक पर-स्त्रीको देखा था उसीने विद्याकी भाँति मुझे शीघ्र ही वश कर लिया है ॥५९॥ वह ऐसी थी, ऐसी उसकी वेष-भूषा थी और अपनी स्पष्ट चेष्टाओंसे अपना अभिप्राय प्रकट कर रही थी प्रायः आपने भी वह देखी होगी ॥६०॥ यह सुनकर मन्त्रीने कहा कि हे स्वामिन् ! देखी है, अवश्य देखी है, वह वीरक वैश्यकी वनमाला नामकी स्त्री है ॥६१॥ राजाने कहा कि यदि आज उसके साथ मेरा समागम नहीं होता है तो मैं मानता हूँ कि न मेरा जीवन बचेगा और न उस कुटिल भौंहोंवाली वनमालाका ॥६२॥ जान पड़ता है कि वह मेरे बिना एक दिन भी नहीं ठहर सकती और न इसके बिना मैं भी एक दिन ठहर सकता हूँ इसलिए शीघ्र ही इसका उपाय करो ॥६३॥ यद्यपि इस कार्यसे इस जन्ममें अपयश प्राप्त होता है और परजन्ममें अनर्थकी प्राप्ति होती है तथापि जन्मान्धके समान मूर्ख मनुष्य कार्यको नहीं देखता ॥६४॥ इसलिए अकार्यमें प्रवृत्त होनेपर भी मैं तुम्हारे द्वारा रोकने योग्य नहीं हूँ। यदि जीवन रहा तो पापको शान्त करनेके बहुतसे उपाय हो जावेंगे ॥६५॥ यद्यपि राजाका वह वचन अन्याय रूप था तथा मन्त्रीने उसे

---

१. सौस्थित्ये म० । २. मया द्योतनया नया म० । ३. ईदृग्भूतं स्वनेपथ्यं यस्याः सा (क० टि०) ।
४. अनिमिषमात्रेणान्धः जात्यन्ध इत्यर्थः (क० टि०) ।

आह चात्यनुकूलस्तमित्यसौ प्रणतः प्रभो । वनमालां सुकण्ठे ते पश्याद्यैव मया कृताम् ॥६७॥
त्वं मज्जनविधिं सद्यः भुक्तिं च भज पूर्ववत् । दिव्यानुलेपनश्लक्ष्णवस्त्रताम्बूलमाल्यकम् ॥६८॥
इति विज्ञापितो नत्वा प्रज्ञानेत्रेण मन्त्रिणा । कर्तुमैच्छत्तदुद्दिष्टं द्विष्टभुक्तिरपि प्रभुः ॥६९॥
विज्ञाय सुमुखाकूतं कृपयेव विभाकरः । प्रतीचीमगमत्क्षिप्रमुपसंहृतदीधितिः ॥७०॥
प्रौढेऽस्ताभिमुखे ध्वस्तप्रतापे मित्रमण्डले । सोद्यमोऽप्यभवल्लोको निखिलः स्खलितोद्यमः ॥७१॥
दृष्टिरश्मिभिराकृष्य चक्रवाकैर्धृतो यथा । तदा कथमपि प्रायात् शनैर्भानुरदृश्यताम् ॥७२॥
सन्ध्यारागेण व्याप्तं भुवनं तदनन्तरम् । वनमालानुरागेण सुमुखस्येव भूरिणा ॥७३॥
सङ्कोचः पद्मखण्डानां ततोऽभूत्खण्डितौजसाम् । मित्रोदयोदयाः के वा मित्रापदि विकासिनः ॥७४॥
सन्ध्यारागानुसन्धाने ध्वान्तेनापि कृते बभौ । मुक्तरक्ताम्बरं गूढं जगन्नीलपटेन वा ॥७५॥
लब्धो वर्णविवेको न [1]लब्धवर्णैरपि क्षणम् । प्रदोषे विषमे काले तिमिरोपप्लुतैस्तदा ॥७६॥

मान लिया सो ठीक ही है क्योंकि मन्त्री अत्यन्त निकटवर्ती आपत्तियोंको ही दूर करते हैं ॥६६॥ मन्त्रीने अत्यन्त अनुकूल एवं विनम्र होकर कहा कि हे प्रभो! मैं प्रयत्न करता हूँ आप वनमालाको आज ही अपने कण्ठमें लगी देखिए ॥६७॥ आप पहलेकी भाँति शीघ्र ही स्नान कीजिए, भोजन कीजिए, दिव्य विलेपन, सुकोमल वस्त्र, पान तथा माला आदि धारण कीजिए ॥६८॥ यद्यपि राजाको वनमालाके बिना भोजन करना इष्ट नहीं था तथापि बुद्धिरूपी नेत्रको धारण करनेवाले मन्त्रीने जब नमस्कार कर प्रार्थना की तब उसने उसके कहे अनुसार सब कार्य करनेकी इच्छा की ॥६९॥

तदनन्तर सुमुखका अभिप्राय जानकर दयासे ही मानो सूर्य अपनी किरणोंको संकुचित कर पश्चिम दिशाकी ओर चला गया ॥७०॥ जिस समय अतिशय प्रतापी मित्रमण्डल—सूर्यमण्डल (मित्रोंका समूह) प्रताप-रहित हो अस्त होने लगा उस समय समस्त उद्यमी मनुष्य भी उद्यमरहित हो गये। भावार्थ—जिस प्रकार समर्थ मित्रोंके समूहको नष्टप्रताप एवं नाशके सन्मुख देखकर उसके अनुगामी अन्य लोग पुरुषार्थहीन हो जाते हैं उसी प्रकार प्रतापी सूर्यको भी नष्टप्रताप एवं अस्त होनेके सन्मुख देख दूसरे उद्यमी मनुष्य भी उद्यम रहित हो गये—दिनभर काम करनेके बाद संध्याके समय विश्रामके लिए उद्यत हुए ॥७१॥ उस समय सूर्य धीरे-धीरे किसी तरह अदृश्यताको प्राप्त हुआ सो ऐसा जान पड़ता था मानो चकवाक पक्षियोंने उसे अपनी दृष्टि रूपी रस्सियोंसे खींचकर रोक ही रक्खा था ॥७२॥ तदनन्तर जिस प्रकार राजा सुमुखका अन्तःकरण वनमालाके अनुरागसे व्याप्त था उसी प्रकार समस्त संसार संध्याकालकी लालीसे व्याप्त हो गया ॥७३॥ तत्पश्चात् जिनका तेज खण्डित हो गया था ऐसे कमलोंका समूह भी संकोचको प्राप्त हो गया सो ठीक ही है क्योंकि मित्र (सूर्य पक्षमें मित्र) के उदयकालमें अभ्युदयको प्राप्त होनेवाले ऐसे कौन हैं जो मित्रकी विपत्तिके समय विकसित (पक्षमें हर्षित) रह सकें ? ॥७४॥ धीरे-धीरे अन्धकारने भी जब सन्ध्या-कालिक लालिमाकी खोज की तब संसार लाल वस्त्रको छोड़कर नील-वस्त्रसे आच्छादित हो गया ॥ भावार्थ—संध्याकी लालीको दूर कर उसके स्थानपर अन्धकारने अपना अधिकार जमा लिया जिससे ऐसा जान पड़ता था मानो संसारने लाल वस्त्र छोड़कर नीला वस्त्र ही धारण कर लिया हो ॥७५॥ जिस प्रकार प्रदोष–दोषपूर्ण विषम कालमें मोहरूपी अन्धकारसे आच्छादित हुए विद्वान् मनुष्य भी ब्राह्मणादि वर्णोंका विवेक नहीं प्राप्त करते हैं—वर्णभेदको भूल जाते हैं उसी प्रकार उस प्रदोष—रात्रिके प्रारम्भ रूप विषम कालमें अन्धकारसे उपद्रुत विद्वान् मनुष्य भी लाल-पीले आदि वर्णोंके भेदको नहीं प्राप्त कर सके थे—उस समय सब पदार्थ एक वर्ण—काले-काले ही दिखाई देते थे ॥७६॥

---

१. विद्वद्भिरपि ।

वेलायां तत्र सम्मन्त्र्य मन्त्री दूतीमजीगमत् । आत्रेयीं वनमालायाः समीपं सुमुखाज्ञया ॥७७॥
मानिताऽऽसनदानाद्यैः सत्फली[1] वनमालया । साभिनन्द्य रहस्येतामुवाचैवं विचक्षणा ॥७८॥
वनमाले प्रिये वत्से विचित्तेवाद्य लक्ष्यसे । वद वैचित्त्यहेतुं मे पत्या किमसि कोपिता ॥७९॥
वीरको ह्येकपत्नीकस्तत्र किं कोपकारणम् । अन्यदत्र निमित्तं स्यात्स्वसंवेद्यं निगद्यताम् ॥८०॥
पुत्रि ! सर्वरहस्येषु नन्वहं तु परीक्षिता । भवत्या मयि सत्यां वा दुर्लभं किमभीप्सितम् ॥८१॥
इत्युक्ता सोष्णनिश्वासग्लपिताधरपल्लवा । तया प्रार्थितया वार्ता[2] कथमप्यब्रवीद् वचः ॥८२॥
त्वां मुक्त्वांम्ब[3] न मे काचिद्विश्रम्भस्थानमत्र हि । षट्कर्णो भिद्यते मन्त्रो रक्षणीयः स यत्नतः ॥८३॥
दृष्टो मयाऽद्य सद्रूपः सुमुखः[4] सुमुखो[5] नृपः । दृष्टमात्रं प्रविष्टोऽमा[6] स मनो मे मनोभुवा ॥८४॥
दुर्लभेऽप्यभिलाषस्य द्वेषिणः सुलभे[7] जने । हृदयस्य खलस्येव वृत्तिरात्मोपतापिनी ॥८५॥
दिग्धं चन्दनपङ्केन हृदयं मम शुष्यति । बहिरङ्गो विधिः कुर्यादन्तरङ्गे विधौ तु किम् ॥८६॥
आर्द्रवस्त्रमपि न्यस्तमङ्गोपाङ्गेऽतिशुष्यति । शीतस्पर्शोऽल्पशोऽत्युष्णे किं करोतु निर्वापितः ॥८७॥
यस्य पल्लवतल्पोऽपि कल्पितो म्लायतेतराम् । तापकर्कशगात्रस्य मृदुं शीतः करोतु किम् ॥८८॥
अङ्गस्पर्शाद्विना तस्य नाहं पश्यामि निर्वृतिम् । तत्कुरुष्व दयां पूते तत्समागममेव मे ॥८९॥

उस समय मन्त्रीने सलाह कर राजा सुमुखकी आज्ञासे वनमालाके पास आत्रेयी नामकी दूती भेजी ॥७७॥ वनमालाने आसन आदि देकर उस दूतीका सम्मान किया जिससे वह बहुत प्रसन्न हुई। तदनन्तर उस चतुर दूतीने एकान्तमें वनमालासे इस प्रकार कहा कि प्रिय बेटी वनमाला ! तू आज उदास-सी दिख रही है। उदासीका कारण मुझसे कह, क्या पतिने तुझे नाराज कर दिया है ? ॥७८–७९॥ वीरकके तो तू ही एक पत्नी है अतः उसके क्रोधका कारण क्या हो सकता है ? उदासीमें कुछ दूसरा ही कारण होना चाहिए जो कि तेरे अनुभवमें आ रहा है, उसे बता ॥८०॥ बेटी ! तूने सब रहस्योंमें कई बार मेरी परीक्षा की है, मेरे रहते हुए तुझे कौन-सा इष्ट कार्य दुर्लभ रह सकता है ? ॥८१॥ दूतीके यह कहते ही उसके मुखसे गरम-गरम साँसें निकलने लगीं जिनसे उसका अधरपल्लव मुरझा गया। तदनन्तर दूतीके कई बार प्रार्थना करनेपर उसने बड़े दुःखसे यह वचन कहे कि हे माँ ! तुझे छोड़कर इस विषयमें मेरा कोई भी विश्वासपात्र नहीं है। चूँकि छह कानोंमें पहुँचा हुआ मंत्र फूट जाता है—उसका रहस्य खुल जाता है इसलिए मन्त्रकी यत्न-पूर्वक रक्षा करनी चाहिए ॥८२–८३॥ बात यह है कि आज मैंने प्रशस्त रूप एवं सुन्दर मुखके धारक राजा सुमुखको देखा था और देखते ही कामदेवके साथ वह मेरे मनमें प्रविष्ट हो गया ॥८४॥ इस समय मेरे हृदयकी प्रवृत्ति दुर्जनकी प्रवृत्तिके समान अपने आपको संताप उत्पन्न कर रही है। क्योंकि जिस प्रकार दुर्जन दुर्लभ वस्तुकी अभिलाषा करता है और सुलभ वस्तुसे द्वेष करता है उसी प्रकार मेरा हृदय, जो मेरे लिए सर्वथा दुर्लभ है ऐसे राजा सुमुखकी अभिलाषा कर रहा है और सुलभ वीरकसे द्वेष कर रहा है ॥८५॥ मेरा हृदय चन्दनके लेपसे लिप्त होनेपर भी सूख रहा है, सो ठीक ही है क्योंकि बाह्य उपचार अन्तरङ्ग कार्यमें क्या कर सकता है ? ॥८६॥ मेरे अङ्ग और उपाङ्गोंपर रखा हुआ गीला कपड़ा भी सूख जाता है सो ठीक ही है क्योंकि अत्यन्त उष्ण पदार्थपर रखा हुआ थोड़ा-सा शीत-स्पर्श क्या कर सकता है ? ॥८७॥ जिस तापसे कर्कश शरीरके लिए बनाया हुआ पल्लवोंका बिस्तर भी अत्यन्त मुरझा जाता है उसके लिए थोड़ा-सा शीत-स्पर्श क्या कर सकता है ? ॥८८॥ मैं उसके शरीरके स्पर्शके बिना शान्ति नहीं देखती इसलिए हे पवित्रे ! दया करो और

---

१. दूती । २. वा + आर्त्ता कामेन सरोगा (क० द० टि०) । ३. मुक्त्वात्र म० । ४. सुन्दरमुखयुक्तः । ५. एतन्नामा नृपः । ६. सह । ७. सुलभो जनः म० ।

तस्यापि हि मनोवृत्तिं प्रतीहि मम दर्शनात् । मदभिप्रायसंमिश्रां सर्वाकारोपलक्षिताम् ॥९०॥
तदा तज्ज्ञे प्रवीणे ! द्वौ त्वं नौ रहसि योजयेः । सुखेनैव हि कालज्ञे तप्तं तप्तेन योज्यते ॥९१॥
निशम्य वनमालायास्तद्वचो भावसूचकम् । जगाद वचनं दूती तदेति मुदितात्मिका ॥९२॥
वत्से वत्सेश्वरेणाहं त्वद्रूपहृतचेतसा । प्रहितास्मि तदेह्याशु तेन त्वां घटयाम्यहम् ॥९३॥
इति स्वेष्टार्थसंवादे वनमाला स्मरातुरा । दूत्या पत्यौ परोक्षे द्रागविशद्राजमन्दिरम् ॥९४॥
विलोक्य मनसश्चौरीं सुमुखः सुमुखीं मुदा । एह्येहीति प्रियालापाश्चकार सुखिनीं सुखी ॥९५॥
हस्ते स्तनानुलुप्तां[1] तां स्वेदिनि स्वेदिना युवा । हस्तेनादाय तन्वङ्गीं शयने स्वे न्यवेशयत् ॥९६॥
प्रौढयौवनयोर्योगमनुकर्तुमिवैतयोः । उदियाय निशानाथो प्रसादितनिशामुखः ॥९७॥
शशाङ्कस्य करस्पर्शान्मुमोदाशु कुमुद्वती । सुमुखस्य करस्पर्शाद् वनमालेव हारिणी ॥९८॥
उक्तप्रत्युक्तयुक्तार्थान्[2] स्त्रीपुंसगुणसङ्गतान् । प्रेमबन्धप्रवृद्ध्यै तौ बहून् भावांस्तु चक्रतुः ॥९९॥
सोऽपि विश्रम्भदूरास्तनवसङ्गमसाध्वसाम् । तामुत्सङ्गे कृतां गाढमालिलिङ्गाङ्गसङ्गताम् ॥१००॥
असन्तोषभुजाश्लेषैर्विश्लेषमुषितश्रमैः[3] । चुम्बनैश्चूर्णदंशैः कण्ठग्रहकचग्रहैः ॥१०१॥

मेरे लिए शीघ्र ही उसका समागम प्राप्त कराओ ॥८९॥ तुम यह विश्वास करो कि मेरे देखनेसे उसकी मनोवृत्ति भी मेरी चाहसे मिश्रित है—उसके मनमें मेरी चाह है क्योंकि उसकी समस्त चेष्टाओंसे यह स्पष्ट प्रतीत होता था ॥९०॥ तुम बड़ी चतुर और समयकी गतिको जाननेवाली हो इसलिए हम दोनों संतप्त स्त्री-पुरुषोंको एकान्तमें मिला दो क्योंकि संतप्त वस्तु दूसरी संतप्त वस्तुके साथ सुखसे मिलाई जा सकती है ॥९१॥

इस प्रकार वनमालाके अभिप्रायको सूचित करनेवाले उन वचनोंको सुनकर दूती बहुत प्रसन्न हुई और निम्नाङ्कित वचन कहने लगी ॥९२॥ उसने कहा कि हे बेटी ! तेरे रूपसे जिसका चित्त हरा गया है ऐसे वत्स देशके स्वामी राजा सुमुखने ही मुझे भेजा है अतः चल मैं शीघ्र ही तुझे उसके साथ मिलाये देती हूँ ॥९३॥ इसप्रकार अपने मनोरथके अनुकूल बात होनेपर कामसे पीड़ित वनमाला, पतिकी अनुपस्थितिमें दूतीके साथ शीघ्र ही राजभवनमें प्रविष्ट हो गई ॥९४॥ राजा सुमुख, मनको चुरानेवाली सुमुखीको देखकर बहुत सुखी हुआ और हर्षसे 'आइए, आइए' इस प्रकारके प्रिय वचन कहकर उसे सुखी करने लगा ॥९५॥ जिसके स्तनोंका स्पर्श किया गया था ऐसी कृशाङ्गी वनमालाको तरुण सुमुखने अपने स्वेद युक्त हाथसे उसका स्वेद युक्त हाथ पकड़कर अपनी शय्यापर बैठा लिया ॥९६॥ उसी समय रात्रि रूपी स्त्रीके मुखको प्रसन्न करता हुआ (पक्षमें रात्रिके प्रारम्भको प्रकाशमान करता हुआ) चन्द्रमा उदित हुआ सो ऐसा जान पड़ता था मानो वह प्रौढ़ यौवनसे युक्त राजा सुमुख और वनमालाके समागमका अनुकरण करनेके लिए ही उदित हुआ था ॥९७॥ जिस प्रकार राजा सुमुखके कर स्पर्श (हाथके स्पर्श) से सुन्दरी वनमाला प्रसन्न हो रही थी उसी प्रकार चन्द्रमाके करस्पर्श (किरणोंके स्पर्श) से कुमुदिनी शीघ्र ही प्रसन्न हो उठी—खिल उठी ॥९८॥ राजा सुमुख और वनमालाने उत्तर-प्रत्युत्तरसे सहित तथा स्त्री-पुरुषोंके गुणोंसे संगत बहुतसे भाव किये—नाना प्रकारकी शृङ्गार चेष्टाएँ कीं ॥९९॥ विश्वासकी अधिकतासे नूतन समागमके समय होनेवाला जिसका भय दूर छूट गया था ऐसी वनमालाको राजा सुमुखने गोदमें उठा लिया और अपने शरीरसे लगाकर उसका गाढ़ आलिङ्गन किया ॥१००॥ तदनन्तर कामसे उत्तप्त दोनों स्त्री-पुरुषोंने, बीच-बीचमें आलिङ्गन छोड़ देनेसे जिनमें आलिङ्गन जन्य थकावट दूर हो जाती थी ऐसे भुजाओंके गाढ़

---

१. स्तनावलुप्तां तां ग०, ङ० । हस्तस्तनानुलुप्तां तां म० । स्वेदिनि हस्ते स्तनयोश्च अनुलुप्तां कृतस्पर्शां (ख० टि०) । २. मुक्तार्थां म० । ३. सुखितश्रमैः म० ।

नितम्बास्फालनैरङ्गप्रत्यङ्गस्पर्शनैर्मिथः । मिथुनं मन्मथोद्दामं विक्रीड विविधक्रियम् ॥१०२॥
यथासत्त्वं यथाभावं यथावैदग्ध्यमङ्गना । पुंसः सुखाय तस्याऽसौ बभूव सुरतोत्सवे ॥१०३॥
श्रमप्रस्विन्नसर्वाङ्गौ कृतसंवाहनौ मिथः । नागाविव कृताश्लेषौ शयने शयितावुभौ ॥१०४॥

वंशस्थवृत्तम्

प्रकृष्टवैदग्ध्यहृतात्मनोस्तयोः प्रसुप्तयोः प्रेमनिबद्धचित्तयोः ।
प्रवृत्तवृत्तान्तमिव प्रवेदितुं प्रभातसन्ध्यां[1] व्यसृजत्प्रभाकरः ॥१०५॥
सहेन्दुना बन्धुरयाऽप्रसन्ध्यया[2] सुरञ्जिता द्यौरभजत्परां द्युतिम् ।
सुचित्तवृत्त्या सुमुखेन सम्मुखी वधूरिवाऽसौ वनमालिका नवा ॥१०६॥
नृपं शयानं सुमुखं विभाकरः सरोरुहश्रीवनमालया सह ।
महोदयाद्रिस्थित एव च द्रुतो व्यबोधयल्लोकमिमं यथा जिनः ॥१०७॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ सुमुखवनमालावर्णनो नाम चतुर्दशः सर्गः ॥१४॥

आलिङ्गनसे, चुम्बनसे, चूषणसे, दशनसे, कण्ठ ग्रहणसे, केश ग्रहणसे, नितम्बास्फालनसे और अङ्ग-प्रत्यङ्गके स्पर्शसे परस्पर नाना प्रकारकी क्रीड़ा की ॥१०१–१०२॥ वनमालामें जैसा उत्साह था, जैसा भाव था, और जैसा चातुर्य था उन सबके अनुसार वह संभोगोत्सवके समय राजा सुमुखके सुखके लिए हुई थी—उसने अपनी समस्त चेष्टाओंसे राजा सुमुखको सुखी किया था ॥१०३॥ तदनन्तर थकावटसे जिनके सर्व शरीरमें पसीना आ गया था और जो परस्पर एक दूसरेका संमर्दन कर रहे थे ऐसे वे दोनों, हस्ती-हस्तिनियोंके समान आलिङ्गनकर शय्यापर सो गये ॥१०४॥ तदनन्तर अत्यधिक चातुर्यसे जिनकी आत्मा हरी गई थी, और चित्त प्रेमरूपी बन्धनसे बद्ध थे ऐसे गाढ़ निद्रामें निमग्न सुमुख और वनमालाका क्या हाल है ? यह जाननेके लिए ही मानो सूर्यने प्रभात सन्ध्याको भेजा। भावार्थ—आकाशमें प्रातःकालकी लालिमा छा गई ॥१०५॥ उस समय चन्द्रमाके साथ-साथ सुन्दर प्रभात सन्ध्यासे अनुरञ्जित (रक्तवर्ण की हुई) द्यावा (आकाशरूपी स्त्री) राजा सुमुख द्वारा उत्तम मनोवृत्तिसे अनुरञ्जित (प्रसन्न की हुई) सुवदना नव-वधू वनमालाके समान सुशोभित हो रही थी ॥१०६॥ जिस प्रकार जिनेन्द्र भगवान् समवसरणमें सिंहासनारूढ़ हो इस समस्त लोकको प्रबुद्ध करते हैं उसी प्रकार आगत सूर्यने उदयाचलपर स्थित होकर कमलोंके समान सुशोभित वनमालाके साथ सोते हुए राजा सुमुखको प्रबुद्ध किया—जगाया ॥१०७॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे सहित जिनसेनाचार्य रचित हरिवंशपुराणमें सुमुख और वनमालाका वर्णन करनेवाला चौदहवाँ सर्ग समाप्त हुआ ॥१४॥

---

१. सन्ध्या म० । २. सन्धया म० ।

पञ्चदशः सर्गः

द्रुतविलम्बितवृत्तम्

अथ विबुद्धसरोजवनस्पृशा सुरभिणा स्पृशता मरुता[1] तदा ।
हृतवपुःश्रमकं मिथुनं मिथस्तदकरोदुपगूढमतिश्लथम् ॥१॥
मृदुतरङ्गघने शयनस्थले मृदितपुष्पचये शयितोत्थितः ।
सह बभौ प्रियया सुमुखो यथा समदहंसयुवा सिकतास्थले ॥२॥
विषहते स्म वियोगविषं क्षणं विरहिणोरिव रात्रिषु पक्षिणोः ।
प्रियवधूवरयोर्वरयोस्तयोर्न हृदयं [2]हृदयङ्गमचेष्टयोः ॥३॥
न विससर्ज ततः स्वपतेर्गृहं स्वगृह एव रुरोध वधूं प्रभुः ।
रहसि दुर्लभमाप्य मनीषितं न हि विमुञ्चति लब्धरसो जनः ॥४॥
सुमुखमुख्यवधूजनमुख्यतां समधिगम्य निजैः सुमुखैर्गुणैः ।
वरवधूरतिगौरवमाप सा न सुलभं सुमुखे[3] किमु भर्तरि ॥५॥
अवततार कदाचिदचिन्तितो निधिरिवोरुतपोनिधिरञ्जितः ।
नृपगृहं वरधर्ममुनिर्गृहानतिथिरेति हि भूरिशुभोदये ॥६॥
परमदर्शनशुद्धिविशुद्धधीरधिकबोधविबुद्धपदार्थकः ।
व्रतसुगुप्तिसमित्यतिशुद्धतामयचरित्रपवित्रितविग्रहः ॥७॥

अथानन्तर खिले हुए कमल वनका स्पर्श करनेवाली सुगन्धित वायुने स्पर्श कर जिसका समस्त श्रम दूर कर दिया था ऐसे उस मिथुनने उस समय परस्परका आलिङ्गन अत्यन्त ढीला कर दिया ॥१॥ जिसपर तरङ्गोंके समान कोमल सिकुड़नें उठ रही थीं तथा जिसपर फूलोंका समूह मसला गया था ऐसी शय्यापर सोकर उठा सुमुख, प्रिया वनमालाके साथ उस तरह सुशोभित हो रहा था जिस तरह कि बालूके स्थलपर हंसीके साथ मदोन्मत्त युवा हंस सुशोभित होता है ॥२॥ जिस प्रकार रात्रिके समय बिछुड़नेवाले चकवा-चकवीका हृदय क्षण भरके लिए भी वियोगरूपी विषको सहन नहीं करता है उसी प्रकार मनोहर चेष्टाके धारक उन प्रिय वधू-वरका हृदय क्षण भरके लिए भी वियोगरूपी विषको सहन नहीं करना चाहता था ॥३॥ इसलिए राजा सुमुखने वधू-वनमालाको उसके पतिके घर नहीं भेजा अपने ही घर रोक लिया सो ठीक ही है क्योंकि दुर्लभ वस्तुको पाकर उसका रस प्राप्त करनेवाले उसे छोड़ते नहीं हैं ॥४॥ सुन्दरी वनमाला, अपने उत्तम गुणोंसे राजा सुमुखकी समस्त मुख्य स्त्रियोंमें मुख्यताको पाकर परम गौरवको प्राप्त हुई थी सो ठीक ही है क्योंकि भर्ताके अनुकूल रहनेपर कौन-सी वस्तु सुलभ नहीं ? ॥५॥

तदनन्तर किसी समय अचिन्तित निधिके समान उत्कृष्ट तपके भाण्डार वरधर्म नामके पूज्य मुनि राजा सुमुखके घर आये सो ठीक ही है क्योंकि अत्यधिक पुण्यका उदय होनेपर ही अतिथि घर आते हैं ॥६॥ उन मुनिकी बुद्धि उत्कृष्ट दर्शनविशुद्धिसे विशुद्ध थी, अधिक ज्ञानसे वे अनेक पदार्थोंको जानते थे, व्रत गुप्ति और समितिकी अतिशय शुद्धि रूपी चारित्रसे उनका शरीर पवित्र था, वे अनशन तथा स्वाध्याय आदि तपकी निर्मल लक्ष्मीसे युक्त थे और धवल

१. मरुता । २. हृदयङ्गमा मनोज्ञा चेष्टा ययोस्तयोः । ३. अनुकूले ।

अनशनाध्ययनादितपःश्रिया धवलया प्रशमास्तविकारया ।
जनितगौरवया शुचिभूषितो विपुलनिर्जरया जरया यथा ॥८॥
विजितदोषकषायपरीषहं सुनिगृहीतजितेन्द्रियवृत्तकम् ।
यतिवृषं[1] सुमुखः स्वगृहागतं समभिवीक्ष्य नृपः सहसोत्थितः ॥९॥
प्रमदभारवशीकृतमानसस्तमभिगत्य परीत्य वधूयुतः ।
सविनयं प्रतिगृह्य शुचिः शुचिं शुचिनि साधुमधान्मणिकुट्टिमे ॥१०॥
प्रियवधूकरधारितसत्कनत्कनककर्करिकाजलधारया[2] ।
व्यपगतासुकया[3] वरभूभृता स्वकरधौतमकारि मुनेः पदम् ॥११॥
सुरभिगन्धशुभाक्षतपुष्पसत्प्रकरदीपकधूपपुरःसरैः ।
समभिपूज्य वचस्तनुचेतसा तमभिवन्द्य सुदानमदान्मुदा ॥१२॥
समगुणात्परिणामविशेषतः परभवे सहभोगफलोदयम् ।
सुमनसा सुमुखो वनमालया सह बबन्ध सुपुण्यमपुण्यभित् ॥१३॥
बहुदिनानशनव्रतधारणः कृशतनुस्थितये[4] कृतपारणः ।
विहितदातृसुखोदयकारणः स मुनिरैत्पटुतत्त्वविचारणः ॥१४॥
व्रजति नित्यसुखे सुमुखेशिनः शममनेहसि[5] पुण्यफलाशिनः ।
[6]परयुवत्यपहारदुराहितं[7] प्रतिकृतानुशयस्य हताहितम् ॥१५॥
मणिगणच्छविविच्छुरितोदरे सुरभिगर्भगृहे विहितादरे ।
सह कदाचिदसौ गुणमालया दयितया शयितो वनमालया ॥१६॥

अर्थात् सफेद (पक्षमें उज्ज्वल) समस्त विकारोंसे रहित एवं गौरवको उत्पन्न करनेवाली वृद्धावस्थाके समान कर्मोंकी विपुल निर्जरासे सुशोभित थे ॥७-८॥ जिन्होंने दोष कषाय और परिषहको जीत लिया था एवं इन्द्रियोंकी वृत्तिको अच्छी तरह रोककर परास्त कर दिया था ऐसे अपने घर आये हुए उत्तम मुनिराजको देखकर राजा सुमुख सहसा उठकर खड़ा हो गया ॥९॥ आनन्दके भारसे जिसका हृदय विवश था ऐसे उज्ज्वल परिणामोंके धारक राजा सुमुखने स्त्रीके साथ आगे जाकर पहले तो उन पवित्र मुनिराजको प्रदक्षिणा दी फिर विनय सहित पड़गाह कर उन्हें रत्नमय पवित्र फर्शपर विराजमान किया ॥१०॥ तदनन्तर प्रिय स्त्रीके द्वारा हाथमें धारण की हुई सुवर्णमय झारीकी प्रासुक जलधारासे राजाने मुनिराजके चरण धोये॥११॥ फिर सुगन्धित चन्दन, शुभ अक्षत, नैवेद्य, दीप, धूप आदि अष्टद्रव्यसे पूजा कर मन, वचन, कायसे उन्हें नमस्कार किया। तदनन्तर हर्ष-पूर्वक दान दिया॥१२॥ उस समय राजा सुमुख और वनमालाके परिणाम एक समान थे इसलिए दोनोंने ही परभवमें एक साथ भोग-रूपी फलको देनेवाला पापापहारी उत्तम पुण्य बन्ध किया ॥१३॥ जिन्होंने अनेक दिनका उपवास रूपी व्रत धारण किया था, जो दाताओंके लिए सुख प्राप्तिका कारण जुटानेवाले थे और जो तत्त्वके विचार करनेमें अतिशय निपुण थे ऐसे मुनिराज अपने कृश शरीरकी स्थिरताके लिए पारणा कर वनको चले गये ॥१४॥

तदनन्तर जो पुण्यका फल भोग रहा था और परस्त्रीके अपहरणसे उत्पन्न पापके प्रति जो निरन्तर पश्चात्ताप करता रहता था ऐसे राजा सुमुखका काल जब अहितोंको नष्ट कर निरन्तर सुखसे बीत रहा था तब वह किसी समय गुणोंकी माला स्वरूप वनमाला स्त्रीके साथ सुगन्धित

१. यतिश्रेष्ठम् । २. झारी । ३. प्रासुकया । व्यपगतांशुकया (?)म० । ४. कृततनु-म० । ५. सममनेहसि क०, ख०, ग०, घ०, म० । ६. वरयुवत्य -ङ० । ७. प्रतिकृतः अनुशयः पश्चात्तापो येन स तस्य ।

अथ तयोः परिपाकमुपेयुषि प्रगुणमानसयोः प्रगुणायुषि ।
अविपपात हि कालनियोगतो [1]जलदकालसमागतचञ्चला ॥१७॥
अशनिपातसहोज्झितजीवितौ परमदानफलोदयसेवितौ ।
सुविजयार्द्धगिराविह तावितौ विपुलखेचरतां सुखमावितौ ॥१८॥
उभयकोटितटीघटितोदधिर्धवलताधरितेन्दुपयोदधिः ।
स्फुरितराजतमूर्तिरसौ यतः क्षितिवधूपृथुहार इवायतः ॥१९॥
विभृतीत्य भुवो दशयोजनीं स्वजगतीद्वितयांशयुगेन सः ।
जगति भोगभुवोऽभिनवा यथा वहति खेचरराजपुरीर्गिरिः ॥२०॥
[2]सुभृतभारतभूरिगिरीशते स्थिरदशोत्तररम्यपुरीशते ।
उचितपञ्चकविंशतियोजने विततत्तद्द्विगुणे[3] सुखयोजने ॥२१॥
पुरमिहोत्तरमस्ति सुखक्षमं तरुवनानुकृतोरुकुरु[4]क्षमम् ।
हरिपुरं विदितं तदभिख्यया हरिपुरप्रतिमं यदभिख्यया[5] ॥२२॥
अभवदस्य पुरस्य तु गोपिता[6] पवनपूर्वगिरिः खचरः[7] पिता ।
सुमुखराजचरस्य मृगावती गुणवती जननी हि कलावती ॥२३॥
अभृत सार्थवतीमभिधामयं प्रकटमार्य इतीह सुधामयम् ।
वचनमार्यजनप्रमदावहं स्मरणमन्यभवप्रमदावहम् ॥२४॥

गर्भगृहमें सोया था। उस गर्भगृहका मध्य भाग मणिसमूहकी कान्तिसे व्याप्त था तथा आदरको प्रदान करनेवाला था ॥१५-१६॥ उसी समय जिनके मन एक दूसरेके आधीन थे ऐसे उन दोनोंकी श्रेष्ठ आयु समाप्त होनेको आई इसलिए उनके ऊपर वर्षाकालकी बिजली आ गिरी ॥१७॥ बिजली गिरनेसे जिनके प्राण एक ही साथ छूटे थे, तथा जो उत्तम दानके फलको प्राप्त थे ऐसे दोनों दम्पती सुखसे मरणकर विजयार्ध पर्वतपर विद्याधर-विद्याधरी हुए ॥१८॥ वह विजयार्ध पर्वत, अपनी पूर्व पश्चिम—दोनों कोटियोंसे समुद्रका स्पर्श करता है, उसने अपनी सफेदीसे चन्द्रमा और क्षीर समुद्रको जीत लिया है, वह चाँदीके समान देदीप्यमान मूर्तिका धारक है और पृथिवी रूपी स्त्रीके बड़े भारी हारके समान लम्बा है ॥१९॥ वह विजयार्ध पर्वत पृथिवीसे दश योजन ऊपर चलकर अपनी दो श्रेणियोंके द्वारा विद्याधर राजाओंकी उन नगरियोंको धारण करता है जो संसारमें नूतन भोगभूमियोंके समान जान पड़ती हैं ॥२०॥ यह पर्वत भरत क्षेत्रके समस्त पर्वतोंके स्वामित्वको धारण करता है, इसपर एकसौ दश सुन्दर नगरियाँ स्थित हैं, यह पच्चीस योजन ऊँचा, पचास योजन चौड़ा तथा सुखको उत्पन्न करनेवाला है ॥२१॥ इसी पर्वतकी उत्तर श्रेणीपर एक हरिपुर नामका नगर है जो सब प्रकारके सुख देनेमें समर्थ है, नाना प्रकारके वृक्षोंके वनसे उत्तरकुरुकी पृथिवीका अनुकरण करता है और शोभामें इन्द्रपुरीके समान जान पड़ता है ॥२२॥ इस नगरका रक्षक पवनगिरि विद्याधर था। वही राजा सुमुखके जीवका पिता था तथा इसकी अनेक कलाओं और गुणोंमें निपुण मृगावती नामकी स्त्री थी वही सुमुखके जीवकी माता थी ॥२३॥ यहाँ सुमुखका जीव, 'आर्य' इस सार्थक नामको धारण करता था। धीरे-धीरे वह आर्यजनोंको आनन्द उत्पन्न करनेवाले अमृतमय वचन बोलने लगा तथा उसे अपनी पूर्व भवकी स्त्रीका स्मरण हो आया ॥२४॥

१. क्षणरुचिः सहसा समयोगतः घ०, ङ० । २. सुभृता भारतभूरिगिरीणामीशता येन स तस्मिन् । ३. पञ्चाशद्योजनविष्कम्भे । ४. विनिहिताखिलवाञ्छगणश्रमं ख०, ग०, ङ०, म० अत्र यः पाठः स्वीकृतस्तस्य ङ० पुस्तकस्य टिप्पण्यां समुल्लेखः कृतः । विनिहिताखिलवाञ्छगणश्रमं क० । ५. शोभया । ६. रक्षकः । ७ खचराधिपः घ० ।

पुरमथोत्तरदिग्जगतीमितं भवति तत्र गिरौ विभवामितम् ।
यदिह मेघपुरं परमं परां वहति सन्मणिसौधपरम्पराम् ॥२५॥
अधिवसत्यथ तद्यमनो हरी रिपुमदेभकुलस्य मनोहरी ।
रतिषु यस्य मनोहरति प्रिया पवनवेगखगस्य रतिप्रिया ॥२६॥
भजनि साथ तयोर्दुहिता सती सहचरी सुमुखस्य हिता सती ।
विदितपूर्वभवाऽत्र मनोरमा[1] जगति चन्द्रकलेव मनोरमा ॥२७॥
कुलमुवाह विवाहविधोचितं[2] शुचि यथैव तथाकृतभावितम् ।
शिशुसमागममाशु विधिः स्वयं कृतिषु यद् यतते सकलास्वयम् ॥२८॥
मिथुनमर्भकयोः सुखलालितं निजनिषक्तकृताक्षिनिमीलितम् ।
स्मितमुखं सुमुखं वचनाध्वनि स्वजनतोषमपोषयदुद्ध्वनि ॥२९॥
स्वजननीस्तनपानकृताशनं निजरुचोपमितार्कहुताशनम् ।
भजति भोगभुवां शिशुभावनां विजयिनां मिथुनं स्म सुभावनाम् ॥३०॥
स्वतनुवृद्धिमतश्च शनैः शनैः सह कलाभिरिदं च दिने दिने ।
शशिवपुर्वदियाय यथा यथा स्वजनमुज्जलधिश्च[3] तथा तथा ॥३१॥
निखिलखेचरसाधितविद्यया मिथुनमेतदभाद् भवविद्यथा[4] ।
ललितयौवनभाररुचा तथा जनमनोऽप्यहरद् गुणयातया[5] ॥३२॥

इसी विजयार्ध पर्वतकी उत्तर श्रेणीमें एक मेघपुर नामका उत्तम नगर है जो अपरिमित वैभवसे युक्त है तथा मणिमयी उत्तम महलोंकी पंक्तिको धारण करता है ॥२५॥ उस मेघपुर नगरका राजा पवनवेग था। पवनवेग शत्रुरूपी मदोन्मत्त हाथियोंको नष्ट करनेके लिए सिंहके समान था। इसकी स्त्री मनोहरी थी। मनोहरी रतिकालमें पतिके मनको हरण करती थी इसलिए वह पवनवेगको रतिके समान प्यारी थी ॥२६॥ राजा सुमुखकी जो वनमाला नामकी हित-कारिणी उत्तम स्त्री थी वह इन्हीं दोनोंके मनोरमा नामकी उत्तम पुत्री हुई। मनोरमा अपने पूर्वभवको जानती थी और संसारमें चन्द्रकलाके समान मनको आनन्दित करती थी ॥२७॥ उन दोनोंने जैसी पहले भावना की थी उसीके अनुसार विवाहके योग्य पवित्र कुल प्राप्त किया और उन दोनोंका विधाता सदा समस्त कार्योंमें स्वयं ऐसा ही प्रयत्न करता था कि जिससे उन दोनों शिशुओंका शीघ्र ही समागम हो जाय ॥२८॥ उन दोनों बालक-बालिकाओंका अपने-अपने घर सुखपूर्वक पालन होता था, वे अपनी हथेलियोंसे कभी अपनी आँखें बन्द कर लेते थे, कभी मन्द हास्य करते थे, कभी वचन बोलनेमें तत्पर होते थे, और कभी किलकारियाँ भरते हुए अपने कुटुम्बीजनोंके हर्षको बढ़ाते थे ॥२९॥ और अपनी-अपनी कान्तिसे जो सूर्य तथा अग्निकी उपमा धारण कर रहे थे ऐसे उन दोनों बालिका-बालिकाओंका युगल भोगभूमियाँ बालकोंकी विजययुक्त उत्तम भावनाको प्राप्त हो रहा था अर्थात् वे भोग-भूमियाँ बालकोंके समान सुशोभित हो रहे थे ॥३०॥ चन्द्रमाके समान शरीरको धारण करनेवाला वह युगल प्रतिदिन कलाओंके साथ जिस प्रकार धीरे-धीरे शरीरकी वृद्धिको प्राप्त होता जाता था उसी प्रकार उनके कुटुम्बीजनोंका आनन्दरूपी सागर भी वृद्धिको प्राप्त होता जाता था ॥३१॥ संसारको जाननेवाला वह युगल, जिस प्रकार समस्त विद्याधरोंकी सिद्ध की हुई विद्याओंसे सुशोभित हो रहा था उसी प्रकार अनेक गुणोंके साथ प्राप्त हुई सुन्दर यौवनकी शोभासे लोगोंके मनको हरण कर रहा था ॥३२॥

१. मनोहरा म० । २. विधोचितभावितं ख० । ३. स्वजनहर्षोदधिः । 'जनमनो मुदितं च तथा तथा' ख० । ४. भववेत्ता, यथा । ५. गुणान् याता तया ।

अथ तया स खगेन्द्रयुवाऽन्वहा कमलयेव च खेचरकन्यया ।
परमभूतिविवाहविधानतः सममयोजि[1] निजैर्जनतानतः ॥३३॥
अनुबभूव सुखं चिरमेतया मदनभावविलाससमेतया ।
सुरतनाटकभूमिविनीतया मदननर्तकसूरिविनीतया ॥३४॥
सुरवधूवरसुन्दरकन्दरे परमवल्लभया सह मन्दरे ।
सुरभिदेवतरूत्तचन्दने चिरमरंस्त तया सह नन्दने ॥३५॥
स कुलशैलसरःसरितां तया सह तटेषु सरागमतान्तया[2] ।
रतिमवाप कदाचन कान्तया तरुषु भोगभुवामपि कान्तया ॥३६॥
स्थितिमितं विजयार्द्धगिरौ पुरे रणितदिव्यवधूपदनूपुरे ।
भुवि यदन्यसुदुर्लभमर्थितं भजति तत्तदयत्नसमर्पितम्[3] ॥३७॥
अथ स वीरक ईश्वरवञ्चितः प्रियतमाविरहान्न[4] शिवं चितः ।
क्वचिदियाय शुचा मृदुपल्लवे शिशिरतल्पतलेऽस्तविपल्लवे ॥३८॥
न समशीशमदस्य शशी करैः हृदयदाहममा हिमशीकरैः ।
निशि सदा विहगस्य वियोगिनः[5] ससरसो[6]ऽपि यथा भुवि योगिनः ॥३९॥
स विनिगृह्य चिराद्विरहव्यथां रतिरहस्यगृहाश्रममाश्रमम् ।
जिननिदेशितमासृतवान्[7] वशी स हि परं शरणं शरणार्थिनाम् ॥४०॥

तदनन्तर जनसमूहके द्वारा नमस्कृत उस विद्याधर युवाको, उसके कुटुम्बीजनोंने वैभव पूर्ण विवाहकी विधिसे लक्ष्मीकी तुलना करनेवाली विद्याधर-कन्या मनोरमाके साथ युक्त किया ॥३३॥ विवाहके बाद कुमार आर्य, कामजनित हाव-भावोंसे सहित कामदेवरूपी नर्तकाचार्यके द्वारा शिक्षित एवं सुरतरूपी नाटककी रङ्गभूमिमें लाई हुई इस मनोरमाके साथ सुखका उपभोग करने लगा ॥३४॥ कभी वह देव दम्पतियोंसे सुन्दर कन्दराओंसे युक्त मन्दर गिरिपर इस परम वल्लभाके साथ क्रीड़ा करता था तो कभी सुगन्धित देवदारु और चन्दनके ऊँचे-ऊँचे वृक्षोंसे सुशोभित नन्दन वनमें इसके साथ चिरकाल तक क्रीड़ा करता रहता था ॥३५॥ कभी वह कुलाचलोंके पद्म आदि सरवरों और गङ्गा आदि महानदियोंके तटोंपर तथा कभी भोगभूमिके वृक्षोंके नीचे खेदरहित सुन्दरी वल्लभाके साथ राग-सहित रति-क्रीड़ाको प्राप्त होता था ॥३६॥ इस प्रकार विजयार्ध पर्वतपर रहनेवाला वह युगल, दिव्य स्त्रियोंके पदनूपुरोंकी झनकारसे युक्त अपने नगरमें उस सुखका उपभोग करता था जो पृथिवीपर दूसरे मनुष्योंके लिए इच्छा करनेपर भी दुर्लभ था और उसे विना ही प्रयत्नके प्राप्त था ॥३७॥

अथानन्तर—राजा सुमुखके द्वारा ठगा हुआ वीरक सेठ, प्रियतमा—वनमालाके विरहमें शोकके कारण कहीं भी हृदयको शान्तिको प्राप्त नहीं होता था। यहाँतक कि जिसपर विपत्तिका एक अंश भी नहीं था ऐसे कोमल-पल्लवोंसे रची हुई शीतल शय्यापर भी उसे सुख प्राप्त नहीं होता था ॥३८॥ वह विरह-ज्वाला शान्त करनेके लिए रात्रिके समय खुली चाँदनीमें सरोवरके तटपर जा बैठता था पर वहाँपर भी चन्द्रमा बर्फके कणोंके साथ-साथ अपनी किरणोंसे उसके हृदयकी दाहको शान्त नहीं कर पाता था। वह विरही चक्रवाक पक्षीके समान सदा विरहकी दाहमें झुलसता ही रहता था ॥३९॥ तदनन्तर उस वीरकने चिरकाल बाद विरहकी व्यथाको

---

१. नृपतिना समयोजि विधानतः ह० । २. सरागम् अतान्तया इति च्छेदः । अतान्तया = अश्रान्तया इति घपुस्तके टिप्पण्याम् । ३. तत्तदयत्नसमर्पितम् ह० । ४. न्नसिवंचितः म०, चितो हृदयस्य शिवं सुखं न इयाय । ५. नियोगिनः म० । ६. सुसरसोऽपि म० । सरोवरसहितस्यापि । ७. -माश्रितवान् म० ।

अतिवितत्य तपस्तनुशोषणं विषयलुब्धमनोभवपेषणम् ।
अगमदेशसुखाम्बुधिपोषणं प्रथमकल्पमथामरतोषणम् ॥४१॥
सुरवधूनिवहादिपरिग्रहः सकलभूषणभूषितविग्रहः ।
सुरसुखामृतसागरसङ्गतः सममतिष्ठत भावरसं गतः ॥४२॥
दिवि कदाचिदसौ वरकामिनीनिवहमध्यगतोऽवधिगोचरम् ।
समनयद्वनितां वनमालिकां परिचितः प्रणयः खलु दुस्त्यजः ॥४३॥
सुमुखराजकृतं च पराभवं स परिचिन्त्य सुरस्तदनन्तरम् ।
विषमितोन्मिषितावधिचक्षुषा[1] मिथुनमैक्षत खेचरयोस्तयोः ॥४४॥
प्रभुतया प्रविधाय पराभवं परभवे [2]हृतवांश्च मम प्रियाम् ।
इह भवेऽपि तयैव सहेक्ष्यते रतिमितः स परां सुमुखः खलः ॥४५॥
कृतवतोऽपकृतिं विषमां द्विषो द्विगुणिता यदि सा न विधीयते ।
प्रभुतया किमनर्थिकया प्रभोः प्रभवतोऽपि निरुद्यमचेतसः ॥४६॥
इति विचिन्त्य रुषा कलुषीकृतः प्रतिविधानकृतौ कृतनिश्चयः ।
भुवमवातरदाशु स वैरधीत्रिदिवतो दिवसाधिपभास्वरः ॥४७॥
स खलु खेचरराजसुतं सुरः सुमुखराजचरं खचरीसखम् ।
प्रविलसन्तमवाप यदृच्छया सुहरिवर्षगतं हरिविभ्रमम् ॥४८॥

रोककर रति रूप रहस्यसे युक्त गृहस्थाश्रमको छोड़ दिया और जितेन्द्रिय हो जिनेन्द्र भगवान्के द्वारा प्रदर्शित आश्रमकी शरण ली अर्थात् दैगम्बरी दीक्षा धारण कर ली, सो ठीक ही है क्योंकि शरणकी इच्छा करनेवाले मनुष्योंके लिए वह ही सर्वोत्तम शरण है ॥४०॥ दीक्षा लेकर उसने शरीरको सुखा देनेवाला एवं विषयके लोभी कामदेवको पीस देनेवाला कठिन तप किया जिसके फलस्वरूप वह सुखरूपी सागरको पुष्ट करनेवाले एवं देवोंके संतोषदायक प्रथम स्वर्गको प्राप्त हुआ ॥४१॥ वहाँ देवाङ्गनाओंके समूहको आदि लेकर अनेक प्रकारका परिग्रह जिसे प्राप्त था, सब प्रकारके आभूषणोंसे जिसका शरीर सुशोभित था और जो देवोंके सुखरूपी अमृतके सागरमें निमग्न था ऐसा वह देव अनेक भावों और रसोंको प्राप्त होता हुआ वहाँ सुखसे रहने लगा ॥४२॥

कदाचित् वह देव स्वर्गमें उत्तमोत्तम स्त्रियोंके बीच बैठा था कि उसने अचानक ही अपनी पूर्वभवकी स्त्री वनमालाको अवधिज्ञानका विषय बनाया अर्थात् अवधिज्ञानके द्वारा उसका विचार किया सो ठीक ही है क्योंकि परिचित—अनुभूत स्नेह बड़ी कठिनाईसे छूटता है ॥४३॥ विचार करते ही उसे सुमुख राजाके द्वारा किया हुआ पराभव स्मृत हो गया। तदनन्तर एकबार निमीलित कर उसने अवधिज्ञानरूपी नेत्रको पुनः खोला तो विद्याधर और विद्याधरीका वह युगल सामने दिखने लगा ॥४४॥ वह विचार करने लगा कि देखो जिस दुष्ट सुमुखने पूर्वभवमें प्रभुतावश तिरस्कार कर हमारी स्त्रीका हरण किया था वह इस भवमें भी उसी स्त्रीके साथ परम रतिको प्राप्त हुआ दिखाई दे रहा है ॥४५॥ यदि विषम अपकार करनेवाले शत्रुका दूना अपकार नहीं किया तो समर्थ होनेपर भी निरुद्यम चित्तके धारक प्रभुकी निरर्थक प्रभुतासे क्या लाभ है ? ॥४६॥ ऐसा विचारकर क्रोधसे जिसका चित्त कलुषित हो रहा था, तथा बदला लेनेका जिसने दृढ़ निश्चय कर लिया था ऐसा वह सूर्यके समान देदीप्यमान देव पूर्व वैरको बुद्धिमें रख शीघ्र ही स्वर्गसे पृथिवीपर उतरा ॥४७॥ उस समय राजा सुमुखका जीव आर्य नामका विद्याधर, अपनी विद्याधरीके साथ हरिवर्ष क्षेत्रमें इच्छानुसार क्रीड़ा करता हुआ इन्द्रके समान सुशोभित

१. चक्षुषः म० । २. हृतवांश्च म० ।

तदवलोक्य सुरो मिथुनं वरं प्रथमयौवननिर्भर[1]विग्रहम् ।
अकृत खण्डितविद्यमखण्डया सहजखण्डतया सुरमायया ॥४९॥
परवधूप्रिय वीरकवैरिणं स्मरसि किं सुमुख प्रमुखाधुना ।
त्वमपि किं सुखले वनमालिके ! स्खलितशीलभरे ! परजन्मनि ॥५०॥
अहमसौ तपसा सुरतामितः खचरतां मुनिदानफलाद् युवाम् ।
अरतिमेव ममारतिदायिनोः क्षपितविद्यकयोः प्रददामि वाम् ॥५१॥
इति निगद्य तदा विबुधः खगौ चकितकम्पितचित्तशरीरकौ ।
गरुडवत्परिगृह्य समुद्ययौ भरतवर्षवरं प्रति दक्षिणम् ॥५२॥
[2]मृतवताधृतदीधितिकीर्तिना रहितयाऽनृपया वरचम्पया ।
स तमयोजयदत्र महीपतिं प्रणतराजकमैच्च दिवं सुरः ॥५३॥
त्रिदशखण्डितविद्यकदम्पती क्षपितपक्षशकुन्तवदक्षमौ ।
वियति पर्यटितुं त्रुटितेच्छकौ सह समीयतुरत्र धृतिं क्षितौ ॥५४॥
नवतिकार्मुकपूर्वसुलक्षितस्थितिमतो दशमस्य मुनेरिदम् ।
समधिकाब्धिशतोज्झितकोटिके वहति तीर्थपथेऽकथि वृत्तकम् ॥५५॥
स बुभुजे भुजदण्डवशीकृतप्रणतपार्थिवमानितशासनः ।
विषयसौख्यमखण्डितरागया सुचिरकालमतृप्तमतिस्तया ॥५६॥
अथ तयोस्तनयो हरिरित्यभूद्धरिरिव[3] प्रथितः पृथिवीपतिः ।
समनुभूय सुतश्रियमूर्जितां स्वचरितोचितलोकमितौ च तौ ॥५७॥

हो रहा था सो उस देवने उसे प्राप्त किया ॥४८॥ नव यौवनसे जिसका शरीर भरा हुआ था ऐसे उस विद्याधर दम्पतीको देखकर देवने अपनी स्वाभाविक अखण्ड मायासे उसे खण्डितविद्य कर दिया अर्थात् उसकी विद्याएँ हर लीं ॥४९॥ और क्रुद्ध होकर उससे कहा कि अरे ! पर-स्त्रीको हरनेवाले प्रमुख सुमुख ! क्या तुझे इस समय अपने वीरक वैरीका स्मरण है और परजन्मसे शीलव्रतको खण्डित करनेवाली दुष्ट वनमाला ! तुझे भी वीरककी याद है ? ॥५०॥ मैं तपकर देव हुआ हूँ और तुम दोनों मुनिदानके फलसे विद्याधर हुए हो। तुम दोनोंने पूर्वभवमें मुझे दुःख दिया था इसलिए मैं भी तुम्हारी विद्याएँ नष्टकर तुम्हें दुःख देता हूँ ॥५१॥ इस प्रकार कह-कर वह देव, जिस प्रकार पक्षियोंको गरुड़ उठा ले जाता है उसी प्रकार आश्चर्यसे चकित चित्त एवं भयसे कम्पित शरीरको धारण करनेवाले दोनों—विद्याधर और विद्याधरीको उठाकर दक्षिण भरत क्षेत्रकी ओर आकाशमें उड़ गया ॥५२॥ उस समय चम्पापुरीका राजा चन्द्रकीर्ति मर चुका था इसलिए वह राजासे रहित थी। वह देव आर्य विद्याधरको यहाँ ले आया और उसे चम्पापुरीका अनेक राजाओंके द्वारा नमस्कृत राजा बनाकर स्वर्ग चला गया ॥५३॥ देव द्वारा जिनकी विद्याएँ खण्डित कर दी गई थीं ऐसे वे दोनों विद्याधर दम्पती, पङ्ख कटे पक्षियोंके समान आकाशमें चलनेको असमर्थ हो गये इसलिए उसकी इच्छा छोड़ पृथिवीमें ही संतोषको प्राप्त हुए ॥५४॥ यह वृत्तान्त नब्बे धनुष ऊँचे शरीर और एक लाख पूर्वकी स्थितिको धारण करने-वाले दशवें शीतलनाथ भगवान्के तीर्थमें हुआ था। उस समय उनका तीर्थ कुछ अधिक सौ सागर कम एक करोड़ सागर प्रमाण चल रहा था ॥५५॥ राजा आर्यने अपने भुजदण्डसे समस्त राजाओंको वश कर नम्रीभूत एवं आज्ञाकारी बनाया और अखण्डित प्रेमवाली मनोरमाके साथ चिरकाल तक विषय सुखका उपभोग किया फिर भी तृप्त नहीं हुआ ॥५६॥

तदनन्तर उन दोनोंके हरि नामका पुत्र हुआ जो इन्द्रके समान प्रसिद्ध राजा हुआ। राजा

१. निर्जर म० । २. मृतेन चन्द्रकीर्तिना राज्ञा । ३. इन्द्रसदृशः ।

हरिरयं प्रभवः प्रथमोऽभवत्सुयशसो हरिवंशकुलोद्गतेः ।
जगति यस्य सुनामपरिग्रहाचरति भो हरिवंश इति श्रुतिः ॥५८॥
अभवदस्य महागिरिरङ्गजो हिमगिरिस्तनयः सुनयस्ततः ।
वसुगिरिश्च ततो गिरिरित्यमी त्रिदिवमोक्षयुजस्तु यथायथम् ॥५९॥
शतमखप्रतिमाः शतशस्ततः क्षितिभृतो हरिवंशविशेषकाः ।
क्रमधृताधिकराज्यतपोधुराः शिवपदं ययुरत्र दिवं परे ॥६०॥
व्यपगतेषु नृपेषु बहुष्वतः क्षितिपतिर्मगधाधिपतिः क्रमात् ।
इह बभूव हरिप्रभवान्वये कुशलधामकुशाग्रपुराधिपः ॥६१॥
स हि सुमित्र इति श्रुतनामकः श्रुतविशेषविभूषितपौरुषः ।
अनुशशास भुवं सह पद्मया चिरसुखः प्रियया जिनभक्तया ॥६२॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ हरिवंशोत्पत्तिवर्णनो नाम पञ्चदशः सर्गः ।

आर्य और रानी मनोरमाने चिरकाल तक पुत्रकी विशाल लक्ष्मीका अनुभव किया तत्पश्चात् दोनों अपने-अपने कर्मोंके अनुसार परलोकको प्राप्त हुए ॥५७॥ यही राजा हरि, परम यशस्वी हरिवंश-की उत्पत्तिका प्रथम कारण था । जगत्में इसीके नामसे हरिवंश इस नामकी प्रसिद्धि हुई ॥५८॥ राजा हरिके महागिरि नामका पुत्र हुआ । महागिरिके उत्तम नीतिका पालक हिमगिरि पुत्र हुआ । हिमगिरिके वसुगिरि और वसुगिरिके गिरि नामका पुत्र हुआ । ये सभी यथायोग्य स्वर्ग और मोक्षको प्राप्त हुए ॥५९॥ तदनन्तर हरिवंशके तिलक स्वरूप इन्द्रके समान सैकड़ों राजा हुए जो क्रमसे विशाल राज्य और तपका भार धारण कर कुछ तो मोक्ष गये और कुछ स्वर्ग गये ॥६०॥ इस प्रकार क्रमसे बहुतसे राजाओंके होनेपर उसी हरिवंशमें मगध देशका स्वामी राजा सुमित्र हुआ । वह कुशल-मङ्गलका स्थान तथा कुशाग्रपुर नगरका अधिपति था । उसका पराक्रम शास्त्रोंके विशिष्ट ज्ञानसे विभूषित था । वह अपनी जिनभक्त प्रिया पद्मावतीके साथ सुखका उपभोग करता हुआ चिरकाल तक पृथिवीका शासन करता रहा ॥६१–६२॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें हरिवंशकी उत्पत्तिका वर्णन करनेवाला पन्द्रहवाँ सर्ग समाप्त हुआ ॥१५॥

षोडशः सर्गः

वसन्ततिलकावृत्तम्

श्रीशीतलादिह परेषु जिनेषु पश्चात् तीर्थं प्रवर्त्य भरते जगतां हितार्थम् ।
कालक्रमेण नवसु श्रितवत्सु मोक्षं स्वर्गादिहैष्यति जिनाधिपतौ च विंशे ॥१॥
शक्राज्ञया प्रतिदिनं वसुधारयोच्चैरापूरयत्यवनिपस्य गृहं कुबेरः ।
पद्मावती मृदुतले शयने शयाना स्वप्नान् ददर्श दश षट् च निशावसाने ॥२॥
नागोक्षसिंहकमलाकुसुमस्रगिन्दुबालार्कमत्स्यकलशाब्जसरोऽम्बुराशीन् ।
सिंहासनामरविमानफणीन्द्रगेहसद्रत्नराशिशिखिनो जिनसू[1]रपश्यत् ॥३॥
सोपासिता नवनवत्युपमाव्यतीतदिव्यप्रभावदिगभिख्यकुमारिकाभिः ।
शय्यातले सकुसुमे शुशुभे विबुद्धा लेखा यथा नभसि तारकिता हिमांशोः ॥४॥
उन्निद्रपद्मनयनाननपाणिपादा सा रागिणी दिनमुखेऽधिपतिं सु[2]मित्रम् ।
भद्रासनोदयगतं स्थलपद्मिनीव पद्मावती समुदियाय सपुण्डरीका ॥५॥
[3]चित्राम्बराम्बुरमनागुरणितातिमञ्जुमञ्जीरसिञ्जितविहङ्गनिनादरम्या ।
मीनेक्षणा त्रिवलिभङ्गतरङ्गिणी सा स्त्रीवाहिनी समगमद् वर[4]वाहिनीशम् ॥६॥
पीनस्तनस्तबकभारनताङ्गयष्टिःताम्रपल्लवकरा मृदुबाहुशाखा ।
सञ्चारिणी मणिविभूषणभृन्महीशकल्पद्रुमं युवतिकल्पलता ननाम ॥७॥

अथानन्तर श्रीशीतलनाथ भगवान्के पश्चात् जब कालक्रमसे नौ तीर्थङ्कर भरत क्षेत्रमें जगत्के जीवोंके हितार्थ धर्म तीर्थकी प्रवृत्ति कर मोक्ष चले गये और बीसवें तीर्थङ्कर स्वर्गसे अवतार लेनेके सन्मुख हुए तब इन्द्रकी आज्ञासे कुबेर प्रतिदिन राजा सुमित्रके घरको रत्नोंकी उत्कृष्ट धारासे भरने लगा। कदाचित् कोमल शय्यापर शयन करनेवाली रानी पद्मावतीने रात्रिके अन्तिम समय १ गज, २ वृषभ, ३ सिंह, ४ लक्ष्मी, ५ पुष्पमाला, ६ चन्द्रमा, ७ बालसूर्य, ८ मत्स्य, ९ कलश, १० कमलसरोवर, ११ समुद्र, १२ सिंहासन, १३ देवविमान, १४ नागेन्द्रभवन, १५ रत्नराशि और १६ अग्नि ये सोलह स्वप्न देखे ॥१-३॥ उपमा रहित एवं दिव्य प्रभावको धारण करनेवाली निन्यानवे दिक्कुमारी देवियोंके द्वारा सेवित जिनमाता पद्मावती जब जागकर फूलोंकी शय्यापर बैठी तब ऐसी सुशोभित हो रही थी मानो आकाशमें ताराओंसे घिरी हुई चन्द्रमाकी लेखा ही हो ॥४॥ तदनन्तर जिसके नेत्र, मुख, हाथ और पैर फूले हुए कमलके समान थे, जो अनुरागसे युक्त थी, हर्षसे सहित थी और हाथमें सफेद कमल धारण कर रही थी ऐसी रानी पद्मावती प्रातःकालके समय ऊँचे सिंहासनपर विराजमान राजा सुमित्रके पास गई सो ऐसी जान पड़ती थी मानो अनेक कमलोंसे सुशोभित, लालिमा युक्त स्थल-कमलिनी ही उदयाचल-पर स्थित सुमित्र—सूर्यके पास जा रही हो ॥५॥ जो नाना प्रकारके वस्त्ररूपी जलसे युक्त थी, अत्यधिक रुन-झुन करनेवाले अतिशय सुन्दर नूपुरोंकी झनकाररूपी पक्षियोंकी कल-कल ध्वनिसे मनोहर थी, मछलियोंके समान नेत्रोंसे सहित थी और त्रिवलिरूपी तरङ्गोंसे सुशोभित थी ऐसी वह स्त्रीरूपी नदी राजा सुमित्ररूपी समुद्रके पास गई यह उचित ही था ॥६॥ उस समय

---

१. तीर्थङ्करजननी। २. सुमित्राख्यं नृपं, सूर्यं च। ३. चित्राण्यम्बराण्येवाम्बु यस्यां सा। ४. उत्तमसेनाध्यक्षं पक्षे उत्तमनदीपतिम्।

आसीनयाऽऽसनवरे स तया समीपे स्वप्नावलीफलमिलाधिपतिः प्रपृष्टः ।
तस्यै जगौ जिनपतेर्जगतां त्रयस्य भर्तुर्गुरू[1] लघु[2] भवाव इति प्रहृष्टः ॥८॥
स्पृष्टा [3]नृपोक्तिकिरणमालिवचोमयूखैः सा तोषपोषमुपगाद्धतनूरुहाऽभात् ।
स्त्रैणं निकृष्टमपि तीर्थकृतो गुरुत्वात् मत्वा प्रशस्तमिति विस्तृतपद्मिनीव ॥९॥
आरात्सहस्रपदपूर्वपदादुदारादाराद्धमत्सुरसहस्रगणोऽवतीर्य ।
मासाननुवास नवगर्भगृहे प्रशुद्धे सार्धाष्टमीह[4] गणनान्(?)मुनिसुव्रतोऽस्याः ॥१०॥
आनीलचूचुकविपाण्डुपयोधरश्रीः सा वज्रसंहतिसगर्भतया स्फुरन्ती ।
विद्युत्प्रभाभरणबृंहितभा बभासे वर्षाशरत्समयसन्धियुता यथा द्यौः ॥११॥
साऽसूत सूतिसमयेन्द्रमहे च माघपक्षेऽसिते जनमनोनयनोत्सवं तम् ।
द्वादश्यभीप्सि[5]ततिथौ श्रवणेऽश्रमेण व्योमेव पापरहिता जिनपूर्णचन्द्रम् ॥१२॥

मणिमय आभूषणोंको धारण करनेवाली रानी पद्मावती चलती-फिरती कल्पलताके समान जान पड़ती थी क्योंकि जिस प्रकार कल्पलता गुच्छोंके भारसे नम्रीभूत होती है उसी प्रकार उसकी अङ्गयष्टि भी स्थूल स्तनरूपी गुच्छोंसे नम्रीभूत थी, जिस प्रकार कल्पलता लाल-लाल पल्लवोंसे युक्त होती है उसी प्रकार वह भी लाल-लाल हथेलियोंसे युक्त थी और जिस प्रकार कल्पलता कोमल शाखाओंसे युक्त होती है उसी प्रकार वह भी कोमल भुजाओंसे युक्त थी। इस प्रकार रानी पद्मावतीरूपी कल्पलताने राजा सुमित्ररूपी कल्पवृक्षको नमस्कार किया ॥७॥ पास ही में उत्तम आसनपर बैठी रानी पद्मावतीने जब राजासे स्वप्नावलीका फल पूछा तब उन्होंने हर्षित होते हुए कहा कि हम दोनों शीघ्र ही तीनों जगत्‌के स्वामी जिनेन्द्र भगवान्‌के माता-पिता होंगे ॥८॥ इस प्रकार राजारूपी सूर्यकी वचनरूपी किरणोंसे स्पर्शको प्राप्त हुई रानी पद्मावतीके शरीरमें हर्षातिरेकसे रोमाञ्च निकल आये और वह फूली हुई कमलिनीके समान सुशोभित होने लगी। वह पहले जिस स्त्रीपर्यायको निकृष्ट समझती थी उसे ही अब तीर्थङ्करकी माता होनेके कारण श्रेष्ठ समझने लगी ॥९॥ जिन्हें हजारों देवोंके समूह दूरसे ही नमस्कार करते थे ऐसे भगवान् मुनिसुव्रतने सहस्रार नामक उत्कृष्ट स्वर्गसे अवतीर्ण होकर माता पद्मावतीके विशुद्ध गर्भ-गृहमें नौ माह निवास किया ॥१०॥ उस समय माता पद्मावती, वर्षा और शरद्‌ऋतुके संधिकालसे युक्त आकाशके समान जान पड़ती थी क्योंकि जिस प्रकार वर्षा और शरद्‌के संधिकालका आकाश कुछ काले और कुछ सफेद पयोधरों—मेघोंसे युक्त होता है उसी प्रकार पद्मावती भी नीली चूचुकसे युक्त सफेद पयोधरों—स्तनोंसे युक्त थी। जिस प्रकार वर्षा और शरद्‌के संधि-कालका आकाश वज्रसमूह—वज्रके समूहसे गर्भित होनेके कारण देदीप्यमान रहता है उसी प्रकार पद्मावती भी वज्रवृषभ संहननके धारक भगवान्‌के गर्भमें स्थित होनेसे देदीप्यमान हो रही थी और जिस प्रकार वर्षा तथा शरद्‌के सन्धिकालका आकाश विद्युत्प्रभाभरणबृंहितभा—बिजली की प्रभाको धारण करनेसे कान्तियुक्त होता है उसी प्रकार माता पद्मावती भी विद्युत्प्रभाभरण बृंहितभा—बिजलीके समान देदीप्यमान आभूषणोंसे बढ़ी हुई कान्तिसे युक्त थी ॥११॥

तदनन्तर पाप (पक्षमें कलंक) से रहित रानी पद्मावती रूप आकाशने प्रसूतिके योग्य समय आनेपर इन्द्रमह उत्सवके दिन माघ कृष्ण द्वादशीकी शुभ तिथिमें जब कि श्रवण नक्षत्र था बिना किसी श्रमके, मनुष्योंके मन और नेत्रोंको आनन्द देनेवाले जिनेन्द्ररूपी पूर्णचन्द्रको

१. मातापितरौ। २. शीघ्रम्। ३. नृपसूर्यवचनकिरणैः। ४. सार्धाष्टमीत ख० (?)। सार्धाष्टमाह क०, ङ० (?)। अष्टदिनसहितान्नवमासान् (क० टि०)। ५. -भीप्सित -म०।

जातेन तेन शुभलक्षणलक्षितेन पद्मावती प्रमुदिता मुनिसुव्रतेन ।
सा रूढरा[1]गशिखिकण्ठरुचा चकासे स्निग्धेन्द्रनीलमणिनाकरभूरिवैका ॥१३॥
आकम्पितासनकिरीटजगत्त्रयेन्द्राः सद्यःप्रयुक्तविशदावधयोऽधिगम्य ।
चेलुः सुरा जिनसमुद्भवमद्भुतोच्चैर्घण्टास्फुटोद्[2] पटहशङ्खरवैश्च शेषाः ॥१४॥
[3]गन्धाम्बुवर्षमृदुमारुतपुष्पवृष्टिसम्पूरिताखिलजगद्वलयाः समन्तात् ।
आगत्य चाशु सुकृतोज्ज्वलभूषवेषाः शक्रादयः पुरकुशाग्रपुरं परीयुः ॥१५॥
नत्वा जिनं जिनगुरू[4] च सुरासुराश्च तज्जातकर्मणि कृते सुरकन्यकाभिः ।
ऐरावतं समधिरोप्य महाविभूत्या गत्वा परीत्य गिरिराजमधित्यकायाम् ॥१६॥
संस्थाप्य पाण्डुकशिलातलमस्तके तं सिंहासने सुपयसोद्धपयःपयोधेः ।
भूत्याभिषिच्य कृतभूषमभिष्टवैस्ते स्तुत्वाऽभिधाय मुनिसुव्रतनामधेयम् ॥१७॥
आनीय नीतिकुशलाः जननीशुभाङ्कमारोप्य नाटकविधिं प्रविधाय देवाः ।
नत्वा ययुः शतमखप्रमुखा यथास्वमानन्दितत्रिभुवनं सगुरुं जिनं ते ॥१८॥
ज्ञानत्रयं सहजनेत्रमुदारनेत्रो बिभ्रज्जिनः सुरकुमारकसेव्यमानः ।
कालानुरूपकृतसर्वकुबेरयोगक्षेमो ययावपघनस्य[5] गुणस्य वृद्धिम् ॥१९॥

उत्पन्न किया।।१२।। जिस प्रकार इन्द्रनीलमणिसे खानकी भूमि सुशोभित होती है उसी प्रकार शुभ लक्षणोंसे युक्त एवं लाली सहित नीलकण्ठ—मयूरकी कान्तिको धारण करनेवाले मुनिसुव्रत भगवान्से हर्षित पद्मावती सुशोभित हो रही थी।।१३।। उस समय तीनों जगत्के इन्द्रोंके आसन और मुकुट कम्पायमान हो गये थे जिससे तत्काल ही अवधिज्ञानका प्रयोग कर उन्होंने जिनेन्द्र भगवान्के जन्मका समाचार जान लिया था और शेष देवोंने अत्यन्त आश्चर्य तथा जोरके साथ होनेवाली घंटाध्वनि, सिंहध्वनि, पटहध्वनि और शङ्खध्वनिसे जिनेन्द्र-जन्मका निश्चय कर लिया था। इस प्रकार जिनेन्द्र भगवान्का जन्म जानकर समस्त इन्द्र और देव जन्मोत्सवके लिए चले।।१४।। सुगन्धित जल, मन्द वायु और पुष्पोंकी वर्षासे जिन्होंने समस्त जगत्को भर दिया था तथा जिन्होंने उत्तमोत्तम देदीप्यमान आभूषणोंसे सुशोभित वेष धारण किया था ऐसे इन्द्र आदि देवोंने सब ओरसे शीघ्र आकर विशाल कुशाग्रपुरकी प्रदक्षिणाएँ दीं।।१५।। तत्पश्चात् समस्त सुर-असुर देवोंने जिनेन्द्र भगवान् और उनके माता-पिताको नमस्कार किया, देव-कन्याओंने जातकर्म किया और उसके बाद समस्त देव जिनेन्द्र भगवान्को ऐरावत हाथीपर बैठाकर बड़े वैभवके साथ सुमेरु पर्वतपर ले गये। वहाँ प्रथम ही उन्होंने मेरु पर्वतकी प्रदक्षिणाएँ दीं फिर उसके ऊर्ध्वभागपर बनी पाण्डुक शिलाके ऊपर स्थित सिंहासनपर जिनेन्द्र भगवान्को विराजमान किया। वहाँ क्षीर सागरके उत्तम जलसे महाविभूतिके साथ उनका जन्माभिषेक किया, नाना प्रकारके स्तोत्रोंसे स्तुति की, मुनिसुव्रत नाम रक्खा। तदनन्तर नीति-निपुण देवोंने भगवान्को ला माताकी शुभ गोदमें विराजमान कर आनन्द नाटक किया। तत्पश्चात् इन्द्रादि देव, त्रिभुवनको आनन्दित करनेवाले जिनेन्द्र भगवान् और उनके माता-पिताको नमस्कार कर यथायोग्य अपने-अपने स्थानपर चले गये।।१६–१८।। जो स्वयं विशाल नेत्रोंसे युक्त थे, तीन ज्ञानरूपी सहज नेत्रोंको धारण करनेवाले थे, देवकुमार जिनकी निरन्तर सेवा करते थे और समय-समयके अनुरूप कुबेर जिनके योग-क्षेमका ध्यान रखता था—सब सुख-सामग्री समर्पित करता था ऐसे भगवान् मुनिसुव्रत शरीर और गुणोंकी वृद्धिको प्राप्त होने लगे। भावार्थ—जैसे-

---

१. सा रागरूढ-म०। २. मृगे पटह-म०। ३. गत्वाम्बुवर्षमृदुमारुतपुष्पवृष्टिं म०। ४. जिनमातापितरौ। ५. शरीरस्य।

रम्याङ्गनाश्च कुलशैलसमुद्भवास्तमाद्यन्तमध्यसततान्युदया युवानम् ।
लावण्यवाहिनमवाप्य विवाहपूर्वं नद्यः समुद्रमिव संवरयाम्बभूवुः ॥२०॥
राज्यस्थितः स हरिवंशमरीचिमाली राजा प्रजाकमलिनीहितलोकपाकः ।
राजाधिराजसुरसेवितपादपद्मो भेजे चिरं विषयसौख्यमखण्डिताज्ञः ॥२१॥
प्राप्ता कदाचिदथ तं शरदम्बुजास्या¹ बन्धूकबन्धुरतराधरपल्लवश्रीः ।
काशाच्छचामरकरा विशदाम्बुवस्त्रा वर्षावधूव्यतिगमे स्ववधूरिवैका ॥२२॥
अन्तर्दधे धवलगोकुलघोषघोषैर्मेघावली लघुविधूतरवेव धूम्रा ।
मेघावरोधपरिमुक्तदिशासु सूर्यः पादप्रसारणसुखं श्रितवांश्चिरेण ॥२३॥
रोधोनितम्बगलदम्बुविचित्रवस्त्राः सावर्तनाभिसुभगाश्चलमीननेत्राः ।
फेनावलीवलयवीचिविलासबाहाः क्रीडासु जह्रुरबलासरितोऽस्य चित्तम् ॥२४॥
ऊर्मिभ्रुवश्चटुलनेत्रशफर्यपाङ्गाः मत्तद्विरेफकलहंसनिनादरम्याः ।
फुल्लारविन्दमकरन्दरजोऽङ्गरागा रागं रतौ विदधुरस्य वधूसरस्यः ॥२५॥

जैसे उनका शरीर बढ़ता जाता था वैसे-वैसे ही उनके गुण बढ़ते जाते थे ॥१९॥ जिस प्रकार कुलाचलोंसे उत्पन्न, आदि मध्य और अन्तमें समान रूपसे बहनेवाली नदियाँ लवण समुद्रको प्राप्त कर वरती हैं उसी प्रकार उत्तम कुलरूपी पर्वतोंसे उत्पन्न, बालक, युवा और वृद्ध तीनों अवस्थाओंमें निरन्तर अभ्युदयको धारण करनेवाली सुन्दर स्त्रियोंने सौन्दर्यके धारक युवा मुनिसुव्रतनाथको प्राप्त कर विवाहपूर्वक वरा था ॥२०॥

तदनन्तर जो राज्य-सिंहासनपर आरूढ़ थे, हरिवंशरूपी आकाशके मानो सूर्य थे, प्रजारूपी कमलिनीका हित करनेके लिए सूर्यस्वरूप थे, राजा, महाराजा और देव जिनके चरण-कमलोंकी सेवा करते थे तथा जो अखण्ड आज्ञाके धारक थे ऐसे राजा मुनिसुव्रतनाथने चिरकाल तक विषय-सुखका उपभोग किया ॥२१॥ अथानन्तर किसी समय शरद्-ऋतु आई सो वह ऐसी जान पड़ती थी मानो वर्षारूपी स्त्रीके चले जानेपर एक दूसरी अपनी ही स्त्री आई हो अर्थात् वह शरद्ऋतु स्त्रीके समान जान पड़ती थी क्योंकि जिस प्रकार स्त्री कमलके समान मुखसे युक्त होती है उसी प्रकार वह शरद्ऋतु भी कमलरूपी मुखसे सहित थी, जिस प्रकार स्त्री लाल-लाल अधरोष्ठसे युक्त होती है उसी प्रकार वह शरद्ऋतु भी बन्धूकके लाल-लाल फूलरूपी अधरोष्ठसे युक्त थी, जिस प्रकार स्त्री हाथमें चामर लिये रहती है उसी प्रकार वह शरद्ऋतु भी काशके फूलरूपी स्वच्छ चामर हाथमें लिये थी और जिस प्रकार स्त्री उज्ज्वल वस्त्रोंसे युक्त होती है उसी प्रकार वह शरद् भी उज्ज्वल मेघरूपी वस्त्रोंसे युक्त थी ॥२२॥ जिसने शीघ्र ही अपना शब्द बन्द कर दिया था ऐसी धूमिल मेघमाला, सफेद-सफेद गायोंके समूहसे युक्त अहीरोंकी बसतीके जोरदार शब्द सुनकर ही मानो अन्तर्हित हो गई थी और मेघोंके आवरणसे रहित दिशाओंमें सूर्य चिरकालके बाद पाद—पाँवों (पक्षमें किरणों) के फैलानेका सुख प्राप्त कर सका था ॥२३॥ जिनके तटरूपी नितम्बसे जलरूपी चित्र-विचित्र वस्त्र नीचे खिसक गये थे, जो भँवररूपी नाभिसे सुन्दर थीं, मीनरूपी चञ्चल नेत्रोंसे युक्त थीं और फेनावलीरूपी चूड़ियोंसे युक्त तरङ्गरूपी चञ्चल भुजाओंसे सहित थीं ऐसी नदीरूपी स्त्रियाँ क्रीड़ाओंके समय इनका हृदय हरने लगीं ॥२४॥ ऊर्मियाँ ही जिनकी भौंहें थीं, मछलियाँ ही जिनके चञ्चल कटाक्ष थे, जो मदोन्मत्त भौंरों और कलहंसोंके शब्दसे मनोहर थीं और फूले हुए कमलोंका मकरन्द सम्बन्धी पराग ही जिनका अंगराग था ऐसी सरसीरूपी स्त्रियाँ क्रीड़ाके समय इनके रागको उत्पन्न

---

१. शरदम्बुजाढ्या म० ।

नम्रो भृशं फलभरेण सुगन्धिशालिः शालेयजा च विकचोत्पलजातिरुच्चा ।
सौभाग्यगन्धवशवर्तितयाङ्गमङ्गमासाद्य जिघ्रतुरिवास्यमजस्रमेतौ ॥२६॥
धूलीः [1]कदम्बमदधूलिगताङ्गरागाधाराः कदम्बमधुनो विधुराः स्मरन्तः ।
माद्यद्द्विपेन्द्रमदगन्धिषु षट्पदौघाः सप्तच्छदेषु विततेषु रतिं वितेनुः[2] ॥२७॥
काले स तत्र मुनिसुव्रतराजहंसः कैलासशैलसदृशे स्थितवान् सुसौधे ।
लीलावधूतरतिविभ्रमराजहंसीः व्रीडाभयातिरुचिराभरणाः प्रपश्यन् ॥२८॥
पश्यन् दिशः सकलशारदसस्यशोभाः मेघं ददर्श शशिशुभ्रमदभ्रशोभम्[3] ।
व्योमार्णवारमणतृष्णमिवावतीर्णमैरावणं भ्रमणविभ्रमवारणेन्द्रम् ॥२९॥
निःशेषनिर्गलितनीरनिजोत्तरीयमाशावधूविपुलपीनपयोधरं सः ।
प्रोत्तुङ्गपाण्डुपरिणाहिनमम्बरस्य भूषायमाणमवलोक्य तमाप तोषम् ॥३०॥
पश्चात्प्रचण्डतरमारुतवेगघातनिर्मूलितावयवमाशु विलीयमानम् ।
ज्वालोपनीतमिव तं नवनीतपिण्डमालोक्य लोकविभुरित्थमचिन्तयत्सः ॥३१॥
शीर्णः शरज्जलधरः कथमेष शीघ्रमायुःशरीरवपुषां विशरारुतायाः[4] ।
लोकस्य विस्मरणशीलविशीर्णबुद्धेराशूपदेशमिव[5] विश्वगतं वितन्वन् ॥३२॥

कर रही थी ॥२५॥ फलके भारसे अतिशय झुके हुए सुगन्धित धानके पौधे और धानके खेतोंमें उत्पन्न हुई ऊँची उठी विकसित उत्पलोंकी श्रेणियाँ—दोनों ही सौभाग्य सम्बन्धी हर्षके वशीभूत हो अंगसे-अंग मिलाकर मानो एक दूसरेका मुख ही सूँघ रही थीं ॥२६॥ जिनके शरीरपर विकसित कदम्ब-पुष्पोंकी परागका अङ्गराग लगा था तथा जो कदम्ब मधुकी धाराओं और धूलिका स्मरण करते हुए दुःखी हो रहे थे ऐसे भ्रमरोंके समूह अब कदम्ब-पुष्पोंका अभाव हो जानेसे मदोन्मत्त गजराजके मद जैसी गन्धसे युक्त सप्तपर्ण वृक्षोंके लम्बे-चौड़े वनोंमें प्रीति करने लगे ॥२७॥ ऐसी शरदृऋतुके समय भगवान् मुनिसुव्रतरूपी राजहंस—श्रेष्ठ राजा (पक्षमें राजहंस), लज्जा और भय ही जिनके सुन्दर आभूषण थे तथा जिन्होंने अपनी लीलासे रतिकी शोभाको दूर कर दिया था ऐसी राजहंसियों—श्रेष्ठ रानियों (पक्षमें राजहंसिनियों) को देखते हुए भगवान् मुनिसुव्रतनाथ कैलास पर्वतके समान ऊँचे महलपर विराजमान थे ॥२८॥ शरदृ-ऋतुके समस्त धान्योंकी शोभासे युक्त दिशाओंको देखते-देखते उन्होंने एक मेघको देखा। वह मेघ चन्द्रमाके समान सफेद था, अत्यधिक शोभासे युक्त था और आकाशरूपी समुद्रमें क्रीड़ा करनेकी अभिलाषासे अवतीर्ण भ्रमणप्रेमी, गजराज ऐरावतके समान जान पड़ता था ॥२९॥ जिसके ऊपरसे समस्त जलरूपी अपना उत्तरीय वस्त्र नीचे खिसक गया था, जो अतिशय ऊँचा, सफेद एवं विस्तारसे युक्त था, आकाशका आभूषण था, और दिशारूपी स्त्रीके अतिशय स्थूल स्तनके समान जान पड़ता था ऐसे उस मेघको देखकर भगवान् आनन्दको प्राप्त हो रहे थे ॥३०॥ कुछ ही समयके पश्चात् अत्यन्त प्रचण्ड वायुके वेगजन्य आघातसे उस मेघके समस्त अवयव नष्ट हो गये और वह ज्वालाओंके समीप रखे हुए नवनीतके पिण्डके समान शीघ्र ही विलीन हो गया, यह देख जगत्के स्वामी भगवान् मुनिसुव्रतनाथ इस प्रकार विचार करने लगे ॥३१॥

अरे ! यह शरदृऋतुका मेघ इतनी जल्दी कैसे विलीन हो गया ? जान पड़ता है आयु, शरीर और वपुकी क्षणभंगुरताको भुला देनेवाले मनुष्यको व्यापक उपदेश देनेके लिए ही मानो

१. धूलीकदम्बमदधूलिगतां सरागा धारां ख० । २. वितेने म० । ३. अभ्रशशोभम् । ४. नश्वरतायाः । ५. आशु + उपदेशमिव । आशु शीघ्रमित्यर्थः ।

अल्पप्रमाणपरमाणुसमूहराशिरासञ्चितः [1]स्वपरिणामवशादसारः ।
कालप्रभञ्जनजवाबनिपातमात्रादायुर्घनः[2] प्रलयमत्र लघु[3] प्रयाति ॥३३॥
वज्रात्मसंहननसंहतसन्धिबन्धः[4] सत्सन्निवेशनवरम्य[5]शरीरमेघः ।
[6]मोघीभवत्यसुभृतामसमर्थ एव वायुप्रकोपभरभग्नसमस्तगात्रः ॥३४॥
सौभाग्यरूपनवयौवनभूषणस्य भूलोकचित्तनयनामृतवर्षणस्य ।
देहाम्बुदस्य दिनकृत्प्रतिघातिनी स्याच्छायावयःपरिणतिद्रुतवात्ययाऽस्य ॥३५॥
शौर्यप्रभावसुवशीकृतसागरान्तभूराजसिंहचिररक्षितभूमिभागाः ।
सौराज्यभोगगिरयोऽपि विशीर्णशृङ्गाश्चूर्णीभवन्ति समयान्तरवज्रघातैः ॥३६॥
नेत्रं मनश्च भवदत्र कलत्रमिष्टं प्राणैः समं समसुखासुखमित्रपुत्रम् ।
व्येतीह पत्रमिव शुष्कमदृष्टवाताद्देवोऽप्युपैति हि भवे प्रियविप्रयोगम् ॥३७॥
पश्यन्नपि क्षणविभङ्गुरमङ्गभाजामङ्गादिकं स्वयममृत्युभयोऽयमङ्गी ।
मोहान्धकारपिहितागमदृष्टिरिष्टं मार्गं विहाय विषयामिषगर्तमेति ॥३८॥
प्रत्यङ्गमङ्गजमतङ्गजसङ्गताङ्गः स्वाङ्गैः स्पृशन् प्रियवधूजनगात्रयष्टीः ।
धिक् स्पर्शसौख्यविनिमीलितनेत्रभागो मातङ्गवद् विषमबन्धमियर्ति मर्त्यः ॥३९॥
आहारमिष्टमिह षड्रसभेदभिन्नमाहारयन् बहुविधं स्पृहयापदृष्टिः ।
जिह्वावशो दलितशङ्कुविलग्नमांसपेशीप्रियश्चपलमीन इवैति बन्धम् ॥४०॥

यह शीघ्र विलीन हो गया है ॥३२॥ अपने-अपने परिणामोंके अनुसार संचित, अल्प प्रमाण परमाणुओंका राशिस्वरूप यह आयुरूप मेघ निःसार है इसी लिए तो मृत्युरूपी प्रचण्ड वायुके वेगका आघात लगते ही शीघ्र ही नष्ट हो जाता है ॥३३॥ वज्र रूपी संधियोंके बन्धनसे युक्त यह प्राणियोंका उत्तम रचनासे सुशोभित नूतन एवं सुन्दर शरीररूपी मेघ, मृत्युरूपी पवनके प्रबल आघातसे क्षत-विक्षत हो असमर्थ होता हुआ विफल हो जाता है ॥३४॥ सौभाग्य, रूप और नवयौवन ही जिसका आभूषण है तथा जो पृथिवीके समस्त मनुष्योंके चित्त और नेत्रोंके लिए अमृतकी वर्षा करता है ऐसे इस शरीररूपी मेघकी छाया, वृद्धावस्थारूपी तीव्र आँधीसे सूर्यको आच्छादित करनेवाली हो जाती है—नष्ट-भ्रष्ट हो जाती है ॥३५॥ शौर्य और प्रभावके द्वारा सागरान्त पृथिवीको अच्छी तरह वश करनेवाले बड़े-बड़े राजाओंके द्वारा जिनमें भूमि-भागोंकी चिर रक्षा की गई है ऐसे उत्तम राज्यके भोगरूपी पर्वतोंके शिखर भी कालरूपी प्रचण्ड वज्रके आघातसे चूर-चूर हो जाते हैं ॥३६॥ नेत्र और मनरूप होती हुई नेत्र और मनके समान प्यारी स्त्री तथा प्राणोंके समान सुख-दुःखके साथी मित्र और पुत्र इस संसारमें अदृष्टरूपी वायुसे प्रेरित हो सूखे पत्तेके समान नष्ट होते रहते हैं। मनुष्यकी तो बात ही क्या है देव भी इस संसारमें प्रियजनोंके वियोगको प्राप्त होता है ॥३७॥ अहो ! यह प्राणी, अन्य प्राणियोंके शरीर आदिको क्षणभङ्गुर देखता हुआ भी स्वयं मृत्युके भयसे रहित है तथा इसकी शास्त्ररूपी दृष्टि मोहरूपी अन्धकारसे आच्छादित हो गई है इसलिए यह इष्ट मार्गको छोड़कर विषयरूपी आमिषके गर्तमें पड़ रहा है ॥३८॥ जिसका प्रत्येक अंग कामरूपी मत्त हाथीसे संगत है ऐसा यह मनुष्य अपने अवयवोंसे प्रिय स्त्रियोंके शरीरका स्पर्श करता हुआ उनके स्पर्शजन्य सुखसे निमीलित नेत्र हो मत्त-मातङ्गके समान विषय बन्धको प्राप्त होता है इसलिए इस स्पर्शजन्य सुखके लिए धिक्कार है ॥३९॥ जिसकी विवेक दृष्टि नष्ट हो गई है ऐसा यह मनुष्य जिह्वा इन्द्रियके वशीभूत हो

---

१. सपरिणाम- म०, क० ख० । २. आयुरेव घनः । ३. शीघ्रम् । ४. बन्ध-म० । ५. वनरम्य म०, ख० । ६. मेघीभव-म० ।

घ्राणेन्द्रियप्रियसुगन्धिसुगन्धमन्धो[1] जड्डालकादिव विलङ्घिततृप्तिमार्गः ।
दुष्पाकमस्तधिषणो विषपुष्पगन्धमाघ्राय शीघ्रमवमेति यथा षडङ्घ्रिः ॥४१॥
चित्तद्रवीकरणदक्षकटाक्षपातसस्मेरवक्त्रवनिताङ्गनिविष्टदृष्टिः ।
रूपप्रियोऽपि लभते परितापमुग्रं प्राप्तः पतङ्ग इव दीपशिखाप्रपातम् ॥४२॥
स्वेष्टाङ्गनामुखरनूपुरमेखलादिनानाविभूषणरवैः प्रियभाषणैश्च ।
सङ्गीतकैश्च मधुरैर्हृतधीरधीरः श्रोत्रेन्द्रियैर्मृग इव म्रियते मनुष्यः ॥४३॥
सङ्क्लिश्यते विषयभोगकलङ्कपङ्के यत्पुङ्गवा ततिरिहाल्पबला निमग्ना ।
चित्रं न तद् यदतिमज्जति वज्रकायपुंनागसन्ततिरितीदमतीव चित्रम् ॥४४॥
यः स्वर्गसौख्यजलधीनतिदीर्घकालं पीत्वाऽपि तृप्तिमगमद् बहुशो न जीवः ।
सौहित्यमल्पदिवसैः कथमस्य कुर्यात् भूलोकसौख्यलवलोल[2]तृणोदबिन्दुः ॥४५॥
अग्नेरिवेन्धनमहानिचयैर्न तृप्तिरम्भोनिधेरिव सदापि नदीसहस्रैः ।
जीवस्य तृप्तिरिह नास्ति [3]तथानिषेव्यैः सांसारिकैरुपचितैरपि कामभोगैः ॥४६॥
भोगाभिलाषविषमाग्निशिखाकलापसंवृद्धये हि विषयेन्धनराशिरुच्चैः ।
तस्यैव तु प्रशमहेतुरिहैव तस्मात् व्यावृत्तिरिन्द्रियजिति स्थिरवारिधारा ॥४७॥
हित्वा ततो विषयसौख्यमसारभूतं शीघ्रं यतेऽहमिह मोक्षपथे सनाथे ।
स्वार्थं प्रसाध्य परमं प्रथमं परार्थं तीर्थप्रवर्तनमथ प्रथयामि तथ्यम् ॥४८॥

इच्छापूर्वक छह प्रकारके रसोंसे युक्त नाना प्रकारके इष्ट आहारको ग्रहण करता हुआ वंशीके काँटेपर लगे मांसके लोभी मीनके समान बन्धको प्राप्त होता है ॥४०॥ जिस प्रकार निर्बुद्धि भ्रमर विषपुष्पकी गन्धको सूँघकर दुष्पाकसे युक्त मरणको प्राप्त होता है उसी प्रकार जड्डावलके कारण हो मानो तृप्तिके मार्गको उल्लंघन करनेवाला यह मनुष्य घ्राणेन्द्रियको अच्छे लगनेवाले सुगन्धित पदार्थोंकी सुगन्धको सूँघकर अन्धा होता हुआ दुष्परिणामसे युक्त पाप बन्धको प्राप्त होता है ॥४१॥ जिस प्रकार दीप-शिखापर पड़ा पतंग उग्र संतापको प्राप्त होता है उसी प्रकार रूपका लोभी यह प्राणी, चित्तको द्रवीभूत करनेमें दक्ष कटाक्ष और मन्द-मन्द मुसकुराहटसे युक्त मुखसे सुशोभित स्त्रियोंके शरीरपर दृष्टि डालता हुआ भयंकर संतापको प्राप्त होता है ॥४२॥ अपनी इष्ट स्त्रियोंके शब्दायमान नूपुर तथा मेखला आदि नाना प्रकारके आभूषणोंके शब्दों, प्रियभाषणों और मधुर संगीतोंसे जिसकी बुद्धि हरी गई है ऐसा यह मनुष्य अधीर होता हुआ श्रोत्रेन्द्रियके द्वारा मृगके समान मृत्युको प्राप्त होता है ॥४३॥ अल्प शक्तिके धारक क्षुद्र मनुष्योंका समूह विषय-भोग जन्य पापरूपी कीचड़में फँसकर जो क्लेश उठाता है वह आश्चर्य नहीं है किन्तु वज्रमय शरीरके धारक श्रेष्ठ मनुष्योंका समुदाय भी जो उस पापपङ्कमें अतिशय निमग्न हो रहा है यह अत्यधिक आश्चर्यकी बात है ॥४४॥ जो जीव अनेकों बार अत्यन्त दीर्घ कालतक स्वर्गके सुखरूपी सागरको पीकर भी तृप्तिको प्राप्त नहीं हुआ उसे भूलोक सम्बन्धी अल्प सुखरूपी तृणकी चञ्चल जलबिन्दु कुछ दिनोंमें कैसे सन्तुष्ट कर सकती है ? ॥४५॥

जिस प्रकार ईन्धनकी बहुत बड़ी राशिसे अग्निको तृप्ति नहीं होती और सदा गिरनेवाली हजारों नदियोंसे समुद्रको सन्तोष नहीं होता उसी प्रकार सेवन किये हुए संसारके संचित काम-भोगोंसे जीवको तृप्ति नहीं होती ॥४६॥ निश्चयसे विषयरूपी ईन्धनकी बहुत बड़ी राशि, भोगाभिलाषारूपी विषम अग्निकी ज्वालाओंकी वृद्धिका कारण है और इन्द्रियविजयी मनुष्यकी जो उन विषयोंसे व्यावृत्ति है वह स्थिर जलधाराके समान उस विषमाग्निकी शान्तिका कारण है ॥४७॥ इसलिए मैं सारहीन विषयसुखको छोड़कर शीघ्र ही हितरूप मोक्ष-मार्गमें प्रवृत्ति करता

---

१. सन्धो म० । २. -मणुलोल-ख० । ३. तथाभिषेकैः म० ।

इत्थं मतिश्रुतयुतावधिबोधनेत्रे [1]जाते स्वयम्भुवि तदा स्वयमेव बुद्धे ।
आकम्पितासनमभूदमरेन्द्रवृन्दं सर्वार्थसिद्धिसुरपर्यवसानमाशु ॥४९॥
लौकान्तिका ललितकुण्डलहारशोभाः सारस्वतप्रभृतयो निभृताः सिताभाः ।
आगत्य मौलिमिलिताञ्जलयः किरन्तः पुष्पाञ्जलीमिति जिनं तुष्टुवुर्नमन्तः ॥५०॥
वर्धस्व नन्द जय जीव जिनेन्द्रचन्द्र ! विज्ञानरश्मिहतमोहतमोवितान ।
[2]निर्बन्धबन्धुतम ! भव्यकुमुद्वतीनां तीर्थस्य विंशतितमस्य हितस्य कर्ता ॥५१॥
त्वं वर्तय त्रिभुवनेश्वर ! धर्मतीर्थं यत्रायमुग्रभवदुः[3]खशिखिप्रतप्तः ।
स्नात्वा जनस्त्यजति मोहमलं समस्तमह्नाय याति च शिवं शिवलोकमग्र्यम् ॥५२॥
चारित्रमोहपरमोपशमात्प्रबुद्धं लौकान्तिका इति जिनं प्रतिबोधयन्तः ।
नान्यज्जगुर्निजनियोगनिवेदनेषु युक्ता[4] हि यान्ति न पुनः पुनरुक्तदोषम् ॥५३॥
सौधर्मपूर्वविबुधाश्च चतुर्णिकाया नानाविमाननिवहस्थगितान्तरिक्षाः ।
सम्प्राप्य नाथमभिषिच्य सुगन्धितोयैस्तं भूषितं विदधुरद्भुतभूषणाद्यैः ॥५४॥
पुत्रं च सुव्रतमसौ मुनिसुव्रतेशः [5]प्राभावतेयमभिराज्यपदेऽभ्यषिञ्चत् ।
श्वेतातपत्रसितचामरविष्टराणि सोऽलञ्चकार हरिवंशनभःशशाङ्कः ॥५५॥
भूपोद्धृतां नभसि देवगणैरूढामारूढवान् सुरुचिरां शिबिकां विचित्राम् ।
यातो वनं विदितकार्तिकशुक्लपक्षे षष्ठोपवासकृदुपाश्रितसत्समीकः ॥५६॥

हूँ और सबसे पहले अपना उत्कृष्ट प्रयोजन सिद्धकर पश्चात् परहितके लिए यथार्थ तीर्थकी प्रवृत्ति करूँगा ॥४८॥ इस प्रकार मति, श्रुत और अवधि ज्ञान रूपी नेत्रोंसे युक्त स्वयंभू भगवान् जब स्वयं प्रतिबुद्ध हो गये तब सर्वार्थसिद्धि तकके समस्त इन्द्रोंके आसन शीघ्र ही कम्पायमान हो गये ॥४९॥ उसी समय सुन्दर कुण्डल और हारोंसे सुशोभित, निश्चल मनोवृत्ति और श्वेत दीप्तिके धारक सारस्वत आदि लौकान्तिक देव आ गये और हाथ जोड़ मस्तकसे लगा पुष्पाञ्जलियाँ बिखेरते हुए नमस्कार कर जिनेन्द्र भगवान्‌की इस प्रकार स्तुति करने लगे ॥५०॥

हे जिनेन्द्र चन्द्र ! हे सम्यग्ज्ञानरूपी किरणोंसे मोहरूपी अन्धकारके समूहको नष्ट करनेवाले ! आप वृद्धिको प्राप्त हों, समृद्धिमान् हों, जयवन्त रहें, चिरकाल तक जीवित रहें, आप बन्ध रहित हैं, भव्य जीवरूपी कुमुदिनियोंके उत्तम बन्धु हैं और हितकारी बीसवें धर्मतीर्थके प्रवर्तक हैं ॥५१॥ हे त्रिलोकीनाथ ! आप उस धर्मतीर्थकी प्रवृत्ति करें जिसमें संसारके तीव्र दुःखरूपी अग्निसे संतप्त प्राणी स्नानकर समस्त मोहरूपी मलको छोड़ दें और शीघ्र ही आनन्ददायी उत्तम शिवालयको प्राप्त हो जावें ॥५२॥ भगवान्, चारित्र मोहकर्मके परमोपशम (उत्कृष्ट क्षयोपशम) से स्वयं ही प्रतिबोधको प्राप्त हो गये थे इसलिए उन्हें उक्त प्रकारसे संबोधते हुए लौकान्तिक देवोंने अन्य कुछ नहीं कहा सो ठीक ही है क्योंकि योग्य मनुष्य अपने नियोगकी पूर्तिमें कभी पुनरुक्त दोषको प्राप्त नहीं होते ॥५३॥ उसी समय नाना विमानोंके समूहसे आकाशको आच्छादित करते हुए सौधर्मेन्द्र आदि चारों निकायके देव आ पहुँचे। आकर उन्होंने सुगंधित जलसे भगवान्‌का अभिषेक किया और आश्चर्य उत्पन्न करनेवाले उत्तमोत्तम आभूषण आदिसे उन्हें अलंकृत किया ॥५४॥ भगवान् मुनिसुव्रतनाथने अपनी प्रभावती स्त्रीके पुत्र सुव्रतका राज्य पदपर अभिषेक किया और हरिवंशरूपी आकाशमें चन्द्रमाके समान सुशोभित सुव्रतने भी सफेद छत्र, सफेद चामर तथा सिंहासनको अलंकृत किया ॥५५॥ तदनन्तर पहले जिसे भूमिपर राजाओंने उठाया था और उसके बाद जिसे देवलोग आकाशमें उठा ले गये थे ऐसी अतिशय

---

१. ज्ञाने । २. निर्बन्ध-क० । ३. दुःखाग्नि । ४. योग्याः । ५. प्रभावत्याः अपत्यं पुमान् प्राभावतेयः तम् ।

भूभृत्सहस्रपरिवारभृदेष भेजे दीक्षां समक्षमखिलस्य जगत्त्रयस्य ।
तन्मूर्धजानधिनिधाय निजोत्तमाङ्गे शक्रश्चकार विधिना सुपयःपयोधौ ॥५७॥
कृत्वामराश्च जिननिष्क्रमणं तृतीयकल्याणपूजनममी जगुरीश्वरोऽपि ।
ज्ञानैश्चतुर्भिरनुगैश्च सहस्रसंख्यैस्तैः पार्थिवैर्दिनमणिः किरणैरिवाभात् ॥५८॥
षष्ठोपवासिनि परेद्युरिनेऽवतीर्णे भिक्षाविधिप्रकटनाय कुशाग्रपुर्याम् ।
भिक्षां ददौ वृषभदत्त इति प्रसिद्धः [1]सत्पायसं सविधिना मुनिसुव्रताय ॥५९॥
स्वाधीनमप्रतिहतं स्थितिभुक्तियुक्तं सत्पाणिपात्रमधिपेन विधानपूर्वम् ।
प्रावर्ति वर्तनसुवर्तनसाधुयोग्यं तीर्थे निजे स्थितिविदा जिनभास्करेण ॥६०॥
चित्रं तदा हि परमान्नमपूर्णपाणौ [2]शुद्ध्यान्वितेन ददता परिनिष्ठशेषम् ।
शेषैरशेषयतिभिश्च[3] सहस्रसंख्यैर्भुज्यमानमपरैश्च ययौ न निष्ठाम्[4] ॥६१॥
नेदुस्ततस्त्रिदशदुन्दुभयो निनादाः साधुस्वनः सकलमम्बरमाततान ।
वायुर्ववौ सुरभिरद्भुतपुष्पवृष्टिर्व्योम्नः पपात महती वसुनश्च धारा ॥६२॥
आश्चर्यपञ्चकमिदं चिरमम्बरस्था देवा विकृत्य परमं परदुर्लभं ते ।
सम्पूज्य दानपतिमर्जितपुण्यपुञ्जं जग्मुर्जिनोऽपि विजहार विहारयोग्यम् ॥६३॥
छद्मस्थकालमतिवाह्य [5]समासवर्षं सन्मार्गशीर्षसुतिथिं सितपञ्चमीं तु ।
ध्यानाग्निदग्धघनघातिसमित्समृद्धिः कैवल्यलाभविभवेन चकार [6]पूताम् ॥६४॥

सुन्दर विचित्र पालकीपर आरूढ़ होकर भगवान् वनमें गये तथा वहाँ कार्तिक शुक्ल सप्तमीके दिन वेलाका नियम लेकर दीक्षा लेनेके लिए उद्यत हुए ॥५६॥ उस समय एक हजार राजाओंके साथ भगवान्ने समस्त जगत् त्रयके समक्ष दीक्षा धारण की। उन्होंने अपने शिरके केश उखाड़कर फेंक दिये और इन्द्रने उन केशोंको पिटारेमें रखकर विधिपूर्वक क्षीरसमुद्रमें क्षेप दिया ॥५७॥ इस प्रकार देव, भगवान्का निष्क्रमणकल्याणक तथा उसकी पूजाकर यथा स्थान चले गये और भगवान् भी चार ज्ञानों तथा एक हजार अनुगामी राजाओंसे उस तरह सुशोभित होने लगे जिस तरह कि एक हजार किरणोंसे सूर्य सुशोभित होता है ॥५८॥ वेलाका उपवास धारण करनेवाले भगवान् जब आगामी दिन, आहारकी विधि प्रकट करनेके लिए कुशाग्रपुरीमें अवतीर्ण हुए तब वृषभदत्त नामसे प्रसिद्ध पुरुषने उन्हें विधिपूर्वक खीरका आहार दिया ॥५९॥ उस समय मर्यादाके जाननेवाले भगवान् मुनिसुव्रतरूपी सूर्यने अपने तीर्थमें निर्दोष चारित्रके धारक मुनियोंके योग्य आहारकी वह विधि प्रवृत्त की जो स्वाधीन थी, बाधासे रहित थी, खड़े होकर जिसमें भोजन करना पड़ता था, जिसमें पाणिपात्रमें भोजन होता था और दानपति जिसमें विधिपूर्वक भोजन प्रदान करता था ॥६०॥ आश्चर्यकी बात थी कि उस समय शुद्धिसे सहित वृषभदत्तने मुनिराजके हाथमें जो खीर दी थी उससे बाकी बची खीरको हजारोंकी संख्यामें अन्य मुनियोंने खाया तथा घरके अन्य लोगोंने भी बार-बार ग्रहण किया फिर भी वह समाप्तिको प्राप्त नहीं हुई ॥६१॥ तदनन्तर विशाल शब्द करते हुए देव दुन्दुभि बजने लगे, धन्य-धन्यके शब्दने समस्त आकाशको व्याप्त कर दिया, सुगन्धित वायु बहने लगी, आश्चर्यकारी फूलोंकी वर्षा होने लगी और आकाशसे बड़ी मोटी रत्नोंकी धारा पड़ने लगी ॥६२॥ दूसरोंके लिए अतिशय दुर्लभ इस पञ्चाश्चर्यको आकाशमें खड़े देवोंने चिरकाल तक किया। तदनन्तर पुण्यराशिका सञ्चय करनेवाले दानपतिकी पूजाकर वे देवलोग यथास्थान चले गये और भगवान् भी विहारके योग्य स्थानमें विहार कर गये ॥६३॥ तत्पश्चात् तेरह महीनेका छद्मस्थ

१. सत्पात्रसं म० । २. शुद्धान्वितेन । ३. -रशेषपतिभिश्च । ४. समाप्तिम् । ५. त्रयोदशमासात्मकम् ।
६. पूतम् म० ।

साक्षाच्चकार युगपत्सकलं स मेयमेकेन केवलविशुद्धविलोचनेन ।
न्याय्यस्तदा न हि निरावरणो विवस्वानभ्युद्गतः क्रमसहायपरः प्रकाश्ये ॥६५॥
नेमुः ससप्तपदमेत्य निजासनेभ्यः सर्वेऽहमिन्द्रनिवहाः कृतमौलिहस्ताः ।
तं प्रापुरभ्युदिततोषविशेषचित्ताः शेषा महेन्द्रसुरसन्ततयः समन्तात् ॥६६॥
भक्त्याऽर्चयन् त्रिभुवनेश्वरमानवेन्द्रास्तं देवमभ्युदितचम्पकचैत्यवृक्षम् ।
सत्प्रातिहार्यविभवातिविशेषरूपमार्हन्त्यमद्भुतमचिन्त्यमनन्तमेतम्[1] ॥६७॥
स द्वादशस्वथ गणेषु निषण्णवत्सु स द्वादशाङ्गमनुयोगपथं जिनेन्द्रः ।
धर्मं विशाखगणिना विनयेन पृष्टः सम्भाष्य तीर्थमवनौ प्रकटं प्रचक्रे ॥६८॥
कल्याणपूजनमिनस्य तुरीयमिन्द्राः कृत्वा यथायथमगुः प्रणिपातपूर्वम् ।
देशान् जिनोऽपि विजहार बहून् बहूनां धर्मामृतं तनुभृतां घनवत्प्रवर्षन् ॥६९॥
अष्टौ च विंशतिरिनस्य जिनेन्द्रवर्याः क्रोडीकृताखिलचतुर्दशपूर्वशास्त्राः ।
त्रिंशत्सहस्रगणना परिषद् यतीनां नानागुणैरजनि सप्तविधः स सङ्घः ॥७०॥
स्युस्तत्र पञ्चशतपूर्वधरा यतीशा एकादिविंशतिसहस्रमिदाश्च शिक्षाः ।
अष्टादशैव गदितानि शतानि तेषु प्रत्येकमस्य मुनयोऽवधिकेवलाप्ताः ॥७१॥
द्वाविंशतिर्यतिशतानि तु वैक्रियाख्यास्तान्येव पञ्चदश ते विपुलास्तु मत्या ।
स्युर्द्वादशैव हि शतानि विवान्तवैराः सद्वादिनो मुनिपतेः प्रथिताः सभायाम् ॥७२॥

काल बिताकर भगवान्‌ने ध्यानरूपी अग्निके द्वारा घातिया कर्मरूपी ईन्धनकी विपुल राशिको दग्धकर केवलज्ञानकी प्राप्तिसे मगसिर मासकी शुक्ल पञ्चमी तिथिको पवित्र किया ॥६४॥ अब केवलज्ञानरूपी एक ही विशुद्ध लोचनसे भगवान् समस्त पदार्थोंको एक साथ प्रत्यक्ष देखने लगे सो ठीक ही है क्योंकि जब निरावरण सूर्यका उदय होता है तब वह प्रकाशित करने योग्य पदार्थोंके विषयमें न तो क्रमकी अपेक्षा करता है और न दूसरेको सहायताकी ही अपेक्षा करता है ॥६५॥ उस समय समस्त अहमिन्द्रोंने अपने-अपने आसनोंसे सात-सात डग आगे चलकर तथा हाथ जोड़ मस्तकसे लगा जिनेन्द्र भगवान्‌को परोक्ष नमस्कार किया और जिनके चित्तमें विशेष हर्ष प्रकट हो रहा था ऐसे शेष समस्त इन्द्र तथा देव सब ओरसे वहाँ आये ॥६६॥ जिनके चम्पक नामक चैत्य वृक्ष प्रकट हुआ था, जो अष्ट प्रातिहार्यरूपी वैभवसे अतिशय सुन्दर थे, और जो आश्चर्यकारी अचिन्त्य एवं अन्तातीत आर्हन्त्य पदको प्राप्त थे ऐसे देवाधिदेव मुनिसुव्रतनाथको, तीनों लोकोंके स्वामी तथा राजाओंने भक्तिपूर्वक पूजा की ॥६७॥

तदनन्तर जब बारह गण बारह सभाओंमें यथास्थान बैठ गये तब विशाख नामक गणधरने विनयपूर्वक अनुयोग द्वारसे द्वादशाङ्गका स्वरूप पूछा उसके उत्तरमें भगवान्‌ने धर्मका निरूपणकर पृथिवीपर तीर्थ प्रकट किया ॥६८॥ इन्द्रादि देव भगवान्‌के चतुर्थ कल्याणककी पूजा कर नमस्कार करते हुए यथास्थान चले गये और भगवान् भी अनेक प्राणियोंके लिए धर्मामृतकी वर्षा करते हुए अनेक देशोंमें विहार करने लगे ॥६९॥ भगवान् मुनिसुव्रतनाथके सम्पूर्ण चौदह पूर्वोंको जाननेवाले अट्ठाईस गणधर थे, और तीस हजार मुनि थे। भगवान्‌का यह संघ नाना गुणोंसे सात प्रकारका था ॥७०॥ उस संघमें पाँच सौ मुनिराज पूर्वधारी थे, इक्कीस हजार शिक्षार्थी थे, अठारह सौ अवधिज्ञानी थे, इतने ही केवलज्ञानी थे, बाईस सौ विक्रियाऋद्धिके धारक थे, पन्द्रह सौ विपुलमति मनःपर्यय ज्ञानके धारक थे, वैर को दूर करनेवाले बारह सौ प्रसिद्ध वादी थे, पचास हजार आर्यिकाएँ थीं, एक लाख अणुव्रत गुणव्रत और शिक्षाव्रतोंको धारण करनेवाले श्रावक थे, और सम्यग्दर्शनसे पवित्र हृदयको धारण करनेवाली तीन लाख श्राविकाएँ थीं।

१. -मेकं म० ।

पञ्चाशदेकसहस्रमितास्तदार्याः शिक्षागुणव्रतधरा गृहिणोऽपि लक्षाः ।
सम्यक्त्वपूतमनसो वनिताश्च लक्षाः सभ्योडुभिः परिवृतश्च बभौ जिनेन्दुः ॥७३॥
त्रिंशत्सुगुणप्रथितवर्षसहस्रजीवी प्राक् पञ्चसप्तशताब्दकुमारकालः ।
राज्येऽपि पञ्चदशवर्षसहस्रभोगी सत्संयमेन विजहार स शेषकालम् ॥७४॥
अन्ते स सम्मदविधायिवनान्तकान्तं सम्मेदशैलमधिरुह्य निरस्तबन्धः ।
बन्धान्तकृन्मुनिसहस्रयुतो जगाम मोक्षं महामुनिपतिर्मुनिसुव्रतेशः ॥७५॥
माघत्रयोदशतिथौ सितपक्षभाजि मासोपसंहृतविहारविसृष्टदेहे ।
स्थित्वाऽपराह्णसमये वरपुष्ययोगे सिद्धे जिने ननु महं विदधुः सुरेन्द्राः ॥७६॥
षड्वर्षलक्षपरिमाणमिनस्य तस्य प्रावर्तत प्रविततं भुवि धर्मतीर्थम् ।
विद्यावबोधबुधितार्थमुनिप्रभावं देवागमाविरतिवर्धितलोकहर्षम् ॥७७॥
विंशस्य तस्य चरितस्य जिनस्य लोके कल्याणपञ्चकविभूति विभावयन् यः ।
भक्त्या शृणोति पठति स्मरतीदमस्मिन् भव्यो जनो भजति सिद्धिसुखं स शीघ्रम् ॥७८॥
एवं वसन्ततिलकप्रचुरप्रसूनमालामिमां समधिरोप्य विनूतवृत्तः ।
विघ्नान् विधूय विदधातु समाधिबोधी धीरो जिनो जितभवो मुनिसुव्रतो नः ॥७९॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ मुनिसुव्रतनाथपञ्चकल्याणवर्णनो नाम षोडशः सर्गः ।

इन सभासद रूपी नक्षत्रोंसे घिरे हुए भगवान् रूपी चन्द्रमा अतिशय सुशोभित हो रहे थे ॥७१-७३॥ भगवान्‌की पूर्ण आयु तीस हजार वर्षकी थी, उसमें साढ़े सात हजार वर्षका कुमारकाल था, पन्द्रह हजार वर्ष तक उन्होंने राज्यका भोग किया और शेष साढ़े सात हजार वर्ष तक संयमी होकर विहार किया ॥७४॥ महामुनियोंके अधिपति मुनिसुव्रत भगवान् आयुके अन्त समयमें हर्षको उत्पन्न करनेवाले वन-खण्डोंसे सुशोभित सम्मेदाचलपर आरूढ़ होकर कर्मोंके बन्धसे रहित हुए और बन्धका नाश करनेवाले एक हजार मुनियोंके साथ वहींसे मोक्ष गये ॥७५॥ मोक्ष जानेके एक माह पूर्व भगवान्‌ने विहार आदि बन्दकर योगनिरोध कर लिया था तथा माघ शुक्ला त्रयोदशीके दिन अपराह्न कालमें पुष्य नक्षत्रका उत्तम योग रहते हुए पद्मासनसे मोक्ष प्राप्त किया था। मुक्त होनेपर इन्द्रने निर्वाणकल्याणककी पूजा की थी ॥७६॥ भगवान् मुनिसुव्रतनाथका धर्मतीर्थ पृथिवीपर छह लाख वर्ष तक अखण्ड रूपसे चलता रहा। उनके तीर्थमें विद्याओंका परिज्ञान होनेसे मुनियोंका पूर्ण प्रभाव था, और देवोंका निरन्तर आगमन होते रहनेसे लोगोंका हर्ष बढ़ता रहता था ॥७७॥ गौतम स्वामी कहते हैं कि संसारमें जो भव्य प्राणी बीसवें तीर्थंकरके पञ्चकल्याणक विभूतिसे युक्त इस चरितका चिन्तवन करता है, भक्तिसे इसे सुनता है, पढ़ता है, और इसका स्मरण करता है वह शीघ्र ही मोक्षके सुखको प्राप्त होता है ॥७८॥ जिनसेनाचार्य कहते हैं कि इस तरह वसन्ततिलका छन्दसे निर्मित (पक्षमें वसन्तऋतुके श्रेष्ठ नाना पुष्पोंसे निर्मित) पुष्पोंकी माला समर्पित कर जिनके चरित्रकी स्तुति की गई है वे संसारको जीतनेवाले धीर-वीर मुनिसुव्रत जिनेन्द्र विघ्नोंको नष्टकर हमारे लिए समाधि (चित्तकी स्थिरता) और बोधि (रत्नत्रयकी प्राप्ति) करावें ॥७९॥

इस प्रकार अरिष्टनेमि पुराण के संग्रहसे युक्त जिनसेनाचार्य रचित हरिवंशपुराणमें मुनिसुव्रतनाथ भगवान्‌के पञ्चकल्याणकोंका वर्णन करनेवाला सोलहवाँ सर्ग समाप्त हुआ ॥१६॥

सप्तदशः सर्गः

बभूव हरिवंशानां प्रभुर्वश्यवसुन्धरः । अरिषड्वर्गजिन्मार्गस्त्रिवर्गस्य स सुव्रतः ॥१॥
स दक्षं दक्षनामानं पुत्रं कृत्वा निजे पदे । दीक्षितः स्वपितुस्तीर्थे प्राप मोक्षं तपोबलात् ॥२॥
ऐलेयाख्यमिलायां स दक्षः पुत्रमजीजनत् । मनोहरीं च तनयामर्णवोऽपि यथा श्रियम् ॥३॥
ववृधेऽनुकुमारं च कुमारी नेत्रहारिणी । साऽनुचन्द्रं यथा कान्तिः कलागुणविशेषिणी ॥४॥
यौवनेन कृताश्लेषा कृशमध्याऽवभासते । स्तनभारेण गुरुणा जघनेन च भारिणा ॥५॥
[1]स्वाधीने सति रूपास्त्रे तस्या धीरमनोभिदि । मनोभवोऽत्यजत्स्वेषु कुसुमास्त्रेषु गौरवम् ॥६॥
तद्रूपास्त्रविमोक्षेण मनोभूर[2]करोद् भृशम् । दक्षस्यापि मनोभेदमन्येषां नु किमुच्यताम् ॥७॥
कन्यया [3]हृतचित्तश्च ततो दक्षः प्रजापतिः । आहूय छद्मना सद्म पप्रच्छ प्रणताः प्रजाः ॥८॥
पृष्टा वदत यूयं मे सज्जना जगति स्थितिम् । अविरुद्धं विचार्येह विश्वे विदितवृत्तयः ॥९॥
यद्वस्तु भुवनेऽनर्घ्यं हस्त्यश्ववनितादिकम् । प्रजानुचितमेतस्य राजा विभुरहो न वा ॥१०॥
केचिदूचुर्जनास्तत्र विचार्य चिरमात्मनि । यत्प्रजानुचितं देव ! तत्प्रजापतये हितम् ॥११॥
यथा नदीसहस्राणां रत्नानां च सागरः । आकरोऽनर्घरत्नानां तथैवात्र प्रजापतिः ॥१२॥

अथानन्तर भगवान् मुनिसुव्रतनाथके पुत्र सुव्रत हरिवंशके स्वामी हुए। उन्होंने समस्त पृथिवीको वश कर लिया था, काम क्रोध लोभ मोह मद एवं मात्सर्य इन छह अन्तरङ्ग शत्रुओंको जीत लिया था, तथा वे धर्म अर्थ काम रूप त्रिवर्गके मार्ग-प्रवर्तक थे ॥१॥ उनके दक्ष नामका अतिशय दक्ष—चतुर पुत्र था। वे उसे अपने पदपर नियुक्त कर अपने ही पिताके समीप दीक्षित हो गये और तपोबलसे मोक्ष चले गये ॥२॥ राजा दक्षने इला नामक रानीमें ऐलेय नामका पुत्र उत्पन्न किया और उसके बाद जिस प्रकार समुद्रने लक्ष्मीको उत्पन्न किया था उसी प्रकार मनोहरी नामकी पुत्रीको उत्पन्न किया ॥३॥ जिस प्रकार चन्द्रमाके साथ-साथ कलारूपी गुणसे युक्त उसकी कान्ति बढ़ती जाती है उसी प्रकार कुमार ऐलेयके साथ-साथ कलारूपी गुणसे युक्त नेत्रोंको हरण करनेवाली कुमारी मनोहरी दिनों-दिन बढ़ने लगी ॥४॥ जब वह यौवनवती हुई तब उसकी कमर पतली हो गई और वह स्थूल स्तनोंके भार तथा विस्तृत नितम्ब स्थलसे अतिशय सुशोभित होने लगी ॥५॥ धीर-वीर मनुष्योंके मनको भेदन करनेवाले उसके सौन्दर्यरूपी अस्त्रके स्वाधीन रहते हुए कामदेवने अपने पुष्पमयी बाणोंका गर्व छोड़ दिया था ॥६॥ उसके सौन्दर्यरूपी शस्त्रको छोड़कर कामदेवने राजा दक्षके भी मनको भेद दिया फिर अन्य पुरुषोंकी तो बात ही क्या कही जाय ? ॥७॥

तदनन्तर कन्याके द्वारा जिसका चित्त हरा गया था ऐसे दक्ष प्रजापतिने एक दिन किसी छलसे नम्रीभूत प्रजाको अपने घर बुलाकर उससे पूछा कि हे सज्जनो ! आप सब व्यवहारके ज्ञाता हैं। मैं आपलोगोंसे एक बात पूछता हूँ सो आप सब जगत्की स्थितिका पूर्वापरविरोध रहित विचारकर उत्तर दीजिए ॥८-९॥ बात यह है कि यदि हाथी घोड़ा स्त्री आदि कोई वस्तु संसारमें अमूल्य हो और प्रजाके योग्य न हो तो राजा उसका स्वामी हो सकता है या नहीं ? ॥१०॥ प्रजाजनोंमें कितने ही लोगोंने चिरकालतक आत्मामें विचारकर कहा कि हे देव ! जो वस्तु प्रजाके लिए अयोग्य है वह राजाके लिए हितकारी है ॥११॥ जिस प्रकार समुद्र हजारों

---

१. साधीने म०, ग०, घ०, ङ० । २. कामः । ३. हृतचित्तं स म० ।

तद् यत्तव स्थितं चित्ते समस्ते वसुधातले । रत्नाकरेषु समुत्पन्नं तद्रत्नं क्रियतां करे ॥१३॥
एवं दक्षः प्रजावाक्यमाकर्ण्य विपरीतधीः । प्रजानुमतिकारित्वं प्रकाश्य विससर्ज ताः ॥१४॥
ततः स दुहितुस्तस्याः स्वयमेवाग्रहीत् करम् । कामग्रहगृहीतस्य का मर्यादा क्रमोऽपि कः ॥१५॥
इला देवी ततो रुष्टा पत्युः पुत्रमभेदयत् । तावद्भार्यादयो यावन्मर्यादासंस्थितः प्रभुः[1] ॥१६॥
इला चैलेयमादाय[2] महासामन्तसंवृता । प्रत्यवस्थानमकरोद्दुर्गदेशमुपाश्रिता ॥१७॥
त्रिविष्टपपुराकारं सन्निविष्टं पुरं तया । [3]इलायां वर्धमानायामिलावर्धनसंज्ञया ॥१८॥
ऐलेयः स्थापितो राजा रेजे तत्र प्रजावृतः । वीर्यधैर्यनयाधारो हरिवंशविशेषकः ॥१९॥
पार्थिवेन सता तेन ताम्रलिप्ति[4]प्रसिद्धिकाम् । निवेशितं पुरं कान्तमङ्गदेशनिवासिना ॥२०॥
जिगीषता परान् देशान् नर्मदातटमीयुषा । मह्यां माहिष्मती ख्याता नगरी विनिवेशिता ॥२१॥
तत्र स्थितश्चिरं राज्यं कृत्वा प्रणतपार्थिवम् । पुत्रं कुणिमनामानं संस्थाप्य तपसे ययौ ॥२२॥
कुणिमश्च विदर्भेषु विजिगीषुर्द्विषन्तपः । कुण्डिनाख्यं पुरं चक्रे वरदायास्तटे वरे ॥२३॥
कुणिमः क्षणिकं मत्वा जीवितं निजवैभवम् । [5]पुलोमाख्ये सुते न्यस्य तपोवनमयात् स्वयम् ॥२४॥
पुलोमपुरमेतेन विनिवेशितमीशिना । श्रियं न्यस्य तपस्यागात् पौलोमचरमाख्ययोः ॥२५॥

नदियाँ और उत्तम रत्नोंकी खान है उसी प्रकार राजा भी इस लोकमें अनर्घ्य वस्तुओंकी खान है ॥१२॥ इसलिए समस्त पृथिवीतल और उत्तमोत्तम खानोंमें उत्पन्न हुआ जो भी रत्न आपके चित्तमें है—जिसे आप प्राप्त करना चाहते हैं उसे हाथमें कीजिए ॥१३॥ इस प्रकार विपरीत बुद्धिके धारक राजा दक्षने प्रजाके वचन सुन प्रकट किया कि जैसी आपलोगोंकी अनुमति है वैसा ही कार्य करूँगा—यह कहकर उसने प्रजाके लोगोंको विदा किया ॥१४॥

तदनन्तर उसने पुत्री मनोहरीका कर ग्रहण स्वयं ही कर लिया सो ठीक ही है क्योंकि कामरूपी पिशाचसे गृहीत मनुष्यकी मर्यादा क्या है ? और क्रम क्या है ? भावार्थ—कामी मनुष्य सब मर्यादाओं और क्रमोंको छोड़ देता है ॥१५॥ राजा दक्षकी रानी इला देवी, पतिके इस कुकृत्यसे बहुत ही रुष्ट हुई इसलिए उसने पुत्रको पितासे फोड़ लिया—अलग कर लिया सो ठीक ही है क्योंकि स्त्री आदि तभी तक है जब तक स्वामी मर्यादामें रहता है—मर्यादाका पालन करता है ॥१६॥ बड़े-बड़े सामन्तोंसे घिरी इला देवी अपने ऐलेय पुत्रको लेकर दुर्गम स्थानमें चली गई और वहीं उसने निवास करनेका निश्चय किया ॥१७॥ उसने स्वर्गपुरीके समान एक नगर बसाया जो बढ़ती हुई पृथिवीपर स्थित होनेके कारण इलावर्धन नामसे प्रसिद्ध था ॥१८॥ ऐलेय-को उसने उसका राजा बनाया सो प्रजासे सहित, वीर्य धैर्य और नीतिका आधार तथा हरिवंश का तिलक स्वरूप राजा ऐलेय वहाँ अत्यधिक सुशोभित होने लगा ॥१९॥ राजा होनेपर अंग देशमें निवास करनेवाले ऐलेयने ताम्रलिप्ति नामसे प्रसिद्ध एक सुन्दर नगर बसाया ॥२०॥ जब ऐलेय नाना देशोंको जीतनेकी इच्छा करता हुआ नर्मदा नदीके तटपर आया तो उसने पृथिवी पर प्रसिद्ध माहिष्मती नामकी नगरी बसाई ॥२१॥ उस नगरीमें रहकर राजा ऐलेयने चिरकाल तक नम्रीभूत राजाओंसे युक्त राज्य किया । तदनन्तर वह कुणिम नामक पुत्रके लिए राज्य सौंप-कर तपके लिए चला गया ॥२२॥ विजयके अभिलाषी एवं शत्रुओंको संताप देनेवाले कुणिम-ने विदर्भ देशमें वरदा नदीके किनारे कुण्डिन नामका सुन्दर नगर बसाया ॥२३॥ कुछ समय बाद कुणिमको जीवन क्षण-भङ्गुर जान पड़ा इसलिए वह अपना वैभव पुलोम नामक पुत्रके लिए सौंपकर स्वयं तपोवनको चला गया ॥२४॥ राजा पुलोमने भी पुलोमपुर नामका नगर बसाया ।

---

१. पतिः । २. -मावृत्ता म०, ख०, ग०, ङ० । ३. इलया वर्धमानं यदि- म० । ४. -मलिप्तप्रसिद्धकम् घ० । ५. सुलोमाख्ये घ० ।

जगत्प्रभावसम्भारौ तावखण्डितमण्डलौ । सूर्याचन्द्रमसौ नित्यं विजिगीषू प्रजिग्यतुः ॥२६॥
ताभ्यामिन्द्रपुरं चक्रे रेवायाः सरितस्तटे । जयन्तीवनवास्यौ द्वे चरमेण पुरौ कृते ॥२७॥
सञ्जयश्चरमस्यासीत् तनयो नयवित्तथा । पौलोमस्य महीदत्तस्तपस्थौ जनकौ च तौ ॥२८॥
महीदत्तेन नगरं कृतं कल्पपुराख्यया । सोऽरिष्टनेमिमत्स्याख्यौ तनयावुदपादयत् ॥२९॥
मत्स्यो भद्रपुरं जित्वा सेनया चतुरङ्गया । तथा हास्तिनपुरं प्रीतस्सोऽध्यतिष्ठत् प्रतापवान् ॥३०॥
तस्य पुत्राः शतं [1] जाताः शतमन्युसमाः क्रमात् । अयोधनाद्यो ज्येष्ठे राज्यं न्यस्य स दीक्षितः ॥३१॥
अयोधनसुतो मूलः शालस्तस्य सुतोऽभवत् । सूर्यस्तस्याभवत् सूनुस्तेन शुभ्रपुरं कृतम् ॥३२॥
तस्यासीत्स्वमरस्तेन वज्राख्यं पुरमाहितम् । देवदत्तस्ततो जातो देवेन्द्रसमविक्रमः ॥३३॥
मिथिलानाथमुत्पाद्य विदेहानामभूद्विभुः । हरिषेणस्ततो जज्ञे नभसेनस्तु तत्सुतः ॥३४॥
ततः शङ्ख इति ख्यातस्ततो भद्र इतीरितः । अभिचन्द्रस्ततश्चाभूदभिभूतरिपुद्युतिः ॥३५॥
विन्ध्यपृष्ठेऽभिचन्द्रेण चेदिराष्ट्रमधिष्ठितम् । शुक्तिमत्यास्तटेऽधायि नाम्ना शुक्तिमती पुरी ॥३६॥
उग्रवंशप्रसूतायां वसुमत्यामभूद्वसुः । अभिचन्द्राद् यथाद्रात्मा चन्द्रकान्तमहामणिः ॥३७॥
नाम्ना क्षीरकदम्बोऽभूत्तत्र वेदार्थविद्द्विजः । तस्य स्वस्तिमती पत्नी पर्वतस्तनयस्तयोः ॥३८॥
अध्यापितास्त्रयस्तेन वसुपर्वतनारदाः । सरहस्यानि शास्त्राणि गुरुणा धिषणावता ॥३९॥
आरण्यकमसौ वेदमरण्येऽध्यापयन् सुतान् । आकर्णयद् गिरं व्योम्नि मुनेराकाशगामिनः ॥४०॥

अन्तमें वह पौलोम और चरम नामक पुत्रोंके लिए राज्यलक्ष्मी सौंपकर तपके लिए चला गया ॥२५॥ पौलोम और चरमका प्रभाव समस्त जगत्में फैल रहा था तथा वे दोनों अखण्डित मण्डल—अखण्ड राष्ट्रके धारक थे इसलिए विजयकी अभिलाषा रखते हुए वे दोनों निरन्तर सूर्य और चन्द्रमाको जीतते थे। सूर्य और चन्द्रमाका प्रभाव भी समस्त जगत्में फैला रहता है और वे अखण्ड मण्डल—अखण्ड बिम्बके धारक होते हैं ॥२६॥ उन दोनोंने मिलकर रेवा नदीके तटपर इन्द्रपुर नामका नगर बसाया और चरमने जयन्ती तथा वनवास्य नामकी दो नगरियाँ बसाईं ॥२७॥ पौलोमके महीदत्त और चरमके संजय नामका नीतिवेत्ता पुत्र था। अन्तमें पौलोम और चरम दोनों ही तप करने लगे ॥२८॥ महीदत्तने कल्पपुर नामका नगर बसाया और अरिष्टनेमि तथा मत्स्य नामक दो पुत्र उत्पन्न किये ॥२९॥ प्रतापी मत्स्य अपनी चतुरंग सेनासे भद्रपुर और हास्तिनपुरको जीतकर बड़ी प्रसन्नतासे हस्तिनापुरमें रहने लगा ॥३०॥ उसके क्रम-क्रमसे अयोधनको आदि लेकर इन्द्रके समान पराक्रमके धारक सौ पुत्र उत्पन्न हुए। अन्तमें वह ज्येष्ठ पुत्रके लिए राज्य सौंपकर दीक्षित हो गया ॥३१॥ राजा अयोधनके मूल, मूलके शाल और शालके सूर्य नामका पुत्र हुआ। सूर्यने शुभ्रपुर नामका नगर बसाया था ॥३२॥ सूर्यके अमर नामका पुत्र हुआ और उसने वज्र नामका नगर बसाया। अमरके देवेन्द्रके समान पराक्रमी देवदत्त नामका पुत्र हुआ ॥३३॥ देवदत्त मिथिलानाथके हरिषेण, हरिषेणके नभसेन, नभसेनके शङ्ख, शङ्खके भद्र और भद्रके शत्रुओंकी कान्तिको तिरस्कृत करनेवाला अभिचन्द्र नामका पुत्र हुआ ॥३४-३५॥ अभिचन्द्रने विन्ध्याचलके ऊपर चेदिराष्ट्रकी स्थापना की तथा शुक्तिमती नदीके किनारे शुक्तिमती नामकी नगरी बसाई ॥३६॥ अभिचन्द्रकी उग्रवंशमें उत्पन्न वसुमती नामकी रानीसे वसु नामका पुत्र हुआ। वह वसु चन्द्रकान्त महामणिके समान आर्द्रहृदय था ॥३७॥ उसी नगरीमें वेदार्थका वेत्ता एक क्षीरकदम्ब नामका ब्राह्मण रहता था। उसकी स्त्रीका नाम स्वस्तिमती था और उन दोनोंके पर्वत नामका पुत्र था ॥३८॥ बुद्धिमान् गुरु क्षीरकदम्बने वसु, पर्वत और नारद इन तीन शिष्योंको गूढार्थ सहित समस्त शास्त्र पढ़ाये ॥३९॥

एकबार क्षीरकदम्बक वनमें उक्त तीनों पुत्रोंको आरण्यक वेद पढ़ा रहा था कि उसने

---

१. याताः म० ।

वेदाध्ययनसक्तानां मध्येऽमीषामधोगतिम् । गन्तारौ द्वौ नरौ पापाद् द्वौ पुण्यादूर्ध्वगामिनौ ॥४१॥
इत्युक्त्वा मुनिरन्यस्मै साधवेऽवधिलोचनः । करुणावान् गतः क्वापि ज्ञातसंसारसंस्थितिः ॥४२॥
श्रुत्वा क्षीरकदम्बोऽपि वचनं शङ्किताशयः । विसृज्य सदनं शिष्यानपराह्णेऽन्यतो गतः ॥४३॥
अपश्यन्ती पतिं शिष्यान् पप्रच्छ स्वस्तिमत्यसौ । उपाध्यायो गतः पुत्राः ! कुतो ब्रूतेति शङ्किता ॥४४॥
तेऽब्रुवन्नहमेमीति वयं तेन विसर्जिताः । आयात्येवानुमार्गे नो मातर्माभूस्त्वमुन्मनाः ॥४५॥
इति तेषां वचः श्रुत्वा तस्थौ स्वस्तिमती दिवा । रात्रावपि यदा चासौ गृहं नागतवांस्तदा ॥४६॥
गता सा शोकिनी बुद्ध्वा भर्त्तुराकूतमाकुला । ध्रुवं प्रव्रजितो विप्र इत्यरोदीच्चिरं निशि ॥४७॥
तमन्वेष्टुं प्रभाते तौ गतौ पर्वतनारदौ । वनान्तेऽपश्यतां श्रान्तौ दिनैः कतिपयैरपि ॥४८॥
स निषण्णमधीयानं निर्ग्रन्थं गुरुसन्निधौ । पितरं पर्वतो दृष्ट्वा दूरान्निववृतेऽधृतिः ॥४९॥
मात्रे निवेद्य वृत्तान्तं तया दुःखितचित्तया । कृत्वा दुःखं विशोकाऽसौ तिष्ठति स्म यथासुखम् ॥५०॥
नारदस्तु विनीतात्मा गुरोः कृत्वा प्रदक्षिणम् । प्रणम्याणुव्रती भूत्वा सम्भाष्य गृहमागतः ॥५१॥
[1]आश्वास्य शोकसन्तप्तां नत्वा पर्वतमातरम् । जगाम निजधामासौ नारदोऽतिविशारदः ॥५२॥
वसोरपि पिता राज्यं वसौ विन्यस्य विस्तृतम् । संसारसुखनिर्विण्णः प्रविवेश तपोवनम् ॥५३॥

आकाशमें किन्हीं चारण ऋद्धिधारी मुनिके निम्नांकित वचन सुने ॥४०॥ वे कह रहे थे कि वेदाध्ययनमें लगे हुए इन चार मनुष्योंके बीचमें पापके कारण दो तो अधोगतिको जावेंगे और दो पुण्यके कारण ऊर्ध्वगति प्राप्त करेंगे ॥४१॥ जो अवधिज्ञानरूपी नेत्रके धारक थे, दयालु थे और संसारकी सब स्थिति जानते थे ऐसे वे मुनिराज साथके दूसरे मुनिसे इस प्रकार कहकर कहीं चले गये ॥४२॥ इधर मुनिराजके उक्त वचन सुनकर क्षीरकदम्बकका हृदय शङ्कित हो उठा। जब दिन ढल गया तो उसने शिष्योंको तो घर भेज दिया पर स्वयं अन्यत्र चला गया ॥४३॥ पतिको शिष्योंके साथ न देख स्वस्तिमतिने शङ्कित हो पूछा कि अरे शिष्यो ! उपाध्याय कहाँ गये हैं ? बताओ ॥४४॥ शिष्योंने कहा कि उन्होंने हमलोगोंको यह कहकर भेजा था कि मैं अभी आता हूँ। हे माँ ! वे मार्गमें पीछे आते ही होंगे, व्यग्र न होओ ॥४५॥ शिष्योंके उक्त वचन सुन स्वस्तिमती दिन भर तो चुप बैठी रही परन्तु जब वह रात्रिको भी घर नहीं आया तो उसके शोककी सीमा नहीं रही। वह पतिका अभिप्राय जानती थी इसलिए जान पड़ता है ब्राह्मणने दीक्षा ले ली है, यह विचारकर वह चिरकाल तक रोती रही ॥४६-४७॥ प्रातःकाल होनेपर पर्वत और नारद उसे खोजनेके लिए गये। वे कितने ही दिन भटकते रहनेसे थक गये। अन्तमें उन्होंने देखा कि पिता क्षीरकदम्बक वनके अन्तमें गुरुके पास निर्ग्रन्थ मुद्रामें बैठकर पढ़ रहे हैं। पिताको उस प्रकार बैठा देखकर पर्वतका धैर्य छूट गया। उसने दूरसे ही लौटकर माताके लिए सब समाचार सुनाया। पर्वतके मुखसे पतिकी दीक्षाका समाचार जानकर ब्राह्मणी स्वस्तिमती बहुत दुःखी हुई। पर्वतने भी माताके साथ दुःख मनाया। अन्तमें धीरे-धीरे शोक दूरकर दोनों पहलेके समान सुखसे रहने लगे ॥४८-५०॥

पर्वत तो दूरसे चला आया था परन्तु नारद विनयी था इसलिए उसने गुरुके पास जाकर प्रदक्षिणा दी, नमस्कार किया, उनसे वार्तालाप कर अणुव्रत धारण किये और उसके बाद वह घर वापिस आया ॥५१॥ अतिशय निपुण नारदने आकर शोकसे संतप्त पर्वतकी माताको आश्वासन दिया, नमस्कार किया और उसके बाद अपने घरकी ओर प्रस्थान किया ॥५२॥ तदनन्तर वसुके पिता राजा अभिचन्द्र भी संसारके सुखसे उदासीन हो गये इसलिए अपना विस्तृत राज्य वसुके

---

१. आश्वास्य म० ।

वसुना वासवेनेव नवयौवनवर्तिना । वनितेव विनीतास्यं नीता नीतिविदावनिः ॥५४॥
नभःस्फटिकमूर्द्धस्थसिंहासनमधिष्ठितम् । नभस्थमेव भूपास्तं दृष्टास्थानममंसत ॥५५॥
भूमौ कीर्तिरभूत्तस्य महिम्ना धर्मजन्मना । [1]अश्मोपरिचरस्यात्र वसोरन्वर्थतापुषः[2] ॥५६॥
इक्ष्वाकुवंशजा जाया कुरुवंशोद्भवा परा । दशपुत्रास्तयोर्जाताः वसोर्वसुसमाः क्रमात् ॥५७॥
बृहद्वसुरिति ज्ञेयः पूर्वश्चित्रवसुः परः । वासवश्चार्कनामा च पञ्चमश्च महावसुः ॥५८॥
विश्वावसू रविः सूर्यः सुवसुश्च बृहद्ध्वजः[3] । इत्यमी वसुराजस्य सुताः सुविजिगीषवः ॥५९॥
सुतैर्दशभिरन्योऽन्यप्रीतिबद्धमनोरथैः । इन्द्रियार्थैरिवोपेतः पार्थिवः सुखमन्वभूत् ॥६०॥
एकदा नारदश्छात्रैर्बहुभिश्छत्रिभिर्वृतः । गुरुवद्गुरुपुत्रेक्षः पर्वतं द्रष्टुमागतः ॥६१॥
कृतेऽभिवादने तेन कृतप्रत्यभिवादनः । सोऽभिवाद्य गुरोः पत्नीं गुरुसत्कथया स्थितः ॥६२॥
अथ व्याख्यामसौ कुर्वन् वेदार्थस्यापि गर्वितः । पर्वतः सर्वतश्छात्रैर्वृतो नारदसन्निधौ ॥६३॥
अजैर्यष्टव्यमित्यत्र वेदवाक्ये विसंशयम् । अजशब्दः किलाम्नातः पश्वर्थस्याभिधायकः ॥६४॥
तैरजैः खलु यष्टव्यं स्वर्गकामैरिह द्विजैः । पदवाक्यपुराणार्थपरमार्थविशारदैः ॥६५॥
प्रतिबन्धमिहाज्ञस्य तस्य चक्रे स नारदः । [4]युक्त्यागमबलालोकध्वस्ताज्ञानतमस्तरः ॥६६॥
भद्रपुत्र ! किमित्येवमपव्याख्यामुपाश्रितः । कुतोऽयं सम्प्रदायस्ते सहाध्यायिन्नुपागतः ॥६७॥

लिए सौंपकर तपोवनको चले गये ॥५३॥ नव यौवनसे मण्डित, नीतिका वेत्ता वसु इन्द्रके समान जान पड़ता था। उसने समस्त पृथिवीको स्त्रीके समान वशीभूत कर लिया था ॥५४॥ राजा वसु सभामें आकाशस्फटिकके ऊपर स्थित सिंहासनपर बैठता था इसलिए अन्य राजा उसे आकाशमें ही स्थित मानते थे ॥५५॥ राजा वसु सदा आकाशस्फटिक पर चलता था और सदा सत्यका ही पोषण करता था इसलिए पृथिवीपर उसका यही यश फैल रहा था कि वह धर्मकी महिमासे आकाशमें चलता है ॥५६॥ उसकी एक स्त्री इक्ष्वाकुवंशकी और दूसरी कुरुवंशकी थी। उन दोनोंसे उसके क्रमसे १ बृहद्वसु, २ चित्रवसु, ३ वासव, ४ अर्क, ५ महावसु, ६ विश्वावसु, ७ रवि, ८ सूर्य, ९ सुवसु और १० बृहद्ध्वज ये दश पुत्र हुए। ये सभी पुत्र वसुके ही समान अतिशय विजिगीषु—विजयाभिलाषी—पराक्रमी थे ॥५७-५९॥ इन्द्रियोंके विषयोंके समान परस्परकी प्रीतिसे युक्त इन दश पुत्रोंसे सहित राजा वसु अत्यधिक सुखका अनुभव कर रहा था ॥६०॥

अथानन्तर एक दिन बहुतसे छत्रधारी शिष्योंसे घिरा नारद, गुरुपुत्रको गुरुके समान मानता हुआ पर्वतसे मिलनेके लिए आया ॥६१॥ पर्वतने नारदका अभिवादन किया और नारदने पर्वतका प्रत्यभिवादन किया। तदनन्तर गुरुपत्नीको नमस्कारकर नारद गुरुजीकी चर्चा करता करता हुआ बैठ गया ॥६२॥ उस समय पर्वत सब ओरसे छात्रोंसे घिरा वेद वाक्यकी व्याख्या कर रहा था सो नारदके सन्मुख भी उसी तरह गर्वसे युक्त हो व्याख्या करने लगा ॥६३॥ वह कह रहा था कि 'अजैर्यष्टव्यम्' इस वेद वाक्यमें जो अज शब्द आया है वह निःसन्देह पशु अर्थका ही वाचक माना गया है ॥६४॥ इसलिए पद वाक्य और पुराणके अर्थके वास्तविक जाननेवाले एवं स्वर्गके इच्छुक जो द्विज हैं उन्हें बकरासे ही यज्ञ करना चाहिए ॥६५॥ युक्तिबल और आगम बलरूपी प्रकाशसे जिसका अज्ञानरूपी अन्धकारका पटल नष्ट हो गया था ऐसे नारदने अज्ञानी पर्वतके उक्त अर्थपर आपत्ति की ॥६६॥ नारदने पर्वतको सम्बोधते हुए कहा कि हे गुरुपुत्र ! तुम इस प्रकारकी निन्दनीय व्याख्या क्यों कर रहे हो ? हे मेरे सहाध्यायी ! यह

---

१. अस्योपरि -म० । २. -रन्वर्थतायुषः म०, क० । ३. बृहद्ध्वजाः म० । ४. युक्तागम- म० । युक्त्यागमबलाल्लोक- ख० ।

एकोपाध्यायशिष्याणां नित्यमव्यभिचारिणाम् । गुरुशुश्रूषताऽत्यागे[1] सम्प्रदायभिदा कुतः ॥६८॥
न स्मरस्यजशब्दस्य यथेहार्थो गुरूदितः । त्रिवर्षा व्रीहयोऽबीजा अजा इति सनातनः ॥६९॥
इत्युक्तोऽपि स दुर्मोचग्राहग्रहगृहीतधीः । सोऽनादृत्य वचस्तस्य प्रतिज्ञामकरोत्पुनः ॥७०॥
किमत्र बहुनोक्तेन शृणु नारद ! वस्तुनि । पराजितोऽस्मि यद्यत्र जिह्वाच्छेदं करोम्यहम् ॥७१॥
नारदेन ततोऽवाचि किं दुःखाग्निशिखाततौ । पतङ्ग इव दुःपक्षः पर्वत ! पतसि स्वयम् ॥७२॥
पर्वतोऽपि ततोऽवोचद् यात[2] किं बहुजल्पितैः । [3]श्वोऽस्तु नौ वसुराजस्य सभायां जल्पविस्तरः ॥७३॥
नष्टस्त्वं दृष्ट[4] इत्युक्त्वा स्वावासं नारदोऽगमत् । पर्वतोऽपि च तां वार्तां मातुरार्तमतिर्जगौ ॥७४॥
सा निशम्य हतास्मीति वदन्ती तान्तमानसा । निनिन्द नन्दनं मिथ्या त्वदुक्तमिति वादिनी ॥७५॥
नारदस्य वचः सत्यं परमार्थनिवेदनात् । वचस्तवान्यथा पुत्र ! विपरीतपरिग्रहात् ॥७६॥
समस्तशास्त्रसन्दर्भगर्भनिर्भेदशुद्धधीः । पिता ते पुत्र ! यत्प्राह तदेवाख्याति नारदः ॥७७॥
एवमुक्त्वा निशान्ते सा निशान्तमगमद्वसोः । आदरेणेक्षिता तेन पृष्टा चागमकारणम् ॥७८॥
निगद्य वसवे सर्वं ययाचे गुरुदक्षिणाम् । हस्तन्यासकृतां पूर्वं स्मरयित्वा गुरोर्गृहे[5] ॥७९॥
जानताऽपि त्वया पुत्र ! तत्त्वाऽतत्त्वमशेषतः । पर्वतस्य वचः स्थाप्यं दूष्यं नारदभाषितम् ॥८०॥
सत्येन श्रावितेनास्या वचनं वसुना ततः । प्रतिपन्नमतः साऽपि कृतार्थेव ययौ गृहम् ॥८१॥

सम्प्रदाय तुम्हें कहाँसे प्राप्त हुआ है ? ॥६७॥ जो निरन्तर साथ-ही-साथ रहे हैं तथा जिन्होंने कभी गुरुकी शुश्रूषाका त्याग नहीं किया ऐसे एक ही उपाध्यायके शिष्योंमें सम्प्रदाय भेद कैसे हो सकता है ? ॥६८॥ यहाँ अज शब्दका जैसा अर्थ गुरुजीने बताया था वह क्या तुम्हें स्मरण नहीं है ? गुरुजीने तो कहा था जिसमें अंकुर उत्पन्न होनेकी शक्ति नहीं है ऐसा पुराना धान्य अज कहलाता है यही सनातन अर्थ है ॥६९॥ दुःखसे छूटने योग्य हठ रूपी पिशाचसे जिसकी बुद्धि ग्रस्त थी ऐसे पर्वतने नारदके इस प्रकार कहनेपर भी अपना हठ नहीं छोड़ा प्रत्युत नारदके वचनोंका तिरस्कारकर उसने यह प्रतिज्ञा कर ली कि हे नारद ! अधिक कहनेसे क्या ? यदि इस विषयमें मैं पराजित हो जाऊँ तो अपनी जीभ कटा लूँ ॥७०-७१॥ पश्चात् नारदने कहा कि हे पर्वत ! खोटा पक्ष लेकर, खोटे पंखोंसे युक्त पतंगेके समान दुःखरूपी अग्निकी ज्वालाओंमें स्वयं क्यों पड़ रहे हो ? इसके उत्तरमें पर्वतने भी कहा कि जाओ बहुत कहनेसे क्या ? कल हम दोनों-का राजा वसुकी सभामें शास्त्रार्थ हो जावे ॥७२-७३॥ वितण्डावाद बढ़ते देख नारद यह कहकर अपने घर चला गया कि पर्वत ! मै तुम्हें देखने आया था सो देख लिया, तुम भ्रष्ट हो गये। नारदके चले जानेपर पर्वतने भी दुःखी होकर यह वृत्तान्त अपनी मातासे कहा ॥७४॥ पर्वतकी बात सुनकर उसकी माताका हृदय बहुत दुःखी हुआ। 'हाय मैं मरी' यह कहती हुई उसने पर्वत-की निन्दा की, उसके मुखसे बार-बार यही निकल रहा था कि तेरा कहना झूठ है ॥७५॥ हे पुत्र ! परमार्थका प्ररूपक होनेसे नारदका कहना सत्य है और विपरीत अर्थका आश्रय लेनेसे तेरा कहना मिथ्या है ॥७६॥ समस्त शास्त्रोंके पूर्वापर सन्दर्भके ज्ञानसे जिनकी बुद्धि अत्यन्त निर्मल थी ऐसे तेरे पिताने जो कहा था हे पुत्र ! वही नारद कह रहा है ॥७७॥ इस प्रकार पर्वतसे कहकर वह प्रातःकाल होते ही राजा वसुके घर गई। राजा वसुने उसे बड़े आदरसे देखा और उससे आनेका कारण पूछा ॥७८॥ स्वस्तिमतीने वसुके लिए सब वृत्तान्त सुनाकर पहले पढ़ते समय गुरुगृहमें उसके हाथमें धरोहर रूपी रखी हुई गुरुदक्षिणाका स्मरण दिलाते हुए याचना की कि हे पुत्र ! यद्यपि तू सब तत्त्व और अतत्त्वको जानता है तथापि तुझे पर्वतके ही वचनका समर्थन करना चाहिए और नारदके वचनको दूषित ठहराना चाहिए ॥७९-८०॥ स्वस्तिमतीने

---

१. शुश्रूषतां त्यागे म० । २. यातः म० । ३. सोऽस्तु म०, क०, ङ० । ४. दुष्ट म० । ५. गृहम् ।

आस्थानीसमये तस्थौ दिनादौ वसुरासने । तमिन्द्रमिव देवौघाः क्षत्रियौघाः सिषेविरे ॥८२॥
प्रविष्टौ च नृपास्थानीं विप्रौ पर्वतनारदौ । सर्वशास्त्रविशेषज्ञैः प्राश्निकैः परिवारितौ ॥८३॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः साश्रमिणोऽविशन् । लौकिकाः सहजं प्रष्टुमविशेषाहते सभाम् ॥८४॥
तत्सामानि[1] जगुः केचिज्जनश्रोत्रसुखान्यलम् । तत्र प्रोच्चारणं स्पष्टं केचिद् विप्राः प्रचक्रिरे ॥८५॥
यजूंषि प्रणवारम्भघोषभाजोऽपरेऽपठन् । पदक्रमजुषो मन्त्रानामनन्ति स्म केचन ॥८६॥
उदात्तस्यानुदात्तस्य स्वरस्य स्वरितस्य च । ह्रस्वदीर्घप्लुतस्थस्य स्वरूपमुदचीचरन् ॥८७॥
द्विजैः [2]सामर्ग्यजुर्वेदमारभ्याध्ययनोद्धुरैः । बधिरीकृतदिक्चक्रैर्निचितं सदसोऽजिरम् ॥८८॥
सिंहासनस्थमाशीर्भिर्दृष्ट्वोपरिचरं वसुम् । पीठमर्दैः सहासीनौ विप्रौ नारदपर्वतौ ॥८९॥
कूर्चप्ररोहिणस्तत्र कमण्डलुबृहत्फलाः । सवल्कलजटाभारास्तस्थुस्तापसपादपाः ॥९०॥
सदःसागरसंक्षोभसेतुबन्धेषु केषुचित् । अपक्षपातसम्बन्धतुलादण्डेषु केषुचित् ॥९१॥
उत्पथोत्थानवादीभस्वंकुशेषु च केषुचित् । निकषोपलकल्पेषु केषुचित्तत्त्वमार्गणे ॥९२॥
पण्डितेषु यथास्थानं निविष्टेषु यथासनम् । भूपं ज्ञानवयोवृद्धाः[3] केचिदेवं व्यजिज्ञपन् ॥९३॥
राजन् ! वस्तुविसंवादादिमौ नारदपर्वतौ । विद्वांसावागतौ पार्श्वं न्यायमार्गविदस्तव ॥९४॥

चूँकि वसुको गुरुदक्षिणाविषयक सत्यका स्मरण कराया था इसलिए उसने उसके वचन स्वीकृत कर लिये और वह भी कृतकृत्यके समान निश्चिन्त हो घर वापिस गई ॥८१॥

तदनन्तर जब प्रातःकालके समय सभाका अवसर आया तब राजा वसु सिंहासनपर आरूढ़ हुआ और जिस प्रकार देवोंके समूह इन्द्रकी सेवा करते हैं उसी प्रकार क्षत्रियोंके समूह उसकी सेवा करने लगे ॥८२॥ उसी समय सर्व शास्त्रोंके विशेषज्ञ प्रश्नकर्ताओंसे घिरे हुए पर्वत और नारदने राजसभामें प्रवेश किया ॥८३॥ ब्राह्मण, क्षत्रिय, वैश्य, शूद्र और आश्रमवासी भी आये तथा अन्य साधारण मनुष्य भी विशेष आमन्त्रण न होनेपर भी सहज स्वभाववश प्रश्न करनेके लिए सभामें आ बैठे ॥८४॥ उस समय राजसभामें कितने ही ब्राह्मण मनुष्योंके कानोंको सुख देनेवाले सामवेद गा रहे थे और कितने ही वेदोंका स्पष्ट एवं मधुर उच्चारण कर रहे थे ॥८५॥ कितने ही ओंकार ध्वनिके साथ यजुर्वेदका पाठ कर रहे थे और कितने ही पद तथा क्रमसे युक्त अनेक मन्त्रोंकी आवृत्ति कर रहे थे ॥८६॥ कितने ही ह्रस्व दीर्घ और प्लुत भेदोंको लिये हुए उदात्त अनुदात्त और स्वरित स्वरोंके स्वरूपका उच्चारण कर रहे थे ॥८७॥ जो ऋग्वेद, सामवेद और यजुर्वेदको प्रारम्भकर जोर-जोरसे पाठ कर रहे थे तथा जिन्होंने दिशाओंके समूहको बहिरा कर दिया था ऐसे ब्राह्मणोंसे सभाका आँगन खचा-खच भर गया ॥८८॥ अन्तरीक्ष सिंहासनपर स्थित राजा वसुको आशीर्वाद देकर नारद और पर्वत अपने-अपने सहायकोंके साथ यथा योग्य स्थानोंपर बैठ गये ॥८९॥ जो डाँढ़ीरूपी अंकुरोंसे सहित थे तथा कमण्डलुरूपी बड़े-बड़े फल धारण कर रहे थे ऐसे वलकल और जटाओंके भारसे युक्त अनेक तापसरूपी वृक्ष वहाँ विद्यमान थे ॥९०॥ उस समय जो पण्डित सभामें यथा स्थान बैठे थे उनमें कितने ही सभारूपी सागरमें क्षोभ उत्पन्न होनेपर उसे रोकनेके लिए सेतुबन्धके समान थे, कितने ही पक्षपात न हो सके इसके लिए तुलादण्डके समान थे, कितने ही कुमार्गमें चलनेवाले वादीरूपी हाथियोंको वश करनेके लिए उत्तम अंकुशोंके समान थे और कितने ही श्रेष्ठतत्त्वकी खोज करनेके लिए कसौटी पत्थरके समान थे। जब सब विद्वान् यथास्थान यथायोग्य आसनोंपर बैठ गये तब जो ज्ञान और अवस्थामें वृद्ध थे ऐसे कितने ही लोगोंने राजा वसुसे इस प्रकार निवेदन किया ॥९१-९३॥

हे राजन् ! ये नारद और पर्वत विद्वान् किसी एक वस्तुमें विसंवाद होनेसे आपके पास

---

१. तत्समानि म० । २. सामयजुर्वेद–म० । ३. रूपाः म० ।

वैदिकार्थविचारोऽयं त्वदन्येषामगोचरः । विच्छिन्नसम्प्रदायानामिदानीमिह भूतले ॥९५॥
तदत्र भवतोऽध्यक्षममीषां विदुषां पुरः । कुरुतां निश्चयादेतौ न्याय्यौ जयपराजयौ ॥९६॥
न्यायेनावसिते ह्यत्र वादे वेदानुसारिणाम् । स्यात्प्रवृत्तिरसन्दिग्धा सर्वलोकोपकारिणी ॥९७॥
इत्युर्वीन्द्रः स विज्ञप्तः पूर्वपक्षमदापयत् । पर्वताय सदस्यैस्तैः सगर्वः पक्षमग्रहीत् ॥९८॥
अजैर्यज्ञविधिः कार्यः स्वर्गार्थिभिरिति श्रुतिः । अजाश्चात्र चतुष्पादाः प्रणीताः प्राणिनः स्फुटम् ॥९९॥
न केवलमयं वेदे लोकेऽपि पशुवाचकः । आवृद्धादङ्गनाबालादजशब्दः प्रतीयते ॥१००॥
नरोऽजपोतगन्धोऽयमजायाः क्षीरमित्यपि । नाऽपनेतुमियं शक्या प्रसिद्धिस्त्रिदशैरपि ॥१०१॥
सिद्धशब्दार्थसम्बन्धे नियते तस्य बाधने । व्यवहारविलोपः स्यादन्धघूकमिदं जगत् ॥१०२॥
अबाधितः पुनर्न्याय्ये शाब्दे शब्दः प्रवर्तते । शास्त्रीयो लौकिकश्चात्र व्यवहारः सुगोचरे ॥१०३॥
यथाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ । अग्निप्रभृतिशब्दानां प्रसिद्धार्थपरिग्रहः ॥१०४॥
तथैवात्राजशब्दस्य पश्वर्थः स्फुटः स्थितः । कुत्र यागादिशब्दार्थः पशुघातश्च निश्चितः ॥१०५॥
अतोऽनुष्ठानमास्थेयमजपोतनिपातनम् । अजैर्यष्टव्यमित्यत्र वाक्यैर्निश्छितसंशयैः ॥१०६॥
आशङ्का च न कर्तव्या पशोरिह निपातने । दुःखं स्यादिति मन्त्रेण सुखमृत्योर्न दुःखिता ॥१०७॥
मन्त्राणां वाहने साक्षाद् दीक्षान्तेऽतिसुखासिका । मणिमन्त्रौषधीनां हि प्रभावोऽचिन्त्यतां गतः ॥१०८॥

आये हैं क्योंकि आप न्याय मार्गके वेत्ता हैं ॥९४॥ यह वैदिक अर्थका विचार इस समय पृथिवीतलपर आपके सिवाय अन्य लोगोंका विषय नहीं है क्योंकि उन सबका सम्प्रदाय छिन्न-भिन्न हो चुका है ॥९५॥ इसलिए आपकी अध्यक्षतामें इन सब विद्वानोंके आगे ये दोनों निश्चय कर न्यायपूर्ण जय और पराजयको प्राप्त करें ॥९६॥ न्याय द्वारा इस वादके समाप्त होनेपर वेदानुसारी मनुष्योंकी प्रवृत्ति सन्देह रहित एवं सब लोगोंका उपकार करनेवाली हो जायगी ॥९७॥ इस प्रकार वृद्धजनोंके कहने पर राजा वसुने पर्वतके लिए पूर्व पक्ष दिलवाया अर्थात् पूर्वपक्ष रखनेका उसे अवसर दिया और अपने साथी सदस्योंके कारण गर्वसे भरे पर्वतने पूर्व पक्ष ग्रहण किया ॥९८॥ पूर्व पक्ष रखते हुए उसने कहा कि 'स्वर्गके इच्छुक मनुष्योंको अजों द्वारा यज्ञकी विधि करना चाहिए' यह एक श्रुति है इसमें जो अज शब्द है उसका अर्थ चार पावों वाले जन्तु विशेष—बकरा है ॥९९॥ अज शब्द न केवल वेदमें ही पशु वाचक है किन्तु लोकमें भी स्त्रियों और बालकोंसे लेकर वृद्धों तक पशु वाचक ही प्रसिद्ध है ॥१००॥ यह मनुष्य अजके बालकके समान गन्ध वाला है, और 'यह अजा—बकरीका दूध है' इत्यादि स्थलोंमें अज शब्दकी जिस अर्थमें प्रसिद्धि है वह देवोंके द्वारा भी दूर नहीं की जा सकती ॥१०१॥ सिद्ध शब्द और उसके अर्थका जो सम्बन्ध पहलेसे निश्चित चला आ रहा है यदि उसमें बाधा डाली जावेगी तो व्यवहारका ही लोप हो जावेगा क्योंकि यह जगत् अंध उलूकोंसे सहित है—निर्विचार मनुष्योंसे भरा हुआ है ॥१०२॥ शब्द योग्य अर्थमें अवांछित रूपसे प्रवृत्त होता है और ऐसा होनेपर ही शास्त्रीय अथवा लौकिक व्यवहार चलता है ॥१०३॥ जिस प्रकार 'अग्निहोत्रं जुहुयात् स्वर्गकामः' स्वर्गका इच्छुक मनुष्य अग्निहोत्र यज्ञ करे,' इस श्रुतिमें अग्नि आदि शब्दोंका प्रसिद्ध ही अर्थ लिया जाता है उसी प्रकार 'अजैर्यष्टव्यं स्वर्गकामैः' स्वर्गके इच्छुक मनुष्योंको अजोंसे होम करना चाहिए इस श्रुतिमें भी अजका पशु अर्थ ही स्पष्ट है और यागादि शब्दोंका अर्थ तो पशुघात निश्चित ही है ॥१०४–१०५॥ इसलिए 'अजैर्यष्टव्यम्' इत्यादि वाक्यों द्वारा निःसन्देह, जिसमें अजके बालकका घात होता है ऐसा अनुष्ठान करना चाहिए ॥१०६॥ यहाँ यह आशङ्का नहीं करनी चाहिए कि घात करते समय पशुको दुःख होता होगा क्योंकि मन्त्रके प्रभावसे उसकी सुखसे मृत्यु होती है उसे दुःख तो नाम मात्रका भी नहीं होता ॥१०७॥ दीक्षाके अन्तमें मन्त्रोंका उच्चारण होते ही पशुको सुखमय स्थान साक्षात् दिखाई देने लगता है

निपातनं च कस्यात्र यत्रात्मा सूक्ष्मतां श्रितः । [1]अवध्योऽग्निविषास्त्राद्यैः किं पुनर्मन्त्रवाहनैः ॥१०९॥
सूर्यं चक्षुर्दिशं श्रोत्रं वायुं प्राणानसृक्पयः । गमयन्ति वपुः पृथ्वीं शमितारोऽस्य याज्ञिकाः ॥११०॥
स्वमन्त्रेणेष्टमात्रेण स्वर्लोकं गमितः सुखम् । याजकादिवदाकल्पमनल्पं पशुरश्नुते ॥१११॥
अभिसन्धिकृतो बन्धः स्वर्गाप्त्यै सोऽस्य नेत्यपि । न बलाद्धाव्यमानस्य शिशोर्वृद्धिर्घृतादिभिः ॥११२॥
स्वपक्षमित्युपन्यस्य विरराम स पर्वतः । नारदस्तमपाकर्तुमित्युवाच विचक्षणः ॥११३॥
शृण्वन्तु मद्वचः सन्तः सावधानधियोऽधुना । पर्वतस्य वचः सर्वं शतखण्डं करोम्यहम् ॥११४॥
अजैरित्यादिके वाक्ये यन्मृषा पर्वतोऽब्रवीत् । अजाः पशव इत्येवमस्यैषा स्वमनीषिका ॥११५॥
स्वाभिप्रायवशाद् वेदे न शब्दार्थगतिर्यतः । वेदाध्ययनवत्साप्तादुपदेशमपेक्षते ॥११६॥
गुरुपूर्वक्रमादर्थात् [2]दृश्यः शब्दार्थनिश्चयः । सान्यथा यदि जायेत जायेताध्ययनं तथा ॥११७॥
अथाध्ययनमन्य[3]त् स्यादन्यस्स्यादर्थवेदनम् । स्थिते साधारणे न्याये कामचारगतिः कुतः ॥११८॥
शब्दस्यार्थं स्वतो वेत्ति प्रज्ञासातिशयोऽपि हि । न शब्दमिति शापोऽयं कुतः कस्यात्र दुस्तरः ॥११९॥

सो ठीक ही है क्योंकि मणि मन्त्र और ओषधियोंका प्रभाव अचिन्त्य होता है ॥१०८॥ जब कि आत्मा अत्यन्त सूक्ष्मताको प्राप्त है तब यहाँ घात किसका होता है ? यह आत्मा तो अग्नि, विष तथा अस्त्र आदिके द्वारा भी घात करने योग्य नहीं है फिर मन्त्र पाठोंके द्वारा तो इसका घात होगा ही किस तरह ? ॥१०९॥ याज्ञिक लोग यज्ञमें पशुका घातकर उसके चक्षुको सूर्यके पास, श्रोत्रको दिशाओंके पास, प्राणोंको वायुके पास, खूनको जलके पास और शरीरको पृथिवीके पास भेज देते हैं। इस तरह याज्ञिक उसे शान्ति ही पहुँचाते हैं न कि कष्ट। मन्त्र द्वारा होम करने मात्रसे ही पशु सीधा स्वर्ग भेज दिया जाता है और वहाँ यज्ञ करानेवाले आदिके समान वह कल्पकाल तक बहुत भारी सुख भोगता रहता है ॥११०–१११॥ अभिप्राय पूर्वक किया हुआ पुण्य बन्ध ही स्वर्ग प्राप्तिका कारण है और बलपूर्वक होमे गये पशुके वह सम्भव नहीं है इसलिए उसे स्वर्गकी प्राप्ति होना असम्भव है, यह कहना भी ठीक नहीं है क्योंकि जिस प्रकार बच्चेको उसकी उसकी इच्छाके विरुद्ध जबर्दस्ती दिये हुए घृतादिकसे उसकी वृद्धि देखी जाती उसी प्रकार यज्ञमें जबर्दस्ती होमे जानेवाले पशुके भी स्वर्गकी प्राप्ति देखी जाती है ॥११२॥ इस प्रकार वह पर्वत अपना पूर्व पक्ष स्थापित कर चुप हो रहा तदनन्तर बुद्धिमान नारद उसका निराकरण करनेके लिए इस तरह बोला ॥११३॥

उसने कहा कि हे सज्जनो ! सावधान होकर मेरे वचन सुनिए मैं अब पर्वतके सब वचनोंके सौ टुकड़े करता हूँ ॥११४॥ 'अजैर्यष्टव्यम्' इत्यादि वाक्यमें पर्वतने जो कहा है वह झूठ है। क्योंकि अजका अर्थ पशु है यह इसकी स्वयंकी कल्पना है ॥११५॥ वेदमें शब्दार्थकी व्यवस्था अपने अभिप्रायसे नहीं होती किन्तु वह वेदाध्ययनके समान आप्तसे उपदेशकी अपेक्षा रखती है ॥११६॥ कहनेका तात्पर्य यह है कि गुरुओंकी पूर्व परम्परासे शब्दोंके अर्थका निश्चय करना चाहिए। यदि शब्दार्थका निश्चय अन्यथा होता है तो अध्ययन भी अन्यथा हो जायगा ॥११७॥ यदि यह कहा जाय कि अध्ययन दूसरा है और अर्थज्ञान उससे भिन्न हो सकता है तो यह कहना ठीक नहीं क्योंकि उभयत्र न्याय समान होने या एकके विषयमें मनमानी कैसे हो सकती है ? भावार्थ—यदि अध्ययन गुरु-परम्पराकी अपेक्षा रखता है तो अर्थज्ञान भी गुरु-परम्पराकी अपेक्षा रक्खेगा यह न्याय सिद्ध बात है ॥११८॥ यदि यह कहा जाय कि प्रज्ञाशाली

१. नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः । न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥
—भगवद्गीता

२. दृश्यः शब्दार्थनिश्चितिः घ०, म०, ङ० । इष्टः शब्दार्थ -क० । ३. -मन्यः स्यादन्यः म० ।

न चायं सम्प्रदायोऽस्मायेकस्मै गुरुणोदितः । त्रयः शिष्या वयं योग्या वसुनारदपर्वताः ॥१२०॥
समानश्रुतिकाः शब्दाः सन्ति लोकेऽत्र भूरिशः । गवादयः प्रयोगोऽपि तेषां विषयभेदतः ॥१२१॥
पशुरश्मिमृगाशाशावज्रवाजिषु वाग्भुवोः । गोशब्दव्यक्तयो व्यक्ताः प्रयुज्यन्ते पृथक्-पृथक् ॥१२२॥
न हि चित्रगुरित्यत्र[1] रश्मिवस्तुनि शेमुषी । न चाशीतगुरित्यत्र[2] सास्नादिमति वर्तते ॥१२३॥
रूढ्या क्रियावशाद्वाच्ये वाचां वृत्तिरवस्थिता । तामस्थिरोपदेशास्तु विस्मरन्ति गुरूदिताम् ॥१२४॥
तदत्र चोदनावाक्ये रूढिशब्दार्थदूरगः । क्रियाशब्दस्य[3] चाम्नातो न जायन्त इति ह्यजाः ॥१२५॥
ऐश्वर्यं रूढिशब्दस्य विद्वल्लोकशास्त्रयोः । अजगन्धोऽयमित्यादौ प्रयोगो न निषिध्यते ॥१२६॥
तेन पूर्वोक्तदोषोऽपि नैवास्माकं प्रसज्यते । व्यवहारोपयोगित्वाद् वाचां स्वोचितगोचरे ॥१२७॥
सत्यां क्षित्यादिसामग्र्यामप्ररोहादिपर्ययाः । व्रीहयोऽजाः पदार्थोऽयं वाक्यार्थो यजनं तु तैः ॥१२८॥
देवपूजा[4] यजेरर्थस्तैरजैर्यजनं द्विजैः । [5]नैवेद्यादिविधानेन यागः स्वर्गफलप्रदः ॥१२९॥

मनुष्य शब्दका अर्थ तो स्वयं जान लेता है पर शब्दको नहीं जान पाता तो यह दुस्तर शाप यहाँ किसके लिए किससे प्राप्त हुआ था सो बताओ। भावार्थ—यदि बुद्धिमान् मनुष्य अपनी इच्छासे शब्दके अर्थकी कल्पना कर लेता है तो उसे शब्द भी बना लेना चाहिए इसमें द्विविधा की क्या बात है? ॥११९॥ गुरुने यह सम्प्रदाय एक पर्वतके लिए ही बनाया हो यह भी सम्भव नहीं है क्योंकि हम वसु, नारद और पर्वत ये तीन योग्य शिष्य थे। भावार्थ—तीन शिष्योंमेंसे एक शिष्यको गुरु दूसरा अर्थ बतलावें और शेषको दूसरा अर्थ यह सम्भव नहीं दिखता ॥१२०॥ लोकमें गोको आदि लेकर ऐसे बहुत शब्द हैं जिनका समान श्रवण होता है—समान उच्चारण होता है परन्तु विषय भेदसे उनका प्रयोग जुदा-जुदा होता है। जैसे गो शब्द—पशु, किरण, मृग, इन्द्रिय, दिशा, वज्र, घोड़ा, वचन और पृथिवी अर्थमें प्रसिद्ध है परन्तु सब अर्थोंमें उसका पृथक्-पृथक् ही प्रयोग होता है। 'चित्रगु' इस शब्दमें गोका किरण अर्थ कोई नहीं करता और 'अशीतगु' इस शब्दमें गो शब्दका अर्थ सास्नादिमान् पशु कोई नहीं मानता किन्तु प्रकरणके अनुसार 'चित्रगु' शब्दमें गोका अर्थ गाय और 'अशीतगु' शब्दमें किरण ही माना जाता है ॥१२१-१२३॥ शब्दोंके अर्थमें जो प्रवृत्ति है वह या तो रूढ़िसे होती है या क्रियाके आधीन होती है परन्तु जिनके हृदयमें गुरुका उपदेश चिरकाल तक स्थिर नहीं रहता वे गुरु-प्रतिपादित अर्थको भूल जाते हैं ॥१२४॥ इसलिए 'अजैर्यष्टव्यम्' इस वेद-वाक्यमें अज शब्दका अर्थ रूढ़िगत अर्थसे दूर 'न जायन्ते इति अजाः' (जो उत्पन्न न हो सकें वे अज हैं) इस व्युत्पत्तिसे क्रिया सम्मत 'तीन वर्षका धान्य' लिया गया है ॥१२५॥ विद्वान् लोग, लोक और शास्त्र दोनोंमें रूढ़ि शब्दके ऐश्वर्यको जानते हैं अतः 'अजगन्धोऽयं पुरुषः' इत्यादि स्थलोंमें अज शब्दका बकरा अर्थमें प्रयोग निषिद्ध नहीं है ॥१२६॥ पर्वतने जो पहले यह दोष दिया था कि यदि शब्दोंका स्वभावसिद्ध अर्थ न किया जायगा तो व्यवहारका ही लोप हो जायगा उसका हमारे ऊपर प्रसङ्ग ही नहीं आता क्योंकि शब्दोंका अपने-अपने योग्य स्थलोंपर व्यवहारकी सिद्धिके लिए ही उपयोग किया जाता है ॥१२७॥ इसलिए पृथिवी आदि सामग्रीके रहते हुए भी जिसमें अंकुरादि रूप पर्याय प्रकट न हो सके ऐसा तीन वर्षका पुराना धान अज कहलाता है। यह तो अज शब्दका अर्थ है और ऐसे धान्यसे यज्ञ करना चाहिए यह 'अजैर्यष्टव्यम्' इस वाक्यका अर्थ है ॥१२८॥ यज धातुका अर्थ देव-पूजा है इसलिए द्विजोंको पूर्वोक्त धानसे ही पूजा करनी चाहिए क्योंकि नैवेद्य आदि-

---

१. चित्रा गावो यस्य स चित्रगुः=चित्रवर्णगोयुक्तः। २. अशीता उष्णाः गावः किरणा यस्य सोऽशीतगुः=सूर्यः। ३. क्रियाशब्दसमाम्नातो म०। ४. यज देवपूजा-संगतिकरण-दानेषु। ५. निवेद्यादि—क०, ङ०।

षट्कर्मणां विधातारं पुराणपुरुषं परम् । त्रातारमिन्द्रमिन्द्रेज्यं वेदे गीतं स्वयम्भुवम् ॥१३०॥
देशकं मुक्तिमार्गस्य शोषकं भववारिधेः । अनन्तज्ञानसौख्यादिमदीशाख्यं[1] महेश्वरम् ॥१३१॥
ब्रह्माणं विष्णुमीशानं सिद्धं बुद्धमनामयम् । आदित्यवर्णं वृषभं[2] पूजयन्ति हितैषिणः ॥१३२॥
ततः स्वर्गसुखं पुंसां ततो मोक्षसुखं ध्रुवम् । ततः कीर्तिस्ततः कान्तिस्ततो दीप्तिस्ततो धृतिः ॥१३३॥
पिष्टेनापि न यष्टव्यं पशुत्वेन विकल्पितात् । संकल्पादशुभात्पापं पुण्यं तु शुभतो यतः ॥१३४॥
यो नामस्थापनाद्रव्यैर्भावेन च विभेदनात् । चतुर्धा हि पशुः प्रोक्तस्तस्य चिन्त्यं न हिंसनम् ॥१३५॥
यदुक्तं मन्त्रतो मृत्योर्न दुःखमिति तन्मृषा । न चेद् दुःखं न मृत्युः स्यात् स्वस्थावस्थस्य पूर्ववत् ॥१३६॥
पादनासाधिरोधेन विना चेन्म्रियतेऽपशुः । मन्त्रेण मरणं तथ्यमसम्भाव्यमिदं[3] पुनः ॥१३७॥
सुखासिकाऽपि नैकान्तान्मृत मन्त्रप्रभावतः । दुःखिताप्यारटज्जन्तोर्ग्रहार्तस्य निरीक्ष्यते ॥१३८॥
सुसूक्ष्मत्वादवध्योऽयमात्मेति यदुदीरितम् । तत्र स्थूलशरीरस्थः स्थूलोऽपि सम्भवेद्यतः ॥१३९॥
[4]प्रदीपवदयं देही देहाधारवशाद् यतः । सूक्ष्मस्थूलतया याति स्वसंहारविसर्पणम् ॥१४०॥
अनीदृशस्तु संसारी शरीरानन्तवेदकः । सूक्ष्म एव कथंकारं सुखदुःखमवाप्नुयात् ॥१४१॥
अतः शरीरबाधायां मन्त्रतन्त्राद्युपयोगतः । बाधनं नियमादस्य देहमात्रस्य देहिनः ॥१४२॥

से की हुई पूजा ही स्वर्ग रूप फलको देनेवाली होती है ॥१२९॥ हिताभिलाषी मनुष्य जिन्होंने युगके आदिमें असि, मषि, कृषि, सेवा, शिल्प और वाणिज्य इन छह कर्मोंकी प्रवृत्ति चलाई थी, जो पुराण पुरुष हैं, उत्कृष्ट हैं, रक्षक हैं, इन्द्र रूप हैं, इन्द्रके द्वारा पूज्य हैं, वेदमें स्वयंभू नामसे प्रसिद्ध हैं, मोक्ष मार्गके उपदेशक हैं, संसार-सागरके शोषक हैं, अनन्त ज्ञान-सुख आदि गुणोंसे युक्त ईश नामसे प्रसिद्ध हैं, महेश्वर हैं, ब्रह्मा हैं, विष्णु हैं, ईशान हैं, सिद्ध हैं, बुद्ध हैं, अनामय-रोगरहित हैं और सूर्यके समान वर्णवाले हैं ऐसे भगवान् वृषभदेवकी ही पूजा करते हैं ॥१३०-१३२॥ उसी पूजासे पुरुषोंको स्वर्ग सुख प्राप्त होता है, उसीसे मोक्षका अविनाशी सुख मिलता है, उसीसे कीर्ति, उसीसे कान्ति, उसीसे दीप्ति और उसीसे धृतिकी प्राप्ति होती है ॥१३३॥ साक्षात् पशुकी बात तो दूर रही पशुरूपसे कल्पित चूनके पिण्डसे भी पूजा नहीं करनी चाहिए क्योंकि अशुभ संकल्पसे पाप होता है और शुभ संकल्पसे पुण्य होता है ॥१३४॥ जो नाम, स्थापना, द्रव्य और भाव निक्षेपके भेदसे चार प्रकारका पशु कहा गया है उसकी हिंसाका कभी मनसे भी विचार नहीं करना चाहिए ॥१३५॥ यह जो कहा है कि मन्त्र द्वारा होनेवाली मृत्युसे दुःख नहीं होता है वह मिथ्या है क्योंकि यदि दुःख नहीं होता है तो जिस प्रकार पहले स्वस्थ अवस्थामें मृत्यु नहीं हुई थी उसी प्रकार अब भी मृत्यु नहीं होना चाहिए ॥१३६॥ यदि पैर बाँधे बिना और नाक मूँदे बिना अपने आप पशु मर जावे तब तो मन्त्रसे मरना सत्य कहा जाय परन्तु यह असंभव बात है ॥१३७॥ मन्त्रके प्रभावसे मरनेवाले पशुको सुखासिका प्राप्त होती है यह भी एकान्त नहीं है क्योंकि जो पशु मारा जाता है वह ग्रहसे पीड़ितकी तरह जोर-जोरसे चिल्लाता है इसलिए उसका दुःख स्पष्ट दिखाई देता है ॥१३८॥ यह जो कहा है कि आत्मा अत्यन्त सूक्ष्म होनेसे अवध्य है—मारनेमें नहीं आता है वह भी ठीक नहीं है क्योंकि जब आत्मा स्थूल शरीरमें स्थित होता है तब स्थूल भी तो होता है ॥१३९॥ यह आत्मा शरीररूपी आधारके अनुसार दीपकके प्रकाशके समान सूक्ष्म और स्थूलरूप होता हुआ संकोच तथा विस्तार-को प्राप्त होता रहता है ॥१४०॥ यदि अनन्त शरीरोंका अनुभव करनेवाला संसारी जीव इस प्रकार छोटा-बड़ा न माना जावे और एकान्तसे सूक्ष्म ही माना जावे तो वह सुख-दुःखको किस तरह प्राप्त कर सकेगा ? ॥१४१॥ इसलिए यह निर्विवाद सिद्ध है कि जीव शरीर प्रमाण है और

---

१. महेशाख्यं म० । २. –वर्णवृषभं म० । ३. तत्थ्यादसंभाव्य—म० । ४. प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् त० सू० अ० ५ ।

म्रियमाणोऽतिदुःखेन चक्षुरादिभिरिन्द्रियैः । वियुज्यते स्वयं तेन कोऽन्यस्तेषां वियोजकः ॥१४३॥
[1]प्राणिघातकृतः स्वर्गः कुतः स्याद्याजकादयः । याज्यस्य स्वर्गगामित्वे दृष्टान्तत्वं गता यतः ॥१४४॥
[2]धर्म्यमेव हि शर्माप्त्यै कर्म याज्यस्य जायते । नह्यपथ्यं शिशोर्दत्तं मात्राऽपि स्यात्सुखाप्तये ॥१४५॥
परिषत्प्रावृषि स्फूर्जद्वचोवज्रमुखैरिति । भित्त्वा पर्वतदुःपक्षं स्थिते नारदनीरदे ॥१४६॥
साधुकारो मुहुर्दत्तस्तस्मै धर्मपरीक्षकैः । सलौकिकैः शिरःकम्पै[3]स्साङ्गुलिस्फोटनिस्वनैः ॥१४७॥
राजोपरिचरः पृष्टस्ततः शिष्टैर्बहुश्रुतैः । राजन् यथाश्रुतं ब्रूहि त्वं सत्यं गुरुभाषितम् ॥१४८॥
मूढसत्यविमूढेन वसुना दृढबुद्धिना । स्मरताऽपि गुरोर्वाक्यमिति वाक्यमुदीरितम् ॥१४९॥
युक्तियुक्तमुपन्यस्तं नारदेन सभाजनाः । पर्वतेन यदत्रोक्तं तदुपाध्यायभाषितम् ॥१५०॥

मन्त्र-तन्त्र तथा अस्त्र आदिसे शरीरका घात होनेपर इसे नियमसे दुःख होता है ॥१४२॥ जब यह जीव तीव्र दुःखसे मरने लगता है तब चक्षु आदि इन्द्रियोंसे स्वयं ही वियुक्त हो जाता है इसलिए उनका वियोग करानेवाला और दूसरा कौन है ? । भावार्थ—जब जीव स्वयं ही चक्षु आदि इन्द्रियोंसे वियुक्त होता है तब यह कहना कि 'याजक लोग उनके चक्षु आदिको सूर्य आदिके पास भेज देते हैं' मिथ्या है ॥१४३॥ प्राणियोंका घात करनेवालेको स्वर्ग कैसे हो सकता है ? जिससे कि याजक आदिको याज्य (पशु आदिके) स्वर्ग जानेमें दृष्टान्त माना जा सके । भावार्थ—पर्वतने कहा था कि मन्त्र द्वारा होम करते ही पशु स्वर्ग भेज दिया जाता है और वहाँ वह याजकादिके समान कल्प काल तक अत्यधिक सुख भोगता रहता है सो प्राणियोंका घात करनेवाले याजक आदिको स्वर्ग कैसे मिल सकता है ? उन्हें तो इस पापके कारण नरक मिलना चाहिए अतः जब याजक आदि स्वर्ग नहीं जाते तब उन्हें पशुके स्वर्ग जानेमें दृष्टान्त कैसे बनाया जा सकता है ?॥१४४॥ धर्म सहित कार्य ही पशुको सुख प्राप्तिमें सहायक हो सकता है अधर्म सहित कार्य नहीं क्योंकि बच्चेके लिए माताके द्वारा दिया हुआ अपथ्य पदार्थ सुख प्राप्तिका कारण नहीं होता । भावार्थ—पर्वतने कहा था कि जिस प्रकार न चाहनेपर भी बच्चेके लिए घी आदि दिया जाता है तो वह उसकी वृद्धिका कारण होता है, उसी प्रकार पशुके न चाहनेपर भी उसे यज्ञमें होमा जाता है तो वह उसके लिए स्वर्गप्राप्तिका कारण होता है'''। पर्वतका यह कहना ठीक नहीं क्योंकि धर्मयुक्त कार्य ही पशुके लिए सुखप्राप्तिमें सहायक हो सकता है अधर्मयुक्त नहीं। जिस प्रकार माताके द्वारा दिये हुए घृत, दुग्ध आदि हितकारी पदार्थ ही बच्चेके लिए सुखप्राप्तिमें सहायक होते हैं विषादिक अपथ्य पदार्थ नहीं उसी प्रकार पशुको जबर्दस्ती होम देने मात्रसे उसे स्वर्गकी प्राप्ति नहीं हो सकती किन्तु उसके धर्मयुक्त कार्यसे ही हो सकती है ॥१४५॥

इस प्रकार सभारूपी वर्षाकालमें अपने तीक्ष्ण वचन रूपी वज्रके अग्रभागसे पर्वतके मिथ्या पक्षरूपी पर्वत-पहाड़के भद्दे किनारेको तोड़कर जब नारदरूपी मेघ चुप होरहा तब सभामें बैठे हुए धर्मके परीक्षक लोगोंने एवं साधारण मनुष्योंने शिर हिला-हिलाकर तथा अपनी-अपनी अँगुलियाँ चटकाकर नारदके लिए बार-बार धन्यवाद दिया ॥१४६–१४७॥

तदनन्तर अनेक शास्त्रोंके ज्ञाता शिष्टजनोंने अन्तरिक्षचारी राजा वसुसे पूछा कि हे राजन् ! आपने गुरुके द्वारा कहा हुआ जो सत्य अर्थ सुना हो वह कहिए ॥१४८॥ यद्यपि राजा वसु दृढ़-बुद्धि था और गुरुके वचनोंका उसे अच्छी तरह स्मरण था तथापि मोह वश सत्यके विषयमें अविवेकी हो वह निम्न प्रकार वचन कहने लगा ॥१४९॥ कि हे सभाजनो ! यद्यपि नारदने युक्ति-

---

१. प्राणिघातं करोतीति प्राणिघातकृत् तस्य । २. धर्ममेव म० । ३. शिरःकंपं म० ।

वाङ्मात्रेण ततो भूमौ निमग्नः स्फटिकासनः । वसुः पपात पाताले पातकात् पतनं ध्रुवम्[1] ॥१५१॥
पातालस्थितकायोऽसौ सप्तमीं पृथ्वीं गतः । नरके नारको जातो महारौरवनामनि ॥१५२॥
हिंसानन्दमृषानन्दरौद्रध्यानाविलो वसुः । जगाम नरकं रौद्रं रौद्रध्यानं हि दुःखदम् ॥१५३॥
प्रत्यक्षं सर्वलोकस्य पाताले पतिते वसौ । तदाकुलः समुत्तस्थौ हा हा धिग्धिगिति ध्वनिः ॥१५४॥
[2]लब्धासत्यफलं सद्यो निनिन्दुर्नृपतिं जनाः । पर्वतं च निराचक्रुः खलीकृत्य खलं पुरात् ॥१५५॥
तत्त्ववादिनमक्षुद्रं नारदं जितवादिनम् । कृत्वा ब्रह्मरथारूढं पूजयित्वा जना ययुः ॥१५६॥
पर्वतोऽपि [3]खलीकारं प्राप्य देशान् परिभ्रमन् । दुष्टं द्विष्टं निरैक्षिष्ट महाकाल[4]महासुरम् ॥१५७॥
ततस्तस्मै पराभूतिं पराभूतिजुषे पुरा । निवेद्य तेन संयुक्तः कृत्वा हिंसागमं कुधीः ॥१५८॥
लोके प्रतारको भूत्वा हिंसायज्ञं प्रदर्शयन्[5] । अरञ्जयज्जनं मूढं प्राणिहिंसनतत्परम् ॥१५९॥
मृत्वा पापोपदेशेन पापशापवशान्मृतः । सेवामिव वसोः कुर्वन् पर्वतो नरकेऽपतत् ॥१६०॥
स्थापिता वसुराज्येऽष्टौ ज्येष्ठानुक्रमशः क्रमात् । स्वल्पैरेव दिनैर्मृत्युं सूनवोऽपि वसोर्ययुः १६१॥
ततो मृत्युभयात्त्रस्तः सुवसुः प्रपलायितः । गत्वा नागपुरेऽतिष्ठन्मथुरायां बृहद्ध्वजः ॥१६२॥

शार्दूलविक्रीडितम्

कष्टं ख्यातिमवाप्य सत्यजनितां पापादधोऽगाद्वसुः
पापं पर्वतकोऽभिमानवशगस्तस्यैव पश्चाद् ययौ ।

युक्त कहा है तथापि पर्वतने जो कहा है वह उपाध्यायके द्वारा कहा हुआ कहा है ॥१५०॥ इतना कहते ही वसुका स्फटिकमणिमय आसन पृथिवीमें धँस गया और वह पातालमें जा गिरा सो ठीक ही है क्योंकि पापसे पतन होता ही है ॥१५१॥ जिसका शरीर पातालमें स्थित था ऐसा वसु मरकर सातवीं पृथिवी गया और वहाँ महारौरव नामक नरकमें नारकी हुआ ॥१५२॥ हिंसानन्द और मृषानन्द रौद्र ध्यानसे कलुषित हो वसु भयंकर नरकमें गया सो ठीक ही है क्योंकि रौद्रध्यान दुःखदायक होता ही है ॥१५३॥ सब लोगोंके समक्ष जब वसु पातालमें चला गया तब सब ओर आकुलतासे भरा हा-हा धिक्-धिक् शब्द गूँजने लगा ॥१५४॥ जिसे तत्काल ही असत्य बोलनेका फल मिल गया था ऐसे राजा वसुकी सब लोगोंने निन्दा की और दुष्ट पर्वतका तिरस्कार कर उसे नगरसे बाहर निकाल दिया ॥१५५॥ तत्त्ववादी, गम्भीर एवं वादियोंको परास्त करनेवाले नारदको लोगोंने ब्रह्म रथपर सवार किया तथा उसका सम्मान कर सब यथा स्थान चले गये ॥१५६॥ इधर तिरस्कार पाकर पर्वत भी अनेक देशोंमें परिभ्रमण करता रहा अन्तमें उसने द्वेष-पूर्ण दुष्ट महाकाल नामक असुरको देखा ॥१५७॥ पूर्व भवमें जिसका तिरस्कार हुआ था ऐसे महाकाल असुरके लिए अपने पराभवका समाचार सुनाकर पर्वत उसके साथ मिल गया और दुर्बुद्धिके कारण हिंसापूर्ण शास्त्रकी रचनाकर, लोकमें ठगिया बन हिंसापूर्ण यज्ञका प्रदर्शन करता हुआ प्राणिहिंसामें तत्पर मूर्खजनोंको प्रसन्न करने लगा ॥१५८-१५९॥ अन्तमें पापोपदेशके कारण पापरूपी शापके वशीभूत होनेसे पर्वत मरा और मरकर वसुकी सेवा करनेके लिए ही मानो नरक गया ॥१६०॥ मन्त्रियोंने वसुके आठ पुत्रोंको क्रमसे एक दूसरेके बाद उसकी गद्दीपर बैठाया परन्तु वे भी थोड़े ही दिनोंमें मृत्युको प्राप्त हो गये ॥१६१॥ तदनन्तर जो दो पुत्र शेष बचे उनमें मृत्युके भयसे भयभीत हो सुवसु तो भागकर नागपुरमें रहने लगा और बृहद्ध्वज मथुरामें जा बसा ॥१६२॥

बड़े खेदकी बात है कि एक ओर तो वसु सत्य जनित प्रसिद्धिको पाकर अन्तमें पापके कारण नरक गया और अभिमानके वशीभूत हुआ पर्वत भी उसके पीछे पापपूर्ण नरकको प्राप्त

---

१. खलु म० । २. लब्ध्वा म० । ३. तिरस्कारं । ४. महाकाय -म० । ५. प्रदर्शयत् म० ।

सम्यग्दृष्टिदिवाकराख्यखचरं लब्ध्वा सखायं पुनः
क्षिप्त्वा पर्वतदुर्मतं कृतितया स्वर्गं गतो नारदः ॥१६३॥
धर्मः प्राणिदया दयाऽपि सततं हिंसाव्युदासो मनो-
वाक्कायैर्विरतिर्वधात्प्रणिहितैः प्राणात्ययेऽप्यात्मनः।
धत्तेऽसौ बुधमादरेण चरितः स्वर्गापवर्गार्गलां
भित्त्वा मोहमयीं सुखेऽतिविपुले धर्मो जिनव्याहृतः ॥१६४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ वसूपाख्याने नारदपर्वतविवादवर्णनो नाम सप्तदशः सर्गः।

हुआ तथा दूसरी ओर सम्यग्दृष्टि दिवाकर नामक विद्याधर मित्रको पाकर एवं पर्वतके मिथ्या मतका खण्डनकर नारद कृत-कृत्य होता हुआ स्वर्ग गया ॥१६३॥ जीवोंपर दया करना धर्म है, निरन्तर हिंसाका त्याग करना दया है और अपने प्राण जानेपर भी उस ओर लगे हुए मन, वचन, कायके द्वारा वधसे दूर रहना हिंसा त्याग है। जिनेन्द्र भगवान्‌ने हिंसा त्यागको ही धर्म कहा है। आदरपूर्वक आचरण किया हुआ यह धर्म, स्वर्ग और मोक्षकी मोहरूपी अर्गलाको भेदकर विद्वज्जनोंको अतिशय विस्तृत सुखमें पहुँचा देता है ॥१६४॥

इस प्रकार अरिष्टनेमि पुराण के संग्रहसे युक्त जिनसेनाचार्य रचित हरिवंशपुराणमें राजा वसुके चरितमें नारद और पर्वतके विवादका वर्णन करनेवाला सत्रहवाँ सर्ग समाप्त हुआ ॥१७॥

अष्टादशः सर्गः

अथ योऽसौ वसोः सूनुर्मथुरायां बृहद्ध्वजः । सुबाहुरभवत्तस्मात्तनयो विनयोद्यतः ॥१॥
लक्ष्मीं स तत्र निक्षिप्य तपोलक्ष्मीमुपाश्रितः । सुबाहुर्दीर्घबाहौ च वज्रबाहौ नृपश्च सः ॥२॥
सोऽपि लब्धाभिमानेऽसौ भानौ सोऽपि यवौ[1] सुते । सुभानौ भयने सोऽपि भीमनामनि स प्रभुः ॥३॥
एवमाद्यास्तथाऽन्येऽपि शतशोऽथ सहस्रशः । मुनिसुव्रतनाथस्य तीर्थेऽतीयुः क्षितीश्वराः ॥४॥
आयुर्वर्षसहस्राणि यस्य पञ्चदशाऽगमत् । नमेर्वहति तस्येह पञ्चलक्षाब्दके पथि ॥५॥
उदियाय यदुस्तत्र हरिवंशोदयाचले । यादवप्रभवो व्यापी भूमौ भूपविभाकरः[2] ॥६॥
सुतो नरपतिस्तस्मादुदभूद् भूवधूपतिः । यदुस्तस्मिन् भुवं न्यस्य तपसा त्रिदिवं गतः ॥७॥
शूरश्चापि सुवीरश्च शूरौ वीरौ नरेश्वरौ । स तौ नरपती राज्ये स्थापयित्वा तपोऽभजत् ॥८॥
शूरः सुवीरमास्थाप्य मथुरायां स्वयं कृती । स चकार कुशद्येषु पुरं शौर्यपुरं पुरम् ॥९॥
शूराश्चान्धकवृष्ण्याद्याः शूरादुदभवन् सुताः । वीरा भोजक[3]वृष्ण्याद्याः सुवीरान्मथुरेश्वरात् ॥१०॥
ज्येष्ठपुत्रे विनिक्षिप्तक्षितिभारौ यथायथम् । सिद्धौ शूरसुवीरौ तौ सुप्रतिष्ठेन दीक्षितौ ॥११॥
आसीदन्धकवृष्णेश्च सुभद्रा वनितोत्तमा । पुत्रास्तस्या दशोत्पन्नास्त्रिदशाभा दिवश्च्युताः ॥१२॥
समुद्रविजयोऽक्षोभ्यस्तथा स्तिमितसागरः । हिमवान् विजयश्चान्योऽचलो धारणपूरणौ ॥१३॥

अथानन्तर—राजा वसुका जो बृहद्ध्वज नामका पुत्र मथुरामें रहने लगा था उसके सुबाहु नामका विनयवान् पुत्र हुआ। राजा बृहद्ध्वज सुबाहुके लिए राज्यलक्ष्मी सौंप आप तपरूपी लक्ष्मीको प्राप्त हो गया। यथाक्रमसे सुबाहुके दीर्घबाहु, दीर्घबाहुके वज्रबाहु, वज्रबाहुके लब्धाभिमान, लब्धाभिमानके भानु, भानुके यवु, यवुके सुभानु और सुभानुके भीम पुत्र हुआ। इस प्रकार इन्हें आदि लेकर भगवान् मुनिसुव्रतनाथके तीर्थमें सैकड़ों हजारों राजा उत्पन्न हुए और सबने अपने-अपने पुत्रोंपर राज्य-भार सौंपकर तप धारण किया ॥१–४॥ भगवान् मुनिसुव्रतके बाद नमिनाथ हुए। इनकी आयु पन्द्रह हजार वर्षकी थी तथा इनका तीर्थ पाँच लाख वर्ष तक प्रचलित रहा। इन्हींके तीर्थमें हरिवंशरूपी उदयाचलपर सूर्यके समान यदु नामका राजा हुआ। यही यदु राजा, यादवोंकी उत्पत्तिका कारण था तथा अपने प्रतापसे समस्त पृथिवीपर फैला हुआ था ॥५–६॥ राजा यदुके नरपति नामका पुत्र हुआ। उसपर पृथिवीका भार सौंप राजा यदु तप-कर स्वर्ग गया ॥७॥ राजा नरपतिके शूर और वीर नामक दो पुत्र हुए सो नरपति उन्हें राज्य-सिंहासनपर बैठाकर तप करने लगा ॥८॥ अत्यन्त कुशल शूरने छोटे भाई सुवीरको मथुराके राज्यपर अधिष्ठित किया और स्वयं कुशद्य देशमें एक शौर्यपुर नामका नगर बसाया ॥९॥ शूरसे अन्धकवृष्णिको आदि लेकर अनेक शूर वीर उत्पन्न हुए, और मथुराके स्वामी सुवीरसे भोजक-वृष्णिको आदि लेकर अनेक वीर पुत्र उत्पन्न हुए ॥१०॥ यथायोग्य अपने-अपने बड़े पुत्रोंपर पृथिवीका भार सौंपकर कृतकृत्यताको प्राप्त हुए शूर और सुवीर दोनों ही सुप्रतिष्ठ मुनिराजके पास दीक्षित हो गये ॥११॥ अन्धकवृष्णिकी सुभद्रा नामक उत्तम स्त्री थी उससे उनके दश पुत्र हुए जो देवोंके समान कान्तिवाले थे तथा स्वर्गसे च्युत होकर आये थे ॥१२॥ उनके नाम इस प्रकार थे—१ समुद्रविजय, २ अक्षोभ्य, ३ स्तिमितसागर, ४ हिमवान्, ५ विजय, ६ अचल, ७ धारण

---

१. यवुनाम्निपुत्रे । २. भूपतिभास्करः (क० टि०) । ३. भोजनकवृष्ण्याद्याः म० ।

अभिचन्द्र इहाख्यातो वसुदेवश्च ते दश । [1]दशार्हाः सुमहाभागाः सर्वेऽप्यन्वर्थनामकाः ॥१४॥
कुन्ती मद्री च कन्ये द्वे मान्ये स्त्रीगुणभूषणे । लक्ष्मीसरस्वतीतुल्ये भगिन्यौ वृष्णिजन्मनाम् ॥१५॥
राज्ञो भोजकवृष्णेर्या पत्नी पद्मावती सुतान् । उग्रसेनमहासेनदेवसेनानसूत सा ॥१६॥
सुवसोरप्यभवत्सूनुः कुञ्जरावर्तवर्तिनः । बृहद्रथ इति ख्यातो मागधेशपुरेऽवसत् ॥१७॥
तस्माद्दृढरथो जातस्ततो [2]दृढरथोऽग्रजः । तस्मान्नरवरो जज्ञे ततो दृढरथस्ततः ॥१८॥
जातः सुखरथस्तस्माद्दीपनः कुलदीपनः । सूनुः सागरसेनोऽस्मात्सुमित्रो वप्रथुस्ततः ॥१९॥
विन्दुसारः सुतस्तस्माद्देवगर्भस्तदर्भकः । ततः शतधनुर्वीरो धनुर्धरपुरःसरः ॥२०॥
क्रमात् शतसहस्रेषु व्यतिक्रान्तेषु राजसु । जातो निहतशत्रुः स सुतः शतपतिर्नृपः ॥२१॥
जातो बृहद्रथो राजा ततो राजगृहाधिपः । तस्य सूनुर्जरासन्धो वशीभूतवसुन्धरः ॥२२॥
स रावणसमो भूत्या त्रिखण्डभरताधिपः । नवमः प्रतिशत्रूणां सुरश्रीसदृशौजसाम् ॥२३॥
मध्ये कालिन्दसेनाख्या महिषी महिषीगुणा । तनयाः [3]सनयास्तस्य ते कालयवनादयः ॥२४॥
अपराजित इत्याद्या भ्रातरश्चक्रवर्तिनः । हरिवंशमहावृक्षशाखायाः फलितात्मनः ॥२५॥
एकस्या एकवीरोऽयं धारको धरणीपतिः । बहुविद्याधरेन्द्राणां दक्षिणश्रेण्युपाश्रिताम् ॥२६॥
संहतिं नृपसिंहोऽसौ शास्ति राजगृहे स्थितः । उत्तरापथभूपालाः दक्षिणापथभूभृतः[4] ॥२७॥
पूर्वापरसमुद्रान्ता मध्यदेशाश्च तद्वशाः । भूचरैः खेचरैः सर्वैः शेखरीकृतशासनः ॥२८॥

८ पूरण ९ अभिचन्द्र और १० वसुदेव । ये सभी पुत्र योग्य दशाके धारक, महाभाग्यशाली और सार्थक नामोंसे युक्त थे ॥१३–१४॥ उक्त पुत्रोंके सिवाय कुन्ती और मद्री नामकी दो कन्याएँ भी थीं जो अतिशय मान्य थीं, स्त्रियोंके गुणरूपी आभूषणोंसे सहित थीं, लक्ष्मी और सरस्वतीके समान जान पड़ती थीं और समुद्रविजयादि दश भाइयोंकी बहिनें थीं ॥१५॥

राजा भोजकवृष्णिकी जो पद्मावती नामकी पत्नी थी उसने उग्रसेन, महासेन तथा देवसेन नामक तीन पुत्र उत्पन्न किये थे ॥१६॥ राजा वसुका जो सुवसु नामका पुत्र, कुञ्जरावर्तपुर (नागपुर) में रहने लगा था उसके बृहद्रथ नामका पुत्र हुआ और वह मागधेशपुरमें रहने लगा ॥१७॥ बृहद्रथके दृढरथ नामका पुत्र हुआ । दृढरथके नरवर, नरवरके दृढरथ, दृढरथके सुखरथ, सुखरथके कुलको दीप्त करनेवाला दीपन, दीपनके सागरसेन, सागरसेनके सुमित्र, सुमित्रके वप्रथु, वप्रथुके विन्दुसार, विन्दुसारके देवगर्भ और देवगर्भके शतधनु नामका वीर पुत्र हुआ । यह शतधनु, धनुर्धारियोंमें सबसे श्रेष्ठ था ॥१८–२०॥ तदनन्तर क्रमसे लाखों राजाओंके व्यतीत हो जानेपर उसी वंशमें निहतशत्रु नामका राजा हुआ । उसके शतपति और शतपतिके बृहद्रथ नामका पुत्र हुआ । यह राजगृह नगरका स्वामी था । बृहद्रथके पृथिवीको वश करनेवाला जरासन्ध नामका पुत्र हुआ ॥२१–२२॥ वह विभूतिमें रावणके समान था, तीन खण्ड भरतका स्वामी था और देवोंके समान प्रतापी प्रति नारायणोंमें नौवाँ नारायण था ॥२३॥ अनेक स्त्रियोंके बीच उसकी कालिन्दसेना नामकी पट्टरानी थी जो पट्टरानियोंके समस्त गुणोंसे सहित थी । राजा जरासन्धके कालयवन आदि अनेक नीतिज्ञ पुत्र थे ॥२४॥ चक्रवर्ती जरासन्धके अपराजित आदि अनेक भाई थे जो हरिवंशरूपी महावृक्षकी शाखापर लगे हुए फलोंके समान जान पड़ते थे ॥२५॥ राजा जरासन्ध अपनी अद्वितीय माताका अद्वितीय वीर पुत्र था । वह राजसिंह, राजगृह नगरमें स्थिर रहकर ही दक्षिण श्रेणीमें रहनेवाले समस्त विद्याधर राजाओंके समूहपर शासन करता था । उत्तरापथ और दक्षिणापथके समस्त राजा, पूर्व पश्चिम समुद्रोंके तट तथा मध्यके समस्त देश उसके वशमें थे । समस्त भूमिगोचरी और समस्त विद्याधर उसकी आज्ञाको

१. दशया अर्हाः योग्याः पूज्याश्च । २. दृढरथोऽग्रजः म० । ३. नयेन सहिताः सनयाः । ४. भूभृताम् म०।

चक्रवर्तिश्रियो भर्ता बिभर्तीन्द्रस्य विभ्रमम् । जातु शौर्यपुरोद्याने गन्धमादननामनि ॥२९॥
रात्रौ प्रतिमया तस्थौ सुप्रतिष्ठः प्रतिष्ठितः । पूर्ववैरानुबन्धेन तस्य चक्रे यक्षः सुदर्शनः ॥३०॥
अग्निपातं महावातं मेघवृष्ट्यादिदुःसहम् । उपसर्गं स जित्वाऽऽप केवलं घातिघातकृत्[1] ॥३१॥
तद्वन्दनार्थमिन्द्रौघाः सौधर्माद्याश्चतुर्विधैः । देवैः सह समागत्य तेऽर्चयित्वा ववन्दिरे ॥३२॥
वृष्णिरप्यागतो भक्त्या पुत्रदार[2]बलान्वितः । सम्पूज्यानम्य सौम्यं तं निजभूमावुपाविशत् ॥३३॥
सावधाने स्थिते धर्मदत्तकर्णे कृताञ्जलौ । जगज्जने जगादेत्थं सुप्रतिष्ठमुनीश्वरः ॥३४॥
धर्मात्त्रिवर्गनिष्पत्तिस्त्रिषु लोकेषु भाषिता । ततस्तामिच्छता कार्यः सततं धर्मसंग्रहः ॥३५॥
धर्मो धामनि सन्धत्ते शर्माधारे शरीरिणम्[3] । निर्मितो वाङ्मनःकायकर्मभिः शुभवृत्तिभिः ॥३६॥
धर्मो मङ्गलमुत्कृष्टमहिंसासंयमस्तपः । तस्य लक्षणमुद्दिष्टं सद्दृष्टिज्ञानकल्पितम् ॥३७॥
धर्मो जगति सर्वेभ्यः पदार्थेभ्य इहोत्तमः । कामधेनुः स धेनूनामप्यनूनसुखाकरः ॥३८॥
धर्म एव परं लोके शरणं शरणार्थिनाम् । मृत्युजन्मजरारोगशोकदुःखार्कतापिनाम् ॥३९॥
विश्वाभ्युदयसौख्यानां मनुजामरवर्तिनाम् । धर्म एव मतो हेतुर्निःश्रेयससुखस्य च ॥४०॥
नमिना भाषितो धर्मः समन्वन्तरवर्तिनाम्[4] । एकविंशेन नाथेन कर्त्रा तीर्थस्य साम्प्रतम् ॥४१॥
पञ्चकल्याणपूजानां स्वर्गावतरणादिषु । भाजनं यो बभूवात्र तेन धर्मोऽयमीरितः ॥४२॥
महाव्रतानि साधूनामहिंसा सत्यभाषणम् । अस्तेयं ब्रह्मचर्यं च निर्मूर्च्छा[5] चेति पञ्चधा ॥४३॥

शेखरके समान शिरपर धारण करते थे ॥२६–२८॥ वह चक्रवर्तीकी लक्ष्मीका स्वामी था तथा इन्द्रकी शोभाको धारण करता था। कदाचित् शौर्यपुरके उद्यानमें गन्धमादन नामक पर्वतपर रात्रिके समय सुप्रतिष्ठ नामक मुनिराज प्रतिमा योग लेकर विराजमान थे। पूर्व वैरके कारण सुदर्शन नामक यक्षने उन मुनिराजपर अग्निवर्षा, प्रचण्ड वायु तथा मेघ वृष्टि आदि अनेक कठिन उपसर्ग किये परन्तु उन सबको जीतकर घातिया कर्मोंका क्षय करनेवाले उक्त मुनिराजने केवल ज्ञान प्राप्त कर लिया ॥२९–३१॥ उनकी वन्दनाके लिए सौधर्म आदि इन्द्रोंके समूह, चारों निकाय-के देवोंके साथ वहाँ आये और सबने भक्तिपूर्वक पूजाकर केवली भगवान्को नमस्कार किया ॥३२॥ शौर्यपुरका राजा अन्धकवृष्णि भी अपने पुत्रों-स्त्रियों तथा सेनाओंके साथ आया और भक्तिपूर्वक सुप्रतिष्ठ केवलीकी पूजा-वन्दनाकर अपने स्थानपर बैठ गया ॥३३॥ जब जगत्के जीव धर्मोपदेश सुननेके लिए कान देकर तथा हाथ जोड़कर सावधानीके साथ बैठ गये तब सुप्रतिष्ठ मुनिराजने इस प्रकार उपदेश देना प्रारम्भ किया ॥३४॥

उन्होंने कहा कि तीनों लोकोंमें त्रिवर्गकी प्राप्ति धर्मसे ही कही गयी है इसलिए उसकी इच्छा रखनेवाले पुरुषको सदा धर्मका संग्रह करना चाहिए ॥३५॥ शुभ वृत्तिसे युक्त मन, वचन, कायके द्वारा किया हुआ धर्म, प्राणीको सुखके आधारभूत स्थान—स्वर्ग अथवा मोक्षमें पहुँचा देता है ॥३६॥ धर्म उत्कृष्ट मङ्गल स्वरूप है तथा सम्यग्दर्शन और सम्यग्ज्ञानसे सहित अहिंसा, संयम और तप उस धर्मके लक्षण बतलाये गये हैं ॥३७॥ इस संसारमें धर्म सब पदार्थोंसे उत्तम है, यह धेनुओंमें कामधेनु है तथा उत्कृष्ट सुखकी खान है ॥३८॥ जन्म, जरा, मरण, रोग, शोक आदिसे उत्पन्न दुःखरूपी सूर्यसे संतप्त शरणार्थी जनोंके लिए लोकमें धर्म ही उत्तम शरण है ॥३९॥ मनुष्यों और देवोंमें पाये जानेवाले समस्त अभ्युदय सम्बन्धी सुख और मोक्ष सम्बन्धी सुखका कारण धर्म ही माना गया है ॥४०॥ जो स्वर्गावतरणादिके समय पञ्चकल्याणक पूजाओंके पात्र थे ऐसे इक्कीसवें तीर्थंकर भगवान् नमिनाथने इस युगमें अपने समयवर्ती जीवोंके लिए जो धर्म कहा था वह इस प्रकार है ॥४१–४२॥ उन्होंने मुनियोंके लिए १ अहिंसा, २ सत्य भाषण,

१. घातिनां घातं करोतीति घातिघातकृत्। २. पुत्रदारानबलान्वितः म०। ३. शरीरिणाम् म०। ४. –वर्तिना म०। ५. अपरिग्रहः।

गुप्तिश्च त्रिविधा प्रोक्ता पञ्चधा समितिस्त्वियम् । सर्वसावद्ययोगस्य प्रत्याख्यानं मतं सतः ॥४४॥
पञ्चधाऽणुव्रतं प्रोक्तं त्रिविधं च गुणव्रतम् । शिक्षाव्रतं चतुर्भेदं धर्मोऽयं गृहिणां स्मृतः ॥४५॥
हिंसादेर्देशतो मुक्तिरणुव्रतमुदीरितम् । दिग्देशानर्थदण्डेभ्यो विरतिश्च गुणव्रतम् ॥४६॥
सामायिकं त्रिसन्ध्यं तु प्रोषधातिथिपूजनम् । आयुरन्ते च सल्लेखः शिक्षाव्रतमितीरितम् ॥४७॥
मांसमद्यमधुद्यूतक्षीरिवृक्षफलोज्झनम् । वेश्यावधूरतित्याग इत्यादिर्नियमो मतः ॥४८॥
इदमेवेति तत्त्वार्थश्रद्धानं ज्ञानदर्शनम् । शङ्काऽऽकाङ्क्षाजुगुप्सान्यमतशंसास्तवोज्झनम् ॥४९॥
तथोपगूहनं मार्गभ्रंशिनां स्थितियोजनम् । हेतवो दृष्टिसंशुद्धेर्वात्सल्यं च प्रभावना ॥५०॥
साक्षादभ्युदयोपायः पारम्पर्येण मुक्तये । गृहिधर्मोऽत्र मौन[1]स्तु साक्षान्मोक्षाय कल्पते ॥५१॥
स धर्मो मानुषे देहे प्राप्यते नान्यजन्मनि । मानुषस्तु भवो दुःखाल्लभ्यते भवसङ्कटे ॥५२॥
स्थावरत्रसकायेषु चतुर्गतिषु देहिनः । कर्मोदयवशात्क्लेशानश्नन्तः पर्यटन्त्यमी ॥५३॥
पृथिव्यप्तेजसां काये मरुतां च वनस्पतेः । स्पर्शनैकेन्द्रियो जीवो दीर्घकालमटाट्यते ॥५४॥
[2]सन्ति चानन्तभेदास्ते जीवाः कर्मकलङ्किताः । ये त्रसत्वमनापन्नाः कुनिगोदनिवासिनः ॥५५॥
कुयोन्यशीतिलक्षासु चतुरभ्यधिकास्वमी । अनेककुलकोटीषु बम्भ्रम्यन्ते तनूभृतः ॥५६॥

---

३ अचौर्य, ४ ब्रह्मचर्य और ५ अपरिग्रह ये पाँच महाव्रत, १ मनोगुप्ति, २ वचनगुप्ति और ३ कायगुप्ति ये तीन गुप्तियाँ, १ ईर्या, २ भाषा, ३ एषणा, ४ आदान निक्षेपण और ५ प्रतिष्ठापन ये पाँच समितियाँ और विद्यमान समस्त सावद्य योगका त्याग—यह धर्म बतलाया है ॥४३-४४॥ तथा गृहस्थोंके लिए पाँच अणुव्रत, तीन गुणव्रत और चार शिक्षाव्रत यह बारह प्रकारका धर्म कहा है ॥४५॥ हिंसादि पापोंका एक देश छोड़ना अणुव्रत कहा गया है, दिशा देश और अनर्थदण्डोंसे विरत होनेको गुणव्रत कहते हैं और तीनों संध्याओंमें सामायिक करना, प्रोषधोपवास करना, अतिथिपूजन करना और आयुके अन्तमें सल्लेखना धारण करना इसे शिक्षाव्रत कहते हैं ॥४६-४७॥ मद्य-त्याग, मांस-त्याग, मधु-त्याग, द्यूत-त्याग, क्षीरिफल-त्याग, वेश्या-त्याग तथा अन्यवधू-त्याग आदि नियम कहलाते हैं ॥४८॥ 'तत्त्व यही है' इस प्रकार ज्ञान और श्रद्धान होना सो सम्यग्ज्ञान और सम्यग्दर्शन है । शङ्का, आकांक्षा, जुगुप्सा तथा अन्य मतकी प्रशंसा और स्तुतिका छोड़ना, उपगूहन, मार्गसे भ्रष्ट होनेवालोंका स्थितीकरण करना, वात्सल्य और प्रभावना ये सब सम्यग्दर्शनको शुद्ध करनेके हेतु हैं ॥४९-५०॥ गृहस्थ धर्म साक्षात् तो स्वर्गादिक अभ्युदयका कारण है और परम्परासे मोक्षका कारण है परन्तु मुनि धर्म मोक्षका साक्षात् कारण है ॥५१॥ वह मुनिधर्म मनुष्य शरीरमें ही प्राप्त होता है अन्य जन्ममें नहीं और मनुष्य-जन्म संकटपूर्ण संसारमें बड़े दुःखसे प्राप्त होता है ॥५२॥ ये प्राणी कर्मोदयके वशीभूत हो स्थावर तथा त्रसकायोंमें अथवा नरकादि चतुर्गतियोंमें क्लेश भोगते हुए भ्रमण करते रहते हैं ॥५३॥ मात्र स्पर्शन इन्द्रियको धारण करनेवाला एकेन्द्रिय जीव पृथिवी, जल, अग्नि, वायु और वनस्पतिके शरीरमें दीर्घकाल तक भ्रमण करता रहा है ॥५४॥ कर्मकलंकसे कलंकित ऐसे अनन्त जीव हैं जिन्होंने आज तक त्रसपर्याय नहीं प्राप्त की और आगे भी उसी निगोद पर्यायमें निवास करते रहेंगे ॥५५॥ ये प्राणी चौरासी लाख कुयोनियों तथा अनेक कुलकोटियोंमें निरन्तर भ्रमण करते रहते हैं ॥५६॥

---

१. मुनेरयं मौनः मुनिसम्बन्धी ।

२. अत्थि अणन्ता जीवा जेहिं ण पत्तो तसाण परिणामो ।
भावकलंक सुपउरा णिगोदवासं ण मुंचंति ॥ गो० जी० का० ।

[1]प्रत्येकं सप्तलक्षाः स्युर्नित्येतरनिगोदयोः । पृथिवीवायुतेजोऽम्भःकायेष्वपि तथैव ताः ॥५७॥
[2]ता वनस्पतिकायेषु दश षट् विकलेन्द्रिये । [3]द्विःसप्त नृषु चतस्रस्तास्तिर्यङ्नारकनाकिनाम् ॥५८॥
द्वाविंशतिपृथिव्यङ्गा लक्षाः सप्ताम्बुवायुजाः । तेजस्कायिकजीवानां त्रिलक्षाः कुलकोटयः ॥५९॥
वनस्पतिजलक्षास्ता अष्टाविंशतिरीरिताः । द्वित्रीन्द्रियेषु सप्ताष्टौ चतुरिन्द्रियजा नव ॥६०॥
अर्धत्रयोदश प्रोक्ता लक्षा जलचरेष्वपि । पक्षिषु द्वादशैव स्युश्चतुष्पात्सु दशाङ्गिषु ॥६१॥
नवोरःपरिसर्पेषु मनुजेषु चतुर्दश । नारकामरभेदेषु विंशतिः पञ्च षड् युताः ॥६२॥
कोटीकोटी च लक्षाश्च नवतिर्नवभिः सह । पञ्चाशच्च सहस्राणि कुलकोट्यः समासतः ॥६३॥
द्वाविंशतिसहस्राणि वत्सराणि खरक्षितेः । आयुर्मृदुपृथिव्यास्तु द्वादश प्राणधारिणाम् ॥६४॥
सप्ताप्कायिकजीवानां त्रीणि वायुमयाङ्गिनाम् । अहोरात्रास्त्रयस्तेजोमयानां समये मताः ॥६५॥
दशवर्षसहस्राणि वनस्पतिमयाङ्गिनाम् । द्वादश द्वीन्द्रियाणां च वर्षाण्यायुरुदीरितम् ॥६६॥
दिनान्येकोनपञ्चाशत्त्रीन्द्रियाणां प्रकीर्तितम् । चतुरिन्द्रियजीवानां षण्मासाः परमायुषः ॥६७॥
द्वासप्ततिसहस्राणि वर्षाण्यपि च पक्षिणाम् । द्विचत्वारिंशदब्दानां सहस्राण्यहिदेहिनाम् ॥६८॥
नव पूर्वाङ्गमानं स्यादुरसां परिसर्पिणाम् । पूर्वकोटी मनुष्याणां मत्स्यानां चापि जीवितम् ॥६९॥

वे कुयोनियाँ नित्यनिगोद, इतरनिगोद, पृथिवीकायिक, जलकायिक, अग्निकायिक और वायुकायिक जीवोंमें प्रत्येकको सात-सात लाख होती हैं ॥५७॥ वनस्पतिकायिकोंकी दश लाख, विकलेन्द्रियोंकी छह लाख, मनुष्योंकी चौदह लाख, तिर्यञ्च, नारकी और देवोंकी प्रत्येकको चार-चार लाख होती हैं ॥५८॥ पृथिवीकायिक जीवोंकी बाईस लाख, जलकायिक और वायुकायिककी प्रत्येककी सात-सात लाख, अग्निकायिककी तीन लाख, वनस्पतिकायिककी अट्ठाईस लाख, दो इन्द्रियोंकी सात लाख, तीन इन्द्रियोंकी आठ लाख, चौइन्द्रियोंकी नौ लाख, जलचरोंकी साढ़े बारह लाख, पक्षियोंकी बारह लाख, चौपायोंकी दश लाख, छातीसे सरकनेवालोंकी नौ लाख, मनुष्योंकी चौदह लाख, नारकियोंकी पच्चीस लाख और देवोंकी छब्बीस लाख कुल कोटियाँ हैं। संक्षेपसे ये सब कुल कोटियाँ साढ़े निन्यानबे लाख हैं ॥५९-६३॥ खर पृथिवीकी बाईस हजार वर्ष, कोमल पृथिवीकी बारह हजार वर्ष, जलकायिक जीवोंकी सात हजार वर्ष, वायुकायिक जीवोंकी तीन हजार वर्ष, तेजस्कायिक जीवोंकी तीन दिन रात, वनस्पतिकायिक जीवोंकी दश हजार वर्ष, दो इन्द्रिय जीवोंकी बारह वर्ष, तीन इन्द्रिय जीवोंकी उनचास वर्ष, चार

---

१. णिच्चिदरधादु सत्तय तरु दस वियलिंदियेसु छच्चेव ।
सुरणिरय तिरिय चउरो चोद्दसमणुए सदसहस्सा ॥ गो० जी० ।

२. बावीस सत्ततिण्णि य सत्त य कुलकोटि सयसहस्साइं ।
णेया पुढवि दगागणि वाउक्कायाण परिसंखा ॥११३॥
कोडिसयसहस्साइं सत्तट्ठ णव य अट्ठवीसाइं ।
वेइंदिय तेइंदिय चउरिंदिय हरिदकायाणं ॥११४॥
अद्धत्तेरस बारस दसयं कुलकोडि सदसहस्साइं ।
जलचर पक्खि चउप्पय उरपरिसप्पेसु णव होंति ॥११४॥
छप्पंचाधिय वीसं बारस कुलकोडि सदसहस्साइं ।
सुरणेरइयणराणं जहाकमं होंति णेयाणि ॥११५॥
एया य कोडिकोडी सत्ताणउदीय सद सहस्साइं ।
पण्णं कोडि सहस्सा सव्वंगीणं कुलाणं य ॥११६॥ गो० जी० ।

३. द्विसप्तद्विश्चतस्रस्तास्—म० ।

[1]भौमा मसूरसंस्थाना जीवा [2]आप्यास्तृणाम्बुवत् । [3]तैजसाः सूचिसंस्थानाः पताकावच्च [4]वायुजाः ॥७०॥
बहुसंस्थानभाजस्तु वनस्पतिभवाङ्गिनः । विज्ञेया हुण्डसंस्थाना विकलेन्द्रियनारकाः ॥७१॥
षट्संस्थानभृतो मर्त्यास्तिर्यञ्चः कथितास्तथा । समेन चतुरस्रेण संस्थानेन युताः सुराः ॥७२॥
[5]देहः सूक्ष्मनिगोदस्य भागोऽसंख्येय अङ्गुलः । अपर्याप्तस्य जातस्य तृतीयसमयेऽल्पशः ॥७३॥
स एवैकेन्द्रियादीनां देहः स्यादल्पमानतः । पञ्चेन्द्रियावसानानां सूक्ष्मोदारप्रभेदिनाम् ॥७४॥
[6]सहस्रयोजनं पद्मं सगव्यूतं प्रमाणतः । समस्तैकेन्द्रियोत्कृष्टदेहमानमिदं मतम् ॥७५॥
उत्कर्षाद् द्वीन्द्रियेषु स्यात् शङ्खो द्वादशयोजनः । त्रीन्द्रियोऽपि त्रिगव्यूतो भ्रमरो योजनाङ्ककः ॥७६॥
सहस्रयोजनो मत्स्यः सपर्याप्तः स्वयम्भुवः । सिक्थप्रमाणकोऽल्पवपुः प्राणी जलचरः स्मृतः ॥७७॥
संमूर्च्छनजसत्त्वानां खजलस्थलचारिणाम् । तिरश्चां तु वितस्तिः स्यादपर्याप्तशरीरिणाम् ॥७८॥
अपर्याप्ताः पुनः सत्त्वा ये जलस्थलगर्भजाः । संमूर्च्छनोत्थपर्याप्ताः खगा [7]जलचरास्तथा ॥७९॥
धनुःपृथक्त्वमुत्कर्षात् खगाश्चापि च गर्भजाः । पर्याप्ताश्चाप्यपर्याप्ता देहमानं वहन्ति ते ॥८०॥
जलगर्भजपर्याप्ताः स्युः पञ्चशतयोजनाः । त्रिपल्यायुर्नृतिर्यञ्चस्त्रिगव्यूताः प्रमाणतः ॥८१॥

इन्द्रिय जीवोंकी छह माह, पक्षियोंकी बहत्तर हजार वर्ष, साँपोंकी ब्यालीस हजार वर्ष, छातीसे सरकनेवालोंकी नौ पूर्वाङ्ग, मनुष्यों और मत्स्योंकी एक करोड़ वर्ष पूर्वकी उत्कृष्ट आयु है ॥६४–६९॥ पृथिवीकायिक जीव मसूरके आकार हैं, जलकायिक तृणके अग्रभागपर रखी बूँदके समान हैं, तैजस्कायिक जीव खड़ी सूइयोंके सदृश हैं, वायुकायिक जीव पताकाके समान हैं, वनस्पतिकायिक जीव अनेक आकारके धारक हैं। विकलेन्द्रिय तथा नारकी जीव हुण्डक संस्थानसे युक्त हैं ॥७०–७१॥ मनुष्य और तिर्यञ्च छहों संस्थानोंके धारक कहे गये हैं और देव केवल समचतुरस्र संस्थानसे युक्त बतलाये गये हैं ॥७२॥ सूक्ष्म निगोदिया लब्ध्यपर्याप्तक जीवका शरीर अङ्गुलके असंख्यातवें भाग है और वह उत्पन्न होनेके तीसरे समयमें जघन्य अवगाहना रूप होता है ॥७३॥ सूक्ष्म और स्थूल भेदोंको धारण करनेवाले एकेन्द्रियसे लेकर पञ्चेन्द्रिय जीवों तकका शरीर यदि छोटेसे छोटा होगा तो अङ्गुलके असंख्यातवें भाग प्रमाण ही होगा इससे छोटा नहीं ॥७४॥ कमल प्रमाणकी अपेक्षा एक हजार योजन तथा एक कोश विस्तारवाला है। समस्त एकेन्द्रिय जीवोंमें देहका उत्कृष्ट प्रमाण यही माना गया है ॥७५॥ दोइन्द्रिय जीवोंमें सबसे बड़ी अवगाहना शङ्खकी है और वह बारह योजन प्रमाण है। तीन इन्द्रियोंमें सबसे बड़ा कानखजूरा है और वह तीन कोश प्रमाण है। चौइन्द्रियोंमें सबसे बड़ा भ्रमर है और वह एक योजन—चार कोश प्रमाण है तथा पञ्चेन्द्रियोंमें सबसे बड़ा स्वयंभूरमण समुद्रका राघव मच्छ है और वह एक हजार योजन प्रमाण है। पञ्चेन्द्रियोंमें सूक्ष्म अवगाहना सिक्थक मच्छकी है ॥७६–७७॥ सम्मूर्च्छनजन्मसे उत्पन्न अपर्याप्तक जलचर, थलचर और नभचर तिर्यञ्चोंकी जघन्य अवगाहना एक वितस्ति प्रमाण है ॥७८॥ गर्भजोंमें अपर्याप्तक जलचर, स्थलचर, सम्मूर्च्छनोंमें पर्याप्तक जलचर, नभश्चर तथा गर्भजोंमें पर्याप्तक, अपर्याप्तक दोनों प्रकारके नभश्चर, तिर्यञ्च, उत्कृष्ट रूपसे पृथक्त्व धनुष प्रमाण शरीरकी अवगाहना धारण करते हैं ॥७९–८०॥ गर्भजन्मसे उत्पन्न पर्याप्तक जलचर जीव पाँच

---

१. पृथिवीकायिकाः । २. जलकायिकाः । ३. अग्निकायिकाः । ४. वायुकायिकाः । मसुरंबु बिन्दु सूई कलावधयसण्णिहो हवे देहो । पुढवी आदि चउण्हं तरु तस काया अणेयविहा ॥१९८॥ गो० जी० । ५. सुहुमणिगोद अपजत्तयस्स जादस्स तदिय समयम्हि । अंगुल असंखभागं जहण्णमुक्कस्सयं मच्छे ॥९४॥ गो० जी० । ६. साहिय सहस्समेक्कं वारं कोसूणमेकमेक्कं च । जोयणसहस्स दीहं पम्मे वियले महामच्छे ॥९५॥ बिति च य पुण्ण जहण्णं अणुंधरी कुंथुकाणमच्छीसु । सिच्छयमच्छे विंदंगुलसंखे संखगुणिदकमा ॥९६॥ गो० जी० । ७. जलचरा -म० ।

पञ्चचापशतोत्सेधा उत्कर्षान्नारकाः सुराः । पञ्चविंशतिचापाः स्युरायुस्तेषां पुरा यथा[1] ॥८२॥
[2]पर्याप्तयः षडाहारशरीरेन्द्रियगोचराः । आनप्राणमनोभाषाभेदैस्ताः परिभाषिताः ॥८३॥
स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं तथैव तत् । इन्द्रियपञ्चकं प्रोक्तं स्थावरत्रसगोचरम् ॥८४॥
[3]लब्धिश्चैवोपयोगश्च भावेन्द्रियमिहोदितम् । द्रव्येन्द्रियं तु [4]निर्वृत्तिः सहोपकरणैर्मतम् ॥८५॥
[5]स्पर्शनं नैकसंस्थानं रसनं तु क्षुरप्रवत् । घ्राणं चानुकरोत्येवमतिमुक्तकचन्द्रिकाम् ॥८६॥
चक्षुर्मसूरमन्वेति श्रोत्रं तु यवनालिकाम् । स्वाकारेणेति संस्थानं तद्द्रव्येन्द्रियगोचरम् ॥८७॥
[6]धनुःशतानि चत्वारि स्पर्शनेन्द्रियगोचरः । एकेन्द्रियस्य चोत्कृष्टस्ततो यावदसंज्ञिनाम् ॥८८॥
अष्टौ षोडश संख्यातो द्वात्रिंशद्द्विगुणान्यपि । चतुःषष्टिःशतं दण्डा घ्राणान्ते द्विरसंज्ञिनः ॥८९॥
चतुःपञ्चाशता सार्धमेकान्नत्रिंशदीक्षते । शतानि योजनानां तु चक्षुषा चतुरिन्द्रियः ॥९०॥
योजनानां शतान्येकन्यूनं षष्टिः सहाष्टभिः । असंज्ञिचक्षुर्विषयो योजनं श्रोत्रगोचरः ॥९१॥
स्पर्शं रसं च गन्धं च नवयोजनमात्रगम् । संज्ञी यथास्वमादत्ते शब्दं द्वादशयोजनम् ॥९२॥

सौ योजन विस्तारवाले हैं। जिन मनुष्य और तिर्यञ्चोंकी आयु तीन पल्यकी है उनकी अवगाहना तीन कोश प्रमाण है ॥८१॥ नारकी उत्कृष्टतासे पाँच सौ धनुष ऊँचे हैं, और देव पचीस धनुष प्रमाण हैं। इनकी आयु पहलेके समान है ॥८२॥

आहार, शरीर, इन्द्रिय, श्वासोच्छ्वास, भाषा और मनके भेदसे पर्याप्तियाँ छह कही गई हैं ॥८३॥ स्पर्शन, रसना, घ्राण, चक्षु और श्रोत्र ये पाँच इन्द्रियाँ कही गई हैं। इनमें स्थावर जीवोंके केवल स्पर्शन इन्द्रिय और त्रसजीवोंके यथाक्रमसे सभी इन्द्रियाँ पाई जाती हैं ॥८४॥ भावेन्द्रिय और द्रव्येन्द्रियके भेदसे इन्द्रियाँ दो प्रकारकी हैं। इनमें भावेन्द्रियाँ लब्धि और उपयोग रूप हैं तथा द्रव्येन्द्रियाँ निर्वृत्ति और उपकरण रूप मानी गई हैं ॥८५॥ स्पर्शन इन्द्रिय अनेक आकारवाली है, रसना खुरपीके समान है, घ्राण अतिमुक्तक—तिल पुष्पका अनुकरण करती है, चक्षु मसूरका अनुसरण करती है और कर्ण इन्द्रिय यवकी नलीके समान है। इस प्रकार द्रव्येन्द्रियोंका आकार कहा ॥८६–८७॥ एकेन्द्रिय जीवकी स्पर्शन इन्द्रियका उत्कृष्ट विषय चार सौ धनुष है। उसके आगे असैनी पञ्चेन्द्रिय तक दूना-दूना होता जाता है ॥८८॥ इस प्रकार द्वीन्द्रियके स्पर्शनका विषय आठ सौ धनुष, त्रीन्द्रियके सोलह सौ धनुष, चतुरिन्द्रियके बत्तीस सौ धनुष और असैनी पञ्चेन्द्रियके चौंसठ सौ धनुष है। रसना इन्द्रियका विषय द्वीन्द्रिय जीवके चौंसठ धनुष, त्रीन्द्रियके एक सौ अट्ठाईस धनुष, चतुरिन्द्रियके दो सौ छप्पन धनुष, और असैनी पञ्चेन्द्रियके पाँच सौ धनुष है। घ्राण इन्द्रियका विषय त्रीन्द्रिय जीवके सौ धनुष, चतुरिन्द्रियके दो सौ धनुष और असैनी पञ्चेन्द्रियके चार सौ धनुष प्रमाण है ॥८९॥ चतुरिन्द्रिय जीव अपनी चक्षुरिन्द्रियके द्वारा उनतीस सौ चौवन योजन तक देखता है ॥९०॥ और असैनी पञ्चेन्द्रियके चक्षुका विषय उनसठ सौ साठ योजन है। एवं असैनी पञ्चेन्द्रियके श्रोत्रका विषय एक योजन है ॥९१॥ सैनी पञ्चेन्द्रिय जीव नौ योजन दूर स्थित स्पर्श, रस और गन्धको यथायोग्य ग्रहण कर सकता है

---

१. ययौ म०। २. आहारसरीरिंदियपज्जत्तीआणपाणभासमणो। चत्तारि पंच छप्पिय एइंदिय वियलसण्णीणं ॥११८॥ गो० जी०। ३. लब्ध्युपयोगौ भावेन्द्रियम् त० सू०। ४. निर्वृत्तिं म०। निर्वृत्त्युपकरणे द्रव्येन्द्रियम् त० सू०।

५. चक्खू सोदं घाणं जिब्भायारं मसूर जवणाली।
अतिमुत्तखुरप्पसमं फासं तु अणेयसंठाणं ॥
६. धणुवीसड दसय कदी जोयण छादाल हीणतिसहस्सा।
अट्ठसहस्स धणूणं विसया दुगुणा असण्णित्ति ॥१६७॥

सहस्रैः सप्तभिः सत्रा चत्वारिंशत्सहस्रकैः । त्रिषष्टया च द्विशत्या च योजनैश्चक्षुरीक्षते ॥९३॥
इत्यनेकविकल्पेऽस्मिन् संसारे सारवर्जिते । मोक्षसाधनतः सारं मानुष्यं दुर्लभं च तत् ॥९४॥
दुष्कर्मोपशमाल्लब्ध्वा तन्मानुष्यं कथञ्चन । यत्नो भवविरक्तेन विधेयो मुक्तये धिया ॥९५॥
अथात्रावसरेऽपृच्छन्नत्वा केवलिनं भवान् । पूर्वानन्धकवृष्णिः स्वानित्युवाच च सर्ववित् ॥९६॥
साकेते रत्नवीर्यस्य राज्ञो राज्ये जिताहिते । तीर्थे वृषभनाथस्य वर्तमाने महोदये ॥९७॥
श्रेष्ठी सुरेन्द्रदत्तोऽभूद्द्वात्रिंशत्कोटिभिर्धनी । तस्य जैनस्य मित्रं च रुद्रदत्तोऽभवद्द्विजः ॥९८॥
तिथिपर्वचतुर्मासी जिनपूजार्थमस्य सः । दत्वार्थं द्वादशाब्दान्तं [2]वणिग्यातो वणिज्यया ॥९९॥
स द्यूतवेश्याव्यसनी विनाश्य द्रविणं द्विजः । चौर्यगृहीतमुक्तोऽगादुल्कामुखवनं खलः ॥१००॥
स हि मुष्णन् सह व्याधैर्लोकं व्याधिनिभो हतः । सेनान्या श्रेणिकेनागान्नरकं रौरवं ततः ॥१०१॥
[3]देवस्वस्य विनाशेन त्रयस्त्रिंशदुदन्वताम् । समं कालं महादुःखं प्राप्योद्वृत्याभ्रमद् भवे ॥१०२॥
पापस्योपशमात् पश्चादुदभूद् गजपुरे पुरे । कापिष्ठलायनाभिख्यादनुमत्यामिह द्विजः ॥१०३॥

और बारह योजन दूर तकके शब्दको सुन सकता है ॥९२॥ सैनी पञ्चेन्द्रिय जीव अपने चक्षुके द्वारा सैंतालीस हजार दो सौ त्रेशठ योजनकी दूरीपर स्थित पदार्थको देख सकता है ॥९३॥ इस प्रकार यह असार संसार अनेक विकल्पोंसे भरा हुआ है । इसमें मोक्षका साधक होनेसे मनुष्य पर्याय ही सार है परन्तु वह अत्यन्त दुर्लभ है ॥९४॥ दुष्कर्मोंका उपशम होनेसे यदि किसी तरह मनुष्य पर्याय प्राप्त हुई है तो बुद्धिमान् मनुष्यको संसारसे विरक्त होकर मुक्ति प्राप्तिके लिए प्रयत्न करना चाहिए ॥९५॥

अथानन्तर इसी बीचमें केवली भगवान्को नमस्कार कर अन्धकवृष्णिने अपने पूर्वभव पूछे और सर्वज्ञ सुप्रतिष्ठ केवली उसके पूर्वभवोंका वर्णन इस प्रकार करने लगे ॥९६॥ जब भगवान् वृषभदेवका महाप्रभावशाली तीर्थ चल रहा था तब अयोध्या नगरीमें राजा रत्नवीर्य राज्य करता था । उसके निष्कण्टक राज्यमें एक सुरेन्द्रदत्त नामका सेठ रहता था जो बत्तीस करोड़ दीनारोंका धनी था, जैनधर्मका परम श्रद्धालु था और रुद्रदत्त ब्राह्मण उसका मित्र था ॥९७–९८॥ कदाचित् सुरेन्द्रदत्त सेठ, बारह वर्ष तक अष्टमी, चतुर्दशी, आष्टाह्निक पर्व तथा चौमासोंमें जिनपूजाके लिए उपयुक्त धन, रुद्रदत्तको देकर व्यापारके लिए बाहर चला गया ॥९९॥ ब्राह्मण रुद्रदत्त बड़ा दुष्ट था उसने जुआ तथा वेश्या व्यसनमें पड़कर वह धन शीघ्र ही नष्ट कर दिया । जब धन नष्ट हो गया तब चोरी करने लगा । चोरीके अपराधमें पकड़ा गया और जब छूटा तब उल्कामुख नामक वनमें जाकर रहने लगा ॥१००॥ वहाँ वह भीलोंके साथ मिलकर लोगोंको लूटने लगा और अपने दुष्कर्मसे लोगोंके लिए व्याधि स्वरूप हो गया । अन्तमें श्रेणिक नामक सेनापतिके हाथसे मरकर रौरव नामक सातवें नरक गया ॥१०१॥ देवद्रव्यके हड़पनेसे वह तैंतीस सागर तक नरकके भयंकर दुःख भोगकर वहाँसे निकला और संसारमें भ्रमण करता रहा ॥१०२॥ कदाचित् पाप कर्मका उपशम होनेसे वह हस्तिनागपुरमें कापिष्ठलायन नामक ब्राह्मणकी अनुमति नामक स्त्रीसे गौतम नामका ब्राह्मण-पुत्र हुआ । वह महादरिद्र था, उत्पन्न होते ही उसके माता-पिता मर गये थे तथा भीख माँगता हुआ वह इधर-उधर घूमता-फिरता था । एक बार

१. सण्णिस्स बार सोदे तिण्हं णव जोयणाणि चक्खुस्स ।
सत्तेताल सहस्सा वेसद तेसट्ठिमदिरेया ॥१६७॥
तिण्णिसय सट्ठि विरहिद लक्खं दसमूल ताडिदे मूलं ।
णवगुणिदे सट्ठिहिदे चक्खुप्फासस्स अद्धाणं ॥१६८॥ गो० जी० ।
२. वणिज्यातो म० । ३. देवद्रव्यस्य ।

निःश्रीगौतमनामाऽसौ क्षतमातृपितृक्षयः । साधुं भुञ्जानमद्राक्षीद् भिक्षार्थी पर्यटन् बटुः ॥१०४॥
समुद्रदत्तनामानमनुगम्य तमाश्रमे । जगादात्मसमं यूयं कुरुध्वं मां बुभुक्षितम् ॥१०५॥
भव्यसत्त्वमसौ बुद्ध्वा दीक्षां तस्मै ददौ गुरुः । पापं वर्षसहस्रेण विघ्नकृत् सोऽप्यशीशमत् ॥१०६॥
स श्रीगौतमसंज्ञाकः प्राप्तोऽक्षीणमहानसम् । पदानुसारिणीं लब्धिं बीजबुद्धिरसर्द्धिमान्[1] ॥१०७॥
आराध्याराधनां सम्यक् सुविशालमगाद् गुरुः । शिष्यो वर्षसहस्राणि पञ्चाशत् स तपोऽतपत् ॥१०८॥
उदियाय स तत्रैव सुविशाले[2] विशालधीः । स्थितिं सन्मानयन्नाभ्यामष्टाविंशतिसागरैः ॥१०९॥
अहमिन्द्रसुखं भुक्त्वा सोऽवतीर्य ततो नृपः । सञ्जातोऽन्धकवृष्णिस्त्वमहं तु भवतो गुरुः ॥११०॥
अप्राक्षीत् पूर्वजन्मानि दुःखितः क्षितिपः पुनः । स्वपुत्राणां दशानां च केवली च जगाविति ॥१११॥
सद्भद्रिलपुरे राजा नाम्नो मेघरथोऽभवत् । भार्या तस्य सुभद्राख्या तयोर्दृढरथः सुतः ॥११२॥
इभ्यो[3] राजसमस्तस्य भार्या नन्दयशाः सुते । सुदर्शना च सुज्येष्ठा धनदत्तस्य सूनवः ॥११३॥
धनश्च जिनदेवौ च पालान्तास्ते त्रयो मताः । अर्हद्दासः प्रसिद्धश्च जिनदासस्तथा परः ॥११४॥
अर्हद्दत्त इति ख्यातो जिनदत्तः परः स्मृतः । प्रियमित्रः प्रतीतोऽन्यस्तथा धर्मरुचिर्ध्वनिः ॥११५॥
सुमन्दरगुरोः पार्श्वे प्रवव्राज नरेश्वरः । धनदत्तोऽपि पुत्रैस्तैर्नवभिः सह दीक्षितः ॥११६॥
सुदर्शनार्यिकापार्श्वे सुभद्रा च सुदर्शना । सुज्येष्ठा[4] च तपो ज्येष्ठं सहैव प्रतिपेदिरे ॥११७॥
धनदत्तो गुरुश्चैव वाराणस्यां नृपस्तथा । केवलज्ञानमुत्पाद्य विहृत्य[5] वसुधां क्रमात् ॥११८॥

उसने समुद्रदत्त नामक मुनिराजको आहार करते देखा। आहारके बाद वह उनके पीछे लग गया तथा आश्रममें पहुँचनेपर उनसे बोला कि मैं भूखा मरता हूँ आप मुझे अपने समान बना लीजिए ॥१०३-१०५॥ मुनिराजने उसे भव्य प्राणी जानकर दीक्षा दे दी और उसने भी दीक्षा लेकर एक हजार वर्षको कठिन तपस्यासे विघ्नकारक पापोंका उपशम कर दिया ॥१०६॥ तपस्याके प्रभावसे उक्त गौतम मुनि, बीजबुद्धि तथा रसऋद्धिसे युक्त हो गये और अक्षीणमहानस एवं पदानुसारिणी ऋद्धि भी उन्होंने प्राप्त कर ली ॥१०७॥ गुरु समुद्रदत्त मुनि, अच्छी तरह आराधनाओंकी आराधना कर छठवें ग्रैवेयकके सुविशाल नामक विमानमें अहमिन्द्र हुए और शिष्य गौतम मुनिने पचास हजार वर्ष तप किया ॥१०८॥ अन्तमें विशाल बुद्धिके धारक गौतम मुनि भी अट्ठाईस सागरकी सम्भावनीय आयु प्राप्तकर उसी सुविशाल विमानमें उत्पन्न हुए ॥१०९॥ अहमिन्द्रके सुख भोगनेके बाद वहाँसे चलकर गौतमका जीव तो तू अन्धकवृष्णि हुआ है और तेरा गुरु मुनि समुद्रदत्तका जीव मैं सुप्रतिष्ठ हुआ हूँ ॥११०॥

तदनन्तर दुःखी होते हुए राजा अन्धकवृष्णिने अपने दशों पुत्रोंके पूर्व भव पूछे सो केवली भगवान् इस प्रकार कहने लगे ॥१११॥ उन्होंने कहा कि किसी समय सद्भद्रिलपुर नगरमें राजा मेघरथ रहता था, उसकी स्त्रीका नाम सुभद्रा था और उन दोनोंके दृढ़रथ नामका पुत्र था ॥११२॥ उसी नगरमें राजाकी तुलना करनेवाला धनदत्त नामका सेठ रहता था उसकी स्त्रीका नाम नन्दयशा था। नन्दयशासे उसके सुदर्शना और सुज्येष्ठा नामकी दो कन्याएँ तथा धनपाल, जिनपाल, देवपाल, अर्हद्दास, जिनदास, अर्हद्दत्त, जिनदत्त, प्रियमित्र और धर्मरुचि ये नौ पुत्र उत्पन्न हुए ॥११३-११५॥ कदाचित् राजा मेघरथने सुमन्दर गुरुके पास दीक्षा ले ली। यह देख सेठ धनदत्त भी अपने नौ ही पुत्रोंके साथ दीक्षित हो गया ॥११६॥ और सुदर्शना नामक आर्यिकाके पास सुभद्रा सेठानी तथा उसकी सुदर्शना और सुज्येष्ठा नामक दोनों पुत्रियोंने साथ ही-साथ दीक्षा धारण कर ली ॥११७॥ कदाचित् धनदत्त सेठ, सुमन्दर गुरु और मेघरथ

१. सुरर्द्धिमान् म० । २. षष्ठग्रैवेयके विशालनाम्नि विमाने । ३. श्रेष्ठी । ४. सुस्येष्ठा म० ।
५. विहृता म० ।

सप्तभिः पञ्चभिः पूज्या[1] वर्षैर्द्वादशभिश्च ते । अन्ते सिद्धशिलारूढाः सिद्धा राजगृहे पुरे ॥११९॥
अन्तर्वत्नी प्रसूता सा पूर्वं नन्दयशाः सुतम् । धनमित्रं यथा योग्यं सन्त्यज्य तपसि स्थिता ॥१२०॥
पुत्रान् सिद्धशिलारूढान् प्रायोपगमनस्थितान् । वन्दित्वा पुत्रमातृत्वमावृणोत् स्नेहमोहिता ॥१२१॥
स्नेहगह्वरमोहिन्यौ भगिन्यौ च तदैच्छताम् । सोदरत्वं भवेऽन्यत्र किं वा स्नेहस्य दुष्करम् ॥१२२॥
माता सुताः समाराध्य देवा भूत्वाऽच्युतेऽखिलाः । द्वाविंशतिसमुद्रान्तं कालं भुक्त्वा परं सुखम् ॥१२३॥
अवतीर्य ततो भूमिं देवीदुहितृदेहजाः । तथैवं भूप ! चित्रा हि परिणामवशाद् गतिः ॥१२४॥
बभाण भगवानन्ते वसुदेवभवान्तरम् । प्रणिधानपरोत्कर्णं[2] नरदेवसभान्तरे ॥१२५॥
कश्चिन्नवाब्धिदुःखोर्मिनिमग्नोन्मग्नताकुलः । प्राणी प्राप युगच्छिद्रं कीलवत् नृभवान्तरम् ॥१२६॥
मागधाभिधदेशोऽसौ शालिग्रामेऽग्रजन्मनोः । अभूद्दुर्विधयो[3]स्तोकं [4]स्तोकं नोपनयत् सुखम् ॥१२७॥
गर्भस्थेऽपि पिता तस्मिन्नर्भकेऽमृत मातृका । दुर्भगस्याष्टवर्षस्य [5][6]निर्भा मातृष्वसा शुचा ॥१२८॥

राजा—तीनों ही मुनि बनारस आये और वहाँ केवलज्ञान उत्पन्नकर पृथिवीपर विहार करने लगे ॥११८॥ पूजनीय धनदत्त, सुमन्दर गुरु और मेघरथ मुनि क्रमसे सात वर्ष, पाँच वर्ष और बारह वर्ष तक पृथिवीपर विहारकर अन्तमें राजगृह नगरसे सिद्धशिलापर आरूढ़ हुए—मोक्ष पधारे ॥११९॥ उस समय सेठ धनदत्तकी स्त्री नन्दयशा गर्भवती थी इसलिए दीक्षा नहीं ले सकी थी परन्तु जब उसके धनमित्र नामका पुत्र हो गया और वह योग्य बन गया तब वह भी उसे छोड़ तप करने लगी ॥१२०॥

एक दिन सेठ धनदत्तके पुत्र धनपाल आदि नौके-नौ मुनिराज प्रायोपगमन संन्यास लेकर सिद्धशिलापर विराजमान थे। मुनियोंकी माता आर्यिका नन्दयशाने उन्हें देख वन्दना की और स्नेहसे मोहित हो निदान किया कि मैं अग्रिम भवमें भी इनकी माता बनूँ ॥१२१॥ मुनियोंकी बहिन सुदर्शना और सुज्येष्ठा नामक आर्यिकाओंने भी स्नेहरूपी गर्तमें मोहित हो निदान किया कि ये अग्रिम भवमें भी हमारे भाई हों। सो ठीक ही है क्योंकि स्नेहके लिए क्या कठिन है ? ॥१२२॥ अन्तमें समाधि धारण कर माता पुत्र और पुत्रियाँ—सबके-सब अच्युत स्वर्गमें देव हुए। तदनन्तर बाईस सागर तक उत्कृष्ट सुख भोगकर वहाँसे चले और पृथिवीपर आकर हे राजन् ! तुम्हारी स्त्री, पुत्रियाँ तथा पुत्र हुए हैं सो ठीक ही है क्योंकि परिणामोंके अनुसार नाना प्रकारकी गति होती ही है ॥ भावार्थ—नन्दयशाका जीव तो तुम्हारी रानी सुभद्रा हुआ है, सुदर्शना और सुज्येष्ठाके जीव क्रमसे कुन्ती और माद्री हुए हैं तथा धनपाल आदिके जीव वसुदेवके सिवाय नौ पुत्र हुए हैं ॥१२३-१२४॥

तदनन्तर भगवान् सुप्रतिष्ठ केवली, ध्यानमें तत्पर एवं कान खड़े कर बैठे हुए मनुष्य और देवोंकी उस सभामें वसुदेवके भवान्तर कहने लगे—॥१२५॥ जिस प्रकार समुद्रकी लहरोंमें तैरती हुई कील जुएके छिद्रको बड़ी कठिनाईसे प्राप्त कर सकती है उसी प्रकार संसार सागरकी दुःखरूपी लहरोंमें डूबता और उबरता हुआ यह प्राणी मनुष्य भवको बड़ी कठिनाईसे प्राप्त कर पाता है ॥१२६॥ इसी पद्धतिसे वसुदेवका जीव मागध देशके शालिग्राम नामक नगरमें रहनेवाले अत्यन्त दरिद्र ब्राह्मण और ब्राह्मणीके यहाँ ऐसा पुत्र हुआ जिसे थोड़ा भी सुख प्राप्त नहीं था ॥१२७॥ जब वह गर्भमें था तब पिता मर गया। और उत्पन्न होते ही माता मर गई इसलिए मौसीने इसका पालन-पोषण किया परन्तु वह लगभग आठ वर्षका ही हो पाया था कि उसकी

१. पूज्या म०। २. परोत्कर्म म०। ३. दरिद्रयोः। ४. पुत्रः। तोकः क०। ५. इतः आरभ्य १३१ श्लोकपर्यन्ताः श्लोकाः 'ख' पुस्तके न सन्ति। 'क' पुस्तकेऽपि पश्चात् केनापि पादटिप्पण्यां योजिताः। ६. शोकेन मातृष्वसापि निर्भाः दीप्तिरहिता जाता मृतेत्यर्थः।

पुरे राजगृहे सोऽथ मातुलस्य गृहेऽवसत् । भर्तुः स्वस्त्रीय इत्येव पितृष्वस्रानुपालितः ॥१२९॥
मलग्रस्तशरीरोऽसावुग्रगन्धोऽजपोतवत् । विकीर्णशीर्णकेशाग्रः कुचेलः पिङ्गलेक्षणः ॥१३०॥
दुहितॄर्मातुलस्यासौ वाञ्छन् दमरकश्रुतेः । ताभिर्जुगुप्सुभिर्दुःखी स्वगृहाद्विनिघाटितः ॥१३१॥
दुर्भाग्याग्निशिखालीढः स्थाणुरेव [1]मलीमसः । मर्तुमिच्छन् पतङ्गाभो वैभारे साधुभिर्वृ[2]तः ॥१३२॥
निन्दित्वात्मानमाकर्ण्य धर्माधर्मफलं ततः । प्राव्राजीद् गुरुपादान्ते शान्तः संख्याख्ययोगिनः ॥१३३॥
चचार गुरुसन्देशादाशापाशविनाशनः । तपोऽन्यदुश्चरं चारुचारित्रज्ञानदर्शनः ॥१३४॥
ननन्द नन्दिषेणाख्यस्तपसोत्पन्नलब्धिभिः । एकादशाङ्गभृत्साधुः सोढाशेषपरीषहः ॥१३५॥
उपवासविधिर्यो यः शासनेऽन्यातिदुष्करः । तस्य धैर्यवतः साधोः स सर्वः सुकरोऽभवत्[3] ॥१३६॥
आचार्यग्लानशैक्ष्यादिदशभेदमुदीरितम् । वैयावृत्यतपश्चक्रे सविशेषमसावृषिः ॥१३७॥
महाऋद्धिमतस्तस्य वैयावृत्योपयोगि यत् । वस्तु तच्चिन्तितं हस्ते भेषजाद्याशु जायते ॥१३८॥
तपो वर्षसहस्राणि बहूनि तपतोऽस्य च । वैयावृत्यं तपः शक्रः शशंस सुरसंसदि ॥१३९॥
काले सम्प्रति साधूनां वैयावृत्यं करोति यः । नन्दिषेणः परो जातो जम्बूद्वीपस्य भारते ॥१४०॥
यद्येन चिन्तितं पथ्यमनुल्लाघसु[4]दृष्टिना । तत्तस्य क्षिप्रमक्षूणं स सम्पादयति क्षमी ॥१४१॥

मौसी भी शोकके कारण प्राणरहित हो गई ॥१२८॥ अब वह राजगृह नगरमें मामाके घर रहने लगा। वहाँ 'यह हमारे पतिका भानजा है' यह सोचकर बुआने उसका पालन-पोषण किया ॥१२९॥ इसका शरीर मलसे ग्रस्त था, शरीरसे छागके बच्चेके समान तीव्र गन्ध आती थी, केश रूखे तथा बिखरे हुए थे, वह मैले-कुचैले वस्त्र पहिने रहता था और उसकी आँखें स्वभावसे ही पीली थीं ॥१३०॥ इतनेपर भी वह अपने मामा दमरककी पुत्रियोंके साथ विवाह करना चाहता था। परन्तु विवाह करना तो दूर रहा घृणा करनेवाली उन पुत्रियोंने उसे घरसे निकाल दिया जिससे वह बहुत दुःखी हुआ ॥१३१॥ अन्तमें वह दुर्भाग्यरूपी अग्निकी शिखाओंसे झुलसकर ठूँठके समान मलिन हो गया और पतंगकी तरह कूदकर मरनेकी इच्छासे वैभार गिरिपर गया परन्तु मुनियोंने उसे रोक लिया ॥१३२॥ तदनन्तर धर्म-अधर्मका फल सुनकर उसने अपने-आपकी बहुत निन्दा की और शान्त हो संख्य नामक मुनिराजके चरण मूलमें दीक्षा धारण कर ली ॥१३३॥ गुरुके सम्यक् उपदेशसे आशारूपी पाशको नष्टकर वह सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्रका धारक हो गया और अन्य मनुष्योंके लिए दुश्चर तप तपने लगा ॥१३४॥ उसका नन्दिषेण नाम था, वह तपके प्रभावसे उत्पन्न ऋद्धियोंसे युक्त हो गया, ग्यारह अङ्गका धारी एवं समस्त परीषहोंको सहनेवाला उत्तम साधु हो गया ॥१३५॥ शास्त्रोंमें जो-जो उपवास दूसरोंके लिए अत्यन्त कठिन थे वे सब उस धैर्यशाली साधुके लिए सरल हो गये ॥१३६॥ आचार्य ग्लान शैक्ष्य आदिके भेदसे जिसके दश भेद बताये गये हैं उस वैयावृत्य तपको वह विशेष रूपसे करता था ॥१३७॥ वह मुनि बड़ी-बड़ी ऋद्धियोंसे युक्त था इसलिए वैयावृत्यमें उपयोग आनेवाली जिस औषधि आदिका वह विचार करता था वह शीघ्र ही उसके हाथमें आ जाती थी ॥१३८॥ इस प्रकार मुनि नन्दिषेणको तप करते हुए जब कई हजार वर्ष बीत गये तब एक दिन इन्द्रने देवोंकी सभामें उसके वैयावृत्य तपकी प्रशंसा की ॥१३९॥ इस समय जम्बू द्वीपके भरत क्षेत्रमें जो साधुओंकी वैयावृत्य करता है वह नन्दिषेण मुनि सबसे उत्कृष्ट है ॥१४०॥ क्योंकि रोगसे पीड़ित मुनि जिस पथ्यकी इच्छा करता है उसे क्षमाको धारण करनेवाला नन्दिषेण मुनि शीघ्र ही पूर्ण कर

१. मणीमयः म० । मलीमयः ग०, ङ० । २. वृतः म० । ३. अस्मादग्रे 'तपोलब्धिप्रभावेन वैयावृत्यं करोति सः' इति 'ख' पुस्तकेऽधिकः। ४. रोगयुक्तसुदृष्टिना 'उल्लाघो निर्गतो गदात्' इति कोषः। न उल्लाघोऽनुल्लाघः स चासौ सुदृष्टिश्च तेन ।

प्रासुकद्रव्ययोगेन वैयावृत्त्योद्यतस्य हि । संयतस्यापि नो बन्धो निर्जरैव तु जायते ॥१४२॥
[1]धर्मसाधनमाद्यं हि शरीरमिह देहिनाम् । तस्य धारणमाधेयं यथाशक्ति च शासने ॥१४३॥
सम्यग्दृष्टिरशेषोऽपि मन्दरुक्कामादिरादरात् । पर्युपासनया नित्यमुपचर्यः सुदृष्टिना ॥१४४॥
प्रतीकारसमर्थोऽपि यस्सुदृष्टिमुपेक्षते । व्याधिक्लिष्टमसौ नष्टः सम्यक्त्वस्यापबृंहकः[2] ॥१४५॥
यन्नोपयुज्यते यस्य धनं वा वपुरेव वा । स्वशासनजने तेन तस्य किं [3]बन्धहेतुना ॥१४६॥
तदेव हि धनं तस्य वपुर्वा सर्वथा मतम् । यद्यस्य शासनस्था[4]नां यथास्वमुपयुज्यते ॥१४७॥
शक्तस्योपेक्षमाणस्य सदृष्टिजनमापदि । का वा कठिनचित्तस्य जिनशासनभक्तता ॥१४८॥
सम्यक्त्वशुद्धिशुद्धे तु जैने भक्तिविलोपने । पुंसो मिथ्याविनीतस्य का वा दर्शनशुद्धिता ॥१४९॥
बोधिलाभनिमित्ताया दृष्टिशुद्धेर्विबाधने । पुनर्बोधिपरिप्राप्तिर्दुर्लभा भवसङ्कटे ॥१५०॥
बोधिलाभपरिप्राप्त्यभावे मुक्तिसाधनम् । कुतो वृत्तमभावेऽस्य कुतो मुक्तिस्तदर्थिनः ॥१५१॥
मुक्त्यभावे कुतः सौख्यमनन्तमनपायि च । सौख्याभावे कुतः स्वास्थ्यं स्वास्थ्याभावे कुतः कृती ॥१५२॥
अतः सर्वात्मना भाव्यं यथास्वं स्वहितैषिणा । वैयावृत्त्योद्यतेनाऽत्र यतिना गृहिणा तथा ॥१५३॥
शरीरं [5]दर्शनं ज्ञानं चारित्रं परमं तपः । वैयावृत्त्यकृता सर्वं स्थापितं हि परात्मनोः ॥१५४॥
शासनस्थितिविद् विद्वानुपकुर्वन् परं स्वयम् । निरपेक्षोपकारो यः परात्मकसुमोक्षभाग् ॥१५५॥

देता है ॥१४१॥ गृहस्थकी तो बात ही क्या प्रासुक द्रव्यके द्वारा वैयावृत्य करनेमें तत्पर रहने वाले मुनिको भी उससे बन्ध नहीं होता किन्तु निर्जरा ही होती है ॥१४२॥ इस संसारमें शरीर ही प्राणियोंका सबसे पहला धर्मका साधन है इसलिए यथाशक्ति उसकी रक्षा करनी चाहिए। यह आगमका विधान है ॥१४३॥ मन्द शक्ति अथवा बीमार आदि जितने भी सम्यग्दृष्टि हैं, सम्यग्दृष्टि मनुष्यको उन सबकी वैयावृत्य द्वारा निरन्तर सेवा करनी चाहिए ॥१४४॥ जो प्रतिकार करनेमें समर्थ होकर भी रोगसे दुःखी सम्यग्दृष्टिकी उपेक्षा करता है वह पापी है तथा सम्यग्दर्शनका घात करनेवाला है ॥१४५॥ जिसका धन अथवा शरीर सहधर्मी जनोंके उपयोगमें नहीं आता उसका वह धन अथवा शरीर किस कामका? वह तो केवल कर्मबन्धका ही कारण है ॥१४६॥ जिसका जो धन अथवा जो शरीर सहधर्मी जनोंके उपयोगमें आता है यथार्थमें वही धन अथवा वही शरीर उसका है ॥१४७॥ जो समर्थ होकर भी आपत्तिके समय सम्यग्दृष्टिकी उपेक्षा करता है उस कठोर हृदय वालेके जिनशासनकी क्या भक्ति है? कुछ भी नहीं है ॥१४८॥ जो सम्यग्दर्शनकी शुद्धतासे शुद्ध सहधर्मीकी भक्ति नहीं करता है वह झूठ-मूठका विनयी बना फिरता है उसके सम्यग्दर्शनकी शुद्धि क्या है! ॥१४९॥ यदि बोधिकी प्राप्तिमें निमित्तभूत दर्शनविशुद्धिमें बाधा पहुँचाई जाती है तो फिर इस संसारके संकटमें पुनः बोधिकी प्राप्ति दुर्लभ ही समझनी चाहिए ॥१५०॥ यदि बोधिकी प्राप्ति नहीं होती है तो मुक्तिका साधन भूत-चारित्र कैसे हो सकता है? और जब चारित्र नहीं है तब मुक्तिके अभिलाषी मनुष्यको मुक्ति कैसे मिल सकती है? ॥१५१॥ मुक्तिके अभावमें अनन्त एवं अविनाशी सुख कैसे प्राप्त हो सकता है? सुखके अभावमें स्वास्थ्य कैसे मिल सकता है? और स्वास्थ्यके अभावमें यह जीव कृत्यकृत्य कैसे हो सकता है? ॥१५२॥ इसलिए आत्महित चाहनेवाला चाहे मुनि हो चाहे गृहस्थ, उसे सब प्रकारसे अपनी शक्तिके अनुसार वैयावृत्य करनेमें उद्यत रहना चाहिए ॥१५३॥ जो मनुष्य वैयावृत्य करता है वह अपने तथा दूसरेके शरीर, दर्शन, ज्ञान, चारित्र एवं उत्तम तप आदि सभी गुणोंको स्थिर करता है ॥१५४॥ जिन-शासनकी रीतिको जाननेवाला जो विद्वान् परका उपकार

---

१. 'शरीरमाद्यं खलु धर्मसाधनम्' कुमारसम्भवे। २. हानिकारकः। ३. बन्धुहेतुना म०, क०। ४. शासनस्थानं म०। ५. दर्शनज्ञानं म०।

वैयावृत्यप्रवृत्तो यः शासनार्थातिभावितः । न स शक्यः सुरै रोद्धुं किं पुनः क्षुद्रजन्तुभिः ॥१५६॥
नन्दिषेणमुनिश्चैष तथाविध इति स्तुते[1] । सौधर्मेन्द्रेण देवास्तं प्रशशंसुः प्रणामिनः ॥१५७॥
मुनिधैर्यपरीक्षार्थं तत्रैको विबुधस्तदा । मुनिरूपधरः प्राह नन्दिषेणमिति श्रितः ॥१५८॥
वैयावृत्यमहानन्द नन्दिषेण मुने शृणु । व्याधिव्यथितदेहस्य देहि मे किञ्चिदौषधम् ॥१५९॥
इत्युक्तस्स तमाहैवमविकल्पानुकम्पया । ददामि वत्स ते साधो रुचिः कस्मिन्निहाशने ॥१६०॥
पूर्वदेशजशालीनामोदनः सुरभिः शुभः । पञ्चालदेशमुद्गानां सूपः स्वादुरसान्वितः ॥१६१॥
हैयङ्गवीनमुत्तप्तमपरान्तसुवां गवाम् । पयः कलिङ्गधेनूनां सुमृष्टं व्यञ्जनान्तरम् ॥१६२॥
लभ्येत यदि साधु स्यात् श्रद्धा ह्यत्र ममाधिका । इत्युक्तश्चानयामीति जगाम श्रद्धयान्वितः ॥१६३॥
विरुद्धदेशवस्तूनां प्रार्थनेऽप्यविषण्णधीः । गत्वा गोचरवेलायामानीय सहसा ददौ ॥१६४॥
उपभुक्तान्नपानोऽसौ शरीरान्तर्मलाविलः । [2]धौतस्तेन स्वहस्ताभ्यां निशि निर्विचिकित्सया ॥१६५॥
अभग्नोत्साहमालोक्य नन्दिषेणमनिन्दितम् । वैयावृत्यकृतं प्रोचे दिव्यरूपधरः सुरः ॥१६६॥
यथा देवसभेऽस्तौषीत् भगवन्तं मघवानृषे । वैयावृत्योद्यतो लोके तथैव भगवान् भवान् ॥१६७॥
अहो लब्धिरहो धैर्यमहो निर्विचिकित्सता । अहो शासनवात्सल्यमशल्यं तव [3]सन्मुनेः ॥१६८॥
अन्येषामपि यद्येषा मनीषा स्यान्मनीषिणाम् । कालत्रये तपस्यत्र तेषां शासनभक्तता ॥१६९॥

करता हुआ स्वयं प्रत्युपकारकी अपेक्षासे रहित होता है वह शीघ्र ही स्वपर आत्माका मोक्ष प्राप्त करता है ॥१५५॥ जो जिन शासनके अर्थकी उत्कट भावना करता हुआ वैयावृत्य करनेमें प्रवृत्त रहता है उसे देव भी रोकनेके लिए समर्थ नहीं हैं फिर क्षुद्र जीवोंकी तो बात ही क्या है ॥१५६॥ यह नन्दिषेण मुनि ऐसे ही उत्तम मुनि हैं इस प्रकार सौधर्मेन्द्र द्वारा स्तुति किये जानेपर सब देवोंने उनकी प्रशंसा की और परोक्ष नमस्कार किया ॥१५७॥ उन्हीं देवोंमें एक देव, मुनिके धैर्य-की परीक्षाके लिए मुनिका रूप रख नन्दिषेण मुनिराजके पास पहुँचा और इस प्रकार कहने लगा ॥१५८॥ हे वैयावृत्यमें महान् आनन्दवाले नन्दिषेण मुनि ! मेरा शरीर व्याधिसे पीड़ित हो रहा है इसलिए मुझे कुछ ओषधि दीजिए ॥१५९॥ उसके इस प्रकार कहनेपर नन्दिषेण मुनिने अपनी अखण्ड अनुकम्पासे कहा कि हे साधो ! मैं ओषधि देता हूँ परन्तु यह बताओ कि तुम्हारी किस भोजनमें रुचि है ? ॥१६०॥ मुनि रूपधारी देवने कहा—पूर्वदेशके धानका शुभ एवं सुगन्धित भात, पंचाल देशकी मूँगकी स्वादिष्ट दाल, पश्चिम देशकी गायोंका तपाया हुआ घी, कलिङ्ग देशकी गायोंका मधुर दूध और नानाप्रकारके व्यञ्जन यदि मिल जावें तो अच्छा हो क्योंकि मेरी श्रद्धा इन्हीं चीजोंमें अधिक है। इस प्रकार कहनेपर 'मैं अभी लाता हूँ' यह कहकर नन्दिषेण मुनि बड़ी श्रद्धाके साथ उक्त आहार लेनेके लिए चल दिये ॥१६१-१६३॥ विरुद्ध देशकी वस्तुओंकी चाह होनेपर भी उनके मनमें कुछ भी खेद उत्पन्न नहीं हुआ और गोचरी वेलामें जाकर तथा उक्त सब आहार लाकर उन्होंने शीघ्र ही उस कृत्रिम मुनिको दे दिया ॥१६४॥ कृत्रिम मुनिने उस आहार पानीको ग्रहण किया परन्तु रात्रिमें शरीरके अन्तर्गत मलसे उसका समस्त शरीर मलिन हो गया और नन्दिषेण मुनिने बिना किसी ग्लानिके उसे अपने हाथोंसे धोया ॥१६५॥ तदनन्तर जिनका उत्साह भग्न नहीं हुआ था, तथा जो बराबर वैयावृत्य कर रहे थे ऐसे प्रशंसनीय नन्दिषेण मुनि-को देखकर दिव्य रूपको धारण करनेवाले देवने कहा कि हे ऋषे ! देवोंकी सभामें इन्द्रने आपकी जिस प्रकार स्तुति की थी मैं देख रहा हूँ कि आप उसी तरह वैयावृत्य करनेमें उद्यत हैं ॥१६६-१६७॥ अहो ! आपकी ऋद्धि, आपका धैर्य, आपकी ग्लानि जीतनेकी क्षमता और संशय रहित आपका शासन वात्सल्य सभी आश्चर्यकारी हैं, आप उत्तम मुनिराज हैं ॥१६८॥ यदि तप करते समय

---

१. स्तुतेः म० । २. भौतस्तेन म० । ३. सन्मुने म० ।

इति स्तुत्वा मुनिं नत्वा सम्यक्त्वं प्रतिपद्य सः । स्वर्गी स्वर्गमगाम्मार्गं जैनेन्द्रमतिवर्तयन् ॥१७०॥
पञ्चत्रिंशत्सहस्राणि वर्षाण्यतिगमय्य सः । प्रायोपगमनं भेजे षण्मासावधि धीरधीः ॥१७१॥
संन्यस्तवपुराहारः स्वपरास्तप्रतिक्रियः । श्रीसौभाग्यनिदानेन स्वं बबन्ध सुमोहतः ॥१७२॥
निन्दितं नाकरिष्यच्चेन्निदानं स मुनिस्तदा । अबध्यत तदा शक्त्या तीर्थकृन्नाम तद्ध्रुवम् ॥१७३॥
स चाराध्य महाशुक्रे शक्रतुल्यस्ततोऽभवत् । तत्र तस्थौ सुखं कालं सार्द्धं षोडशसागरम् ॥१७४॥
स भुक्तसुरसौख्यस्ते ततः प्रच्युत्य पार्थिव । पार्थिवो वसुदेवोऽयं सुभद्रायामभूत्सुतः ॥१७५॥
इति श्रुत्वा भवान् पूर्वान् वृष्णिभार्यासुताः स्वकान् । धर्मसंवेगसम्पन्नाः सञ्जाता नृसुरास्तथा ॥१७६॥
सुप्रतिष्ठं प्रणम्येयुस्त्रिदशा नृपतिः पुनः । समुद्रविजयं राज्ये साभिषेकमतिष्ठपत् ॥१७७॥
समर्प्य वसुदेवं च समुद्रविजयाय सः । सुप्रतिष्ठस्य पादान्ते निष्क्रान्तस्तद्भवान्तकृत् ॥१७८॥
राज्ये भोजकवृष्णिश्च मथुरायां निधाय सः । उग्रसेनं समग्रेऽयं निर्ग्रन्थव्रतमग्रहीत् ॥१७९॥

पृथिवीछन्दः

समुद्रविजयः शिवां विहितपट्टबन्धां प्रियां
वधूनिवहमुख्यतामधिगमय्य राज्यस्थितिम् ।
स्थिरां स परिपालयन् सहजबन्धुभव्याम्बुजः
प्रतापमभिवर्धयन्नुदयनैर्जिनार्को यथा ॥१८०॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ समुद्रविजयराज्यलाभवर्णनो नामाष्टादशः सर्गः ॥१८॥

अन्य बुद्धिमान् मनुष्योंको भी इसी प्रकार त्रिकालमें वैयावृत्य करनेकी बुद्धि हो जावे तो उसे उनकी शासन भक्ति समझना चाहिए ॥१६९॥ इस प्रकार वह देव, मुनिराजकी स्तुति कर तथा सम्यग्दर्शन प्राप्त कर जिन-शासनकी प्रभावना करता हुआ स्वर्गको चला गया ॥१७०॥ अत्यन्त धीर बुद्धिको धारण करनेवाले नन्दिषेण मुनिने तपश्चरण द्वारा पैंतीस हजार वर्ष बिताकर अन्तिम समय छह माहका प्रायोपगमन संन्यास ले लिया ॥१७१॥ उन्होंने शरीर और आहारका त्याग कर दिया वे अपने शरीरकी वैयावृत्ति न स्वयं करते थे न दूसरेसे कराते थे किन्तु इतना होनेपर भी मोहकी तीव्रतासे उन्होंने 'मैं अग्रिम भवमें लक्ष्मीमान् तथा सौभाग्यवान् होऊँ' इस निदानसे अपनी आत्माको बद्ध कर लिया ॥१७२॥ यदि वे मुनि उस समय यह निन्दित निदान नहीं करते तो अपनी सामर्थ्यसे अवश्य ही तीर्थंकर प्रकृतिका बन्ध करते ॥१७३॥ तदनन्तर वह आराधनाओंकी आराधना कर महाशुक्र स्वर्गमें इन्द्र तुल्य देव हुआ और वहाँ साढ़े सोलह सागर तक सुखसे विद्यमान रहा ॥१७४॥ हे राजन् ! वही पुत्र देवोंके सुख भोगकर अन्तमें वहाँसे च्युत हो तेरी सुभद्रा रानीसे यह पृथिवीका अधिपति वसुदेव नामका पुत्र हुआ है ॥१७५॥ इस प्रकार अन्धकवृष्णि, उसकी सुभद्रारानी तथा समुद्रविजय आदि पुत्र सुप्रतिष्ठ केवलीसे अपने-अपने पूर्वभव सुनकर धर्म और संवेगको प्राप्त हुए। इनके सिवाय जो वहाँ मनुष्य तथा देव थे वे भी धर्म और संवेगको प्राप्त हुए ॥१७६॥ सुप्रतिष्ठ स्वामीको नमस्कार कर देवलोग अपने-अपने स्थानपर चले गये। तदनन्तर संसारका अन्त करनेवाले राजा अन्धकवृष्णिने समुद्रविजयका अभिषेक कर उसे राज्य-सिंहासनपर बैठाया और वसुदेवको समुद्रविजयके लिए सौंपकर सुप्रतिष्ठ केवलीके पादमूलमें दीक्षा धारण कर ली ॥१७७-१७८॥ उधर भोजकवृष्णिने भी मथुराके समग्र राज्यपर उग्रसेनको बैठाकर निर्ग्रन्थ व्रत धारण कर लिया—मुनि दीक्षा ले ली ॥१७९॥ राजा समुद्रविजयने अपनी प्रियरानी शिवादेवीको पट्ट बाँधकर समस्त स्त्रियोंमें मुख्यता प्राप्त करा दी। तदनन्तर जिस प्रकार जिनेन्द्ररूपी सूर्य, अष्ट प्रातिहार्य रूप अभ्युदयसे प्रभावको बढ़ाते हुए भव्य जीवरूपी कमलोंको प्रसन्न करते हैं उसी प्रकार राज्य मर्यादाकी रक्षा करनेवाले राजा समुद्रविजय भी अपनी अनुपम विभूतिसे प्रतापको बढ़ाते हुए अपने बन्धुरूपी कमलोंको प्रसन्न करने लगे ॥१८०॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें समुद्रविजयके लिए राज्य प्राप्तिका वर्णन करनेवाला अठारहवाँ सर्ग समाप्त हुआ ॥१८॥

एकोनविंशः सर्गः

अथाह गणनाथाद्यः[1] शृणु श्रेणिक वर्ण्यते । चेष्टितं वसुदेवस्य वसुधाविजयार्द्धजम् ॥१॥
समुद्रविजयो भूभृद्दृष्टानां नवयौवने । भ्रातॄणां राजपुत्रीभिः [2]सत्कल्याणमकारयत् ॥२॥
उवाह धृतिमक्षोभ्यस्ततः स्तिमितसागरः । स्वयंप्रभां प्रभाऽनूनां सुनीतां हिमवानपि ॥३॥
सिताख्यां विजयः ख्यातां प्रियालापां तथाऽचलः । उपयेमे युवा धीरो धारणश्च प्रभावतीम् ॥४॥
कालिङ्गीं पूरणश्चार्वीमभिचन्द्रश्च सुप्रभाम् । अष्टौ स्त्रीषु महादेव्यस्त्वष्टानामपि ताः स्मृताः ॥५॥
कलागुणविदग्धानां तेषामासीत् सयोषिताम् । अन्योन्यप्रेमबद्धानामनन्यसदृशी रतिः ॥६॥
तदा देवकुमाराभो वसुदेवः श्रिया श्रितः । शौर्यपुर्यां च चिक्रीड कुमारक्रीडया युतः ॥७॥
रूपलावण्यसौभाग्यभाग्यवैदग्ध्यवारिधिः । जहार जनचेतांसि कुमारो मारविभ्रमः ॥८॥
चतुर्णां लोकपालानां वेषमादाय हारिणम् । इन्द्रादिदिक्षु निःक्षुद्रः क्रमात्पुर्या विनिर्ययौ ॥९॥
[3]निर्याति [4]सूर्यदीप्ताङ्गे [5]चन्द्रसौम्यमुखाम्बुजे । तत्र शौर्यपुरे स्त्रीणां भवत्याकुलता परा ॥१०॥
सङ्घट्टः पुरनारीणां वसुदेवदिदृक्षया । जायतेऽर्णववेलायां पूर्णचन्द्रोदये [6]यथा ॥११॥
भूमौ रथ्या यथा स्त्रीभिस्त्यक्त[7]प्रस्तुतकर्मभिः । प्रासादेषु गवाक्षाश्च सञ्छाद्यन्ते दिदृक्षुभिः ॥१२॥
सौभाग्यहृतचेतस्कं बहिरन्तरितस्ततः । बभूव पुरमुद्भ्रान्तं वसुदेवकथामयम् ॥१३॥

अथानन्तर गौतम गणधरने कहा कि हे श्रेणिक ! अब वसुदेवकी पृथिवी तथा विजयार्ध सम्बन्धी चेष्टाओंका वर्णन करता हूँ सो सुन ॥१॥ राजा समुद्रविजयने अपने आठ छोटे भाइयों- के नवयौवन आनेपर उनका राजपुत्रियोंके साथ विवाह करा दिया ॥२॥ अक्षोभ्यने धृतिको, स्तिमितसागरने उत्कृष्ट प्रभाको धारण करनेवाली स्वयंप्रभाको, हिमवानने सुनीताको, विजयने सिताको, अचलने प्रियालापाको, युवा तथा धीर वीर धारणने प्रभावतीको, पूरणने कालिङ्गीको और अभिचन्द्रने सुप्रभाको विवाहा। ये आठों स्त्रियाँ अक्षोभ्य आदि कुमारोंकी आठ महादेवियाँ थीं तथा अनेकों स्त्रियोंमें प्रधान मानी गई थीं ॥३-५॥ जो कला तथा अनेक गुणोंमें चतुर थे, अपनी-अपनी स्त्रियोंसे सहित थे और पारस्परिक प्रेमसे आपसमें बँधे हुए थे ऐसे उन सब भाइयों- में परस्पर बेजोड़ प्रेम था ॥६॥ उस समय लक्ष्मीसे सेवित वसुदेव, देव कुमारके समान जान पड़ते थे और बालक्रीड़ासे युक्त हो शौर्यपुरी नगरीमें यथेच्छ क्रीड़ा करते थे ॥७॥ रूप, लावण्य, सौभाग्य, भाग्य और चतुराईसे सागर तथा कामदेवके समान सुन्दर वसुदेव जनताके चित्तको हरण करते थे ॥८॥ अतिशय उदार वसुदेव क्रम-क्रमसे चार लोकपालोंका मनोहर वेष रखकर पूर्व आदि दिशाओंमें निकलते थे ॥९॥ जिनका शरीर सूर्यके समान देदीप्यमान था तथा मुख कमल चन्द्रमाके समान सौम्य था ऐसे वसुदेव जब उस शौर्यपुरमें बाहर निकलते थे तब स्त्रियोंमें बड़ी आकुलता उत्पन्न हो जाती थी ॥१०॥ जिस प्रकार पूर्णचन्द्रका उदय होनेपर समुद्रकी वेलामें संघट्ट मच जाता है उसी प्रकार वसुदेवको देखनेकी इच्छासे नगरकी स्त्रियोंमें संघट्ट मच जाता था—उनकी बड़ी भीड़ इकट्ठी हो जाती थी ॥११॥ उनके बाहर निकलते ही देखनेके लिए इच्छुक स्त्रियाँ अपने प्रारब्ध कार्योंको छोड़कर पृथिवीपर तो गलियोंको रोक लेती थीं और ऊपर महलोंके झरोखोंको आच्छादित कर लेती थीं ॥१२॥ वसुदेवके सौभाग्यसे जिसका चित्त हरा गया था

---

१. गौतमः । २. विवाहम् । ३. निर्गच्छति सति । ४. सूर्यवत् दीप्तमङ्गं यस्य तस्मिन् । ५. चन्द्रवत् सौम्यं मुखाम्बुजं यस्य तस्मिन् । ६. पूर्णचन्द्रोदयं यथा म० । ७. प्रारब्ध म० ।

अन्यदा पुरवृद्धास्ते समुद्रविजयं नृपम् । नत्वा व्यजिज्ञपन्नित्यमुपांशु [1]पिशुनान्तराः ॥१४॥
अभयं नः प्रदाय त्वं शृणु [2]विज्ञापनं विभो । युक्तं वा यदि वाऽयुक्तं बालस्येव वचः पिता ॥१५॥
नृपस्त्वं रक्षणान्नृणां भूपो रक्षणतो भुवः । त्वमेव जगतो राजा राजन् ! प्रकृतिरञ्जनात् ॥१६॥
त्वयि राजनि राजन्ते [3]जनितप्रमदाः प्रजाः । अक्षुद्रोपद्रवाः पूर्वं पितरीव तवाधुना ॥१७॥
उर्वरा सर्वसस्यौघैः शालिव्रीह्यादिभिर्वरैः । [4]अवग्रहोज्झितैर्धत्ते प्रतिवर्षमवन्ध्यताम् ॥१८॥
यथा कृषिस्तथात्यर्थं वणिज्या फलति प्रभो । क्रयविक्रयबाहुल्याद् वणिजां राज्यमूर्जितम् ॥१९॥
घटोध्न्यो घटपूरं हि गोमहिष्युरुधेनवः । दुहन्ति सततं दुग्धं प्रभूताः [5]सुहितास्तृणैः ॥२०॥
गृहार्थमन्नमल्पं प्रसाधितमयत्नतः । नान्तमेति दिनान्तेऽपि दानधर्मात्मभुक्तिभिः ॥२१॥
स्वस्वभावविभक्तान्यभावेषष्ट्यब्दवस्तुनि[6] । त्वत्प्रभावाच्चिरस्थैर्यः कालो दुन्दुभिरेव[7] नः ॥२२॥
एवं सति सुखे दुःखं स्वल्पं तदपि भूपते । न प्रकाशयितुं शक्यं यथात्मोदरपाटनम् ॥२३॥

ऐसा समस्त नगर उस समय भीतर-बाहर उद्भ्रान्त हो गया था तथा जहाँ-तहाँ एक वसुदेवकी ही कथा सुनाई देती थी ॥१३॥ तदनन्तर किसी समय जिनके हृदय मात्सर्यसे परिपूर्ण थे ऐसे वृद्धजन राजा समुद्रविजयके पास जाकर तथा नमस्कार कर एकान्तमें इस प्रकार निवेदन करने लगे ॥१४॥

उन्होंने कहा कि हे प्रभो ! जिस प्रकार बालकके वचन चाहे युक्त हों चाहे अयुक्त, उन्हें पिता सुनता ही है उसी प्रकार आप हम लोगोंको अभय देकर हमारे वचन सुनिए। हमारे वे वचन भले ही युक्त हों अथवा अयुक्त हों ॥१५॥ हे नाथ ! आप मनुष्योंकी रक्षा करते हैं इसलिए नृप हैं, पृथिवीकी रक्षा करते हैं इसलिए भूप हैं और प्रजाको अनुरञ्जित करते हैं इसलिए आप ही राजा हैं ॥१६॥ जिस प्रकार पहले आपके पिताके राज्य-कालमें प्रजा सानन्द तथा क्षुद्र उपद्रवोंसे रहित थी उसी प्रकार इस समय आपके राज्य-कालमें भी प्रजा सानन्द तथा क्षुद्र उपद्रवोंसे रहित है ॥१७॥ यहाँकी उपजाऊ भूमि वर्षाके प्रतिबन्धसे रहित शालि, व्रीहि आदि सब प्रकारके उत्तमोत्तम धान्योंके समूहसे प्रतिवर्ष सफलताको धारण करती है ॥१८॥ हे प्रभो ! जिस प्रकार खेती सफल रहती है उसी प्रकार वाणिज्य भी सफल रहता है। आपका राज्य व्यापारियोंके क्रय-विक्रयकी अधिकतासे अत्यधिक सम्पन्न हो रहा है ॥१९॥ घटके समान बड़े-बड़े स्तनोंको धारण करनेवाली एवं हरे-भरे तृणोंसे सन्तुष्ट बहुत-सी गायें, भैंसे और उत्तम जातिकी धेनुएँ निरन्तर घड़े भर-भरकर दूध देती हैं ॥२०॥ घरके उपयोगके लिए साधारण रीतिसे तैयार किया हुआ थोड़ा-सा अन्न भी, दानके समय धर्मात्माओंके भोजनमें आनेसे सायंकालतक भी समाप्त नहीं होता ॥२१॥ हे नाथ ! साठ संवत्सरी रूप जो वस्तु है उसमें स्वभाववश ही अन्यथा परिणमन होता रहता है परन्तु आपके प्रभावसे हमलोगोंका तो दुन्दुभि नामक काल ही चिरकालसे स्थिर है। भावार्थ—ज्योतिष-शास्त्रके अनुसार साठ संवत्सर होते हैं जो क्रमसे परिवर्तित होते रहते हैं उनमें हानि-लाभ सभी कुछ होते हैं। परन्तु उन संवत्सरोंमें एक दुन्दुभि नामका संवत्सर भी होता है जिसमें प्रजाका समय आनन्दसे बीतता है। प्रजाके लोग राजा समुद्रविजयसे कह रहे हैं कि यद्यपि संवत्सर परिवर्तनशील हैं परन्तु हमारे लिए आपके प्रभावसे दुन्दुभि नामक संवत्सर ही चिरस्थायी होकर आया है ॥२२॥ हे राजन् ! इस प्रकार सुखके रहते हुए थोड़ा-सा

---

१. पिहितान्तराः म० । २. विज्ञापनां म० । ३. प्रमदाः सफलाः म० । ४. वृष्टिप्रतिबन्धरहितैः । ५. सुतृप्ताः । ६. व्ययकृदस्ति षष्टिसंवत्सरीरूपे काले सत्यपि इति ख० पुस्तकं विहाय सर्वत्र टिप्पणी । ७. 'सर्वसस्ययुता धात्री पालिता धरणीधरैः । पूर्वदेशविनाशः स्यात्तत्र दुन्दुभिवत्सरे' ॥ इति वर्षप्रबोधे ।

इत्याकर्ण्य नृपः प्राह पौरप्राग्रहरानिति । ब्रूत वीतभया दुःखं यूयं मह्यं हिता यदि ॥२४॥
आधिर्व्याधिरिवाल्पोऽपि हृदये कृतसंनिधिः । प्राणकारणमप्यन्नं प्रतिहन्ति न संशयः ॥२५॥
इत्युक्तास्तेन ते प्रोचुरिति विस्रम्भमागताः । दुर्विज्ञप्तिमिमां राजन् निबुध्यस्व प्रजाहितम् ॥२६॥
वसुदेवकुमारस्य नित्यं निःसरतः पुरात् । रूपदर्शनविभ्रान्ता विस्मरन्ति वपुः स्त्रियः ॥२७॥
निर्गमे च प्रवेशे च कुमारस्याभ्यदङ्गनाः । न पश्यन्ति न शृण्वन्ति भवन्ति विकलेन्द्रियाः ॥२८॥
तिष्ठन्तु तावदन्यानि स्वानुष्ठेयानि योषिताम् । स्तनन्धयस्तनादानं रागान्धानां सुविस्मृतम् ॥२९॥
अतिरूपतमो धीरः स्वभावस्वच्छमानसः । सर्वोपधाविशुद्धात्मा कुमारः शीलशेखरः ॥३०॥
नृप ! कस्य न विज्ञातस्समस्ते वसुधातले । तथापि किं वयं कुर्मो चित्तोद्भ्रान्तमभूत्पुरम् ॥३१॥
यदत्र युक्तमाधातुं तत्त्वमेव निरूपय । [1]यथास्वन्तं पुरस्येश ! कुमारस्य च जायते ॥३२॥
तन्निशम्य वचो राजा विचिन्त्य चिरमात्मनि । तथेति प्रतिपद्यैतान् विससर्ज ययुश्च ते ॥३३॥
पर्यट्य चिरमागत्य प्रणतं भ्रातरं नृपः । आलिङ्ग्याङ्कं तमारोप्य स्नेहेनाघ्राय मस्तके ॥३४॥
[2]श्रान्तोऽत्यन्तं कुमार ! त्वं चिरं भ्रान्त्वा वनान्तरम् । विवर्ण ! क्षुत्पिपासार्त ! किमित्येवं चिरायितम् ॥
वातातपपरि[3]म्लानः शिरःशेखरनीरुचिः । अगणय्य वपुःखेदं पर्यटस्यटनप्रियः ॥३६॥

दुःख भी है परन्तु जिस प्रकार अपना पेट फाड़कर नहीं दिखाया जा सकता उसी प्रकार वह थोड़ा-सा दुःख भी नहीं प्रकट किया जा सकता ॥२३॥

इस प्रकार सुनकर राजा समुद्रविजयने नगरके वृद्धजनोंसे कहा कि यदि आप लोग हमारा हित चाहते हैं तो निर्भय होकर वह दुःख कहिए ॥२४॥ क्योंकि हृदयमें रहनेवाली छोटी-सी मानसिक व्यथा भी शारीरिक व्यथाके ही समान, प्राण-रक्षाका कारण जो अन्न है उसे भी छुड़ा देती है इसमें संशय नहीं है। भावार्थ—मानसिक पीड़ाके कारण मनुष्य खाना-पीना भी छोड़ देता है ॥२५॥ इस प्रकार समुद्रविजयके कहनेपर प्रजाके लोग विश्वस्त हो कहने लगे। उन्होंने कहा कि हे राजन् ! हमारी विज्ञप्ति, विज्ञप्ति नहीं किन्तु दुर्विज्ञप्ति है परन्तु प्रजाके हितके लिए उसे अवश्य सुनिए ॥२६॥ वसुदेवकुमार प्रतिदिन नगरसे बाहर निकलते हैं जिससे नगरकी स्त्रियाँ उनका रूप देखकर पागल-सी हो जाती हैं और अपने शरीरकी सुध-बुध भूल जाती हैं ॥२७॥ कुमारके बाहर निकलने और भीतर प्रवेश करनेके समय स्त्रियाँ इन्द्रियोंसे रहित जैसी हो जाती हैं इसलिए वे न अन्य किसीको देखती हैं और न अन्य कुछ सुनती ही हैं ॥२८॥ स्त्रियोंके अपने करने योग्य दूसरे काम तो दूर रहें परन्तु रागान्ध होकर वे छोटे-छोटे बच्चोंके लिए स्तन देना—दूध पिलाना भी भूल जाती हैं ॥२९॥ हे राजन् ! यद्यपि कुमार वसुदेव, अत्यन्त सुन्दर, धीर-वीर, स्वभावसे स्वच्छ हृदयके धारक, सर्वप्रकारसे विशुद्ध आत्मासे युक्त और शीलके शिरोमणि हैं ॥३०॥ यह समस्त पृथिवीतलपर किसे नहीं विदित है ? फिर भी हम क्या करें ? नगरवासियोंका चित्त उद्भ्रान्त हो रहा है ॥३१॥ हे स्वामिन् ! हम लोगोंने अपनी मनोव्यथा कही अब यहाँ जो कुछ करना उचित हो तथा जिससे नगर और कुमार दोनोंका परिणाम अच्छा हो वह आप ही कहिए ॥३२॥

राजा समुद्रविजयने नगरवासियोंकी बात सुनकर चिरकाल तक अपने-आपमें उसका विचार किया, उसके बाद सबको आश्वासन देकर बिदा किया और आश्वासन पाकर नगरवासी यथास्थान चले गये ॥३३॥ उसी समय भाई वसुदेवने चिरकाल तक भ्रमण करनेके बाद आकर राजा समुद्रविजयको प्रणाम किया। समुद्रविजयने उनका आलिङ्गन कर गोदमें बैठाया और स्नेहसे मस्तक सूँघते हुए कहा कि कुमार ! तुम चिरकाल तक वनके मध्यमें भ्रमण करनेसे अत्यन्त थक गये हो। देखो, तुम्हारा वर्ण फीका पड़ गया है और तुम भूख-प्याससे पीड़ित जान पड़ते हो।

१. शोभनपरिणामः। २. श्रान्तोऽत्यन्तं म०। ३. परिम्लानशिरः-म०।

स्नानभोजनवेलाया मा कृथास्त्वमतिक्रमम् । अद्य प्रभृति शुद्धान्तवनान्तेश्चारमाचर ॥३७॥
इति राजाऽनुजं भक्तमनुशिष्य शिवागृहम् । सप्तकक्षापरिक्षेपि तं गृहीत्वा करेऽविशत् ॥३८॥
स्नात्वा भुक्त्वा स तेनामा कृतरक्षाविधिः स्वयम् । तदलक्षितसंकेतो बभूव नृपतिः सुखी ॥३९॥
कुमारोऽपि शिवादेव्याः स वनोद्यानभूमिषु । क्रीडन्नाट्य[1]सुगीताद्यैर्विनोदैश्चावसत्सदा ॥४०॥
एकदा तु शिवादेव्यै समालम्भनमेकया । कुब्जया नीयमानं तां खलीकृत्य जहार सः ॥४१॥
सा जगाद ततो रुष्टा कुमार ! तव चेष्टितैः । ईदृशैरेव सम्प्राप्तो बन्धनागारमीदृशम् ॥४२॥
स तां पप्रच्छ [2]शङ्कावान् कुब्जे ! किमिति जल्पितम् । न्यवेदयच्च सा तस्मै यथावन्नृपमन्त्रणम् ॥४३॥
ततः स्वं वञ्चनं[3] ज्ञात्वा विमनाः स नृपं प्रति । सछद्मशद्मना दक्षो निरगान्नगरात्ततः ॥४४॥
गत्वैकानुचरो मन्त्रसाधनव्याजवान्निशि । श्मशाने चैकदेशस्थं तं कृत्वोत्तरसाधकम् ॥४५॥
किञ्चिद्दूरे निवेश्यैकं मृतकं भूषणैर्निजैः । विभूष्य चितिकामध्ये निक्षिप्य वदति स्म सः ॥४६॥
आर्यस्तातसमो राजा पौराश्च पिशुनाश्चिरम् । सुखं जीवन्तु सन्तुष्टाः प्रविष्टोऽहं हुताशनम् ॥४७॥
इत्युक्त्वोच्चैः प्रधाव्यासौ प्रदर्श्याग्निप्रवेशनम् । अन्तर्धानं गतो दूरं [4]भुजिष्योऽपि पुरं ततः ॥४८॥
वसुदेवस्य वृत्तान्ते तद्भृत्येन निवेदिते । सपौरान्तःपुरभ्रातृवृष्णिवर्गस्तदा नृपः ॥४९॥

इतनी देर तुमने किस लिए की ? वायु तथा घामसे तुम मुरझा गये हो, तुम्हारे शिरका सेहरा भी कान्तिहीन हो गया है, तुम घूमनेके ऐसे शौकीन हो कि शरीरके खेदकी परवाह न कर घूमते रहते हो ? अब आजसे स्नान तथा भोजनके समयका उल्लंघन नहीं करना तथा आजसे अन्तः-पुरके भीतर जो बगीचा है उसीमें क्रीड़ा करना ॥३४–३७॥ इस प्रकार राजा समुद्रविजय भक्तिसे भरे हुए छोटे भाई—समुद्रविजयको समझाकर तथा हाथ पकड़कर सात कक्षाओंसे घिरे हुए शिवादेवीके महलमें प्रविष्ट हुए ॥३८॥ वहाँ वसुदेवके साथ ही उन्होंने स्नान किया, भोजन किया तथा 'वे वहीं रहें' इस बातकी स्वयं ऐसी व्यवस्था कर दी कि जिसका वसुदेवको कुछ भी संकेत मालूम नहीं हुआ। यह सब कर राजा समुद्रविजय सुखी हुए—निश्चिन्त हो गये ॥३९॥ और कुमार वसुदेव भी शिवादेवीके बगीचोंमें नाट्य संगीत आदि विनोदोंसे क्रीड़ा करते हुए सदा रहने लगे ॥४०॥

अथानन्तर एक दिन अन्तःपुरकी एक कुब्जादासी शिवादेवीके लिए विलेपन लिये जा रही थी सो कुमारने उसे तंगकर छीन लिया। इससे रुष्ट होकर कुब्जाने कहा कि कुमार ! ऐसी ही चेष्टाओंसे तुम इस प्रकार बन्धनागारको प्राप्त हो—कैद किये गये हो ॥४१–४२॥ कुब्जाकी बात सुनकर शङ्कायुक्त हो वसुदेवने उससे पूछा कि कुब्जे ! तूने यह क्या कहा ?—तेरे कहनेका क्या तात्पर्य है ? तब उसने राजाकी जो सलाह थी वह ज्योंकी-त्यों कुमारको बता दी ॥४३॥ तदनन्तर 'हमारे प्रति धोखा किया गया' यह जानकर कुमार राजासे विमुख हो गये। वे चतुर तो थे ही इसलिए छलपूर्वक घरसे तथा नगरसे बाहर निकल गये ॥४४॥ वे मन्त्रसिद्धिका बहाना बना एक नौकरको साथ लेकर रात्रिके समय श्मशानमें गये। वहाँ नौकरको एक स्थानपर बैठाकर तथा 'जब मैं पुकारूँ उत्तर देना' ऐसा संकेतकर कुछ दूर अकेले गये। वहाँ एक मुर्दाको अपने आभूषणोंसे अलंकृत कर तथा उसे एक चितापर रखकर उन्होंने कहा कि पिताके समान पूज्य राजा और चुगली करनेवाले नगरवासी सन्तुष्ट होकर चिरकाल तक सुखसे जीवित रहें; मैं अग्निमें प्रविष्ट हो रहा हूँ। इस प्रकार जोरसे कहकर तथा 'दौड़कर अग्निमें प्रवेश किया है' यह दिखाकर अन्तर्हित हो दूर चले गये। इस घटनाके बाद वह नौकर भी नगरमें वापिस आ गया ॥४५–४८॥ नौकर द्वारा वसुदेवका वृत्तान्त कहे जानेपर राजा समुद्रविजय उसी समय नगरवासी,

---

१. नाद्य- म० । २. शङ्कासात् म० । ३. वचनं म० । ४. अनुचरोऽपि ।

सम्प्राप्य प्रातराक्रन्दमुखरो वीक्ष्य भस्मनि । कुमाराभरणं तत्र रुदित्वा मृत इत्यसौ ॥५०॥
पश्चात्तापहतो दुःखी स कृतोचिततत्क्रियः । निन्दन् मन्दोद्यमः स्वं च वञ्चितोऽहमिति स्थितः ॥५१॥
वसुदेवस्तु निःशङ्को गृहीत्वा पश्चिमां दिशम् । द्विजवेषधरो धीरो योजनानि बहून्ययात् ॥५२॥
प्रापद् विजयखेटाख्यं पुरं खेटपुरोपमम् । क्षत्रियान्वयजेनात्र दृष्टो गन्धर्वसूरिणा ॥५३॥
सुग्रीव इत्यनुग्राही गान्धर्वार्थिजनस्य सः । चौक्ष्यैवाकारमेतस्य वशीकृत इवाऽभवत् ॥५४॥
कन्याऽनन्यसमा तस्य सोमा [1]सोमसमानना । अन्या विजयसेनाख्या रूपपारमिते शुभे ॥५५॥
गन्धर्वादिकलापारं प्राप्तयोः स तयोः पिता । गान्धर्वे योऽनयोर्जेता स भर्तेत्यभिमन्यते ॥५६॥
लक्ष्यलक्षणयोगेन यत्र यत्र तयोर्जयः । तत्र तत्र सभामध्ये ते जिगाय स यादवः ॥५७॥
सुग्रीवेण सतोषेण कन्ये दत्ते ततः शुभे । परिणीय मुदा रेमे प्रासादवरभूमिषु ॥५८॥
सूनुं विजयसेनायामुत्पाद्याक्रूरसंज्ञकम् । शौरिः शौर्यसहायोऽयादविज्ञातविनिर्गतः ॥५९॥
गच्छन्मार्गवशात् क्वाऽपि प्रविवेश महाटवीम् । अपश्यच्च सरो रम्यं हंससारसवारिजैः ॥६०॥
[2]नाम्ना तत् स जलावर्तमवगाह्य महासरः । शीतं [3]प्रपाय पानीयं सस्नौ तत्र चिरन्तनम् ॥६१॥
जलं मुरजनिर्घोषं [4]समवादयदुन्नतः । निशम्य रवमुत्तस्थौ तत्र सुप्तो महागजः ॥६२॥

अन्तःपुर, भाई तथा अन्य यदुवंशियोंके साथ श्मशान गये । उस समय सबके मुखसे रोनेकी ध्वनि निकल रही थी । जब प्रातःकाल राखमें कुमारके आभूषण देखे तब 'कुमार निश्चित ही मर गये हैं' यह जानकर सब रोने लगे । राजा समुद्रविजय पश्चात्तापसे पीड़ित हो बहुत दुःखी हुए । उन्होंने मरणोत्तर कालकी सब क्रियाएँ कीं, अपने-आपकी बहुत निन्दा की और हम भाईसे वञ्चित हुए हैं इस खेदसे उनका उद्यम कुछ मन्द पड़ गया ॥४९–५१॥

इधर धीर-वीर वसुदेव निःशङ्क हो पश्चिम दिशाकी ओर चल पड़े और एक ब्राह्मणका वेष रखकर बहुत योजन दूर निकल गये ॥५२॥ चलते-चलते वे देवोंके नगरके समान सुन्दर विजयखेट नामक नगरमें पहुँचे । वहाँ क्षत्रियवंशमें उत्पन्न सुग्रीव नामका एक गन्धर्वाचार्य रहता था । वह गन्धर्वाचार्य संगीत विद्याके इच्छुक मनुष्योंका बड़ा उपकारी था तथा वसुदेवका रूप देखकर उनका वशीभूत जैसा हो गया ॥५३–५४॥ उस गन्धर्वाचार्यकी, रूपमें अपनी शानी न रखनेवाली चन्द्रमुखी सोमा और विजयसेना नामकी दो उत्तम पुत्रियाँ थीं । ये पुत्रियाँ सौन्दर्यकी परम सीमाको प्राप्त हुई-सी जान पड़ती थीं ॥५५॥ ये कन्याएँ गन्धर्व आदि कलाओंकी परम सीमाको प्राप्त थीं इसलिए उनके पिता सुग्रीवने अभिमानवश ऐसा विचार कर लिया था कि जो गन्धर्व-विद्यामें इन दोनोंको जीतेगा वही इनका भर्ता होगा ॥५६॥ लक्ष्य-लक्षणके योगसे अन्यत्र जिन-जिन विषयोंमें उन दोनों कन्याओंकी जीत हुई थी उन्हीं-उन्हीं विषयोंमें सभाके बीच वसुदेवने उन कन्याओंको पराजित कर दिया ॥५७॥ तदनन्तर सुग्रीवने संतुष्ट होकर अपनी दोनों कन्याएँ वसुदेवके लिए दे दीं । वसुदेव उन्हें विवाह कर महलकी उत्तम भूमियोंमें आनन्द पूर्वक क्रीड़ा करने लगे ॥५८॥ शूरवीरता ही जिनकी सहायक थी ऐसे वसुदेव, विजयसेना नामक स्त्रीमें अक्रूर नामक पुत्र उत्पन्न कर अज्ञात रूपसे बाहर निकल गये ॥५९॥ मार्गके अनुसार भ्रमण करते हुए उन्होंने एक बहुत बड़ी अटवीमें प्रवेश किया और वहाँ हंस, सारस तथा कमलोंसे सुशोभित एक सुन्दर सरोवर देखा ॥६०॥ जलावर्त नामके उस महासरोवरमें प्रवेशकर वसुदेवने ठण्डा पानी पिया तथा चिरकाल तक स्नान किया ॥६१॥ तदनन्तर अतिशय उन्नत शरीरके धारक वसुदेवने वहाँ जलको इस तरह बजाया कि जिससे मृदङ्गके समान शब्द निकलता था । उस शब्दको सुनकर वहाँ सोया हुआ एक बड़ा हाथी उठकर

---

१. चन्द्रतुल्यवदना । २. नाम्नान्तः स- म० । ३. पीत्वा । ४. समवादयदुन्नतः० म० ।

आपतन्तं स तं हन्तुं वञ्चयन्नतिदक्षिणः । चिक्रीड दन्तिदन्ताग्रे दोलाप्रेङ्खनमाचरन् ॥६३॥
वशीकृत्य वशी शीतकरशीकरशोभितम् । आरुह्यास्फाल्य हस्तेन हस्तिनं निश्चलं स्थितम् ॥६४॥
विस्मितः स्वयमेवासौ सशिरःकम्पमुत्करः । अरण्यरुदितं जातमित्यचिन्तयदेककः ॥६५॥
अभविष्यदिभक्रीडा यदि शौर्यपुरे त्वियम् । अभविष्यत्ततो लोको मुखरः साधुकारतः ॥६६॥
इति ध्यायन्तमेवैनं जहतुर्गजमस्तकात् । सौम्यरूपधरौ धीरौ विद्याधरकुमारकौ ॥६७॥
नीत्वा तं कुञ्जरावर्तं नगरं विजयार्द्धजम् । चक्रतुर्बहिरुद्याने सर्वकामिकनामनि ॥६८॥
अशोकानोकहस्याधः शोकक्लेशविवर्जितम् । वसुदेवं सुखासीनं नत्वा ताविदमूचतुः ॥६९॥
स्वामिन्नशनिवेगस्य विद्याधरमहेशिनः । शासनात्त्वमिहानीतो जानीहि श्वशुरः स ते ॥७०॥
अर्चिर्माली कुमारोऽहं वायुवेगोऽयमित्यमुम् । निवेद्य पुरमेकोऽगादस्थादेकोऽत्र पालकः ॥७१॥
दिष्ट्या त्वं वर्द्धसे स्वामिन्नानीतो द्विपमर्दनः । धीरः शूरोऽभिरूपश्च विनीतो नवयौवनः ॥७२॥
नत्वेति ज्ञापितस्तेन स प्रमोदवशो नृपः । अङ्गस्पृष्टं ददज्जातः [1]परिधानावशेषकः ॥७३॥
ततः समङ्गलं तेन नगरं स प्रवेशितः । अलङ्कृतवपुः पौरनरनारीभिरीक्षितः ॥७४॥
प्रशस्ततिथिनक्षत्रमुहूर्तकरणोदये । कन्यामशनिवेगस्य [2]श्यामां श्यामामुवाह सः ॥७५॥
रेमे कामं स कामिन्या कलागुणविदग्धया । तथा तदा तदुच्छ्रित्सुखपङ्कजषट्पदः ॥७६॥

१. मन्दयन्त्या म० । २. धैवतं सनिषादे च म०, ग० । ३. विगतम् आर्षभं यस्मात् तत् । ४. तथा चौडवितं कुर्याद्बलिनश्चात्र पञ्चमः म० । ५. विस्तारे म० । ६. मालाम् ।

गन्धर्व इव देवोऽसौ वृतो गन्धर्वकन्यया । गान्धर्वसेनया हर्षसम्बन्धं जगतो व्यधात् ॥२६७॥
चारुदत्तस्ततस्तुष्टो यथोक्तविधिना ततः । [1]विवाहं मगधाधीश निरवर्तयदेतयोः ॥२६८॥
सुग्रीवश्च यशोग्रीव उपाध्यायौ च कन्यके । वितीर्य वसुदेवाय नितान्तं तोषमापतुः ॥२६९॥
कलागुणविदग्धाभिस्ताभिरानकदुन्दुभिः[2] । रामाभिरभिरामाभिश्चिरं चिक्रीड तत्र सः ॥२७०॥

स्रग्धरावृत्तम्

लब्ध्वा लुब्धेन रन्ध्रं कथमपि हरता वैरिणा खेऽतिदूरं
नीत्वा मुक्तं पतन्तं गतशरणमधः पद्मखण्डोपधानम् ।
कृत्वा यः शीघ्रमस्मिन्झटिति घटयति प्राज्यलाभैः पुमांसं
कर्तुं भव्यास्तमेकं पथि जिनकथिते धर्मबन्धुं यतध्वम् ॥२७१॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ गान्धर्वसेनावर्णनो नाम एकोनविंशतितमः सर्गः ॥१९॥

गन्धर्वसेनाने सभामें ही वसुदेवके गलेमें माला डालकर उनका वरण किया ॥२६६॥ उस समय गन्धर्व-कन्यासे वृत गन्धर्वके समान गन्धर्वसेनासे वृत वसुदेवने समस्त जगत्को हर्षित कर दिया ॥२६७॥ तदनन्तर गौतम स्वामी कहते हैं कि हे श्रेणिक ! कन्याके पिता चारुदत्तने सन्तुष्ट होकर दोनोंका विधिपूर्वक विवाह कर दिया ॥२६८॥ उपाध्याय सुग्रीव और यशोग्रीव भी अपनी-अपनी कन्याएँ वसुदेवके लिए प्रदान कर सन्तोषको प्राप्त हुए ॥२६९॥ अनेक कलाओं और गुणोंमें चतुर उन सुन्दर स्त्रियोंके साथ वसुदेव वहाँ चिरकालतक क्रीड़ा करते रहे ॥२७०॥ लोभसे भरा वैरी विद्याधर छिद्र पा जिसे हरकर आकाशमें बहुत दूर ले गया और वहाँसे अशरण अवस्थामें जिसे कमल वनमें नीचे छोड़ा ऐसे पुरुषको भी जो शीघ्र ही उत्कृष्ट लाभोंसे युक्त करता है हे भव्यजनो ! तुम जिन-कथित मार्गमें उस एक धर्म रूप बन्धुको प्राप्त करनेका प्रयत्न करो ॥२७१॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें गन्धर्वसेना कन्याका वर्णन करनेवाला उन्नीसवाँ सर्ग समाप्त हुआ ॥१९॥

---

१. विवाहो मगधाधीशो (?) म० । २. वसुदेवः ।

विंशतितमः सर्गः

अथापृच्छत्पृथुश्रीकः श्रेणिकोऽत्र गणेश्वरम् । कथं विष्णुकुमारेण विभो बलिरबध्यत ॥१॥
अभणीद्गणमुख्यश्च शृणु श्रेणिक ! वैष्णवीम् । दृष्टिशुद्धिकरीं श्रव्यां सत्कथां कथयामि ते ॥२॥
उज्जयिन्यामभूद्राजा[1] श्रीधर्मा[2] नाम विश्रुतः । श्रीमती श्रीमती तस्य महादेवी महागुणा ॥३॥
चत्वारो मन्त्रिणश्चास्य मन्त्रमार्गविदो बलिः । बृहस्पतिश्च नमुचिः प्रह्लाद इति चाभिधः ॥४॥
अन्यदा श्रुतपारस्थः सप्तशतसंयतः । आगत्याकम्पनस्तस्थौ बाह्योद्याने महामुनिः ॥५॥
वन्दनार्थं नृपो लोकं [3]निर्यान्तमिव सागरम् । प्रासादस्थस्तदालोक्य मन्त्रिणोऽपृच्छदित्यसौ ॥६॥
अकालयात्रया लोकः क यातीति ततो बलिः । राजन्नज्ञानिनो द्रष्टुं श्रमणानित्यवेदयत् ॥७॥
ततो जिगमिषू राजा निषिद्धोऽपि बलाद् ययौ । मन्त्रिणोऽपि सहागत्य दृष्ट्वा किञ्चिदवीवदन् ॥८॥
गुर्वादेशाच्च सङ्घोऽपि स्थितो मौनमुपाश्रितः । यान्तः प्रतिनिवृत्यामी संमुखं वीक्ष्य योगिनम् ॥९॥
[4]अनूनुदन्नृपाध्यक्षं मिथ्यामार्गविमोहिताः । प्रमाणमार्गतस्तान् स जिगाय श्रुतसागरः ॥१०॥
स्थितं प्रतिमया रात्रौ जिघांसूस्तांश्च तद्दिवा । देवतास्तम्भितान् दृष्ट्वा राजा देशादपाकरोत् ॥११॥
तदा नागपुरे चक्री महापद्म इतीरितः । अष्टौ च कन्यकास्तस्य ताश्च विद्याधरैर्हृताः ॥१२॥

अथानन्तर विशाल लक्ष्मीके धारक राजा श्रेणिकने गौतम गणधरसे पूछा कि हे विभो ! विष्णु कुमार मुनिने बलिको क्यों बाँधा था ? ॥१॥ इसके उत्तरमें गौतम गणपतिने कहा कि हे श्रेणिक ! तू सम्यग्दर्शनको शुद्ध करनेवाली विष्णुकुमार मुनिकी मनोहारिणी कथा सुन, मैं तेरे लिए कहता हूँ ॥२॥

किसी समय उज्जयिनी नगरीमें श्रीधर्मा नामका प्रसिद्ध राजा रहता था । उसकी श्रीमती नामकी पटरानी थी । वह श्रीमती वास्तवमें श्रीमती—उत्तम शोभासे सम्पन्न और महा गुणवती थी ॥३॥ राजा श्रीधर्माके बलि, बृहस्पति, नमुचि और प्रह्लाद ये चार मन्त्री थे । ये सभी मन्त्री मन्त्र मार्गके जानकार थे ॥४॥ किसी समय श्रुतके पारगामी तथा सात सौ मुनियोंसे सहित महामुनि अकम्पन आकर उज्जयिनीके बाह्य उपवनमें विराजमान हुए ॥५॥ उन महामुनिकी वन्दनाके लिए नगरवासी लोग सागरकी तरह उमड़ पड़े । महलपर खड़े हुए राजाने नगरवासियोंको देख मन्त्रियोंसे पूछा कि ये लोग असमयकी यात्रा द्वारा कहाँ जा रहे हैं ? तब बलिने उत्तर दिया कि हे राजन् ! ये लोग अज्ञानी दिगम्बर मुनियोंकी वन्दनाके लिए जा रहे हैं ॥६-७॥ तदनन्तर राजा श्रीधर्माने भी वहाँ जानेकी इच्छा प्रकट की । यद्यपि मन्त्रियोंने उसे बहुत रोका तथापि वह जबर्दस्ती चल ही पड़ा । अन्तमें विवश हो मन्त्री भी राजाके साथ गये और मुनियोंके दर्शनकर कुछ विवाद करने लगे ॥८-९॥ उस समय गुरुकी आज्ञासे सब मुनि सङ्घ मौन लेकर बैठा था इसलिए ये चारों मन्त्री विवश होकर लौट आये । लौटकर आते समय उन्होंने सामने एक मुनिको देखकर राजाके समक्ष छेड़ा । सब मन्त्री मिथ्यामार्गमें मोहित तो थे ही इसलिए श्रुतसागर नामक उक्त मुनिराजने उन्हें जीत लिया ॥ १०॥ उसीदिन रात्रिके समय उक्त मुनिराज प्रतिमा योगसे विराजमान थे कि सब मन्त्री उन्हें मारनेके लिए गये परन्तु देवने उन्हें कीलित कर दिया । यह देख राजाने उन्हें अपने देशसे निकाल दिया ॥११॥

उस समय हस्तिनापुरमें महापद्म नामक चक्रवर्ती रहता था । उसकी आठ कन्याएँ थीं

---

१. उज्जयिन्यां भवेद्राजा म० । २. श्रीधर्मो म० । ३. निर्यातमिव म० । ४. अनूनुदं म०

आनीताः शुद्धशीलास्ताः संवेगिन्यः प्रवव्रजुः । तेऽपि संवेगिनोऽष्टौ च खेचराः तपसि स्थिताः ॥१३॥
चक्रवर्ती च तद्धेतोः पद्मं लक्ष्मीमतीसुतम् । ज्येष्ठं राज्ये निधायान्त्यदेहोऽदीक्षिष्ट विष्णुना ॥१४॥
तपो विष्णुकुमारोऽसौ रत्नत्रयधरस्तपन् । निधिर्बभूव लब्धीनां नदीनां वा नदीपतिः ॥१५॥
नवराज्यस्थमागत्य पद्मं बलिपुरोगमाः । मन्त्रिणोऽशिश्रियन् देशकालावस्थाविदस्तथा ॥१६॥
स्थितं सिंहबलं दुर्गे पद्मं बल्युपदेशतः । गृहीत्वाऽऽह गृहाणेष्टं वरत्वेति[1] बलिं तदा ॥१७॥
तं प्रणम्य विदग्धोऽसौ हस्तन्यासं न्यधाद् वरम् । ततः सन्तोषिणां तेषां काले याति कदाचन ॥१८॥
आगत्याकम्पनाचार्यस्तदा नागपुरं शनैः । मुनीनामग्रहीद् योगं चातुर्मास्यावधिं बहिः ॥१९॥
ततस्ते मन्त्रिणो भीताः शङ्काविषमुपागताः । तदपाकरणोपायं चिन्तयन्ति स्म सस्मयाः ॥२०॥
अब्रवीद् बलिराश्रित्य पद्मं राजन् ! वरस्त्वया । दत्तः स दीयतां मेऽद्य राज्यं सप्तदिनावधि ॥२१॥
दत्तं गृहाण ते राज्यमित्युक्त्वाऽदृश्यवत्स्थितः । राज्यस्थोऽपि बलिस्तेषामुपद्रवमकारयत् ॥२२॥
यतीनभ्यन्तरीकृत्य परितोऽहर्निशं कृतम्[2] । पत्रधूमादिकोच्छिष्टशरावोत्सर्जनादिकम् ॥२३॥
उपसर्गसहास्तेऽपि कायोत्सर्गेण योगिनः । तस्थुः सालम्बमादाय प्रत्याख्यानं ससूरयः ॥२४॥
तस्मिन् काले गुरुर्विष्णोर्मिथिलायामवस्थितः । दिव्यज्ञानी जगौ ध्यात्वा स संयुक्तोऽनुकम्पया ॥२५॥

और आठ विद्याधर उन्हें हरकर ले गये थे। शुद्ध शीलको धारण करनेवाली वे कन्याएँ जब वापिस लाई गई तो उन्होंने संसारसे विरक्त हो दीक्षा धारण कर ली। उधर संसारसे विरक्त हो वे आठ विद्याधर भी तप करने लगे ॥१२-१३॥ इस घटनासे चरमशरीरी महापद्म चक्रवर्ती भी संसारसे विरक्त हो गया जिससे उसने लक्ष्मीमती रानीसे उत्पन्न पद्म नामक बड़े पुत्रको राज्य देकर छोटे पुत्र विष्णु कुमारके साथ दीक्षा धारण कर ली ॥१४॥ जिस प्रकार सागर नदियों-का भाण्डार होता है उसी प्रकार रत्नत्रयके धारी एवं तप तपने वाले विष्णुकुमार मुनि अनेक ऋद्धियोंके भाण्डार हो गये ॥१५॥ देशकालकी अवस्थाको जाननेवाले बलि आदि मन्त्री नये राज्य-पर आरूढ़ राजा पद्मकी सेवा करने लगे ॥१६॥ उस समय राजा पद्म, बलि मन्त्रीके उपदेशसे किलेमें स्थित सिंहबल राजाको पकड़नेमें सफल हो गया इसलिए उसने बलिसे कहा कि वर माँग-कर इष्ट वस्तुको ग्रहण करो ॥१७॥ बलि बड़ा चतुर था इसलिए उसने प्रणामकर उक्त वरको राजा पद्मके हाथमें धरोहर रख दिया अर्थात् 'अभी आवश्यकता नहीं है जब आवश्यकता होगी तब माँग लूँगा।' यह कहकर अपना वर धरोहर रूप रख दिया। तदनन्तर बलि आदि चारों मन्त्रियों-का सन्तोष पूर्वक समय व्यतीत होने लगा ॥१८॥

अथानन्तर किसी समय धीरे-धीरे विहार करते हुए अकम्पनाचार्य, अनेक मुनियोंके साथ हस्तिनापुर आये और चार माहके लिए वर्षायोग धारण कर नगरके बाहर विराजमान हो गये ॥१९॥ तदनन्तर शङ्कारूपी विषको प्राप्त हुए बलि आदि मन्त्री भयभीत हो गये और अहंकार-के साथ उन्हें दूर करनेका उपाय सोचने लगे ॥२०॥ बलिने राजा पद्मके पास आकर कहा कि राजन् ! आपने मुझे जो वर दिया था उसके फलस्वरूप सात दिनका राज्य मुझे दिया जाय ॥२१॥ 'सँभाल, तेरे लिए सात दिनका राज्य दिया' यह कहकर राजा पद्म अदृश्यके समान रहने लगा। और बलि राज्य-सिंहासनपर आरूढ़ होकर उन अकम्पनाचार्य आदि मुनियोंपर उपद्रव कर-वाया ॥२२॥ उसने चारों ओरसे मुनियोंको घेरकर उनके समीप पत्तोंका धुआँ कराया तथा जूठन व कुल्हड़ आदि फिकवाये ॥२३॥ अकम्पनाचार्य सहित सब मुनि 'यदि उपसर्ग दूर होगा तो आहार-विहार करेंगे अन्यथा नहीं' इस प्रकार सावधिक संन्यास धारण कर उपसर्ग सहते हुए कायोत्सर्गसे खड़े हो गये ॥२४॥

उस समय विष्णुकुमार मुनिके अवधिज्ञानी गुरु मिथिला नगरीमें थे। वे अवधिज्ञानसे

---

१. वरस्तदा म० । २. कृतः म० ।

आचार्याकम्पनादीनां सप्तशततपोभृताम् । वर्ततेऽभूतपूर्वोऽयमुपसर्गोऽद्य दारुणः ॥२६॥
क्षुल्लकः पुष्पदन्तस्तं क्व नाथेत्यतिसम्भ्रमः । अप्राक्षीदित्यथ प्राह स हास्तिनपुरे स्फुटम् ॥२७॥
कुतोऽपवर्तते नाथ स इत्युक्ते जगौ गुरुः । प्राप्तवैक्रियसामर्थ्याद्विष्णोर्जिष्णोर्विधृष्यतः ॥२८॥
तस्मै स क्षुल्लको गत्वा तमुदन्तं न्यवेदयत् । विक्रियालब्धिसद्भावपरीक्षामकरोन्मुनिः ॥२९॥
बाहुः प्रसारितस्तेन गिरिभित्तौ विभिद्य ताम् । [1]अरुद्धप्रसरो दूरं सहसाप्सु यथा तथा ॥३०॥
ज्ञातलब्धिपरिप्राप्तिर्जिनशासनवत्सलः । गत्वा पद्मं मुनिः प्राह प्रणतं प्रणतप्रियः ॥३१॥
पद्मराज ! किमारब्धं भवता राज्यवर्तिना । न वृत्तं कौरवेष्वत्र कदाचिदपि यद्भुवि ॥३२॥
अनार्यजनसंभूतमुपसर्गं तपस्विनाम् । निवर्तयेन्नृपस्तस्य प्रवृत्तिस्तु कुतस्ततः ॥३३॥
निर्वाप्यते ज्वलन्नग्निर्जलेन सुमहानपि । उत्तिष्ठेद् यद्यसौ तस्मात्तस्य शान्तिः कुतोऽन्यतः ॥३४॥
[2]नन्वाऽऽज्ञाफलमैश्वर्यमाज्ञा दुर्वृत्तशासनम् । ईश्वरः स्थाणुरप्युक्तः क्रियाशून्यो[3] यदीश्वरः ॥३५॥
तन्निवर्तय दुर्वृत्ताद् बलिमाशु पशूपमम् । प्रद्वेषः कोऽस्य मित्रारिसमभावेषु साधुषु ॥३६॥
साधोः शीतलशीलस्य[4] तापनं न हि शान्तये । गाढतप्तो दहत्येव तोयात्मा विकृतिं गतः ॥३७॥

विचार कर तथा दयासे युक्त हो कहने लगे कि हा ! आज अकम्पनाचार्य आदि सात सौ मुनियों-पर अभूतपूर्व दारुण उपसर्ग हो रहा है ॥२५-२६॥ उस समय उनके पास पुष्पदन्त नामका क्षुल्लक बैठा था। गुरुके मुखसे उक्त दयार्द्र वचन सुन उसने बड़े संभ्रमके साथ पूछा कि हे नाथ ! वह उपसर्ग कहाँ हो रहा है ? इसके उत्तरमें गुरुने स्पष्ट कहा कि हस्तिनापुरमें ॥२७॥ क्षुल्लकने पुनः कहा कि हे नाथ ! यह उपसर्ग किससे दूर हो सकता है ? इसके उत्तरमें गुरुने कहा कि जिसे विक्रिया ऋद्धिकी सामर्थ्य प्राप्त है तथा जो इन्द्रको भी धौंस दिखानेमें समर्थ है ऐसे विष्णुकुमार मुनिसे यह उपसर्ग दूर हो सकता है ॥२८॥ क्षुल्लक पुष्पदन्तने उसी समय जाकर विष्णुकुमार मुनिसे यह समाचार कहा और उन्होंने 'विक्रिया ऋद्धि प्राप्त हुई है या नहीं ?' इसकी परीक्षा की ॥२९॥ उन्होंने परीक्षाके लिए सामने खड़ी पर्वतकी दीवालके आगे अपनी भुजा फैलाई सो वह भुजा, पर्वतकी उस दीवालको भेदनकर विना किसी रुकावटके दूरतक इस तरह आगे बढ़ती गई जिस तरह मानो पानीमें ही बढ़ी जा रही हो ॥३०॥

तदनन्तर जिन्हें ऋद्धिकी प्राप्तिका निश्चय हो गया था, जो जिनशासनके स्नेही थे और नम्र मनुष्योंके लिए अत्यन्त प्रिय थे ऐसे विष्णुकुमार मुनि उसी समय विनयावनत राजा पद्मके पास जाकर उससे बोले कि हे पद्मराज ! राज्य पाते ही तुमने यह क्या कार्य प्रारम्भ कर रक्खा ? ऐसा कार्य तो कुरुवंशियोंमें पृथिवीपर कभी हुआ ही नहीं ॥३१-३२॥ यदि कोई दुष्टजन तपस्वी-जनोंपर उपसर्ग करता है तो राजाको उसे दूर करना चाहिए। फिर राजासे ही इस उपसर्गकी प्रवृत्ति क्यों हो रही है ? ॥३३॥ हे राजन् ! जलती हुई अग्नि कितनी ही महान् क्यों न हो अन्त-में जलके द्वारा शान्त कर दी जाती है फिर यदि जलसे ही अग्नि उठने लगे तो अन्य किस पदार्थसे उसकी शान्ति हो सकती है ? ॥३४॥ निश्चयसे ऐश्वर्य, आज्ञारूप फलसे सहित है अर्थात् ऐश्वर्यका फल आज्ञा है और आज्ञा दुराचारियोंका दमन करना है, यदि ईश्वर—राजा इस क्रियासे शून्य है—दुष्टोंका दमन करनेमें समर्थ नहीं है तो फिर ऐसे ईश्वरको स्थाणु—ठूँठ भी कहा है अर्थात् वह नाममात्रका ईश्वर है ॥३५॥ इसलिए पशुतुल्य बलिको इस दुष्कार्यसे शीघ्र ही दूर करो। मित्र और शत्रुओंपर समान भाव रखनेवाले मुनियोंपर इसका यह द्वेष क्या है ? ॥३६॥ शीतल स्वभावके धारक साधुको सन्ताप पहुँचाना शान्तिके लिए नहीं है क्योंकि जिस प्रकार अधिक तपाया हुआ पानी विकृत होकर जला ही देता है उसी प्रकार अधिक

---

१. अरुद्धः प्रसरः म० । २. न त्वाज्ञा म० । ३. उक्तक्रियाशून्यो म० । ४. शीतलशीतस्य म० ।

धीराः प्रच्छन्नसामर्थ्या [1]गाढावष्टब्धमूर्तयः । साधवोऽपि कदाचित् स्युर्दाहका ननु वह्निवत् ॥३८॥
तेन ते यावदायाति नापायो वस्तुपेक्षणम् । नृप ! तावन्निवर्तस्व मोपेक्षस्व स्वतोऽन्यतः ॥३९॥
पद्मस्ततो नतः प्राह नाथ ! राज्यं मया बलेः । सप्ताहावधिकं दत्तं नाधिकारोऽधुनाऽत्र मे ॥४०॥
त्वमेव भगवन् ! गत्वा शाधि ते कुरुते वचः । बलिर्दाक्षिण्यतोऽन्यूनादित्युक्ते बलिमाप सः ॥४१॥
प्राह चैनमथो साधो ! किं दिनार्द्धनिमित्तकम् । संवर्द्धनमधर्मस्य कुरुषे कर्म गर्हितम् ॥४२॥
तपःकर्मैकनिष्ठैस्तैः किमनिष्टमनुष्ठितम् । वरिष्ठेन त्वया येषु कनिष्ठेनेव यत्कृतम् ॥४३॥
स्वकर्मबन्धभीरुत्वान्नान्यानिष्टं कदाचन । तपस्विनो विचेष्टन्ते मनोवाक्कायकर्मभिः ॥४४॥
तदित्थमुपशान्तेषु न ते युक्तं दुरीहितम् । उपसंहर शान्त्यर्थमुपसर्गं प्रमादजम् ॥४५॥
ततो बलिरुवाचामी यान्ति मे यदि राज्यतः । तदा निरुपसर्गः स्यादन्यथा तदवस्थितिः ॥४६॥
विष्णुरूचे स्वयोगस्था न यान्ति पदमप्यतः । कुर्वन्त्यमी तनुत्यागं न व्यवस्थितिलङ्घनम् ॥४७॥
अनुमन्यस्व मे भूमिं स्थातुं तेषां पदत्रयम् । माऽतिकर्कशमात्मानं कुर्वयाचकयाचितः ॥४८॥
अनुमन्याब्रवीदित्थं तद्बहिः पदमप्यमी । यद्यतीयुस्ततो दण्ड्या न मे दोषोऽत्र विद्यते ॥४९॥
तदा हि पुरुषो लोके प्रत्यवायेन युज्यते । यदा प्रच्यवते वाक्यात् न तु वाक्यस्य पालकः ॥५०॥

दुःखी किया हुआ साधु विकृत होकर जला ही देता है—शाप आदिसे नष्ट ही कर देता है ॥३७॥ जो धीर-वीर हैं, जिनकी सामर्थ्य छिपी हुई है और जिन्होंने अपने शरीरको अच्छी तरह वश कर लिया है ऐसे साधु भी कदाचित् अग्निके समान दाहक हो जाते हैं ॥३८॥ इसलिए हे राजन् ! जब तक तुम्हारे ऊपर कोई बड़ा अनिष्ट नहीं आता है तब तक तुम बलिके इस कुकृत्यके प्रति की जानेवाली अपनी उपेक्षाको दूर करो। स्वयं अपने तथा आश्रित रहनेवाले अन्य जनोंके प्रति उपेक्षा न करो ॥३९॥

तदनन्तर राजा पद्मने नम्रीभूत होकर कहा कि हे नाथ ! मैंने बलिके लिए सात दिनका राज्य दे रक्खा है इसलिए इस विषयमें मेरा अधिकार नहीं है ॥४०॥ हे भगवन् ! आप स्वयं ही जाकर उसपर शासन करें आपके अखण्ड चातुर्यसे बलि अवश्य ही आपकी बात स्वीकृत करेगा। राजा पद्मके ऐसा कहनेपर विष्णुकुमार मुनि बलिके पास गये ॥४१॥ और बोले कि हे भले आदमी ! आधे दिनके लिए अधर्मको बढ़ानेवाला यह निन्दित कार्य क्यों कर रहा है ? ॥४२॥ अरे ! एक तपरूप कार्यमें ही लीन रहनेवाले उन मुनियोंने तेरा क्या अनिष्ट कर दिया जिससे तूने उच्च होकर भी नीचकी तरह उनपर यह कुकृत्य किया ॥४३॥ अपने कर्मबन्धसे भीरु होनेके कारण तपस्वी मन, वचन, कायसे कभी दूसरेका अनिष्ट नहीं करते ॥४४॥ इसलिए इस तरह शान्त मुनियोंके विषयमें तुम्हारी यह दुश्चेष्टा उचित नहीं है। यदि शान्ति चाहते हो तो शीघ्र ही इस प्रमादजन्य उपसर्गका संकोच करो ॥४५॥ तदनन्तर बलिने कहा कि यदि ये मेरे राज्यसे चले जाते हैं तो उपसर्ग दूर हो सकता है अन्यथा उपसर्ग ज्योंका-त्यों बना रहेगा ॥४६॥ इसके उत्तरमें विष्णुकुमार मुनिने कहा कि ये सब आत्मध्यानमें लीन हैं इसलिए यहाँसे एक डग भी नहीं जा सकते। ये अपने शरीरका त्याग भले ही कर देंगे पर व्यवस्थाका उल्लंघन नहीं कर सकते ॥४७॥ उन मुनियोंके ठहरनेके लिए मुझे तीन डग भूमि देना स्वीकृत करो। अपने आपको अत्यन्त कठोर मत करो। मैंने कभी किसीसे याचना नहीं की फिर भी इन मुनियोंके ठहरनेके निमित्त तुमसे तीन डग भूमिकी याचना करता हूँ अतः मेरी बात स्वीकृत करो ॥४८॥ विष्णुकुमार मुनिकी बात स्वीकृत करते हुए बलिने कहा कि यदि ये उस सीमाके बाहर एक डगका भी उल्लंघन करेंगे तो दण्डनीय होंगे इसमें मेरा अपराध नहीं है ॥४९॥ क्योंकि लोकमें मनुष्य

---

१. सुगाढा वष्ट- म० ।

तं कूटव्यवहारस्थमविनेयमनार्जवम् । दुष्टाहिमिव दुःशीलं वशीकर्तुं प्रचक्रमे ॥५१॥
मिनोमि पाप ! पश्य त्वं पदत्रयमितीरयन् । व्यजृम्भत महाकायो ज्योतिःपटलमास्पृशन् ॥५२॥
मेरावेकक्रमो न्यस्तो द्वितीयो मानुषोत्तरे । अलाभादवकाशस्य तृतीयोऽभ्रमदम्बरे ॥५३॥
तदा विष्णोः प्रभावेण क्षुभिते भुवनत्रये । किं किमेतदितिध्वाना जाताः किंपुरुषादयः ॥५४॥
अनुकर्णं मुनेस्तस्य वीणावंशादिवादिनः । मृदुगीताः सनारीकाः जगुर्गन्धर्वपूर्वकाः ॥५५॥
तस्य रक्ततलः पादो भ्रमन् स्वैरं नभस्यभात् । सङ्गीतकिंनरादिस्त्रीमुखाब्जनखदर्पणः ॥५६॥
संक्षोभं मनसो विष्णो प्रभो संहर संहर । तपःप्रभावतस्तेऽद्य चलितं भुवनत्रयम् ॥५७॥
देवैर्विद्याधरैर्वीरैः अव्यगान्धर्ववीणिभिः । सिद्धान्तगीतिकागानैरुच्चैराकाशचारणैः ॥५८॥
इति प्रसाद्यमानोऽसौ शनैः संहृत्य विक्रियाम् । स्वभावस्थोऽभवद्भानुर्यथोत्पातशमेस्थितः[1] ॥५९॥
उपसर्गं विनाश्याशु बलिं बद्ध्वा सुरास्तदा । विनिगृह्य दुरात्मानं देशाद् दूरं निराकिरन् ॥६०॥
वीणाघोषोत्तरश्रेणौ खगानां किंनरैः कृता । सिद्धकूटे महाघोषा सुघोषा दक्षिणे तटे ॥६१॥
कृत्वा शासनवात्सल्यमुपसर्गविनाशनात् । विष्णुः स्वगुरुपादान्ते विक्रियाशल्यमुज्जहौ ॥६२॥

तभी आपत्तिसे युक्त होता है जब वह अपने वचनसे च्युत हो जाता है। अपने वचनका पालन करनेवाला मनुष्य लोकमें कभी आपत्तियुक्त नहीं होता ॥५०॥

तदनन्तर जो कपट-व्यवहार करनेमें तत्पर था, शिक्षाके अयोग्य था, कुटिल था और दुष्ट साँपके समान दुष्ट स्वभावका धारक था ऐसे उस बलिको वश करनेके लिए विष्णुकुमार मुनि उद्यत हुए ॥५१॥ 'अरे पापी ! देख, मैं तीन डग भूमिको नापता हूँ' यह कहते हुए उन्होंने अपने शरीरको इतना बड़ा बना लिया कि वह ज्योतिष्पटलको छूने लगा ॥५२॥ उन्होंने एक डग मेरुपर रक्खी दूसरी मानुषोत्तरपर और तीसरी अवकाश न मिलनेसे आकाशमें ही घूमती रही ॥५३॥ उस समय विष्णुके प्रभावसे तीनों लोकोंमें क्षोभ मच गया। किम्पुरुष आदि देव 'क्या है ? क्या है ?' यह शब्द करने लगे ॥५४॥ वीणा-बाँसुरी आदि बजानेवाले कोमल गीतोंके गायक गन्धर्वदेव अपनी-अपनी स्त्रियोंके साथ उन मुनिराजके समीप मनोहर गीत गाने लगे ॥५५॥ लाल-लाल तलुएसे सहित एवं आकाशमें स्वच्छन्दतासे घूमता हुआ उनका पैर अत्यधिक सुशोभित हो रहा था और उसके नख संगीतके लिए इकट्ठी हुई किन्नरादि देवोंकी स्त्रियोंको अपना-अपना मुख-कमल देखनेके लिए दर्पणके समान जान पड़ते थे ॥५६॥ 'हे विष्णो ! हे प्रभो ! मनके क्षोभको दूर करो, दूर करो, आपके तपके प्रभावसे आज तीनों लोक चल-विचल हो उठे हैं' इस प्रकार मधुर गीतोंके साथ वीणा बजानेवाले देवों, धीर-वीर विद्याधरों तथा सिद्धान्त शास्त्रकी गाथाओंको गानेवाले एवं बहुत ऊँचे आकाशमें विचरण करनेवाले चारण ऋद्धिधारी मुनियोंने जब उन्हें शान्त किया तब वे धीरे-धीरे अपनी विक्रियाको संकोच कर उस तरह स्वभावस्थ हो गये—जिस तरह कि उत्पातके शान्त होनेपर सूर्य स्वभावस्थ हो जाता है—अपने मूल रूपमें आ जाता है ॥५७-५९॥ उस समय देवोंने शीघ्र ही मुनियोंका उपसर्ग दूर कर दुष्ट बलिको बाँध लिया और उसे दण्डित कर देशसे दूर कर दिया ॥६०॥ उस समय किन्नरदेव तीन वीणाएँ लाये थे उनमें घोषा नामकी वीणा तो उत्तरश्रेणिमें रहनेवाले विद्याधरोंको दी। महाघोषा सिद्धकूटवासियोंको और सुघोषा दक्षिणतटवासी विद्याधरोंको दी ॥६१॥ इस प्रकार उपसर्ग दूर करनेसे जिनशासनके प्रति वत्सलता प्रकट करते हुए विष्णुकुमार मुनिने सीधे गुरुके पास जाकर प्रायश्चित्त द्वारा विक्रियाकी शल्य छोड़ी ॥६२॥

---

१. यथोत्पातः समोत्थितः म० ।

तपो घोरमसौ कृत्वा कृत्वाऽन्तं घातिकर्मणाम् । विहृत्य केवली विष्णुर्मोक्षमन्ते ययौ विभुः ॥६३॥
इदं विष्णुकुमारस्य चरितं [1]दुरिताशनम् । यः शृणोति जनो भक्त्या दृष्टिशुद्धिं श्रयेत सः ॥६४॥

शार्दूलविक्रीडितम्

स्वस्थानाच्चलयेद्दलं गुरुतरान् कामन्दराम्मन्दरां-
श्चन्द्रार्कानपि [2]पातयेत्करतलव्यापारत[3]ः पारतः ।
तोयेशान् विकिरेदुपप्लवयुताश्चिमुक्तये मुक्तये
साधुः स्यात् किमु दुष्करं जिनतपःश्रीयोगिनां योगिनाम् ॥६५॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ विष्णुकुमारमाहात्म्यवर्णनो नाम विंशः सर्गः ॥२०॥

स्वामी विष्णुकुमार, घोर तपश्चरण कर तथा घातिया कर्मोंका क्षयकर केवली हुए और विहार कर अन्तमें मोक्षको प्राप्त हुए ॥६३॥ गौतम स्वामी कहते हैं कि जो मनुष्य विष्णुकुमार मुनिके इस पापापहारी चरितको भक्तिपूर्वक सुनता है वह सम्यग्दर्शनकी शुद्धिको प्राप्त होता है ॥६४॥ साधु चाहे तो अतिशय विशाल मन्दराचलोंको भी स्वेच्छानुसार भयसे अपने स्थानसे विचलित कर सकता है, हथेलियोंके व्यापारसे सूर्य और चन्द्रमाको भी आकाशसे नीचे गिरा सकता है, उपद्रवोंसे युक्त लहराते हुए समुद्रोंको भी बिखेर सकता है और जो मुक्तिका पात्र नहीं है उसे भी मुक्ति प्राप्त करा सकता है, सो ठीक ही है क्योंकि जिनशासन प्रणीत तपोलक्ष्मीके धारक योगियोंके लिए क्या कठिन है ? अर्थात् कुछ भी नहीं ॥६५॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्यविरचित हरिवंशपुराणमें विष्णुकुमारका वर्णन करनेवाला बीसवाँ सर्ग समाप्त हुआ ॥२०॥

---

१. दुरितनाशनम् म० । २. पातयेऽम्बरतल -म० । ३. व्यापारतोपारतः क० ।

एकविंशतितमः सर्गः

अथ गान्धर्वसेनां तां कथञ्चित्खेचरान्वयाम् । अतिराजविभूतिं च चारुदत्तं निरूप्य सः ॥१॥
चारुगोष्ठीसुखास्वादश्चारुदत्तं यदूत्तमः । उदारचरितोऽपृच्छदुदारचरितप्रियः ॥२॥
[1]आर्यास्य कथमीदृश्यः सादृश्यपरिवर्जिताः । दैवपौरुषसूचिन्यः सम्पदो भवतार्जिताः ॥३॥
वद विद्याधरी चेयं कुतः स्तुत्या तवास्पदे । न्यवसद् वसुभिः पूर्णे वर्षत्कर्णामृतं मम ॥४॥
इति पृष्टोऽवदत्सोऽस्मै प्रहृष्टमतिरादरात् । साधु पृष्टमिदं धीर ! वच्मि ते शृणु वृत्तकम् ॥५॥
आसीदत्रैव वैश्येशश्चम्पायां सुमहाधनः । भानुदत्त इति ख्यातः सुभद्रा तस्य भामिनी ॥६॥
सम्यग्दर्शनसंशुद्धिनानाणुव्रतधारिणोः । काले याति सुखाम्भोधिमग्नयोर्यौवनस्थयोः ॥७॥
चिरायति तयोश्चित्तनयनामृतवर्षिणि । साक्षाद्गृहिफले श्रीमदपत्यमुखपङ्कजे ॥८॥
अर्हदायतने पूजां कुर्वाणावन्यदा च तौ । चारणश्रमणं दृष्ट्वा पुत्रोत्पत्तिमपृच्छताम् ॥९॥
अचिरेणैव तेनापि यतिना कृपया तयोः । प्रधानसुतसम्भूतिरादिष्टा पृष्टमात्रतः ॥१०॥
उत्पन्नश्चाचिरेणाहं तयोः प्रीतिकरः सुतः । चारुदत्ताभिधानश्च कृतः कृतमहोत्सवः ॥११॥
कृताणुव्रतदीक्षश्च ग्राहितः सकलाः कलाः । बालचन्द्रः परां वृद्धिं बान्धवाम्भोनिधेरधात् ॥१२॥

अथानन्तर जिन्हें उत्तमोत्तम गोष्ठियोंके सुखका स्वाद था, जो स्वयं उदार चरितके धारक थे और उदारचरितके धारक मनुष्योंके लिए अत्यन्त प्रिय थे ऐसे यदुवंशशिरोमणि वसुदेव, किसी तरह विद्याधरोंके कुलमें उत्पन्न गान्धर्वसेनाको एवं राजाओंकी विभूतिको तिरस्कृत करनेवाले चारुदत्तको देखकर उनसे पूछने लगे कि—हे पूज्य ! जो अपनी तुलना नहीं रखतीं तथा जो आपके भाग्य और पुरुषार्थ दोनोंको सूचित करनेवाली हैं ऐसी ये सम्पदाएँ आपने किस तरह प्राप्त कीं ? कहिए कि यह प्रशंसनीय विद्याधरी, धन-धान्यसे परिपूर्ण आपके भवनमें निवास करती हुई मेरे कानोंमें अमृतकी वर्षा क्यों कर रही है ? ॥१-४॥ वसुदेवके द्वारा इस प्रकार पूछे जानेपर चारुदत्त बहुत ही प्रसन्न हुआ और आदरके साथ कहने लगा कि हे धीर ! तुमने यह ठीक पूछा है । अच्छा, ध्यानसे सुनो मैं तुम्हारे लिए अपना वृत्तान्त कहता हूँ ॥५॥

इसी चम्पापुरीमें अतिशय धनाढ्य भानुदत्त नामका वैश्यशिरोमणि रहता था । उसकी स्त्रीका नाम सुभद्रा था ॥६॥ सम्यग्दर्शनकी विशुद्धताके साथ नाना अणुव्रतोंको धारण करनेवाले सुखरूपी सागरमें निमग्न एवं पूर्ण यौवनसे सुशोभित उन दोनोंका समय सुखपूर्वक बीत रहा था ॥७॥ तदनन्तर किसी समय जब कि उन दोनोंके चित्त और नेत्रोंके लिए अमृत बरसाने वाला एवं गृहस्थीका साक्षात् फलस्वरूप, भाग्यशाली पुत्रका मुख कमल विलम्ब कर रहा था अर्थात् उन दोनोंके जब पुत्र उत्पन्न होनेमें विलम्ब दीखा तब वे दोनों मन्दिरमें पूजा कर रहे थे उसी समय चारणऋद्धिधारी मुनिके दर्शन कर उन्होंने उनसे पुत्रोत्पत्तिकी बात पूछी ॥८-९॥ पूछते ही उन मुनिराजने दोनों दम्पतियोंपर दया कर कहा कि तुम्हारे शीघ्र ही उत्तम पुत्रकी उत्पत्ति होगी ॥१०॥ और कुछ ही समय बाद उन दोनों दम्पतियोंके आनन्दको बढ़ानेवाला मैं पुत्र हुआ । मेरा चारुदत्त नाम रक्खा गया तथा मेरे जन्मका बड़ा उत्सव मनाया गया ॥११॥ अणुव्रतोंकी दीक्षाके साथ-साथ जिसे समस्त कलाएँ ग्रहण कराई गई थीं ऐसा वह बालकरूपी चन्द्रमा परिवार रूपी समुद्रकी वृद्धि करने लगा । भावार्थ—वह बालक ज्यों-ज्यों कलाओंको ग्रहण करता जाता

१. पूज्य !

वराहगोमुखाभिख्यहरिसिंहतमोऽन्तकाः । मरुभूतिरिति प्रीता वयस्या मेऽभवंस्तदा ॥१३॥
तैः सह क्रीडया यातो निम्नगां रत्नमालिनीम् । [1]अपादोपहतं पश्यन् दम्पत्योः पुलिने पदम् ॥१४॥
आत्तविद्याधराशङ्काः प्रगत्वाऽनुपदं च तम् । रतशय्यामपश्याम श्यामले कदलीगृहे ॥१५॥
रतिव्यतिकरम्लानपुष्पपल्लवतल्पतः । अल्पमन्तरमन्विष्य सुमहागहनं वनम् ॥१६॥
दृष्टो विद्याधरो वृक्षे कीलितो लोहकीलकैः । [2]पार्श्वखेटकखड्गाग्रव्यग्ररक्तनिरीक्षणः ॥१७॥
तिस्रः खेटकसंगूढा गृहीत्वौषधिवर्तिकाः । चालनोत्कीलनोन्मूलव्रणरोहाः कृता मया ॥१८॥
निःकीलो निर्व्रणश्चासौ गृहीत्वा खड्गखेटकौ । निरुत्तरः खमुत्पत्य दधावोत्तरया दिशा ॥१९॥
प्रलापानुपदं गत्वा ह्रियमाणां द्विषा प्रियाम् । विमोच्यादाय तामेत्य मामवोचन्महादरः ॥२०॥
भद्र ! दत्ता यथा प्राणा म्रियमाणाय मे त्वया । तथैव दीयतामाज्ञा[3] वद किं विदधामि ते ॥२१॥
वैताढ्येऽस्ति नृपः श्रेण्यां दक्षिणस्यां हि दक्षिणः । महेन्द्रविक्रमो नाम्ना नगरे शिवमन्दिरे ॥२२॥
तस्यामितगतिर्नाम्ना तनयोऽहमतिप्रियः । मित्रं मे धूमसिंहश्च गौरमुण्डश्च खेचरः ॥२३॥
ह्रीमन्तं पर्वतं ताभ्यामागतेन मयाऽन्यदा । यौवनश्रियमारूढा दृष्टा तापसकन्यका ॥२४॥
हिरण्यरोमतनया शिरीषसुकुमारिका । जहार हृदयं दृष्टा नाम्ना मे सुकुमारिका ॥२५॥

था त्यों-त्यों बन्धुजनोंका हर्षरूपी सागर वृद्धिंगत होता जाता था ॥१२॥ उस समय वराह, गोमुख, हरिसिंह, तमोऽन्तक और मरुभूति ये पाँच मेरे मित्र थे जो मुझे अतिशय प्रिय थे ॥१३॥ एकबार उन मित्रोंके साथ क्रीड़ा करता हुआ मैं रत्नमालिनी नदी गया। वहाँ मैंने किनारेपर किसी दम्पतीका एक ऐसा स्थान देखा जिसपर पहुँचनेके लिए पैरोंके चिह्न नहीं उछले थे ॥१४॥ हम लोगोंको विद्याधर दम्पतीकी आशङ्का हुई इसलिए कुछ और आगे गये वहाँ जाकर हमलोगोंने हरे-भरे कदली गृहमें उस विद्याधर दम्पतीकी रति-शय्या देखी ॥१५॥ रति सम्बन्धी कार्यसे जिसके फूल और पल्लव मुरझा रहे थे ऐसी उस रतिशय्यासे कुछ दूर आगे चलनेपर एक बड़ा सघन वन दिखा ॥१६॥ वहाँ एक वृक्षपर लोहकी कीलोंसे कीलित एक विद्याधर दिखाई दिया। उस विद्याधरके लाल-लाल नेत्र समीपमें पड़ी हुई ढाल और तलवारके अग्रभागमें व्यग्र थे अर्थात् वह बार-बार उन्हींकी ओर देख रहा था ॥१७॥ उसके इस संकेतसे मैंने ढालके नीचे छिपी हुई चालन, उत्कीलन और उन्मूलव्रणरोह नामक तीन दिव्य ओषधियाँ उठा लीं। और चालन नामक ओषधिसे मैंने उस विद्याधरको चलाया, उत्कीलन नामक ओषधिसे उसे कील रहित किया तथा उन्मूलनव्रणरोह नामक ओषधिसे कील निकालनेका घाव भर दिया ॥१८॥ ज्योंही वह विद्याधर कील रहित एवं घाव रहित हुआ त्यों ही ढाल और तलवार लेकर चुपचाप आकाशमें उड़ा और उत्तर दिशाकी ओर दौड़ा ॥१९॥ जिस ओरसे रोनेका शब्द आ रहा था वह उसी ओर दौड़ता गया और शत्रुके द्वारा हरी हुई अपनी प्रियाको छुड़ा लाया। प्रियाको लाकर वह वहीं आया और बड़े आदरके साथ मुझसे बोला कि हे भद्र! जिसप्रकार आज मुझ मरते हुएके लिए आपने प्राण दिये हैं उसी प्रकार आज्ञा दीजिए। कहिए मैं आपका क्या प्रत्युपकार करूँ? ॥२०-२१॥

विजयार्ध पर्वतकी दक्षिण श्रेणीमें एक शिवमन्दिर नामका नगर है। उसमें महेन्द्रविक्रम नामका सरल राजा है। उसी महेन्द्रविक्रम राजाका मैं अतिशय प्यारा अमितगति नामका पुत्र हूँ। धूमसिंह और गौरमुण्ड नामके दो विद्याधर मेरे मित्र हैं ॥२२-२३॥ किसी समय उन दोनों मित्रोंके साथ मैं ह्रीमन्त नामक पर्वतपर आया। वहाँ एक हिरण्यरोम नामका तापस रहता था उसकी पूर्ण यौवनवती एवं शिरीषके फूलके समान सुकुमार सुकुमारिका नामकी सुन्दर कन्या थी।

१. आपदोपहतं म०, ख० । २. पार्श्वे खेटक- म० । ३.-माशां म० ।

गाढाकल्पकशल्याय पित्रा मे याचिता च सा । संवृत्तश्चोभयोराशु विवाहः परमोत्सवः ॥२६॥
धूमसिंहोऽपि यामुष्यां साभिलाषोऽभिलक्षितः । अप्रमत्ततया चाहं विहरामि तया सदा ॥२७॥
रममाणोऽद्य तेनाहं कीलितो मोचितस्त्वया । हृताऽसौ मोचिता शत्रोर्मयेयं सुकुमारिका ॥२८॥
तदेष योज्यतामद्य जनः कर्मणि वाञ्छिते । वयोज्येष्ठोऽपि तं कुर्वे प्राणदस्यानुवर्तनम् ॥२९॥
भवतोद्धृतशल्यं मां जीवन्तमिह जन्मनि । कृतप्रत्युपकारं ते प्रतीह्युद्धृतशल्यकम् ॥३०॥
इति प्रियंवदोऽवादि स्त्रीसखः खेचरो मया । कृतं कृतं हि मे सर्वं त्वया सद्भावदर्शिना ॥३१॥
शुद्धं दर्शयता भावं वद किं न कृतं त्वया । तदेवोपकृतं पुंसां यत् सद्भावदर्शनम् ॥३२॥
पुण्यवान् ननु पूज्योऽहं तत्तवानघदर्शनम् । आप्तं मे सुलभं लोके सामान्यनरदुर्लभम् ॥३३॥
सर्वसाधारणं नृणामवस्थान्तरवर्तनम्[1] । एवं विषण्णमना मा भूः कीलितोऽस्मीति वैरिणा ॥३४॥
उपकारमतिस्तात ! यदि मां प्रति ते ततः । मय्यपत्यमतिः कार्या त्वया नित्यमितीरिते ॥३५॥
बाढमित्यभिधायासौ नाम गोत्रं च मे ततः । पृष्ट्वाभिधाय [2]मापृच्छ्य स्त्रीसखः स समुद्ययौ ॥३६॥
प्रविष्टाश्च वयं चम्पां विद्याधरकथारताः । दृष्टश्रुतानुभूतं हि नवं धृतिकरं नृणाम् ॥३७॥
[3]ऊढा च यौवनस्थेन नाम्ना मित्रवती मया । सर्वार्थस्य सुमित्राया मातुलस्य तनूभवा ॥३८॥
शास्त्रव्यसनिनो मेऽभूदात्मस्त्रीविषयेऽपि धीः । शास्त्रव्यसनमन्येषां व्यसनानां हि बाधकम् ॥३९॥

वह मेरे देखनेमें आई और देखते ही साथ उसने मेरा मन हर लिया ॥२४-२५॥ मैं वहाँसे चला तो आया परन्तु उसकी प्राप्तिकी उत्कण्ठारूप शल्य मेरे मनमें बहुत गहरी लग गई। अन्तमें पिताने मेरे लिए उस कन्याकी याचना की और शीघ्र ही दोनोंका बड़े उत्सवके साथ विवाह हो गया ॥२६॥ चूँकि मुझे दिखा कि मेरा मित्र धूमसिंह भी इस सुकुमारिकाको पानेकी अभिलाषा रखता है इसलिए मैं सदा प्रमादरहित होकर इसके साथ विहार करता हूँ ॥२७॥ परन्तु आज मैं इसके साथ रमण कर रहा था कि वह धूमसिंह मुझे कीलित कर इस सुकुमारिकाको हर ले गया। आपने मुझे छुड़ाया और मैं इसे शत्रुसे छुड़ा लाया हूँ ॥२८॥ इसलिए आज इस जनको (मुझे) इच्छित कार्यमें लगाइए। क्योंकि आप मेरे प्राणदाता हैं इसलिए अवस्थामें ज्येष्ठ होनेपर भी मैं आपकी सेवा करूँगा ॥२९॥ यद्यपि आपने मेरी शल्य निकालकर मुझे जीवित किया है तथापि यथार्थमें मेरी शल्य तभी निकलेगी जब मैं आपका प्रत्युपकार कर लूँगा ॥३०॥

इस प्रकार स्त्री सहित मधुर वचन बोलनेवाले उस विद्याधरसे मैंने कहा कि जब आप मेरे प्रति इस तरह शुभ भाव दिखला रहे हैं तब मेरा सब काम हो चुका। कहिए शुद्ध अभिप्रायको दिखाते हुए आपने मेरा क्या नहीं किया है? मनुष्योंको जो शुभ भावको दिखाना है वही तो उनका उपकार है ॥३१-३२॥ हे निष्पाप! निश्चयसे मैं आज पुण्यवान् और पूज्य हुआ हूँ क्योंकि संसारमें अन्य सामान्य मनुष्योंके लिए दुर्लभ आपका दर्शन मुझे सुलभ हुआ है ॥३३॥ मनुष्योंकी अवस्थाओंका पलटना सर्वसाधारण बात है इसलिए मैं शत्रुके द्वारा कीलित हुआ। यह सोचकर आप खिन्नचित्त न हों ॥३४॥ हे तात! यदि आपकी मेरे प्रति उपकार करनेकी भावना ही है तो आप मुझे सदा अपना पुत्र समझिए। इस प्रकार मेरे कहनेपर उसने कहा कि बहुत ठीक है। तदनन्तर वह मेरा नाम और गोत्र पूछकर स्त्री सहित आकाशमें उड़ गया ॥३५-३६॥ और हम लोग उसी विद्याधरकी कथा करते हुए चम्पा नगरीमें प्रविष्ट हुए सो ठीक ही है क्योंकि देखी-सुनी और अनुभवमें आई नूतन वस्तु ही मनुष्योंको सुखदायक होती है ॥३७॥

तरुण होनेपर मैंने अपने मामा सर्वार्थकी सुमित्रा स्त्रीसे उत्पन्न मित्रवती नामक कन्याके साथ विवाह किया ॥३८॥ क्योंकि मुझे शास्त्रका व्यसन अधिक था इसलिए अपनी स्त्रीके विषयमें

१. वर्धनं म० । २. मां पृच्छ्य क०, ख०, ग०, घ० । मा = माम् + आपृच्छ्य, इतिच्छेदः ।
३. रूढा म० ।

रुद्रदत्तः पितृव्यो मे बहुव्यसनसक्तधीः । सम्मान्य योजितो मात्रा कामुकव्यवहारवित् ॥४०॥
आसीत्कलिङ्गसेनाऽत्र गणिका गणनायिका । सुता वसन्तसेनाऽस्या वसन्तश्रीरिव श्रिया ॥४१॥
कन्याऽसौ नृत्यगीतादिकलाकौशलशालिनी । सौरूप्यस्य परा कोटिर्यौवनस्य नवोन्नतिः ॥४२॥
नृत्यारम्भेऽन्यदा तस्या रुद्रदत्तेन सङ्गतः । ससाहित्यजनाकीर्णे स्थितोऽहं नृत्यमण्डपे ॥४३॥
सूचिनाटकसूच्यग्रे सा जातिमुकुलाञ्जलिम् । व्यकिरत् [1]प्रविकासं च प्राप्तेषु मुकुलेषु च ॥४४॥
सुष्ठुकारे प्रयुक्तेऽस्याः कैश्चित्साहित्यवर्तिभिः । मया विकासकालज्ञमालाकारस्य योजिते ॥४५॥
तस्या दत्ते बुधैस्तस्मिन्नङ्गुष्ठेऽभिनये कृते । नापितस्य मया दत्ते नखमण्डलशोधिनः ॥४६॥
कुक्षेर्गोमक्षिकायाश्च व्युरासाभिनये कृते । पूर्ववत् तैः कृते प्राप्तगोपालस्य मया पुनः ॥४७॥
रसभावविवेकस्य व्यञ्जिका सा च सम्प्रति । सुष्ठुकारमदात्प्रीता स्वाङ्गुलिस्फोटकारिणी ॥४८॥
ततः सर्वस्य लोकस्य पश्यतो मम सम्मुखम् । ननाट नाटकं हारि साऽनुरागवशा च सा ॥४९॥
उपसंहृतनृत्या च निजप्रासादवर्तिनी । स्वमात्रेऽकथयद्भावमिति साकल्पकातुरा ॥५०॥
इह जन्मनि मे मातश्चारुदत्तात्परस्य न । सङ्कल्पस्तेन तेनारं मां योजयितुमर्हसि ॥५१॥
माता ज्ञात्वा सुताचित्तं चारुदत्तस्य योजने । दानमानादिनाभ्यर्च्य रुद्रदत्तमयोजयत् ॥५२॥
तेन चाहमुपायेन व्रजन्नश्चाग्रतः पथि । गजौ प्रयोज्य तद्वेश्यावेश्म जातु प्रवेशितः ॥५३॥

मेरी कुछ भी रुचि नहीं थी सो ठीक ही है क्योंकि शास्त्रका व्यसन अन्य व्यसनोंका बाधक है ॥३९॥ मेरा एक रुद्रदत्त नामका काका था जो अनेक व्यसनोंमें आसक्त था तथा कामीजनोंके समस्त व्यवहारको जाननेवाला था। मेरी माताने उसे मेरे साथ लगा दिया ॥४०॥ इसी चम्पा नगरीमें एक कलिङ्गसेना नामकी वेश्या थी जो समस्त वेश्याओंकी शिरोमणि थी और उसकी वसन्तसेना नामकी पुत्री थी जो शोभामें वसन्तकी लक्ष्मीके समान जान पड़ती थी ॥४१॥ वह वसन्तसेना नृत्य-गीत आदि कलाओं सम्बन्धी कौशलसे सुशोभित थी, सौन्दर्यकी परम सीमा थी और यौवनकी नूतन उन्नति थी ॥४२॥ किसी एक दिन वसन्तसेनाका नृत्य प्रारम्भ होनेवाला था। उसके लिए मैं भी रुद्रदत्तके साथ साहित्यिक जनोंसे भरे हुए नृत्य-मण्डपमें बैठा था ॥४३॥ वह सूचीनृत्य करना चाहती थी। उसके लिए उसने सुइयोंके अग्रभागपर अञ्जलि भरकर जाति पुष्पोंकी बोंड़ियाँ बिखेर दीं और गायनके प्रभावसे जब सब बोंड़ियाँ खिल गईं तो सभामें बैठे हुए कितने ही लोग उसकी प्रशंसा करने लगे। मैं जानता था कि पुष्पोंके खिलनेसे कौन-सा राग होता है, इसलिए मैंने उसे मालाकार रागका संकेत कर दिया। सूची-नृत्यके बाद उसने अङ्गुष्ठ नृत्य किया तो सभाके विद्वान् उसकी प्रशंसा करने लगे। परन्तु मैंने नखमण्डलको शुद्ध करने-वाले नापित रागका संकेत कर दिया। तदनन्तर उसने गौ और मक्षिकाकी कुक्षिका अभिनय किया तो अन्य लोग उसकी प्रशंसा करने लगे। परन्तु मैंने गोपाल रागका संकेत कर दिया। इस प्रकार रस और भावके विवेकको प्रकट करनेवाली उस वसन्तसेनाने प्रसन्न हो अपनी अङ्गु-लियाँ चटकाती हुई मेरी बहुत प्रशंसा की। तदनन्तर अनुरागसे भरी हुई उक्त वेश्याने सब लोगोंके देखते-देखते मेरे सामने सुन्दर नृत्य किया ॥४४–४९॥ नृत्य समाप्त कर वह अपने घर गई और तीव्र उत्कण्ठासे आतुर हो अपनी मातासे कहने लगी कि हे माता ! इस जन्ममें मेरा चारुदत्तके सिवाय किसी दूसरेके साथ समागमका संकल्प नहीं है इसलिए मुझे शीघ्र ही चारु-दत्तके साथ मिलानेके योग्य हो ॥५०–५१॥ माताने पुत्रीका अभिप्राय जानकर चारुदत्तके साथ मिलानेके लिए दान सम्मान आदिसे सन्तुष्ट कर रुद्रदत्तको नियुक्त किया अर्थात् इस कार्यका भार उसने रुद्रदत्तके लिए सौंप दिया ॥५२॥ किसी दिन मैं रुद्रदत्तके साथ मार्गमें जा रहा था कि

१. प्रविकासात्प्राक् ग० ।

कृतसङ्केतया पूर्वं कृतः कालिङ्गसेनया । स्वागतासनदानाद्यैरुपचारोऽत्र चावयोः ॥५४॥
द्यूते तत्रोत्तरीयं च [1]रौद्रदत्तं जितं तथा । ततोऽहमुद्यतो रन्तुमपसार्य तमेतया ॥५५॥
वसन्तसेनया द्यूतादपसार्य स्वमातरम् । कृता दुरोदरक्रीडा मया सह विदग्धया ॥५६॥
आसक्तश्च चिरं तत्र पायितोऽतिपिपासितः । मतिमोहनयोगेन वासितं शिशिरोदकम् ॥५७॥
अतिविश्रम्भतस्तस्यामनुरागे समोद्गते । करग्रहणमेतस्या जनन्या कारितोऽस्म्यहम् ॥५८॥
वसता तत्र वर्षाणि मया द्वादश विस्मृतौ । पितरौ मित्रवत्यामा कार्येष्वन्येषु का कथा ॥५९॥
वृद्धसेवाविवृद्धा मे गुणास्तरुणिसेवया । दोषैरुपचितैश्छन्नाः सज्जना इव दुर्जनैः ॥६०॥
स्वर्णषोडशकोटीषु प्रविष्टासु निजं गृहम् । दृष्ट्वा कालिङ्गसेनान्ते मित्रवत्या विभूषणम् ॥६१॥
जगौ वसन्तसेनां तामेकान्ते मन्त्रकोविदा । दुहितर्हितमाभाषे कर्णे मद्वचनं कुरु ॥६२॥
गुरुवाक्यामृतं मन्त्रं सदाभ्यस्यति यो जनः । तमनर्थग्रहा दूराद् ढौकन्ते न कदाचन ॥६३॥
जानास्येव जघन्या नो [2]वृत्तिं यद्वित्तवान् प्रियः । हेयः पीलितसारः स्यादिक्षवलक्कवन्नरः ॥६४॥
तनुलग्नमलङ्कारं चारुदत्तस्य भार्यया । प्रेषितं [3]प्रेष्यकारुण्याद् व्यसर्जयमहं पुनः ॥६५॥
तदस्य पीतसारस्य कुरु तावद्विमोक्षणम् । सारवन्तं नरं त्वन्यं नवेक्षुमिव भक्षय ॥६६॥

उसने उपाय कर मेरे आगे और पीछे दो-दो हाथियोंको लड़ा दिया और सुरक्षा पानेके लिए मुझे उस वेश्याके घर प्रविष्ट कर दिया ॥५३॥ कलिङ्गसेना वेश्याको इस बातका पहलेसे ही संकेत कर दिया गया। इसलिए उसने स्वागत तथा आसन आदिके द्वारा हम दोनोंका सत्कार किया ॥५४॥ तदनन्तर कलिङ्गसेना और रुद्रदत्तका जुआ प्रारम्भ हुआ सो कलिङ्गसेनाने जुआमें रुद्रदत्तका दुपट्टा तक जीत लिया। तब मैं रुद्रदत्तको हटाकर कलिङ्गसेनाके साथ जुआ खेलनेके लिए उद्यत हुआ ॥५५॥ मुझे उद्यत देख वसन्तसेनासे भी नहीं रहा गया। इसलिए वह चतुरा अपनी माताको अलग कर मेरे साथ जुआ खेलने लगी ॥५६॥ मैं जुआ खेलनेमें चिरकालतक आसक्त रहा। इसीके बीच मुझे जोरकी प्यास लगी तो उसने बुद्धिको मोहित करनेवाले योगसे सुवासित ठण्डा पानी मुझे पिलाया ॥५७॥ अतिशय विश्वासके कारण जब उसपर मेरा अनुराग बढ़ गया तब उसकी माताने मुझे उसका हाथ पकड़ा दिया ॥५८॥ मैं उसमें इतना आसक्त हुआ कि उसके घर बारह वर्षतक रहा। इस बीचमें मैंने अपने माता-पिता तथा प्रिय स्त्री मित्रवतीको भी भुला दिया। फिर अन्य कार्योंकी तो कथा ही क्या थी ? ॥५९॥ वृद्धजनोंकी सेवासे पहले जो मेरे गुण-वृद्धिको प्राप्त हुए थे वे तरुणीकी सेवासे उत्पन्न हुए दोषोंसे उस तरह आच्छादित हो गये जिस तरह कि दुर्जनोंसे सज्जन आच्छादित हो जाते हैं ॥६०॥ हमारे पिता सोलह करोड़ दीनारके धनी थे। सो जब सब धन क्रम-क्रमसे कलिङ्गसेनाके घर आ गया और अन्तमें मित्रवतीके आभूषण भी आने लगे तब यह देख मन्त्र करनेमें निपुण कलिङ्गसेना एक दिन एकान्तमें वसन्तसेनासे बोली कि बेटी ! मैं हितकी बात कहती हूँ सो मेरे वचन कानमें धर ॥६१-६२॥ जो मनुष्य गुरुजनोंके वचनामृत रूप मन्त्रका सदा अभ्यास करता है अनर्थ रूपी ग्रह सदा उससे दूर रहते हैं, कभी उसके पास नहीं आते ॥६३॥ तू हम लोगोंकी इस जघन्य वृत्तिको जानती ही है कि धनवान् मनुष्य ही हमारा प्रिय है। जिसका धन खींच लिया है ऐसा मनुष्य ईखके छिलकेके समान छोड़ने योग्य होता है ॥६४॥ आज चारुदत्तकी भार्याने अपने शरीरका आभूषण उतार कर भेजा था सो उसे देख मैंने दयावश वापिस कर दिया है ॥६५॥ इसलिए अब सारहीन (निर्धन) चारुदत्तका साथ छोड़ और नई ईखके समान किसी दूसरे सारवान् (सधन) मनुष्यका उपभोग कर ॥६६॥

१. रुद्रदत्तस्येदं रौद्रदत्तं, उत्तरीयं वस्त्रम् । २. जघन्यातो वृत्तिर्यद्वित्तवान् प्रियः म० । ३. प्रेष्य म० ।

शङ्कुनेव ततः कर्णे ताडिता साऽतिपीडिता । अगाद् मातरं मातः किमिदं गदितं त्वया ॥६७॥
कौमारं परिभुज्यित्वा चारुदत्तं चिरोषितम् । कुबेरेणापि मे कार्यं नेश्वरेण परेण किम् ॥६८॥
प्राणैरपि हि मे [1]नार्थश्चारुदत्तवियोजकैः । मैवं वोचः पुनर्मातर्यदि मे जीवितं प्रियम् ॥६९॥
पूरितं कोटिशो युम्नैर्गृहं ते तद्गृहागतैः । तथापि तज्जिहासाऽभूदकृतज्ञा हि योषितः ॥७०॥
कलापारमितस्यास्य रूपातिशययोगिनः । सद्धर्मदर्शिनो मेऽस्य स्यात्त्यागस्त्यागिनः कुतः ॥७१॥
[2]अत्यासक्तामिति ज्ञात्वा कृत्वा तदनुवर्तनम् । चिन्तयन्ती स्थितोपायमावयोः सा वियोजने ॥७२॥
आसने शयने स्नाने भोजने चापि युक्तयोः । योगेनायुज्य नौ निद्रामहं रात्रौ बहिः कृतः ॥७३॥
निद्रापाये गृहं गत्वा भर्तृनिः[3]क्रान्तिदुःखिनीम् । अपश्यं मातरं दुःखी भार्यां च [4]कृतरोदनाम् ॥७४॥
ततः कृततदाश्वासः [5]प्रियालङ्कारहस्तकः । उशीरावर्तमायातो मातुलेन वणिज्यया ॥७५॥
क्रीत्वा तत्र च कार्पासं ताम्रलिप्तं प्रगच्छतः । दैवकालनियोगेन सोऽप्यदाहि दवाग्निना ॥७६॥
मुक्त्वा मातुलमश्वेन पूर्वाशां गच्छतो मृतः । सोऽपि पद्भ्यां ततो यातः प्रियङ्गुं नगरं श्रमी ॥७७॥
सुरेन्द्रदत्तनाम्नाऽहं पितृमित्रेण वीक्षितः । विश्रान्तः कतिचित्तत्र दिनानि सुखसङ्गतः ॥७८॥

कलिङ्गसेनाकी बात सुनकर वसन्तसेनाको इतना तीव्र दुःख हुआ मानो उसके कानमें कीला ही ठोक दिया हो। उसने मातासे कहा कि हे मातः ! तूने यह क्या कहा ? ॥६७॥ कुमार कालसे जिसे स्वीकार किया तथा चिरकाल तक जिसके साथ वास किया उस चारुदत्तको छोड़कर मुझे कुबेरसे भी क्या प्रयोजन है ? फिर दूसरे धनाढ्य मनुष्यकी तो बात ही क्या है ? ॥६८॥ अधिक क्या कहूँ चारुदत्तके साथ वियोग करानेवाले इन प्राणोंसे भी मुझे प्रयोजन नहीं है। हे मातः ! यदि मेरा जीवन प्रिय है तो अब पुनः ऐसे वचन नहीं कह ॥६९॥ अरे ! उसके घरसे आये हुए करोड़ों दीनारोंसे तेरा घर भर गया फिर भी तुझे उसके छोड़नेकी इच्छा हुई सो ठीक ही है क्योंकि स्त्रियाँ अकृतज्ञ होती हैं ॥७०॥ हे मातः ! जो कलाओंका पारगामी है, अत्यन्त रूपवान् है, समीचीन धर्मको जाननेवाला है एवं अतिशय त्यागी—उदार है, उस चारुदत्तका त्याग मैं कैसे कर सकती हूँ ? ॥७१॥ इस प्रकार वसन्तसेनाको मुझमें अत्यन्त आसक्त जान कलिङ्गसेना उस समय तो कुछ नहीं कह सकी, उसीकी हाँमें-हाँ मिलाती रही परन्तु मनमें हम दोनोंको वियुक्त करनेका उपाय सोचती रही ॥७२॥ हम दोनों आसनपर बैठते समय, शय्यापर सोते समय, स्नान करते समय और भोजन करते समय साथ-साथ रहते थे इसलिए उसे वियुक्त करनेका अवसर नहीं मिलता था। एक दिन उसने किसी योग (तन्त्र) द्वारा हम दोनोंको निद्रामें निमग्न कर रात्रिके समय मुझे घरसे बाहर कर दिया ॥७३॥ निद्रा दूर होनेपर मैं घर गया। मेरे पिता मुनिदीक्षा ले चुके थे इसलिए मेरी माता और स्त्री बहुत दुःखी थीं। वे बिलख-बिलखकर रोने लगीं उन्हें देख मैं भी बहुत दुःखी हुआ ॥७४॥

तदनन्तर माता और स्त्रीको धैर्य बँधाकर तथा स्त्रीके आभूषण हाथमें ले व्यापारके निमित्त मैं अपने मामाके साथ उशीरावर्त देश आया ॥७५॥ वहाँ कपास खरीदकर बेंचनेके लिए मैं ताम्रलिप्त नगरकी ओर जा रहा था कि भाग्य और समयकी प्रतिकूलताके कारण वह कपास दावानलसे बीचमें ही जल गया ॥७६॥ मैंने मामाको वहीं छोड़ा और घोड़ापर सवार हो मैं पूर्व दिशाकी ओर चला परन्तु घोड़ा बीचमें ही मर गया इसलिए पैदल चलकर थका-माँदा प्रियङ्गु-नगर पहुँचा ॥७७॥ उस समय प्रियङ्गु नगरमें मेरे पिताका मित्र सुरेन्द्रदत्त नामका सेठ रहता था उसने मुझे देखकर बड़े सुखसे रक्खा और कुछ दिनतक मैंने वहाँ विश्राम किया ॥७८॥

---

१. नाथश्चारुदत्तो वियोजकैः म० । २. अन्यासक्ता–म० । ३. निःक्रान्त म० । ४. कृतरोदनीम् म० ।
५. प्रियाया अलंकारा हस्ते यस्यासौ ।

समुद्रयात्रया यातः षट्कृत्वो भिन्ननौस्थितिः । अष्टकोटीश्वरश्चाहमभवं भिन्नपात्रकः ॥७९॥
आसाद्य फलकं कृच्छ्रादुत्तीर्य मकरालयम् । प्राप्तो राजपुरं तत्र परिव्राजकमैक्षिषि ॥८०॥
तेनाहं शान्तवेषेण श्रान्तो विश्रान्तिमाहितः[1] । रसलोभेन च विश्वास्य कान्तारं च प्रवेशितः ॥८१॥
मुग्धः सतुम्बिको रज्ज्वा परिव्राजावतारितः । प्रविष्टोऽहं बिलं[2] भीमं प्रेरितो रसतृष्णया ॥८२॥
रसाधा मूलमासाद्य[3] रज्ज्वारूढो दृढासनः । आददानो रसं पुंसा निषिद्धस्तत्र केनचित् ॥८३॥
मा स्प्राक्षीस्त्वं रसं भद्र ! रौद्रं यदि जिजीविषुः । [4]स्पृश्येत चेन्न जीवन्तं मुञ्चति क्षयरोगवत् ॥८४॥
ततश्चकितचित्तोऽहमवोचं तमिति द्रुतम् । त्वं भोः कः केन वा क्षिप्त इहेत्युक्तो जगाद सः ॥८५॥
उज्जयिन्या वणिग्भिन्नपात्रोऽपात्रेण लिङ्गिना । रसमादाय निक्षिप्तो रसराक्षसवक्षसि ॥८६॥
त्वगस्थिशेषभूतोऽहं रसभुक्तो व्यवस्थितः । ममातो निर्गमो भद्र ! मृतस्यैव न जीवतः ॥८७॥
संपृष्टस्तेन भोः कस्त्वमित्यवोचमहं पुनः । चारुदत्तो वणिक् क्षिप्तः परिव्राजा तवारिणा ॥८८॥
प्रियवादीति विश्वस्य बकवृत्तेर्दुरात्मनः । अधोऽधोऽनुचरो मुग्धः पततीति किमद्भुतम् ॥८९॥
पूरयित्वा रसं तेन रज्जुमारोप्य चालितम् । एकामाकृष्य [5]कृत्वैकां कृतार्थः स खलो गतः ॥९०॥
पतितस्य तटे तेन पुंसा निर्गमनाय मे । उपायः साधुनाऽवाचि ततश्चेति कृपावता ॥९१॥

वहाँसे मैं समुद्रयात्राके लिए गया सो छह बार मेरा जहाज फट गया। अन्तमें जिस किसी तरह मैं आठ करोड़का स्वामी होकर लौट रहा था कि फिर भी जहाज फट गया और सारा धन समुद्रमें डूब गया ॥७९॥ भाग्यवश एक तख्ता पाकर बड़े कष्टसे मैंने समुद्रको पार किया। समुद्र पारकर मैं राजपुर नगर आया और वहाँ एक संन्यासीको मैंने देखा ॥८०॥ मैं थका हुआ था इसलिए शान्तवेषको धारण करनेवाले उस संन्यासीने मुझे विश्राम कराया। तदनन्तर रसका लोभ देकर एवं विश्वास दिलाकर वह मुझे एक सघन अटवीमें ले गया ॥८१॥ मैं भोला-भाला था इसलिए उस संन्यासीने एक तूमड़ी देकर मुझे रस्सीके सहारे नीचे उतारा जिससे मैं रसकी तृष्णा-से एक भयंकर कुएँमें जा घुसा ॥८२॥ पृथिवीके तलमें पहुँचकर रस्सीपर अपना दृढ़ आसन जमाये हुए जब मैं रस भरने लगा तब वहाँ स्थित किसी पुरुषने मुझे रोका ॥८३॥ उसने कहा कि हे भद्र ! यदि तू जीवित रहना चाहता है तो इस भयंकर रसका स्पर्श मत कर। यदि किसी तरह इसका स्पर्श हो जाता है तो क्षयरोगकी तरह यह जीवित नहीं छोड़ता ॥८४॥ तदनन्तर आश्चर्यचकित हो मैंने उससे शीघ्र ही इस प्रकार पूछा कि महाशय ! तुम कौन हो ? और किसने तुम्हें यहाँ डाल दिया है ? मेरे यह कहनेपर वह बोला कि मैं उज्जयिनीका एक वणिक् हूँ। मेरा जहाज फट गया था इसलिए एक अपात्र साधुने रस लेकर मुझे रसरूपी राक्षसके वक्षःस्थलपर गिरा दिया है ॥८५-८६॥ रसके उपभोगसे मेरी चमड़ी तथा हड्डी ही शेष रह गई है। हे भद्र ! मेरा तो यहाँसे निकलना तभी होगा जब मैं मर जाऊँगा जीवित रहते मेरा निकलना नहीं हो सकता ॥८७॥ उस मनुष्यने मुझसे भी पूछा कि तुम कौन हो ? तब मैंने कहा कि मैं चारुदत्त नामका वणिक् हूँ और जो तुम्हारा शत्रु था उसी संन्यासीने मुझे यहाँ गिराया है ॥८८॥ 'यह प्रियवादी है' इसलिए बगलेके समान मायाचारी दुष्ट मनुष्यका विश्वास कर उसके पीछे-पीछे चलनेवाला मूढ़ मनुष्य यदि नीचे-नीचे गिरता है तो इसमें आश्चर्य ही क्या है ? ॥८९॥ अन्तमें मैंने तूमड़ीमें रस भरकर तथा रस्सीमें बाँधकर उसे चलाया। जिस रस्सीमें रसकी तूमड़ी बँधी थी उस रस्सीको तो उस संन्यासीने खींच लिया और जिसके सहारे मुझे ऊपर चढ़ना था उसे काट दिया। इस प्रकार अपने मनोरथको सिद्ध कर वह दुष्ट वहाँसे चला गया ॥९०॥ जब मैं किनारेपर जा पड़ा तब उस सज्जन पुरुषने दयायुक्त हो मेरे लिए निकलनेका मार्ग बतलाया ॥९१॥

---

१. -माहतः म० । २. कूपम् ग० टि० । ३. मूलमाशाया म० । ४. स्पृशेत म० । स्पृशत ग० । ५. छित्त्वा ।

गोधैका रसपानाय साधोऽत्रावतरिष्यति । सृत्वा शीघ्रं हि तत्पुच्छं धृत्वा निर्गच्छ निश्चयम् ॥९२॥
सदेत्युक्तवते धर्मं तस्मै सम्यक्त्वपूर्वकम् । समुपाश्रुश्रावाहं सहपञ्चनमस्कृतिम् ॥९३॥
परेद्युश्च रसं पीत्वा गच्छन्त्याः पुच्छमाश्वहम्[1] । गोधाया धृतवान् दोर्भ्यामाकृष्टश्च बहिस्तया ॥९४॥
तटीपाटितगात्रोऽहं बहिर्मुक्तोऽतिमूर्च्छितः । विबुद्धश्च पुनर्जन्म जातमित्यन्वचिन्तयम् ॥९५॥
शनैरुत्थाय गच्छन्तमन्वधावद् यमोपमः । महिषो [2]वनमध्ये मां प्रविष्टोऽहं गुहां ततः ॥९६॥
प्रसुप्तोऽजगरस्तत्र मयाक्रान्तः समुत्थितः । अभिधावन्तमत्युग्रं सोऽगृहीन्महिषं मुखे ॥९७॥
यावद्योद्धतयोर्युद्धं वर्तते विषमं तयोः । तावत् तत्पृष्ठमाक्रम्य निर्गतोऽहमतिद्रुतम् ॥९८॥
निःसृत्य महारण्याद् प्रत्यन्तग्राममाप्नुवाम् । काकतालीयतस्तत्र रुद्रदत्तं ददर्श तम् ॥९९॥
क्षुत्पिपासातिहरणं कृत्वाऽसौ मे ततोऽब्रवीत् । चारुदत्त ! विषादं मा कार्षीस्त्वं शृणु मे वचः ॥१००॥
सुवर्णद्वीपमाविश्य समुपार्ज्य धनं महत् । प्रत्येष्यावः पुनर्येन रक्ष्यते कुलसन्ततिः ॥१०१॥
एकवाक्यतया तेन यातौ चैरावतीं नदीम् । उत्तीर्य गिरिकूटं च गिरिं वेत्रवनं वनम् ॥१०२॥
टङ्कणं देशमासाद्य क्रीत्वाऽजौ गतिदक्षिणौ । गतौ वामपथेनातिविषमेण शनैः शनैः ॥१०३॥
अतिलङ्घ्य समां प्राह रुद्रदत्तोऽन्वितादरः । चारुदत्त ! पशून् हत्वा कृत्वा भस्त्राप्रवेशनम् ॥१०४॥
आस्वहे तत्र नौ द्वीपे भारुण्डाश्चण्डतुण्डकाः । गृहीत्वाऽऽमिषलोभेन पक्षिणः प्रक्षिपन्ति हि ॥१०५॥

उसने कहा कि हे सत्पुरुष ! रस पीनेके लिए यहाँ एक गोह आवेगी सो तुम सरककर यदि शीघ्र ही उसकी पूँछ पकड़ लोगे तो निश्चय ही बाहर निकल जाओगे ॥९२॥ वह उस पुरुषका अन्तिम समय था इसलिए इस प्रकार निकलनेका मार्ग बतलानेवाले उस पुरुषके लिए मैंने सम्यग्दर्शन-पूर्वक विस्तारके साथ धर्मका उपदेश दिया और पञ्च नमस्कार मन्त्र भी सुनाया ॥९३॥ दूसरे दिन रस पीकर जब गोह जाने लगी तब मैंने दोनों हाथोंसे शीघ्र ही उसकी पूँछ पकड़ ली और वह मुझे बाहर खींच लाई ॥९४॥ किनारोंकी रगड़से मेरा शरीर छिन्न-भिन्न हो गया था इस-लिए उस गोहने जब मुझे बाहर छोड़ा तब मैं अत्यन्त मूर्च्छित हो गया। सचेत होनेपर मैंने विचार किया कि मेरा पुनर्जन्म ही हुआ है ॥९५॥ धीरे-धीरे उठकर मैं आगे चला तो वनके बीचमें यमराजके समान भयंकर भैंसाने मेरा पीछा किया। अवसर देख मैं एक गुहामें घुस गया ॥९६॥ उस गुफामें एक अजगर सो रहा था मेरा पैर पड़नेपर वह जाग उठा और सामने दौड़ते हुए उस भयंकर भैंसेको उसने अपने मुखसे पकड़ लिया ॥९७॥ भैंसा और अजगर दोनों ही अत्यन्त उद्धत थे इसलिए जबतक उन दोनोंमें युद्ध हुआ तबतक मैं उसकी पीठपर चढ़कर बड़ी शीघ्रतासे बाहर निकल आया ॥९८॥ उस महावनसे निकलकर मैं समीपवर्ती एक गाँवमें पहुँचा तो काकतालीयन्यायसे (अचानक) मैंने वहाँ अपने काका रुद्रदत्तको देखा ॥९९॥ मैं कई दिन-का भूखा-प्यासा था इसलिए रुद्रदत्तने मेरी भूख-प्यासकी बाधा दूरकर मुझसे कहा कि चारुदत्त ! खेद मत करो मेरे वचन सुनो ॥१००॥ हम दोनों सुवर्णद्वीप चलकर तथा बहुत भारी धन कमा कर चम्पापुरी वापिस आवेंगे जिससे अपने कुलकी रक्षा होगी ॥१०१॥

तदनन्तर रुद्रदत्तके साथ एक सलाह हो जानेपर दोनों वहाँसे चले और ऐरावती नदीको उतरकर तथा गिरिकूट नामक पर्वत और वेत्रवनको उल्लंघकर टंकण देशमें जा पहुँचे। वहाँ मार्ग अत्यन्त विषम था इसलिए चलनेमें चतुर दो बकरा खरीदकर तथा उनपर सवार हो धीरे-धीरे आगे गये ॥१०२–१०३॥ तदनन्तर समभूमिको उल्लंघकर रुद्रदत्तने बड़े आदरके साथ मुझसे कहा कि चारुदत्त ! अब आगे मार्ग नहीं है इसलिए इन बकरोंको मारकर तथा इनकी भस्त्रा (भाथड़ी) बनाकर उनमें हम दोनों बैठ जावें। तीक्ष्ण चोंचोंवाले भारुण्ड पक्षी मांसके लोभसे हम

१. आशु + अहम्। २. वनवध्ये म०।

निषिद्धोऽपि बधाद्रौद्रो रुद्रदत्तोऽवधीदजम् । अजं मदीयमप्यन्तं निनाय विनयच्युतः ॥१०६॥
यावन्न मार्यते तावत्पूर्वमेव प्रतीकृतः । मार्यमाणाय चाहापि तस्मै पञ्चनमस्कृतिः ॥१०७॥
भस्त्रां कृत्वा सशस्त्रां[1] मामन्तस्तस्य निधाय सः । प्रविश्य स्वयमन्यस्यां शस्त्रहस्तो व्यवस्थितः ॥१०८॥
भारुण्डैश्चण्डतुण्डाभ्यां भस्त्रे नीते विहायसा । भस्त्रा काणेन मेऽन्यत्र नीत्वा क्षिप्ता क्षितौ ततः ॥१०९॥
वेगाद्विपाट्य तां भस्त्रां निर्गतः स्वर्गसन्निभम् । रत्नरश्मिभिरुद्दीप्तमपश्यं द्वीपमायतम् ॥११०॥
पश्यता च दिशो रम्या पर्वताग्रे जिनालयः । प्रेक्षितो मरुदुद्धूत[2]पताकाभिरिवानटन् ॥१११॥
तत्रातापन[3]योगस्थश्चारणः श्रमणोऽन्तिके । वीक्षितो वीक्ष्य यं प्राप प्रागप्राप्तं परं सुखम् ॥११२॥
ततः पर्वतमारुह्य त्रिःपरीत्य जिनालयम् । वन्दिता जिनचन्द्राणां कृत्रिमाः प्रतिमा मया ॥११३॥
योगस्थो योगभक्त्याऽसौ वन्दितश्च मुनिर्मया । समाप्तनियमश्चाह दत्त्वाऽऽसीनस्तदाशिषम् ॥११४॥
कुशली चारुदत्ताऽत्र कुतः स्वप्न इवागमः । प्राकृतस्य यथा पुंसः[4] सहायरहितस्य ते ॥११५॥
कुशलं नाथ ! युष्माकं प्रसादादिति वादिना । नत्वा विस्मितचित्तेन मयाऽपृच्छ्यत सन्मुनिः ॥११६॥
प्रत्यभिज्ञा कुतो नाथ तव मद्विषया च ते । अपूर्वदर्शनं मन्ये मान्यमान्यस्य पावनम् ॥११७॥
इति पृष्टेन तेनोक्तं चम्पायां यस्तदा द्विषा । खेचरोऽमितगत्याख्यः कीलितो मोचितस्त्वया ॥११८॥

दोनोंको उठाकर सुवर्णद्वीपमें डाल देंगे ॥१०४-१०५॥ रुद्रदत्त बड़ी दुष्ट प्रकृतिका था इसलिए मेरे रोकनेपर भी उसने अपना बकरा मार डाला और विनयसे च्युत हो मेरे बकराका भी अन्त कर दिया ॥१०६॥ मेरा बकरा जबतक मारा नहीं गया तबतक मैंने पहले उसके मारनेका पूर्ण प्रतिकार किया—रुद्रदत्तको मारनेसे रोका परन्तु जब मारा ही जाने लगा तब मैंने उसे पञ्च-नमस्कार मन्त्र ग्रहण करा दिया ॥१०७॥ रुद्रदत्तने मृत बकरोंकी भाथड़ियाँ बनाई और एकके भीतर छुरी देकर मुझे बैठा दिया तथा दूसरीमें वह स्वयं हाथमें छुरी लेकर बैठ गया ॥१०८॥ तदनन्तर भारुण्ड पक्षी पैनी चोंचोंसे दबाकर दोनों भस्त्राओंको आकाशमें ले गये। मेरी भाथड़ी एक काना भारुण्ड पक्षी ले गया था इसलिए उसने दूसरी जगह ले जाकर पृथिवीपर गिरा दी ॥१०९॥ मैं वेगसे उस भाथड़ीको चीरकर जब बाहर निकला तो मैंने रत्नोंकी किरणोंसे देदीप्य-मान स्वर्गके समान एक विस्तृत द्वीप देखा ॥११०॥ उस द्वीपकी सुन्दर दिशाओंको देखते हुए मैंने पर्वतके अग्रभागपर एक जिनमन्दिर देखा जो हवासे उड़ती हुई पताकाओंसे ऐसा जान पड़ता था मानो नृत्य ही कर रहा हो ॥१११॥ उसी जिनमन्दिरके समीप मैंने आतापन योगसे स्थित एक चारण ऋद्धिधारी मुनिराजको देखा। उन मुनिराजको देखकर मुझे ऐसा उत्तम सुख प्राप्त हुआ जैसा कि पहले कभी प्राप्त नहीं हुआ था ॥११२॥

तदनन्तर पर्वतपर चढ़कर मैंने जिनमन्दिरकी तीन प्रदक्षिणाएँ दीं और श्री जिनेन्द्र भग-वान्‌की कृत्रिम प्रतिमाओंकी वन्दना की ॥११३॥ प्रतिमाओंकी वन्दनाके बाद मैंने ध्यानमें लीन मुनिराजकी भी मुनिभक्तिके कारण वन्दना की। जब मुनिराजका नियम समाप्त हुआ तब वे मेरे लिए आशीर्वाद देकर वहीं बैठ गये और मुझसे कहने लगे कि चारुदत्त ! कुशल तो हो ? यहाँ स्वप्नकी तरह तुम्हारा आगमन कैसे हुआ ? तुम एक साधारण पुरुषकी तरह हो तथा कोई तुम्हारा सहायक भी नहीं दिखाई देता ॥११४-११५॥ 'हे नाथ ! आपके प्रसादसे कुशल है' यह कहकर मैंने उन्हें नमस्कार किया। तदनन्तर आश्चर्यसे चकित होते हुए मैंने उन उत्तम मुनिराजसे पूछा कि हे नाथ ! आपको मेरी पहिचान कैसे हुई ? हे माननीयोंके माननीय ! मैं तो आपके इस पवित्र दर्शनको अपूर्व ही मानता हूँ ॥११६-११७॥ इस प्रकार पूछनेपर मुनिराजने कहा कि मैं वही अमितगति नामका विद्याधर हूँ जिसे चम्पापुरीमें उस समय शत्रुने कील दिया था और तुमने

१. सशस्त्रां-म०, ग० । २.-दुद्भूत म० । ३. तत्र तापन-म० । ४. पुंसां ग० ।

राज्ये संस्थाप्य मां प्राज्ये सम्यग्दर्शनभावितम् । गुरोर्हिरण्यकुम्भस्य समीपे प्राव्रजत् पिता ॥११९॥
भार्या विजयसेना मे मान्याऽन्यासीन्मनोरमा । तयाता गान्धर्वसेनाख्या प्रथमायामभूत्सुता ॥१२०॥
इतरस्यामभूत्पुत्रो ज्येष्ठो सिंहयशःश्रुतिः । वाराहग्रीवनामान्यो विनयादिगुणाकरः ॥१२१॥
राज्ये तौ यौवराज्ये च स्थापयित्वा यथाक्रमम् । [1]गुरोरेव गुरोरन्ते प्रव्रज्यां श्रितवानहम् ॥१२२॥
कुम्भकण्टकनामायं द्वीपः सागरवेष्टितः । गिरिः कर्कोटकश्चात्र चारुदत्तागतः कथम् ॥१२३॥
इत्युक्ते यतिनाथन्तो सुखदुःखविमिश्रिताम् । कथंकथमहं तस्मै कथामकथयन्निजाम् ॥१२४॥
तदा विद्याधरौ द्वौ तं मुनिं पुत्रौ नमस्तलात् । अवतीर्य ववन्दाते वन्दनीयमनिन्दितौ ॥१२५॥
कुमारौ ! चारुदत्तोऽयं भ्राता यो वां मयोदितः । इत्युक्ते मां परिष्वज्य स्थितावुक्त्वा बहुप्रियम् ॥१२६॥
तावच्च द्वौ विमानाग्रादवतीर्य सुरौ पुरा । मां प्रणम्य मुनिं पश्चात्स्वासीनौ ममाग्रतः ॥१२७॥
अक्रमस्य तदा हेतुं खेचरौ पर्यपृच्छताम् । देवावृषिमतिक्रम्य प्राग्नतौ श्रावकं कुतः ॥१२८॥
त्रिदशावूचतुर्हेतुं जिनधर्मोपदेशकः । चारुदत्तो गुरुः साक्षादावयोरिति बुध्यताम् ॥१२९॥
तत्कथं कथमित्युक्ते छागपूर्वः सुरोऽभणीत् । श्रूयतां मे कथा तावत् कथ्यते खेचरौ ! स्फुटम् ॥१३०॥
वाराणस्यां पुराणार्थवेदव्याकरणार्थवित् । ब्राह्मणः सोमशर्माऽसीत्सोमिला[2] तस्य [3]माहनी ॥१३१॥
तयोर्दुहितरौ भद्रा सुलसा च सुयौवने । वेदव्याकरणादीनां शास्त्राणां पारगे परे ॥१३२॥

जिसे छुड़ाया था ॥११८॥ उस घटनाने मेरे हृदयमें सम्यग्दर्शनका भाव भर दिया था। कुछ समय बाद हमारे पिताने विशाल राज्यपर मुझे बैठाकर हिरण्यकुम्भ नामक गुरुके पास दीक्षा ले ली ॥११९॥ मेरी विजयसेना और मनोरमा नामकी दो स्त्रियाँ थीं उनमें पहली विजयसेनाके गान्धर्वसेना नामकी पुत्री हुई और दूसरी मनोरमाके सिंहयश नामका बड़ा और वाराहग्रीव नामका छोटा इस प्रकार दो पुत्र हुए। ये दोनों ही पुत्र विनय आदि गुणोंकी खान थे ॥१२०-१२१॥ एक दिन मैंने क्रमसे बड़े पुत्रको राज्यपर और छोटे पुत्रको युवराज पदपर आरूढ़कर अपने पिता रूप गुरुके समीप ही दीक्षा धारण कर ली ॥१२२॥ हे चारुदत्त ! यह समुद्रसे घिरा हुआ कुम्भकंटक नामका द्वीप है और यह कर्कोटक नामका पर्वत है यहाँ तुम कैसे आये ? ॥१२३॥ मुनिराजके ऐसा कहनेपर मैंने आदिसे लेकर अन्त तक सुख-दुःखसे मिली हुई अपनी समस्त कथा जिस-किसी तरह उनके लिए कह सुनाई ॥१२४॥ उसी समय मुनिराजके दोनों उत्तम विद्याधर पुत्रोंने आकाशसे नीचे उतरकर उन वन्दनीय मुनिराजकी वन्दना की—उन्हें नमस्कार किया ॥१२५॥ मुनिराजने दोनों पुत्रोंको संबोधते हुए कहा कि हे कुमारो ! जिसका पहले मैंने कथन किया था यह वही तुम्हारा भाई चारुदत्त है। मुनिराजके ऐसा कहनेपर दोनों विद्याधर मेरा आलिङ्गनकर प्रिय वचन कहते हुए समीप ही बैठ गये ॥१२६॥ उसी समय दो देव विमानके अग्रभागसे उतरकर पहले मुझे और बादमें मुनिराजको नमस्कारकर मेरे आगे बैठ गये ॥१२७॥ विद्याधरोंने उस समय इस अक्रमका कारण पूछा कि हे देवो ! तुम दोनोंने मुनिराजको छोड़कर श्रावकको पहले नमस्कार क्यों किया ? ॥१२८॥ देवोंने इसका कारण कहा कि इस चारुदत्तने हम दोनोंको जिन-धर्मका उपदेश दिया है इसलिए यह हमारा साक्षात् गुरु है यह समझिए ॥१२९॥ यह कैसे ? इस प्रकार कहनेपर जो पहले बकराका जीव था वह देव बोला कि हे विद्याधरो ! सुनिए मैं अपनी कथा स्पष्ट कहता हूँ ॥१३०॥

किसी समय बनारसमें पुराणोंके अर्थ, वेद तथा व्याकरणके रहस्यको जाननेवाला एक सोमशर्मा नामका ब्राह्मण रहता था उसकी ब्राह्मणीका नाम सोमिला था ॥१३१॥ उन दोनोंके भद्रा और सुलसा नामकी दो यौवनवती पुत्रियाँ थीं। जो वेद, व्याकरण आदि शास्त्रोंकी परम पार-

---

१. पितुरेव । २. सौमिल्ला म० । ३. भामिनी म० । ब्राह्मणी (ग० टि०) ।

कुमार्यावेव वैराग्यात् परिव्राजकतां श्रिते । सुप्रसिद्धिं गते भूमौ जित्वा वादेषु वादिनः ॥१३३॥
याज्ञवल्क्य इति ख्यातः परिव्राट् पर्यटन् धराम् । वाराणसीं तदायासीत्तज्जिगीषामनीषया ॥१३४॥
सुलसा अल्पकालेऽस्य सावलेपा सभान्तरे । स्वां शुश्रूषाकरीं जेतुरिति सङ्गरमग्रहीत् ॥१३५॥
पूर्वपक्षमुपन्यस्तं तया न्यायविदां पुरः । संदूष्य याज्ञवल्क्यस्तं स स्वपक्षमतिष्ठिपत् ॥१३६॥
याज्ञवल्क्यो वृतो वादे सुपराजितया तया । विषयामिषलुब्धस्तां सस्मरां समरीरमत् ॥१३७॥
सुलसायाज्ञवल्क्यौ तौ जनयित्वा शुभं शिशुम् । अश्वत्थतरुमूलस्थं कृत्वा यातौ कृपाच्युतौ ॥१३८॥
तत्रोत्तानशयं भद्रा दृष्ट्वाश्वत्थफलादिनम् । पिप्पलादाभिधानेन व्याहूयैनमवीवृधत् ॥१३९॥
पारगः सर्वशास्त्राणामेकदाऽपृच्छदित्यसौ । मातः ! किमभिधानो मे पिता जीवति वा न वा ॥१४०॥
तयोक्तं ते पिता पुत्र ! याज्ञवल्क्यः कनीयसी । मम तेन जिता वादे सुलसा जननी तव ॥१४१॥
जातमात्रमपत्राणं त्वां तौ पुत्र ! तयोरधः । मुक्त्वा मुक्तकृपौ पापौ यातावद्यापि जीवतः ॥१४२॥
स्तनैरन्यस्त्रियाः क्लेशान्मया समभिवर्द्धितः । कर्म पूर्वं कृतं पुत्र ! पितरौ तु स्मरातुरौ ॥१४३॥
इत्याकर्ण्य तदा तस्याः [1]कर्णदाहकरं वचः । तद्वार्ताकर्णनोत्कर्णो लब्धवर्णो रुषा स्थितः ॥१४४॥
लब्धवार्तो रुषा गत्वा स जित्वा जनकं ततः । शुश्रूषां च तयोश्चक्रे मिथ्याविनयपूर्वकम् ॥१४५॥
स मातृपितृसेवाख्यं पिप्पलादः स्वयं कृतम् । [2]क्रतुं प्रवर्त्य तौ निन्ये समन्युर्मृत्युगोचरम् ॥१४६॥

गामिनी थीं ॥१३२॥ उन दोनों पुत्रियोंने कुमारी अवस्थामें ही वैराग्यवश परिव्राजकको दीक्षा ले ली और दोनों ही शास्त्रार्थमें अनेक वादियोंको जीतकर पृथिवीमें परम प्रसिद्धिको प्राप्त हुईं ॥१३३॥ किसी समय पृथिवीपर घूमता हुआ याज्ञवल्क्य नामका परिव्राजक उन्हें जीतनेकी इच्छासे बनारस आया ॥१३४॥ शास्त्रार्थके समय अहंकारसे भरी सुलसाने सभाके बीच यह प्रतिज्ञा की कि जो मुझे शास्त्रार्थमें जीतेगा मैं उसीकी सेविका (स्त्री) बन जाऊँगी ॥१३५॥ शास्त्रार्थ शुरू होनेपर सुलसाने न्याय विद्याके जानकार विद्वानोंके आगे पूर्व पक्ष रक्खा परन्तु याज्ञवल्क्यने उसे दूषित कर अपना पक्ष स्थापित कर दिया ॥१३६॥ सुलसा शास्त्रार्थमें हार गई इसलिए उसने याज्ञवल्क्यको वर लिया—अपना पति बना लिया। याज्ञवल्क्य विषयरूपी मांसका बड़ा लोभी था तथा सुलसाको भी कामेच्छा जागृत हो उठी इसलिए दोनों मनमानी क्रीड़ा करने लगे ॥१३७॥ सुलसा और याज्ञवल्क्यने एक उत्तम पुत्रको जन्म दिया परन्तु वे इतने निर्दयी निकले कि उस सद्योजात पुत्रको पीपलके वृक्षके नीचे रखकर कहीं चले गये ॥१३८॥ वह पुत्र पीपलके नीचे चित्त पड़ा था तथा मुखमें पड़े हुए पीपलके फलको खा रहा था। सुलसाकी बड़ी बहिन भद्रा उसे इस दशामें देख उठा लाई और उसका पिप्पलाद नाम रखकर उसका पोषण करने लगी ॥१३९॥ समय पाकर पिप्पलाद समस्त शास्त्रोंका पारगामी हो गया। एक दिन उसने भद्रासे पूछा कि मातः ! मेरे पिताका क्या नाम है ? वे जीवित हैं या नहीं ? ॥१४०॥ भद्राने कहा कि बेटा ! याज्ञवल्क्य तेरा पिता है। उसने मेरी छोटी बहिन सुलसाको शास्त्रार्थमें जीत लिया था वही तेरी माता है ॥१४१॥ हे बेटा ! जब तू पैदा ही हुआ था तथा कोई तेरा रक्षक नहीं था तब तुझे एक वृक्षके नीचे छोड़कर वे दोनों दयाहीन पापी चले गये थे और आजतक जीवित हैं ॥१४२॥ मैंने दूसरी स्त्रीके स्तन पिला-पिलाकर तुझे बड़े क्लेशसे बड़ा किया है। हे पुत्र ! तूने पहले ऐसा ही कर्म किया होगा यह ठीक है परन्तु कहना पड़ेगा कि तेरे माता-पिता बड़े कामी निकले ॥१४३॥ उस समय कानोंमें दाह उत्पन्न करनेवाले भद्राके पूर्वोक्त वचन सुनकर विद्वान् पिप्पलादको बड़ा क्रोध आया और उसकी बात सुनकर उसके कान खड़े हो गये ॥१४४॥ पता चलाकर वह अपने पिता याज्ञवल्क्यके पास गया और रोष पूर्वक उसे शास्त्रार्थमें जीतकर झूठ-मूठकी विनय दिखाता हुआ माता-पिताकी सेवा करने लगा ॥१४५॥ पिप्पलाद माता-पिताके प्रति क्रोधसे भरा था इस-

---

१. कर्णशूलकरं ग० । २. कर्तुं म० ।

पिप्पलादस्य शिष्योऽहं जडो ग्रन्थेन वाग्बलिः । तद्दर्शनं समर्थ्यागां नारकं घोरवेदनम् ॥१४७॥
ततो निर्गत्य जातोऽस्मि षड्वारानजपोतकः । हुतश्च यज्ञविद्याज्ञैर्यज्ञे पर्वतदर्शिते ॥१४८॥
सप्तमेऽपि च वारेऽहं देशे टङ्कणकेऽभवत् । अज एव निजैः पापैः प्रेरितः प्राणिघातजैः ॥१४९॥
चारुदत्तेन मे जैनो धर्मोऽदर्शि निरञ्जनः । दत्तः पञ्चनमस्कारो मरणे करुणावता ॥१५०॥
जातोऽहं जिनधर्मेण सौधर्मे विबुधोत्तमः । चारुदत्तो गुरुस्तेन प्रथमो नमितो मया ॥१५१॥
इत्युक्त्वा [1]विरते तस्मिन्नितरोऽपि सुरोऽब्रवीत् । श्रूयतां चारुदत्तो मे यथाऽभूद्धर्मदेशकः ॥१५२॥
रसकूपे परिव्राजा पातितः पतिताय मे । सद्धर्मं वणिजेऽवोचच्चारुदत्तः कृपापरः ॥१५३॥
मृतो गृहीतधर्मोऽहं सौधर्मेऽभवमुत्तमः । सुरस्तेन गुरुः पूर्वं चारुदत्तो नतो मया ॥१५४॥
पापकूपे निमग्नेभ्यो धर्महस्तावलम्बनम् । ददता कः समो लोके संसारोत्तारिणा[2] नृणाम् ॥१५५॥
अक्षरस्यापि चैकस्य पदार्थस्य[3] पदस्य वा । दातारं विस्मरन् पापी किं पुनर्धर्मदेशिनम् ॥१५६॥
पूर्वं कृतोपकारस्य पुंसः प्रत्युपकारतः । कृतित्वमुपकार्यस्य नान्यथेति विदो विदुः ॥१५७॥
तत्कृतौ शक्तिवैकल्ये कुलीनः स कथं न यः । सद्भावं दर्शयेत्तस्मै स्वाधीनं विगतस्मयः ॥१५८॥

लिए उसने मातृ-पितृ सेवा नामका एक यज्ञ स्वयं चलाया और उसे कराकर दोनोंको मृत्युके अधीन कर दिया ॥१४६॥ मैं उसी पिप्पलादका वाग्वलि नामका शिष्य था। उससे शास्त्र पढ़कर मैं जड़–विवेकहीन हो गया था और उसीके मतका समर्थन कर घोर वेदनाओंसे भरे नरकमें उत्पन्न हुआ ॥१४७॥ नरकसे निकलकर मैं छह बार बकराका बच्चा हुआ और छहों बार यज्ञ विद्याके जानने वाले लोगोंने मुझे पर्वत द्वारा दिखाये हुए यज्ञमें होम दिया ॥१४८॥ सातवीं बार भी मैं प्राणिघातसे उत्पन्न हुए अपने पापोंसे प्रेरित हो टंकणक देशमें बकरा ही हुआ ॥१४९॥ उस समय दयालु चारुदत्तने मुझे पापरहित जैनधर्म दिखलाया तथा मरणकालमें पञ्च नमस्कार मन्त्र दिया ॥१५०॥ जिनधर्मके प्रभावसे मैं सौधर्म स्वर्गमें उत्तम देव हुआ हूँ। इस प्रकार चारुदत्त मेरा साक्षात् गुरु है और इसीलिए मैंने उसे पहले नमस्कार किया है ॥१५१॥ यह कहकर जब वह देव चुप हो गया तब दूसरा देव बोला कि सुनिए चारुदत्त जिस तरह मेरा धर्मोपदेशक है वह मैं कहता हूँ ॥१५२॥

मैं पहले वणिक् था। एक परिव्राजकने मुझे रसकूपमें गिरा दिया। पीछे चलकर उसी परिव्राजकने चारुदत्तको भी उसी रसकूपमें गिरा दिया। मेरी दशा मरणासन्न थी इसलिए चारुदत्तने वहाँ दयायुक्त होकर मुझे समीचीन धर्मका उपदेश दिया ॥१५३॥ चारुदत्तके द्वारा बताये हुए उस समीचीन धर्मको ग्रहण कर मैं मरा और मरकर सौधर्म स्वर्गमें उत्तम देव हुआ। इसतरह चारुदत्त मेरा साक्षात् गुरु है और इसीलिए मैंने उसे पहले नमस्कार किया है ॥१५४॥ जो पाप-रूपी कुएँमें डूबे हुए मनुष्योंके लिए धर्मरूपी हाथका सहारा देता है तथा संसार-सागरसे पार करनेवाला है उस मनुष्यके समान संसारमें मनुष्योंके बीच दूसरा कौन है? ॥१५५॥ एक अक्षर, आधे पद अथवा एक पदको भी देनेवाले गुरुको जो भूल जाता है वह भी जब पापी है तब धर्मोपदेशके दाताको भूल जानेवाले मनुष्यका तो कहना ही क्या है? ॥१५६॥ जिसका पहले उप-कार किया गया है ऐसे उपकार्य मनुष्यकी कृतकृत्यता प्रत्युपकारसे ही होती है अन्य प्रकारसे नहीं, ऐसा विद्वान् लोग जानते हैं ॥१५७॥ प्रत्युपकारकी शक्तिका अभाव होनेपर जो अहंकार रहित होता हुआ अपने उपकारीके प्रति अपना शुभ अभिप्राय नहीं दिखलाता है वह कुलीन कैसे हो सकता है? भावार्थ—प्रथम पक्ष तो यही है कि अपना उपकार करनेवाले मनुष्यका अवसर आनेपर प्रत्युपकार किया जावे। यदि कदाचित् प्रत्युपकार करनेकी सामर्थ्य न हो तो

१. निरते म० । २. -तारणां म० । ३. प यस्य म० ।

इत्युक्त्वा महतीमृद्धिं मुनिखेचरसंनिधौ । सम्प्रदर्श्य तदा देवौ देवदेवीविमानकैः ॥१५९॥
वस्त्रैरग्निविशुद्धैर्मां भूषामाल्यविलेपनैः । भूषयित्वा ससत्कारमभाषेतां सुभूषणैः ॥१६०॥
आदेशो दीयतां स्वामिन् कर्तव्ये समुपस्थिते । चम्पां किं प्राप्यसेऽद्यैव सद्यो भूर्यर्थसङ्गतः ॥१६१॥
इत्युक्तेन मया प्रोक्तं व्रजतं[1] निजमास्पदम् । स्मरणानन्तरं देवौ पुनरागम्यतामिति ॥१६२॥
यथादेशमिति प्रोच्य प्राञ्जली प्रणिपत्य तौ । मुनिं मां च समापृच्छ्य प्रयातौ त्रिदिवं निजम् ॥१६३॥
अहं च मुनिमानम्य विमानेन विहायसा । खेचराभ्यां सहायातः प्राविशं शिवमन्दिरम् ॥१६४॥
तत्र स्वर्गं इवातिष्ठन् सुखेन खचरार्चितः । जन्मान्यदिव च प्राप्तः शृण्वन् निजयशो जनात् ॥१६५॥
अन्यदा मातृपुत्रास्ते मयाऽमा सम्प्रधारणम् । चक्रुर्गान्धर्वसेनाख्यां कुमारीं सम्प्रदर्श्य मे ॥१६६॥
चारुदत्त ! शृणु श्रीमानेकदावधिचक्षुषम् । राजेति पृष्टवान् भर्ता को मे[2] दुहितुरीप्यते ॥१६७॥
सोऽवोचच्चारुदत्तस्य गृहे गान्धर्वपण्डितः । जेताऽस्या भविता तेऽसौ कन्याया यादवः पतिः ॥१६८॥
इत्याकर्ण्य तदा तेन राज्ञा प्रव्रजताऽपि च । स्थिरीकृतमिदं कार्यं प्रमाणं त्वं ततोऽसि नः ॥१६९॥
दिष्ट्याभ्युपगतं तत्तु बन्धुकार्यं मया ततः । धात्र्यादिपरिवाराढ्या[3] कन्येयं मे समर्पिता ॥१७०॥
कन्याया भ्रातरौ नानारत्नस्वर्णादिसम्पदाम् । वृतौ खेचरवाहिन्या सज्जौ चम्पागमं प्रति ॥१७१॥

उपकर्ताके प्रति नम्रताका भाव अवश्य ही दिखलाना उचित है ॥१५८॥ इस प्रकार कहकर उन दोनों देवोंने उस समय मुनिराज तथा विद्याधरोंके समीप देव-देवियों तथा विमान आदिके द्वारा अपनी बड़ी भारी ऋद्धि दिखलाकर अग्निमें शुद्ध किये हुए वस्त्र, आभूषण, माला, विलेपन आदि-से मेरा बहुत सत्कार किया तथा उत्तमोत्तम आभूषणोंसे विभूषित कर मुझसे कहा कि हे स्वामिन् ! जो भी कार्य करने योग्य हो उसके लिए आप आज्ञा दीजिए । क्या आज शीघ्र ही आपको बहुत भारी धन-सम्पदाके साथ चम्पापुरी भेज दिया जाय ? ॥१५९-१६१॥ इसके उत्तरमें मैंने कहा कि इस समय आप अपने-अपने स्थानपर जाइए । जब मैं आपका स्मरण करूँ तब पुनः आइए ॥१६२॥ देवोंने 'जो आज्ञा' यह कहकर मुझे तथा मुनिराजको हाथ जोड़कर नमस्कार किया एवं मुझसे तथा मुनिराजसे पूछकर वे अपने स्वर्ग चले गये ॥१६३॥ देवोंके चले जानेपर मैंने भी मुनिराज-को नमस्कार किया और विद्याधरोंके साथ विमानपर बैठकर उनके शिवमन्दिर नगरमें प्रवेश किया ॥१६४॥ शिवमन्दिर नगर स्वर्गके समान जान पड़ता था मैं उसमें सुखसे रहने लगा । अनेक विद्याधर मेरी सेवा करते थे । वहाँ रहते हुए मुझे ऐसा जान पड़ता था मानो दूसरे ही जन्मको प्राप्त हुआ हूँ । वहाँ प्रत्येक मनुष्यसे मेरा यश सुनाई पड़ता था ॥१६५॥

एक दिन वे दोनों कुमार अपनी माताके साथ मेरे पास आये तथा मेरे लिए कुमारी गान्धर्वसेनाको दिखाकर मेरे साथ इस प्रकार सलाह करने लगे ॥१६६॥ उन्होंने कहा कि हे चारुदत्त ! सुनो, एक समय लक्ष्मीसे सुशोभित राजा अमितगतिने अवधिज्ञानी मुनिराजसे पूछा था कि आपके दिव्यज्ञानमें हमारी पुत्री गान्धर्वसेनाका स्वामी कौन दिखाई देता है ? ॥१६७॥ मुनिराजने कहा था कि चारुदत्तके घर गान्धर्व विद्याका पण्डित यदुवंशी राजा आवेगा वही इस कन्याको गन्धर्वविद्यामें जीतेगा तथा वही इसका पति होगा ॥१६८॥ मुनिराजके वचन सुनकर राजाने उस समय इस कार्यका निश्चय कर लिया था । यद्यपि राजा अमितगति इस समय दीक्षा लेकर मुनि हो गये हैं तथापि उस समय उन्होंने इसका पूर्ण भार आपके ही ऊपर रखनेका निश्चय किया था इसलिए हम लोगोंको आप ही प्रमाणभूत हैं ॥१६९॥ इसके उत्तरमें भाग्यवश प्राप्त हुए इस भाईके कार्यको मैंने स्वीकृत कर लिया । तदनन्तर धाय आदि परिवारके साथ यह कन्या मेरे लिए सौंप दी गई ॥१७०॥ नाना रत्न तथा सुवर्णादि सम्पदासे युक्त कन्याके दोनों भाई विद्या-

---

१. व्रजतो म० । २. के मे म० । ३. परिवाराद्या म० ।

मित्रकार्यसमुद्युक्तौ मित्रदेवौ मया स्मृतौ । स्मरणादेव सम्प्राप्तौ निधिहस्तौ ममान्तिकम् ॥१७२॥
चारुहंसविमानेन साकं गान्धर्वसेनया । आनीय मित्रदेवौ मां भूत्या विस्मयनीयया ॥१७३॥
सुव्यवस्थाप्य चम्पायामक्षयैर्निधिभिः सह । नत्वा देवौ गतौ स्वर्गं खेचरौ च निजास्पदम् ॥१७४॥
मातुलं मातरं पत्नीं बन्धुवर्गं च सादरम् । दृष्ट्वा तुष्टमतिं प्राप्तं प्राप्तोऽहं सुखितां पराम्[1] ॥१७५॥
तां शुश्रूषाकरीं श्वश्र्वं मदणुव्रतसङ्गताम् । श्रुत्वा वसन्तसेनां च प्रीतः स्वीकृतवानहम् ॥१७६॥
दत्तं किमिच्छकं दानं दीनानाथाङ्गितर्पणम् । विश्वस्मै बन्धुलोकाय दीयते स्म यथेप्सितम् ॥१७७॥
एष यादव ! सम्बन्धः कथितस्ते मयाखिलः । खेचरेन्द्रकुमार्या मे विभवस्य च सम्भवः ॥१७८॥
यदर्थं रक्षिता कन्या स त्वं प्राप्तोऽसि धन्यया । कृतकृत्यः कृतश्चाहं भवता यदुनन्दन ! ॥१७९॥
प्रत्यासन्नापवर्गस्य मम स्वर्गस्तपस्विभिः । तपःस्थस्योदितश्चेतो यतिष्ये च तपस्यहम् ॥१८०॥
इति गान्धर्वसेनायाः श्रुत्वा सम्बन्धमादितः । चारुदत्तस्य चोत्साहं तुष्टस्तुष्टाव यादवः ॥१८१॥
अहो चेष्टितमार्यस्य महौदार्यसमन्वितम् । अहो पुण्यबलं गण्यमनन्यपुरुषोचितम् ॥१८२॥
न हि पौरुषमीदृक्षं विना दैवबलं तथा । ईदृशान् विभवान् शक्याः प्राप्तुं ससुरखेचराः ॥१८३॥
श्रुत्वेति चारुदत्तोऽथमात्मीयं च विचेष्टितम् । तस्मै गान्धर्वसेनादिपर्यन्तं यादवोऽवदत् ॥१८४॥

धरोंकी सेना साथ लेकर चम्पानगरीके प्रति आनेके लिए तैयार हो गये ॥१७१॥ उसी समय मित्र-का कार्य करनेके लिए उद्यत दोनों मित्र देवोंका मैंने स्मरण किया और स्मरणके बाद ही वे दोनों देव निधियाँ हाथमें लिये हुए मेरे पास आ पहुँचे ॥१७२॥ वे देव, गान्धर्वसेनाके साथ मुझे सुन्दर हंस विमानमें बैठाकर आश्चर्य उत्पन्न करनेवाली सम्पदा सहित चम्पानगरी ले आये। यहाँ आकर अक्षय निधियोंके द्वारा उन्होंने मेरी सब व्यवस्था की। तदनन्तर नमस्कार कर देव स्वर्ग चले गये और दोनों विद्याधर अपने स्थानपर गये ॥१७३-१७४॥ मैं मामा, माता, पत्नी तथा अन्य बन्धुवर्गसे बड़े आदरसे मिला, सबको बड़ा सन्तोष हुआ और मैं भी बहुत सुखी हुआ ॥१७५॥ 'वसन्तसेना वेश्या, अपनी माँके घरसे आकर सासकी सेवा करती रही है तथा अणुव्रतोंसे विभूषित हो गई है' यह सुनकर मैंने बड़ी प्रसन्नतासे उसे स्वीकृत कर लिया—अपना बना लिया ॥१७६॥ मैंने दीन तथा अनाथ मनुष्योंको सन्तुष्ट करनेवाला किमिच्छक दान दिया और समस्त कुटुम्बी जनोंके लिए भी उनकी इच्छानुसार वस्तुएँ दीं ॥१७७॥ इस प्रकार हे यादव ! विद्याधर कुमारीका मेरे साथ जो सम्बन्ध है तथा इस विभवकी जो मुझे प्राप्ति हुई है वह सब मैंने आपसे कहा है ॥१७८॥

हे यदुनन्दन ! जिनके लिए यह कन्या रखी गई थी इस भाग्यशालिनी कन्याने उन्हीं तुमको प्राप्त किया है इसलिए कहना पड़ता है कि आपने मुझे कृतकृत्य किया है ॥१७९॥ तपस्वियोंने बताया है कि मेरा मोक्ष निकट है और तप धारण करनेसे इस भवके बाद तुझे स्वर्ग प्राप्त होगा इसलिए अब मैं निश्चिन्त होकर तपके लिए ही यत्न करूँगा ॥१८०॥ इस प्रकार वसुदेव, गान्धर्वसेनाका आदिसे लेकर अन्ततक सम्बन्ध तथा चारुदत्तका उत्साह सुनकर बहुत सन्तुष्ट हुए और चारुदत्तकी इस तरह स्तुति करने लगे कि अहो ! आपकी चेष्टा अत्यधिक उदारतासे सहित है, अहो ! आपका असाधारण पुण्य बल भी प्रशंसनीय है। बिना भाग्यबलके ऐसा पौरुष होना कठिन है और बिना भाग्यबलके साधारण मनुष्योंकी तो बात ही क्या है देव तथा विद्याधर भी ऐसे विभवको प्राप्त नहीं हो सकते ॥१८१-१८३॥ इस प्रकार चारुदत्तका वृत्तान्त सुनकर वसुदेवने उसके लिए गान्धर्वसेना आदिकी प्राप्ति पर्यन्त अपना भी समस्त वृत्तान्त कह सुनाया ॥१८४॥

---

१. परं म० ।

इत्यन्योन्यस्वरूपज्ञा रूपविज्ञानसागराः । त्रिवर्गानुभवप्रीताश्चारुदत्तादयः स्थिताः ॥१८५॥

शार्दूलविक्रीडितम्

क्षीणार्थोऽपि पयोधिमप्यधिगतः कूपावतीर्णोऽप्यतो
दुर्लङ्घ्येऽपि च सञ्चरन् गिरितटे द्वीपान्तरे वा पुमान् ।
लक्ष्मीं धर्मसखः प्रयाति निखिलां पापव्यपायाद्यत-
स्तद्धर्मं जिनबोधितं बुधजनाश्चिन्वन्तु चिन्तामणिम् ॥१८६॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ चारुदत्तचरित्रवर्णनो नाम एकविंशतितमः सर्गः ॥२१॥

इस प्रकार आपसमें एक दूसरेके स्वरूपको जाननेवाले रूप तथा विज्ञानके सागर और त्रिवर्गके अनुभवसे प्रसन्न चारुदत्त आदि सुखसे रहने लगे ॥१८५॥ गौतम स्वामी कहते हैं कि हे राजन् ! धर्मात्मा मनुष्य भले ही अत्यन्त निर्धन हो गया हो, समुद्रमें भी गिर गया हो, कुएँमें भी उतर गया हो, पर्वतके अलंघ्य तटपर भी विचरण करने लगा हो और दूसरे द्वीपमें भी जा पहुँचा हो तो भी पाप नष्ट हो जानेसे सम्पूर्ण लक्ष्मीको प्राप्त होता है इसलिए हे विद्वज्जनो ! जिनेन्द्रदेवके द्वारा प्रतिपादित धर्मरूपी चिन्तामणि रत्नका संचय करो ॥१८६॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें चारुदत्तके चरित्रका वर्णन करनेवाला इक्कीसवाँ सर्ग समाप्त हुआ ॥२१॥

द्वाविंशतितमः सर्गः

चम्पायां रममाणस्य सह गान्धर्वसेनया । वसुदेवस्य सम्प्राप्तः फाल्गुनाष्टदिनोत्सवः ॥१॥
देवा नन्दीश्वरं द्वीपं खेचरा मन्दरादिकम् । यान्ति वन्दारवः स्थानमानन्दं दधतस्तदा ॥२॥
जन्मनिष्क्रमणज्ञाननिर्वाणप्राप्तितोऽर्हतः । वासुपूज्यस्य पूज्यां तां चम्पां प्रापुः स्फुरद्गृहाम् ॥३॥
आगच्छन्ति तदा कर्तुं जिनेन्द्रमहिमोत्सवम् । सर्वतः पुत्रदाराद्यैर्भूचराश्च नभश्चराः ॥४॥
चम्पावासी जनः सर्वो निरचक्राम सराजकः । प्रतिमां वासुपूज्यस्य पूज्यां पूजयितुं बहिः ॥५॥
रथैः केचिद्गजैः केचित् वाजियुग्यादिभिः परे । निर्यान्ति स्त्रीजनाः पुर्या यात्रायां चित्रभूषणाः ॥६॥
शौरिरश्वरथारूढः सार्द्धं गान्धर्वसेनया । जिनं पूजयितुं पुर्या निर्यातोऽसौ सपर्यया ॥७॥
भटमण्डलमध्यस्थो गच्छन् जिनगृहाग्रतः[1] । मातङ्गकन्यकावेषां नृत्यत्कन्यां निरैक्षत ॥८॥
नीलोत्पलदलश्यामां वृत्तोत्तुङ्गपयोधराम् । भूषाविद्युल्लताश्लिष्टां योषां वा प्रावृषः श्रियम् ॥९॥
सुबन्धूकाधरच्छायां सुपद्मपद्पाणिकाम् । पुण्डरीकदृशं दृश्यां मूर्तामिव शरच्छ्रियम् ॥१०॥
श्रियं ह्रियं धृतिं बुद्धिं लक्ष्मीं चापि सरस्वतीम् । स्वयं जिनेन्द्रभक्त्येव[2] नृत्यन्तीमतिरूपिणीम् ॥११॥
स्थितो रङ्गविभागेऽत्र गायकः सपरिग्रहः । मृदङ्गी पणवी चैव दर्दुरी कंसवादकः ॥१२॥

अथानन्तर कुमार वसुदेव चम्पापुरीमें गान्धर्वसेनाके साथ क्रीड़ा करते हुए रहते थे कि उसी समय फाल्गुन मासकी अष्टाह्निकाओंका महोत्सव आ पहुँचा ॥१॥ वन्दनाके प्रेमी एवं हृदयमें आनन्दको धारण करनेवाले देव नन्दीश्वर द्वीपको तथा विद्याधर सुमेरु पर्वत आदि स्थानोंपर जाने लगे ॥२॥ भगवान् वासुपूज्यके गर्भ, जन्म, दीक्षा, ज्ञान और निर्वाण इन पाँच कल्याणकोंके होनेसे पूज्य एवं देदीप्यमान गृहसे सुशोभित चम्पापुरीमें भी देव और विद्याधर आये ॥३॥ उस समय श्री जिनेन्द्र भगवान्की पूजाका उत्सव करनेके लिए भूमिगोचरी और विद्याधर राजा अपनी स्त्री तथा पुत्र आदिके साथ सर्व ओरसे वहाँ आये थे।॥४॥ चम्पापुरीके रहनेवाले सबलोग भी राजा को साथ ले श्री वासुपूज्य स्वामीकी प्रतिमाको पूजनेके लिए नगरसे बाहर गये ॥५॥ उस समय नाना प्रकारके आभूषणोंको धारण करनेवाली स्त्रियाँ नगरसे बाहर जा रही थीं। उनमें कितनी ही हाथीपर बैठकर तथा कितनी ही घोड़े एवं बैल आदिपर बैठकर जा रही थीं ॥६॥ कुमार वसुदेवभी गान्धर्वसेनाके साथ घोड़ोंके रथपर आरूढ हो श्री जिनेन्द्र देवकी पूजा करनेके लिए सामग्री साथ लेकर नगरीसे बाहर निकले ॥७॥ अनेक योद्धाओंके मध्यमें जाते हुए कुमार वसुदेवने वहाँ जिनमन्दिरके आगे मातङ्गकन्याके वेषमें नृत्य करती हुई एक कन्याको देखा ॥८॥ वह कन्या नील कमल दलके समान श्याम थी, गोल एवं उठे हुए स्तनोंसे युक्त थी तथा बिजलीके समान चमकते हुए आभूषणोंसे सहित थी इसलिए हरी-भरी, ऊँचे मेघोंसे युक्त एवं चमकती हुई बिजलीसे युक्त वर्षा ऋतुकी लक्ष्मीके समान जान पड़ती थी ॥९॥ अथवा उसके ओठ बन्धूकके पुष्पके समान लाल थे, उसके हाथ-पैर उत्तम कमलके समान थे और नेत्र सफेद कमलके समान थे, इसलिए वह साक्षात् मूर्तिमती शरद् ऋतुकी लक्ष्मीके समान दिखाई देती थी ॥१०॥ अथवा वह रूपवती कन्या जिनेन्द्र भगवान्की भक्तिसे स्वयं नृत्य करती हुई श्री, ह्री, धृति, बुद्धि, लक्ष्मी एवं सरस्वती देवीके समान जान पड़ती थी ॥११॥ नृत्यकी रङ्गभूमिमें गाने वाले, अपने परिकरके साथ स्थित थे। मृदंग, पणव, दर्दुर, झाँझ, विपञ्ची और वीणा बजानेवाले वादक तथा उत्तम

---

१. जिनगृहागतः म० । २. जिनेन्द्रभक्तेव म० ।

वैपञ्ची वैणिकश्चैव कुतुपः[1] परिभाषितः । उत्तमाधममध्याभिः स्थितः प्रकृतिभिर्युतः ॥१३॥
कुतुपेषु[2] यथास्थानं सुप्रयुक्तं प्रयोक्तृभिः । अलातचक्रप्रतिमं गानं वाद्यं च नाटकम् ॥१४॥
रसाभिनयभावानामभिव्यक्तिं सुनर्तकी । सा कुर्वाणा रथस्थेन शौरिणैक्षि सजानिना ॥१५॥
रूपविज्ञानपाशेन तं बबन्धाशु सा स ताम् । बन्धव्यबन्धकत्वं तावन्योन्यस्य तत्रापतुः ॥१६॥
ततो गान्धर्वसेनाऽभूदीर्ष्याकुञ्चितलोचना । विपक्षस्य हि सांनिध्यमक्षिसङ्कोचकारणम् ॥१७॥
सापायमत्र विभ्रासकोपायं च चिरस्थितम् । मन्वाना सारथिं साह धन्विनो रथिनः प्रिया ॥१८॥
क्षिप्रमस्मात्प्रदेशात्त्वं रथं प्रेरय सारथे । शर्कराप्यलमास्वादा[3]न्नाददाति रसान्तरम् ॥१९॥
इत्युक्तो नोदयद्वेगात्सारथी रथमाप सः । जिनवेश्म समास्थाप्य तौ प्रविष्टौ प्रदक्षिणम् ॥२०॥
क्षीरेक्षुरसधारौघैर्घृतदध्युदकादिभिः । अभिषिच्य जिनेन्द्रार्चामर्चितां नृसुरासुरैः ॥२१॥
हरिचन्दनगन्धाढ्यैर्गन्धशाल्यक्षताक्षतैः । पुष्पैर्नानाविधैरुद्धैर्धूपैः कालागुरूद्भवैः ॥२२॥
दीपैर्दीप्रशिखाजालैर्नैवेद्यैर्निरवद्यकैः । तावानर्चतुरर्चां तामर्चनाविधिकोविदौ ॥२३॥
समपादौ पुरः स्थित्वा जिनार्चनकृताञ्जली । उच्चार्योपांशु[4]पाठेन प्रागीर्यापथदण्डकम् ॥२४॥

नृत्य करने वाले कुतुप उत्तम मध्यम और जघन्य प्रकृतिके साथ युक्त थे। इनमें जो अच्छेसे-अच्छे प्रयोग दिखानेवाले थे वे यथास्थान अलातचक्रके समान-व्यवधान रहित गायन-वादन और नर्तनके प्रयोग दिखला रहे थे[5] ॥१२–१४॥ इस प्रकार रस, अभिनय और भावोंको प्रकट करनेवाली उस नर्तकीको प्रिया गान्धर्वसेनाके साथ रथपर बैठे हुए कुमार वसुदेवने देखा ॥१५॥ देखते ही उस नर्तकीने कुमारको और कुमारने उस नर्तकीको अपने-अपने रूप तथा विज्ञानरूपी पाशसे शीघ्र ही बाँध लिया। उस समय वे दोनों ही आपसमें बन्धव्य और बन्धक दशाको प्राप्त हुए थे अर्थात् एक दूसरेको अनुराग रूपी पाशमें बाँध रहे थे ॥१६॥ यह देख गान्धर्वसेनाने अपने नेत्र ईर्ष्यासे संकुचित कर लिये सो ठीक ही है क्योंकि विरोधीका सन्निधान नेत्र संकोचका कारण होता ही है ॥१७॥ 'यहाँ अधिक ठहरना हानिकर एवं भयको उत्पन्न करनेवाला है' ऐसा मानती हुई गान्धर्वसेनाने सारथिसे कहा कि हे सारथे ! तुम इस स्थानसे शीघ्र ही रथ ले चलो क्योंकि शक्कर भी अधिक खानेसे दूसरा रस नहीं देती ॥१८–१९॥ गान्धर्वसेनाके ऐसा कहनेपर सारथिने रथको वेगसे बढ़ाया और सब जिन-मन्दिर जा पहुँचे। वहाँ रथको खड़ा कर वसुदेव और गान्धर्वसेनाने मन्दिरमें प्रवेश किया, तीन प्रदक्षिणाएँ दीं और दूध, इक्षुरसकी धारा, घी, दही तथा जल आदिके द्वारा मनुष्य सुर एवं असुरोंके द्वारा पूजित जिनेन्द्र देवकी प्रतिमाका अभिषेक किया ॥२०–२१॥ दोनों ही पूजाकी विधिमें अत्यन्त निपुण थे इसलिए उन्होंने हरिचन्दनकी गन्ध, धानके सुगन्धित एवं अखण्ड चावल, नाना प्रकारके उत्तमोत्तम पुष्प, कालागुरु चन्दनसे निर्मित उत्तम धूप, देदीप्यमान शिखाओंसे युक्त दीपक और निर्दोष नैवेद्यसे जिन-प्रतिमाकी पूजा की ॥२२–२३॥ पूजाके बाद वे सामायिकके लिए उद्यत हुए सो प्रथम ही दोनों पैर बराबर कर जिन प्रतिमाके आगे हाथ जोड़कर खड़े हो गये। तदनन्तर ईर्यापथ दण्डकका मन्द स्वरसे उच्चारण कर कायोत्सर्ग करने लगे। कायोत्सर्गके द्वारा उन्होंने ईर्यापथ शुद्धि की। तत्पश्चात्

१. नटपेटकः (ग० टि०) । २. नटपेटकेषु (ग० टि०) । ३. -मास्वाद्य नाददाति म० । ४. उपांशु इत्यप्रकाशोच्चारणरहस्ययोः । ५. प्रयोगस्त्रिविधो ह्येषां विज्ञेयो नाटकाश्रयः । ततं चैवावनद्धं च तथा नाट्यकृतश्च सः ॥३॥ तते कुतपविन्यासो गायनः सपरिग्रहः । वैपञ्चिको वैणिकश्च वंशवादक एव च ॥४॥ मार्दङ्गिकः पाणविकस्तथा दार्दुरिको बुधैः । अनाविद्धविधावेष कुतपः समुदाहृतः ॥५॥ उत्तमाधममध्याभिस्तथा प्रकृतिभिर्युतः । कुतपो नाट्ययोगेऽत्र नानादेशसमाश्रयः । एवं गानं च नाट्यं च वाद्यं च विविधाश्रयम् । अलातचक्रप्रतिमं कर्तव्यं नाट्ययोक्तृभिः ॥७॥—नाट्यशास्त्र अध्याय २८ ।

कायोत्सर्गविधानेन शोधितेर्यापथौ पथि । जैनेऽतिनिपुणौ क्षोण्यां निपेतुः[1] पुनरुत्थितौ ॥२५॥
पुण्यपञ्चनमस्कारपदपाठपवित्रितौ । [2]चतुरुत्तममांगल्यशरणप्रतिपादिनौ ॥२६॥
द्वीपेष्वर्धतृतीयेषु सप्ततिशतात्मके । धर्मक्षेत्रे त्रिकालेभ्यो जिनादिभ्यो नमोऽस्त्विति ॥२७॥
सामायिकं करोमीति सर्वं सावद्ययोगकम् । प्रत्याख्यामि कायं च तावदित्युज्झिताङ्गकौ ॥२८॥
शत्रौ मित्रे सुखे दुःखे जीविते मरणेऽपि वा । समताऽलाभलाभे मे तावदित्यन्तराशयौ ॥२९॥
सप्तप्राणप्रमाणं तु स्थित्वा कृत्वा शिरोऽञ्जलिम् । इत्युदाहरतां भव्यं तौ चतुर्विंशतिस्तवम् ॥३०॥
ऋषभाय नमस्तुभ्यमजिताय नमो नमः । शम्भवाय नमः शश्वदभिनन्दन ! ते नमः ॥३१॥
नमः सुमतिनाथाय नमः पद्मप्रभाय ते । नमः सुपार्श्वं [3]विश्वेशे नमश्चन्द्रप्रभार्हते ॥३२॥
नमस्ते पुष्पदन्ताय नमः शीतलतायिने । नमोऽस्तु श्रेयसे [4]श्रीशे श्रेयसे श्रितदेहिनाम् ॥३३॥
नमोऽस्तु वासुपूज्याय सुपूज्याय जगत्त्रये । वर्तते यस्य चम्पायां निःकम्पोऽयं महामहः ॥३४॥
विमलाय नमो नित्यमनन्ताय नमो नमः । नमो धर्मजिनेन्द्राय शान्तये शान्तये नमः ॥३५॥
नमस्ते कुन्थुनाथाय तथाऽराय नमस्त्रिधा । मल्लये शल्यमल्लाय मुनिसुव्रत ! ते नमः ॥३६॥

जिनेन्द्र प्रदर्शित मार्गमें अतिशय निपुणता रखनेवाले दोनों, नमस्कार करनेके लिए जमीनपर पड़ गये, फिर उठकर खड़े हुए। पञ्च नमस्कार मन्त्रके पाठसे अपने आपको उन्होंने पवित्र किया, अरहन्त, सिद्ध, साधु और केवलिप्रज्ञप्त धर्म ये चार ही संसारमें उत्तम पदार्थ हैं, चार ही मंगल हैं और इन चारोंकी शरणमें हम जाते हैं इस प्रकार उच्चारण किया। 'अढ़ाई द्वीपके एक सौ सत्तर धर्मक्षेत्रोंमें जो तीर्थङ्कर आदि पहले थे, वर्तमानमें हैं और आगे होंगे उन सबके लिए हमारा नमस्कार हो, यह कहकर उन्होंने निम्नांकित नियम ग्रहण किया कि हम जब तक सामायिक करते हैं तबतकके लिए समस्त सावद्य योग और शरीरका त्याग करते हैं—यह नियम लेकर उन्होंने शरीरसे ममत्व छोड़ दिया और शत्रु-मित्र, सुख-दुःख, जीवन-मरण तथा लाभ-अलाभमें मेरे समता भाव हो ऐसा मनमें विचार किया। तदनन्तर सात श्वासोच्छ्वास प्रमाण खड़े रहकर उन्होंने शिरोनति की और उसके बाद चौबीस तीर्थङ्करोंके सुन्दर स्तोत्रका उच्चारण किया ॥२५-३०॥ चौबीस तीर्थङ्करोंका स्तोत्र इस प्रकार था—

हे ऋषभदेव ! तुम्हें नमस्कार हो, हे अजितनाथ ! तुम्हें नमस्कार हो, हे शम्भवनाथ ! तुम्हें निरन्तर नमस्कार हो, हे अभिनन्दन नाथ ! तुम्हें नमस्कार हो ॥३१॥ हे सुमतिनाथ ! तुम्हें नमस्कार हो, हे पद्मप्रभ ! तुम्हें नमस्कार हो, हे जगत्‌के स्वामी सुपार्श्वनाथ ! तुम्हें नमस्कार हो, हे चन्द्रप्रभ जिनेन्द्र ! तुम्हें नमस्कार हो ॥३२॥ हे पुष्पदन्त ! तुम्हें नमस्कार हो, हे शीतलनाथ ! आप रक्षा करनेवाले हैं अतः आपको नमस्कार हो, हे श्रेयांसनाथ ! आप अनन्त चतुष्टय रूप लक्ष्मीके स्वामी हैं तथा आश्रित प्राणियोंका कल्याण करनेवाले हैं इसलिए आपको नमस्कार हो ॥३३॥ जिनका चम्पापुरीमें यह अचल महोत्सव मनाया जा रहा है तथा जो तीनों जगत्‌में पूज्य हैं ऐसे वासुपूज्य भगवान्‌के लिए नमस्कार हो ॥३४॥ हे विमलनाथ ! आपको नमस्कार हो, हे अनन्तनाथ ! आपको नमस्कार हो, हे धर्मजिनेन्द्र ! आपको नमस्कार हो, हे शान्तिके करनेवाले शान्तिनाथ ! आपको नमस्कार हो ॥३५॥ हे कुन्थुनाथ ! आपको नमस्कार हो, हे अरनाथ ! आपको नमस्कार हो, हे मल्लिनाथ ! आप शल्योंको नष्ट करनेके लिए मल्लके समान हैं अतः

---

१. निपेतुः म०, ग०। २. 'चत्तारि मंगलं–अरहन्ता मंगलं सिद्धा मंगलं साहू मंगलं केवलिपण्णत्तो धम्मो मंगलं। चत्तारि लोगुत्तमा–अरहन्ता लोगुत्तमा, सिद्धा लोगुत्तमा, साहू लोगुत्तमा, केवलिपण्णत्तो धम्मो लोगुत्तमा। चत्तारि सरणं पवज्जामि अरहन्ते सरणं पवज्जामि, सिद्धे सरणं पवज्जामि, साहू सरणं पवज्जामि, केवलिपण्णत्तं धम्मं सरणं पवज्जामि। ३. विश्वस्य ईट् विश्वेट् तस्मै। ४. श्रिया ईट् श्रीट् तस्मै।

नमोऽस्तु नमिनाथाय नतत्रिभुवनेशिने[1] । यस्येदं वर्तते तीर्थं साम्प्रतं भरतावनौ ॥३७॥
अरिष्टनेमिनाथाय भविष्यत्तीर्थकारिणे । हरिवंशमहाकाशशशाङ्काय नमो नमः ॥३८॥
नमः पार्श्वजिनेन्द्राय श्रीवीराय नमोऽस्तु ते । सर्वतीर्थङ्कराणां च गणेन्द्रेभ्यो नमः सदा ॥३९॥
कृत्रिमाकृत्रिमेभ्यश्च सद्मेभ्योऽर्हतां नमः । भुवनत्रयवर्तिभ्यः प्रतिबिम्बेभ्य एव च ॥४०॥
इत्थं कृत्वा स्तवं भक्त्या तौ प्रहृष्टतनूरुहौ । प्रणेमतुः शिरोजानुकरस्पृष्टधरातलौ ॥४१॥
पूर्ववत्पुनरुत्थाय कायोत्सर्गनयोगतः । पुण्यं पञ्चगुरुस्तोत्रमुदचीचरतामिति[2] ॥४२॥
अर्हद्भ्यः सर्वदा सर्वसिद्धेभ्यः सर्वभूमिषु । आचार्येभ्य उपाध्यायसाधुभ्यश्च नमो नमः ॥४३॥
परीत्य जिष्णुधिष्ण्यं[3] तौ रथमारुह्य हारिणौ । प्रविष्टौ दम्पती चम्पां सम्पदा परया ततः ॥४४॥
नर्तकीप्रेक्षणक्षिप्तचक्षुरिङ्गितलक्षितः । स तां प्रणाममात्रेण मानिनीमनयद्वशम् ॥४५॥
विपक्षप्रेक्षणासक्तिसापराधेऽपि भर्तरि । स्त्रीणां प्रणयकोपस्य प्रणामो हि निवर्तकः ॥४६॥
अथ विद्याधरी वृद्धा वृद्धा विद्येव रूपिणी । तत्कन्ययान्यदोत्सृष्टा त्रिपुण्ड्रकृतमण्डना ॥४७॥
एकान्ते सुस्थितं हर्म्ये कथञ्चिच्चित्तहारिणी । दत्ताशीः शौरिम[4] हैवमासीना सन्मुखासने ॥४८॥
पुराणवस्तुनो वीर ! विस्तरस्तव चेतसि । शुद्धादर्शतले यद्वद् यद्यपि प्रतिभासते ॥४९॥

आपको नमस्कार हो, हे मुनिसुव्रतनाथ ! आपको नमस्कार हो ॥३६॥ जिन्हें तीन लोकके स्वामी सदा नमस्कार करते हैं और इस समय भरत क्षेत्रमें जिनका तीर्थ चल रहा है उन नमिनाथ भगवान्‌के लिए नमस्कार हो ॥३७॥ जो आगे तीर्थङ्कर होनेवाले हैं तथा जो हरिवंशरूपी महान् आकाशमें चन्द्रमाके समान सुशोभित होंगे उन अरिष्टनेमिको नमस्कार हो॥३८॥श्रीपार्श्वजिनेन्द्र-के लिए नमस्कार हो, श्रीवर्धमान स्वामीको नमस्कार हो, समस्त तीर्थङ्करोंके गणधरोंको नमस्कार हो, श्रीअरहन्त भगवान्‌के त्रिलोकवर्ती कृत्रिम अकृत्रिम मन्दिरों तथा प्रतिबिम्बोंके लिए नमस्कार हो ॥३९–४०॥ इस प्रकार स्तवनकर भक्तिके कारण जिनके शरीरमें रोमाञ्च उठ रहे थे ऐसे कुमार वसुदेव तथा गान्धर्वसेनाने मस्तक, घुटने तथा हाथोंसे पृथिवीतलका स्पर्श करते हुए प्रणाम किया ॥४१॥ तदनन्तर पहलेके समान खड़े होकर कायोत्सर्ग किया और पुण्यवर्धक पञ्च नमस्कार मन्त्रका उच्चारण किया ॥४२॥ पञ्च नमस्कार मन्त्र पढ़ते हुए उन्होंने कहा कि अरहन्तों-को सदा नमस्कार हो, समस्त सिद्धोंको नमस्कार हो, और समस्त पृथिवीमें जो आचार्य, उपा-ध्याय तथा साधु हैं उन सबके लिए नमस्कार हो ॥४३॥ अन्तमें जिन-मन्दिरकी प्रदक्षिणा देकर सुन्दर शरीरके धारक दोनों दम्पति रथपर सवार हो बड़े वैभवके साथ चम्पापुरीमें प्रविष्ट हुए ॥४४॥ नृत्यकारिणीको देखते समय कुमार वसुदेवके नेत्रोंमें जो विकार हुआ था वह गान्धर्व-सेनाकी दृष्टिमें आ गया था इसलिए वह उनसे मान करने लगी थी परन्तु कुमारने प्रणामकर उसे वश कर लिया ॥४५॥ सो ठीक ही है क्योंकि सपत्नीके देखनेमें आसक्ति होनेसे पतिके सापराध होनेपर भी हाथ जोड़कर किया हुआ नमस्कार स्त्रियोंके मानको दूर कर देता है ॥४६॥

अथानन्तर किसी समय कुमार वसुदेव महलके एकान्त स्थानमें अच्छी तरह बैठे थे कि उस नृत्य करनेवाली कन्याके द्वारा भेजी हुई एक वृद्ध विद्याधरी उनके पास आई। वह वृद्धा त्रिपुण्ड्राकार तिलकसे सुशोभित थी, कुमार वसुदेवके चित्तको हरनेवाली थी, और मूर्तिमती वार्धक्य विद्याके समान जान पड़ती थी। उसने आते ही कुमारको आशीर्वाद दिया और सामने-के आसनपर बैठकर कुमारसे इस प्रकार कहना शुरू किया ॥४७–४८॥ हे वीर ! यद्यपि आपके हृदयमें शुद्ध दर्पणतलके समान पुराणोंका विस्तार प्रतिभासित हो रहा है तथापि मैं विद्याधरोंसे

१. नमस्त्रिभुवने सदा ख०, ग०, घ०, ङ० । नमितस्त्रिभुवने सदा म० । २. -मुदचीरचतामिति म० । ३. जिनगृहम् । ४. वसुदेवम् ।

तथाप्यनूद्यते वस्तु मया विद्याधराश्रितम् । [1]रोचिषौषधिनाथस्य स्पृष्टं किं नौषधिः स्पृशेत् ॥५०॥
प्रदर्शितजगज्जीव्यो[2] युगाद्यो वृषभेश्वरः । भरतेश्वरविन्यस्तराज्योऽसौ प्राव्रजद् यदा ॥५१॥
राजक्षत्रोग्रभोजाद्यास्तदा तत्तपसि स्थिताः । चतुःसहस्रसङ्ख्या ये प्राग्भग्नाश्च परीषहैः ॥५२॥
तेषां मध्ये तु यौ भग्नौ नमिर्विनमिरित्युभौ । भ्रातरौ पादयोर्लग्नौ भर्तुस्तस्थतुरर्थिनौ ॥५३॥
धरणेन शरण्येन निरीक्ष्य धरणैः सह । दित्यदित्यभिधानाभ्यां देवीभ्यामागतेन तौ ॥५४॥
आश्वास्य जिनभक्तेन विद्याकोशो जिनान्तिके । ताभ्यां प्रदापितस्तेन स्वदेवीभ्यां महात्मना ॥५५॥
विद्यानामदितिस्त्वष्टौ निकायान् प्रददौ तदा । गान्धर्वसेनकश्चासौ विद्याकोशः प्रकाशितः ॥५६॥
मनुश्च मानवस्तत्र निकायः कौशिकस्तदा । गौरिकश्चैव गान्धारो भूमितुण्डश्च खण्डितः ॥५७॥
निकायौ चापरौ ख्यातौ मूलवीर्यकशङ्कुकौ । ते चार्यादित्यगन्धर्वास्तथा व्योमचराः स्मृताः ॥५८॥
दित्या चाष्टौ निकायास्ते वितीर्णाः पन्नगाभिधाः । मातङ्गः पाण्डुकः कालः स्वपाकः पर्वतोऽपि च ॥५९॥
वंशालयः पांशुमूलो वृक्षमूलस्तथाष्टमः । दैत्यपन्नगमातङ्गनामतः परिभाषिताः ॥६०॥
षोडशानां निकायानामिमा विद्याः प्रकीर्तिताः । सर्वविद्याप्रधानत्वं याः प्रपद्य व्यवस्थिताः ॥६१॥
प्रज्ञप्ती रोहिणी विद्या विद्या चाङ्गारिणीरिता । महागौरी च गौरी च [3]सर्वविद्याप्रकर्षिणी ॥६२॥
महाश्वेताऽपि मायूरी हारी निर्वज्ञशाड्वला । सा [4]तिरस्करिणी विद्या छायासङ्क्रामिणी परा ॥६३॥
कूष्माण्डगणमाता च सर्वविद्याविराजिता । आर्यकूष्माण्डदेवी च देवदेवी नमस्कृता ॥६४॥

सम्बन्ध रखनेवाली एक बात आपसे कहती हूँ और यह उचित भी है क्योंकि ओषधियोंका नाथ—चन्द्रमा अपनी किरणोंसे जिसका स्पर्श कर चुकता है क्या सामान्य ओषधि उसका स्पर्श नहीं कर सकती ? अर्थात् अवश्य कर सकती है ? भावार्थ—बड़े पुरुष जिस वस्तुको जानते हैं उसे छोटे पुरुष भी जान सकते हैं ॥४९-५०॥ जिस समय जगत्को आजीविकाका उपाय बतलाने वाले, युगके आदिपुरुष भगवान् वृषभदेव भरतेश्वरके लिए राज्य देकर दीक्षित हुए थे उस समय उनके साथ उग्रवंशीय, भोजवंशीय आदि चार हजार क्षत्रिय राजा भी तपमें स्थित हुए थे परन्तु पीछे चलकर वे परीषहोंसे भ्रष्ट हो गये। उन भ्रष्ट राजाओंमें नमि और विनमि ये दो भाई भी थे। ये दोनों राज्यकी इच्छा रखते थे इसलिए भगवान्के चरणोंमें लगकर वहीं बैठ गये ॥५१-५३॥ उसी समय रक्षा करनेमें निपुण जिन-भक्त धरणेन्द्रने अनेक धरणों—देवविशेषों और दिति तथा अदिति नामक अपनी देवियोंके साथ आकर नमि, विनमिको आश्वासन दिया और अपनी देवियोंसे उस महात्माने वहीं जिनेन्द्र भगवान्के समीप उन दोनोंके लिए विद्याकोश—विद्याका भाण्डार दिलाया ॥५४-५५॥ अदिति देवीने उन्हें विद्याओंके आठ निकाय दिये तथा गान्धर्व सेनक नामका विद्याकोश बतलाया ॥५६॥ विद्याओंके आठ निकाय इस प्रकार थे—१ मनु, २ मानव, ३ कौशिक, ४ गौरिक, ५ गान्धार, ६ भूमितुण्ड, ७ मूलवीर्यक और ८ शङ्कुक। ये निकाय आर्य, आदित्य, गन्धर्व तथा व्योमचर भी कहलाते हैं ॥५७-५८॥ धरणेन्द्रकी दूसरी देवी दितिने भी उन्हें १ मातङ्ग, २ पाण्डुक, ३ काल, ४ स्वपाक, ५ पर्वत, ६ वंशालय, ७ पांशुमूल और ८ वृक्षमूल ये आठ निकाय दिये। ये निकाय दैत्य, पन्नग और मातङ्ग नामसे कहे जाते हैं ॥५९-६०॥ इन सोलह निकायोंकी नीचे लिखी विद्याएँ कही गई हैं जो समस्त विद्याओंमें प्रधानताको प्राप्त कर स्थित हैं ॥६१॥ प्रज्ञप्ति, रोहिणी, अङ्गारिणी, महागौरी, गौरी, सर्वविद्या-प्रकर्षिणी, महाश्वेता, मायूरी, हारी, निर्वज्ञशाड्वला, तिरस्करिणी, छायासंक्रामिणी, कूष्माण्ड गण-माता, सर्वविद्याविराजिता, आर्य कूष्माण्डदेवी, अच्युता, आर्यवती, गान्धारी, निर्वृति, दण्डाध्यक्ष-

---

१. ओषधिनाथस्य चन्द्रस्य रोचिषा कान्त्या स्पृष्टमिति सम्बन्धः। शोचिषौषधिनाथस्य ख०, ग०, घ०, ङ० । २. जीवो ग०, ङ० । ३. सर्वविद्यापकर्षिणी म० । ४. तिरस्कारिणी म० ।

[1]अच्युतार्यवती चाऽपि गान्धारी निर्वृतिः परा । दण्डाध्यक्षगणश्चापि दण्डभूतसहस्रकम् ॥६५॥
भद्रकाली महाकाली काली कालमुखी तथा । एवमाद्याः समाख्याता विद्या विद्याधरेशिनाम् ॥६६॥
एकपर्वा द्विपर्वा च त्रिपर्वा दशपर्विका । शतपर्वा सहस्राख्या लक्षपर्वाऽवलक्षिता ॥६७॥
उत्पातिन्यश्च ताः सर्वास्त्रिपातिन्यस्तथापि च । धारिण्यन्तर्विचारिण्यो जलाग्निगतिदक्षिणाः ॥६८॥
निःशेषेषु निकायेषु नानाशक्तिसमन्विताः । नानानगनिवासिन्यो नानौषधिविदस्तथा ॥६९॥
सर्वार्थसिद्धा सिद्धार्था जयन्ती मङ्गला जया । सङ्क्रामिण्यः प्रहाराणामशय्याराधनी[2] तथा ॥७०॥
विशल्यकारिणी चैव व्रणसंरोहिणी तथा । सवर्णकारिणी चैव मृतसञ्जीवनी परा ॥७१॥
सर्वाः परमकल्याण्यः सर्वा मन्त्रपरिष्कृताः । सर्वविद्याबलैर्युक्ताः सर्वलोकहितावहाः ॥७२॥
सर्वाः पठितविद्यास्ता विद्या दिव्यौषधिस्तथा । धरणो नमये तस्मै ददौ विनमयेऽप्यसौ ॥७३॥
धरणेन्द्रवितीर्णे च विजयार्धे धराधरे । नमिर्दक्षिणभागेऽस्थादुत्तरे विनमिस्तथा ॥७४॥
नानाजनपदोपेतौ मित्रबान्धवसंस्तुतौ । सुखेन तस्थतुर्वीरौ तौ श्रेण्योरुभयोरुभौ ॥७५॥
ओषधीश्चापि विद्याश्च सर्वेभ्यो ददतुश्च तौ । विद्यानिकायसंज्ञाभिः ख्याताः विद्याधराश्च ते ॥७६॥
गौरीणां गौरिका वेद्या मनूनां मनुनामकाः । गान्धारीणां च गान्धारा मानवीनां च मानवाः ॥७७॥
कौशिकीनां च विद्यानां वेद्याः कौशिकनामकाः । भूमितुण्डकविद्यायां भूमितुण्डाः प्रभाषिताः ॥७८॥
तथैव मूलवीर्यास्तु मूलवीर्यकखेचराः । शङ्कुकानां च विद्यानां शङ्कुकाः खेचराः स्मृताः ॥७९॥
विद्यानां पाण्डुकीनां च पाण्डुकेयाः प्रभाषिताः । कालाः कालकविद्यानां स्वपाकानां स्वपाकजाः ॥८०॥
मातङ्गीनां च विद्यानां मातङ्गा नामतो मताः । पर्वतानां च विद्यानां पार्वतेयाः खचारिणः ॥८१॥
वंशालयानां विद्यानां वंशालयगणः स्मृतः । पांशुमूलकविद्यानां विज्ञेयाः पांशुमूलिकाः ॥८२॥
विद्यानां वृक्षमूलानां खेचरा वार्क्षमूलिकाः । एवं ते क्रमशः प्रोक्ता निकायानां खचारिणः ॥८३॥
दशोत्तरशतं तेषां नगराणि खगामिनाम् । षष्टिरुत्तरभागे स्युः पञ्चाशद्दक्षिणे पुनः ॥८४॥

गण, दण्डभूतसहस्रक, भद्रकाली, महाकाली, काली और कालमुखी—इन्हें आदि लेकर विद्याधर राजाओंकी अनेक विद्याएँ कही गई हैं ॥६२–६६॥ इनके सिवाय एकपर्वा, द्विपर्वा, त्रिपर्वा, दशपर्वा, शतपर्वा, सहस्रपर्वा, लक्षपर्वा, उत्पातिनी, त्रिपातिनी, धारिणी, अन्तर्विचारिणी, जलगति और अग्निगति ये विद्याएँ समस्त निकायोंमें नाना प्रकारकी शक्तियोंसे सहित हैं, नाना पर्वतोंपर निवास करनेवाली हैं एवं नाना ओषधियोंकी जानकार हैं ॥६७–६९॥ सर्वार्थसिद्धा, सिद्धार्था, जयन्ती, मङ्गला, जया, प्रहारसंक्रामिणी, अशय्याराधिनी, विशल्याकारिणी, व्रणसंरोहिणी, सवर्णकारिणी और मृतसंजीवनी—ये सभी विद्याएँ परम कल्याण रूप हैं, सभी मन्त्रोंसे परिष्कृत हैं, सभी विद्याबलसे युक्त हैं, सभी लोगोंका हित करनेवाली हैं। ये ऊपर कही हुई समस्त विद्याएँ तथा दिव्य ओषधियाँ धरणेन्द्रने नमि और विनमिको दीं ॥७०–७३॥ धरणेन्द्रके द्वारा दिये हुए विजयार्ध पर्वतकी दक्षिण श्रेणिमें नमि रहता था और उत्तर श्रेणिमें विनमि निवास करता था ॥७४॥ नाना देशवासियोंसे सहित एवं मित्र तथा बन्धुजनोंसे परिचित दोनों वीर विजयार्धकी दोनों श्रेणियोंमें सुखसे निवास करने लगे ॥७५॥ इन दोनोंने सब लोगोंको अनेक ओषधियाँ तथा विद्याएँ दी थीं इसलिए वे विद्याधर उन्हीं विद्या-निकायोंके नामसे प्रसिद्ध हो गये ॥७६॥ जैसे गौरी विद्यासे गौरिक, मनुसे मनु, गान्धारीसे गान्धार, मानवीसे मानव, कौशिकीसे कौशिक, भूमितुण्डकसे भूमितुण्ड, मूलवीर्यसे मूलवीर्यक, शङ्कुकसे शङ्कुक, पाण्डुकीसे पाण्डुकेय, कालकसे काल, श्वपाकसे श्वपाकज, मातङ्गीसे मातङ्ग, पर्वतसे पार्वतेय, वंशालयसे वंशालय गण, पांशुमूलसे पांशुमूलिक और वृक्षमूलसे वार्क्षमूल—इस प्रकार विद्यानिकायोंसे सिद्ध होनेवाले विद्याधरोंका क्रमसे उल्लेख किया ॥७७–८३॥ विद्याधरोंकी कुल नगरियाँ एक सौ दश हैं उनमें

१. अच्युतार्जवती ग० । २. अशब्दाराधिनी ख० ।

आदित्यनगरं रम्यं पुरं गगनवल्लभम् । पुरी चमरचम्पा च पुरं गगनमण्डलम् ॥८५॥
विजयं वैजयन्तं च शत्रुञ्जयमरिञ्जयम् । पद्मालं केतुमालं च रुद्राश्वं च धनञ्जयम् ॥८६॥
वस्वौकं सारनिवहं जयन्तमपराजितम् । वराहं हस्तिनं सिंहं सौकरं हस्तिनायकम् ॥८७॥
पाण्डुकं कौशिकं वीरं गौरिकं मानवं मनुः । चम्पा काञ्चनमैशानं मणिवज्रं जयावहम् ॥८८॥
नैमिषं हास्तिविजयं खण्डिका मणिकाञ्चनम् । अशोकं वेणुमानन्दं नन्दनं श्रीनिकेतनम् ॥८९॥
अग्निज्वालं महाज्वालं माल्यं सत्पुरनन्दिनी । विद्युत्प्रभं महेन्द्रं च विमलं गन्धमादनम् ॥९०॥
महापुरं पुष्पमालं मेघमालं शशिप्रभम् । चूडामणिं पुष्पचूडं हंसगर्भं बलाहकम् ॥९१॥
वंशालयं सौमनसं तथैव परिकीर्त्तितम् । विजयार्धोत्तरश्रेण्यां षष्टिरिष्टा इमाः पुरः ॥९२॥
रथनूपुरमानन्दं चक्रवालमरिञ्जयम् । मण्डितं बहुकेत्वाख्यं नगरं शकटामुखम् ॥९३॥
पुरं गन्धसमृद्धं च नगरं शिवमन्दिरम् । वैजयन्तं रथपुरं श्रीपुरं रत्नसञ्चयम् ॥९४॥
आषाढं मानवं सूर्यं स्वर्णनाभं शतह्रदम् । अङ्कावर्तं जलावर्त्तं तथावर्त्तं बृहद्गृहम् ॥९५॥
शङ्खवज्रं च नाभान्तं मेघकूटं मणिप्रभम् । कुञ्जरावर्त्तनगरं तथैवासितपर्वतम् ॥९६॥
सिन्धुकक्षं महाकक्षं सुकक्षं चन्द्रपर्वतम् । श्रीकूटं गौरिकूटं च लक्ष्मीकूटं धराधरम् ॥९७॥
कालकेशपुरं रम्यं पार्वतेयं हिमाह्वयम् । किन्नरोद्गीतनगरं नभस्तिलकनामकम् ॥९८॥
मगधासारनलकां पांशुमूलं परं तथा । दिव्यौषधं चार्कमूलं तथैवोदयपर्वतम् ॥९९॥
विख्यातामृतधारं च मातङ्गपुरमेव च । भूमिकुण्डलकूटं च जम्बूशङ्कुपुरं परम् ॥१००॥
श्रेण्यां तु दक्षिणस्यां हि पुराण्येतानि पर्वते । शोभया स्वर्गतुल्यानि पञ्चाशच्चैव संख्यया ॥१०१॥
पुरेषु तेषु च स्तम्भास्तन्निकायाख्ययाऽऽहिताः । ऋषभाधीशनागेशदित्यदित्यर्चयाञ्चिताः ॥१०२॥

उत्तर भागमें साठ हैं और दक्षिण भागमें पचास हैं ॥८४॥ १ आदित्यनगर, २ गगनवल्लभ, ३ चमरचम्पा, ४ गगनमण्डल, ५ विजय, ६ वैजयन्त, ७ शत्रुञ्जय, ८ अरिञ्जय, ९ पद्माल, १० केतुमाल, ११ रुद्राश्व, १२ धनञ्जय, १३ वस्वौक, १४ सारनिवह, १५ जयन्त, १६ अपराजित, १७ वराह, १८ हास्तिन, १९ सिंह, २० सौकर, २१ हस्तिनायक, २२ पाण्डुक, २३ कौशिक, २४ वीर, २५ गौरिक, २६ मानव, २७ मनु, २८ चम्पा, २९ काञ्चन, ३० ऐशान, ३१ मणिव्रज, ३२ जयावह, ३३ नैमिष, ३४ हास्तिविजय, ३५ खण्डिका, ३६ मणिकाञ्चन, ३७ अशोक, ३८ वेणु, ३९ आनन्द, ४० नन्दन, ४१ श्रीनिकेतन, ४२ अग्निज्वाल, ४३ महाज्वाल, ४४ माल्य, ४५ पुरु, ४६, नन्दिनी, ४७ विद्युत्प्रभ, ४८ महेन्द्र, ४९ विमल, ५० गन्धमादन, ५१ महापुर, ५२ पुष्पमाल, ५३ मेघमाल, ५४ शशिप्रभ, ५५ चूडामणि, ५६ पुष्पचूड, ५७ हंसगर्भ, ५८ वलाहक, ५९ वंशालय, और ६० सौमनस—ये साठ नगरियाँ विजयार्धकी उत्तर श्रेणीमें हैं ॥८५-९२॥ और १ रथनूपुर, २ आनन्द, ३ चक्रवाल, ४ अरिञ्जय, ५ मण्डित, ६ बहुकेतु, ७ शकटामुख, ८ गन्धसमृद्ध, ९ शिवमन्दिर, १० वैजयन्त, ११ रथपुर, १२ श्रीपुर, १३ रत्नसंचय, १४ आषाढ़, १५ मानस, १६ सूर्यपुर, १७ स्वर्णनाभ, १८ शतह्रद, १९ अङ्कावर्त, २० जलावर्त, २१ आवर्तपुर, २२ बृहद्गृह, २३ शङ्खवज्र, २४ नाभान्त, २५ मेघकूट, २६ मणिप्रभ, २७ कुञ्जरावर्त, २८ असितपर्वत, २९ सिन्धुकक्ष, ३० महाकक्ष, ३१ सुकक्ष, ३२ चन्द्रपर्वत, ३३ श्रीकूट, ३४ गौरिकूट, ३५ लक्ष्मीकूट, ३६ धराधर, ३७ कालकेशपुर, ३८ रम्यपुर, ३९ हिमपुर, ४० किन्नरोद्गीतनगर, ४१ नभस्तिलक, ४२ मगधसारनलक, ४३ पांशुमूल, ४४ दिव्यौषध, ४५ अर्कमूल, ४६ उदयपर्वत, ४७ अमृतधार, ४८ कूटमातंगपुर, ४९ भूमिकुण्डल तथा ५० जम्बूशंकुपुर ये पचास नगरियाँ विजयार्धकी दक्षिण-श्रेणीमें हैं। ये सभी नगरियाँ शोभामें स्वर्गके तुल्य जान पड़ती हैं ॥९३-१०१॥ उन नगरियोंमें विद्याधर निकायोंके नामसे युक्त तथा भगवान् वृषभदेव, धरणेन्द्र और उसकी दिति-अदिति देवियोंकी प्रतिमाओंसे सहित अनेक स्तम्भ खड़े किये गये हैं ॥१०२॥

सूनवो विनमेर्युक्ता विनयेन नयेन च । नानाविद्याकृतोद्योता जाताः सुबहुशस्ततः ॥१०३॥
सञ्जयोऽरिञ्जयो नाम्ना शत्रुञ्जयधनञ्जयौ । मणिचूलो हरिश्मश्रुर्मेघानीकः प्रभञ्जनः ॥१०४॥
चूडामणिः शतानीकः सहस्रानीकसंज्ञकः । सर्वञ्जयो वज्रबाहुर्महाबाहुररिन्दमः ॥१०५॥
इत्याद्यस्तु ते स्तुत्या उत्तरश्रेणिभूषणाः । भद्रा कन्या सुभद्रान्या स्त्रीरत्नं भरतस्य सा ॥१०६॥
नमेस्तु तनया जाता बहुशो [1]बहुशोचिषः । रविस्तनयसोमश्च[2] पुरुहूतोंऽशुमान् हरिः ॥१०७॥
जयः पुलस्त्यो विजयो मातङ्गो वासवादयः । कन्या कनकपुञ्जश्रीः कन्या कनकमञ्जरी ॥१०८॥
नमिश्च विनमिः पश्चाद्विपश्चित्पुत्रमण्डले । न्यस्तविद्याधरैश्वर्यौ निवृत्तौ जिनदीक्षितौ ॥१०९॥
मातङ्गो विनमेः सूनुः सूनवस्तस्य भूरिशः । तत्पुत्रपौत्रसन्तानो जातः स्वर्मोक्षसाधनः ॥११०॥
जिनस्य ह्येकविंशस्य तीर्थे मातङ्गवंशजः । राजा प्रहसितो जातः पुरे ह्यसितपर्वते ॥१११॥
श्रीमातङ्गान्वयव्योमपतङ्गस्य प्रतापिनः । अहं हिरण्यवत्याख्या [3]विद्यावृद्धास्य भामिनी ॥११२॥
पुत्रो मे सिंहदंष्ट्राख्यस्तस्य नीलाञ्जना प्रिया । नीलनीरजनीलाभा कन्या नीलयशास्तयोः ॥११३॥
[4]अनीलयशसस्तस्याः कुलशीलकलागुणैः । कृतोद्यमं मया वंशो वर्णितो लब्धवर्णया ॥११४॥
हरिवंशनभश्चन्द्र ! चन्द्रमुख्याऽवलोकितः । नृत्यन्त्या त्वं तयेहैत्य वासुपूज्यमहाहवे ॥११५॥
तव दर्शनमेतस्याः सुखहेतुरभूद् यथा । दुःखहेतुस्तथैवाद्य वर्तते विरहे स्मृतम् ॥११६॥
न सा स्नाति न सा भुङ्क्ते न सा वक्ति न चेष्टते । साऽनङ्गशरशल्या च जीवतीति महाद्भुतम् ॥११७॥

तदनन्तर राजा विनमिके संजय, अरिंजय, शत्रुञ्जय, धनञ्जय, मणिचूल, हरिश्मश्रु, मेघानीक, प्रभञ्जन, चूडामणि, शतानीक, सहस्रानीक, सर्वञ्जय, वज्रबाहु, महाबाहु और अरिंदम आदि अनेक पुत्र हुए। ये सभी पुत्र विनय एवं नीतिज्ञानसे सहित थे, नाना विद्याओंसे प्रकाशमान थे और उत्तरश्रेणिके उत्तम आभूषण स्वरूप थे। पुत्रोंके सिवाय भद्रा और सुभद्रा नामकी दो कन्याएँ भी हुईं। इनमें सुभद्रा भरत चक्रवर्तीके चौदह रत्नोंमें एक स्त्रीरत्न थी ॥१०३–१०६॥ इस प्रकार नमिके भी रवि, सोम, पुरुहूत, अंशुमान, हरि, जय, पुलस्त्य, विजय, मातङ्ग तथा वासव आदि अत्यधिक कान्तिके धारक अनेक पुत्र हुए और कनकपुञ्जश्री तथा कनकमञ्जरी नामकी दो कन्याएँ हुईं ॥१०७–१०८॥ आगे चलकर परम विवेकी नमि और विनमि, पुत्रोंके ऊपर विद्याधरोंका ऐश्वर्य रखकर संसारसे विरक्त हो गये और दोनोंने जिन-दीक्षा धारण कर ली ॥१०९॥ राजा विनमिके पुत्रोंमें जो मातङ्ग नामका पुत्र था उसके बहुतसे पुत्र-पौत्र तथा प्रपौत्र आदि हुए और वे अपनी-अपनी साधनाके अनुसार स्वर्ग तथा मोक्ष गये ॥११०॥ इस तरह बहुत दिनके बाद इक्कीसवें तीर्थंकरके तीर्थमें असितपर्वत नामक नगरमें मातङ्ग वंशमें एक प्रहसित नामका राजा हुआ। वह बड़ा प्रतापी था और मातङ्ग वंशरूपी आकाशका मानो सूर्य था। उसीकी मैं हिरण्यवती नामकी स्त्री हूँ और विद्यासे मैंने वृद्धस्त्रीका रूप धारण किया है ॥१११–११२॥ सिंहदंष्ट्र नामका मेरा पुत्र है और नीलांजना उसकी स्त्री है। उन दोनोंकी नील कमलके समान नीली आभासे युक्त नीलयशा नामकी एक पुत्री है। मुझे बोलनेका अभ्यास है इसलिए मैंने उद्यमकर कुल, शील, कला तथा अनेक गुणोंके द्वारा उज्ज्वल यशको धारण करने-वाली उस कन्याके वंशका वर्णन किया है ॥११३–११४॥ हे हरिवंशरूपी आकाशके चन्द्र ! वह चन्द्रमुखी कन्या आष्टाह्निक पर्वके समय श्रीवासुपूज्य भगवान्के पूजा-महोत्सवमें इस चम्पापुरी-में आई थी और मन्दिरके आगे जब नृत्य कर रही थी तब उसने आपको देखा था ॥११५॥ हे कुमार ! इस कन्याके लिए उस समय आपका दर्शन जैसा सुखका कारण हुआ था वैसा ही आज विरहकालमें दुःखका कारण हो रहा है ॥११६॥ न वह स्नान करती है, न खाती है, न बोलती

---

१. बहुरोचिषः म० । २. तनयः सोमश्च ग० । ३. विद्यावृद्धस्य म० । ४. अनीलममलिनं यशो यस्यास्तस्याः ।

तस्यामेतदवस्थायां कुलमस्माकमाकुलम् । न वेत्ति किं करोमीति पितृमातृपुरोगमम् ॥११८॥
कन्याया मानसं प्रश्ने द्योतितं कुलविद्यया । पद्मिन्येवान्यथाभूत्या युवमातङ्गदूषितम् ॥११९॥
ततो विनिश्चितास्माभिर्यादवस्य[1] तवेप्सया । मत्तमातङ्गगामिन्याः कन्याया हृदयव्यथा ॥१२०॥
आगतास्मि ततो नेतुं भवन्तं तत्र यादव । सा तवैव विदोद्दिष्टा तदेहि परिणीयताम् ॥१२१॥
स श्रुत्वा तदवस्थां तां चेतश्चोरणकारिणीम् । सोत्कण्ठितोऽपि तत्काले नैच्छच्चम्पाविनिर्गमम् ॥१२२॥
आगमिष्याम्यहं तावत्त्वं तां तावत्तनूदरीम् । अम्ब ! बिम्बाधरां गत्वा ममोदन्तेन सान्त्वय ॥१२३॥
सेत्युक्त्यानुज्ञया मुक्ता दत्ताशीरेवमस्त्विति । मनोरथरथारूढा गत्वा कन्यामसान्त्वयत् ॥१२४॥
स्नात्वा पयोधरोन्मुक्तैर्वसुदेवो नवोदकैः । कृत्वा पयोधराश्लेषं कान्तया शयितोऽन्यदा ॥१२५॥
भीमदर्शनयाऽऽकृष्टकरो वेतालकन्यया । विबुद्धोऽताडयन्मुग्धो भुजेन दृढमुष्टिना ॥१२६॥
नीतश्च निशि निस्त्रिंशनराकारभृता तया । रथ्यामार्गेण दुर्ग्राहं महापितृवनं यदुः ॥१२७॥
मातङ्गीभिर्भृशं भृङ्गीसङ्गताङ्ग[2]प्रभात्मभिः । सङ्गतामिङ्गितज्ञोऽत्र मातङ्गीं [3]शौरिरैक्षत ॥१२८॥
एहि स्वागतमित्याह सा हसन्ती[4] तमेतया । [5]सिक्तो वेतालविद्याभिर्हसन्त्यन्तरधायत[6] ॥१२९॥

है और न कुछ चेष्टा ही करती है। कामके बाणरूपी शल्योंसे छिदी हुई वह कन्या जीवित है यही बड़े आश्चर्यकी बात है ॥११७॥ उसकी इस दशामें माता-पिताको लेकर हमारा समस्त कुल व्याकुल हो रहा है तथा वह यह भी नहीं जानता है कि मैं क्या कर रहा हूँ ? ॥११८॥ जब मैंने उसके हृदयका हाल जाननेके लिए कुल-विद्यासे पूछा तो उसने यह प्रकट किया कि हाथीके द्वारा नष्ट की हुई कमलिनीके समान इसका हृदय किसी युवा पुरुषके द्वारा दूषित किया गया है ॥११९॥ तदनन्तर मैंने निश्चय कर लिया कि मत्त-मतङ्गजके समान चलनेवाली कन्याके हृदयकी पीड़ा आपकी ही इच्छासे है। भावार्थ—उसके हृदयकी पीड़ा आपके ही कारण है ॥१२०॥ हे यादव ! मैं आपको वहाँ ले जानेके लिए आई हूँ, निमित्तज्ञानीने भी वह आपकी ही बतलाई है अतः आप चलें और उसे स्वीकार करें ॥१२१॥ कुमार वसुदेव अपने चित्तको चुरानेवाली नीलंयशाकी वह अवस्था सुन जानेके लिए यद्यपि उत्कण्ठित हो गये तथापि उस समय उन्होंने चम्पापुरीसे बाहर जाना ठीक नहीं समझा ॥१२२॥ और यही उत्तर दिया कि हे अम्ब ! मैं आऊँगा तुम तबतक जाकर उस कृशोदरी बिम्बोष्ठीको मेरा समाचार सुनाकर सान्त्वना देओ ॥१२३॥ कुमारने इस प्रकारकी आज्ञा देकर जिसे छोड़ा था ऐसी वृद्धा स्त्रीने 'तथास्तु' कहकर उन्हें आशीर्वाद दिया और मनोरथ रूपी रथपर आरूढ़ हो जाकर कन्याको सान्त्वना दी ॥१२४॥

तदनन्तर किसी समय वसुदेव, मेघों द्वारा छोड़े हुए नूतन जलसे स्नान कर कान्ता गान्धर्वसेनाके साथ उसके स्तनोंका गाढ़ालिङ्गन करते हुए शयन कर रहे थे ॥१२५॥ कि एक भयंकर आकारवाली वेताल-कन्याने आकर उनका हाथ खींचा। वे जाग तो गये पर यह नहीं समझ सके कि इस समय क्या करना चाहिए फिर भी दृढ़ मुट्ठियोंवाली भुजासे उन्होंने उसे खूब पीटा ॥१२६॥ इतना होनेपर भी दुष्ट मनुष्यकी आकृतिको धारण करनेवाली वह कन्या उन्हें मजबूत पकड़कर रात्रिके समय गलीके मार्गसे श्मशान ले गई ॥१२७॥ हृदयकी चेष्टाओंको जाननेवाले कुमारने वहाँ भ्रमरीके समान काली-काली मातङ्गियोंसे युक्त एक मातङ्गीको देखा। उस मातङ्गीने हँसकर कुमारसे कहा कि आइए आपके लिए स्वागत है। यह कहकर वेताल विद्याओंसे उसने इनका अभिषेक कराया और उसके बाद वह हँसती हुई अन्तर्हित हो गई ॥१२८-१२९॥ तदनन्तर उसने असली रूपमें प्रकट होकर कहा कि कुमार, मुझे मातङ्गी मत समझो, मैं हिरण्यवती हूँ। मैंने कार्य सिद्ध

१. यादवश्च म० । २. सङ्गीताङ्ग-म० । ३. वसुदेवः । ४. हसन्तीतिमेनया ग० । ५. सिक्ता म०, ख० । ६. अन्तर्हिता बभूव ।

मातङ्ग इति मा मंस्था त्वं हिरण्यवतीत्यहम् । कल्पो मातङ्गविद्यायाः शौरेऽयं कार्यसाधनः ॥१३०॥
सेयं त्वा नाप्तितो म्लाना बाला चेतोमलिम्लुचम् । बाला वष्टि इदं नेतुं बाहुपाशेन बन्धनम् ॥१३१॥
तमित्युक्त्वान्तिकं प्राप्तां सा नीलयशसं जगौ । वल्लभः स्पृश सोऽयं ते करेण करपल्लवम् ॥१३२॥
साऽनुज्ञाता करेणास्य प्रस्विन्नावयवा करम् । प्रसारिताङ्गुलिं बाला स्वेदिनस्ताद्दशाऽग्रहीत् ॥१३३॥
तयोः प्रेमतरुः सिक्तस्तनुस्पर्शसुखाम्भसा । रोमाञ्चव्यपदेशेन व्यमुञ्चत् [1]कर्कशाङ्कुरान् ॥१३४॥
पाणिग्रहणमाद्यं हि तदैवासीत्तदा तयोः । भावार्द्रीकृतयोः पश्चाद्भाविता व्यावहारिकम् ॥१३५॥
सद्यो विद्याधरीवृन्दं [2] समुत्पत्य ततोऽखिलम् । शौरिणा सह संहृष्टमुत्तरां दिशमुद्ययौ ॥१३६॥
भूषौषधिप्रभापिण्डखण्डितध्वान्तसन्ततिः । रेजे खे खेचरस्त्रीणां [3]संहतिस्तडितां यथा ॥१३७॥
तदा शौरिरिवार्कोऽपि करसम्पर्कमात्रतः । प्राग्नीलाशावधूवक्त्रमकरोत् प्रभयोज्ज्वलम् ॥१३८॥
अर्धोदितो बभौ भानुः पाटलः प्राग्वधूमुखे । दिवसस्य स्फुरद्बालमर्धदष्ट इवाधरः ॥१३९॥
सर्वोदितप्रभास्तस्या मुखमण्डलमण्डनम् । मार्तण्डमण्डलं यद्वत्सौवर्णं कर्णकुण्डलम् ॥१४०॥
रविणा शौरिणेवाशु भुवनद्योतकारिणी । द्यावापृथिव्यौ विस्पष्टे द्राग्दृष्टिप्रसरे कृते ॥१४१॥
शौरिं हिरण्यवत्याह महारण्यनगावृतम् । अधः पश्यसि यं भूमौ कुमार ! गिरिमुन्नतम् ॥१४२॥
श्रीमन्तं प्रवदन्तीमं ह्रीमन्तं नामतो गिरिम् । तपःश्रीमन्तमाधत्ते लोकं ह्रीमन्तमप्ययम् ॥१४३॥

करनेके लिए मातङ्ग विद्याके प्रभावसे यह वेष रक्खा था ॥१३०॥ यह कहकर उसने पासमें बैठी नीलंयशाकी ओर संकेत कर कहा कि देखो यह वही बाला नीलंयशा है जो हृदयको चुरानेवाले आपको न पाकर मुरझा गई है। यह बाला आपको अपने बाहुपाशसे बाँधना चाहती है—आपका आलिङ्गन करना चाहती है ॥१३१॥ कुमारसे इतना कहकर हिरण्यवतीने पासमें बैठी हुई नीलंयशासे भी कहा कि यही तेरा वह स्वामी है अपने हाथसे इसके हस्त पल्लवका स्पर्श कर ॥१३२॥ इस प्रकार हिरण्यवतीकी आज्ञा पाकर कुमारी नीलंयशाने कुमार वसुदेवके फैलाये हुए हाथको अपने हाथसे पकड़ लिया। उस समय एक दूसरेके स्पर्शसे दोनोंके शरीरसे पसीना छूट रहा था ॥१३३॥ उन दोनोंका प्रेमरूपी वृक्ष शरीरके स्पर्शजन्य सुखरूपी जलसे सींचा गया था इसलिए वह रोमाञ्चके बहाने कठोर अङ्कुरोंको प्रकट कर रहा था ॥१३४॥ वे दोनों ही स्नेहसे आर्द्रचित्त थे इसलिए उनका प्रथम पाणिग्रहण उसी समय हो गया था और व्यावहारिक पाणिग्रहण पीछे होगा ॥१३५॥ तदनन्तर हर्षसे भरा विद्याधरियोंका समस्त समूह शीघ्र ही कुमार वसुदेवके साथ आकाशमें उड़कर उत्तर दिशाकी ओर चल दिया ॥१३६॥ आभूषण तथा औषधियोंकी प्रभासे अन्धकारकी सन्ततिको नष्ट करता हुआ वह विद्याधरियोंका समूह आकाशमें बिजलियोंके समूहके समान सुशोभित हो रहा था ॥१३७॥ उस समय जिस प्रकार कुमार वसुदेवने हाथके स्पर्शमात्रसे नीलंयशाके मुखको प्रभासे उज्ज्वल कर दिया था उसी प्रकार सूर्यने भी अपनी किरणोंके स्पर्श मात्रसे पूर्व दिशारूपी स्त्रीके मुखको प्रभासे उज्ज्वल कर दिया था ॥१३८॥ उस समय पूर्व दिशाके अग्रभागमें आधा उदित हुआ लाल-लाल सूर्य ऐसा जान पड़ता था मानो दिवसरूपी युवाके द्वारा आधा डसा हुआ पूर्व दिशारूपी स्त्रीका लाल अधर ही हो ॥१३९॥ थोड़ी देर बाद जब सूर्यमण्डल पूर्ण उदित हो गया तब ऐसा जान पड़ने लगा मानो पूर्व दिशारूपी स्त्रीके मुखमण्डलको अलंकृत करनेवाला सुवर्णमय कानोंका कुण्डल ही हो ॥१४०॥ कुमार वसुदेवके समान संसारको प्रकाशित करनेवाले सूर्यने जब शीघ्र ही आकाश और पृथिवीको स्पष्ट कर दिया तथा उनकी ओर शीघ्र ही दृष्टिका प्रसार होने लगा ॥१४१॥ तब हिरण्यवतीने वसुदेवसे कहा कि हे कुमार ! नीचे पृथिवीपर महावनके वृक्षोंसे घिरे हुए जिस उन्नत पर्वतको देख रहे हो उस शोभासम्पन्न पर्वतको लोग ह्रीमन्त गिरि कहते हैं। यह पर्वत लज्जासे युक्त मनुष्यको भी

१. कर्कशाङ्कुरान् म० । २. समूहः । ३. समूहः ।

श्यामयाऽशनिवेगस्य दुहित्राङ्गारकः खगः । युद्धे खण्डितविद्योऽत्र विद्यासिद्धिं प्रतिस्थितः ॥१४४॥
दर्शनेन तवास्याशु किल विद्या प्रसिद्ध्यति । [1]तदाऽस्यानुग्रहेच्छा चेद्देहि देहि स्वदर्शनम् ॥१४५॥
इत्युक्तो विदितश्यामाक्षेमवार्त्तः स तोषवान् । जगाद किमनिष्टेन दृष्टेनाङ्गारकेण मे ॥१४६॥
कालातिपातिभिर्व्यर्थैः क्रीडितैरिह किं कृतैः । प्रयामो वयमास्स्व त्वं पश्यामः [2]श्वाशुरं पुरम् ॥१४७॥
एवमस्त्विति नीत्वाऽसौ स्थापितोऽसितपर्वते । कृतविद्याधरीरक्षो बाह्योद्याने मनोहरे ॥१४८॥
प्रविष्टा तुष्टचित्ता च निजं नीलयशाः पुरम् । शौरिसत्कथया तस्थौ तत्समागमकाङ्क्षया ॥१४९॥
सुस्नातोऽलङ्कृतो भूत्या महत्या स [3]रथस्थितः । प्रवेशितः पुरं वीरः खेचरैः स्वर्गसन्निभम् ॥१५०॥
दृष्टः सप्रश्रयं श्रीमानवितृप्तविलोचनैः । जनैः ससिंहदंष्ट्रैः स तुष्टान्तःपुरपूर्वकैः ॥१५१॥
ततः पुण्यदिने पुण्यपूर्णयोः पूर्णरूपयोः । विधिपूर्वं तयोर्वृत्तं पाणिग्रहणमङ्गलम् ॥१५२॥
स नीलयशसा शौरिर्नगरेऽसितपर्वते । रत्येव सहितः कामः कामभोगानसेवत ॥१५३॥

शार्दूलविक्रीडितम्

नीलं नीलयशोयशो न जनितं स्त्रीभिर्यतः[4] स्वैर्गुणैः
शौरेः शौर्यशरीरिणो हि न यशः कृष्णीकृतं खेचरैः ।

तपरूपी लक्ष्मीसे युक्त कर देता है ॥१४२–१४३॥ यहाँ अशनिवेगकी पुत्री श्यामाने युद्धमें जिसकी विद्या खण्डित कर दी थी ऐसा अङ्गारक नामका विद्याधर विद्या सिद्ध करनेके लिए स्थित है। आपके दर्शनसे इसे शीघ्र विद्या सिद्ध हो जावेगी इसलिए यदि इसका उपकार करनेकी आपकी इच्छा है तो इसे अपना दर्शन दें ॥१४४–१४५॥ हिरण्यवतीके इस प्रकार कहनेपर प्रियतमा श्यामाके कुशल समाचार जानकर कुमार बहुत सन्तुष्ट हुए और कहने लगे कि अङ्गारक तो हमारा शत्रु है इसको देखनेसे क्या लाभ है ? ॥१४६॥ इस पर्वतपर की हुई समयको बितानेवाली व्यर्थकी क्रीडाओंसे मुझे क्या प्रयोजन है ? यदि तुम्हें रहना इष्ट है तो रहो मैं तो जाता हूँ और श्वसुरके नगरको देखता हूँ ॥१४७॥ कुमारके ऐसा कहनेपर हिरण्यवतीने 'एवमस्तु' कहा अर्थात् जैसा आप चाहते हैं वैसा ही करती हूँ। यह कह उसने असितपर्वत नगर ले जाकर उन्हें नगरके बाहर एक सुन्दर उद्यानमें ठहरा दिया तथा रक्षाके लिए विद्याधरियोंको नियुक्त कर दिया ॥१४८॥ कुमारी नीलंयशा प्रसन्नचित्त हो अपने नगरमें प्रविष्ट हुई और कुमारके समागमकी आकांक्षा तथा उन्हींकी कथा करती हुई रहने लगी ॥१४९॥ तदनन्तर बड़े वैभवके साथ जिन्हें स्नान कराया गया था तथा उत्तमोत्तम आभूषण पहिनाये गये थे ऐसे वीर कुमार वसुदेवको रथपर बैठाकर विद्याधरोंने स्वर्ग तुल्य नगरमें प्रविष्ट कराया ॥१५०॥ वहाँ कुमारका मनोहर रूप देख-देखकर जिसके नेत्र तृप्त नहीं हो रहे थे ऐसे नीलंयशाके पिता सिंहदंष्ट्र तथा सन्तोषसे युक्त अन्तःपुरको आदि लेकर समस्त लोगोंने बड़े विभवके साथ श्रीमान् वसुदेवको देखा ॥१५१॥ तदनन्तर जो पुण्यसे परिपूर्ण थे और जिनका रूप चरम सीमाको प्राप्त था ऐसे कुमार वसुदेव और नीलंयशाका पाणिग्रहण मङ्गल किसी पवित्र दिन विधिपूर्वक सम्पन्न हुआ ॥१५२॥ तत्पश्चात् जिस प्रकार कामदेव अपनी स्त्री रतिके साथ इच्छानुसार भोगोंका सेवन करता है उसी प्रकार कुमार वसुदेव असितपर्वत नगरमें नीलंयशाके साथ इच्छानुसार भोगोंका सेवन करने लगे ॥१५३॥ गौतम स्वामी कहते हैं कि चूँकि वहाँकी स्त्रियाँ अपने गुणोंसे नीलंयशाके यशको मलिन नहीं कर सकीं थीं और न विद्याधर ही पराक्रमी वसुदेवके यशको कलंकित कर सके थे

१. तवास्या-म० । २. श्वसुरस्येदम् श्वाशुरम् । ३. रथः स्थितः म० । ४. -र्जितः म० ।

तत्तत्र स्थितयोस्तयोः सुखरसं प्रेमप्रसक्तात्मनोः
साकल्येन जनो जिनप्रवचनज्ञो हि प्रवक्तुं क्षमः ॥१५४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ नीलयशोलाभवर्णनो नाम द्वाविंशः सर्गः ॥२२॥

इसलिए वहाँ प्रेमपूर्वक रहनेवाले वसुदेव और नीलंयशाको जो सुख उपलब्ध था उसका सम्पूर्ण रूपसे वर्णन करनेके लिए जिन प्रवचनका ज्ञाता श्रुतकेवली ही समर्थ हो सकता है ॥१५४॥

इस प्रकार अरिष्टनेमिपुराणसंग्रहसे युक्त जिनसेनाचार्य रचित हरिवंशपुराणमें नीलंयशाके लाभका वर्णन करनेवाला बाईसवाँ सर्ग समाप्त हुआ ॥२२॥

त्रयोविंशः सर्गः

प्रासादस्थोऽन्यदा श्रुत्वा महाकलकलध्वनिम् । इत्यपृच्छत्प्रतीहारीं शौरिः पार्श्वव्यवस्थिताम् ॥१॥
कुतो हेतोरयं लोको वर्तते मुखरोऽखिलः । इत्युक्ता साऽवदत्तस्मै वृत्तवृत्तान्तवेदिनी ॥२॥
शृणु देवास्ति शैलेऽस्मिन् नगरं शकटामुखम् । तस्येशो नीलवान् नाम्ना व्योमगानामधीश्वरः ॥३॥
नीलस्तस्य सुतः[1] कन्या मान्या नीलाञ्जनाभिधा । कुमारकन्ययोर्वृत्ता सङ्कथा च तयोरिति ॥४॥
पुत्रो मे ते यदा कन्या भविता भविता तयोः । अविवादो विवाहोऽत्र गोत्रप्रीतौ परस्परम् ॥५॥
ऊढायाः सिंहदंष्ट्रेण श्वशुरेण तवामुना । सेयं नीलाञ्जनायाश्च जाता नीलयशाः सुता ॥६॥
नीलस्योढभार्यस्य नीलकण्ठस्तु यः सुतः । जातोऽस्मै याचते स्मैतां स नीलयशसं तदा ॥७॥
सिद्धादेशस्य सत्साधोरादेशात्तु बृहस्पतेः । दत्तेयं तेऽर्धचक्रेशपित्रे पित्रा यशस्विने ॥८॥
[2]पितापुत्रौ च तौ नीलनीलकण्ठौ सभान्तरे । खलौ च सिंहदंष्ट्रेण व्यवहारं श्रिताविमौ ॥९॥
न्यायेन च तयोरत्र जितयोः श्वशुरेण ते । उच्चैः खेचरलोकेन कृतः कलकलध्वनिः ॥१०॥
इति श्रुत्वा प्रतीहार्या वचः सूर्यपुरोद्भवः[3] । कृतस्मितमुखं तस्थौ स नीलयशसा सह ॥११॥
प्राप्तां घनकृताश्लेषां प्रावृषं [4]विषयप्रियाम् । [5]शुक्लापाङ्गस्वनैर्हृद्यां सोऽन्वभूतां वधूमिव ॥१२॥

लब्धसंज्ञा समुत्थाय ध्यायन्ती स्वर्गिणं पतिम् । स्नानाशनविमुक्तेच्छा मौनव्रतमशिश्रियत् ॥५४॥
एकान्ते पृष्टया कृच्छ्रात् कथितं च ममानया । पूर्वजन्मनि देवेन सह क्रीडितमात्मनः ॥५५॥
पूर्वप्रच्युतदेवस्य हरिवंशे समुद्भवः । विज्ञातश्चानया देव्या सत्यात् केवलिभाषितात् ॥५६॥
समागमश्च विज्ञातः पत्या हस्तिभयच्छिदा । संवादे चाधुना जाते सा ते वाञ्छति सङ्गमम् ॥५७॥
राज्ञा मद्वचनाज्ज्ञात्वा प्रेषिताहं तवान्तिकम् । सौम्य ! सोमश्रिया साकं भज वीवाहमङ्गलम् ॥५८॥
इत्यावेदितसम्बन्धः स तुष्टोऽन्धकवृष्णिजः । सोमश्रियमुवाहेष्टां सोमदत्ततनूद्भवाम् ॥५९॥
स्वास्यारविन्दसौगन्ध्यमकरन्दोपयोगिनोः । काले याति सुखे तावत् सोमश्रीवसुदेवयोः ॥६०॥
अथ कोऽप्येकदा भर्तुर्भुजपञ्जरशायिनीम् । सोमश्रियं श्रियं वाऽरिरहरन्निशि खेचरः ॥६१॥
विबुद्धस्तु पतिः पत्नीमपश्यन् परमाकुलः । सोमश्रीः क्व गताऽसि त्वमेह्येहीति जुहाव ताम् ॥६२॥
ततोऽनन्तरमेवाऽहमिति दत्त्वा वचः स्थिताम् । खेटस्वसारमद्राक्षीत्सोमश्रीरूपधारिणीम् ॥६३॥
निष्क्रान्तासि बहिः कान्ते किमर्थमिति नोदिता । घर्मशान्त्यर्थमित्याह सोमश्रीरिव सा स्वयम् ॥६४॥
कृतरूपपरावर्तिः शौरिरूपवशीकृता । कन्याभावमुदस्यैनमरीरमदरिस्वसा ॥६५॥
नित्यशो भुक्तभोगा च सुप्ते पत्यौ स्वपित्यसौ । प्राक् प्रबुद्धा करोत्यूरुपादसंवाहनादिकम् ॥६६॥

जाति स्मरणसे युक्त हो गई और अपने पूर्व पतिके प्रेमको प्रकट करती हुई मूर्च्छित हो गई ॥५३॥ जब वह सचेत हुई तो उठकर अपने देव पतिका ध्यान करने लगी और स्नान, भोजन आदिकी इच्छा छोड़ मौन लेकर बैठ गई ॥५४॥ एकान्तमें मैंने उससे पूछा तो उसने बड़ी कठिनाईसे मुझे बताया कि पूर्वजन्ममें मैंने देवके साथ क्रीड़ा की थी उसने यह भी बताया कि जब मैं देवी थी और वह देव मुझसे पहले ही वहाँसे च्युत हो गया तब केवली भगवान्के सत्य कथनसे मुझे मालूम हुआ था कि वह देव हरिवंशमें उत्पन्न हुआ है तथा हाथीके भयको नष्ट करनेवाले उस पतिके साथ मेरा पुनः समागम होगा। इस समय केवली भगवान्का कथन ज्योंका-त्यों मिल गया है अर्थात् जैसा उन्होंने बताया था वैसा ही हुआ है इसलिए वह आपके समागमकी इच्छा करती है ॥५५-५७॥ मेरे कथनसे सब समाचार जानकर राजाने मुझे आपके पास भेजा है इसलिए हे सौम्य ! मेरी यही प्रार्थना है कि आप सोमश्रीके साथ विवाह मङ्गलको प्राप्त हों ॥५८॥

इस प्रकार पूर्व भवका सम्बन्ध बतलानेपर वसुदेव बहुत ही संतुष्ट हुए और उन्होंने राजा सोमदत्तकी पुत्री सोमश्रीके साथ जो कि उनकी पूर्वभवकी प्रिय स्त्री थी विवाह कर लिया ॥५९॥ तदनन्तर जब अपने मुख कमलकी सुगन्धि और मकरन्दका उपयोग करनेवाले सोमश्री और वसुदेवका काल सुखसे व्यतीत हो रहा था तब एक दिन रात्रिके समय पतिके भुजपञ्जरमें शयन करनेवाली लक्ष्मीके समान सुन्दर सोमश्रीको कोई विद्याधर वैरी हर ले गया ॥६०-६१॥ जब वसुदेव जागे तब पत्नीको न देख बहुत व्याकुल हुए और 'हे सोमश्री ! तू कहाँ गई ? जल्दी आओ, आओ' इस प्रकार उसे पुकारने लगे ॥६२॥ जिस विद्याधरने सोमश्रीका हरण किया था उसकी बहिनने वसुदेवके पास आकर सोमश्रीका रूप धारण कर लिया और उनके पुकारते ही कहा कि 'मैं यह तो हूँ' इस प्रकार उत्तर देकर पासमें खड़ी हुई तथा सोमश्रीका रूप धारण करने-वाली विद्याधरकी बहिनको वसुदेवने देखा ॥६३॥ उसे देखकर कुमारने पूछा कि हे प्रिये ! बाहर किसलिए गई थीं ? इसके उत्तरमें उसने स्वयं सोमश्रीके समान कहा कि गरमी शान्त करनेके लिए गई थी ॥६४॥ इस प्रकार वसुदेवके रूपसे वशीभूत हुई शत्रुकी बहिन रूप बदलकर तथा अपना कन्याभाव छोड़कर उनके साथ क्रीड़ा करने लगी ॥६५॥ वह प्रतिदिन भोग भोगनेके बाद पति जब सो जाते थे तब सोती थी और उनके पहले ही जागकर जंघा तथा पैर आदिका मर्दन करने लगती थी ॥६६॥

अन्यदा तु विबुद्धोऽसौ प्रथमं कथमप्यथ । सोमश्रीरूपमुक्तां तां ददर्श शयितां निशि ॥६७॥
धीरो विस्मययुक्तस्तां सहसा स्वयमुत्थिताम् । अप्राक्षीद् मुग्धहो का त्वं सोमश्रीरिव वर्तसे ॥६८॥
सा प्रणम्याभणीत्सौम्य ! दक्षिणश्रेण्यवस्थितम् । स्वर्णाभं पुरमस्येशो मनोवेगो नभश्चरः ॥६९॥
पत्न्यङ्गारवती तस्य प्रत्यङ्गं सङ्गतप्रभा । सूनुर्मानसवेगोऽस्याः सुता वेगवती त्वहम् ॥७०॥
राज्यं मानसवेगे च पिता न्यस्य तपस्यया । पापस्योपशमं कर्तुं तपोवनमुपाविशत् ॥७१॥
नीता मानसवेगेन सोमश्रीः स्वपुरं परम् । आर्य ! तिष्ठति तत्रासौ शीलवेलावलम्बिनी ॥७२॥
तस्याः प्रसादने तेन प्रयुक्ताऽहमशक्तितः । त्वत्प्रियायाः सखी जाता सत्त्वशीलवशीकृता ॥७३॥
वार्तानिवेदनायाहं प्रेषिताऽशु तया तदा । त्वत्कलत्रत्वमायाता विचित्राश्चित्तवृत्तयः ॥७४॥
इत्यावेद्य तदादेशाद्वेगवत्या निवेदितम् । सक्रमं पितृबन्धुभ्यः सोमश्रीहरणादिकम् ॥७५॥
श्रुत्वा च तत्तथा तेऽपि विषण्णमतयः स्थिताः । वेगवत्यपि पत्यासा प्रकृत्या चिरमारमत् ॥७६॥
तया सह सुखं तस्य रममाणस्य भोगिनः । सम्प्राप्तो माधवो मासो मधुमत्तमधुव्रतः ॥७७॥
कदाचित्सह सुप्तोऽसौ तया सुरतखिन्नया । हृतो मानसवेगेन खेचरेण निशि द्रुतम् ॥७८॥
ताडितश्च विबुद्धेन खेचरो दृढमुष्टिना । तेन गङ्गाजले तं च मुमोच भयविह्वलः ॥७९॥
विद्यां साधयतस्तत्र स्कन्धे विद्याधरस्य सः । पपात नभसस्तस्य विद्यासिद्धिस्तथोदिता ॥८०॥
सिद्धविद्यः प्रणम्यासौ प्रयातो यदुनन्दनम् । कन्या विद्याधरी चैनं निनाय खचराचलम् ॥८१॥

अथानन्तर किसी दिन वसुदेव उससे पहले जाग गये और रात्रिके समय सोमश्रीका रूप छोड़कर सोती हुई उस स्त्रीको उन्होंने असली रूपमें देख लिया ॥६७॥ यह देख धीर-वीर वसुदेव आश्चर्यमें पड़ गये। उसी समय वह स्त्री भी सहसा जाग उठी। वसुदेवने उससे पूछा कि अहो! तू सोमश्रीके समान कौन है? ॥६८॥ इसके उत्तरमें उसने प्रणाम कर कहा कि हे सौम्य! दक्षिण श्रेणीमें एक स्वर्णाभ नामका नगर है। इसका स्वामी मनोवेग नामका विद्याधर है ॥६९॥ मनोवेगकी अङ्गारवती नामकी अत्यन्त सुन्दर पत्नी है। उसके मानसवेग नामका पुत्र और वेगवती नामकी मैं पुत्री हूँ ॥७०॥ हमारे पिता मानसवेगको राज्य देकर तपस्यासे पापका उपशम करनेके लिए तपोवनमें चले गये ॥७१॥ हे आर्य! हमारा भाई मानसवेग, सोमश्रीको हरकर अपने श्रेष्ठ नगरको ले गया जहाँ वह शीलकी मर्यादाका अवलम्बन लेकर विद्यमान है ॥७२॥ मानसवेगने उसे प्रसन्न करनेके लिए मुझे नियुक्त किया था पर मैं इस कार्यमें समर्थ नहीं हो सकी अतः आपकी प्रियाके सत्त्व और शील गुणसे वशीभूत हो उसकी सखी बन गई ॥७३॥ उस समय शीघ्रतासे अपना समाचार देनेके लिए उसने मुझे आपके पास भेजा था पर मैं आपकी स्त्री बन गई सो ठीक ही है क्योंकि चित्तवृत्तियाँ नाना प्रकारकी होती हैं ॥७४॥ इस प्रकार वेगवतीने कुमारको सब समाचार बताकर उनकी आज्ञानुसार सोमश्रीके पिता तथा भाई आदिको भी उसके हरण आदिके सब समाचार क्रमसे सुनाये ॥७५॥ जिन्हें सुनकर वे सब खेदखिन्न हुए। इधर वेगवती भी अपने असली रूपमें रहकर चिरकाल तक पतिके साथ क्रीड़ा करती रही ॥७६॥

अथानन्तर जब भोगी वसुदेव वेगवतीके साथ सुखसे क्रीड़ा करते हुए समय व्यतीत कर रहे थे तब वसन्तका महीना आ पहुँचा और भ्रमर मधु पी-पी कर उन्मत्त होने लगे ॥७७॥ कदाचित् वसुदेव संभोगसे खिन्न हुई वेगवतीके साथ सो रहे थे कि रात्रिके समय मानसवेग विद्याधर उन्हें शीघ्र ही हर ले गया। जागनेपर उन्होंने मुट्ठियोंके दृढ़ प्रहारसे उसे इतना पीटा कि उसने भयसे विह्वल हो उन्हें गङ्गाके जलमें छोड़ दिया ॥७८-७९॥ उस समय गङ्गाके जलमें बैठकर एक विद्याधर विद्या सिद्ध कर रहा था सो वसुदेव आकाशसे उसके कन्धेपर गिरे और उनके गिरते ही उस विद्याधरको विद्या सिद्ध हो गई ॥८०॥ विद्या सिद्ध होनेपर वह विद्याधर तो

तदनन्तरमाकीर्णं खेचरैर्नभसस्तलम् । पुष्पाणि पञ्चवर्णानि मुञ्चद्भिः प्रणतैः पुरः ॥८२॥
प्रवेशितः पुरं सोऽथ रथेन रविरोचिषा । तूर्यशङ्खनिनादेन पूरिताखिलदिङ्मुखम् ॥८३॥
कन्यां मदनवेगां च मदनोपमविभ्रमः । उपयेमे मुदा दत्तां खगैर्दधिमुखादिभिः ॥८४॥
बिभ्राणो वसुदेवोऽत्र भावं मदनवेगजम्[1] । चिक्रीड निबिडस्तन्या चिरं मदनवेगया ॥८५॥

द्रुतविलम्बितवृत्तम्

अनुभवन्तममुं जिनधर्मजं शमनुषक्त[2]मनङ्गजगोचरम् ।
रतिषु लब्धवरा वरमङ्गना जनकबन्धविमोक्षमयाचत ॥८६॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ मदनवेगालाभवर्णनो नाम चतुर्विंशतितमः सर्गः ॥२४॥

वसुदेवको प्रणाम कर चला गया और एक विद्याधर कन्या उन्हें विजयार्ध पर्वतपर ले गई ॥८१॥ उनके वहाँ पहुँचते ही आकाश विद्याधरोंसे व्याप्त हो गया। वे विद्याधर उस समय पाँच रङ्गके फूलोंकी वर्षा कर रहे थे तथा सामने आ-आकर प्रणाम करते थे ॥८२॥ तदनन्तर उन विद्याधरोंने सूर्यके समान देदीप्यमान रथपर बैठाकर वसुदेवका नगरमें प्रवेश कराया। उस समय तुरही और शङ्खोंके शब्दसे दशों दिशाएँ भर गई थीं ॥८३॥ वहाँ कामदेवके समान सुन्दर शरीरके धारक वसुदेवने, दधिमुख आदि विद्याधरोंके द्वारा प्रदत्त मदनवेगा नामक कन्याके साथ हर्षपूर्वक विवाह किया ॥८४॥ और वहीं रहकर कामके वेगसे उत्पन्न भावको धारण करते हुए वसुदेवने पीनस्तनी मदनवेगाके साथ चिरकाल तक क्रीड़ा की ॥८५॥

कदाचित् कुमार वसुदेव, जिनधर्मके प्रसादसे मदनवेगाके साथ कामजनित सुखका उपभोग कर रहे थे कि रतिकालमें मदनवेगाने उन्हें अत्यन्त आनन्द दिया इसलिए प्रसन्न होकर उन्होंने मदनवेगासे कहा कि 'प्रिये ! मैं तुमपर बहुत प्रसन्न हूँ जो वर माँगना हो माँगो।' इस प्रकार वह वर पाकर मदनवेगाने उनसे यही वर माँगा कि हमारे पिता बन्धनमें पड़े हैं सो उन्हें छुड़ा दीजिए ॥८६॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें मदनवेगाके लाभका वर्णन करनेवाला चौबीसवाँ सर्ग समाप्त हुआ ॥२४॥

---

१. कामवेगोत्पन्नं । २. समसुखं गज म० ।

पञ्चविंशः सर्गः

भ्राता मदनवेगायाः भित्त्वा दधिमुखोऽन्यदा। पितृबन्धविमोक्षार्थी सम्बन्धं शौरयेऽवदत्[1] ॥१॥
शृणु देव ! नमेर्वंशे संख्यातीतेषु राजसु। अरिञ्जयपुराधीशो मेघनादोऽभवन्नृपः ॥२॥
पद्मश्रीस्तस्य कन्याऽभूत् सा च नैमित्तिकैः पुरा। स्त्रीरत्नं भवितेत्येवमादिष्टा चक्रवर्तिनः ॥३॥
नभस्तिलकनाथश्च प्रियपूर्वमनेकशः। वज्रपाणिरिति ख्यातस्तामयाचत रूपिणीम् ॥४॥
अलाभे च ततस्तस्या स रुष्टो दुष्टखेचरः। युद्धे जेतुमशक्तोऽगात्दकृतार्थो निजं पुरम् ॥५॥
मेघनादोऽपि तत्काले जातकेवललोचनम्। मुनिमभ्यर्च्य पप्रच्छ नृसुरासुरसंसदि ॥६॥
प्रभो ! मे दुहितुर्भर्ता भविता भरतेऽत्र कः। इति पृष्टोऽवदत्सोऽपि वरमन्वयपूर्वकम् ॥७॥
कौरवान्वयसम्भूतो भूतो गजपुरे नृपः। कार्तवीर्य इति ख्यातिं बिभ्रद्वीर्यसमुद्धतः ॥८॥
सोऽवधीत् कामधेन्वर्थं जमदग्निं[2] तपस्विनम्। क्रोधात्परशुरामस्तं जघान पितृघातिनम् ॥९॥
क्षत्रियेषु तथाऽन्येषु सकलत्रेषु शत्रुणा। क्रुद्धेन दत्तयुद्धेषु मार्यमाणेषु भूरिषु ॥१०॥
अन्तर्वत्नी तदा पत्नी कार्तवीर्यस्य कातरा। तारा रहसि निःसृत्य प्राविशत्कौशिकाश्रमम् ॥११॥
वसन्ती तत्र सा भीरुः प्रसूता तनयं शुभम्। क्षत्रियत्रासनिर्भेदमष्टमं चक्रवर्तिनम् ॥१२॥

अथानन्तर किसी दिन मदनवेगाका भाई दधिमुख अपने पिताको बन्धनसे छुड़ानेकी इच्छा करता हुआ कुमार वसुदेवके पास आकर निम्नाङ्कित सन्दर्भ कहने लगा ॥१॥ उसने कहा कि हे देव ! सुनिए, नमिके वंशमें असंख्यात राजाओंके हो जानेसे अरिञ्जयपुरका स्वामी राजा मेघनाद हुआ ॥२॥ उसके एक पद्मश्री नामकी कन्या थी। उस कन्याके विषयमें निमित्तज्ञानियोंने बताया था कि यह चक्रवर्तीकी स्त्री-रत्न होगी ॥३॥ उसीके समयमें नभस्तिलक नगरका राजा वज्रपाणि भी हुआ। उसने रूपवती पद्मश्री कन्याकी पहिले अनेक बार याचना की परन्तु जब वह उसे नहीं प्राप्त कर सका तो उस दुष्ट विद्याधरने रुष्ट होकर युद्ध ठान दिया। मेघनाद प्रबल शक्तिका धारक था इसलिए वज्रपाणि उसे युद्धमें जीत नहीं सका फलस्वरूप वह कार्यमें असफल हो अपने नगरको वापिस लौट गया ॥४-५॥ उसी समय किन्हीं मुनिराजको केवलज्ञानरूपी लोचनकी प्राप्ति हुई सो उनकी पूजाके अर्थ अनेक मनुष्य, देव और धरणेन्द्रोंकी सभा जुटी। उस सभामें केवली भगवान्‌की पूजा कर मेघनादने उनसे पूछा कि हे प्रभो ! इस भरत क्षेत्रमें मेरी पुत्रीका भर्ता कौन होगा ? इस प्रकार पूछनेपर केवलज्ञानी मुनिराजने उसके योग्य वर और उसके कुलका निरूपण किया ॥६-७॥

उन्होंने कहा कि हस्तिनापुर नगरमें कौरववंशमें उत्पन्न हुआ कार्तवीर्य नामका एक राजा था जो पराक्रमसे बहुत ही उद्दण्ड था ॥८॥ उसने कामधेनुके लोभसे जमदग्नि नामक तपस्वीको मार डाला था। जमदग्निका लड़का परशुराम था। वह भी बड़ा बलवान् था अतः उसने क्रोध-वश पिताका घात करनेवाले कार्तवीर्यको मार डाला ॥९॥ इतनेसे ही उसका क्रोध शान्त नहीं हुआ अतः उसने क्रुद्ध होकर युद्धमें स्त्री-पुत्रों सहित और भी अनेक क्षत्रियोंको मार डाला। इस तरह जब वह अनेक क्षत्रियोंको मार रहा था तब राजा कार्तवीर्यकी गर्भवती तारा नामकी पत्नी भयभीत हो गुप्त रूपसे निकलकर कौशिक ऋषिके आश्रममें जा पहुँची ॥१०-११॥ वहाँ भय सहित निवास करती हुई तारा रानीने एक पुत्र उत्पन्न किया जो क्षत्रियोंके त्रासको नष्ट करने-

---

१. पितृबन्धु म० । २. यमदग्निं क०, ख०, ग० ।

यस्माद्भूमिगृहे जातः सुभौमस्तेन भाषितः । कौशिकस्याश्रमे रम्ये प्रच्छन्नो वर्धतेऽधुना ॥१३॥
स हन्ता जामदग्न्यस्य षट्खण्डपतिरूर्जितः । दुहितुर्भविता भर्ता भवतोऽल्पैर्दिनैरिह ॥१४॥
सप्तकृत्वः कृतान्ताभः स कृत्वा क्षत्रमारणम् । रामोऽपि निभृतं चेतो धत्ते द्विजहितेऽधुना ॥१५॥
एवमेकातपत्रायां पृथिव्यां जमदग्निजः । प्रतापाग्निपरीताशः पूरिताशो विजृम्भते ॥१६॥
सुभौमे वर्धमाने तु तापसाश्रमवासिनि । उत्पाताः शतशो जाता जामदग्न्यगृहेऽधुना ॥१७॥
आशङ्कितः स नैमित्तं पृच्छति स्म सविस्मयः । उत्पाताः कथयन्तीमे किमनिष्टमिति श्रुतम् ॥१८॥
स आह वर्धते वैरी भवतोऽन्तर्हितः क्वचित् । विज्ञेयः कथमित्युक्ते प्राह नैमित्तिकस्ततः ॥१९॥
हतक्षत्रियसक्तानां दंष्ट्रा यस्य जिघत्सतः । पायसत्वेन वर्तन्ते स एवारिस्तवोद्धतः ॥२०॥
इति श्रुत्वा स [1]जिज्ञासुः शत्रुं क्षत्रियपुङ्गवम् । विशालां [2]सत्रशालां तामाश्वेव समचीकरत् ॥२१॥
[3]सत्रमध्ये व्यवस्थाप्य दंष्ट्राभरितभाजनम् । [4]निरूपितस्तदध्यक्षो यत्नवानवतिष्ठते ॥२२॥
आकर्ण्य मेघनादस्तं कृत्वा केवलिवन्दनाम् । गत्वा गजपुरं शीघ्रं पश्यति स्म कुमारकम् ॥२३॥
शस्त्रशास्त्रार्णवस्यान्ते वर्तमानमधिश्रियम् । ज्वलत्प्रतापमभितो भानुमन्तमिवोदितम् ॥२४॥
शनैः स प्रेरितस्तेन वृत्तान्तविनिवेदिना । अहितेन्धनदाहाय वायुनेव [5]तनूनपात् ॥२५॥
आजगाम च तेनैव सह शत्रुगृहं गृहात् । बुभुक्षुरुपविष्टश्च दर्भासनपरिग्रहः ॥२६॥

वाला आठवाँ चक्रवर्ती होगा ॥१२॥ क्योंकि वह पुत्र भूमिगृह—तलघरमें उत्पन्न हुआ था इसलिए 'सुभौम' इस नामसे पुकारा जाने लगा । इस समय वह बालक कौशिक ऋषिके रमणीय आश्रममें गुप्तरूपसे बढ़ रहा है ॥१३॥ वही कुछ ही दिनोंमें परशुरामको मारनेवाला बलशाली चक्रवर्ती होगा और वही तुम्हारी कन्याका पति होगा ॥१४॥ परशुराम यमराजके समान क्रूर है वह सात बार क्षत्रियोंका अन्त कर इस समय ब्राह्मणोंके हितमें अपना मन लगा रहा है ॥१५॥ इस तरह जिसने प्रतापरूपी अग्निसे समस्त दिशाओंको व्याप्त कर दिया है तथा मनोवाञ्छित दान देकर जिसने याचकोंकी आशाएँ पूर्ण कर दी हैं ऐसा परशुराम इस समय एकछत्र पृथिवीपर निरन्तर वृद्धिको प्राप्त हो रहा है ॥१६॥

इधर तपस्वीके आश्रममें निवास करनेवाला सुभौम जैसे-जैसे बढ़ने लगा उधर परशुरामके घर वैसे-वैसे ही सैकड़ों उत्पात होने लगे ॥१७॥ उत्पातोंसे आशङ्कित एवं आश्चर्य चकित हो उसने निमित्तज्ञानीसे पूछा कि ये उत्पात मेरे किस अनिष्टको कह रहे हैं ? ॥१८॥ निमित्तज्ञानीने कहा कि आपका शत्रु कहीं छिपकर वृद्धिको प्राप्त हो रहा है । वह कैसे जाना जा सकता है ? इस प्रकार परशुरामके पूछनेपर निमित्तज्ञानीने पुनः कहा कि ॥१९॥ तुम्हारे द्वारा मारे हुए क्षत्रियोंकी डाढ़ें जिसके भोजन करते समय खीर रूपमें परिणत हो जावें वही तुम्हारा उद्दण्ड शत्रु है ॥२०॥ यह सुनकर क्षत्रियोंमें श्रेष्ठ शत्रुको जाननेकी इच्छा करते हुए परशुरामने शीघ्र ही एक विशाल दानशाला बनवाई ॥२१॥ और दानशालाके मध्यमें डाढ़ोंसे भरा बर्तन रखकर उसके अध्यक्षको सब वृत्तान्त समझा दिया जिससे वह यत्नपूर्वक वहाँ सदा अवस्थित रहता है ॥२२॥ यह सब समाचार सुन राजा मेघनाद केवलीको वन्दना कर शीघ्र ही हस्तिनापुर गया और वहाँ उसने कुमार सुभौमको देखा ॥२३॥ उस समय सुभौम कुमार शस्त्र और शास्त्ररूपी सागरके अन्तिम तटपर विद्यमान था, अधिक शोभासे युक्त था, सब ओर उसका देदीप्यमान प्रताप फैल रहा था, और वह उदित होते हुए सूर्यके समान जान पड़ता था ॥२४॥ जिस प्रकार इन्धनको नष्ट करनेके लिए वायु अग्निको प्रेरित कर देती है उसी प्रकार पूर्ववृत्तान्त सुनानेवाले राजा मेघनादने उसे शत्रुरूपी इन्धनको जलानेके लिए धीरेसे प्रेरित कर दिया ॥२५॥ वह उसी

१. जिघांसुः म० । २. भोजनशालाम् । ३. शत्रुमध्ये क० । ४. निरूपितं तदध्यक्षे क० । ५. अग्निः ।

[1]दंष्ट्राभाजनमग्रेऽस्य द्विजाग्रासनवर्तिनः । विन्यस्तं तत्प्रभावेण दंष्ट्राः पायसतां ययुः ॥२७॥
ततोऽध्यक्षनरैराशु रामाय विनिवेदितम् । स जिघांसुस्समागच्छत्परशुव्यग्रपाणिकः ॥२८॥
भुञ्जानः पायसं पात्र्यां[2] सुभौमो हन्यमानकः । जघानारिं [3]तयैवाशु चक्रत्वपरिवृत्तया ॥२९॥
तं चतुर्दशरत्नानि निधयो नव भेजिरे । द्वात्रिंशच्च सहस्राणि नृपाश्चक्रिणमष्टमम् ॥३०॥
स्त्रीरत्नलाभतुष्टेन मेघनादोऽपि चक्रिणा । नीतो विद्याधरेशित्वमवधीद्वज्रपाणिकम् ॥३१॥
एकविंशतिवारांश्च चक्रवर्त्यपि रोषणः । चक्रेणाब्राह्मणां क्षोणीं शठं प्रतिशठस्तत[4]: ॥३२॥
षष्टिवर्षसहस्राणि जीवित्वा तृप्तिवर्जितः । सुभौमः [5]सार्वभौमोऽन्ते सप्तमीं पृथिवीं गतः ॥३३॥
[6]सन्ताने मेघनादस्य विद्याबलसमुद्धतः । प्रतिशत्रुरभूत्षष्ठस्त्रिखण्डाधिपतिर्बलिः ॥३४॥
नन्दश्च पुण्डरीकश्च [7]हलचक्रधरौ ततः । अभूतां निहतस्ताभ्यां बलिभ्यां बलिराहवे ॥३५॥
बलेर्वंशे समुत्पन्नः सहस्रग्रीवखेचरः । परः पञ्चशतग्रीवो द्विशतग्रीव इत्यतः ॥३६॥
एवमादिष्वतीतेषु खेचरेषु बहुष्वभूत् । विद्युद्वेगः पिताऽस्माकं श्वशुरस्तव यादव ॥३७॥
सोऽन्यदा मुनिमप्राक्षीदवधिज्ञानचक्षुषम् । पतिर्मदनवेगायाः कोऽस्त्वस्या भगवन्निति ॥३८॥
मुनिराह भवत्सूनोर्विद्यां साधयतो निशि । चण्डवेगस्य यः स्कन्धे गङ्गास्थस्य पतिष्यति ॥३९॥
तं निश्चित्य पिता पुत्रं चण्डवेगं न्ययोजयत् । गङ्गायां चण्डवेगाख्यं विद्याराधनकर्मणि ॥४०॥

समय घरसे निकल राजा मेघनादके साथ शत्रुके घर जा पहुँचा औ भूखा बन दर्भका आसन ले परशुरामकी दानशालामें भोजनार्थ जा बैठा ॥२६॥ ब्राह्मणके अग्रासनपर बैठे हुए कुमार सुभौमके आगे डाँढ़ोंका पात्र रक्खा गया और उसके प्रभावसे समस्त डाढ़ें खीर रूपमें परिणत हो गईं ॥२७॥ तदनन्तर अध्यक्षके आदमियोंने शीघ्र ही जाकर परशुरामके लिए इसकी सूचना दी और परशुराम उसे मारनेकी इच्छासे फरसा हाथमें लिये शीघ्र ही वहाँ आ पहुँचा ॥२८॥ जिस समय सुभौम थालीमें आनन्दसे खीरका भोजन कर रहा था उसी समय परशुरामने उसे मारना चाहा। परन्तु सुभौमके पुण्य प्रभावसे वह थाली चक्रके रूपमें परिवर्तित हो गई और उसीसे उसने शीघ्र ही परशुरामको मार डाला ॥२९॥ सुभौम अष्टम चक्रवर्तीके रूपमें प्रकट हुआ। चौदह रत्न, नौ निधियाँ और मुकुट बद्ध बत्तीस हजार राजा उसकी सेवा करने लगे ॥३०॥ स्त्री-रत्नके लाभसे सन्तुष्ट हुए चक्रवर्ती सुभौमने मेघनादको विद्याधरोंका राजा बना दिया जिससे शक्ति सम्पन्न हो उसने वज्रपाणिको मार डाला ॥३१॥ तदनन्तर शठके प्रति शठता दिखानेवाले सुभौम चक्रवर्तीने भी क्रोधयुक्त हो चक्ररत्नसे इक्कीस बार पृथिवीको ब्राह्मण-रहित किया ॥३२॥ चक्रवर्ती सुभौम साठ हजार वर्ष तक जीवित रहा परन्तु तृप्तिको प्राप्त नहीं हुआ इसलिए आयुके अन्तमें मरकर सातवें नरक गया ॥३३॥

राजा मेघनादकी सन्ततिमें आगे चलकर छठवाँ राजा बलि हुआ। बलि विद्याबलसे उद्दण्ड था, और तीन खण्डका स्वामी प्रतिनारायण था ॥३४॥ उसी समय नन्द और पुण्डरीक नामक बलभद्र तथा नारायण विद्यमान थे और अतिशय बलके धारक इन्हीं दोनोंके द्वारा युद्धमें बलि मारा गया ॥३५॥ बलिके वंशमें सहस्रग्रीव, पञ्चशतग्रीव और द्विशतग्रीवको आदि लेकर जब बहुतसे विद्याधर राजा हो चुके तब हे यादव! विद्युद्वेग नामका राजा उत्पन्न हुआ। वह विद्युद्वेग हमारा पिता है तथा आपका श्वसुर है ॥३६-३७॥ एक दिन राजा विद्युद्वेगने अवधि-ज्ञानी मुनिराजसे पूछा कि हे भगवन्! हमारी इस मदनवेगा पुत्रीका पति कौन होगा? ॥३८॥ मुनिराजने कहा कि रात्रिके समय गङ्गामें स्थित होकर विद्या सिद्ध करनेवाले तुम्हारे चण्डवेग नामक पुत्रके कन्धेपर जो गिरेगा उसीकी यह स्त्री होगी ॥३९॥ यह निश्चय करके पिताने अपने

१. दंष्ट्राभोजन म० । २. पात्र्या । ३. तथैवाशु म० । ४. तथा म० । ५. सर्वस्याः भूमेरधिपः सार्वभौमः चक्रवर्ती । ६. सन्तानो म० । ७. हलशक्रधरौ म० ।

नभस्तिलकनाथश्च खेटस्त्रिशिखरः खलः । याचित्वैनां स्वपुत्राय सूर्यकाय न लब्धवान् ॥४१॥
युद्धे रन्ध्रमसौ लब्ध्वा बद्ध्वाऽस्मज्जनकं व्यधात् । वैरानुबन्धबुद्धिस्तं बन्धनागारवर्तिनम् ॥४२॥
सम्प्राप्तश्च त्वमस्माभिः साम्प्रतं पुरुविक्रमः । श्वशुरस्यारिबद्धस्य कुरु बन्धविमोक्षणम् ॥४३॥
पूर्वजानां च दत्तानि सुभौमेन प्रसादिना । विद्यास्त्राणि गृहाणेश ! शात्रवस्य जिघांसया ॥४४॥
श्रुत्वा दधिमुखस्योक्तं वसुदेवः प्रतापवान् । श्वशुरस्य विमोक्षार्थं मतिमात्मनि चादधे ॥४५॥
चण्डवेगस्ततस्तस्मै विद्यास्त्राणि बहून्यसौ । विधिपूर्वं ददौ यूने सेवितानि सुरैः सदा ॥४६॥
अस्त्रं ब्रह्मशिरो नाम्ना लोकोत्सादनमप्यतः । आग्नेयं वारुणं चास्त्रं माहेन्द्रं वैष्णवं तथा ॥४७॥
यमदण्डमथैशानं स्तम्भनं मोहनं तथा । वायव्यं जृम्भणं चापि बन्धनं मोक्षणं ततः ॥४८॥
विशल्यकरणं चास्त्रं व्रणसंरोहणं तथा । सर्वाच्छादनं चैव छेदनं हरणं परम् ॥४९॥
एवमाद्यानि चान्यानि सरहस्यानि यादवः । चण्डवेगवितीर्णानि अग्राहीदस्त्राणि सादरः ॥५०॥
स्वयमेव [1]बलोद्रेकात् क्रूरस्त्रिशिखरो बलैः । युयुत्सुरागमत्क्षिप्रं चण्डवेगपुरान्तिकम् ॥५१॥
गत्वा बध्यः स्वयं प्राप्तः समीपमिति तोषवान् । शौरिः श्वशुरपुत्रादिबलैः[2]सामा विनिर्ययौ ॥५२॥
खेचराणां निकायस्य मध्ये स यदुनन्दनः । कल्पवासिनिकायस्य पुरन्दर इवाबभौ ॥५३॥
खे मातङ्गनिकायस्य मध्ये त्रिशिखरो बभौ । रौद्रासुरनिकायस्य यथैव चमरासुरः ॥५४॥
विमानैश्च महामानैर्गजैश्च मदमत्सरैः । तुरङ्गैर्वायुवेगैश्च बलयोः [3]स्थगितं नभः ॥५५॥

चण्डवेग नामक पुत्रको तेज वेगसे युक्त गङ्गा नदीमें विद्या सिद्ध करनेके कार्यमें नियुक्त किया ॥४०॥ नभस्तिलक नगरका राजा त्रिशिखर नामका दुष्ट विद्याधर, अपने सूर्यक नामक पुत्रके लिए इस कन्याकी कई बार याचना कर चुका था पर इसे प्राप्त नहीं कर सका ॥४१॥ इसलिए सदा वैर रखता था। एक दिन युद्धमें अवसर पाकर उसने हमारे पिताको बाँधकर कारागृहमें डाल दिया ॥४२॥ इस समय प्रबल पराक्रमको धारण करनेवाले आप हम सबको प्राप्त हुए हैं इसलिए शत्रुके द्वारा अपने श्वसुरको शीघ्र ही बन्धनसे मुक्त करो ॥४३॥ सुभौम चक्रवर्तीने प्रसन्न होकर हमारे पूर्वजोंके लिए जो विद्यास्त्र दिये थे हे स्वामिन् ! शत्रुका घात करनेकी इच्छासे उन्हें ग्रहण कीजिए ॥४४॥

इस प्रकार दधिमुखके कहे वचन सुनकर प्रतापी वसुदेवने श्वसुरको छुड़ानेके लिए मनमें विचार किया ॥४५॥ तदनन्तर चण्डवेगने युवा वसुदेवके लिए देव जिनकी सदा सेवा करते थे ऐसे बहुतसे विद्यास्त्र विधिपूर्वक प्रदान किये ॥४६॥ उनमेंसे कुछ विद्याओंके नाम ये हैं—ब्रह्मशिर, लोकोत्सादन, आग्नेय, वारुण, माहेन्द्र, वैष्णव, यमदण्ड, ऐशान, स्तम्भन, मोहन, वायव्य, जृम्भण, बन्धन, मोक्षण, विशल्यकरण, व्रणसंरोहण, सर्वाच्छादन, छेदन और हरण ॥४७–४९॥ इस प्रकार इन्हें आदि लेकर चलाने और संकोचनेकी विधि सहित अन्य अनेक विद्यास्त्र चण्डवेगने कुमार वसुदेवके लिए दिये और उन्होंने आदरके साथ उन्हें ग्रहण किया ॥५०॥ उस समय बलकी अधिकतासे युद्धकी इच्छा रखता हुआ दुष्ट त्रिशिखर, स्वयं ही सेनाओंके साथ शीघ्र चण्डवेगके नगरके समीप आ पहुँचा ॥५१॥ 'जिसे जाकर बाँधना था वह स्वयं ही पास आ गया' यह विचारकर संतुष्ट होते हुए वसुदेव, अपने सालों आदिकी सेनाके साथ बाहर निकले ॥५२॥ विद्याधरोंके झुण्डके बीच वह वसुदेव कल्पवासी देवोंके समूहके बीच इन्द्रके समान सुशोभित हो रहे थे ॥५३॥ और आकाशमें खड़े मातङ्ग जातिके विद्याधरोंके बीच त्रिशिखर क्रूर असुरोंके बीचमें स्थित चमरेन्द्रके समान सुशोभित हो रहा था ॥५४॥ दोनों ही सेनाओंके बड़े-बड़े विमानों, मदोन्मत्त हाथियों और वायुके समान वेगशाली घोड़ोंसे आकाश आच्छादित हो गया ॥५५॥

---

१. शक्त्यतिरेकात् । २. सह । ३. आच्छन्नम् ।

शस्त्रांशुनिकरच्छन्नचण्डांशुकरयोरभूत् । तूर्यादिरवतोषिण्योः सङ्घातो व्योम्नि सेनयोः ॥५६॥
आकर्णाकृष्टकोदण्डमण्डलोन्मुक्तसायकैः । अभिद्यत नृणां बाह्या नान्तःस्था हृदयस्थली ॥५७॥
अच्छिद्यन्त शिरांस्युग्रचक्रधाराभिराहवे । शशिशङ्खविशुद्धानि न यशांसि मनस्विनाम् ॥५८॥
पपात सुभटः खड्गधारापातेन मूर्च्छितः । अनेकरणनिर्व्यूढप्रतापस्तु न संयुगे ॥५९॥
घोरमुद्गरघातेन चक्षुर्बभ्राम मानिनः । विपक्षस्य जयोद्ग्रासघस्मरं तु न मानसम् ॥६०॥
गजाश्वरथपादातं यथास्वं सुमनोरथम् । युयुधे युधि धैर्येण शौर्येण च विशेषितम् ॥६१॥
शस्त्रार्थैः प्राकृतैर्योधाः कृतयुद्धमहोत्सवाः । [1]युद्धश्रमविनिर्मुक्ताश्चिरं युयुधिरेऽधिकम् ॥६२॥
[2]सौर्पकाङ्गारवैगारिनीलकण्ठपुरोगमाः । पुरस्कृत्य जिताश्चण्डाश्चण्डवेगेन वेगिना ॥६३॥
जवनाश्वरथारूढं नानाशस्त्रास्त्रभीषणम् । अग्रेदधिमुखं शौरिं प्राप्तस्त्रिशिखरोऽभितः ॥६४॥
प्राकृतास्त्रैस्तयोरासीत्प्रथमं प्रधनं महत् । परस्परशरासारव्याप्ताशान्तान्तरिक्षयोः ॥६५॥
क्षिप्रं चिक्षेप चाग्नेयमस्त्रं शौरिर्धनुर्धरः । रौद्रज्वालाकुलेनाशु तेनादाहि रिपोर्बलम् ॥६६॥
अस्त्रेण वारुणेनारिर्विध्याप्याग्नेयमाहवे । मोहनेन महास्त्रेण शौरिसैन्यं व्यमोहयत् ॥६७॥
चित्तप्रसादनेनाशु मोहनास्त्रमपास्य सः । शौरिर्व्यनाशयद् व्योम्नि वायव्येन च वारुणम् ॥६८॥
क्षिप्रं क्षिप्रं निरस्यासावस्त्रमस्त्रेण वैरिणः । माहेन्द्रास्त्रेण चिच्छेद शिरस्तस्य यदूत्तमः ॥६९॥
तस्मिन्नस्तमिते दीप्ते क्षिप्रं शेषा नभश्चराः । नेशुराशाः परित्यज्य रवाविव करोत्कराः ॥७०॥

शस्त्र-समूहकी किरणोंसे जिन्होंने सूर्यकी किरणोंको आच्छादित कर दिया था तथा जो तुरही आदि वादित्रोंके शब्दसे अपना संतोष प्रकट कर रही थीं ऐसी दोनों सेनाओंकी आकाशमें मुठभेड़ हुई ॥५६॥ कानों तक खींचे हुए धनुष-मण्डलोंसे छूटे बाणोंसे मनुष्योंके बाह्य हृदय तो खण्डित हुए थे परन्तु अन्तर्मन हृदय नहीं ॥५७॥ युद्धमें चक्रोंकी तीक्ष्ण धाराओंसे तेजस्वी मनुष्योंके शिर तो कटे थे परन्तु चन्द्रमा और शङ्खके समान उज्ज्वल यश नहीं ॥५८॥ युद्धमें तलवारकी धारके पड़नेसे मूर्च्छित हुआ योद्धा तो गिरा था, परन्तु अनेक युद्धोंमें वृद्धिको प्राप्त हुआ प्रताप नहीं ॥५९॥ मुद्गरकी भयंकर चोटसे अभिमानीका नेत्र तो घूमने लगा था परन्तु शत्रुकी विजय रूपी उत्कट ग्रासको खानेवाला मन नहीं ॥६०॥ युद्धस्थलमें धीरता और शूरतासे विशेषताको प्राप्त हुई हाथी, घोड़ा, रथ और पयादोंकी—चतुरङ्गिणी सेना, अपनी-अपनी इच्छानुसार यथायोग्य रीतिसे युद्ध कर रही थी ॥६१॥ जो योद्धा पहले साधारण शस्त्रोंसे युद्धका महोत्सव मनाया करते थे वे भी उस समय युद्धजन्य परिश्रमसे रहित हो चिरकाल तक अधिक युद्ध करते रहे। ॥६२॥ सौर्पक, अङ्गार, वैगारि तथा नीलकण्ठ आदि शत्रुपक्षके जो प्रमुख शूरवीर थे वेगशाली चण्डवेगने सामनाकर उन सबको जीत लिया ॥६३॥ तदनन्तर जो वेगशाली घोड़ोंके रथपर आरूढ थे, नाना शस्त्र और अस्त्रोंसे भयंकर थे, तथा जिनके आगे रथ हाँकनेके लिए दधिमुख विद्यमान था ऐसे वसुदेवके सामने त्रिशिखर आया ॥६४॥ परस्परकी बाण वर्षासे जिन्होंने दिशाओंके अन्त तथा आकाशको व्याप्त कर रक्खा था ऐसे उन दोनोंका पहले तो साधारण शस्त्रोंसे महायुद्ध हुआ किन्तु पीछे धनुर्धारी वसुदेवने शीघ्र ही आग्नेय अस्त्र छोड़ा जिसकी भयंकर ज्वालाओंसे शत्रुकी सेना तत्काल जलने लगी ॥६५–६६॥ उधर शत्रुने वारुणास्त्रके द्वारा आग्नेयास्त्रको बुझाकर मोहन नामक महा अस्त्रसे वसुदेवकी सेनाको विमोहित कर दिया ॥६७॥ इधर वसुदेवने चित्तप्रसादन नामक अस्त्रसे मोहनास्त्रको दूर हटा दिया और आकाशमें वायव्य अस्त्र चलाकर वारुणास्त्रको नष्ट कर दिया ॥६८॥ इस प्रकार अपने प्रतिद्वन्द्वी शस्त्रसे शत्रुके शस्त्रको शीघ्रातिशीघ्र नष्ट कर वसुदेवने माहेन्द्रास्त्रके द्वारा शत्रुको काट डाला ॥६९॥ जिस प्रकार सूर्यके अस्त होनेपर किरणोंके समूह दिशाएँ छोड़कर नष्ट हो जाते हैं उसी प्रकार देदीप्यमान

१. युद्धश्रम -म० । २. शौर्यकांगारि -म० ।

ततः शौरिः समस्तैस्तैरात्मीयैः खेचरैर्वृतः । श्वशुरं बन्धनागाराद्विमोच्य स्वपुरं ययौ ॥७१॥

दोधकवृत्तम्

दुर्जयमप्यरिलोकमनेकैः शौर्यसखो निखिलं खचरौघैः ।
आशु विजित्य जनो जिनधर्मादाश्रयतामिह याति बहूनाम् ॥७२॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ मदनवेगालाभत्रिशिखरवधवर्णनो नाम पञ्चविंशः सर्गः ॥२५॥

त्रिशिखरके अस्तमित होते ही शेष विद्याधर दिशाएँ (अथवा अभिलाषाएँ) छोड़कर नष्ट हो गये—भाग गये ॥७०॥ तदनन्तर अपने पक्षके समस्त विद्याधरोंसे घिरे हुए वसुदेव, कारागृहसे श्वसुरको छुड़ाकर अपने नगर वापिस गये ॥७१॥ गौतम स्वामी कहते हैं कि जिनधर्मके प्रसादसे एक प्रतापी मनुष्य, अनेक विद्याधरोंके समूहसे दुर्जेय समस्त शत्रुओंको शीघ्र ही जीतकर बहुतसे मनुष्योंकी आश्रयताको प्राप्त हो जाता है—उनके द्वारा सेवनीय हो जाता है अतः सदा जिनधर्मकी उपासना करनी चाहिए ॥७२॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें मदनवेगाके लाभ और त्रिशिखरके वधका वर्णन करनेवाला पच्चीसवाँ सर्ग समाप्त हुआ ॥२५॥

षड्विंशः सर्गः

[1]शौरेर्मदनवेगायां मदनप्रतिमोऽभवत् । अनावृष्टिरिति ख्यातस्तनयो नयविद्बली ॥१॥
सस्त्रीकाः खेचरा याताः सिद्धकूटजिनालयम् । एकदा वन्दितुं सोऽपि शौरिः मदनवेगया ॥२॥
कृत्वा जिनमहं खेटाः[2] प्रवन्द्य प्रतिमागृहम् । तस्थुः स्तम्भानुपाश्रित्य बहुवेषा यथायथम् ॥३॥
विद्युद्वेगोऽपि गौरीणां विद्यानां स्तम्भमाश्रितः । कृतपूजास्थितिः श्रीमान् स्वनिकायपरिष्कृतः ॥४॥
पृष्टया वसुदेवेन ततो मदनवेगया । विद्याधरनिकायास्ते यथास्वमिति कीर्तिताः ॥५॥
अस्मदीयं विभो स्तम्भं ये श्रिताः पद्मपाणयः । पद्ममालाधरास्तेऽमी गौरिकाख्या नभश्चराः ॥६॥
रक्तमालाधराश्चैते रक्तकम्बलवाससः । गान्धारस्तम्भमाश्रित्य गान्धाराः खेचराः स्थिताः ॥७॥
नानावर्णमयस्वर्णपीतकौशेयवाससः । मानवस्तम्भमेत्यामी स्थिता मानवपुत्रकाः ॥८॥
किञ्चिदारक्तवस्त्रा ये लसन्मणिविभूषणाः । मानस्तम्भमिता ह्येते खेचरा मनुपुत्रकाः ॥९॥
विचित्रौषधिहस्तास्तु विचित्राभरणस्रजः । ओषधिस्तम्भमायाता मूलवीर्या नभश्चराः ॥१०॥
सर्वर्तुकुसुमामोदकाञ्चनाभरणस्रजः । अन्तर्भूमिचरा ह्येते ये स्तम्भे भूमिमण्डके ॥११॥
विचित्रकुण्डलाटोपा ये नागाङ्गदभूषणाः । शङ्कुस्तम्भाश्रितास्तेऽमी शङ्कुकाः खचराः प्रभो ॥१२॥
आबद्धमुकुटापीडविलसन्मणिकुण्डलाः । ये तेऽमी कौशिकाः खेटाः कौशिकस्तम्भमाश्रिताः ॥१३॥

अथानन्तर कुमार वसुदेवसे मदनवेगामें कामदेवके समान सुन्दर अनावृष्टि नामका नीतिज्ञ और बलवान् पुत्र उत्पन्न हुआ ॥१॥ एक दिन अपनी-अपनी स्त्रियोंके साथ विद्याधर सिद्धकूट जिनालयकी वन्दना करनेके लिए गये सो कुमार वसुदेव भी मदनवेगाके साथ वहाँ पहुँचे ॥२॥ नाना प्रकारके वेषोंको धारण करनेवाले विद्याधर जिनेन्द्र भगवान्की पूजा कर तथा प्रतिमा-गृहोंकी वन्दना कर यथायोग्य स्तम्भोंका आश्रय ले बैठ गये ॥३॥ शोभासम्पन्न विद्युद्वेग भी भगवान्की पूजा कर अपने निकायके लोगोंके साथ गौरी विद्याओंके स्तम्भका सहारा ले बैठ गया ॥४॥ तदनन्तर वसुदेवने मदनवेगासे विद्याधर निकायोंका परिचय पूछा सो वह यथायोग्य इस प्रकार उनका वर्णन करने लगी ॥५॥

उसने कहा कि हे नाथ ! जो ये हाथमें कमल लिये तथा कमलोंकी माला धारण किये हमारे खम्भाके आश्रय बैठे हैं वे गौरिक नामके विद्याधर हैं ॥६॥ ये लाल मालाएँ धारण किये तथा लाल कम्बलके वस्त्रोंको पहिने हुए गान्धार खम्भाका आश्रय ले गान्धार जातिके विद्याधर बैठे हैं ॥७॥ ये जो नाना वर्णोंसे युक्त एवं सुवर्णके समान पीले वस्त्रोंको धारण कर मानव स्तम्भके सहारे बैठे हैं वे मानव पुत्रक विद्याधर हैं ॥८॥ जो कुछ-कुछ लाल वस्त्रोंसे युक्त एवं मणियोंके देदीप्यमान आभूषणोंसे सुसज्जित हो मानस्तम्भके सहारे बैठे हैं वे मनुपुत्रक विद्याधर हैं ॥९॥ नाना प्रकारकी ओषधियाँ जिनके हाथमें हैं तथा जो नाना प्रकारके आभूषण और मालाएँ पहिनकर ओषधि स्तम्भके सहारे बैठे हैं वे मूलवीर्य विद्याधर हैं ॥१०॥ सब ऋतुओंके फूलोंकी सुगन्धिसे युक्त स्वर्णमय आभरण और मालाओंको धारण कर जो भूमिमण्डक स्तम्भके समीप बैठे हैं वे अन्तर्भूमिचर विद्याधर हैं ॥११॥ हे प्रभो ! जो चित्र-विचित्र कुण्डल पहिने तथा सर्पाकार बाजू-बन्दोंसे सुशोभित हो शङ्कु स्तम्भके समीप बैठे हैं वे शङ्कुक नामक विद्याधर हैं ॥१२॥ जिनके मुकुटोंपर सेहरा बँधा हुआ है तथा जिनके मणिमय कुण्डल देदीप्यमान

---

१. शौरिर्मदन -म० । २. विद्याधराः ।

अमी विद्याधरा ह्यार्याः समासेन समीरिताः । मातङ्गानामपि स्वामिन् निकायान् शृणु वच्मि ते ॥१४॥
नीलाम्बुदचयश्यामा नीलाम्बरवरस्रजः । अमी मातङ्गनामानो मातङ्गस्तम्भसङ्गताः ॥१५॥
श्मशानास्थिकृतोत्तंसा भस्मरेणुविधूसराः । श्मशाननिलयास्त्वेते श्मशानस्तम्भसंश्रिताः ॥१६॥
नीलवैडूर्यवर्णानि धारयन्त्यम्बराणि ये । पाण्डुरस्तम्भमेत्यामी स्थिताः पाण्डुकखेचराः ॥१७॥
कृष्णाजिनधरास्त्वेते कृष्णचर्माम्बरस्रजः । कालस्तम्भं समभ्येत्य स्थिताः कालश्वपाकिनः ॥१८॥
पिङ्गलैर्मूर्धजैर्युक्तास्तप्तकाञ्चनभूषणाः । श्वपाकीनां च विद्यानां श्रिताः स्तम्भं श्वपाकिनः ॥१९॥
पत्त्रिपर्णांशुकच्छन्नविचित्रमुकुटस्रजः[1] । पार्वतेया इति ख्याताः पार्वतं स्तम्भमाश्रिताः ॥२०॥
वंशीपत्त्रकृतोत्तंसाः सर्वर्तुकुसुमस्रजः । वंशस्तम्भाश्रिताश्चैते खेटा वंशालया मताः[2] ॥२१॥
महाभुजगशोभाङ्कसंदष्टवरभूषणाः । वृक्षमूलमहास्तम्भमाश्रिता वार्क्षमूलिकाः ॥२२॥
स्ववेषकृतसञ्चाराः स्वचिह्नकृतभूषणाः । समासेन समाख्याता निकायाः खचरोद्गताः ॥२३॥
इति भार्योपदेशेन ज्ञातविद्याधरान्तरः । शौरिर्यातो निजं स्थानं खेचराश्च यथायथम् ॥२४॥
शौरिर्मदनवेगां तामेकदा तु कुतश्चन । एहि वेगवतीत्याह साऽपि रुष्टाऽविशद्गृहम् ॥२५॥
प्रज्ञाप्त्याशान्तरे गेहात्[3] शौरिं त्रिशिखराङ्गना । श्रित्वा मदनवेगाभां[4] सूर्पणख्याहरच्छलात् ॥२६॥

हो रहे हैं ऐसे ये कौशिक स्तम्भके आश्रय कौशिक जातिके विद्याधर बैठे हैं ॥१३॥ हे स्वामिन् ! अभी मैंने संक्षेपसे आर्य विद्याधरोंका वर्णन किया है अब आपके लिए मातङ्ग विद्याधरोंके भी निकाय कहती हूँ सो सुनिए ॥१४॥

जो नील मेघोंके समूहके समान श्याम वर्ण हैं तथा नीले वस्त्र और नीली मालाएँ पहिने हैं वे मातङ्ग स्तम्भके समीप बैठे मातङ्ग नामके विद्याधर हैं ॥१५॥ जो श्मशानकी हड्डियोंसे निर्मित आभूषणोंको धारणकर भस्मसे धूलि-धूसर हैं वे श्मशान स्तम्भके आश्रय बैठे हुए श्मशान-निलय नामक विद्याधर हैं ॥१६॥ जो ये नीलमणि एवं वैडूर्यमणिके समान वस्त्रोंको धारण किये हुए हैं तथा पाण्डुर स्तम्भके समीप आकर बैठे हैं वे पाण्डुक नामक विद्याधर हैं ॥१७॥ जो ये काली मृग-चर्मको धारण किये तथा काले चमड़ेसे निर्मित वस्त्र और मालाओंको पहिने हुए काल-स्तम्भके पास आकर बैठे हैं वे कालश्वपाकी विद्याधर हैं ॥१८॥ जो पीले-पीले केशोंसे युक्त हैं, तपाये हुए स्वर्णके आभूषण पहिने हैं और श्वपाकी विद्याओंके स्तम्भके सहारे बैठे हैं वे श्वपाकी विद्याधर हैं ॥१९॥ जो वृक्षोंके पत्तोंके समान हरे रङ्गके वस्त्रोंसे आच्छादित हैं तथा नाना प्रकारके मुकुट और मालाओंको धारण कर पार्वत स्तम्भके सहारे बैठे हैं वे पार्वतेय नामसे प्रसिद्ध हैं ॥२०॥ जिनके आभूषण बाँसके पत्तोंके बने हुए हैं तथा जो सब ऋतुओंके फूलोंकी मालाओंसे युक्त हो वंशस्तम्भके आश्रय बैठे हैं वे वंशालय विद्याधर माने गये हैं ॥२१॥ जिनके उत्तमोत्तम आभूषण महासर्पोंके शोभायमान चिह्नोंसे युक्त हैं तथा जो वृक्षमूल नामक महा-स्तम्भोंके आश्रय बैठे हैं वे वार्क्षमूलिक नामक विद्याधर हैं ॥२२॥ जो अपने-अपने निश्चित वेषमें ही भ्रमण करते हैं तथा जो आभूषणोंको अपने-अपने चिह्नोंसे अंकित रखते हैं ऐसे इन विद्याधरों-के निकायोंका संक्षेपसे वर्णन किया ॥२३॥ इस प्रकार आर्या मदनवेगाके कथनसे विद्याधरोंका अन्तर जानकर वसुदेव अपने स्थानपर चले गये तथा अन्य विद्याधर भी यथायोग्य अपने-अपने स्थानोंकी ओर रवाना हुए ॥२४॥

अथानन्तर एक दिन कुमार वसुदेवने किसी कारणवश मदनवेगासे 'आओ वेगवति !' यह कह दिया जिससे रुष्ट होकर वह घरके भीतर चली गई ॥२५॥ उसी समय त्रिशिखर विद्या-धरकी विधवा पत्नी शूर्पणखी, मदनवेगाका रूप धरकर तथा अपनी प्रभासे महलोंको एकदम

१. पर्णपत्रांशुक-म०, पत्रपर्णांशुक-ग० । २. गताः म० । ३. गेहात् म० । ४. सूर्पनख्य-म०, ख० ।

अन्तरिक्षे मुमुक्षुस्तमद्राक्षीद् द्रागधोऽम्बरे । रिपुं मानसवेगाख्यमकस्मात्समुपस्थितम् ॥२७॥
विमुच्य [1]वियतः शौरिमारब्धे विनियुज्य तम् । यथेष्टं सा गता सोऽपि पपात तृणकूटके ॥२८॥
गीयमानं नरैः श्रुत्वा जरासन्धयशः सितम् । ज्ञात्वा राजगृहं तुष्टः प्रविष्टः पुरमुत्तमम् ॥२९॥
द्यूते जित्वा हिरण्यस्य कोटिमत्र जनाय सः । त्यागशीलो ददौ सर्वां सर्वस्मै तामितस्ततः ॥३०॥
जरासन्धस्य हन्तारमीदृग्ना[2] जनयिष्यति । इति नैमित्तिकादेशादीदृगन्विष्यते तदा ॥३१॥
दृष्ट्वा च तं तदाध्यक्षैर्भस्त्राबद्धतनुश्च सः । नीत्वा मुक्तो गिरेरग्रान् म्रियतामिति तत्क्षणे ॥३२॥
ततः [3]पतन्नसौ वेगाद्वेगवत्या धृतो बलात् । नीयमानस्तया क्वापि चिन्तामेतामुपागतः ॥३३॥
भारुण्डैरण्डजैः पूर्वं चारुदत्तो यथाऽऽहृतः[4] । तथाऽहमपि नूनं तैर्दुरन्तं किं नु मे भवेत् ॥३४॥
दुरन्ता बन्धुसम्बन्धा दुरन्ता भोगसम्पदः । दुरन्ताः कान्तिकायाश्च तथापि स्वन्तधीर्जनः ॥३५॥
पुण्यपापकृदेकोऽयं भोक्ता च सुखदुःखयोः । जायते म्रियते चात्मा तथापि स्वजनोन्मुखः ॥३६॥
त एव सुखिनो धीरास्त एव स्वहिते स्थिताः । विहाय भोगसम्बन्धान् ये स्थिता मोक्षवर्त्मनि ॥३७॥
भोगतृष्णोर्मिनिर्मग्ना वयं तु गुरुकर्मकाः । संसारसुखदुःखाप्तौ मुहुः कुर्मो विवर्तनम् ॥३८॥
इत्यादि चिन्तयन् वीरो वेगवत्या गिरेस्तटे । अवतार्यैव भस्त्रायाः समाकृष्य बहिः कृतः ॥३९॥

प्रज्वलितकर छलसे वसुदेवको हर ले गई ॥२६॥ वह उन्हें आकाशमें ले जाकर छोड़ना ही चाहती थी कि उसे नीचे आकाशमें अकस्मात् आता हुआ कुमारका वैरी मानसवेग विद्याधर दिखा। आकाशसे छोड़कर कुमारको मार दिया जाय इस कार्यमें मानसवेगको नियुक्तकर सूर्पणखी यथेष्ट स्थानपर चली गई और कुमार घासकी गंजीपर नीचे गिर गये ॥२७-२८॥ वहाँ मनुष्योंके द्वारा गाये हुए जरासंधके उज्ज्वल यशको सुनकर कुमारने जान लिया कि यह राजगृह नगर है अतः उन्होंने सन्तुष्ट होकर उस उत्तम नगरमें प्रवेश किया ॥२९॥ राजगृह नगरमें कुमारने जुएमें एक करोड़ स्वर्णकी मुद्राएँ जीतीं और दानशील बनकर सबकी सब यहाँ-वहाँ समस्त लोगोंको बाँट दीं ॥३०॥ निमित्तज्ञानियोंने जरासंधको बतलाया था कि जो जुएमें एक करोड़ सुवर्ण मुद्राएँ जीतकर बाँट देगा वह तुम्हें मारनेवाले पुत्रको उत्पन्न करेगा। निमित्त-ज्ञानियोंके आदेशानुसार वहाँ उस समय ऐसे व्यक्तिकी खोज हो रही थी ॥३१॥ जरासंधके अधिकारियोंने वसुदेवको देखकर पकड़ लिया और 'तत्काल मर जाय' इस भावनासे उन्हें एक चमड़ेकी भाथड़ीमें बन्दकर पहाड़की चोटीसे नीचे छोड़ दिया ॥३२॥ वसुदेव नीचे गिर ही रहे थे कि अकस्मात् वेगवतीने वेगसे आकर जोरसे उन्हें पकड़ लिया। जब वेगवती उन्हें पकड़कर कहीं ले जाने लगी तब वे मनमें ऐसा विचार करने लगे कि देखो! जिस प्रकार पहले भारुण्ड पक्षी चारुदत्तको हर ले गये थे उसी प्रकार जान पड़ता है मुझे भी भारुण्डपक्षी हरकर लिये जा रहे हैं, न जानें अब क्या दुःख होता है? ॥३३-३४॥ ये बन्धुजनोंके सम्बन्ध दुरन्त—दुःखदायक हैं, भोग सम्पदाएँ दुरन्त हैं, और कान्तिपूर्ण शरीर भी दुरन्त हैं फिर भी मूर्ख प्राणी इन्हें स्वन्त—सुखदायक समझता है ॥३५॥ यह जीव अकेला ही पुण्य और पाप करता है, अकेला ही सुख और दुःख भोगता है, और अकेला ही पैदा होता तथा मरता है फिर भी आत्मीयजनोंके संग्रह करनेमें तत्पर रहता है ॥३६॥ वे ही धीर, वीर मनुष्य सुखी हैं और वे ही आत्महितमें लगे हुए हैं जो भोगोंसे सम्बन्ध छोड़कर मोक्षमार्गमें स्थित हैं ॥३७॥ हमारे कर्म बड़े वजनदार हैं इस-लिए हम भोग तृष्णारूपी तरङ्गोंमें डूब रहे हैं तथा सुख-दुखकी प्राप्तिमें ही बार-बार परिभ्रमण करते-फिरते हैं ॥३८॥

तदनन्तर इस प्रकार चिन्तन करते हुए वीर वसुदेवको वेगवतीने पर्वतके तटपर उतारा

---

१. वियति म० । २. ईदृशो नरः । ३. पतदसौ म० । ४. यथाहृतः म० ।

पतिं वेगवती दृष्ट्वा रुरोद विरहाकुला । परिष्वज्य स तां मेने स्वपराङ्गसुखासिकाम् ॥४०॥
ततस्तेन प्रिया पृष्टा तस्मै सर्वं न्यवेदयत् । हृते भर्तरि यद्वृत्तं सुखदुःखं निजास्पदे ॥४१॥
द्वयोरन्वेषितः श्रेण्योर्वनारण्यपुरादिषु । पर्यटन्त्या चिरं क्षेत्रं भारताख्यमशेषतः ॥४२॥
पार्श्वे मदनवेगायाः पत्युर्दर्शनमेतया । वियोगमपि कांक्षन्त्या स्वस्याः स्थानमलक्षितम् ॥४३॥
श्रित्वा मदनवेगाया रूपं त्रिशिखभार्यया । सूर्पणख्या हृतः खं त्वमुत्क्षिप्य जिघांसया ॥४४॥
च्युतोऽधित्यकातस्त्वमापतन् विधृतो मया । तीर्थं पञ्चनदं चाद्रिं ह्रीमन्तमधितिष्ठसि ॥४५॥
इत्यावेदितवृत्तान्तः स तया चन्द्रवक्त्रया । रेमे तत्र धुनीधीरध्वानहारिषु सानुषु ॥४६॥
सोऽटन् यदृच्छयाऽद्राक्षीन्नागपाशवशां दृढम् । धन्यां कन्यां यथा वन्यां नागपाशवशां वशाम्[1] ॥४७॥
तदार्द्रहृदयो भद्रां[2] तां स्फुरन्मुखकान्तिकाम् । व्यपाशयदसौ पाशात्पापपाशाद् यथा यतिः ॥४८॥
मुक्तबन्धा च नत्वा सा तमचिन्तितबान्धवम् । प्रसादात्तव मे नाथ ! सिद्धा विद्येत्यभाषत ॥४९॥
शृणु त्वं दक्षिणश्रेण्यां पुरे गगनवल्लभे । विद्युद्दंष्ट्रान्वयोत्थाहं बालचन्द्रा नृपात्मजा ॥५०॥
साधयन्ती महाविद्यां नद्यां विद्याभृतारिणा । नागपाशैरहं बद्धा मोचिता भवता[3] विभो ॥५१॥
अन्वयेऽस्मदीयेऽन्या कन्या केतुमतीत्यभूत् । मोचिताहमिवाकाण्डे पुण्डरीकार्धचक्रिणा ॥५२॥

और भाथड़ीसे खींचकर बाहर निकाला ॥३९॥, पतिको देख वेगवती विरहसे आकुल हो रोने लगी और वसुदेवने भी उसका आलिङ्गन कर उसे स्वपरके शरीरके लिए सुख देनेवाली माना ॥४०॥ तदनन्तर वसुदेवके द्वारा पूछी प्रिया वेगवतीने पतिके हरे जानेपर अपने घर जो सुख-दुख उठाया था वह सब उनके लिए कह सुनाया ॥४१॥ उसने कहा कि मैंने आपको विजयार्धकी दोनों श्रेणियोंमें खोजा, अनेक वन और नगरोंमें देखा तथा समस्त भरत क्षेत्रमें चिरकाल तक भ्रमण किया परन्तु आपको प्राप्त न कर सकी ॥४२॥ बहुत घूमने-फिरनेके बाद मैंने मदनवेगाके पास आपको देखा। सो देखकर यह विचार किया कि यहाँ रहते हुए भले ही आपके साथ वियोग रहे पर आपके दर्शन तो पाती रहूँगी। इसी विचारसे मैंने वहाँ अलक्षित रूपसे रहनेकी इच्छा की परन्तु त्रिशिखरकी भार्या शूर्पणखी मदनवेगाका रूप धरकर आपके पास आई और मारनेकी इच्छासे हरकर आपको आकाशमें ले गई ॥४३–४४॥ उधर उस पर्वतकी चोटीसे आप नीचे गिराये जा रहे थे कि मैंने बीचमें ही लपककर आपको पकड़ लिया। इस समय आप पञ्चनद तीर्थ और ह्रीमन्त नामक पर्वतपर विराजमान हैं ॥४५॥ इस प्रकार चन्द्रमुखी वेगवतीसे सब समाचार जानकर वसुदेव, नदियोंके गम्भीर शब्दसे सुन्दर ह्रीमन्त पर्वतकी अधित्यकाओंपर क्रीड़ा करने लगे ॥४६॥

एक दिन कुमार वसुदेव अपनी इच्छानुसार वहाँ घूम रहे थे कि उन्होंने नागपाशसे बँधी हुई वनकी हस्तिनीके समान, नागपाशसे मजबूत बँधी हुई एक भाग्यशालिनी सुन्दर कन्याको देखा ॥४७॥ उसे देखते ही कुमारका हृदय दयासे आर्द्र हो गया इसलिए उन्होंने जिस प्रकार मुनि संसारके प्राणियोंको पाप रूपी पाशसे मुक्त कर देते हैं उसी प्रकार मुखकी फैलती हुई कान्तिसे युक्त उस बन्धनबद्ध कन्याको बन्धनसे मुक्त कर दिया ॥४८॥ बन्धनसे छूटते ही उस कन्याने अतर्कित बन्धु—वसुदेवको नमस्कार किया और कहा कि हे नाथ ! आपके प्रसादसे मेरी विद्या सिद्ध हो गई है ॥४९॥ सुनिए, मैं दक्षिण श्रेणीपर स्थित गगनवल्लभ नगरकी रहनेवाली राजकन्या हूँ, मेरा नाम बालचन्द्रा है और मैं विद्युद्दंष्ट्रके वंशमें उत्पन्न हुई हूँ ॥५०॥ मैं नदीमें बैठकर महाविद्या सिद्ध कर रही थी कि एक शत्रु विद्याधरने मुझे नागपाशसे बाँध दिया और हे प्रभो ! आपने मुझे उस बन्धनसे मुक्त किया है ॥५१॥ हमारे वंशमें पहले भी एक केतुमती

१. करिणीम् । २. नद्याम् म० । ३. भक्तिता म० ।

तस्यैव साऽभवत्पत्नी निःसपत्नं[1] यथा तथा । अवश्यम्भाविनी पत्नी तवाहमिति बुध्यताम् ॥५३॥
त्वं गृहाण विभो विद्यां विद्याधरसुदुर्लभाम् । [2]इत्युक्तः सोऽवदद्देया वेगवत्यै ममेच्छया ॥५४॥
लब्धादेशा तथेत्युक्त्वा ततो वेगवतीमसौ । समुत्क्षिप्य ययौ कन्या पुरं गगनवल्लभम्[3] ॥५५॥

शालिनीच्छन्दः

विद्यादानं बालचन्द्राभिधाना विद्यां[4] दत्त्वा कन्यका वेगवत्यै ।
सद्यो जाता मुक्तशल्या च जैन्यो विद्याधर्यः साधयन्त्यभ्युपेतम् ॥५६॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ बालचन्द्रादर्शनवर्णनो नाम षड्विंशः सर्गः ॥२६॥

नामकी कन्या हो गई है। उसे मेरे ही समान पुण्डरीक नामक अर्धचक्रीने अचानक आकर बन्धनसे मुक्त किया था और वह जिस प्रकार उसी अर्धचक्रीकी निर्विरोध पत्नी हो गई थी उसी प्रकार मैं भी आपकी पत्नी अवश्य होनेवाली हूँ। यह आप निश्चित समझ लीजिए ॥५२-५३॥ हे नाथ! आप विद्याधरोंके लिए अतिशय दुर्लभ इस विद्याको ग्रहण कीजिए। कन्याके इस प्रकार कहनेपर कुमार वसुदेवने कहा कि वह विद्या मेरी इच्छासे वेगवतीके लिए देने योग्य है ॥५४॥ कुमारकी आज्ञा पाकर उसने 'तथास्तु' कह वेगवतीके लिए वह विद्या दे दी और तदनन्तर आकाशमें उड़कर वह गगनवल्लभ नगरको चली गई ॥५५॥ कुमारी बालचन्द्रा, वेगवतीके लिए विद्या रूपी विद्या दान देकर शीघ्र ही निःशल्य हो गई सो ठीक हो है क्योंकि जिन धर्मकी उपासना करनेवाली विद्याधरियाँ अपने मनोरथको शीघ्र ही सिद्ध कर लेती हैं ॥५६॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें बालचन्द्राके दर्शनका वर्णन करनेवाला छब्बीसवाँ सर्ग समाप्त हुआ ॥२६॥

---

१. निःसपत्नी म० । २. इत्युक्तोऽसौ वदद्देया म०, क०, ख० । ३. नगरवल्लभम् म० । ४. विद्या क०, ख० ।

सप्तत्रिंशः सर्गः

गौतमोऽत्रान्तरे पृष्टः स्वस्थेन मगधेशिना । विद्युद्दंष्ट्रो मुने ! कोऽसौ कीदृगाचरणोऽपि वा ॥१॥
इत्युक्तो सोऽवदद्वंशे नमेर्गगनवल्लभे । विद्युद्दंष्ट्रोऽभवद् भर्ता श्रेण्योरद्भुतविक्रमः ॥२॥
अपरेभ्यो विदेहेभ्यः सोऽन्यदानीय योगिनम् । सञ्जयन्तमिहोदारमुपसर्गमकारयत् ॥३॥
हेतुना केन नाथेति प्रश्नितः कौतुकाद् गणी । पुराणं सञ्जयन्तस्य जगौ पापविनाशनम् ॥४॥
इहापरविदेहेऽस्ति विषयो गन्धमालिनी । वीतशोका पुरीहात्र वैजयन्तोऽभवन्नृपः ॥५॥
सर्वश्रीरिति भार्यास्य स्वयं श्रीरिव रूपिणी । सञ्जयन्तजयन्ताख्यौ तस्याश्च तनयौ शुभौ ॥६॥
विहरन्नन्यदा यातः स्वयम्भूस्तीर्थकृत्ततः । धर्मं श्रुत्वा पिता पुत्रौ ते त्रयोऽपि प्रवव्रजुः ॥७॥
तेषां विहरतां सार्धं पिहितास्रवसूरिणा । सञ्जातं वैजयन्तस्य केवलं घातिघातिनः ॥८॥
चतुर्णिकायदेवेषु वन्दमानेषु तं मुनिम् । जयन्तो वीक्ष्य धरणं निदानी[1] धरणोऽभवत् ॥९॥
स्वपुर्याश्च मनोहर्याः श्मशाने भीमदर्शने । सप्ताहप्रतिमो योगी सञ्जयन्तोऽन्यदा स्थितः ॥१०॥
भद्रशाले वने स्त्रीभिर्विद्युद्दंष्ट्रोऽन्यदा चिरम् । रन्त्वाऽऽगच्छत्पुरं दृष्ट्वा सञ्जयन्तं यदृच्छया ॥११॥
पूर्ववैरवशात्क्रुद्धस्तमानीयात्र भारते । वैताढ्यदक्षिणोपान्ते गिरौ वरुणनामनि ॥१२॥

अथानन्तर इसी बीचमें निश्चिन्ततासे बैठे हुए राजा श्रेणिकने गौतम स्वामीसे पूछा कि हे मुनिनाथ ! विद्युद्दंष्ट्र कौन था ? और उसका आचरण कैसा था ? ॥१॥ इस प्रकार पूछनेपर गौतम स्वामी कहने लगे कि नमिके वंशमें गगनवल्लभ नामक नगरमें एक विद्युद्दंष्ट्र नामका विद्याधर हो गया है जो दोनों श्रेणियोंका स्वामी था तथा अद्भुत पराक्रमसे युक्त था ॥२॥ एक समय वह पश्चिम विदेह क्षेत्रसे संजयन्त नामक मुनिराजको अपने यहाँ उठा लाया और उनपर उसने घोर उपसर्ग कराया ॥३॥ यह सुन राजा श्रेणिकने कौतुक वश फिर पूछा कि हे नाथ ! विद्युद्दंष्ट्रने संजयन्त मुनिराजपर किस कारण उपसर्ग कराया था ? इसके उत्तरमें गणधर भगवान् संजयन्त मुनिका पापनाशक पुराण इस प्रकार कहने लगे ॥४॥

हे राजन् ! इसी जम्बू द्वीपके पश्चिम विदेह क्षेत्रमें एक गन्धमालिनी नामका देश है। उसमें वीतशोका नामकी नगरी है। उस नगरीमें किसी समय वैजयन्त नामका राजा राज्य करता था ॥५॥ उसकी सर्वश्री नामकी रानी थी जो ऐसी जान पड़ती थी मानो शरीरको धारण करनेवाली साक्षात् लक्ष्मी हो। इन दोनोंके संजयन्त और जयन्त नामके दो उत्तम पुत्र थे ॥६॥ किसी एक समय विहार करते हुए स्वयंभू तीर्थंकर वहाँ आये। उनसे धर्म श्रवण कर पिता और दोनों पुत्र—तीनोंने दीक्षा धारण कर ली ॥७॥ अपने पिहितास्रव नामक आचार्यके साथ वे तीनों मुनि विहार करते थे। कदाचित् घातिया कर्मोंको नष्ट करनेवाले वैजयन्त मुनिको केवलज्ञान उत्पन्न हो गया ॥८॥ केवलज्ञानके उत्सवमें जब चारों निकायके देव मुनिराज वैजयन्तकी वन्दना कर रहे थे तब धरणेन्द्रको देख जयन्त मुनिने धरणेन्द्र होनेका निदान किया और उसके फलस्वरूप वे मरकर धरणेन्द्र हो भी गये ॥९॥ किसी समय जयन्तके बड़े भाई संजयन्त मुनिराज अपनी वीतशोका नामक सुन्दर नगरीके भीमदर्शन—भयंकर श्मशानमें सात दिनका प्रतिमा योग लेकर विराजमान थे ॥१०॥ उसी समय विद्युद्दंष्ट्र, भद्रशाल वनमें अपनी स्त्रियोंके साथ चिरकालतक क्रीड़ा कर अपने नगरकी ओर लौट रहा था कि अचानक उसकी दृष्टि संजयन्त मुनिराजपर पड़ी ॥११॥ पूर्व वैरके कारण कुपित हो वह उन्हें उठा लाया और भरत क्षेत्र सम्बन्धी विजयार्ध

१. निदानधरणो क० ।

हरिद्वती सरिच्चण्डवेगा[1] गजवतीति च । तथा कुसुमवत्यन्या या सुवर्णवती च सा ॥१३॥
पञ्चानां सङ्गमे तासां प्रदोषसमये स तम् । स्थापयित्वा समं गत्वा प्रत्यूषेऽक्षोभयत्खगान् ॥१४॥
राक्षसोऽद्य महाकायः स्वप्नेऽदर्शि मया निशि । क्षयकृत्स किलास्माकं निहन्मस्तं खगा लघु[2] ॥१५॥
इति प्रणोद्य तैः साकमुद्यतैर्विविधायुधैः । सोऽवधीन्निर्ववौ[3] तीर्थे शीतले शीतलस्य सः ॥१६॥
तच्छरीरस्य [4]पूजार्थं धरणेन्द्रः समागतः । रुष्टो हृत्वाऽखिला विद्यास्तं हन्तुं स समुद्यतः ॥१७॥
आदित्याभस्तमागत्य लान्तवेन्द्रो न्यवारयत् । मा मा प्राणिवधं कार्षीर्धरणेन्द्र ! फणीन्द्र ! भोः ॥१८॥
त्वमहं च खगेन्द्रोऽयं सञ्जयन्तश्च संसृतौ । बद्धवैरा वयं सर्वे यथा भ्रान्तास्तथा शृणु ॥१९॥
अत्राऽस्ति भरतक्षेत्रे विषयः शकटश्रुतिः । पुरं सिंहपुरं तत्र सिंहसेनो नृपोऽभवत् ॥२०॥
रामदत्ता प्रिया तस्य कलागुणविभूषणा । धात्री निपुणमत्याख्या निपुणा निपुणेष्वपि ॥२१॥
सत्यवादी नरेन्द्रस्य श्रीभूत्याख्यः पुरोहितः । अलुब्ध इति स ख्यातः श्रीदत्ता तस्य माहनी[5] ॥२२॥
भाण्डशालाः समस्तासु दिशासु नगरस्य सः । कारयित्वा वणिग्वर्गविश्वासं कुरुतेतराम् ॥२३॥
वणिक् सुमित्रदत्तोऽस्ति पद्मखण्डे पुरोधसि । रत्नानि पञ्च विन्यस्य यातः पोतेन तृष्णया ॥२४॥
भिन्नपोतः स चागत्य याचित्वा तान्यलब्धवान् । पुरोहितप्रमाणैश्च राजलोकैर्निराकृतः ॥२५॥

पर्वतके दक्षिण भागके समीप वरुण नामक पर्वतपर उन्हें ले गया ॥१२॥ हरिद्वती, चण्डवेगा, गजवती, कुसुमवती और सुवर्णवती इन पाँच नदियोंका जहाँ समागम हुआ है वहाँ सायंकालके समय उन्हें रखकर चला गया और प्रातःकाल उसने विद्याधरोंको यह कहकर क्षुभित कर दिया कि आज रात्रिको मैंने स्वप्नमें एक महाकाय राक्षस देखा है। वह राक्षस हम लोगोंका क्षय करनेवाला होगा। इसलिए हे विद्याधरो ! चलो उसे शीघ्र ही मार डालें ॥१३–१५॥ इस प्रकार विद्याधरोंको प्रेरित कर उसने नाना प्रकारके शस्त्र धारण करनेवाले विद्याधरोंके साथ उन्हें मार डाला। मुनिराज संजयन्त भी अन्तिम समय केवलज्ञान प्राप्त कर श्री शीतलनाथ भगवान्‌के शान्तिदायक तीर्थमें निर्वाणको प्राप्त हुए ॥१६॥ तदनन्तर उनके शरीरकी पूजाके लिए जयन्तका जीव-धरणेन्द्र आया सो विद्युद्दंष्ट्रकी इस करतूतसे वह बहुत ही रुष्ट हुआ। वह विद्युद्दंष्ट्रकी समस्त विद्याओंको हरकर उसे मारनेके लिए उद्यत हुआ ही था कि उसी समय आदित्याभ दिवाकर देव नामक लान्तवेन्द्रने वहाँ आकर 'हे धरणेन्द्र ! हे फणीन्द्र ! व्यर्थ ही जीव हिंसा न करो' इन शब्दों द्वारा उसे हिंसासे रोक दिया ॥१७–१८॥ तुम, मैं, यह विद्याधरोंका राजा विद्युद्दंष्ट्र और संजयन्त इस प्रकार हम सब वैर बाँधकर संसारमें जिस तरह भटकते रहे हैं वह मैं कहता हूँ सो सुनो ॥१९॥

इसी भरत क्षेत्रमें एक शकट नामका देश है। उसके सिंहपुर नगरमें किसी समय सिंहसेन नामका राजा राज्य करता था ॥२०॥ सिंहसेनकी कला और गुण रूपी आभूषणोंसे सुशोभित रामदत्ता नामकी स्त्री थी तथा निपुणमति नामकी एक धाय थी जो निपुण मनुष्योंमें भी अतिशय निपुण थी ॥२१॥ राजाका एक श्रीभूति नामका पुरोहित था जो अपनेको सत्यवादी प्रकट करता था तथा लोकमें अलुब्ध–निर्लोभ है इस तरह प्रसिद्ध था। उसकी ब्राह्मणीका नाम श्रीदत्ता था ॥२२॥ वह श्रीभूति नगरकी समस्त दिशाओंमें भाण्डशालाएँ—धरोहर रखनेके स्थान बनवा कर व्यापारी वर्गका बहुत विश्वासपात्र बन गया था ॥२३॥ उसी समय पद्मखण्ड नामक नगरमें एक सुमित्रदत्त नामक वणिक् रहता था। वह किसी समय अपने पाँच रत्न श्रीभूति पुरोहितके पास रखकर तृष्णा वश जहाज द्वारा कहीं गया था ॥२४॥ भाग्यवश उसका जहाज फट गया।

१. शरच्चन्द्रवेगा म० । २. 'लघु क्षिप्रमरं द्रुतम्' इत्यमरः । ३. निर्वाणं प्राप्तवान् । ४. महार्थं ख०, ग०, ङ०, माहार्थं म० । ५. माहिनी म० । ब्राह्मणी ।

मत्वाशानुबद्धचित्तश्च नृपागारसमीपगम् । उच्चैस्तरुं समारुह्य पूत्करोतीति नित्यशः ॥२६॥
सिंहसेनो महाराजो रामदत्ता कृपावती । साधुलोकस्तथाऽन्योऽपि शृणोतु कृपया युतः ॥२७॥
मासे पक्षेऽह्नि चामुष्मिन् श्रीभूतेः सत्यतो मया । पञ्चैवंविधरत्नानि हस्ते न्यस्तानि तान्यसौ ॥२८॥
प्रदातुं नेच्छतीदानीमतिलुब्धमतिर्मम । इति प्रत्यूषवेलायां नित्यं पूत्कृत्य यात्यसौ ॥२९॥
बहुष्वेवमतीतेषु मासेषु नृपमेकदा । रात्रौ प्रियाऽवदद्राजन्नन्यायोऽयमहो महान् ॥३०॥
बलिनो दुर्बलाश्चापि लोके सन्ति तदत्र किम् । बलिनां दुर्बला हस्तैर्लभन्ते नैव जीवितुम् ॥३१॥
दुर्बलस्य वराकस्य हृतान्यस्य बलीयसा । रत्नानि तानि दाप्यन्तां यदि तेऽस्ति कृपा प्रभो ॥३२॥
राजा प्राह प्रिये ! वार्धौ भिन्नपात्रोऽयमत्रपः । अर्थनाशे ग्रही जातः प्रलपत्यतिदुःखितः ॥३३॥
इत्युक्ता सा जगौ राजन्नैषोऽर्थग्रहदूषितः । यतो नियमितालापस्तस्मात्तत्परीक्ष्यताम् ॥३४॥
इत्याकर्ण्य नृपोऽपृच्छत्तमुपांशु दिनानने । अपह्नुते स्म स द्रोही कुतो लुब्धस्य सत्यता ॥३५॥
ततो द्यूतच्छलेनैव स परीक्षितुमुद्यतः । राज्ञी तं तु पुराप्राक्षीत् रात्रौ भुक्तमकथिता ॥३६॥
गत्वा निपुणमत्या च राजपत्न्या निदेशतः । [1]याचिता नो ददौ तानि साभिज्ञानमपि प्रिया ॥३७॥
द्यूते निर्जितमादाय ब्रह्मसूत्रं ययाच सा । धात्री तथापि नो लेभे पत्यादेशो हि तादृशः ॥३८॥

लौटकर उसने पुरोहितसे अपने रत्न माँगे परन्तु प्राप्त नहीं कर सका। राजद्वारमें उसने प्रार्थना की परन्तु पुरोहितको प्रमाण माननेवाले राज-कर्मचारियोंने उसे तिरस्कृत कर भगा दिया ॥२५॥ अन्तमें बदलेकी आशासे जिसका चित्त जल रहा था ऐसा सुमित्रदत्त वणिक् राज महलके समीप एक ऊँचे वृक्षपर चढ़कर प्रतिदिन यह कहता हुआ रोने लगा कि महाराज सिंहसेन, दयावती रानी रामदत्ता तथा अन्य सज्जन पुरुष दयायुक्त हो मेरी प्रार्थना सुनें। मैंने अमुक मास और पक्षके अमुक दिन श्रीभूति पुरोहितकी सत्यवादितासे प्रभावित होकर उसके हाथमें इस-इस प्रकारके पाँच रत्न रक्खे थे परन्तु इस समय वह अत्यन्त लुब्ध होकर मेरे वह रत्न देना नहीं चाहता है। इस प्रकार प्रतिदिन प्रातःकालके समय रोकर वह यथास्थान चला जाता था ॥२६–२९॥ इस प्रकार उसे रोते-रोते जब बहुत महीने बीत गये तब एक दिन प्रिया रामदत्ताने रात्रिके समय राजासे कहा कि हे राजन् ! यह बड़ा अन्याय है। लोकमें बलवान् और दुर्बल सभी होते हैं तो क्या बलवानोंके हाथसे दुर्बल मनुष्य जीवित नहीं रह सकते ? ॥३०–३१॥ इस बेचारे दुर्बलके रत्न अतिशय बलवान् पुरोहितने हड़प लिये हैं। इसलिए हे प्रभो ! यदि इसपर आपको दया आती है तो इसके रत्न दिलाये जावें ॥३२॥ राजाने कहा कि हे प्रिये ! समुद्रमें इसका जहाज फट गया था, इसलिए यह निर्लज्ज धन नष्ट हो जानेके कारण अतिशय दुःखी हो पिशाचसे आक्रान्त हो गया है और उसी दशामें कुछ बकता रहता है ॥३३॥ इस प्रकार राजाका उत्तर पाकर रामदत्ताने कहा कि हे राजन् ! यह धन रूपी पिशाचसे आक्रान्त नहीं है क्योंकि यह प्रतिदिन एक ही बात कहता है अतः इसकी परीक्षा की जाय ॥३४॥ यह सुनकर राजाने प्रातःकाल एकान्तमें पुरोहितसे पूछा परन्तु वह द्रोही सर्वथा मेंट गया सो ठीक ही है क्योंकि लोभी मनुष्यके सत्यता कैसे हो सकती है ? ॥३५॥ तदनन्तर राजा जुआके छलसे ही पुरोहितकी परीक्षा करनेके लिए उद्यत हुआ। रानी रामदत्ताने जुआ खेलनेके पूर्व ही किसी बहाने पुरोहितसे पूछ लिया था कि आज आपने रात्रिमें क्या भोजन किया था ? ॥३६॥ रानी रामदत्ताकी आज्ञा पाकर निपुणमति धायने जाकर पुरोहितकी स्त्रीसे रत्न माँगे और पहिचानके लिए रात्रिके भोजनकी बात बताई परन्तु पुरोहितकी स्त्रीने रत्न नहीं दिये ॥३७॥ अबकी बार जुआमें जीता हुआ जनेऊ ले जाकर निपुणमतिने पुरोहितकी स्त्रीसे रत्न माँगे परन्तु फिर भी वह उन्हें प्राप्त

---

१. याचितानि म० ।

पतिनामाङ्कितां दृष्ट्वा मुद्रिकां तान्यदात् प्रिया । वचनाद्रामदत्ताया द्यूतं चाप्युपसंहृतम् ॥३९॥
व्यामिश्राण्यपि सद्रत्नैः परकीयैरसौ वणिक् । स्वरत्नान्येवमादाय राजपूजामवाप्तवान् ॥४०॥
परस्वहरणप्रीतः सर्वस्वहरणं द्विजः । गोमयादनमप्याप्य मल्लमुष्टिहतो मृतः ॥४१॥
आर्तध्यानाविलश्चासौ सर्पोऽगन्धननामकः । भाण्डागारान्तरे जज्ञे राज्ञो द्रोही हताशकः ॥४२॥
स्थापितोऽन्यः पदे तस्य द्विजो धम्मिल्लसंज्ञकः । मिथ्यादृष्टिरदिष्टार्थं[1] प्रति प्रायः कृतोद्यतः ॥४३॥
पद्मखण्डपुरं गत्वा जैनीभूतोऽप्यसौ वणिक् । दानी चासीन्निदानी च दत्तापुत्रत्ववाञ्छया[2] ॥४४॥
सुमित्रदत्तिका तस्य भार्या मृत्वा विरोधिनी । व्याघ्रीभूता चखादाद्रौ तं साधोर्नतये गतम् ॥४५॥
सोऽभवद्रामदत्तायाः पुत्रः सस्नेहबन्धनः । सिंहचन्द्र इतीन्द्रत्वमगणय्य निदानतः ॥४६॥
पूर्णचन्द्र इतीन्द्राभः कनीयान् तस्य जातवान् । जातौ च तौ क्षितौ ख्यातौ सूर्याचन्द्रमसौ यथा ॥४७॥
भाण्डागारप्रविष्टं च सिंहसेनमगन्धनः[3] । दष्टवान् दुष्टसर्पोऽसावेकदा वैरभावतः ॥४८॥
मन्त्रैर्गरुडदण्डेन महागारुडिकेन तु । अगन्धनादयः सर्पास्तत्राहूय प्रणोदिताः ॥४९॥
तिष्ठत्वेकोऽपराधी हि शेषा यान्तु यथागतम् । इत्युक्तोऽगन्धनोऽतिष्ठद् याताश्चान्ये पृदाकवः[4] ॥५०॥

नहीं कर सकी सो ठीक ही है क्योंकि उसके लिए पतिकी आज्ञा ही वैसी ही थी ॥३८॥ तीसरी बार पतिके नामसे चिह्नित अँगूठी देखकर पुरोहितकी स्त्रीने वे रत्न दे दिये। उसी समय रानी रामदत्ताकी आज्ञानुसार जुआ बन्द कर दिया गया ॥३९॥ यद्यपि राजाने वणिक्के उन रत्नोंको दूसरेके रत्नोंके साथ मिलाकर दिया था तथापि वणिक्ने अपने ही रत्न पहिचान कर उठा लिये और इस सचाईके कारण राजासे सम्मानको भी प्राप्त किया ॥४०॥ दूसरेका धन हरण करनेमें प्रीतिका अनुभव करनेवाले पुरोहितका सब धन छीन लिया गया, उसे गोबर खिलाया गया और मल्लोंके मुक्कोंसे पिटवाया गया जिससे वह मर गया ॥४१॥ चूँकि वह धनके आर्तध्यानसे कलुषित चित्त होकर मरा था इसलिए राजाके भाण्डार गृहमें अगन्धन नामका साँप हुआ और अपनी दुष्टताके कारण राजासे सदा द्रोह रखने लगा ॥४२॥ श्रीभूति पुरोहितके स्थानपर धम्मिल्ल नामक दूसरा ब्राह्मण रक्खा गया परन्तु वह भी मिथ्यादृष्टि था और प्रायः नहीं कहे हुए कार्यको करनेके लिए उद्यत रहता था ॥४३॥

सुमित्रदत्त वणिक् रत्न लेकर अपने पद्मखण्डपुर नगरको चला गया। यद्यपि वह जैन था—जैन धर्मके स्वरूपको समझता था तथापि 'मैं रानी रामदत्ताका पुत्र होऊँ' ऐसा उसने निदान बाँध लिया और इसी इच्छासे वह खूब दान करने लगा ॥४४॥ वणिक्की स्त्री सुमित्रदत्तिका जो सदा उससे विरोध रखती थी मरकर एक पर्वतपर व्याघ्री हुई। एक दिन सुमित्रदत्त किन्हीं मुनिराजकी वन्दनाके लिए उसी पर्वतपर गया था सो उस व्याघ्रीने उसे खा लिया ॥४५॥ मरकर वह रामदत्ताका पुत्र हुआ। यद्यपि वह अपने पुण्य बलसे इन्द्र हो सकता था तथापि निदानके द्वारा इन्द्रत्वकी उपेक्षा कर राजपुत्र ही हुआ। उसका सिंहचन्द्र नाम रक्खा गया तथा वह रामदत्ताके स्नेह-बन्धनसे युक्त था—उसे अतिशय प्यारा था ॥४६॥ सिंहचन्द्रके, इन्द्रके समान आभावाला पूर्णचन्द्र नामका एक छोटा भाई भी हुआ। ये दोनों भाई पृथिवीपर सूर्य-चन्द्रमाके समान प्रसिद्ध थे ॥४७॥ एक समय राजा सिंहसेन कार्यवश भाण्डागारमें प्रविष्ट हुए सो वहाँ पूर्व वैरके कारण पुरोहितके जीव अगन्धन नामक दुष्ट साँपने उन्हें काट खाया ॥४८॥ उसी नगरमें एक गारुडिक विद्या (सर्प उतारनेकी विद्या) का अच्छा जानकार गरुडदण्ड रहता था। उसने मन्त्रों द्वारा अगन्धनको आदि लेकर समस्त सर्पोंको बुलाकर उनसे कहा कि तुम लोगोंमें जो एक अपराधी सर्प है वही यहाँ ठहरे, बाकी सब यथास्थान चले जावें। गरुडदण्डके ऐसा

१. -रदृष्टार्थं म० । २. रामदत्तायाः पुत्रोऽहं भवेयमिति वाञ्छया निदानयुक्तोऽभूत् । ३. सिंहसेनं स गन्धनः म० । ४. सर्पाः ।

उपसंहर हे दुष्ट ! स्वविसृष्टं विषं लघु । नोपसंहर्तुमिच्छा चेत्प्रविशाशु हुताशनम् ॥५१॥
इत्युक्तो नोपसंहृत्य विषं विषधरो रुषा । अकरुन्धानुमाविश्य मृत्वाऽभूच्चमरी मृगी ॥५२॥
सिंहसेनो मृतो जातः स हस्ती सल्लकीवने । शाखामृगस्तु धम्मिल्लः का वा मिथ्यादृशां गतिः ॥५३॥
रामदत्तासुतौ राजयुवराजौ नयान्वितौ । शशासतुरिलां वेलावलयावधिकां विभू ॥५४॥
पोदने पूर्णचन्द्रो यो या हिरण्यवती च तौ[1] । पितरौ रामदत्ताया जिनशासनभावितौ ॥५५॥
राहुभद्रमुनेः पार्श्वे प्रव्रज्यावधिमैत्पिता । दत्तवत्यार्यिकापार्श्वे माताऽधत्तार्यिकाव्रतम् ॥५६॥
पूर्णचन्द्रमुनेः श्रुत्वा रामदत्ताम्बिकाऽर्यिका । प्रवृत्तिं रामदत्ताया गत्वा बोधयतिस्म ताम् ॥५७॥
प्राव्रजद्रामदत्ता सा संसारभयवेदिनी । राहुभद्रगुरोरन्ते सिंहचन्द्रोऽपि बोधितः ॥५८॥
पूर्णचन्द्रस्तु राज्यस्थः [2]प्रतापप्रणताहितः । भोगासक्तो बभूवासौ सम्यक्त्वव्रतवर्जितः ॥५९॥
एकदा रामदत्ताऽर्या सिंहचन्द्रं धृतावधिम् । पप्रच्छ चारणं नत्वा स्वमातृसुतजन्म सा ॥६०॥
स प्राह भरतेऽत्रैव विषये कोसलाभिधे । बभूव वर्द्धकिग्रामे विप्रो नाम्ना मृगायणः ॥६१॥
ब्राह्मणस्य स्वभावेन मधुरा मधुराभिधा । सुता च वारुणी यूनां वारुणीव[3] मदावहा ॥६२॥

कहनेपर राजाको काटनेवाला अगन्धन सर्प रह गया बाकी सब चले गये ॥४९–५०॥ गरुडदण्डने उसे ललकारते हुए कहा कि अरे दुष्ट ! अपने द्वारा छोड़े हुए विषको शीघ्र ही खींच और यदि खींचनेकी इच्छा नहीं है तो शीघ्र ही अग्निमें प्रवेश कर ॥५१॥ गरुडदण्डके इस प्रकार कहनेपर उस अगन्धन सर्पने क्रोधके कारण विष तो नहीं खींचा पर जलती हुई अग्निमें प्रवेश कर मरण स्वीकार कर लिया और मरकर वह चमरी मृग हुआ ॥५२॥ विषके वेगसे मरकर राजा सल्लकी वनमें हाथी हुआ और जिसे श्रीभूतिके स्थानपर रक्खा गया था वह धम्मिल्ल मरकर उसी वनमें वानर हुआ सो ठीक ही है क्योंकि मिथ्यादृष्टि जीवोंकी और गति हो ही क्या सकती है ?॥५३॥ रामदत्ताके सिंहचन्द्र और पूर्णचन्द्र नामक दोनों नीतिज्ञ एवं सामर्थ्यवान् पुत्र क्रमसे राजा और युवराज बनकर समुद्रान्त पृथिवीका पालन करने लगे ॥५४॥

पोदनपुर नगरमें जो राजा पूर्णचन्द्र और रानी हिरण्यवती थी वे रानी रामदत्ताके माता-पिता थे और वे दोनों ही जिनशासनकी भावनासे युक्त थे ॥५५॥ एक बार रामदत्ताके पिता पूर्णचन्द्रने राहुभद्र मुनिके समीप दीक्षा ले अवधिज्ञान प्राप्त किया और माता हिरण्यवतीने दत्तवती आर्यिकाके समीप दीक्षा ले आर्यिकाके व्रत धारण कर लिये ॥५६॥ कदाचित् रामदत्ताकी माता हिरण्यवती आर्यिकाने अवधिज्ञानी पूर्णचन्द्र मुनिसे रामदत्ताका सब समाचार सुना और जाकर उसे सम्बोधित किया—समझाया ॥५७॥ माताके मुखसे उपदेश श्रवण कर रामदत्ता संसारसे भयभीत हो उठी जिससे उसने उसी समय दीक्षा ले ली। हिरण्यवतीने रामदत्ताके पुत्र सिंहचन्द्रको भी समझाया जिससे उसने भी राहुभद्र गुरुके समीप दीक्षा ले ली ॥५८॥ सिंहचन्द्रके बाद प्रतापके द्वारा शत्रुओंको नम्रीभूत करनेवाला युवराज पूर्णचन्द्र राज्य-सिंहासनपर आरूढ़ हुआ परन्तु वह सम्यग्दर्शन और व्रतसे रहित होनेके कारण भोगोंमें आसक्त हो गया ॥५९॥ एक बार आर्यिका रामदत्ताने अवधिज्ञानी एवं चारण ऋद्धिके धारक सिंहचन्द्र मुनिको नमस्कार कर उनसे अपना, अपनी माताका तथा अपने पुत्रोंका पूर्वभव पूछा ॥६०॥

इसके उत्तरमें मुनिराज कहने लगे कि इसी भरतक्षेत्रके कोसल देशमें एक वर्धकि नामका ग्राम था और उसमें मृगायण नामका एक ब्राह्मण रहता था ॥६१॥ ब्राह्मणकी ब्राह्मणीका नाम मधुरा था जो न केवल नामसे ही मधुरा थी किन्तु स्वभावसे भी मधुरा थी। उन दोनोंके एक वारुणी नामकी पुत्री थी जो तरुण मनुष्योंके लिए वारुणी–मदिराके समान मद उत्पन्न करनेवाली

१. -वतीत्यसौ म० । २. प्रतापेन प्रणताः अहिताः शत्रवो येन सः । ३. मदिरेव ।

मृत्वा मृगायणो राज्ञः साकेतेऽतिबलस्य सः । हिता हिरण्यवत्येषा श्रीमत्याश्च सुताऽभवत् ॥६३॥
मधुरा त्वं रामदत्ताऽभूः पूर्णचन्द्रस्तु वारुणी । वणिक्सुमित्रदत्तोऽहं सिंहचन्द्रस्तवात्मजः ॥६४॥
[1]दष्टः श्रीभूतिपूर्वेण भुजगेन पिता गजः । सञ्जातो ग्राहितो धर्मं मया स मदवारणः ॥६५॥
दुर्भुजङ्गचरी मृत्वा चमरी चमरातुरा । रौद्रः कुक्कुटसर्पोऽभूद् रूक्षपक्षपरिग्रहः ॥६६॥
सोपवासव्रतश्रान्तः स विश्रान्तमदः करी । ग्रस्तः कुक्कुटसर्पेण सहस्रारमगात्सुधीः ॥६७॥
विमाने श्रीप्रभे तत्र श्रीधरः [3]श्रीधरोऽमरः । अप्सरोभिरमा भोगी धर्मेण रमतेऽधुना ॥६८॥
क्रोधाद् धम्मिल्लपूर्वेण मर्कटेन हतस्तदा । पापः कुक्कुटसर्पोऽगात्पृथिवीं वालुकाप्रभाम् ॥६९॥
म्लेच्छः शृगालदत्तस्तद्दन्तिदन्तास्थिमौक्तिकम् । दत्तवान् धनमित्राय पूर्णचन्द्राय वाणिजः ॥७०॥
दन्तास्थिभिरयं तुष्टः कारयित्वा नृपासनम् । हारभारं तु मुक्ताभिरथास्ते तद्बिभर्ति तम् ॥७१॥
अहो संसारवैचित्र्यं देहिनामिह मोहिनाम् । पितुरङ्गानि जायन्ते भोगाङ्गानि पराङ्गवत् ॥७२॥
निशम्य शमिनो [4]वाक्यं रामदत्ता प्रमादिनम् । तदशेषमुदाहृत्य पूर्णचन्द्रमबोधयत् ॥७३॥
दानपूजातपःशीलसम्यक्त्वमनुपाल्य सः । कल्पे तस्मिन् विमानेऽभूद्वैडूर्यप्रभनामनि ॥७४॥
रामदत्ताऽपि सम्यक्त्वात्स्त्रैणमुन्मुच्य तत्र तु । प्रभङ्करविमानेऽभूद्देवः सूर्यप्रभाभिधः ॥७५॥
सिंहचन्द्रमुनिः सम्यगाराधितचतुष्टयः । ग्रैवेयकेऽहमिन्द्रोऽभूत्स प्रीतिङ्करसंज्ञके ॥७६॥

थी ॥६२॥ मृगायण मरकर साकेत नगरमें राजा अतिबल और उसकी रानी श्रीमतीके तुम्हारी माँ हिरण्यवती हुआ है॥६३॥ उसकी मधुरा ब्राह्मणी तू रामदत्ता हुई है, वारुणीका जीव तेरा छोटा पुत्र पूर्णचन्द्र हुआ है, और वणिक् सुमित्रदत्तका जीव मैं तेरा सिंहचन्द्र नामका पुत्र हुआ हूँ ॥६४॥ पिता सिंहसेनको श्रीभूतिके जीव अगन्धन सर्पने डस लिया था इसलिए मरकर वे हाथी हुए थे मैंने उन्हें हाथीकी पर्यायमें श्रावकका धर्म धारण कराया था ॥६५॥ श्रीभूति पुरोहितका जीव साँप हुआ था फिर चमरी मृग हुआ। तदनन्तर चमरमृगके लिए आतुर होता हुआ मरकर रूखे पङ्खोंको धारण करनेवाला दुष्ट कुक्कुट सर्प हुआ ॥६६॥ पिताका जीव जो हाथी हुआ था वह उपवासका व्रत लेकर शिथिल पड़ा हुआ था और उसका सब मद सूख गया था। उसी दशामें पुरोहितके जीव कुक्कुट सर्पने उसे डस लिया जिससे वह अच्छे परिणामोंसे मरकर सहस्रार स्वर्ग गया ॥६७॥ वह वहाँ श्रीप्रभ नामक विमानमें लक्ष्मीको धारण करनेवाला श्रीधर नामका देव हुआ है और इस समय धर्मके प्रभावसे भोगोंसे युक्त हो अप्सराओंके साथ रमण कर रहा है ॥६८॥ धम्मिल्लका जीव जो मर्कट हुआ था उसने हाथीका घात करनेवाले कुक्कुट सर्पको क्रोधवश मार डाला जिससे वह मरकर बालुकाप्रभा नामक तीसरे नरकमें गया ॥६९॥ किसी शृगालदत्त नामक भीलने उस हाथीके दाँत, हड्डी और मोती इकट्ठे कर धनमित्र सेठके लिए दिये और धनमित्रने राजा पूर्णचन्द्रके लिए समर्पित किये ॥७०॥ राजा पूर्णचन्द्र उन्हें पाकर बहुत सन्तुष्ट हुआ। उसने दाँतोंकी हड्डियोंसे सिंहासन बनवाया है और मोतियोंसे बड़ा हार तैयार करवाया है। इस समय वह उसी सिंहासनपर बैठता है और उसी हारको धारण करता है ॥७१॥ अहो! मोही प्राणियोंकी संसारकी विचित्रता तो देखो कि जहाँ अन्य प्राणियोंके अङ्गके समान पिताके अङ्ग भी भोगके साधन हो जाते हैं ॥७२॥ मुनिराज सिंहचन्द्रके वचन सुनकर आर्यिका रामदत्ताने जाकर प्रमादमें डूबे पूर्णचन्द्रको वह सब बताकर अच्छी तरह समझाया ॥७३॥ जिससे वह दान, पूजा, तप, शील और सम्यक्त्वका अच्छी तरह पालन कर उसी सहस्रार स्वर्गके वैडूर्यप्रभ नामक विमानमें देव हुआ ॥७४॥ रामदत्ता भी सम्यग्दर्शनके प्रभावसे स्त्री पर्यायको छोड़कर उसी सहस्रार स्वर्गके प्रभंकर नामक विमानमें सूर्यप्रभ नामका देव हुई॥७५॥ और सिंहचन्द्र मुनि भी अच्छी तरह चार

१. दृष्टः म० । २. लक्ष्मीधरः । ३. एतन्नामधेयः । ४. वाच्यं म० ।

सूर्यप्रभसुरश्च्युत्वा जम्बूद्वीपस्य भारते । वैताढ्यदक्षिणश्रेण्यां धरणीतिलके पुरे ॥७७॥
भूभृतोऽतिबलस्यामूत्सम्यक्त्वच्युतिदोषतः । सुलक्षणमहादेव्यां श्रीधराख्या शरीरजा ॥७८॥
अलकापतये दत्ता सा सुदर्शनभूभुजे । स वैडूर्यविमानेशस्तस्यां जाता यशोधरा ॥७९॥
दत्तायामुत्तरश्रेण्यां प्रभाकरपुरेशिने । सूर्यावर्ताय जातोऽस्यां सुतोऽसौ श्रीधरोऽमरः ॥८०॥
तस्मै तु रश्मिवेगाय राज्यं दत्त्वा पिता ततः । मुनिचन्द्रसमीपेऽसौ मोक्षार्थी तपसि स्थितः ॥८१॥
गुणवत्यार्यिकापार्श्वे श्रीधरा सयशोधरा । सम्यग्दर्शनसंशुद्धा प्रव्रज्यां प्रत्यपद्यत ॥८२॥
रश्मिवेगोऽन्यदा यातः[1] सिद्धकूटं ववन्दिषुः[2] । हरिचन्द्रमुनेस्तत्र धर्मं श्रुत्वाऽभवद्यतिः ॥८३॥
काञ्चनाख्यगुहायां तं स्वाध्यायध्वनिपावनम् । आर्ये ते वन्दितुं याते रश्मिवेगं महामुनिम् ॥८४॥
वालुकाप्रभभूमेर्यो निर्यातो नारकश्चिरम् । स संसृत्य गुहायां हि जातः सोऽजगरोऽत्र तु ॥८५॥
कायोत्सर्गस्थितं साधुमुपसर्गनिरीक्षणात् । आर्ये च ते समयादि सोऽगिलद्विपुलोदरः ॥८६॥
रश्मिवेगो मृतः कल्पे कापिष्ठे श्रेष्ठधीरभूत् । अर्कप्रभस्तथाऽऽर्ये विमाने रुचके सुरौ ॥८७॥
महाशत्रुरसौ मृत्वा रौद्रध्यानदुराशयः । पङ्कप्रभां भुवं प्राप्तः पापपङ्ककलङ्कितः ॥८८॥
प्रीतिङ्करविमानेशः सिंहचन्द्रचरश्च्युतः । अपराजितसुन्दर्योः पुत्रश्चक्रपुरेऽजनि ॥८९॥
चक्रायुधाभिधानस्य चित्रमालाऽस्य भामिनी । तस्यामर्कप्रभश्च्युत्वा जातो वज्रायुधः सुतः ॥९०॥

आराधनाओंकी आराधना कर प्रीतिङ्कर नामक ग्रैवेयकमें अहमिन्द्र हुए ॥७६॥ रामदत्ताका जीव जो सूर्यप्रभ देव हुआ था वहाँ उसका सम्यग्दर्शन छूट गया था इसलिए आयु पूर्ण होनेपर वहाँसे च्युत हो वह विजयार्ध पर्वतकी दक्षिणश्रेणीपर जो धरणीतिलक नामका नगर है उसके राजा अतिबलकी सुलक्षणा नामक महादेवीके श्रीधरा नामकी पुत्री हुआ ॥७७–७८॥ श्रीधरा, अलका नगरीके स्वामी राजा सुदर्शनको दी गई और उसके पूर्णचन्द्रका जीव जो वैडूर्यप्रभ विमानका स्वामी था वहाँसे चयकर यशोधरा नामकी पुत्री हुआ ॥७९॥ यशोधरा, उत्तरश्रेणीपर स्थित प्रभाकरपुरके स्वामी राजा सूर्यावर्तके लिए दी गई और उसके राजा सिंहसेनका जीव जो श्रीधर देव हुआ था वह वहाँसे चयकर रश्मिवेग नामका पुत्र हुआ॥८०॥ तदनन्तर जब राजा सूर्यावर्त मोक्षकी अभिलाषासे उस रश्मिवेग पुत्रके लिए राज्य देकर मुनिचन्द्र गुरुके समीप तप करने लगा तब श्रीधरा और यशोधराने भी सम्यग्दर्शनसे शुद्ध हो गुणवती आर्यिकाके पास दीक्षा ले ली ॥८१–८२॥ एक समय रश्मिवेग वन्दना करनेकी इच्छासे सिद्धकूट गया था कि वहाँ हरिचन्द्र मुनिसे धर्म श्रवण कर मुनि हो गया ॥८३॥ एक दिन महामुनि रश्मिवेग, काञ्चन नामक गुहामें स्वाध्याय करते हुए विराजमान थे कि श्रीधरा और यशोधरा नामकी आर्यिकाएँ उनकी वन्दनाके लिए वहाँ गईं ॥८४॥ श्रीभूति पुरोहितका जीव जो बालुकाप्रभा पृथिवीमें नारकी हुआ था वह चिरकालके बाद वहाँसे निकलकर तथा संसारमें परिभ्रमण कर उसी गुहामें अजगर हुआ था ॥८५॥ उपसर्ग आया देख मुनि रश्मिवेग कायोत्सर्गमें स्थित हो गये और दोनों आर्यिकाओंने भी साव-धिक संन्यास ले लिया। विशाल उदरका धारक वह अजगर उन तीनोंको निगल गया ॥८६॥ रश्मिवेग मरकर कापिष्ठ स्वर्गमें उत्तम बुद्धिके धारक अर्कप्रभ देव हुए और दोनों आर्यि-काएँ भी उसी स्वर्गके रुचक विमानमें देव हुईं ॥८७॥ जिसका हृदय रौद्र ध्यानसे दूषित था ऐसा महाशत्रु अजगर पापरूपी पङ्कसे कलङ्कित हो मरकर पङ्कप्रभा नामक चौथी पृथिवीमें उत्पन्न हुआ ॥८८॥ सिंहचन्द्रका जीव जो प्रीतिङ्कर विमानका स्वामी था वह वहाँसे च्युत हो चक्रपुर नामक नगरके राजा अपराजित और रानी सुन्दरीके चक्रायुध नामका पुत्र हुआ। चक्रायुधकी स्त्री चित्रमाला थी और उसके मुनि रश्मिवेगका जीव (रानी रामदत्ताका पति राजा सिंहसेनका

---

१. जातः म० । २. वन्दितुमिच्छुः ।

श्रीधरापूर्वको देवः पृथिवीतिलके पुरे । प्रियङ्करातिवेगाभ्यां रत्नमालाऽभवत्सुता ॥९१॥
वज्रायुधाय सा दत्ता तस्यां रत्नायुधः सुतः । जातो यशोधरापूर्वः[1] सुरः पूर्वसुकर्मणः ॥९२॥
चक्रायुधः श्रियं न्यस्य सुते वज्रायुधे तपः । पिहितास्रवपादान्ते कृत्वान्ते[2] निर्वृतिं श्रितः ॥९३॥
वज्रायुधोऽपि विन्यस्य राज्यं रत्नायुधे तपः । दध्रे राज्यमदोन्मत्तः स च मिथ्यात्वमागतः ॥९४॥
जलावगाहनायास्य राजहस्त्यन्यदा गतः । मुनिदर्शनतः स्मृत्वा जातिं नापः पिबत्यसौ ॥९५॥
तस्य मेघनिनादस्य राज्ञा कृत्यमजानता । वज्रदत्तमुनिः पृष्टः कारणं प्रत्यभाषत ॥९६॥
चित्रकारपुरेऽत्राभूत्प्रीतिभद्रो नरेश्वरः । दयिता सुन्दरी तस्य पुत्रः प्रीतिङ्करस्तयोः ॥९७॥
चित्रबुद्धिस्तथा मन्त्री कमला तस्य कामिनी । विचित्रमतिरित्यासीत्तनयः सनयोऽनयोः ॥९८॥
अमात्यराजपुत्रौ तौ श्रुत्वा तु तपसः फलम् । श्रुतसागरपादान्ते युवानौ तपसि स्थितौ ॥९९॥
तौ च निर्वाणधामानि पश्यन्तौ कान्तदर्शनौ । साकेतमन्यदा यातौ नानाविधतपोधनौ ॥१००॥
गणिकां बुद्धिसेनाख्यां तत्र दृष्ट्वाऽतिरूपिणीम् । भग्नः कर्मवशात्मन्त्रिपुत्रस्त्वपत्रपः[3] ॥१०१॥
राज्ञः स गन्धमित्रस्य सूपकारपदे स्थितः । मांसपाकविशेषज्ञो लेभे तां गणिकां ततः ॥१०२॥
स भुक्त्वाऽमाऽनया कामं सर्वतोऽविरतात्मकः । मांसाशनप्रियो मृत्वा सप्तमीं पृथिवीमितः ॥१०३॥

जीव) अर्कप्रभ देव कापिष्ठ स्वर्गसे च्युत हो वज्रायुध नामका पुत्र हुआ ॥८९-९०॥ श्रीधरा आर्यिकाका जीव जो कापिष्ठ स्वर्गमें देव हुआ था, वहाँसे च्युत हो पृथिवीतिलक नगरमें राजा प्रियंकर और अतिवेगा रानीके रत्नमाला नामकी पुत्री हुआ ॥९१॥ रत्नमाला वज्रायुधके लिए दी गई और उसके आर्यिका यशोधराका जीव जो कापिष्ठ स्वर्गमें देव हुआ था वहाँसे च्युत हो पूर्व पुण्यके उदयसे रत्नायुध नामका पुत्र हुआ ॥९२॥ चक्रायुध वज्रायुध पुत्रके लिए राज्यलक्ष्मी सौंपकर पिहितास्रव मुनिके पादमूलमें तप करने लगा और अन्तमें निर्वाणको प्राप्त हुआ ॥९३॥ राजा वज्रायुधने भी राज्यका भार रत्नायुध पुत्रके लिए सौंपकर तप धारण कर लिया। परन्तु रत्नायुध राज्यके मदसे उन्मत्त हो मिथ्यादृष्टि हो गया ॥९४॥ राजा रत्नायुधका एक मेघनिनाद नामका मुख्य हस्ती था। एक समय वह जलावगाहनके लिए गया था परन्तु बीचमें मुनिराजका दर्शन होनेसे उसे जाति स्मरण हो गया जिससे उसने पानी नहीं पिया ॥९५॥ राजा रत्नायुध मेघनिनादके इस कार्यको नहीं समझ सका इसलिए उसने वज्रदत्त नामक मुनिराजसे इसका कारण पूछा। उत्तरमें मुनिराज कहने लगे ॥९६॥

इसी भरत क्षेत्रके चित्रकारपुरमें एक प्रीतिभद्र नामका राजा रहता था। उसकी सुन्दरी नामकी स्त्री थी और दोनोंके प्रीतिंकर नामका पुत्र था ॥९७॥ राजा प्रीतिभद्रका एक चित्रबुद्धि नामका मन्त्री था। मन्त्रीकी स्त्रीका नाम कमला था और दोनोंके विचित्रमति नामका नीतिवेत्ता पुत्र था ॥९८॥ राजपुत्र प्रीतिंकर और मन्त्रिपुत्र विचित्रमति दोनोंने एक बार श्रुतसागर मुनिसे तपका फल सुना और दोनों ही युवावस्थामें उनके चरणोंके समीप रहकर तप करने लगे ॥९९॥ जो देखनेमें बहुत सुन्दर थे और नाना प्रकारका तपश्चरण ही जिनका धन था ऐसे वे दोनों मुनि एक समय सिद्ध क्षेत्रोंके दर्शन करते हुए साकेतनगर पहुँचे ॥१००॥ साकेतनगरमें एक बुद्धिसेना नामकी वेश्या बहुत सुन्दरी थी। उसे देखकर मन्त्रिपुत्र विचित्रमति कर्मोदयके कारण मुनिपदसे भ्रष्ट हो गया और उसने निर्लज्ज हो मुनिपद छोड़ दिया ॥१०१॥ विचित्रमति, मुनिपदसे भ्रष्ट हो राजा गन्धमित्रका रसोइया बन गया। वह मांस बनानेमें अत्यन्त निपुण था। इसलिए अपनी कलासे राजाको प्रसन्न कर उसने वर स्वरूप वह वेश्या प्राप्त कर ली ॥१०२॥ जिसकी आत्मा समस्त पापोंसे अविरत थी—जिसे किसी भी पापके करनेमें संकोच नहीं था तथा जो मांस खानेका प्रेमी हो चुका था ऐसा विचित्रमति उस वेश्याके साथ इच्छानुसार भोग भोगकर मरा

---

१. यशोधरापूर्वं म० । २. मृत्वान्ते म० ग० । ३. अपगता त्रपा लज्जा यस्य सः ।

ऊहुत्वोऽपि ततो भ्रान्त्वा संसारं सारवर्जितम् । जातः पापविशेषेण मारणो मत्तवारणः ॥१०४॥
साधुदर्शनयोगेन जातिस्मृतिमुपागतः । निन्दन् मन्दरुचिः कर्म गजोऽयमुपशान्तवान् ॥१०५॥
तदाकर्ण्य करीन्द्रोऽसौ नरेन्द्रश्च यतेर्वचः । मिथ्याकलङ्कमुत्सृज्य जातौ श्रावकतायुजौ ॥१०६॥
पङ्कप्रभाविनिर्यातो नारकोऽप्यभवत्पुनः । भङ्गीदारुणयोर्व्याधो नामकर्मातिदारुणः ॥१०७॥
वने प्रियङ्गुखण्डेऽसौ वज्रायुधमहामुनिम् । व्याधो विव्याध योगस्थं सोऽपि सर्वार्थसिद्धिमैत्[1] ॥१०८॥
महातमःप्रभां प्राप्तो मृत्वा व्याधोऽतिदारुणः । दुःखमन्वभवत्सोऽस्यां घोरं मुनिवधोद्भवम् ॥१०९॥
मृत्वा श्रावकधर्मेण रत्नमालाऽच्युतेऽमरः । जातो रत्नायुधश्चापि तत्रैव सुरसत्तमः ॥११०॥
द्वीपे च धातकीखण्डे पूर्वमेरोश्च पश्चिमे । विदेहे गन्धिलादेशे राज्ञोऽयोध्यापतेः सुतौ ॥१११॥
अर्हद्दासस्य तौ देवौ सुव्रताजिनदत्तयोः । जातौ वीतभयः सीरी चक्री चात्र विभीषणः ॥११२॥
पृथ्वीं रत्नप्रभां यातो जीवितान्ते विभीषणः । अनिवृत्तिमुनेस्त्वन्ते कृत्वा वीतभयस्तपः ॥११३॥
जातः स लान्तवेन्द्रोऽहमादित्याभो मयाप्यसौ । नारको बोधितो गत्वा विभीषणचरस्ततः ॥११४॥
जम्बूद्वीपविदेहे यो विषयो गन्धमालिनी । तत्र रौप्यगिरौ[2] चारौ[3] चारुखेचरगोचरे[4] ॥११५॥
प्राणी श्रीधर्मणः पूर्वः श्रीदत्तायामजायत । श्रीदामनामधेयोऽसौ मया मेरौ प्रबोधितः ॥११६॥

और मरकर सातवें नरक गया ॥१०३॥ वहाँसे निकलकर इस असार संसारमें भटकता रहा। अब किसी पाप विशेषके कारण आपका हिंसाशील मदोन्मत्त हाथी हुआ है ॥१०४॥ मुनिराजके दर्शनका योग पाकर यह जाति-स्मरणको प्राप्त हुआ है और इसीलिए संसारसे मन्दरुचि हो अपने कार्यकी निन्दा करता हुआ शान्त हो गया है ॥१०५॥ वज्रदत्त मुनिराजके उक्त वचन सुनकर वह मेघनिनाद हाथी और राजा रत्नायुध दोनों ही मिथ्यात्व रूपी कलंकको छोड़ श्रावकके व्रतसे युक्त हो गये ॥१०६॥ श्रीभूति पुरोहितका जीव, जो अजगर पर्यायसे पङ्कप्रभा पृथिवीमें गया था वह वहाँसे निकलकर भंगी और दारुण नामक भील भीलनीके नाम और कार्य दोनोंसे ही अतिदारुण पुत्र हुआ। भावार्थ—उस पुत्रका नाम अतिदारुण था और उसका काम भी अति दारुण—अत्यन्त कठोर था ॥१०७॥ एक दिन राजा सिंहसेनके जीव वज्रायुध महामुनि प्रियङ्गुखण्ड नामक वनमें ध्यानारूढ़ थे कि उस अतिदारुण भीलने उन्हें मार डाला। महामुनि मरकर सर्वार्थसिद्धि गये और वह अतिदारुण भील मरकर महातमःप्रभा नामक सातवीं पृथिवीमें गया जहाँ मुनिवधसे उत्पन्न घोर दुःख उसे भोगना पड़ा ॥१०८–१०९॥ रत्नमाला, मर कर श्रावक धर्मके प्रभावसे अच्युत स्वर्गमें देव हुई तथा रत्नायुध भी उसी स्वर्गमें उत्तम देव हुआ ॥११०॥ धातकीखण्ड द्वीपमें पूर्व मेरुके पश्चिम विदेहमें एक गन्धिला नामका देश है। उसकी अयोध्या नगरीमें राजा अर्हद्दास राज्य करते थे। उनकी सुव्रता और जिनदत्ता नामकी दो रानियाँ थीं। रत्नमाला और रत्नायुधके जीव जो अच्युत स्वर्गमें देव हुए थे वहाँसे च्युत हो उन्हीं दोनों रानियोंके क्रमसे वीतभय नामक बलभद्र और विभीषण नामक नारायण हुए ॥१११–११२॥ इनमें विभीषण तो आयुका अन्त होनेपर रत्नप्रभा नामक पहली पृथिवीमें उत्पन्न हुआ और वीतभय अनिवृत्ति मुनिके समीप तप कर आदित्याभ नामका लान्तवेन्द्र हुआ। वह लान्तवेन्द्र मैं ही हूँ। मैंने रत्नप्रभा पृथिवीमें जाकर विभीषणके जीव नारकीको अच्छी तरह समझाया ॥११३–११४॥ तदनन्तर इसी जम्बू द्वीपके विदेह क्षेत्रमें जो गन्धमालिनी नामका देश है उसमें विद्याधरोंके मनोहर-मनोहर निवासोंसे युक्त एक अतिशय सुन्दर विजयार्ध पर्वत है। उसी विजयार्धपर श्रीधर्म राजा और श्रीदत्ता नामकी रानी रहती थी। विभीषणका जीव नारकी, नरकसे निकलकर इन्हीं दोनोंके श्रीदाम नामका पुत्र हुआ। यह श्रीदाम मुझे एक बार सुमेरु

१. अगच्छत्। २. विजयार्धपर्वते। ३. सुन्दरे। ४. गोचरः म०, ग०।

अनन्तमतिसंज्ञस्य गुरोः कृत्वातिशिष्यताम् । स चन्द्राभविमानेन्द्रो ब्रह्मलोकेऽभवत्सुरः ॥११७॥
व्याधपूर्वोऽपि सप्तम्या निःसृत्य भुजगोऽभवत् । रत्नप्रभां प्रविश्यैत्य भ्रान्त्वा तिर्यक्षु दुःखभाक् ॥११८॥
स भूतरमणाटव्यामैरावत्यास्तटेऽभवत् । तोकं कनककेश्यां तु तापसस्य खमालिनः ॥११९॥
स पञ्चाग्नितपः कुर्वन् मृगशृङ्गो मृगोपमः । चन्द्राभं खेचरं दृष्ट्वा खे चरन्तं यदृच्छया ॥१२०॥
निदानी वज्रदंष्ट्रस्य विद्युद्दंष्ट्रोऽयमात्मजः । जातो विद्युत्प्रभागर्भे विद्याविद्योतितोद्यमः ॥१२१॥
वज्रायुधचर[2]श्च्युत्वा जातः सर्वार्थसिद्धितः । संजयन्तः फणीन्द्रस्त्वं जयन्तो ब्रह्मलोकतः ॥१२२॥
एकजन्मापकारेण बहुजन्मसु वैरधीः । अवधीत् सिंहसेनं तं श्रीभूतिचरजीवकः ॥१२३॥
घ्नतोऽस्य घनवैरेण कोपनिघ्नस्य को गुणः । जातः प्रत्युत जातोऽयं सौख्यविघ्नकृदात्मनः ॥१२४॥
उपलभ्य मतं जैनं गजो जन्मनि पञ्चमे । निर्वैरो निर्वृतोऽहिस्त्वं संसरस्येष वैरभाक् ॥१२५॥
वैरबन्धमिति ज्ञात्वा घोरसंसारवर्धनम् । धरणेन्द्र ! विमुञ्च त्वं तथा मिथ्यात्वमप्यरम् ॥१२६॥
इत्यादित्याभदेवेन धरणेन्द्रः प्रबोधितः । मुक्तवैरः स सम्यक्त्वं जग्राह भवतारणम् ॥१२७॥
ततः खण्डितविद्यास्ते छिन्नपक्षाः खगा यथा । खिन्नोद्यमास्तदेत्युक्ता धरणेन्द्रेण खेचराः ॥१२८॥
प्रतिमां व्योमगाः सर्वे संजयन्तस्य पावनीम् । शैले स्थापयतात्राशु पञ्चचापशतोच्छ्रयाम् ॥१२९॥

पर्वतपर मिला तो वहाँ भी मैंने उसे समझाया ॥११५-११६॥ जिससे अनन्तमति गुरुका शिष्य बनकर वह ब्रह्मलोक स्वर्गमें चन्द्राभ विमानका स्वामी देव हुआ है ॥११७॥ श्रीभूतिका जीव जो पहले भील था सातवीं पृथिवीसे निकलकर सर्प हुआ। फिर रत्नप्रभा नामक पहिली पृथिवीमें गया, वहाँसे निकल कर तिर्यञ्चोंमें भ्रमण कर दुःख भोगता रहा ॥११८॥

तदनन्तर भूतरमण नामक अटवीमें ऐरावती नदीके किनारे खमाली नामक तापसकी कनककेशी स्त्रीसे पुत्र उत्पन्न हुआ ॥११९॥ वह मृगके समान था तथा मृगशृङ्ग उसका नाम था। एक बार वह पञ्चाग्नि तप तप रहा था कि उसकी दृष्टि स्वेच्छासे आकाशमें विचरण करते हुए चन्द्राभ नामक विद्याधरपर पड़ी। विद्याधरको देखकर उसने विद्याधर होनेका निदान किया और उसके फलस्वरूप वह राजा वज्रदंष्ट्रकी विद्युत्प्रभा रानीके गर्भसे, जिसका उद्यम विद्याओंसे प्रकाशमान है ऐसा यह विद्युद्दंष्ट्र नामका पुत्र हुआ है ॥१२०-१२१॥ वज्रायुधका जीव सर्वार्थसिद्धिसे च्युत होकर संजयन्त हुआ है और ब्रह्मलोकसे चलकर जयन्तका जीव तू धरणेन्द्र हुआ है ॥१२२॥ देखो वैरकी महिमा, राजा सिंहसेनने श्रीभूति पुरोहितका एक जन्ममें अपकार किया था पर उसी अपकारसे वैर बाँधकर श्रीभूतिके जीवने अनेक जन्मोंमें सिंहसेनका वध किया ॥१२३॥ तीव्र वैरसे क्रोधके वशीभूत हो श्रीभूतिके जीवने सिंहसेनका अनेक बार घात किया अवश्य पर उससे उसे क्या लाभ हुआ ? प्रत्युत उसका यह कार्य अपने ही सुखको नष्ट करनेवाला हुआ ॥१२४॥ सिंहसेनका जीव तो जब हाथी था तभी जैनधर्म प्राप्तकर वैर रहित हो गया था और उसके फलस्वरूप पाँचवें भवमें संजयन्त पर्यायसे मोक्ष चला गया है पर तू नागेन्द्र होकर भी वैरको धारणकर संसारमें परिभ्रमण कर रहा है ॥१२५॥ हे धरणेन्द्र ! इस प्रकार वैर भावको घोर संसारका वर्धक जानकर तू छोड़ दे और सबका मूल जो मिथ्यादर्शन है उसका भी शीघ्र त्याग कर दे ॥१२६॥ इस प्रकार आदित्याभ देवके द्वारा प्रबोधको प्राप्त हुए धरणेन्द्रने सब वैर-भाव छोड़कर संसारसागरसे पार करनेवाला सम्यग्दर्शन धारण कर लिया ॥१२७॥

तदनन्तर विद्याओंके खण्डित हो जानेसे जो पङ्ख कटे पक्षियोंके समान खेद खिन्न हो रहे थे ऐसे उन विद्याधरोंसे धरणेन्द्रने कहा कि हे समस्त विद्याधरो ! तुम सब शीघ्र ही इस पर्वतपर

---

१. पुत्रः। 'पुत्रः सूनुरपत्यं च तुक्तोकं चात्मजः प्रजा' इत्यमरः। २. भूतपूर्वो वज्रायुध इति वज्रायुधचरः।

तस्याश्चरणमूले वः पुरश्चरणकारिणाम् । कालेन महता क्लेशाद्विद्याः सिद्ध्यन्तु नान्यथा ॥१३०॥
इतः प्रभृति च स्त्रीणां विद्युद्दंष्ट्रस्य सन्ततौ । प्रज्ञप्तिरोहिणीगौर्यः सिध्यन्तु न नृणां तु ताः ॥१३१॥
इत्युक्तमनुमन्यैते खगाः प्रणतिपूर्वकम् । विद्याः स्वा लेभिरे भूयो यथास्वं च ययुः सुराः ॥१३२॥
खेचराः स्थापयाञ्चक्रुस्तां यतेः प्रतियातनाम् । नानोपकरणां तत्र हेमरत्नमयीं गिरौ ॥१३३॥
हृतविद्या यतस्तत्र ह्रीमन्तस्तस्थुरानताः । विद्याधरास्ततः शैलं ह्रीमन्तं तं जना जगुः ॥१३४॥
भूभृतो रत्नवीर्यस्य मथुरायां पृथुश्रियः । स मेरुर्मेघमालायां लान्तवेन्द्रोऽभवत्सुतः ॥१३५॥
अमितप्रभया तस्य प्रिययाऽलाभि भूपतेः । धरणेन्द्रचरः पुत्रो मन्दरश्चन्द्रसुन्दरः ॥१३६॥
युवानौ तौ ततो भुक्त्वा कामभोगान् यथेप्सितान् । श्रेयसो जिनचन्द्रस्य शिष्यतामुपजग्मतुः ॥१३७॥
स मेरुर्मेरुनिष्कम्पः प्राप्य केवलसम्पदम् । निर्ववौ तु गणेन्द्रत्वं मन्दरो मन्दरोपमः ॥१३८॥

रथोद्धतावृत्तम्

सञ्जयन्तचरितं जगत्त्रये सुप्रसिद्धमतिभक्तिभावतः ।
सम्भवन्तु भुवि भव्यजन्तवः संस्मरन्तु जिनतां यियासवः[1] ॥१३९॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ सञ्जयन्तपुराणवर्णनो नाम सप्तविंशः सर्गः ॥२७॥

संजयन्त स्वामीकी पाँच सौ धनुष ऊँची पवित्र प्रतिमा स्थापित करो। उसी प्रतिमाके पादमूलमें उनकी सेवा करते हुए तुम लोगोंको बहुत समय बाद बड़े कष्टसे विद्याएँ सिद्ध होंगी अन्य प्रकार-से नहीं ॥१२८-१३०॥ आजसे विद्युद्दंष्ट्रके वंशमें केवल स्त्रियोंको ही प्रज्ञप्ति, रोहिणी और गौरी नामकी विद्याएँ सिद्ध हो सकेंगी पुरुषोंको नहीं ॥१३१॥ इस प्रकार धरणेन्द्रकी आज्ञाको विद्याधरोंने नमस्कार पूर्वक स्वीकार किया तथा यथायोग्य विधिसे अपनी विद्याएँ पुनः प्राप्त कीं। यह सब होनेके बाद देव यथास्थान चले गये ॥१३२॥ विद्याधरोंने धरणेन्द्रकी आज्ञानुसार उस पर्वतपर नाना उपकरणोंसे युक्त एवं सुवर्ण और रत्नोंसे निर्मित संजयन्त स्वामीकी प्रतिमा स्थापित कराई ॥१३३॥ विद्याओंके हरे जानेसे लज्जित हो नीचा मस्तक किये हुए विद्याधर चूँकि उस पर्वतपर बैठे थे इसलिए लोग उस पर्वतको ह्रीमन्त कहने लगे ॥१३४॥ मथुरामें विशाल लक्ष्मीका धारक रत्नवीर्य नामका राजा रहता था। उसकी मेघमाला नामकी स्त्री थी, आदित्याभ नामका लान्तवेन्द्र उन्हीं दोनोंके मेरु नामका पुत्र हुआ ॥१३५॥ उसी राजा रत्नवीर्यकी दूसरी स्त्री अमितप्रभा थी, उसके धरणेन्द्रका जीव चन्द्रमाके समान सुन्दर मन्दर नामका पुत्र हुआ ॥१३६॥

तदनन्तर युवा होनेपर दोनोंने इच्छानुसार कामभोगोंका उपभोग किया और उसके बाद दोनों ही, श्री श्रेयांसनाथ जिनेन्द्रके शिष्य हो गये—दीक्षा लेकर मुनि हो गये ॥१३७॥ उनमें मेरु पर्वतके समान निष्कम्प मेरु मुनिराज केवलज्ञानरूपी सम्पत्तिको प्राप्त कर मोक्ष चले गये और मन्दरगिरिकी उपमाको धारण करनेवाले मन्दर मुनिराज श्रेयान्सनाथ भगवान्के गणधर हो गये ॥१३८॥ गौतम स्वामी कहते हैं कि इस पृथिवीपर जो भव्य जीव तीर्थंकर पद प्राप्त करना चाहते हैं वे तीनों लोकोंमें अतिशय प्रसिद्ध संजयन्त स्वामीके इस चरितका उत्कट भक्ति भावसे आदर करें तथा उसीका अच्छी तरह स्मरण करें ॥१३९॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें संजयन्त पुराणका वर्णन करनेवाला सत्ताईसवाँ सर्ग समाप्त हुआ ॥२७॥

---

१. यातुमिच्छवः ।

अष्टाविंशः सर्गः

अतः परं [1] परं शौरेः शृणु श्रेणिक ! चेष्टितम् । वेगवत्या वियुक्तस्य पुण्यपौरुषयोगिनः ॥१॥
पर्यटन्नटवीं वीरस्तापसाश्रममश्रमः । प्रविष्टोऽपश्यदाविष्टविकथान् [2] तत्र तापसान् ॥२॥
राजयुद्धकथासक्ताः यूयं किमिति तापसाः । तापसास्तपसा युक्तास्तपो वाक्संयमादिकम् ॥३॥
इति पृष्टा जगुस्ते तं विशिष्टजनवत्सलाः । नवप्रव्रजिता वृत्तिं मौनीं विद्मो वयं न भोः ॥४॥
श्रावस्त्यामस्ति विस्तीर्णयशस्तीर्णमहार्णवः । एणीपुत्र इति ख्यातो क्षोणीपतिरक्षीणपौरुषः ॥५॥
प्रियङ्गुसुन्दरी तस्य दुहिता लोकसुन्दरी । तस्याः स्वयंवरार्थं तु तेनाहूता वयं नृपाः ॥६॥
केनापि हेतुना कोऽपि न वृतो वृतया श्रिया । कन्यया वन्यहस्तिन्या वन्येतरगजो यथा ॥७॥
भूपाः सम्भूय भूयांसो विलक्षा लोभलक्षिताः । कन्यापित्रा ततः सत्रा सद्यो योद्धुं समुद्यताः ॥८॥
तेन भोः क्षुभितान्याशु सहस्राणि महीभुजाम् । सङ्कोचितानि सङ्ग्रामे नेत्राणि रविणा यथा ॥९॥
तुङ्गाभिमानिनः केचिद् भङ्गाङ्गी [3] करणाक्षमाः । रणाङ्गणगता भूपाः प्राणान् सद्यो हि तत्यजुः ॥१०॥
विभ्येऽप्यश्वरवात्तस्मात्सहस्रकरतो वयम् । ध्वान्तौघा इव भीता भोः प्रविष्टा गह्वरं वनम् ॥११॥
कुरु धर्मोपदेशं भो धर्मतत्त्वमजानताम् । त्वं वचोभिरलं मृष्टैर्दृष्टतत्त्वोऽभिलष्यसे ॥१२॥

अथानन्तर गौतम स्वामी कहते हैं कि हे श्रेणिक ! अब तुम वेगवतीसे रहित तथा पुण्य और पुरुषार्थके समागमको प्राप्त वसुदेवका आगेका चरित सुनो ॥१॥ एक दिन बिना किसी थकावटके अटवीमें भ्रमण करते हुए वीर वसुदेवने तपस्वियोंके आश्रममें प्रवेश किया और वहाँ विकथा करते हुए तापसोंको देखा ॥२॥ कुमारने उनसे कहा—अये तापसो ! आप लोग इस तरह राज-कथा और युद्ध-कथामें आसक्त क्यों हैं ? क्योंकि तापस वे कहलाते हैं जो तपसे युक्त हों और तप वह कहलाता है जिसमें वचन संयम आदिका पालन किया जाय अर्थात् वचनोंको वशमें किया जाय ॥३॥ इस प्रकार कहनेपर विशिष्ट आगन्तुकसे स्नेह रखनेवाले उन तपस्वियोंने कहा कि हम लोग अभी नवीन ही दीक्षित हुए हैं। इसलिए मुनियोंकी वृत्तिको जानते नहीं हैं ॥४॥ इसी श्रावस्ती नगरीमें विस्तृत यशसे समुद्रको पार करनेवाला एवं अखण्ड पौरुषका धारक एक एणीपुत्र नामका राजा है ॥५॥ उसकी लोकमें अद्वितीय सुन्दरी प्रियङ्गुसुन्दरी नामकी कन्या है। उसके स्वयंवरके लिए एणीपुत्रने हम सब राजाओंको बुलाया था ॥६॥ परन्तु किसी कारणवश, जिस प्रकार वनकी हस्तिनी वनके सिवाय किसी दूसरे हस्तीको नहीं वरती है उसी प्रकार उस शोभासम्पन्न कन्याने किसीको नहीं वरा ॥७॥ तदनन्तर जो कन्याके लोभसे युक्त थे, परन्तु उसके प्राप्त न होनेसे मन-ही-मन लज्जित हो रहे थे, ऐसे बहुतसे राजा मिलकर कन्याके पिताके साथ शीघ्र ही युद्ध करनेको तैयार हो गये ॥८॥ परन्तु जिस प्रकार एक ही सूर्य हजारों नेत्रोंको अकेला ही संकोचित कर देता है उसी प्रकार उस अकेले एणीपुत्रने हजारों राजाओंको शीघ्र ही क्षुभित कर संकोचित कर दिया ॥९॥ उत्कट अभिमानसे भरे कितने ही राजाओंने जो पराजयको स्वीकृत करनेमें समर्थ नहीं थे, युद्धके मैदानमें जाकर शीघ्र ही प्राण त्याग दिये ॥१०॥ जिस प्रकार सूर्यसे डरकर अन्धकारके समूह सघन वनमें जा घुसते हैं उसी प्रकार हम सब भी घोड़ोंकी हिनहिनाहटसे युक्त युद्धसे डरकर इस सघन वनमें आ घुसे हैं ॥११॥ भो महाशय ! हम लोग धर्मका कुछ भी तत्त्व नहीं जानते। इसलिए आप हम लोगोंको धर्मका उपदेश दीजिए।

---

१. श्रेष्ठम् । २. -दाविष्टदिग्वासांस्तत्र क०, ग०, घ०, ङ० । ३. रणाङ्गीकरणक्षमाः क०, भङ्गाङ्गीकरणक्षमाः म० ।

पृष्टस्तथा तथा शौरिस्तेषां धर्मं द्विधाऽभ्यधात् । यतिश्रावकभेदज्ञाः श्रामण्यं ते यथा ययुः ॥१३॥
प्रियङ्गुसुन्दरीलाभलोभेन यदुनन्दनः । श्रावस्तीं वस्तुविस्तारविश्रुतां तामशिश्रियत् ॥१४॥
बाह्योद्याने च तत्रासौ कामदेवगृहेऽग्रतः । त्रिपादं कृत्रिमं हैमं महामहिषमैक्षत ॥१५॥
पप्रच्छ विप्रमेकं भो किमेष महिषस्त्रिपाद् । निर्मितो रत्ननिर्माणो भाव्यमत्र हि हेतुना ॥१६॥
स प्राहैवमिहैवाभूत्पुर्यां भूपतिरार्यकः । इक्ष्वाकुर्जितशत्रुस्तत्पुत्रश्चापि मृगध्वजः ॥१७॥
श्रेष्ठी तु कामदत्तोऽत्र गोष्ठं द्रष्टुं गतोऽन्यदा । पपात पादयोस्तस्य कृपणो महिषोऽल्पकः ॥१८॥
ततश्चाश्चर्यकृत् कार्यं यथास्वं स्वामिनाऽमुना । [1]पिण्डारो दण्डकस्तत्र पृष्टः कारणमब्रवीत् ॥१९॥
उत्पन्नदिन एवास्योपरि करुणा मेऽभवत् । [2]वने दृष्ट्वा मुनिं नत्वा पृष्टवान् तमहं पुनः ॥२०॥
अस्योपरि किमर्थं मे करुणा महती मुने । स बभाण मुनिर्ज्ञानी शृणु गोपाल ! निश्चितम् ॥२१॥
एकस्यामेव चामुष्यां महिष्यामेष जातवान् । पञ्चकृत्वो वराकस्तु जातो जातो हतस्त्वया ॥२२॥
वारे षष्ठे तु तज्जिह्वकनिष्ठस्य तवैषकः[3] । सहसोत्थाय सन्त्रस्तः पादयोः पतितः शिशुः ॥२३॥
कृपया स मयाऽत्रायं पुत्रवत्परिपालितः । जीवितार्थी तवेदानीं पतितः पादयोरिह ॥२४॥
श्रुत्वैवं कृपया तेन समानीतः पुरीमसौ । अभयं राजलोकेभ्यो लब्ध्वाऽवर्द्धिष्ट भद्रकः ॥२५॥

आपके मधुर वचनोंसे पता चलता है कि आपने धर्मका तत्त्व अच्छी तरह देखा है ॥१२॥ इस प्रकार उन सबके पूछनेपर वसुदेवने उन्हें श्रावक और मुनिके भेदसे दोनों प्रकारका धर्म बतलाया जिससे वे मुनि और श्रावकके भेदको अच्छी तरह जानकर यथार्थ साधु अवस्थाको प्राप्त हुए ॥१३॥

तदनन्तर प्रियंगुसुन्दरीके लाभके लोभसे प्रेरित हो कुमार वसुदेवने, वस्तुओंके विस्तारसे प्रसिद्ध उस श्रावस्ती नगरीमें प्रवेश किया ॥१४॥ वहाँ उन्होंने बाह्य उद्यानमें कामदेवके मन्दिरके आगे निर्मित तीन पाँवका एक बड़ा भारी सुवर्णमय भैसा देखा ॥१५॥ उसे देखकर उन्होंने एक ब्राह्मणसे पूछा कि हे महानुभाव ! यहाँ यह रत्नमयी तीन पाँवोंका भैंसा किसलिए बनाया गया है ? इसका कुछ कारण अवश्य होना चाहिए ॥१६॥ ब्राह्मणने कहा कि इस नगरमें पहले शत्रुओं-को जीतनेवाला एक इक्ष्वाकुवंशीय जितशत्रु नामका उत्तम राजा था और उसका मृगध्वज नामक पुत्र था ॥१७॥ इसी नगरमें एक कामदत्त नामका सेठ रहता था। वह एक समय गोशाला देखनेके लिए गया तो वहाँ एक दीन-हीन छोटा-सा भैंसा उसके चरणोंपर आ गिरा ॥१८॥ उसका यह आश्चर्यजनक कार्य देख सेठने गोशालाके अधिकारी पिण्डार नामक गोपालसे इसका कारण पूछा ॥१९॥ गोपालने कहा कि जिस दिन यह उत्पन्न हुआ था उसी दिनसे इसपर मुझे बहुत दया उत्पन्न हुई थी इसलिए मैंने वनमें विराजमान मुनिराजके दर्शन कर नमस्कार पूर्वक उनसे इसके विषयमें पूछा था ॥२०॥ कि हे मुनिनाथ ! इसके ऊपर मेरे हृदयमें बहुत भारी दया क्यों उत्पन्न हुई है ? इसके उत्तरमें ज्ञानी मुनिराजने कहा था कि हे गोपाल ! सुन, मैं इसका कारण कहता हूँ ॥२१॥ यह बेचारा इसी एक भैंसके पाँच बार उत्पन्न हुआ और उत्पन्न होते ही तू ने इसे मार डाला ॥२२॥ अब छठवीं बार भी उसी भैंसके उत्पन्न हुआ है, अबकी बार इसे जाति स्मरण हुआ है इसलिए भयभीत हो सहसा उठकर तेरे पैरोंपर आ गिरा था। छोटे बच्चोंका संरक्षण भी तो तेरे ही आधीन था ॥२३॥

मुनिराजके उक्त वचन सुनकर मैंने यहाँ पुत्रवत् इसका पालन किया है। अब जीवित रहनेकी इच्छासे यह यहाँ आपके चरणोंमें भी गिरा है ॥२४॥ गोपालके वचन सुनकर वह सेठ दयापूर्वक उस भैंसके बच्चेको अपने साथ नगर ले गया और राज-कर्मचारियोंसे उसे अभय

१. पेण्डारो म० । २. वनं म० । ३. ममैषकः म० ।

अन्यदाऽन्यभवोपात्तवैरबन्धानुबन्धतः । पादं चकर्त चक्रेण महिषस्य मृगध्वजः ॥२६॥
राज्ञा विज्ञाय [1]चाज्ञप्ते मृगध्वजवधे रुषा । कृपना मन्त्रिणा नीत्वाऽरण्ये श्रामण्यमापितः ॥२७॥
भद्रके भद्रभावेन मृते चाष्टादशेऽहनि । द्वाविंशे केवली जातः शुद्धध्यानान्मृगध्वजः ॥२८॥
चतुर्णिकायदेवैः स मर्त्यैश्च कृतपूजनः । संपृष्टो वैरसम्बन्धः पित्रा तु जितशत्रुणा ॥२९॥
मृगध्वजमुनिः प्राह देवदानवमानवैः । कथाक[2]र्णनसन्तुष्टचित्तकर्णपुटैर्वृतः ॥३०॥
प्रतिशत्रुस्त्रिपिष्टस्य प्रोऽभूदलकापुरे । अश्वग्रीव इति ख्यातो विद्याधरमहेश्वरः ॥३१॥
सचिवस्तस्य निस्तीर्णतर्कमार्गमहार्णवः । [3]हरिश्मश्रुवदस्पृश्यो हरिश्मश्रु इति श्रुतः ॥३२॥
नास्तिकैकान्तवादी स प्रत्यक्षैकप्रमाणकः । प्रत्यक्षानुपलभ्यं यत्तन्नास्तीत्यभ्युपेतवान् ॥३३॥
चतुर्भूतसमूहेऽस्मिन् किण्वादौ मदशक्तिवत् । चैतन्यशक्तिरत्यन्तमसत्येव भवत्यसौ ॥३४॥
आत्मेति व्यवहारोऽत्र लोकस्य न विरुध्यते । न भूतव्यतिरिक्तोऽस्ति संसार्यनुपलब्धितः ॥३५॥
पुण्यापुण्यविधाता यो भोक्ता च सुखदुःखयोः । [4]दृष्टो ज्ञैस्तस्य वा दृष्टेरभावात् पारलौकिकः ॥३६॥
नारकस्वर्गतिर्यक्त्वविकल्पोऽत्र विकल्पितः । भोगाधिष्ठात्रधिष्ठानः परलोको न विद्यते ॥३७॥

दिखाकर उसका भद्रक नाम रख दिया। भद्रक दिन-प्रति-दिन बड़ा होने लगा ॥२५॥ किसी समय राजपुत्र मृगध्वजने अन्यभव सम्बन्धी वैरके संस्कारसे चक्रके द्वारा उस भैंसेका एक पाँव काट डाला ॥२६॥ राजाको जब इस बातका पता चला तो उसने क्रोधमें आकर मृगध्वजको मारनेका आदेश दे दिया। मन्त्री बुद्धिमान् था इसलिए उसने मृगध्वजको मारा तो नहीं किन्तु किसी छलसे वनमें ले जाकर उसे मुनि दीक्षा दिला दी ॥२७॥ भद्रक शुभ परिणामोंसे अठारहवें दिन मर गया और बाईसवें दिन निर्मल ध्यानके प्रभावसे मृगध्वज मुनि केवलज्ञानी हो गये ॥२८॥ चारों निकायके देव तथा मनुष्योंने आकर मृगध्वज केवलीकी पूजा की। तदनन्तर पिता जितशत्रुने मृगध्वज केवलीसे मृगध्वज तथा भैंसेके वैरका सम्बन्ध पूछा ॥२९॥ तदनन्तर कथाके सुननेसे जिनके चित्त तथा हृदय प्रसन्न हो रहे थे ऐसे देव, दानव और मानवोंसे घिरे मृगध्वज मुनि इस प्रकार कहने लगे ॥३०॥

किसी समय अलका नगरीमें प्रथम नारायण त्रिपिष्टका प्रतिशत्रु—प्रतिनारायण, अश्वग्रीव नामसे प्रसिद्ध विद्याधरोंका राजा रहता था ॥३१॥ उसका हरिश्मश्रु नामका एक मन्त्री था जिसने तर्कशास्त्र रूपी महासागरको पार कर लिया था और सिंहकी मूँछके समान जिसका स्पर्श करना कठिन था ॥३२॥ हरिश्मश्रु एकान्तवादी नास्तिक तथा सिर्फ प्रत्यक्षको प्रमाण माननेवाला था इसलिए जो वस्तु प्रत्यक्ष नहीं दिखती थी उसे वह 'है ही नहीं' ऐसा मानता था ॥३३॥ उसका कहना था कि जिस प्रकार आटा आदिमें मद शक्ति पहले नहीं थी किन्तु विभिन्न वस्तुओंका संयोग होनेपर नवीन ही उत्पन्न हो जाती है उसी प्रकार पृथिवी आदि चार भूतोंके समूह स्वरूप इस शरीरमें जो पहले बिलकुल ही नहीं थी ऐसी नवीन ही चैतन्य शक्ति उत्पन्न हो जाती है ॥३४॥ इसी चैतन्य शक्तिमें 'यह आत्मा है' ऐसा लोगोंका व्यवहार विरुद्ध नहीं होता अर्थात् उस चैतन्य शक्तिको लोग आत्मा कहते रहें इसमें कोई विरोधकी बात नहीं है। यथार्थमें पृथिव्यादि भूतोंसे अतिरिक्त कोई संसारी आत्मा नहीं है क्योंकि उसकी उपलब्धि नहीं होती ॥३५॥ पुण्य-पापका कर्ता, सुख-दुःखका भोक्ता और परलोकमें जानेवाला जो अज्ञानी जनोंने मान रक्खा है वह नहीं है क्योंकि वह दिखाई नहीं पड़ता ॥३६॥ भोगोंके अधिष्ठाता-आत्माके रहनेका आधार, तथा नरक देव और तिर्यञ्चोंके भेदसे युक्त जिस परलोककी कल्पना

---

१. चाज्ञप्तैर्मृग- म० । २. वर्णन म० । ३. सिंहश्मश्रुवत् । ४. इष्टाज्ञैः म० ।

ज्ञानवृत्तिविशेषस्य शक्यो यश्च विनिश्चितः । मोक्षो मोक्तुरभावात्स न युक्तो निःप्रमाणकः ॥३८॥
भूतसंश्लेषजातस्य भूतविश्लेषनाशिनः । सुखिनश्चिद्विशेषस्य संयमो भोगनाशनः ॥३९॥
इत्येकान्तकुतर्केण रञ्जितः सचिवः स च । आगमानुमितिज्ञेय[1]जीवाद्यर्थात् परोङ्मुखः ॥४०॥
परलोककथापोढदुःकथामूढमानसः । [2]कामभोगैकनिष्ठोऽभूत्कनिष्ठो धर्मदूषकः ॥४१॥
नास्तिकस्य तथा तस्य प्रेत्य[3]भावापलापिनः । तीर्थकृच्चक्रवर्त्यादिमहापुरुषदूषिणः ॥४२॥
हरिश्मश्रोर्दुराहस्य हरिकण्ठोऽपि[4] नास्तिकः । धर्मकुण्ठोऽपि भावेन नित्याविष्टोऽवतिष्ठते ॥४३॥
अश्वग्रीवो हतो युद्धे त्रिपिष्टेन तमस्तमः । विजयेन हरिश्मश्रुः प्राविशन्नरकं ततः ॥४४॥
चिरं संसृत्य जातोऽहं हयग्रीवो मृगध्वजः । हरिश्मश्रुः पुना राजन् भद्रको महिषोऽधुना ॥४५॥
पूर्वकोपानुबन्धेन मयैव महिषो हतः । अकामनिर्जरातोऽभूल्लोहिताख्यो[5] महासुरः ॥४६॥
आगतो वन्दनाभक्त्या देवभूत्याऽधुना युतः । आस्तेऽयमत्र जातेन मित्रभावेन भावितः ॥४७॥
क्रोधानुबन्धमित्येकं सत्त्वान्धीकरणक्षमम् । विनियम्य महाराज ! शाम्यन्तु शिवकांक्षिणः ॥४८॥
राजाद्याः प्राव्रजन् श्रुत्वा प्रशान्तो महिषासुरः । निःशल्यो लौल्यमुज्झित्वा रराज सदभाजनः ॥४९॥
[6]गताः केवलिनं नत्वा ससुरासुरमानवाः । यथास्वं स्थानमन्ये च सिद्धस्थानं मृगध्वजः ॥५०॥

अज्ञानी जनोंने कर रखी है वह नहीं है ॥३७॥ विशिष्ट ज्ञानवान् मनुष्योंको ही जिसकी प्राप्ति शक्य एवं सुनिश्चित की गई है ऐसा मोक्ष मानना भी निष्प्रमाण है क्योंकि जब मुक्त होनेवाला आत्मा ही नहीं है तब मोक्षका मानना उचित कैसे हो सकता है ? ॥३८॥ जो भूतोंके संयोगसे उत्पन्न होता है और भूतोंके वियोगसे नष्ट हो जाता है ऐसे सुखके उपभोक्ता चेतनके लिए संयम धारण करना भोगोंको नष्ट करना है ॥३९॥ इस प्रकार जो एकान्त मत रूपी कुतर्कोंसे रँगा हुआ था, आगम तथा अनुमान प्रमाणके द्वारा ज्ञेय जीवादि पदार्थोंसे सदा पराङ्मुख रहता था, परलोक सम्बन्धी कथाओंसे रहित दुष्ट कथाओंमें ही जिसका मन मूढ रहता था और जो धर्मकी निन्दा करता रहता था ऐसा वह क्षुद्र मन्त्री निरन्तर काम भोगोंमें ही आसक्त रहता था ॥४०-४१॥ नास्तिक, परलोकके अपलापी, तीर्थंकर तथा चक्रवर्ती आदि महापुरुषोंको दोष लगानेवाले और खोटी चेष्टासे युक्त हरिश्मश्रु मन्त्रीके संसर्गसे अश्वग्रीव भी नास्तिक बन गया जिससे वह भी धर्मसे विमुख एवं भवों द्वारा पिशाचादिसे निरन्तर आक्रान्त हुएके समान रहने लगा ॥४२-४३॥ तदनन्तर किसी समय युद्धमें अश्वग्रीवको त्रिपिष्ट नारायणने और हरिश्मश्रुको विजय बलभद्रने मार गिराया जिससे वे दोनों ही मरकर तमस्तमः नामक सातवें नरक गये ॥४४॥ हे राजन् ! चिर काल तक अनेक योनियोंमें भ्रमण कर अश्वग्रीवका जीव तो मैं मृगध्वज हुआ हूँ और हरिश्मश्रुका जीव इस समय भद्रक नामका भैंसा हुआ है ॥४५॥ पूर्व क्रोधके संस्कारसे मैंने ही उस भैंसेको मारा था और अकाम निर्जराके प्रभावसे वह लोहित नामका असुर हुआ है ॥४६॥ वह लोहितासुर इस समय वन्दनाकी भक्तिसे यहाँ आया है और देवोंकी विभूतिसे युक्त हो मित्र भावसे यहीं बैठा है ॥४७॥ हे महाराज ! यह क्रोधका संस्कार प्राणीको अन्धा बना देनेमें समर्थ है इसलिए जो मोक्षकी इच्छा रखते हैं वे इसे रोककर शान्त हों ॥४८॥ मृगध्वज केवलीके मुखसे यह वृत्तान्त सुन जितशत्रुको आदि लेकर कितने ही राजाओंने दीक्षा ले ली । महिषासुर शान्त हो गया और सभाके लोग लोलुपता छोड़, शल्य रहित हो सुशोभित होने लगे ॥४९॥ तदनन्तर देव-दानव और केवलीको नमस्कार कर यथायोग्य अपने-अपने स्थानपर चले गये और केवली मृगध्वज सिद्ध स्थानपर जा

१. ज्ञेयो जीवाद्यर्थात् म० । २. कामभोगैः कनिष्ठोऽभूत् म० । ३. प्रेत्याभावाप -म० । ४. अश्वग्रीवोऽपि । ५. लोहिताख्यो क० । ६. गत्वा म० ।

आर्यागीतिच्छन्दः

[1]महिषमृगध्वजवृत्तं यः सततं शुद्धवृत्तमनसि धत्ते ।
स भजति दृष्टिविशुद्धिं जिनदृष्टपदार्थगोचरां भव्यजनः ॥५१॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ मृगध्वजमहिषोपाख्यानवर्णनो नाम अष्टाविंशः सर्गः ॥२८॥

विराजे ॥५०॥ गौतम स्वामी कहते हैं कि जो भव्य जीव इस महिषासुर और मृगध्वजके वृत्तान्तको सदा अपने शुद्ध हृदयमें धारण करता है वह जिनेन्द्र भगवान्‌के द्वारा इष्ट पदार्थोंको विषय करनेवाली दर्शनविशुद्धि—सम्यग्दर्शनकी निर्मलताको प्राप्त होता है ॥५१॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें मृगध्वज और महिषके चरितका वर्णन करनेवाला अट्ठाईसवाँ सर्ग समाप्त हुआ ॥२८॥

१. महिषध्वज म० ।

एकोनत्रिंशः सर्गः

कामदत्तो जिनागारपुरो लोकप्रवेशने । मृगध्वजस्य प्रतिमां स न्यधान्महिषस्य च ॥१॥
अत्रैव कामदेवस्य रतेश्च प्रतिमां न्यधात् । जिनागारे समस्तायाः प्रजायाः कौतुकाय सः ॥२॥
कामदेवरतिप्रेक्षाकौतुकेन जगज्जनाः । जिनायतनमागत्य प्रेक्ष्य तत्प्रतिमाद्वयम् ॥३॥
संविधानकमाकर्ण्य तद् भाद्रकमृगध्वजम् । बहवः प्रतिपद्यन्ते जिनधर्ममहर्दिवम् ॥४॥
प्रसिद्धं च गृहं जैनं कामदेवगृहाख्यया । कौतुकागतलोकस्य जातं जिनमताप्तये ॥५॥
व्यतिक्रान्तेषु बहुषु सञ्जातपुरुषेष्विह । कामदेवाभिधः श्रेष्ठी कामदत्तान्वयेऽधुना ॥६॥
रूपयौवनसम्पूर्णा पूर्णचन्द्रसमानना । कन्या बन्धुमती तस्य बन्धुलोकाभिनन्दिनी ॥७॥
आदिष्टः पितृपृष्टेन दैवज्ञेन[1] नरो वरः । तस्याः स्मरगृहद्वारमुद्घाट्य स्मरपूजनः ॥८॥
एवंविधवचः श्रुत्वा तद्गृहद्वारमेत्य सः । द्वात्रिंशदर्गलादुर्गमुद्घाट्य सहसाऽविशत् ॥९॥
ततोऽभ्यर्च्य जिनेन्द्रार्चाः सोऽर्चयत् सरतिस्मरम् । चैत्यार्चनार्थमेतेन कामदेवेन वीक्षितः ॥१०॥
तेन नैमित्तिकादेशसंवादमुदितात्मना । दत्ता बन्धुमती तस्मै बन्धुराभरबन्धुरा ॥११॥
कामदः कामदेवेन कामदेवस्य कामिनः । जामाता कामदेवाभः कोऽपि दत्त इतीदृशी ॥१२॥
वार्ता प्रादुरभूत्पुर्यामतस्तस्यामितोऽद्भुतः । राज्ञान्तःपुरपौरैश्च दृष्टः स्वैरमसौ ततः ॥१३॥

अथानन्तर सेठ कामदत्तने, जहाँ लोगोंका आना जाना अधिक था ऐसे स्थानपर नगरमें जिनमन्दिरके आगे मृगध्वज केवलीकी प्रतिमा और महिषकी मूर्ति स्थापित की ॥१॥ सेठने इसी मन्दिरमें समस्त प्रजाके कौतुकके लिए कामदेव और रतिकी भी मूर्ति बनवाई ॥२॥ कामदेव और रतिको देखनेके कौतूहलसे जगत्के लोग जिन-मन्दिरमें आते हैं और वहाँ स्थापित दोनों प्रतिमाओंको देखकर मृगध्वज केवली और महिषका वृत्तान्त सुनते हैं जिससे अनेकों पुरुष प्रतिदिन जिनधर्मको प्राप्त होते हैं ॥३-४॥ यह जिनमन्दिर कामदेवके मन्दिरके नामसे प्रसिद्ध और कौतुकवश आये हुए लोगोंको जिनधर्मकी प्राप्तिका कारण है ॥५॥ उसी कामदत्त सेठके वंशमें अनेक लोगोंके उत्पन्न हो चुकनेके बाद इस समय एक कामदेव नामका सेठ उत्पन्न हुआ है ॥६॥ उसकी रूप और यौवनसे पूर्ण, पूर्ण चन्द्रमाके समान मुखवाली तथा बन्धुजनोंको आनन्दित करनेवाली बन्धुमती नामकी एक कन्या है ॥७॥ पिताके पूछनेपर निमित्तज्ञानीने बताया था कि जो मनुष्य कामदेवके मन्दिरका दरवाजा खोलकर कामदेवकी पूजा करेगा वही इसका पति होगा ॥८॥

ब्राह्मणके इस प्रकारके वचन सुन वसुदेव कामदेवके मन्दिरके द्वारपर पहुँचे और बत्तीस अर्गलाओंसे दुर्गम उस द्वारको खोलकर शीघ्र ही भीतर जा पहुँचे ॥९॥ भीतर जाकर वसुदेवने प्रथम तो जिनेन्द्र भगवान्की प्रतिमाओंकी पूजा की और उसके बाद रति सहित कामदेवकी पूजा की। उसी समय कामदेव सेठ प्रतिमाओंकी पूजाके लिए मन्दिरमें आया था सो उसने वसुदेवको देखा ॥१०॥ तदनन्तर निमित्तज्ञानीके आदेशकी सचाईसे जिसकी आत्मा प्रसन्न हो रही थी ऐसे कामदेव सेठने सुन्दर ओठोंसे सुशोभित अपनी बन्धुमती कन्या वसुदेवके लिए प्रदान कर दी ॥११॥ उसी समय नगरीमें चारों ओर यह समाचार फैल गया कि वरके अभिलाषी सेठ कामदेवके लिए कामदेवने, मनोरथोंको पूर्ण करनेवाला एवं कामदेवके समान

१. निमित्तज्ञेन, ज्योतिर्विदा।

प्रियङ्गुसुन्दरी तं च कथञ्चिदवलोक्य सा । अनुरक्ता तथा जाता विरक्ताऽभूद् यथाऽम्भसि ॥१४॥
रहस्याघाय चापृच्छत् तां स्वां बन्धुमतीं सखीम् । पत्युर्वल्लभिकाऽसि त्वं वैदग्ध्यं चाऽस्य कीदृशम् ॥१५॥
साऽस्यै मुग्धाऽवदत्तस्य विदग्धस्य विचेष्टितम् । तथा यथा गता मोहं स्वसंवेद्यसुखासिकम् ॥१६॥
साभिमानमुदस्यान्तं तस्यै[1] द्वाःस्थमजीगमत् । तत्समागममिच्छाशु स्त्रीवधं वेत्यनुत्तरम् ॥१७॥
अन्याय्यमुभयं चैतदिति सञ्चिन्त्य यादवः । व्याजेन केनचिद्दक्षः कालक्षेपमयोजयत् ॥१८॥
लब्धप्रत्याशया कन्या शौरिविन्यस्तधीरसौ । शयने निशि सम्पूर्णं मन्यमाना मनोरथम् ॥१९॥
बन्धुमत्युपगूढाङ्गं सुप्तमन्धकवृष्णिजम् । ज्वलनप्रभनागस्त्री[2] रात्रौ दिव्या व्यबोधयत् ॥२०॥
विबुद्धो देहभूषाभाभासिताखिलदिङ्मुखाम् । तां दृष्ट्वा नागचिह्नां स्त्रीं केयमत्रेत्यचिन्तयत् ॥२१॥
आहूतश्च तया धीरः प्रियालापविदग्धया । अशोकवनिकां[3] नीत्वा नीत्याऽभाषि विनीतया ॥२२॥
शृणु त्वं धीर ! विश्रब्धो ममागमनकारणम् । तर्प्येते श्रवणे येन तवामृतरसेन वा ॥२३॥
आसीदमोघविक्रान्तिः समाक्रान्तारिमण्डलः । अमोघदर्शनो नाम्ना नरेन्द्रश्चन्दने वने ॥२४॥
कान्ता चारुमतिश्चारुश्चारुचन्द्रोऽस्य देहजः । नीतिपौरुषसम्पन्नो नवयौवनभूषितः ॥२५॥
रङ्गसेना च गणिका कलागुणगणान्विता । सुता कामपताकाऽस्याः कामस्येव पताकिका ॥२६॥

आभावाला कोई अद्भुत जामाता दिया है। इस समाचारसे प्रेरित होकर राजाने, उसके अन्तः-पुरकी स्त्रियोंने, तथा नगरवासी लोगोंने इच्छानुसार वसुदेवको देखा ॥१२-१३॥ राजपुत्री प्रियङ्गु-सुन्दरीने भी उन्हें किसी तरह देख लिया और देखकर वह उनपर इतनी अनुरक्त हो गई कि पानीसे विरक्त हो गई अर्थात् भोजन पानीसे भी उसे अरुचि हो गई ॥१४॥ प्रियङ्गुसुन्दरीने अपनी सखी बन्धुमतीको एकान्तमें बुलाकर उससे पूछा कि हे सखी ! तुम पतिको बहुत प्यारी हो, कहो इनकी चतुराई कैसी है ? ॥१५॥ भोलीभाली बन्धुमतीने चतुर वसुदेवकी चेष्टाओंका प्रियङ्गुसुन्दरीके लिए इस ढङ्गसे वर्णन किया कि वह एकदम स्वसंवेद्य सुखसे युक्त मोहको प्राप्त हो गई ॥१६॥ निदान प्रियङ्गुसुन्दरीने अभिमान छोड़कर द्वारपालको यह संदेश देकर वसुदेवके पास भेजा कि या तो हमारे साथ समागम करो या शीघ्र ही हत्या स्वीकृत करो ॥१७॥ 'यह दोनों ही काम अनुचित है' यह विचारकर वसुदेव चिन्तामें पड़ गये। अन्तमें वे चतुर तो थे ही इसलिए किसी बहाने उन्होंने कुछ समय तक ठहरनेका समाचार कहला भेजा ॥१८॥ वसुदेवमें जिसकी बुद्धि लग रही थी ऐसी प्रियङ्गुसुन्दरीको उनकी प्राप्तिकी आशा हो गई और इसी आशा-से वह रात्रिके समय शय्यापर अपने मनोरथको पूर्ण हुआ ही मानने लगी ॥१९॥

एक दिन रात्रिके समय कुमार वसुदेव बन्धुमतीका गाढ़ आलिङ्गन कर सो रहे थे कि एक ज्वलनप्रभा नामकी दिव्य नागकन्याने आकर उन्हें जगा दिया ॥२०॥ कुमार जाग गये और शरीर तथा आभूषणोंकी कान्तिसे जिसने समस्त दिशाओंको प्रकाशित कर दिया था तथा जिसके शिरपर नागका चिह्न था ऐसी उस स्त्रीको देखकर वे विचार करने लगे कि यह कौन स्त्री यहाँ आई है ? ॥२१॥ उसी समय प्रिय वार्तालाप करनेमें निपुण नागकन्याने धीर, वीर कुमारको बुलाया और बड़ी विनयके साथ नीतिपूर्वक अशोकवाटिकामें ले जाकर कहा कि हे धीर ! निश्चिन्त होकर मेरे आनेका कारण सुनिए। वह कारण कि जिससे तुम्हारे कान अमृत रसके समान तृप्त हो जावेंगे ॥२२-२३॥

हे धीर वीर कुमार ! चन्दनवन नामक नगरमें, अमोघ शक्तिका धारक एवं शत्रुमण्डलको वश करनेवाला अमोघदर्शन नामका राजा था ॥२४॥ उसकी चारुमति नामकी स्त्री थी और दोनोंके नीति तथा पुरुषार्थसे युक्त नवयौवनसे सुशोभित चारुचन्द्र नामका पुत्र था ॥२५॥ उसी नगरमें कला और गुणोंके समूहसे सहित एक रङ्गसेना नामकी वेश्या थी और उसकी काम-

१. तस्या म० । २. नागश्री म० । ३. वनितां म० ।

प्राविशद् यागदीक्षायै क्षितिपो धर्ममोहितः । तापसाः कौशिकाद्याश्च तदायाता जटाधराः ॥२७॥
नृत्यमस्या च भूपादेशात् तया कामपताकया । व्यक्तं कामपताकात्वं हरन्त्या हृदयं नृणाम् ॥२८॥
शास्त्रकौशलसंयुक्तो मूलपत्रफलाशनः । कौशिकः क्षुभितो यत्र तत्रान्यस्य तु का कथा ॥२९॥
यागकर्मणि निर्वृत्ते सा कन्या राजसूनुना । स्वीकृता तापसा भूपं भक्तं कन्यार्थमागताः ॥३०॥
कौशिकायात्र तैस्तस्यां याचितायां नृपोऽवदत् । कन्या सोढा[1] कुमारेण यातेत्युक्तास्तु ते ययुः ॥३१॥
सर्पीभूयापि हन्तव्यो मया त्वमपि भूपते । आक्रुश्य कौशिको यातः क्लिशितेनान्तरात्मना ॥३२॥
अभिषिच्य नृपस्ततो धरित्रीधरणे सुतम् । अव्यक्तगर्भया देव्या सहाभूत्तापसस्तया ॥३३॥
तापस्यपि सुतां लेभे तापसाश्रमभूषिणीम् । ऋषिदत्ताख्यया ख्यातां भूषितामप्यभिख्यया ॥३४॥
अणुव्रतानि सा लेभे चारणश्रमणान्तिके । यौवनं च नवं यूनां मनोनयनबन्धनम् ॥३५॥
शान्तायुधसुतः श्रीमान् श्रावस्तीपतिरेकदा । शीलायुध इति ख्यातस्तं यातस्तापसाश्रमम् ॥३६॥
एकयैव कृतातिथ्यस्तया तापसकन्यया । रुच्याहारैर्मनोहारिसवल्कलकुचश्रिया ॥३७॥
अतिविश्रम्भतः[2] प्रेम तयोरप्रतिरूपयोः । बिभेद निजमर्यादां चिरं समनुपालिताम् ॥३८॥
ततो रहसि निःशङ्कां निःशङ्कस्तामसौ युवा । अरीरमद् यथाकामं कामपाशवशो वशाम् ॥३९॥

पताका नामकी पुत्री थी जो सचमुच ही कामकी पताकाके समान जान पड़ती थी ॥२६॥ एक बार धर्म-अधर्मके विवेकसे रहित राजा अमोघदर्शनने यज्ञदीक्षाके लिए प्रवेश किया। उसी समय जटाओंको धारण करनेवाले कौशिक आदि ऋषि भी आये ॥२७॥ उस यज्ञोत्सवमें राजाकी आज्ञासे कामपताकाने नृत्य किया। ऐसा नृत्य, कि मनुष्योंके हृदयको हरण करती हुई उसने स्पष्ट कर दिया कि मैं यथार्थमें कामकी पताका ही हूँ ॥२८॥ उस नृत्यको देखकर शास्त्रोंकी निपुणतासे युक्त तथा वृक्षोंके मूल पत्र और फलोंको खानेवाला कौशिक ऋषि भी क्षोभको प्राप्त हो गया तब अन्यकी तो कथा ही क्या थी? ॥२९॥ यज्ञ कार्य समाप्त होनेपर राजपुत्र चारुचन्द्रने उस कन्या—कामपताकाको स्वीकृत कर लिया। उसी समय कौशिक ऋषिके शिष्य कुछ तापस राजाको भक्त जान कन्याकी याचना करनेके लिए वहाँ आये ॥३०॥ जब उन्होंने कौशिक ऋषिके लिए कामपताकाकी याचना की तब राजाने कहा कि वह कन्या तो राजकुमारने विवाह ली है आपलोग जावें। राजाके इस प्रकार कहनेपर वे तापस चले गये ॥३१॥ कन्याके न मिलनेसे कौशिककी आत्मामें बड़ा संक्लेश उत्पन्न हुआ। वह राजाके पास गया और 'हे राजन्! तूने मुझे कन्या नहीं दी है इसलिए मैं सर्प बनकर भी तुझे मारूँगा' इस प्रकार आक्रोशपूर्ण वचन कहकर चला आया ॥३२॥ राजा, कौशिकके आक्रोशपूर्ण वचन सुनकर डर गया इसलिए पुत्रका राज्याभिषेककर अव्यक्त गर्भवाली रानी चारुमतिके साथ तापस हो गया ॥३३॥ कुछ समय बाद तापसी चारुमतिने तपस्वियोंके आश्रमको सुशोभित करनेवाली, एवं अनुपम शोभासे सुशोभित ऋषिदत्ता नामकी कन्याको जन्म दिया ॥३४॥ कन्या ऋषिदत्ताने एक बार चारण ऋद्धिधारी मुनिराजके समीप अणुव्रत धारण किये। धीरे-धीरे उस कन्याने तरुण पुरुषोंके मन और नेत्रोंको बाँधनेवाला नवयौवन प्राप्त किया ॥३५॥

एक समय शान्तायुधका पुत्र, लक्ष्मीसे सुशोभित एवं शीलायुध नामसे प्रसिद्ध श्रावस्तीका राजा तपस्वियोंके उस आश्रममें पहुँचा ॥३६॥ उसे देख अकेली ऋषिदत्ता कन्याने रुचिवर्धक उत्तम आहार देकर उसका अतिथि सत्कार किया। कन्या ऋषिदत्ता सुन्दरी तो थी ही उसपर वल्कलोंके कारण उसके स्तनोंकी शोभा और भी अधिक मनोहारिणी हो गई थी ॥३७॥ फल यह हुआ है कि अनुपम रूपको धारण करनेवाले उन दोनोंके प्रेमने विश्वासकी अधिकतामें चिरकालसे पाली हुई अपनी-अपनी मर्यादा तोड़ दी ॥३८॥ कामपाशसे बँधा युवा शीलायुध निःशङ्क

१. सा + ऊढा इतिच्छेदः। २. अतिविश्रमतः म०।

व्यजिज्ञपत् ततस्तं सा साध्वी साध्वसपूरिता । ऋतुमत्यार्यपुत्राहं यदि स्यां गर्भधारिणी ॥४०॥
तदा वद विधेयं मे किमिहाकुलचेतसा[2] । पृष्टस्तया[3] स तामाह माऽऽकुला भू प्रिये ! शृणु ॥४१॥
इक्ष्वाकुकुलजो राजा श्रावस्त्यामस्तशात्रवः । शीलायुधस्त्वयाऽवश्यं द्रष्टव्योऽहं सपुत्रया ॥४२॥
इत्याश्वास्य रहस्येनामाश्लिष्य विरहासहः । तावन्निजबलं प्राप्तं तापसाश्रमगोचरम् ॥४३॥
दृष्ट्वा तुष्टेन तेनामा प्रविष्टो नगरीमसौ । याते नृपे तया पित्रोर्विनिगूह्य तत्त्रपाम् ॥४४॥
निवेदितमिदं वृत्तं लोकवृत्तविदग्धया । अन्तर्वत्नी रहःपत्नी निस्त्रपस्य नृपस्य सा ॥४५॥
असूत सुतमुद्गीर्णमिव पित्रानुहारिणम् । प्रसूतिक्लेशतः सा च प्रसूतिसमनन्तरम् ॥४६॥
मृता नागवधूर्जाता ज्वलनप्रभवल्लभा । साऽहं सम्यक्त्वयोगेन भवप्रत्ययसावधिः ॥४७॥
कृपास्नेहवशात्प्राप्ता पितृपुत्रतपोवनम् । आश्वास्य शोकसन्तप्तौ पितरौ पृथुकं[4] तकम्[5] ॥४८॥
एणीस्वरूपिणी स्तन्यपानतोऽवर्द्धयं ततः । पिता कौशिकपूर्वेण दंदशूकेन वैरिणा ॥४९॥
स दष्टोऽमोघमन्त्रेण जीवितं प्रापितो मया । धर्मोपदेशदानेन दुर्मोचक्रोधदूषितः ॥५०॥
मयाऽसौ ग्राहितो धर्ममयासीद् गतिमर्चिताम् । गताऽहं पुत्रमादाय तापसीवेषधारिणी ॥५१॥
सोपचारं नृपं दृष्ट्वा समवोचं नयान्वितम् । तनयस्तव राजेन्द्र ! राजलक्षणराजितः ॥५२॥

होकर एकान्तमें ऋषिदत्ताके पास चला गया और शङ्कारहित एवं वशीभूत ऋषिदत्ताके साथ उसने इच्छानुसार क्रीड़ा की ॥३९॥ तदनन्तर भयसे युक्त हो तापसी ऋषिदत्ताने राजासे कहा कि हे आर्यपुत्र ! मैं ऋतुमती हूँ यदि गर्भवती हो गई तो मुझे क्या करना होगा सो बताओ। इस प्रकार व्याकुल चित्तसे युक्त ऋषिदत्ताके पूछनेपर शीलायुधने कहा कि हे प्रिये ! व्याकुल मत होओ। सुनो, मैं शत्रुओंको नष्ट करनेवाला, इक्ष्वाकु कुलमें उत्पन्न हुआ श्रावस्तीका राजा शीलायुध हूँ। पुत्रके साथ-साथ तुम मुझे अवश्य ही दर्शन देना अर्थात् पुत्र प्रसवके बाद श्रावस्ती आ जाना ॥४०–४२॥ इस प्रकार आश्वासन देकर तथा एकान्तमें आलिङ्गनकर विरहसे उत्कण्ठित होता हुआ वह जानेके लिए उद्यत हो था कि इतनेमें उसकी सेना तपस्वियोंके आश्रममें आ पहुँची ॥४३॥ सेनाको देख राजा बहुत सन्तुष्ट हुआ और उसके साथ नगरीको लौट आया। तदनन्तर राजाके चले जानेपर लोकव्यवहारको जाननेवाली ऋषिदत्ताने लज्जा छोड़कर माता-पिताके लिए यह वृत्तान्त सुना दिया और कह दिया कि मैं निर्लज्ज राजा शीलायुधकी एकान्तमें पत्नी बन चुकी हूँ और गर्भवती हो गई हूँ ॥४४–४५॥ तदनन्तर नव मास व्यतीत होनेपर ऋषिदत्ताने सुन्दर पुत्र उत्पन्न किया जो बिलकुल पिताके अनुरूप था और ऐसा जान पड़ता था मानो पिताके द्वारा ही प्रकट किया गया हो। प्रसूतिके समय ऋषिदत्ताको क्लेश अधिक हुआ था इसलिए वह प्रसूतिके बाद ही मर गई और सम्यग्दर्शनके प्रभावसे ज्वलनप्रभवल्लभा नामकी नागकुमारी उत्पन्न हुई। वही मैं हूँ, मुझे देव पर्यायके कारण भवप्रत्यय अवधिज्ञान भी प्रकट हुआ है ॥४६–४७॥ इसलिए उससे पूर्वभवकी सब बात जानकर दया और स्नेहके वशीभूत हो मैं पिता और पुत्रके तपोवनमें गई। वहाँ शोकसन्तप्त माता-पिताको आश्वासन देकर मैंने अपने उस पुत्रको मृगीका रूप रख दूध पिला-पिलाकर बड़ा किया। तदनन्तर कौशिक ऋषिका जीव निदानके कारण सर्प हुआ था सो उसने पूर्व वैरके कारण हमारे पिताको डस लिया परन्तु मैंने अमोघमन्त्रसे उन्हें जीवन प्राप्त करा दिया—अच्छा कर दिया। मेरे पिता यद्यपि जो छूट न सके ऐसे क्रोधसे दूषित थे तथापि धर्मोपदेश देकर मैंने उन्हें धर्म ग्रहण करा दिया जिससे वे मरकर उत्तम गतिको प्राप्त हुए। तत्पश्चात् तापसीका वेष धारणकर और उस पुत्रको लेकर मैं राजा शीलायुधके पास गई ॥४८–५१॥ राजा शीलायुध बड़ी विभूतिसे युक्त तथा

---

१. भयपूरिता। २. चेतसः म०, ग०। ३. तथा म०, ग०। ४. पुत्रम्। 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः। ५. स्वार्थेऽकच्प्रत्ययः।

गृहाण गृहिणीत्यक्तमेणीपुत्राख्यमेतकम् । इत्युक्तेन तु तेनोक्तमपुत्रस्य कुतः सुतः ॥५३॥
कथं वा तापसि ! प्राप्तो दारकोऽयं त्वया वद । वृत्तं मया समस्तं तत्साभिज्ञानं ततोऽकथि ॥५४॥
देवीत्वं च निजं येन स राजात्मजमग्रहीत् । वर्धमानस्य तस्याहं पुत्रस्नेहेन मोहिना[1] ॥५५॥
आतानुपालिनी नित्यं राज्ञश्चेप्सितदायिनी । एणीपुत्रमसौ राजा स्वराज्ये न्यस्य पण्डितः ॥५६॥
प्रव्रज्य मुनिमार्गस्थः स्वर्गलोकमवाप्तवान् । जाता च तनया पश्चादेणीपुत्रस्य रूपिणी ॥५७॥
प्रियङ्गुसुन्दरीनाम्ना प्रियङ्गुश्यामवर्तिनी । स्वयंवरविधौ धीरा प्रत्याख्यातवती च सा ॥५८॥
भूमौ राजसुतान् कामसौख्यभोगविरागिणी । अद्राक्षीद् बन्धुमत्यामा त्वां सा राजगृहे यदा ॥५९॥
ततः परमधत्ताङ्गमनङ्गशरशल्यितम् । तद् विधत्स्व तया वीर ! वचनान्मम सङ्गमम् ॥६०॥
अदत्तेति न चाशंक्यं तुभ्यं दत्ता मया हि सा । अस्य राजकुलस्याहं प्रमाणं कार्यवस्तुनि ॥६१॥
अतो मया वितीर्णेयं वितीर्णा पितृबान्धवैः । समागमस्तु वामस्तु[2] देवतागृहे ततः ॥६२॥
[3]श्वस्तन्यां कृतसङ्केतो रजन्यां सुविनिश्चितः । अमोघदर्शनं देव ! देवतानामतो भवान् ॥६३॥
वरित्वा वरमाद्स्त्व यत् किञ्चिदिह वाञ्छितम् । इत्युक्तेनैव साऽवाचि वाचा विनयपूर्वया ॥६४॥
कृतस्मरणया देवि ! स्मर्तव्योऽमोघसस्मिते[4] । एवमुक्ता च तेनासावेवमस्त्विति देवता ॥६५॥

सितकुसुमनिभेन स्वैर्वनान्तैश्च शैला हरियश इव शुभ्रं द्राग्दधाना विरेजुः ॥३॥
फलकुचगुरुभाराक्रान्तिराक्रान्तसस्यप्रचुररुचिरकास[3]त् कञ्चुकोद्भासमाना ।
प्रमदवशविकासिन्युर्वरा सर्वतोऽभाद्भिनवहरिकण्ठाश्लेषणोत्कण्ठितेव ॥४॥
प्रसवभरविभूतिव्यग्रताव्यग्रगर्भग्रहणसमयहृष्यद्गोवृषोद्घोषघोषाः ।
शरदि हृदयतोषं पोष[4]यन्तिस्म विष्णोः प्रसभमिह रिपूणां पेषणं घोषयन्तः ॥५॥
विदितहरिसमीहश्चापि कंसस्तदानीं पुनरपि तदपायोपा[5]यधीर्गोपवर्गम् ।
कमलहरणहेतोर्दुर्गमत्यङ्[6]गभाजां ह्रदमपि विष[7]माहि प्राहिणो[8]द्यामुनं सः[9] ॥६॥

अथानन्तर गूँजते हुए भ्रमररूपी प्रत्यञ्चासे युक्त बाणासन जातिके वृक्षरूपी धनुषसे सुशोभित, कबूतर रूपी शङ्ख और कलहंस रूपी शय्यासे सहित तथा शत्रुरूपी मयूरोंके मद और पङ्खोंको नष्ट करनेवाली शरद् ऋतु आई सो ऐसी जान पड़ती थी मानो कृष्णकी नवीन लक्ष्मीकी लीलासे ही सहित हो। भावार्थ—जिस प्रकार कृष्णने उज्ज्वल नागशय्यापर आरूढ हो शङ्ख बजाया था और धनुष धारण किया था उसी प्रकार वह शरद् ऋतु भी कलहंस रूपी नाग-शय्यापर आरूढ़ हो कबूतर रूपी शङ्खको बजा रही थी तथा बाणासन वृक्षरूपी धनुषको धारण कर रही थी ॥१॥ उस समय आकाशमें मेघोंका समूह नष्ट हो गया था तथा चन्द्रमाका प्रकाश फैलने लगा था इसलिए वह अत्यधिक सुशोभित हो रहा था। इसी प्रकार पृथिवीकी विपुल कीचड़ नष्ट हो गई थी तथा उसपर काशके फूल फूल उठे थे इसलिए वह ऐसी जान पड़ती थी मानो कुछ दिन बाद जो अतिशय बलवान् कंसका घात होनेवाला है उससे प्रकट होनेवाले कृष्णके अट्टहासको ही पहलेसे धारण करने लगी हो ॥२॥ उस समय स्वच्छ नदियोंमें विशाल पुलिनोंकी टक्करसे फेन निकल रहा था, स्वाभाविक जलसे भरे सरोवरोंमें सफेद-सफेद कमल फूल रहे थे और पर्वतोंके अपने वनोंमें सफेद-सफेद फूल खिल उठे थे उनसे वे ऐसे जान पड़ते थे मानो उन सबके बहाने श्रीकृष्णके शुक्ल यशको ही शीघ्र धारण कर रहे हों ॥३॥ फलरूपी स्तनोंके भारी भारसे आक्रान्त, सर्वत्र व्याप्त धानकी सातिशय कान्तिरूपी चोलीसे सुशोभित और हर्षातिरेकसे सब ओर विकसित—नये-नये अंकुरोंको धारण करनेवाली उपजाऊ भूमिरूपी रमणी उस समय नये राजा श्रीकृष्णके कण्ठालिङ्गनके लिए उत्सुकके समान जान पड़ती थी ॥४॥ उस शरद् ऋतुमें सन्ततिके भार रूप विभूतिसे प्राप्त होनेवाली व्यग्रतासे व्यग्र एवं गर्भधारणके योग्य समय पाकर हर्षित होनेवाली गायों और बैलोंके जोरदार शब्द श्रीकृष्णके हृदय सम्बन्धी संतोषको मानो इसलिए ही बरबस पुष्ट कर रहे थे कि वे उनके शत्रुओंके नष्ट होनेकी घोषणा कर रहे थे ॥५॥

यद्यपि कंस, श्रीकृष्णकी चेष्टाको जान चुका था तथापि उनके नष्ट करनेके उपायोंमें बुद्धि लगानेवाले उस दुष्टने फिर भी उस समय कमल लानेके लिए समस्त गोपोंके समूहको यमुनाके

१. भासा ग०, घ०, ङ० । २. केन म० । ३. शोभमान । ४. तोष–म० । ५. तदपायेपापधी–म० । ६. मत्यङ्ग–म० । ७. विषमा अहयो यस्मिन् । ८. प्रेषयामास । ९. यमुनाया इदं यामुनम् ।

निजभुजबलशाली हेलयैवावगाह्य ह्रदमपि कुपितोत्थं कालियाहिं महोग्रम् ।
फणमणिकिरणौघोद्गीर्णवह्निस्फुलिङ्गव्यतिकरमतिकृष्णं मंक्षु[1] कृष्णो ममर्द[2] ॥७॥
तटरुहविटपाग्रव्यग्रगोपप्रणादस्फुटहलधरधीरध्वानसंहृष्टदेहः ।
भुजनिहतभुजङ्गः संसमुच्छिद्य पद्मान्युपतटमटतिस्म द्राक् मरुत्वा[3]निवासौ ॥८॥
प्रविलसदतिभास्वत्पीतवासा बलेन प्रमदभरवशेन प्रोल्लसन्मेचकेन ।
सरभसमुपगूढश्चोद्धृतोऽभाद्भुजाभ्यामसितसितशिलाग्रेणेव सोऽब्दः सविद्युत् ॥९॥
निहितकमलभारान् गोपकैरग्रतोऽरिः परगुणमसहिष्णुः सोष्णमुच्छ्वस्य दृष्ट्वा ।
समभणदिति शीघ्रं नन्दगोपात्मजाद्याः सरभसमिह गोपा मल्लयुद्धाय सन्तु ॥१०॥
इति विहितमहाज्ञो मल्लयुद्धाय मल्लानतिकठिनकनिष्ठज्येष्ठमध्यप्ररूढान् ।
द्रुततरमुपकण्ठे स्वस्य चक्रे स चक्रक्रकचनिशितचित्तः कर्तुकामस्तदाज्ञाम् ॥११॥
चरितमिदमकालक्षेपि विज्ञाय शत्रोः स्थिरमतिवसुदेवश्चाप्यनावृष्टियुक्तः ।
ज्ञपयितुमपि सर्वं ज्येष्ठवर्गं स वार्तामगमयदिह शीघ्रं सन्निधानाय तस्य ॥१२॥
विदितरिपुविचेष्टास्ते नव ज्येष्ठमुख्या रथतुरगपदातिप्रोन्मदेभैः स्वसैन्यैः ।
सरभसमभिजग्मुर्भूतलं भूषयन्तः शठहृदयमकस्मात्सस्मयं दारयन्तः ॥१३॥

उस ह्रदके सन्मुख भेजा जो प्राणियोंके लिए अत्यन्त दुर्गम था और जहाँ विषम साँप लहलहाते रहते थे ॥६॥

अपनी भुजाओंके बलसे सुशोभित कृष्ण अनायास ही उस ह्रदमें घुस गये और जो कुपित होकर सामने आया था, महाभयङ्कर था, फणपर स्थित मणियोंकी किरणोंके समूहसे जो अग्निके तिलगोंकी शोभा प्रकट कर रहा था तथा अत्यन्त काला था ऐसे कालिय नामक नागका उन्होंने शीघ्र ही मर्दन कर डाला ॥७॥ किनारेके वृक्षकी शाखाओंपर चढ़े घबड़ाये हुए गोपोंकी जय-जयकार तथा बलभद्रके गम्भीर शब्दसे जिनका समस्त शरीर रोमाञ्चित एवं हर्षित हो रहा था तथा भुजाओंसे जिन्होंने कालिय भुजङ्गको नष्ट किया था ऐसे श्रीकृष्ण कमल तोड़कर वायुके समान शीघ्र ही तटके समीप आ गये ॥८॥ देदीप्यमान पीताम्बरसे सुशोभित श्रीकृष्ण ज्योंही ह्रदसे बाहर निकले त्योंही आनन्दके समूहसे विवश, नीलाम्बरसे सुशोभित बलभद्रने दोनों भुजाओंसे उनका गाढालिङ्गन किया। उस समय नीलाम्बरधारी गौरवर्ण बलभद्रसे आलिङ्गित पीताम्बरधारी श्याम सलोने कृष्ण, ऐसे जान पड़ते थे जैसे बिजली सहित श्याम मेघ, काली और सफेद शिलाओंके अग्रभागसे आलिङ्गित हो रहा हो ॥९॥

दूसरोंके गुणोंको सहन नहीं करनेवाला वैरी कंस, गोपालोंके द्वारा सामने रखे हुए कमलोंके समूहको देखकर गरम-गरम उच्छ्वास भरने लगा। तदनन्तर उसने शीघ्र ही यह आज्ञा दी। नन्द गोपके पुत्रको आदि लेकर समस्त गोप यहाँ मल्लयुद्धके लिए अविलम्ब तैयार हो जावें ॥१०॥ इस प्रकार मल्लयुद्धके लिए कड़ी आज्ञा देकर चक्र और करोंतके समान तीक्ष्ण चित्तका धारक कंस मल्लयुद्धके लिए इच्छुक हो शीघ्र ही अत्यन्त बलवान् छोटे-बड़े और मध्यम श्रेणीके मल्लोंको उसी समय बुलाकर अपने पास रख लिया ॥११॥ स्थिर बुद्धिके धारक वसुदेवने, अपने अनावृष्टि पुत्रके साथ सलाहकर शत्रुकी इस चेष्टाको तत्काल समझ लिया और अपने समस्त बड़े भाइयोंको बतलाने तथा उन्हें शीघ्र ही मथुरामें उपस्थित होनेके लिए खबर भेज दी ॥१२॥ जिन्होंने शत्रुकी चेष्टाको जान लिया था ऐसे वसुदेवके नौ ही बड़े भाई, रथ, घोड़े, पदाति और मदोन्मत्त हाथियोंसे युक्त अपनी सेनाओंके द्वारा पृथिवीतलको

---

१. शीघ्रम् म० । २. भेदः म० । ३. वायुरिव (ग० टि०) ।

चिरवियुतकनीयोदर्शनव्याजतस्तान् पृथुतरमथुरां तामागतान् यादवेन्द्रान् ।
अभिमुखमपशङ्कोऽभ्येत्य कंसः सशङ्को निभृतकृतनतिः प्रावेशयत्सानुजान् सः ॥१४॥
पुरु पुरगृहशोभादर्शनात्तृप्तनेत्रास्तदधिपतिनियुक्तावासकास्ते[1] यथेष्टम् ।
प्रतिदिनमुपसेव्या दानमानप्रणामैः प्रणयमिव वहन्तस्तस्थुरन्तर्विदाहाः[2] ॥१५॥
हलभृदवधृतार्थो[3] मद्युद्धाभिलाषं वृष[4]धवलविशेषोऽत्यन्तविज्ञो विधित्सुः ।
अतिनिपुणमतिस्तां सन्निधौ तस्य धीरो वदति लघु यशोदां स्नानमाकल्पयेति ॥१६॥
चिरयसि किमिति त्वं विस्मृतात्मीयदेहे न सकृदसकृदुक्ता न स्वभावं जहासि ।
न हि शुचिशुभशुक्त्युत्पादितोदारमुक्तामणिरतिभृतवेला चापलं स्वं जहाति ॥१७॥
इति सह चिरवासेऽप्युक्तपूर्वा न जातु झटितिचकितभया सा साश्रुनेत्रा निरुक्तिः ।
द्रुततरमुपकल्प्य स्नानमन्नप्रसिद्ध्यै प्रकृतमकृत यत्नं स्नातुमेतौ नदीं तौ ॥१८॥
अवददिति बलस्तं कृष्णमेकान्तवर्ती किमिति मुखमिदं ते दीर्घनिश्वाससास्रम् ।
हिमहतरुचिपद्मच्छायमच्छायमद्य प्रथयति पृथुमन्तस्तापमाचक्ष्व हेतुम् ॥१९॥

भूषित करते और अकस्मात् आगमनसे दुष्ट कंसके अहंकारपूर्ण हृदयको विदीर्ण करते हुए शीघ्र ही मथुराकी ओर चल पड़े ॥१३॥

यदुवंशी राजाओंको विशाल मथुरा नगरीकी ओर आया देख यद्यपि कंस शङ्कासे युक्त हो गया था तथापि जब उसे यह बताया गया कि ये चिरकालसे वियुक्त छोटे भाई—वसुदेवको देखनेके लिए आये हैं तब उसने निःशङ्क हो सामने जाकर उनका स्वागत किया, उन्हें अच्छी तरह नमस्कार किया और छोटे भाइयोंसे सहित उन समस्त भाइयोंका नगरमें प्रवेश कराया ॥१४॥ विशाल मथुरा नगरीके घरोंकी शोभा देखनेसे जिनके नेत्र सन्तुष्ट हो गये थे तथा नगरीके अधिपति—कंसने जिन्हें उत्तमोत्तम भवन प्रदान किये थे, ऐसे वे सब यदुवंशी राजा मथुरा नगरीमें रहने लगे। कंस दान, मान तथा नमस्कारके द्वारा प्रतिदिन उनकी सेवा करता था। यद्यपि वे बाह्यमें ऐसी चेष्टा दिखाते थे जैसे प्रेम ही धारण कर रहे हों तथापि अन्तरङ्गमें अत्यधिक दाह रखते थे ॥१५॥

तदनन्तर जिन्होंने समस्त कार्यका अच्छी तरह निश्चय कर लिया था, जिनके अवयव वृषभके समान सफेद थे, जो अत्यन्त विज्ञ थे, जिनकी बुद्धि अत्यन्त निपुण थी और जो कृष्णके हृदयमें युद्धकी अभिलाषा उत्पन्न करना चाहते थे ऐसे धीर वीर बलभद्रने गोकुल जाकर कृष्णके सामने ही यशोदासे कहा कि जल्दी स्नान कर ॥१६॥ क्यों इस तरह देर कर रही है, तू अपने शरीरकी सम्भालमें ही भूली हुई है, एक बार नहीं अनेक बार कहा फिर भी अपनी आदत नहीं छोड़ती। ठीक ही है उज्ज्वल एवं शुभ शुक्तियोंके द्वारा उत्तम मुक्तामणियोंको उत्पन्न करनेवाली समुद्रकी वेला अपनी चञ्चलता नहीं छोड़ती है। चिरकाल तक साथ-साथ रहनेपर भी बलभद्रने यशोदासे ऐसे कटुक वचन पहले कभी नहीं कहे थे इसलिए वह बहुत ही चकित तथा भयभीत हो गई। यद्यपि उसने कहा कुछ नहीं फिर भी उसके नेत्रोंसे आँसू निकल आये। वह चुपचाप शीघ्र ही स्नान कर भोजन बनानेके लिए प्रकृत-अवसरानुकूल यत्न करने लगी। इधर कृष्ण और बलभद्र-दोनों स्नान करनेके लिए नदी चले गये ॥१७-१८॥

एकान्तमें पहुँचनेपर बलभद्रने कृष्णसे कहा कि आज तुम्हारा यह मुख लम्बी-लम्बी साँसों तथा अश्रुओंसे युक्त क्यों है ? तुषारसे कुम्हलाये हुए कमलके समान कान्तिसे रहित

१. तदधिपतिना कंसेन नियुक्ताः प्रदत्ता आवासा येभ्यस्ते। २. हृदये मात्सर्योपेताः। ३. हलभृदवधृतार्थो म०, ख०। ४. वृषलवधविशेषोदन्तविज्ञो म०, ख०।

प्रणयसहितमित्थं प्रश्नितः प्राह कृष्णः प्रहसितमुखपद्मं [1]पद्ममालोक्य वाक्यम् ।
शृणु वचनमिहार्य त्वं मदीयं प्रसिद्धं स्फुटवदनविकाराशंसितं चित्तदुःखम् ॥२०॥
श्रुतगुरुरसि विद्वान् वेत्सि लोकानुवृत्तिं त्वमुपदिशसि मार्गं चार्य वर्यं पुरस्य ।
तदिह भण सुपूज्यां युज्यते मे यशोदामतिपरुषवचोभिस्ते तिरस्कर्तुमद्य ॥२१॥
इति सुविहितमन्युं गद्गदं[2] तं गदन्तं हृषिततनुरुहोऽसौ गाढमाश्लिष्य दोर्भ्याम् ।
अवददविरलाश्रुपातसंसूचितान्तःकरणविशदवृत्तिः सर्ववृत्तान्तमस्मै ॥२२॥
मुनिवचनमवन्ध्यं तज्जरासन्धजायाः पटुमदवशवृत्तेर्हेतुतो वृत्तमादौ ।
निधनमपि च षण्णां देवकीगर्भजानां क्षुभितहृदयकंसापादितं कोपहेतुम् ॥२३॥
प्रसवसमयतोऽर्वाग्गोकुले लीनवृत्तिं रिपुविहितमनेकापायमप्यत्र बाल्यात् ।
प्रभृति सकलमग्रे मल्लसंग्राममुग्रं विरचितमवधार्यं द्विड्वधेऽस्य चित्तम् ॥२४॥
हरिरिति हरिवंशं रौ[3]हिणेयादशेषं पितृजनगुरुबन्धुं भ्रातृवर्गं विदित्वा ।
प्र[4]मदमुरुमुवाह श्रीमुखाम्भोजलक्ष्मीं[5] हरिरिव गुरुभूभृद्भूरिरक्षासनाथः ॥२५॥
हितसहजतयोत्थस्नेहसंपृक्तभावौ सुसरिति यमुनायां तौ महामीनलीलौ ।
जलविहरणदक्षौ स्नानमासेव्यसेव्यौ निजसदनमगातामन्वितौ गोपवर्गैः ॥२६॥

तुम्हारा यह मुख किसी भारी मानसिक सन्तापको प्रकट कर रहा है सो उसका कारण कहो ॥१९॥ इस प्रकार प्रेमसहित पूछे हुए कृष्णने, प्रसन्न मुख कमलसे युक्त बलभद्रकी ओर देखकर यह वचन कहे कि हे आर्य ! मेरे वचन सुनिए। मेरे मुखपर प्रकट हुए विकारसे मेरा मानसिक दुःख प्रकट हो रहा है, यह ठीक है। आप शास्त्र ज्ञानसे श्रेष्ठ विद्वान् हैं, लोककी रीतिको जानते हैं और हे पूज्य ! आप नगरवासी लोगोंको श्रेष्ठ मार्गका उपदेश देते हैं फिर यह तो बताइए कि आज आपको हमारी पूज्य माता यशोदाका अत्यन्त कठोर वचनोंसे तिरस्कार करना क्या उचित था ? ॥२०॥ इस प्रकारके वचनों द्वारा शोक प्रकट करते हुए कृष्णका बलभद्रने दोनों भुजाओंसे गाढ़ आलिङ्गन कर लिया। हर्षसे उनका शरीर रोमाञ्चित हो गया। तदनन्तर अविरल अश्रुधारासे हृदयकी स्वच्छ वृत्तिको सूचित करते हुए उन्होंने कृष्णके लिए सब वृत्तान्त कह सुनाया ॥२१॥ उन्होंने सबसे पहले तीव्र अहङ्कारको वशीभूत जरासंधकी पुत्री कंसकी स्त्री जीवद्यशाके लिए अतिमुक्तक मुनिने जो अवन्ध्य—सत्य वचन कहे थे वे सुनाये। तदनन्तर क्षुभितहृदय कंसने देवकीके गर्भसे उत्पन्न हुए छह पुत्रोंको अपनी जानमें मार डाला यह क्रोधवर्धक समाचार सुनाया। फिर, तुम प्रसवके समयसे पहले ही उत्पन्न हुए थे और उत्पन्न होते ही तुम्हें हम गोकुलमें छिपाकर यशोदाके यहाँ रख गये थे यह कहा। तदनन्तर बाल्य-कालसे ही लेकर शत्रुने मारनेके जो नाना साधन जुटाये उनका निरूपण किया। अन्तमें यह बताया कि इस समय कंस भयंकर मल्लयुद्धका निश्चय कर तुम्हारे मारनेमें चित्त लगा रहा है ॥२२–२४॥ इस प्रकार ज्योंही कृष्णने बड़े भाई बलभद्रसे समस्त हरिवंश, पिता, गुरु, बन्धु, तथा भाइयोंका हाल जाना त्योंही वे आनन्दसे अत्यधिक मुख-कमलकी शोभाको धारण करने लगे—हर्षातिरेकसे उनके मुख-कमलकी लक्ष्मी खिल उठी। और वे बड़े भाई रूपी पर्वतसे प्राप्त अत्यधिक रक्षासे युक्त हो सिंहके समान सुशोभित होने लगे ॥२५॥

तदनन्तर जन्मजात हितबुद्धिसे उत्पन्न स्नेहसे जिनके अन्तःकरण परस्पर मिल रहे थे, जो महामच्छोंकी लीला धारण कर रहे थे एवं जलक्रीड़ामें जो अत्यन्त चतुर थे ऐसे दोनों भाइयोंने यमुना नदीमें स्नान किया। तत्पश्चात् गोप समूहसे सेवनीय दोनों भाई उन्हीं

---

१. बलम्। २. विष्णुं कृष्णमित्यर्थः। ३. बलात्। ४. प्रमदपुरु–म०। ५. लक्ष्मीर्हरिरिव म०।

शुभपरिमलसद्यस्तापहैयङ्गवीन[1]स्फुटसुरससुसूपव्यञ्जनक्षीरदध्ना[2] ।
विरचितमणिभूमौ हेमपात्र्यां सहेलौ मृदुविशदसुसिक्थं शालिभक्तं हि भुक्त्वा[3] ॥२७॥
[4]सुमृदुसुरभिगन्ध्युद्वर्तितास्यस्वपाणी स्वकरकिसलयौ तौ स्निग्धदिव्यानुलिप्तौ ।
[स्वकरकिसलयात्तोस्निग्धदिव्यानुलेपौ]
[5]दलितहरितपूगैलादिताम्बूलरागप्रचितसुखरागाद्भासमानाधरोष्ठौ ॥२८॥
विविधकरणदक्षौ मल्लविद्यानवद्यौ कृतचलनसुवेषौ नीलपीताम्बराभ्याम् ।
बृहदुरसि विधायोदारसिन्दूरधूलीरभिनववनमालामालतीमुण्डमालौ ॥२९॥
स्थिरमनसि विधाय ध्वंसनं कंसशत्रोश्चलचरणनिपातैर्धारिणीं क्षोभयन्तौ ।
[6]सममरमतिघोरैर्मल्लवेषैः सवर्गैः पुरमभि मथुरां तौ चेलतुर्गोपवर्गैः ॥३०॥
अभिपतदुरगेन्द्रं रासभं दूरसन्तं पथि हि पुरनिवेशे विघ्नयन्तं बृहद्ध्वम् ।
विवृतवदनरन्ध्रं चापतन्तं दुरन्तं कुतुरगमवधीत्तं केशवः केशिनं सः ॥३१॥
नगरमभिविशन्तौ [7]द्वारि तौ वारणेन्द्रावविरतमदलेखामण्डितापाण्डुगण्डौ ।
युगपदरिनियोगादापतन्तौ विदित्वा तुतुषतुरिव दृष्ट्वा युद्धरङ्गादिमल्लौ ॥३२॥

गोपोंके साथ-साथ अपने घर आ गये ।।२६।। घरपर दोनों साथ-साथ मणिजटित भूमिमें गये और वहाँ उन्होंने साथ-ही-साथ, जिसके सीथ अत्यन्त कोमल और उज्ज्वल थे ऐसा शालिधानका भात, शुभ सुगन्धित एवं तत्काल तपाये हुए घी से स्वादिष्ट दाल, शाक, दूध और दहीके साथ जीमा। जीमनेके बाद अत्यन्त कोमल और सुगन्धित चन्दनादि द्रव्योंके चूर्णसे कुल्ला किया, हाथोंमें उन्हींका उद्वर्तन किया, अपने कर-किसलयमें लेकर गाढ़ा-गाढ़ा सुन्दर लेप लगाया, कटी हुई हरी सुपारी तथा इलायची आदिसे युक्त पान खाया। पानकी लालीसे उनके मुखकी स्वाभाविक लाली और भी अधिक बढ़ गई जिससे उनके अधर तथा ओठ अत्यन्त सुन्दर दिखने लगे ॥२७–२८॥ तदनन्तर जो नाना आसनोंके लगानेमें चतुर थे, मल्लविद्याके निर्दोष ज्ञाता थे, नीलाम्बर और पीताम्बर धारण कर जिन्होंने चलनेके योग्य सुन्दर वेष धारण किया था, लम्बे-चौड़े वक्षस्थलपर उत्तम सिन्दूरकी रज लगा कर जिन्होंने नूतन वनमाला और मालतीका सेहरा धारण किया था, और जो अपने दृढ़ मनमें वैरी कंसके मारनेका निश्चय कर चञ्चल चरणोंके आघातसे पृथिवीको कम्पित कर रहे थे ऐसे दोनों भाई, अतिशय भयानक मल्लोंके वेषसे युक्त एवं अपने-अपने वर्गके लोगोंसे सहित गोपोंके साथ शीघ्र ही मथुराकी ओर चले ।।२६–३०।। मार्गमें कंसके भक्त एक असुरने नागका रूप बनाया, दूसरेने कटु शब्द करनेवाले गधाका और तीसरेने दुष्ट घोड़ेका रूप बनाया तथा नगर प्रवेशमें विघ्न डालते हुए सबके-सब मुँह फाड़ कर सामने आये परन्तु कृष्णने उन सबको मार भगाया ।।३१।।

नगरमें प्रवेश करते हुए दोनों भाई जब द्वारपर पहुँचे तो शत्रुकी आज्ञासे उनपर एक-साथ चम्पक और पादाभर नामक दो हाथी हूल दिये गये। उन हाथियोंके भूरे रङ्गके *गण्डस्थल, निरन्तर झरती हुई मदकी रेखाओंसे सुशोभित थे।* उन हाथियोंको सामने आते जान कर दोनों भाई ऐसे संतुष्ट हुए जैसे युद्धकी रङ्गभूमिमें आगत प्रथम मल्लोंको देख कर

१. हैयङ्गवीनं म० । २. दध्नः म० । ३. भुक्तम् ग० । ४. २८–२९ श्लोकयोः स्थाने ख पुस्तके एवं पाठः—सुमृदुसुरभिगन्ध्युद्वर्तनोद्वर्तितास्यस्वकरकिसलयौ तौ मल्लविद्यानवद्यौ। कृतचलनसुवेषौ नील-पीताम्बराभ्यां बृहदुरसि विधायोदारसिन्दूरधूलीः ॥ अभिनववनमालामालतीमुण्डमालौ दरदलितसुबिम्बोद्भास-मानाधरोष्ठौ। ५. पलित म० । ६. समम् अरम् इतिच्छेदः । ७. वारितौ म० ।

सकलितमभितस्थौ चम्पकं सीरपाणिः [1]फणिरिपुरपि नागं तत्र पादामराख्यम् ।
अभवदभिनवं तद्विस्मयापादि पुंसां नरवरकरिमल्लद्वन्द्वयोर्द्वन्द्वयुद्धम् ॥३३॥
दृढपदहतिगाढाक्रान्ति चोत्पाटयन्तौ कुटिलितकर[2]रुद्धान् दन्तिदन्तावभाताम् ।
पृथुभुजबललीलोत्पाट्य[3]मानाग्रबन्धक्षितिभृदुरगवेष्ट[4]प्रौढवंशाङ्कुरान् वा ॥३४॥
अदयमथसमूलोन्मूलितोल्लासिता[5]भस्वरदनपरिघातैर्घोरनिर्घात[6]घोषैः ।
विरसविरटितेभौ तौ निहत्य प्रविष्टौ पुरमुरुरवबेलाक्ष्वेडितास्फोटगोपैः (?) ॥३५॥
कमलकिसलयोद्यत्तोरणद्वारशोभां नृपजनपदशुम्भच्चक्रवालालयालिम् ।
भुजशिखरनिघृष्टज्येष्ठमल्लांसकूटौ विशदमविशतां तौ तां महारङ्गभूमिम् ॥३६॥
स्वचरणभुजदण्डाकुञ्चिताकारशोभान्यभिनयदृढदृष्टिक्षेपरम्याणि रेजुः ।
चलितचलनवस्त्रप्रान्तकान्तानि रङ्गे हरिहलधरहेलावल्गितास्फोटितानि ॥३७॥
रिपुरयमिह कंसोऽयं जरासन्धलोकः सलिलधिविज[7]याद्यास्ते दशार्हाः सपुत्राः ।
सहलिसहरिचं[8]क्रालोकिनो लाङ्गलीत्थं प्रतिपुरुषमशेषं संज्ञयादर्शयत्तान् ॥३८॥

ही संतुष्ट हो रहे हों ॥३२॥ उनमेंसे बलभद्र तो बड़ी सुन्दरताके साथ चम्पक हाथीके सामने अड़ गये और कृष्ण पादाभर हाथीके सामने जा डटे। तदनन्तर नर मल्ल और हस्तिमल्लोंकी जोड़ियोंमें ऐसा मल्लयुद्ध हुआ जो देखनेवाले मनुष्योंके लिए बिलकुल नया तथा आश्चर्य उत्पन्न करनेवाला था ॥३३॥ यद्यपि हाथियोंने अपने दाँत टेढ़ी सूँड़ोंसे छिपा रक्खे थे तथापि उन दोनोंने उन्हें पैरोंके मजबूत प्रहार और बहुत भारी चपेटसे उखाड़ लिया था। उस समय वे हाथियोंके दाँत ऐसे जान पड़ते थे मानो अत्यधिक बाहुबलकी लीलासे जिसका अग्रभाग उखाड़ा जा रहा था ऐसे किसी पर्वतके साँपोंसे घिरे हुए बड़े बाँसोंके अंकुरोंका समूह ही हो ॥३४॥

तदनन्तर निर्दयतापूर्वक जड़से उखाड़े हुए अपने सुशोभित दाँतोंके परिघातसे जो भयंकर वज्रपातके समान जोरदार-विरस शब्द कर रहे थे ऐसे उन दोनों हाथियोंको मारकर दोनों भाई नगरमें प्रविष्ट हुए। उस समय वह मथुरा नगर जोरसे जय-जयकार करनेवाले गोपोंसे व्याप्त होनेके कारण बहुत बड़ा जान पड़ता था (?) ॥३५॥

तदनन्तर कमलकी कलिकाओंसे जिसके तोरण द्वारकी शोभा बढ़ रही थी एवं जिसके भीतर घेरकर बैठे हुए राजाओं तथा नगरवासियोंसे सुशोभित, कुश्तीके लिए गोलाकार स्थान बनाये गये थे ऐसी बहुत बड़ी रङ्गभूमिमें दोनों भाई, अपने कन्धोंसे बड़े-बड़े मल्लोंके उन्नत कन्धोंको धक्का देते हुए, हर्ष पूर्वक प्रविष्ट हुए ॥३६॥ उस समय रङ्गभूमिमें अपने चरणों और भुजदण्डोंके संकोच तथा विस्तारसे जिनकी शोभा बढ़ रही थी, जो अभिनयके अनुरूप दृष्टिके दृढ़ निक्षेपसे अत्यन्त रमणीय थीं एवं हिलते हुए चञ्चल वस्त्रोंके छोरसे जो सुन्दर थीं ऐसी कृष्ण और बलभद्रकी क्रीड़ा पूर्वक उछलना तथा ताल ठोकना आदि चेष्टाएँ अत्यधिक सुशोभित हो रही थीं ॥३७॥ रङ्गभूमिमें पहुँचते ही बलभद्रने 'यह यहाँ शत्रु कंस बैठा है, ये जरासंधके आदमी हैं और ये अपने-अपने पुत्रों सहित समुद्रविजय आदि दशों भाई विराजमान हैं' इस प्रकार इशारेसे कृष्णको समस्त मनुष्योंका परिचय करा दिया। वे समस्त लोग भी उसी गोलकी ओर देख रहे थे जो बलभद्र तथा कृष्णसे सहित था ॥३८॥

१. कृष्णः। २. कररुद्धादन्ति म०। कररुद्धौ दन्तिदन्तावभाताम् क०। ३. पाट्यमानाग्रवाद्ये क०, ग०, ङ०, म०। ४. वेष्ट–म०। ५. ल्लासिताभ–ख०, ग०, घ०, ङ०। ६. निर्घोषघोषैः–म०। ७. समुद्रविजयादयः म०। ८. सहलसहरिचक्रालोकिनो म०।

बहुजनपदराजप्राज्यलोकावलोके क्षुभितसकलमल्लास्फोटवल्गाभिरामे ।
क्रमसहितमिहान्ये तावदादेशभाजो वनमहिषविदृप्ता मल्लयुद्धं प्रचक्रुः ॥३९॥
अथ गिरितटभित्तिव्यूढवक्षोविभागस्फुटदृढभुजयन्त्रोत्पी[1]डितोद्दृप्तमल्लम् ।
हरिमभि खलकंसो ऽयुङ्क्त[2] चाणूरमल्लं विषमितविषदृष्ट्या पृष्ठतो मुष्टिकं च ॥४०॥
खरनखरकठोरौ मुष्टिबन्धौ विधाय प्रकटितपटु[3]सिंहाकारसंस्थानभेदौ ।
स्थिरचरणनिवेशौ शौरिचाणूरमल्लावनिभृतमभिलग्नौ मुष्टिसंबद्धयुद्धे ॥४१॥
कुलिशकठिनमुष्टिं मुष्टिकं पृष्ठतस्तं समपतितुसकामं राममल्लः सलीलम् ।
अलमलमिह तावत्तिष्ठ तिष्ठेति सार्वाः शिरसि करतलेनाक्रम्य चक्रे गतासुम्[4] ॥४२॥
हरिरपि हरिशक्तिः[5] शक्तचाणूरकं तं द्विगुणितमुरसि स्वे हारिहुङ्कारगर्भः ।
व्यतनुत भुजयन्त्राक्रान्तनीरन्ध्रनिर्यद्बहलरुधिरधारोद्गारमुद्गीर्णजीवम् ॥४३॥
दशशतहरिहस्तिप्रोद्बलौ साधिभूमाविति हठहतमल्लौ वीक्ष्य तौ शौरिकृष्णौ ।
प्रचलितवति कंसे शात[6]निस्त्रिंशहस्ते व्यचलदखिलरङ्गाम्भोधिरुत्तुङ्गनादः ॥४४॥
अभिपतदरिहस्तात्खड्गमाक्षिप्य [7]केशेष्वतिदृढमतिगृह्याहत्य भूमौ सरोषम् ।
विहितपरुषपादाकर्षणस्तं शिलायां तदुचितमिति मत्वास्फाल्य हत्वा जहास ॥४५॥

अथानन्तर जहाँ अनेक नगरवासी और राजा आदि श्रेष्ठ पुरुष देखनेके लिए एकत्रित थे तथा क्षोभको प्राप्त हुए समस्त मल्लोंकी उछल-कूद एवं तालके शब्दोंसे जो अत्यधिक मनोहर जान पड़ता था ऐसे अखाड़ेमें बारी-बारीसे कंसकी आज्ञा पाकर अन्य अनेक मल्ल जंगली भैंसाओंके समान अहंकारी हो मल्ल युद्ध करने लगे ॥३९॥ जब साधारण मल्लोंका युद्ध हो चुका तब दुष्ट कंसने कृष्णसे लड़नेके लिए उस चाणूर मल्लको आज्ञा दी जो पर्वतकी विशाल दीवालके समान विस्तृत वक्षःस्थलसे युक्त था और जिसने अपने मजबूत भुजयन्त्रसे बड़े-बड़े अहंकारी मल्लोंको पेल डाला था। यही नहीं, पीछेसे मुष्टिक मल्लको भी उसने उनपर क्रूर पड़नेके लिए अपनी विषम-विषमयी दृष्टिसे इशारा कर दिया ॥४०॥

तदनन्तर समर्थ सिंहके समान आकार और खड़े होनेकी मुद्रा विशेषको प्रकट करनेवाले कृष्ण और चाणूर मल्ल, स्थिर चरण रख एवं तीक्ष्ण नखोंसे कठोर मुट्ठियाँ बाँधकर अविराम रूपसे मुष्टि-युद्धमें जुट गये—परस्पर मुक्केबाजी करने लगे ॥४१॥ वज्रके समान कठोर मुट्ठिका धारक मुष्टिक मल्ल पीछेसे मुट्ठिका प्रहार करना ही चाहता था कि इतनेमें बलभद्र मल्लने शीघ्रतासे 'बस-बस ! ठहर-ठहर !' यह कहते हुए चपड़े और शिरमें जोरसे मुक्का लगाकर उसे प्राणरहित कर दिया ॥४२॥ इधर सिंहके समान शक्तिके धारक एवं मनोहर हुंकारसे युक्त श्रीकृष्णने भी चाणूर मल्लको जो उनसे शरीरमें दूना था अपने वक्षःस्थलसे लगाकर भुजयन्त्रके द्वारा इतने जोरसे दबाया कि उससे अत्यधिक रुधिरकी धारा बहने लगी और वह निष्प्राण हो गया ॥४३॥ कृष्ण और बलभद्रमें एक हजार सिंह और हाथियोंका बल था। इस प्रकार अखाड़ेमें जब उन्होंने हठ पूर्वक कंसके दोनों प्रधान मल्लोंको मार डाला तो उन्हें देख, कंस हाथमें पैनी तलवार लेकर उनकी ओर चला। उसके चलते ही समस्त अखाड़ेका जनसमूह समुद्रकी नाईं जोरदार शब्द करता हुआ उठ खड़ा हुआ ॥४४॥ कृष्णने सामने आते हुए शत्रुके हाथसे तलवार छीन ली और मजबूतीसे उसके बाल पकड़ उसे क्रोधवश पृथिवीपर पटक दिया। तदनन्तर उसके कठोर पैरोंको खींचकर 'उसके योग्य यही दण्ड है।' यह विचार उसे पत्थरपर पछाड़कर मार डाला। कंसको मारकर कृष्ण हँसने लगे ॥४५॥

१. पीलितं हतमल्लं क०, पीडितो द्दप्तमल्लं म०, ख०। २. अयुङ्क्त=योजितवान्, युक्तचाणूर-म०। ३. पद म०। ४. मृतम्। ५. हरेः सिंहस्येव शक्तिर्यस्य सः। ६. शाल-म०। ७. कोशेषु म०।

क्षुभितमभिपतन्तं कंससैन्यं च रामः कुटिलभृकुटिमल्लस्तम्भमुत्खा[1]य कोपात् ।
कुलिशसदृशघातैः सर्वतो गर्वदृप्तैरकृत कृतविरावं काम्दिशीकं क्षणेन ॥४६॥
यदुषु विषमदृष्टिष्वेककालं बलैः स्वैश्चलितजलधिनादैरुत्थितेषूद्धतेषु ।
क्षुभितमपि समस्तं कंसकार्ये नियुक्तं स्वनशदृशमत्तं तज्जरासन्धसैन्यम् ॥४७॥
रथमथ चतुर[2]श्वं तावनावृष्टियुक्तौ सपदि समभिरूढौ मल्लनेपथ्ययुक्तौ ।
सदनमगमतां तत्पैतृकं याद[3]वौघैर्जलधिविजयपूर्वैः पूर्णमुर्वीभृदीशैः ॥४८॥
क्रमयुतमवनत्या पूजयित्वा दशार्हप्रभृतिगुरुजनान् तौ तत्र दत्ताशिषौ तैः ।
चिरविरहजमन्तस्तापमस्तं स्वयोग[4]प्रथमसलिलधारासक्तौ निन्यतुस्तम् ॥४९॥
वसु[5]निभवसुदेवो देवकी चात्मजस्य प्रशमितरिपुवह्नेर्वीक्ष्य विश्रब्धमास्यम् ।
सुखमतुलमगातामेकनासा च कन्या भुवि सुतसहजानां संप्रयोगः सुखाय ॥५०॥
गतनिगलकलङ्कः कंसशङ्काविमुक्तश्चिरविरहकृशाङ्गं राज्यलक्ष्मीकलत्रम् ।
यदुनिवहनियोगादुग्रसेनस्तदानीमभजत मथुरायां कंसमाथिप्रदत्तम् ॥५१॥
स्वजननिजवधूनां क्रन्दनाद्यैः समावे श्रितवति लघु कंसेऽन्त्यसंस्कारमन्त्यम् ।
यदुषु कुपितचित्ता[6] प्राप[7] जीवद्यशार्तं[8] स्वकपितुरुपकण्ठे बाष्पसंरुद्धकण्ठा ॥५२॥

कंसकी सेना क्षुभित हो सामने आई तो उसे देख रामकी भौंहें कुटिल हो गईं। उन्होंने उसी समय क्रोधवश मल्लका एक खम्भा उखाड़ लिया और गर्वसे सब ओर दिये हुए उसके वज्रतुल्य कठोर आघातोंसे चिल्लाती हुई उस सेनाको क्षणभरमें खदेड़ दिया ॥४६॥ कंसके कार्यमें नियुक्त जरासंधकी स्वच्छन्द एवं मदोन्मत्त सेना यद्यपि क्षुभित हुई थी तथापि ज्योंही विषम दृष्टिके धारक शक्तिशाली यादव लोग चञ्चल समुद्रके समान शब्द करनेवाली अपनी-अपनी सेनाओंके साथ एक ही समय उठ खड़े हुए त्योंही वह समस्त सेना नष्ट-भ्रष्ट हो गई ॥४७॥

तदनन्तर मल्लके वेषसे युक्त दोनों भाई अनावृष्टिके साथ-साथ, चार घोड़ोंसे वाहित रथपर सवार हो अपने पिताके घर गये। पिताका वह घर समुद्रविजय आदि राजाओं तथा अन्य अनेक यदुवंशियोंके समूहसे भरा हुआ था ॥४८॥ वहाँ जाकर दोनों भाइयोंने क्रमसे समुद्रविजय आदि गुरुजनोंको नमस्कार कर उनकी पूजा की तथा गुरुजनोंने उन्हें आशीर्वाद दिया। इस प्रकार अपने संयोग रूप प्रथम जलकी धारासे युक्त दोनों भाइयोंने चिर कालके विरहसे उत्पन्न सबके मानसिक संतापको अस्त कर दिया ॥४९॥ कुबेरकी उपमा धारण करनेवाले वसुदेव और देवकी, शत्रु रूपी अग्निको शान्त करनेवाले पुत्रके मुखको निःशङ्क रूपसे देख कर अनुपम सुखको प्राप्त हुए। इसी प्रकार कंसने जिसकी नाक चिपटी कर दी थी उस कन्याने भी भाईका मुख देख अनुपम सुखका अनुभव किया सो ठीक ही है क्योंकि संसारमें पुत्र-पुत्रियोंका समागम सुखके लिए होता ही है ॥५०॥ जिनकी बेड़ियोंका कलंक नष्ट हो गया था और जो कंसकी शङ्कासे विमुक्त हो चुके थे ऐसे राजा उग्रसेन उस समय यादवोंकी आज्ञासे कृष्णके द्वारा प्रदत्त, चिरकालीन विरहसे दुबली-पतली राज्यलक्ष्मी रूपी स्त्रीका मथुरामें पुनः उपभोग करने लगे ॥ भावार्थ—कृष्णने राजा उग्रसेनकी बेड़ी काट कर उन्हें पुनः मथुराका राजा बना दिया और वे चिरकालके विरहसे कृश राज्यलक्ष्मीका पुनः सेवन करने लगे ॥५१॥ उधर कुटुम्बी जन तथा अपनी स्त्रियोंके रुदन आदिसे सहित कंस जब अन्तिम शारीरिक संस्कारको प्राप्त हो चुका तथा यादवोंके ऊपर जिसका चित्त अत्यन्त

१. मल्लस्तम्भमुत्पाद्य म० । २. चतुरश्वम् म० । ३. यादवाढ्यै क० । ४. संयोग म० । ५. 'वसु-र्मयूखाग्निधनाधिपेषु' इति कोशः । ६. चित्ताः म० । ७. प्राप्य म० । ८. जीवद्यशायाः म० ।

अथ गगनसमुद्रे मोदरङ्गत्तरङ्गे त्वरितगतिरनूनामुद्वहन्मीनलीलाम् ।
खचरनृपतिदूतोऽलोकि लोकैः समस्तैः स्फुरितमणिविभूषो माथुरैरुन्मुखाब्जैः ॥५३॥
तनुविशददुकूलश्चन्दनार्द्रीकृताङ्गः स्फुट इव कलहंसो मानसस्नानसेवी ।
सुरसरितमिवाशो माथुरीं सोऽत्र रथ्यां दिशि दिशि धृतशोभां सञ्चरद्राजहंसैः ॥५४॥
परिषदमथ दत्तद्वारपालप्रवेशो यदुभिरवहितात्मा भूषितां सम्प्रविश्य ।
कृतविनतिनिषण्णो विष्णुमूचेऽरिजिष्णुं प्रभुमवसरवेदी यादवानां समक्षम् ॥५५॥
शृणुत विनुत राजा राजताद्रौ सुकेतुर्नमिविनमिकुलश्रीवैजयन्तीसुकेतुः ।
अधिवसति रथं यो नूपुरं चक्रवालं पुरमिह नयदक्षो दक्षिणश्रेण्यधिष्ठम् ॥५६॥
जलजशयनचापैस्त्वां परीक्ष्यासुनाहं तव निकटमिहाशु प्रेषितः प्रेमपूर्वम् ।
भज वरदवृतस्त्वं सत्यभामावरत्वं खचरभुवनभूत्यै सर्वकल्याणमूलम् ॥५७॥
सकलयदुमनोज्ञं दूतवाक्यं निशम्य प्रतिवचनमुपेन्द्रोऽदादिति प्रीतचित्तः ।
[1]खगधनपतिसृष्टा रत्नशैले मयि द्राक् निपततु वसुधारा सत्यभामाभिधाना ॥५८॥

कुपित हो रहा था एवं आँसुओंसे जिसका गला रुँधा हुआ था ऐसी जीवद्यशा अपने पिता जरासंधके पास पहुँची ॥५२॥

अथानन्तर किसी समय ऊपरकी ओर मुख कमल किये हुए मथुरानिवासी समस्त लोगोंने आकाशमें विद्याधरोंके राजा सुकेतुका दूत देखा। वह दूत हर्षसे लहराते हुए आकाश रूपी समुद्रमें बड़े वेगसे आ रहा था, मच्छकी उत्कट लीलाको धारण कर रहा था, और देदीप्यमान मणियोंके आभूषणोंसे युक्त था ॥५३॥ उसका शरीर चन्दनसे आर्द्र था तथा वह महीन और श्वेत वस्त्र पहिने था इसलिए मानसरोवरमें स्नान करनेवाले हंसके समान जान पड़ता था। वह शीघ्र ही प्रत्येक दिशाओंमें विचरण करनेवाले श्रेष्ठ राजाओं (पक्षमें राजहंस पक्षियों) से गङ्गा नदीके समान सुशोभित मथुरानगरीकी गलीमें आया ॥५४॥ तदनन्तर द्वारपालने जिसे प्रवेश दिया था ऐसा वह दूत, यादवोंसे सुशोभित सभामें सावधानीसे प्रविष्ट हो नमस्कार कर बैठ गया। फिर कुछ देर बाद अवसरको जाननेवाले उस दूतने यादवोंके समक्ष, शत्रुओंको जीतनेवाले कृष्णसे निम्नाङ्कित वचन कहे ॥५५॥ उसने कहा कि हे राजाओंके द्वारा स्तुत ! आप मेरी प्रार्थना सुनिए—विजयार्ध पर्वतके ऊपर एक सुकेतु नामका राजा है जो नमि और विनमिकी कुललक्ष्मीकी मानो विजय-पताका है, नीतिमें अत्यन्तमें चतुर है और दक्षिण श्रेणिमें स्थित रथनूपुरचक्रवाल नामक नगरमें रहता है ॥५६॥ शङ्ख फूकना, नागशय्या पर चढ़ना और धनुष चढ़ाना इन लक्षणोंसे आपकी परीक्षा कर उसने शीघ्र ही प्रेमपूर्वक मुझे यहाँ आपके पास भेजा है तथा कहलाया है कि यद्यपि आप उत्तमोत्तम वस्तुओंको प्रदान करनेवाले लोगोंसे घिरे रहते हैं तथापि मेरी एक तुच्छ प्रार्थना है वह यह कि आप मेरी पुत्री सत्यभामाको स्वीकृत करलें। आपका यह कार्य विद्याधर लोकके वैभवको बढ़ाने वाला एवं समस्त कल्याणोंका मूल होगा ॥५७॥ समस्त यादवोंके लिए रुचिकर दूतके वचन सुन कर प्रसन्नचित्त कृष्णने यह उत्तर दिया कि विद्याधरोंके राजा सुकेतु रूपी कुबेरके द्वारा रची सत्यभामा नामक रत्नोंकी धारा मुझ रत्नाचलपर शीघ्र ही पड़े। भावार्थ—मुझे सत्यभामाका वर होना स्वीकृत है अथवा कुछ पुस्तकोंमें धनपतिके स्थानपर नगपति पाठ है इसलिए इस श्लोकका यह अर्थ भी होता है कि विद्याधर रूपी विजयार्ध पर्वतके द्वारा रची सत्यभामा रूपी जलकी धारा मुझ रत्नाचलपर शीघ्र ही पड़े ॥५८॥

---

१. खगनगपतिसृष्टा ग० ।

प्रतिविहितसुपूजः खेचरेन्द्रस्य दूतः प्रमुदितमतिरित्वा स्वास्पदं स्वामिनेऽसौ ।
वरगुणनुतिपूर्वं सर्वकार्यस्य सिद्धिं समभणदिति तोषी[1] तोषिणे[2] सप्रियाय ॥५९॥
भुवि हरिबलदेवौ[3] भ्रातरौ भ्राजमानौ प्रतिहतपरतेजोरूपकान्ती विदित्वा ।
निजवचनहरास्यात्खेचरेन्द्रः सुकेतुः खचरप-रतिमालश्चागतौ कन्यकाभ्याम् ॥६०॥
रतिमिव रतिमालो रूपतो रेवतीं स्वां दुहितरमतिकान्तां देहजां ज्यायसेऽदात् ।
अतिमुदितसुकेतुः सत्यभामां प्रभायाः स्वयमुपपदवत्या गर्भजां केशवाय ॥६१॥
कुचकलशकल[4]त्रोदारभारातिखिन्नाः शिथिलवसनकाञ्चीकेशपाशोत्तरीयाः ।
ननृतुरिह विवाहे नूपुरारावरम्याः क्षितिचरखचराणां योषितः शोचिवेषाः ॥६२॥
प्रथमनववधूकौ नीलपीताम्बरौ तौ विविधमणिविभूषाज्योतिरुद्भासिताङ्गौ ।
यदुनृपतिपरीतौ वीक्ष्य पुत्रावतोषीद्यदुयुवतिसमग्रा रोहिणी देवकी च ॥६३॥
प्रथममदनरङ्गे शार्ङ्गिणः सत्यभामा हृदयमहरदिष्टा रेवती शीरपाणेः ।
गुणितगुणकलानां सुप्रयोगै[5]स्तयोस्तावुचितकरणकाले न स्खलन्ति प्रगल्भाः ॥६४॥
अथ सकलुषभावा सा जरासन्धराजं जलनिधिमिव वेला व्याकुला क्षोभयन्ती ।
अतिविततत[6]मालोनीलकेशाप्यरोदीद्यदुकुलकृतदोषं कंसयोषिद्वदन्ती ॥६५॥

तदनन्तर कृष्णकी ओरसे जिसका सत्कार किया गया था और जिसकी बुद्धि अत्यन्त प्रसन्न थी ऐसा राजा सुकेतुका वह दूत अपने स्थानपर चला गया। वहाँ जा कर उसने पहले कृष्णके उत्तम गुणोंकी स्तुति की उसके पश्चात् संतुष्ट हो कर, वल्लभाके साथ बैठे हुए संतोषी राजा सुकेतुके लिए सर्व कार्यके सिद्ध होनेकी सूचना दी ॥५९॥ 'पृथिवीपर श्री कृष्ण और बलदेव दोनों भाई अत्यन्त देदीप्यमान हैं तथा शत्रुओंके तेज, रूप और कान्तिको खण्डित करनेवाले हैं' इस प्रकार अपने दूतके मुखसे जान कर विद्याधरोंका राजा सुकेतु और उसका भाई रतिमाल अपनी-अपनी कन्याओंके साथ मथुरा आ पहुँचे ॥६०॥ रतिमालकी कन्याका नाम रेवती था और वह रूपमें साक्षात् रतिके समान जान पड़ती थी। रतिमालने अपनी वह सुन्दर कन्या बड़े भाई बलभद्रके लिए दी और अत्यन्त प्रसन्न सुकेतुने स्वयंप्रभा रानीके गर्भसे उत्पन्न अपनी सत्यभामा नामक पुत्री कृष्णके लिए दी ॥६१॥ इस विवाह-मङ्गलके अवसर पर जो स्तन रूपी कलश और नितम्बोंके बहुत भारी भारसे खिन्न थीं, जिनके वस्त्र, मेखला, केश-पाश और उत्तरीय वस्त्र शिथिल हो रहे थे, जो नूपुरोंकी झनकारसे मनोहर जान पड़ती थीं और उज्ज्वल वेषको धारण करनेवाली थीं ऐसी भूमिगोचरी एवं विद्याधरोंकी स्त्रियोंने नृत्य किया था ॥६२॥ जो पहली पहली नई वधुओंसे सहित थे, नील और पीत वस्त्रके धारक थे, नाना प्रकारके मणिमय आभूषणोंकी कान्तिसे जिनके शरीर देदीप्यमान हो रहे थे तथा जो चारों ओर बैठे हुए यदुवंशी राजाओंसे घिरे हुए थे ऐसे अपने पुत्रोंको देख कर यादवोंकी स्त्रियोंसे युक्त रोहिणी तथा देवकी अत्यधिक संतुष्ट हो रही थीं ॥६३॥ प्रथम समागममें ही सत्यभामाने कृष्णके तथा अतिशय प्रिय रेवतीने बलभद्रके हृदयको हर लिया था। इसी प्रकार कृष्ण तथा बलभद्रने भी अभ्यस्त गुण और कलाओंके उत्तमोत्तम प्रयोगोंसे उन दोनोंका हृदय हर लिया था सो ठीक ही है क्योंकि चतुर मनुष्य उचित कार्यके करनेके समय कभी नहीं चूकते हैं ॥६४॥

तदनन्तर जिसका हृदय अत्यन्त कलुषित था, जो अत्यधिक व्याकुल थी और जिसके तमाल पुष्पके समान काले काले केश बिखरे हुए थे ऐसी कंसकी स्त्री जीवयशा, राजा जरा-सन्धके पास जाकर यदुवंशियोंके द्वारा किये हुए दोष का बखान करती हुई रोने लगी तथा

१. तेषां म० । २. तोषयो म०, ग० । ३. हरबलदेवौ म० । ४. नितम्ब । ५. सुप्रयोगौ तयो-म० । ६. तमालानील-म० ।

त्वयि सकलधरित्रीं शासति ध्वस्तनाथा कथमहमुपयाता तात वैधव्यदुःखम् ।
इदमपि खलु सोढं वैरनिर्यातनार्थं मदमुदितयदूनां रक्तपङ्कैः शिरोभिः ॥६६॥
दुहितुरिति विलापप्रायमाकर्ण्य वाक्यं नरपतिरवदीत्स्मुञ्च बालेऽतिशोकम् ।
जगति हि भवितव्यं भाविनो दैवयोगादगणितपरवीर्यं दैवमत्र प्रधानम् ॥६७॥
पशुरपि निरपायं निर्गमोपायमार्गं विमृशति वधशङ्कः क्षेत्रमादौ विविक्षुः ।
स्फुटमिदमपि वृत्तं विस्मृतं मर्तुकामैस्तव पतिमतिमत्तैर्यादवैर्मारयद्भिः ॥६८॥
तव पदशरणा[1]स्तेऽकण्टका यद्यपि स्युः सहबलकुलशाखास्ते तथाप्याशु वत्से ।
श्रुतिपथमति[2]वृत्ताः सन्ति म[3]त्क्रोधवर्षद्दवदहनशिखाभिर्भस्मिता ध्वस्तसंज्ञाः ॥६९॥
प्रियवचनपयोभिर्देहजाक्रोधवह्निप्रततिमुपशमय्य क्षुब्धकोपानलः सः ।
यवननिधनकालं कालकल्पं तनूजं यदुजनिधनहेतोरादिदेशाशु राजा ॥७०॥
चलजलधिसमानेनाभ्यमित्रं बलेन द्विपचतुरतुरङ्गस्यन्दनाद्येन गत्वा ।
स लघु दश च सप्त[4]प्रयुद्धानि युद्ध्वा यदुभिरतुलमालावर्तशैले ननाश ॥७१॥
पुनरपि जितजेयं भ्रातरं मागधो प्रागजितमपरपूर्वं प्राहिणोत्प्राणतुल्यम् ।
प्रलयशिखिशिखालीघस्मरः स स्वयोगात्स्वबलपवननुन्नो[5] द्विट्जगद्ग्रासलोलः ॥७२॥

जिस प्रकार वेला समुद्रको क्षुभित कर देती है उसी प्रकार उसने राजा जरासंधको क्षुभित कर दिया ।।६५।। वह कह रही थी कि हे तात ! जब आप समस्त पृथिवीका शासन कर रहे हैं तब मैं पतिरहित हो वैधव्यके दुःखको कैसे प्राप्त हो गई ? हे पिताजी ! अब तक मैंने जो यह वैधव्यका दुःख सहा है वह गर्वसे फूले यादवोंके रक्त रूप पङ्कसे युक्त शिरोंसे वैरका बदला चुकानेके लिए ही सहा है ।।६६।। इस प्रकार प्रायः विलापसे युक्त पुत्रीके वचन सुनकर राजा जरासंधने कहा कि बेटी ! अत्यधिक शोक छोड़ । इस संसारमें जो होता है वह होनहार दैवके योगसे ही होता है । दूसरोंकी शक्तिका तिरस्कार करनेवाला दैव ही इस संसारमें प्रधान है ।।६७।। खेतमें घुसनेका इच्छुक पशु भी वधकी शंका कर सबसे पहले निकलनेके लिए निरुपद्रव मार्गका विचार कर लेता है परन्तु तेरे पतिको मारते हुए इन अत्यन्त मत्त यादवोंने इस स्पष्ट बातको भी भुला दिया इससे सिद्ध है कि ये मरना चाहते हैं ।।६८।। हे वत्से ! ये भले ही अब तक तेरे चरणोंकी शरण प्राप्त कर निष्कण्टक रहे हों और भले ही ये बल तथा कुलकी शाखाओंसे युक्त हों परन्तु यह निश्चित है कि ये शीघ्र ही मेरे क्रोधसे बरसनेवाली दावानलकी ज्वालाओंसे भस्म होने वाले हैं, इनका नाम भी नष्ट हो जाने वाला है और ये श्रवण मार्गको अतिक्रान्त कर चुके हैं—अब इनका नाम भी नहीं सुनाई देगा ।।६९।।

इस प्रकार प्रिय वचन रूपी जलके द्वारा पुत्रीकी क्रोधाग्निके समूहको शान्त कर क्षोभको प्राप्त हुए क्रोधानलसे युक्त राजा जरासंधने यादवोंको मारनेके लिए यमराजके तुल्य अपने कालयवन नामक पुत्रको शीघ्र ही आदेश दिया ।।७०।। कालयवन, चञ्चल समुद्रके समान दिखनेवाली हाथी घोड़ा और रथ आदिसे युक्त सेनाके साथ शीघ्र ही शत्रुके सम्मुख चला और यादवोंके साथ सत्रह बार भयङ्कर युद्ध कर अतुल मालावर्त नामक पर्वत पर नष्ट हो गया–मर गया ।।७१।। तदनन्तर राजा जरासंधने शीघ्र ही अपने भाई अपराजित को भेजा जो कि शत्रुओंको जीतने वाला था, प्राणोंके तुल्य था, अपने संयोगसे प्रलय कालकी अग्निकी शिखाओंके समूहको नष्ट करने वाला था, अपनी सेना रूपी प्रबल पवनसे प्रेरित था, और शत्रु रूपी जगत्के ग्रसनेके

१. शरणाशा कण्टका म०, क०, ग०, ङ० । २. मतिमत्ताः क०, ख०, ग०, ङ०, म० । ३. न क्रोध–क० । ४. व्युग्रयुद्धानि म० । ५. द्विट्गजग्रास–ग० ।

युदुकुलजशतानि त्रीणि [1] स प्रीणितास्तैर्यदुभिररिषु चत्वारिंशतं षट् च युद्ध्वा ।
श्रमनुदमिव वीरो वीरशय्यां यशस्वी हरिशरमुखपीतप्राणसारोऽध्यशेत ॥७३॥
प्रमदमथ वहन्तः सन्ततं संवसन्तो[2] हरिपुरि मथुरायां माथुरैः पौरलोकैः ।
हरिहलधरवीरावार्यवीर्यावलेपप्रतिहतरिपुशङ्काः शौरयो रेमिरेऽमी ॥७४॥
शमयति रिपुलोकोद्दारदावावलेपं जनयति जनबन्धुर्बन्धुलोकप्रहर्षम् ।
जिनमतघनवर्यावारिधाराततिर्भूवलयफलसमृद्धिः श्रीयशोमालिनीयम् ॥७५॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कंसापराजितवधवर्णनो नाम षट्त्रिंशः सर्गः ।

लिए सतृष्ण था ॥७२॥ वीर अपराजितने संतुष्ट होकर शत्रुओंके बीच यादवोंके साथ तीन सौ छयालिस बार युद्ध किया परन्तु अन्तमें वह श्रीकृष्णके बाणोंके अग्रभागसे निष्प्राण हो पृथ्वी पर गिर पड़ा। पृथिवी पर पड़ा यशस्वी अपराजित ऐसा जान पड़ता था मानो थकावटको दूर करनेवाली वीरशय्या पर ही शयन कर रहा हो ॥७३॥ अथानन्तर जो निरन्तर हर्षको धारण कर रहे थे, कृष्णपुरी मथुरामें निवास करते थे और वीर कृष्ण तथा बलभद्रके अवार्य वीर्यके गर्वसे जिनकी शत्रुकी शंका नष्ट हो गई थी ऐसे यादव लोग मथुरावासी नागरिक जनोंके साथ क्रीड़ा करने लगे ॥७४॥ गौतम स्वामी कहते हैं कि जो समस्त जीवोंके लिए बन्धुके समान है, पृथिवी मण्डलके फलों की समृद्धिको बढ़ाने वाली है तथा लक्ष्मी और यशकी मालासे सहित है ऐसी यह जिनेन्द्र मतरूपी मेघके जलकी धारा शत्रुसमूह रूपी प्रचण्ड दावानलके गर्वको शान्त करती है और बन्धुजनोंके प्रकृष्ट बहुत भारी हर्षको उत्पन्न करती है ॥७५॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें कंस और अपराजितके वधका वर्णन करनेवाला छत्तीसवाँ सर्ग पूर्ण हुआ ॥३६॥

१. सप्रीणितास्ते म० । २. वंशहेतोः ख., संवहन्तो म०, क० । शं वहन्तो ग० । ३. हरिरिपु म०, हरिपुर० ख० ।

सप्तत्रिंशः सर्गः

वंशस्थवृत्तम्

अथात्र यद्वृत्तमतीव पावनं पुरैव तु श्रेणिक लोकहर्षणम् ।
दशार्हमुख्यस्य [1]सुसौर्यवासिनः शृणु प्रवक्ष्येऽवहितस्तदद्भुतम् ॥ १ ॥
जिनस्य नेमेस्त्रिदिवावतारतः पुरैव षण्मासपुरस्सरा सुरैः ।
प्रवर्तिता तज्जननावधिर्गृहे हिरण्यवृष्टिः पुरुहूतशासनात् ॥ २ ॥
तया पतन्त्या वसुधारयार्धभाक्त्रिकोटिसंख्यापरिमाणया जगत् ।
प्रतर्पितं प्रत्यहमर्थि सर्वतः क पात्रभेदोऽस्ति धनप्रवर्षिणाम् ॥ ३ ॥
दिशां मुखेभ्यः समितास्तदाश्रिता दिशां कुमार्यः परिचर्यया शिवाम् ।
दिशां च चक्रस्य जयं जगत्त्रये न्यशाम्यपरयेन जिनेन जिष्णुना ॥ ४ ॥
समेत्य पत्यातिशयप्रदर्शनादतीव संहृष्टमतिः शिवान्यदा ।
ददर्श सा [2]सुप्तमिमान् निशान्तरे प्रशंसितान् स्वप्नवरान् हि षोडश ॥ ५ ॥
समन्ततोऽश्रान्तमदाम्बुनिर्झरः प्रतिध्वनिव्याप्तदिगिन्द्रपो द्विपः ।
तथा तमालासितभृङ्गझङ्कृतिरलोकि कैलास इवाचलाचलः[3] ॥ ६ ॥
सुशृङ्गमुत्तुङ्गककुत्खनत्खुरं प्रलम्बसास्नायतबालधीक्षणम् ।
सितं घनोद्रेकितधीरमम्बिकामहोक्षमक्षिप्रियमैक्षत क्षणम् ॥ ७ ॥

अथानन्तर—गौतम स्वामी कहते हैं कि हे श्रेणिक ! दशार्होंमें मुख्य सौर्यपुर निवासी राजा समुद्रविजयके यहाँ भगवान्के गर्भमें आनेके पहलेसे ही जो लोकको हर्षित करनेवाला परम पवित्र आश्चर्य हुआ था उसे मैं कहता हूँ सो सावधान होकर सुनो ॥१॥ भगवान् नेमि जिनेन्द्रके स्वर्गावतारसे छह माह पहलेसे लेकर जन्म पर्यन्त—पन्द्रह मास तक इन्द्रकी आज्ञासे राजा समुद्रविजयके घर देवोंने धनकी वर्षा जारी रक्खी ।।२।। वह धनकी धारा प्रतिदिन, तीन बार साढ़े तीन करोड़की संख्याका परिमाण लिये हुए पड़ती थी और उसने सब ओर याचक जगत्को संतुष्ट कर दिया था सो ठीक ही है क्यों कि धनको वर्षा करनेवालोंको पात्र भेद कहाँ होता है ? ।।३।। उस समय पूर्वादि दिशाओंके अग्रभागसे आई हुई दिक्कुमारी देवियाँ परिचर्या द्वारा माता शिवादेवीकी सेवा कर रही थीं और उससे यह सूचित कर रही थीं कि जो विजयी जिन बालक माताके गर्भमें आनेवाला है उसने तीनों जगत्में समस्त दिशाओंके समूहको जीत लिया है ॥४॥ पतिके साथ मिलकर नाना प्रकारके अतिशय देखनेसे जिसकी बुद्धि अत्यन्त हर्षित हो रही थी ऐसी शिवादेवीने एक दिन रात्रिमें सोते समय नीचे लिखे सोलह उत्तम स्वप्न देखे ।।५।।

पहले स्वप्नमें उसने इन्द्रका वह ऐरावत हाथी देखा जिसके सब ओरसे निरन्तर लगातार मदरूपी जलके निर्झर झर रहे थे, जिसने अपनी ध्वनिसे दिशाओंको व्याप्त कर रक्खा था, जिसपर तमालके समान काले-काले भ्रमर झङ्कार कर रहे थे और जो कैलास पर्वतके समान स्थिर था ।।६।। दूसरे स्वप्नमें अम्बिकाका वह महावृषभ देखा जिसके सुन्दर सींग थे जिसकी डोकांड ऊँची उठ रही थी, जिसके खुर पृथिवीको खोद रहे थे, जिसकी सास्ना—गलकम्बल अत्यन्त लम्बी थी, जिसकी पूँछ और आँखें अत्यन्त दीर्घ थीं, जो रङ्गमें सफेद था, मेघकी गर्जनाके समय

---

१. सुशौर्यवासिनः घ० । २. सुप्तं यथा स्यात्तथा । पूततमान्–ख० । स्वप्न इमान् म० ।
३. अचलाचलः इति, अचलाचलः स्थिर इत्यर्थः । चलाचलः ख०, चलाऽमलः क० इवाचलोऽचलः ग० ।

विलङ्घिताचलमाप्लुतमग्रगोचरं मृगाङ्कलेखाङ्कुशदंष्ट्रमायतम् ।
दिगन्तविश्रान्तनिनादमाविशत्शरत्पयोदाभमिभारिमैक्षत ॥ ८ ॥
महेभकुम्भाभकुचाभिभैः शुभैः कृताभिषेका कुटगन्धवारिभिः ।
कर[2]श्रिताम्भोजपुटां ददर्श सा विकासिपद्मासनवर्तिनीं श्रियम् ॥ ९ ॥
स्रजौ प्रलम्बे विमलाम्बरे वरे रजोरुणीभूतषडङ्घ्रिमण्डले ।
भुजे निजे वा कुसुमातिकोमले सजागरेवावहिता व्यलोकत ॥ १० ॥
निरस्य नैशं निशितैरुपागतं करैस्तमोजालमलं निशाकरम् ।
निरभ्रिते व्योम्नि प्रपश्यति स्म सा स्थिराट्टहासं रजनीवरस्त्रियाः ॥ ११ ॥
दिनं दिनं दृश्यमुखं दिवाकरं [3]सुसान्ध्यसिन्दूरपरागपिञ्जरम् ।
पुरन्दराशासुपुरन्ध्रिनन्दनं चिरं धृतं दृष्टिसुखं ददर्श सा ॥१२॥
तडिच्चलाङ्गं सरसीवराङ्गनाविलोलसल्लोचनयुग्ममायतम् ।
परस्परस्नेहभरं तयारमद् व्यलोकि सन्मत्स्ययुगं विमत्सरम् ॥१३॥
सुसौरभाम्भोभरकुम्भयुग्मकं [4]मुखाहिताम्भोरुहमम्बुजेक्षणा ।
सुशातकुम्भात्मकमभ्यलोकत स्वभावसूत्थकुचकुम्भसन्निभम् ॥१४॥
शुभाम्बुपूर्णं जलपुष्पराजितं सुराजहंसादिविहङ्गसङ्गतम् ।
महासरोऽदर्शि ततो मनोहरं मनो निजं वा शुचि निर्मलं तया ॥१५॥

गम्भीर शब्द कर रहा था तथा नेत्रोंके लिए अत्यन्त प्रिय था ॥७॥ तीसरे स्वप्नमें एक ऐसा सिंह देखा जो पर्वतोंको लाँघनेवाला था, पर्वतके अग्रभागपर स्थित था, चन्द्रमाकी कला अथवा अंकुशके समान दाँढ़ोंको धारण करनेवाला था, शरीरका अत्यन्त लम्बा था, जिसका शब्द दिशाओंके अन्तमें विश्राम कर रहा था और जो शरद् ऋतुके घुमड़ते हुए मेघके समान सफ़ेद था ॥८॥ चौथे स्वप्नमें वह लक्ष्मी देखी जो किसी बड़े हाथीके गण्डस्थलोंके समान स्थूल स्तनोंसे युक्त थी, शुभ हाथी घड़ोंमें रखे हुए सुगन्धित जलसे जिसका अभिषेक कर रहे थे, जो अपने हाथमें कमल लिये हुए थी और खिले हुए कमलोंके आसनपर बैठी थी ॥९॥ पाँचवें स्वप्नमें जागती हुईके समान सावधान शिवादेवीने निर्मल आकाशमें लटकती हुई दो ऐसी उत्तम मालाएँ देखीं जिन्होंने अपनी परागसे भ्रमरोंके समूहको लाल-लाल कर दिया था और जो अपनी भुजाओंके समान फूलोंसे भी कहीं अधिक सुकोमल थीं (पक्षमें फूलोंके द्वारा अत्यन्त कोमल थीं) ॥१०॥ छठवें स्वप्नमें उसने निरभ्र आकाशके बीच ऐसा चन्द्रमा देखा जो अपनी तीक्ष्ण किरणों (पक्षमें हाथों) से रात्रिके सघन अन्धकारके समूहको नष्टकर उदित हुआ था और रात्रिरूपी स्त्रीके स्थिर अट्टहासके समान जान पड़ता था ॥११॥ सातवें स्वप्नमें ऐसा सूर्य देखा जिसका मुख सम्पूर्ण दिन दर्शनीय था, जो संध्याकी लालीरूपी सिन्दूरकी परागसे पिञ्जर वर्ण था, पूर्व दिशारूपी स्त्रीके पुत्रके समान जान पड़ता था और नेत्रोंके लिए चिरकाल तक सुख उत्पन्न करनेवाला था। ॥१२॥ आठवें स्वप्नमें उसने मत्स्योंका वह युगल देखा जो बिजलीके समान चञ्चल शरीरका धारक था, सरसी रूपी उत्तम स्त्रीके चञ्चल एवं समीचीन नेत्रोंके युगलके समान जान पड़ता था, लम्बा था, पारस्परिक स्नेहसे भरा हुआ था, क्रीड़ा कर रहा था और ईर्ष्यासे रहित था ॥१३॥ नौवें स्वप्नमें कमललोचना शिवादेवीने अत्यन्त सुगन्धित जलसे भरे हुए दो ऐसे कलश देखे जिनके मुख-पर कमल रखे हुए थे, जो उत्तम स्वर्णसे निर्मित थे और स्वभावसे उठते हुए कुचकलसके समान जान पड़ते थे ॥१४॥ तदनन्तर दशवें स्वप्नमें उसने एक ऐसा बड़ा सरोवर देखा जो शुभ जलसे भरा हुआ था, कमलोंसे सुशोभित था, राजहंस आदि उत्तम पक्षियोंसे युक्त था, मनको हरण करनेवाला था और अपने मनके समान पवित्र एवं निर्मल था ॥१५॥

१. विलम्बित—म० । २. करोद्धृताम्भोजपुटां ख० । ३. सुसाध्य—म० । ४. मुखावहिताम्भोरुह—म० ।

प्रघूर्णितोत्तुङ्गतरङ्गभङ्गुरं प्रवालमुक्तामणिपुष्पशोभितम् ।
महार्णवं फेनिलमुद्धतं भ्रमद्विभीषणग्राहगृहं निरैक्षत ॥१६॥
नखाग्रदंष्ट्रादृढदृष्टिभासुरज्वलत्सटाटोपमृगेन्द्रधारितम् ।
मणिप्रभारञ्जितदिग्वधूमुखं ददर्श सिंहासनमासनं श्रियः ॥१७॥
विचित्रभक्ति ध्वजकोटिसङ्कुलं[1] सुवैजयन्तीभुजमालयानटत् ।
प्रलम्बमुक्तामणिमालिकोज्ज्वलं विमानमालोकि तया नभस्तले ॥१८॥
[2]फणामणिद्योतविभिन्नभूतमःफणीन्द्रकन्याकलगीतसंकुलम् ।
ज्वलन्मणि प्रैक्षि भुवः समुद्गतं फणीन्द्रभास्वद्भवनं महत्तया ॥१९॥
सपद्मरागोज्ज्वलवज्रपूर्वकं प्रकृष्टमाणिक्यमहाशिखाकुलम् ।
व्यलोकतेन्द्रायुधरुद्धदिङ्मुखं सुरत्नराशिं गगनस्पृशं शिवा[3] ॥२०॥
शिखाकरालं शिखिनं मुखं दिशां प्रकाशयन्तं[4] शुचिशोचिषा निशि ।
ददर्श सन्दर्शितसौम्यविग्रहं सविग्रहा श्रीरिव तोषपोषिणी ॥२१॥
अनन्तरं स्वप्नगणस्य कम्पयन् सुरासनान्याविशदम्बिकाननम् ।
सितेभरूपो भगवान् दिवश्च्युतः प्रकाशयन् कार्तिकशुक्लषष्ठिकाम् ॥२२॥

ग्यारहवें स्वप्नमें एक ऐसा महासागर देखा जो उठती हुई ऊँची-ऊँची लहरोंसे भङ्गुर था, मूँगा, मोती, मणि और पुष्पोंसे सुशोभित था, फेनसे युक्त था, उद्धत था, तथा घूमते हुए भयंकर मगरमच्छोंका घर था ॥ १६ ॥ बारहवें स्वप्नमें लक्ष्मीका आसनभूत एक ऐसा सिंहासन देखा जिसे नखोंके अग्रभाग एवं डाँढ़ोंसे मजबूत, दृष्टिसे देदीप्यमान और चमकती हुई सटाओंसे युक्त सिंह धारण किये हुए थे तथा मणियोंकी कान्तिसे जिसने दिशा रूप स्त्रियोंके मुखको रक्त वर्ण कर दिया था ॥ १७ ॥ तेरहवें स्वप्नमें [उसने आकाशतलमें ऐसा विमान देखा जो नाना प्रकारके बेल-बूटोंसे युक्त था, ध्वजाओंके अग्रभागसे चंचल था, उत्तम पताका रूपी भुजाओंकी मालासे जो नृत्य करता हुआ-सा जान पड़ता था, और जो लटकती हुई मोतियों और मणियोंकी मालाओंसे उज्ज्वल था ॥ १८ ॥ चौदहवें स्वप्नमें उसने नागेन्द्रका एक ऐसा विशाल देदीप्यमान भवन देखा जो फणाओंपर स्थित मणियोंके प्रकाशसे पृथिवीके अन्धकारको नष्ट करनेवाली नागकन्याओंके मधुर संगीतसे व्याप्त था, देदीप्यमान मणियोंसे जगमगा रहा था और पृथिवीसे ऊपर प्रकट हुआ था ॥ १९ ॥ पन्द्रहवें स्वप्नमें शिवा देवीने उत्तम रत्नोंकी एक ऐसी राशि देखी जो पद्मरागमणि तथा चमकते हुए हीरोंके सहित थी, उत्तमोत्तम मणियोंकी बड़ी-बड़ी शिखाओंसे व्याप्त थी, इन्द्र-धनुषसे दिशाओंके अग्रभागको रोकने वाली थी, तथा आकाशका स्पर्श कर रही थी ॥२०॥ और शरीरधारिणी लक्ष्मीके समान संतोषको पुष्ट करने वाली शिवा देवीने सोलहवें स्वप्नमें ऐसी अग्नि देखी जो शिखाओंसे भयंकर थी, रात्रिके समय अपनी उज्ज्वल किरणोंसे दिशाओंके अग्रभागको प्रकाशित कर रही थी तथा अपना सौम्य रूप दिखला रही थी ॥ २१ ॥ इस प्रकार स्वप्न दर्शनके बाद कार्तिक शुक्ला षष्ठीके दिन देवोंके आसनोंको कम्पित करते हुए भगवान्ने स्वर्गसे च्युत हो सफेद हाथीका रूप धर कर माताके मुखमें प्रवेश किया। भावार्थ—आनुपूर्वी नामकर्मके उदयसे भगवानके आत्म-प्रदेशोंका आकार तो पूर्व शरीरके समान ही रहता है। यहाँ जो 'सफेद हाथीका रूप धर कर' कहा गया है उसका तात्पर्य यह है कि माताने सोलह स्वप्न देखनेके बाद देखा था कि एक सफेद हाथी आकाशसे

१. द्विज-(?) म० । २. फणामणीनां द्योतेन विभिन्नं भूतमो याभिः तथाभूता याः फणीन्द्रकन्यास्तासां कलं मधुरं यद् गीतं तेन संकुलम् । ३. शुभा म० । ४. शुचिरोचिषां म० ।

पुनः पुनर्जागरणेन सान्तरानमन्तरायानिति तान् विलोक्य सा ।
विनिद्रनेत्रा अपगीतमङ्गलैरनालसा तल्पतलं ततोऽत्यजत् ॥२३॥
प्रभातकाले कृतमङ्गलाङ्गिका कुतूहलादेत्य पतिं प्रणामिनी ।
क्रमेण तान् स्वप्नवरान्न्यवेदयत् प्रसन्नधीरित्यगदीत्स तत्फलम् ॥२४॥
प्रिये यदुत्पत्तिमियं वदत्यहर्दिनं पतन्ती वसुवृष्टिरद्भुता ।
सुदिक्कुमार्यो भवतीमुपासते यदर्थमास्थात्त्वयि सोऽद्य तीर्थकृत् ॥२५॥
किमत्र ते स्वप्नफलं निगद्यते वरोरु यत्तीर्थकरप्रसूरसि ।
प्रपत्स्यते सोऽपि महान् महीयसां जगत्त्रये यत्तदवेहि कथ्यते ॥२६॥
[2]अनेकपोऽनेक[3]पलोकनादलं विलम्बितानेकपविभ्र[4]मो गतैः ।
जगत्त्रये ते तनयस्तनूदरि प्रकाममेकाधिपतित्वमेष्यति ॥२७॥
अलंकरिष्यत्यकलङ्कधीः कुलं जगत्त्रयं चात्र जगद्गुरुर्गुणैः ।
गवां कुलं वा वृषभो वृषेक्षणाद्वृषेक्षणः स्कन्धधृतिः सुतस्तव ॥२८॥
महावलेपानखिलाननेकपान् करिष्यते सिंहवदुज्झितोन्मदान् ।
अनन्तवीर्यः[1] स हि सिंहदर्शनात् महैकधीरोऽन्ते[5]तपोवनेश्वरः ॥२९॥

उतर कर हमारे मुखमें प्रविष्ट हुआ है ॥२२॥ इस प्रकार बार-बार जागनेसे जिनमें अन्तर पड़ रहा था ऐसे पूर्वोक्त निरन्तराय–निर्विघ्न सोलह स्वप्नोंको देख कर जय-जयकार और मङ्गलमय संगीतसे माता शिवा देवीके नेत्र निद्रारहित हो गये तथा आलस्यरहित होकर उसने शय्या छोड़ दी ॥ २३ ॥ प्रातःकाल होनेपर जिसने शरीरपर मङ्गलमय अलंकार धारण किये थे ऐसी शिवा देवीने कुतूहल वश पतिके पास जाकर उन्हें प्रणाम किया तथा रात्रिमें देखे हुए सब स्वप्न क्रम-क्रमसे सुना दिये। तदनन्तर प्रसन्न बुद्धिके धारक राजा समुद्रविजयने उन स्वप्नोंका इस प्रकार फल कहा—॥ २४ ॥

हे प्रिये ! यह प्रतिदिन पड़ने वाली आश्चर्यकारिणी धनकी वृष्टि जिसकी उत्पत्ति कह रही है, तथा दिक्कुमारी देवियाँ जिसके लिए आपकी सेवा करती हैं वह तीर्थंकर आज तुम्हारे गर्भमें आकर विराजमान हुआ है ॥ २५ ॥ हे सुन्दर जाँघोंवाली प्रिये ! यहाँ तेरे स्वप्नोंका फल क्या कहा जाय ? क्योंकि तू तीर्थंकरकी माता है। तेरे तीर्थंकर पुत्र उत्पन्न होगा। यद्यपि स्वप्नोंका इतना ही फल पर्याप्त है तथापि वह तीनों लोकोंका परम गुरु जिस फलको प्राप्त होगा वह कहा जाता है सो समझ ॥ २६ ॥ हे कृशोदरि ! तूने स्वप्नमें अनेकप—हाथी देखा है उसका फल यह है कि तेरा पुत्र अनेकप—अनेक जीवोंकी रक्षा करने वाला होगा। अपनी चालसे हाथीकी चालको विडम्बित करनेवाला होगा और तीनों जगत्‌में इच्छाके अनुरूप एक आधिपत्यको प्राप्त होगा ॥ २७ ॥ हे प्रिये ! बैल देखनेसे तेरा पुत्र निर्मल बुद्धिका धारक, तथा जगत्‌का गुरु होगा और जिस प्रकार बैल गायोंके कुलको अलंकृत करता है उसी प्रकार वह गुणोंसे अपने कुल तथा तीनों जगत्‌को अलंकृत करेगा। वह बैलके समान उज्ज्वल नेत्र तथा उन्नत कन्धोंको धारण करनेवाला होगा ॥२८॥ सिंह देखनेसे वह अनन्त वीर्यका धारक होगा और जिस प्रकार सिंह मदोन्मत्त हाथियोंको मदरहित कर देता है उसी प्रकार वह अत्यधिक गर्वको धारण करनेवाले समस्त पुरुषोंको गर्वरहित कर देगा। वह महान्, अद्वितीय धीर, वीर और अन्तमें तपोवनका स्वामी होगा अर्थात् दीक्षा लेकर

१. स हि म० । २. अनेकान् पाति रक्षतीति अनेकपः । ३. हस्तिदर्शनात् । ४. विलम्बितोऽनुकृतः अनेकपस्य हस्तिनो विभ्रमो येन सः । ५. धीरोऽप्रतपोवनेश्वरः क० ।

यदैक्षि लक्ष्मीरभिषेकिणी ततः प्रसूतमात्रस्य गिरीन्द्रमस्तके ।
सुरासुरेन्द्रैर्दयितेऽभिषिच्यते गिरिस्थिरः क्षीरसमुद्रवारिभिः ॥२०॥
स्रजोः सुगन्ध्यायतयोः प्रदर्शनाज्जगत्त्रयव्यापियशाः सुगन्धिभाक् ।
निरन्तरं लोकमलोकमप्यसावनन्तदृग्ज्ञानदृशा तनिष्यति ॥२१॥
स चन्द्रसंदर्शनतः सुदर्शने [1]महादयाचन्द्रिकया सुदर्शनः ।
जिनेन्द्रचन्द्रो जगतां तमोऽन्तकृन्निरन्तराह्लादकरो भविष्यति ॥२२॥
समस्ततेजस्विजनस्य भूयसा निजेन तेजांसि विजित्य तेजसा ।
जगन्ति तेजोनिधिरर्कदर्शनात्करिष्यति ध्वस्ततमांसि ते सुतः ॥२३॥
सुखं कृतक्रीडझषद्वयेक्षणादवाप्य सौख्यं विषयोप[2]भोगजम् ।
अनन्तमन्ते सुखमाप्स्यति ध्रुवं शिवालयेऽसौ शिवदेवि ! नन्दनः ॥२४॥
सुपूर्णकुम्भद्वयदर्शनात्ततो गृहं प्रपूर्णं निधिभिर्भविष्यति ।
जगन्मुदापूर्णमनोरथस्य हि प्रभावतस्तस्य शरीरजस्य ते ॥२५॥
विचित्रपुष्पाम्बुजखण्डदर्शनादशेषसल्लक्षणलक्षितः सुतः ।
विदाहितृष्णातृषितान्वितृष्णधीरिहैव निर्वाणमयान् करिष्यति ॥२६॥
महासमुद्रस्य महामृतात्मनः समुद्रगम्भीरमतिर्विलोकनात् ।
[3]श्रुताम्बुधिं नीतिमहासरिद्धृतं स पाययिष्यत्युपदेशकृज्जनान् ॥२७॥
सुरत्नसिंहासनदर्शनेन स स्फुरन्मणिद्योतिकिरीटपाणिभिः ।
परीतमारोक्ष्यति देवदानवैः परार्ध्यसिंहासनमूर्ध्वशासनः ॥२८॥

कठिन तपश्चरण करेगा ॥२९॥ हे वल्लभे ! जो तूने अभिषेकसे युक्त लक्ष्मी देखी है उसका फल यह है कि उत्पन्न होते ही तेरे पुत्रका सुरेन्द्र और असुरेन्द्र सुमेरु पर्वतके मस्तकपर क्षीरसागरके जलसे अभिषेक करेंगे और वह पर्वतके समान स्थिर होगा ॥३०॥ सुगन्धित मालाओंके देखनेसे यह सूचित होता है कि वह पुत्र तीनों जगत्में व्याप्त यशसे सहित होगा, उत्तम सुगन्धिको प्राप्त होगा और अपने अनन्त ज्ञान तथा अनन्त दर्शन रूपी दृष्टिके द्वारा समस्त लोक और अलोकको भी व्याप्त करेगा॥३१॥हे सुन्दरि ! चन्द्रमाके देखनेसे वह जिनेन्द्र चन्द्र, अत्यधिक दया रूपी चन्द्रिकासे सुन्दर होगा, जगत्के अज्ञान रूपी अन्धकारको नष्ट करनेवाला होगा और समस्त जगत्के निरन्तर आह्लादको करने वाला होगा ॥ ३२ ॥ सूर्यके देखनेसे तेरा वह पुत्र तेजका भाण्डार होगा, और अपने बहुत भारी तेजके द्वारा समस्त तेजस्वी जनोंके तेजको जीतकर तीनों लोकोंको अन्धकारसे रहित करेगा ॥ ३३ ॥ हे शिव देवि ! सुखसे क्रीड़ा करती हुई मछलियोंका युगल देखनेसे यह सूचित होता है कि तुम्हारा पुत्र विषयोंके उपभोगसे उत्पन्न सुखको पाकर अन्तमें मोक्षके अनन्त सुखको अवश्य ही प्राप्त होगा ॥ ३४ ॥ सुवर्ण कलशोंका युगल देखनेसे यह सिद्ध होता है कि तुम्हारा पुत्र हर्ष पूर्वक जगत्के मनोरथोंको पूर्ण करने वाला होगा और उसके प्रभावसे यह घर निधियोंसे परिपूर्ण हो जायगा ॥ ३५ ॥ नाना प्रकारके पुष्पोंसे युक्त कमल सरोवरके देखनेसे तुम्हारा वह पुत्र समस्त उत्तम लक्षणोंसे युक्त होगा, तृष्णा रहित बुद्धिका धारक होगा और अत्यधिक दाह उत्पन्न करने वाली तृष्णारूपी प्याससे पीड़ित मनुष्योंको इसी संसारमें संतोषसे युक्त-सुखी करेगा ॥ ३६ ॥ अमृतमय महासागरके देखनेसे यह सूचित होता है कि तुम्हारा पुत्र समुद्रके समान गम्भीर बुद्धिका धारक होगा, तथा उपदेश देकर जगत्के जीवोंको कीर्तिरूपी महा नदियोंसे परिपूर्ण श्रुतज्ञान रूपी सागरका पान करायेगा ॥ ३७ ॥ उत्तम रत्नोंसे जटित सिंहासन देखनेसे यह प्रकट होता है कि तुम्हारे पुत्रकी आज्ञा सर्वोपरि होगी और वह देदीप्यमान मणियोंसे जगमगाते

१. महोदयाचन्द्रिकया म० । महोदयचन्द्रिकया ग० । २. विषयोपयोगजं म० । ३. श्रुताम्बुधिर्नीति म० ।

विमाननाथामरनाथकोटिभिः[1] प्रपूजिताङ्घ्रिः सुविमानदर्शनात् ।
[2]विमानसाधिः महतो महोदयो विमानमुख्यादवतीर्णवानिह[3] ॥३९॥
भवेत्तु भेत्ता भवपञ्जरस्य स फणीन्द्रनिर्यद्भवनावलोकनात् ।
सुतोऽम्बिकस्थापि मतिश्रुतावधिप्रधाननेत्रत्रितयेन जायते ॥४०॥
बहुप्रकारस्फुरदंशुरञ्जितं सुरत्नराशिप्रविलोकनात्सुतम् ।
प्रतीहि नानागुणरत्नराशिना श्रयिष्यमाणं शरणाश्रिताश्रयम् ॥४१॥
शिखावलीलीढनभस्तलोज्ज्वलत्प्रदक्षिणावर्तविधूमवह्नितः ।
निरीक्षिताद्ध्यानमहाहुताशनः स कर्मकक्षं सकलं प्रधक्ष्यति ॥४२॥
किरीटसत्कुण्डलपूर्वभूषणाः प्रभावतस्तस्य मदीयशासनम् ।
अलंकरिष्यन्त्यनुकूलसेवकाः सुरेश्वराः प्राकृतपार्थिवा इव ॥४३॥
श्लथात्मधम्मिल्लसलस्रजस्रजः समेखलानूपुरमञ्जुशिञ्जिताः ।
प्रसाधनादावनुभावतोऽस्य ते सुरेन्द्रसुन्दर्य उपासनोद्यताः ॥४४॥
जनिष्यमाणेन जिनेन्द्रभानुना प्रतीहि तेनात्र पवित्रकर्मणा ।
स्ववंशमात्मानमिमं च मां जगत्पवित्रितं भूषितमुद्धृ[4]तं तथा ॥४५॥

मुकुटोंपर हाथ लगाये हुए देव-दानवोंसे घिरे उत्तम सिंहासनपर आरूढ़ होगा ॥ ३८ ॥ उत्तम विमानके देखनेसे यह सूचित होता है कि विमानोंके स्वामी इन्द्रोंकी पङ्क्तियोंसे उसके चरण पूजित होंगे, वह मानसिक व्यथासे रहित होगा, महान् अभ्युदयका धारक होगा और बहुत बड़े मुख्य विमानसे वह यहाँ अवतार लेगा ॥ ३९ ॥ नागेन्द्रके निकलते हुए भवनको देखनेसे यह प्रकट होता है कि तुम्हारा वह पुत्र संसार रूपी पिंजड़ेको भेदनेवाला होगा और मति श्रुत तथा अवधिज्ञान रूपी तीन प्रमुख नेत्रोंसे युक्त होगा ॥ ४० ॥ आकाशमें रत्नोंकी राशि देखनेसे तुम यह विश्वास करो कि तुम्हारा पुत्र बहुत प्रकारकी देदीप्यमान किरणोंसे अनुरंजित होगा, नाना प्रकारके गुण रूपी रत्नोंकी राशि उसका आश्रय लेगी और वह शरणागत जीवोंको आश्रय देने वाला होगा ॥ ४१ ॥ और ज्वालाओंके समूहसे व्याप्त आकाशमें देदीप्यमान तथा दक्षिणावर्तसे युक्त निर्धूम अग्निके देखनेसे यह सिद्ध होता है कि तुम्हारा पुत्र ध्यानरूपी महा प्रचण्ड अग्निको प्रकट कर समस्त कर्मोंके वनको जलावेगा ॥ ४२ ॥ हे प्रिये ! उस पुत्रके प्रभावसे मुकुट तथा उत्तम कुण्डल आदि आभूषणोंसे सुशोभित इन्द्र साधारण राजाओंके समान अनुकूल सेवक होकर मेरी आज्ञाको अलंकृत करेंगे ॥ ४३ ॥ अपनी चोटीमें गुंथी हुई जिनकी निजकी मालाएँ ढीली हो रही हैं तथा जो मेखला और नूपुरोंकी मनोहर झंकारसे युक्त हैं ऐसी इन्द्रकी इन्द्राणियाँ इसके प्रभावसे सजावट आदिके कार्यमें तेरी सेवा करनेके लिए सदा उद्यत रहेंगी ॥ ४४ ॥ हे प्रिये ! यहाँ पवित्र कर्म करनेवाला जो जिनेन्द्र रूपी सूर्य उत्पन्न होने वाला है उससे तुम अपने वंशको, अपने आपको, इस मुझको तथा समस्त जगत्को पवित्रित भूषित एवं संसार-सागरसे उद्धृत समझो ॥ ४५ ॥

१. विमाननाथोऽमरनाथ-म० । २. विगतो मानसाधिः मानसी व्यथा यस्य सः । ३. एकोनचत्वारिंशत्तमः श्लोकः 'ग' पुस्तके एवं पठितः—'विमानसंदर्शनतो नुता नतो विमाननाथा मरनाथकोटिभिः । प्रपूजिताङ्घ्रिर्महतो महोदयो विमानमुख्यादवतीर्णवानिह ॥३९॥ ४. मुद्धतं म० ।

निशम्य सा स्वप्नफलं पतीरितं प्रतुष्टचित्ता सुतमङ्कवर्तिनम् ।
विचिन्त्य चक्रे जिनपूजनादिकाः क्रियाः प्रशस्ता जनतामनोहराः ॥४६॥
[1]जिनोद्भवे स्वप्नफलानुकीर्तनं पवित्रसुस्तोत्रमिदं दिने दिने ।
प्रभातसन्ध्यासमये पठन् जनः स्मरंश्च शृण्वन् श्रयते जिनश्रियम् ॥४७॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ स्वप्नफलकथनो नाम सप्तत्रिंशः सर्गः ।

इस प्रकार पतिके द्वारा कहे हुए स्वप्नके फलको सुनकर रानी शिवा देवीका चित्त बहुत ही संतुष्ट हुआ । और पूर्वोक्त गुण विशिष्ट पुत्र मेरी गोदमें आ ही गया है, ऐसा विचार कर वह समस्त जन समूहके मनको हरने वाली जिनपूजा आदि उत्तम क्रियाएँ करने लगीं ॥ ४६ ॥ गौतम स्वामी कहते हैं, कि जो मनुष्य, जिनेन्द्र भगवानके जन्मसे संबद्ध स्वप्नोंके फलका वर्णन करने वाले इस स्तोत्रका प्रतिदिन प्रातः संध्याके समय पाठ करता है, स्मरण करता है, अथवा श्रवण करता है वह जिनेन्द्र भगवान्की लक्ष्मीको प्राप्त होता है ॥ ४७ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें स्वप्नोंके फलका वर्णन करने वाला सैंतीसवाँ सर्ग समाप्त हुआ ॥ ३७ ॥

१. जिनोद्भवस्वप्नफलानुकीर्तनं क० ।

अष्टात्रिंशः सर्गः

पृथिवीच्छन्दः

जिनेन्द्रपितरौ ततो धनपतिः सुरेन्द्राज्ञया स्वभक्तिभरतोऽपि च स्वयमुपेत्य[1] तीर्थोदकैः ।
शुभैः समभिषिच्य तौ सुरभिपारिजातोद्भवैः सुगन्धवरभूषणैर्भुवनदुर्लभैः प्रार्चयत् ॥१॥

पुरैव परिशोधिते विदितदिक्कुमारीगणैर्बभार विमलोदरे प्रथमगर्भमुद्यत्प्रभम् ।
स्वबन्धुजनसिन्धुवृद्धिकरमस्तसन्तापोदयं शिवाय जगतां शिवा शशिनमम्बरश्रीरिव ॥२॥

चकार न वियोजितत्रिवलिभंगशोभामसौ न च श्वसनबाधिताधरसुपल्लवां[2] नालसाम् ।
स्तनस्तवकभारनम्रतनुमध्यसुश्रीलतां नितान्तकृपयेव तां फलभरो न चाबाधत ॥३॥

निगूढनिजगर्भसंभवतनोरिव व्यक्तये पयोधरभरो ययावतितरां पयःपूर्णताम् ।
तदुद्वहनगौरवादिव विशेषविस्तीर्णतां जगाम जघनस्थली निबिडमेखलाबन्धना ॥४॥

मनो भुवनरक्षणे सकलतत्त्वसंवीक्षणे[3] वचोऽपि हितभाषणे निखिलसंशयोत्क्षेपणे ।
वपुर्व्रतविभूषणे विनयपोषणे चोचितं बभूव जिनवैभवादतितरां शिवायास्तदा ॥५॥

महामृतरसाशनैः सुरवधूभिरापादितैरनन्तगुणकान्तिवीर्यकरणैः समास्वादितैः ।
जिनेन्द्रजननीतनुस्तनुरपि प्रभाभिर्दिशो दशापि कनकप्रभा विदधतीव विद्युद्बभौ ॥६॥

तदनन्तर इन्द्रकी आज्ञा और अपनी भक्तिके भारसे कुबेरने स्वयं आकर शुभ तीर्थ-जलसे भगवान्के माता-पिताका अच्छी तरह अभिषेक किया और मनोज्ञ कल्पवृक्षोंसे उत्पन्न अन्यजनदुर्लभ सुगन्ध और उत्तमोत्तम आभूषणोंसे उनकी पूजा की ॥१॥ जिस प्रकार आकाशकी लक्ष्मी अपने निर्मल उदरमें चन्द्रमाको धारण करती है उसी प्रकार भगवान्की माता शिवादेवीने प्रसिद्ध दिक्कुमारी देवियोंके द्वारा पहलेसे ही शुद्ध किये हुए अपने निर्मल उदरमें जगत्के कल्याणके लिए सर्वप्रथम उस गर्भको धारण किया जो उठती हुई प्रभासे युक्त था, अपने बन्धुजनरूपी समुद्रकी वृद्धिको करनेवाला था, तथा संतापके उदयको दूर करनेवाला था ॥२॥ उस गर्भरूपी फलके भारने अत्यधिक दयासे प्रेरित होकर ही मानो स्तनरूपी गुच्छोंके भारसे नम्रीभूत एवं पतली कमरवाली शिवादेवी रूपी लताको रञ्चमात्र भी बाधा नहीं पहुँचाई थी। न तो उसकी त्रिवलिरूपी तरङ्गकी शोभाको नष्ट किया था, न श्वासोच्छ्वाससे उसके अधररूपी पल्लवको बाधित किया था और न उसे आलस्यसे युक्त ही होने दिया था ॥३॥ अपने अत्यन्त गूढ गर्भमें भगवान्के शरीरकी जो उत्पत्ति हुई थी उसे प्रकट करनेके लिए ही मानो शिवादेवीके स्तनोंका भार अत्यधिक दूधसे परिपूर्णताको प्राप्त हो गया था तथा मेखलाके सघनबन्धनसे युक्त उसकी नितम्बस्थली उस स्तनके भारको धारण करनेके गौरवसे ही मानो अत्यधिक विस्तृत हो गई थी ॥४॥ उस समय भगवान्के प्रभावसे शिवादेवीका मन संसारकी रक्षा करने तथा समस्त तत्त्वोंके अवलोकन करनेमें अभ्यस्त रहता था, वचन सब प्रकारके संशयको नष्ट करनेवाले हित-कारी भाषणमें अभ्यस्त रहता था और शरीर व्रतरूपी आभूषणके धारण करने तथा विनयके पोषण करनेमें अभ्यस्त रहता था ॥५॥ भगवान्की माता, देवाङ्गनाओंके द्वारा संपादित एवं अनन्तगुणी कान्ति और बलको बढ़ानेवाला अमृतमय आहार करती थीं इसलिए उनका शरीर कृश होनेपर भी अपनी प्रभासे दशों दिशाओंको सुवर्ण जैसी कान्तिका धारक करता हुआ

---

१. –मुदेत्य म० । २. पल्लवं म० । ३. संवीक्षणे ग० ।

करीन्द्रमकरस्फुरत्तुरगतुङ्गमीनावली महारथसुयानपात्रनृपवाहिनीसन्मुखैः ।
विशद्भिरनुकूलकैः समभिवर्धितो[1]ऽद्धोर्मिभिः समुद्रविजयोऽन्वहं पृथुसमुद्रलीलां वहन् ॥७॥

जिनेशजनकौ जगद्वलयवेलयाभ्यर्चितौ परस्परविवर्धमानपृथुसम्मदौ नित्यशः ।
महेन्द्रवरशासनाभिरतदेवदेवीकृतप्रभूतिविभवान्वितौ गमयतः स्म मासान्नव ॥८॥

ततः कृतसुसङ्गमे निशि निशाकरे चित्रया प्रशस्तसमवस्थिते ग्रहगणे समस्ते शुभे ।
असूत तनयं शिवा शिवदशुक्लवैशाखज[2]त्रयोदशतिथौ जगज्जयनकारिणं हारिणम् ॥९॥

त्रिबोधशुचिचक्षुषा दशशताष्टसल्लक्षणैः सुलक्षितसुनीलनीरजवपुर्वपुर्बिभ्रता ।
जिनेन नि[3]जशोचिषा बहुगुणीकृतं मण्डलं प्रसूतिभवनोदरे[4] मणिगणप्रदीपार्चिषाम् ॥१०॥

विपाण्डुरपयोधरां दिवमखण्डचन्द्राननां निशि स्फुरिततारकानिकरमण्डनां[5] हारिणीम् ।
तरङ्गभुजपञ्जरोदरविवर्तिनीं स्वेच्छया चुचुम्ब मदनाम्बुधिः सति जिनेन्द्रचन्द्रोदये ॥११॥

गभीरगिरिराजनाभिकुलशैलकण्ठाकुलस्तनोच्छलद्वाहिनीनिवहहारभाराधरा ।
चचाल कृतन[6]र्तनेव मुदिताऽत्र जम्बूमती समुद्रवलयाम्बरा रणितवेदिकामेखला ॥१२॥

बिजलीके समान सुशोभित हो रहा था ॥६॥ हाथीरूपी मगरमच्छों, उछलते हुए उन्नत अश्वरूपी मीन-समूहों, बड़े-बड़े रथरूपी जहाजों, राजाओंकी सेनारूपी नदियों और जहाँ-तहाँ प्रवेश करते हुए मित्रोंरूपी तरङ्गोंसे प्रतिदिन वृद्धिको प्राप्त हुए राजा समुद्रविजय उस समय सचमुच ही विशाल समुद्रकी शोभाको धारण करते हुए वृद्धिंगत हो रहे थे ॥७॥ इस प्रकार जो जगद्वलयरूपी वेलासे पूजित थे परस्परमें जिनका विशाल हर्ष निरन्तर बढ़ रहा था और जो इन्द्रकी आज्ञामें लीन देव-देवियोंके द्वारा की हुई विभूतिसे सहित थे ऐसे भगवान्‌के माता-पिताने गर्भके नौ माह सानन्द व्यतीत किये ॥८॥

तदनन्तर वैशाख शुक्ल त्रयोदशीकी शुभ तिथिमें रात्रिके समय जब चन्द्रमाका चित्रा नक्षत्रके साथ संयोग था और समस्त शुभग्रहोंका समूह जब यथायोग्य उत्तम स्थानोंपर स्थित था तब शिवादेवीने समस्त जगत्‌को जीतनेवाले अतिशय सुन्दर पुत्रको उत्पन्न किया ॥९॥ जो तीन ज्ञानरूपी उज्ज्वल नेत्रोंके धारक थे तथा एक हजार आठ लक्षणोंसे युक्त नील कमलके समान सुन्दर शरीरको धारण कर रहे थे ऐसे जिनबालकने अपनी कान्तिके द्वारा, प्रसूतिकागृहके भीतर व्याप्त मणिमय दीपकोंके कान्तिसमूहको कई गुणा अधिक कर दिया था ॥१०॥ उस समय जिनेन्द्र-रूपी चन्द्रमाका उदय होनेपर जो धवल पयोधर–मेघोंको धारण करनेवाली थी (पक्षमें धवल स्तनोंसे युक्त थी) अखण्ड-पूर्ण चन्द्रमा ही जिसका मुख था, (पक्षमें पूर्णचन्द्रमाके समान जिसका मुख था), देदीप्यमान ताराओंके समूह ही जिसके आभूषण थे, (पक्षमें देदीप्यमान ताराओंके समूहके समान जिसके आभूषण थे), जो अत्यन्त सुन्दरी थी (पक्षमें हारसे सुशोभित थी), और जो तरङ्गरूपी भुजपञ्जरके मध्यमें वर्तमान थी ऐसी--आकाशरूपी स्त्रीका मदनरूपी महासागरने अपनी इच्छानुसार चुम्बन किया था ॥११॥ उस समय जो सुमेरुरूपी गंभीर नाभिसे युक्त थी, कुलाचलरूपी कण्ठ और स्तनोंसे सहित थी, बहती हुई नदियोंके समूहरूपी हारके भारको धारण करनेवाली थी, समुद्रका घेरा ही जिसका वस्त्र था तथा शब्दायमान वेदिका ही जिसकी मेखला थी, ऐसी जम्बूद्वीपकी भूमि चल-विचल हो गई जिससे ऐसी जान पड़ती थी

---

१. समभिवर्धितः + अद्धा + ऊर्मिभिः इतिच्छेदः । समभ्यवर्धतोद्धोर्मिभिः ग० । २. शुच्यप्रज–म० । शुद्धपप्रज क०, ख० । ३. जिनरोचिषा म० । ४. भवनोपरे म० । ५. मण्डनाहारिणीम् म० । ६. वर्तनेव ग० ।

अनुत्तरमुखोज्ज्वलः शिवपदोत्तमाङ्गस्तथा नवानुदिशसच्चुबुकं नवविमानकग्रीवकः ।
सुकल्पवपुरन्तराधरजगत्कटीजङ्घकस्त्रिलोकपुरुषोऽचलत्कटिकरो नटित्वा स्फुटम् ॥१३॥
अभून्नवनवासिनां जगति तारशङ्खस्वनो रराट पटहः पटुर्भटिति भौमलोकेऽखिले ।
रवेर्जगति सिंहनाद उरुघोषघण्टानदत्सुकल्पभवने जिनप्रसववैभवाद्धि स्वयम् ॥१४॥
जगत्त्रितयवासिनश्चलितमौलिसिंहासनास्ततोऽसुरसुराधिपाः प्रणिहितावधिस्वेक्षणाः ।
प्रबुध्य जिनजन्म जातपृथुसम्मदाः सम्पदा प्रचेलुरिह भारतं प्रति चतुर्णिकायामरैः[1] ॥१५॥
विशुद्धतमदृष्टयो मुकुटकोटिसङ्घट्टित-स्फुरत्कटकरत्नरश्मिखचिताखिलाशामुखाः ।
प्रणेमुरहमिन्द्रदेवनिवहास्तु तत्र स्थिताः पदान्यभिसमेत्य सप्त हरिविष्टरेभ्यो जिनम् ॥१६॥
क्षितेरसुरनागविद्युदनलानिलद्वीपसत्सुपर्णसुमहोदधिस्तनितदिक्कुमाराभिधाः ।
समुच्चयुरितस्ततो भवनवासिनो भास्वरास्तदा विदधतो दिशो दश दशप्रकारामराः ॥१७॥
सुकिम्पुरुषकिन्नरामरमहोरगा राक्षसाः पिशाचसुरभूरिभूतवरयक्षगन्धर्वकाः ।
मनोहरणदक्षगीतबहुनृत्ययुक्ताङ्गनाः समीयुरिह मध्यलोकरतयोऽष्टधा व्यन्तराः ॥१८॥
गणश्च [2]शुचिशोचिषां प्रथितपञ्चधाज्योतिषां ग्रहर्क्षशशिभास्करप्रततारकाख्यापुषाम् ।
बभौ युगपदापतत्स्वविमानकेभ्योऽधिकं विधातुमिव चोद्यतो जगदिहापरं ज्योतिषाम् ॥१९॥

मानो हर्षके वशीभूत हो नृत्य ही कर रही हो ॥१२॥ जो अनुत्तर विमानरूपी मुखसे उज्ज्वल था, मोक्षरूपी मस्तकसे सहित था, नौ अनुदिश रूपी ठोढ़ीसे युक्त था, नौ ग्रैवेयकरूपी ग्रीवाको धारण करनेवाला था, स्वर्गरूपी शरीरसे सहित था, तथा मध्यम लोकरूपी कमर और अधोलोक-रूपी जंघाओंसे युक्त था ऐसा तीन लोकरूपी पुरुष उस समय चञ्चल हो उठा था सो ऐसा जान पड़ता था मानो कमरपर हाथ रखकर नृत्य ही कर रहा हो ॥१३॥ उस समय जिनेन्द्र भगवान्‌के जन्मके प्रभावसे भवनवासी देवोंके लोकमें अपने आप शङ्खोंका जोरदार शब्द होने लगा। समस्त व्यन्तर देवोंके लोकमें शीघ्र ही जोरदार पटह शब्द होने लगे। सूर्यलोकमें सिंहनाद होने लगा और कल्पवासी देवोंके भवनोंमें विशाल शब्द करनेवाले घण्टा बज उठे ॥१४॥

तदनन्तर जिनके मुकुट और सिंहासन कम्पायमान हो रहे थे, जिन्होंने अपने अवधिज्ञान रूपी नेत्रको प्रयुक्त किया था, और उसके द्वारा जिनेन्द्र भगवान्‌के जन्मको जानकर जिन्हें अत्यधिक हर्ष उत्पन्न हुआ था ऐसे तीनों लोकोंमें रहने वाले सुरेन्द्र तथा असुरेन्द्र चतुर्णिकायके देवोंको साथ ले बड़ी विभूतिसे भरत क्षेत्रकी ओर चल पड़े ॥१५॥ हाथ जोड़कर मस्तकसे लगाते समय मुकुटोंके अग्रभागसे टकराये हुए कटकोंके रत्नोंकी किरणोंसे जिन्होंने समस्त दिशाओंके अग्रभाग व्याप्त कर दिये थे ऐसे अत्यन्त शुद्ध सम्यग्दर्शनके धारक अहमिन्द्र देव, यद्यपि अपने अपने ही निवास स्थानोंमें स्थित रहे थे तथापि उन्होंने सिंहासनोंसे सात कदम सामने आकर जिनेन्द्र भगवान्‌को नमस्कार किया था ॥१६॥ असुरकुमार, नागकुमार, विद्युत्कुमार, अग्निकुमार, वायुकुमार, द्वीपकुमार, महोदधिकुमार, स्तनितकुमार और उदधिकुमार ये दश प्रकारके भवनवासी देव, दशों दिशाओंको देदीप्यमान करते हुए जहाँ तहाँ पृथिवीसे ऊपर आने लगे ॥१७॥ जिनकी स्त्रियाँ मनको हरण करनेमें दक्ष, गीत तथा नाना प्रकारके नृत्योंसे युक्त थीं, ऐसे किंपुरुष, किन्नर, महोरग, राक्षस, पिशाच, भूत, यक्ष और गन्धर्व ये मध्यमलोकमें विशिष्ट प्रीतिके रखने वाले आठ प्रकारके व्यन्तर देव चारों ओरसे आने लगे ॥१८॥ उज्ज्वल किरणोंसे युक्त ग्रह, नक्षत्र, चन्द्रमा, सूर्य और तारा नामको धारण करनेवाले पांच प्रकारके प्रसिद्ध ज्योतिषी देवोंका समूह एक साथ अपने-अपने विमानोंसे यहां आता हुआ ऐसा सुशोभित होने लगा मानो वह पृथिवी पर एक दूसरा ही ज्योतिषलोक बनानेके लिए उद्यत हुआ हो ॥१९॥

---

१. चतुर्निकायामराः क० । २. शुच्चिरोचिषां म० ।

यथास्वमपि सप्तभिः प्रथमकल्पनाथादयोऽप्यनीकमिव हैवृंता युगपदच्युतेन्द्रोत्तराः ।
प्रतिस्वमपि सप्तभिः सकलकल्पजैः षोडश प्रमोदवशवर्तिनः समभिजग्मुरिन्द्राः सुरैः ॥२०॥
अनेकमुखदन्तसत्कमलखण्डपत्रावलीसुरूपसुरसुन्दरीललितनाटकोल्लासिनम् ।
हिमाद्रिमिव जङ्गमं निजवधूभिरैरावतं करोन्नमधिरूढवानभिरराज सौधर्मपः ॥२१॥
अनीकमथ यौवजं रचितसप्तकक्षान्तरं गृहीतवलयाकृतिप्रकृतिपौरुषाधिष्ठितम् ।
परीत्य कुलिशायुधं कुलिशपूर्वशस्त्राटवीनिरुद्धगगनान्तरं भृशमशोभत त्रैदशम् ॥२२॥
जवेन लघु लङ्घयद्द्रुतसमीरणं हेषितप्रयोजितवियोजितत्रिभुवनान्तरालं तथा ।
बृहद्बहिरवर्तत प्रवितत हयानीकमप्यरं गगनवारिधेरधितरङ्गरङ्गायितम् ॥२३॥
सुमुग्धमुखकोशकैर्नयनपुण्डरीकैर्निजैलसत्ककुदवालधिश्रुतिसुगात्रसास्नापुटैः ।
सुवर्णखुरशृङ्गकैः प्रतिवृषं वृषानीकमप्युवाह परितः स्थितं विपुलकान्तिमिन्दुप्रभाम् ॥२४॥
विभिन्नमपि सप्तधा स्वयमभेद्यमप्यद्रिभिर्नभोवलयसागरे त्रिदशयानपात्रायितम् ।
प्रभाविजितविस्फुरद्रविरथं रथानीकमप्यभादतिमनोहरं वलयवत्परिक्षेपकम् ॥२५॥
विकीर्णघनशीकरैः करिभिरूर्ध्वलीलाकरैः प्रवृत्तगुरुगर्जितैर्गुरुतरैरिवाम्भोधरैः ।
महामरुदधिष्ठितैः सुघटितं गजानीकमप्यनेकरचनान्तरं व्यतनुत श्रियं प्रावृषः ॥२६॥
स्वरैरपि च सप्तभिर्मधुरमूर्छनाकोमलैः सवीणवरवंशतालरवमिश्रितैराश्रितैः ।
प्रपूर्णभुवनोदरं बहिरतोऽप्यनीकं बभौ युवत्यमरबन्धुरं धृतिकरं तु गान्धर्वजम् ॥२७॥

जो यथायोग्य अपनी अपनी सात प्रकारकी सेनाओंके सहित थे, ऐसे प्रथम स्वर्गसे लेकर सोलहवें स्वर्गतकके सोलह इन्द्र, आनन्दके वशीभूत हो समस्त स्वर्गोंके देवोंके साथ यहाँ आ पहुँचे ॥२०॥ सौधर्मेन्द्र अपनी स्त्रियोंके साथ उस ऐरावत नामक गजराजपर बैठा हुआ सुशोभित हो रहा था, जो चलते-फिरते हिमालयके समान जान पड़ता तथा अनेक मुखोंके भीतर दाँतोंपर विद्यमान कमल-समूहकी कलिकाओंपर नृत्य करती हुई देवाङ्गनाओंके सुन्दर नृत्यसे सुशोभित था ॥२१॥ इन्द्रको चारों ओरसे घेरे हुए देवोंकी वह सेना सुशोभित हो रही थी जिसने सात कक्षाओंका विभाग किया था, जो गोल आकारके सहित थी, स्वाभाविक पुरुषार्थसे युक्त थी, तथा वज्र आदि शस्त्रोंके वनसे जिसने आकाशके अन्तरालको रोक रखा था ॥ २२ ॥ तदनन्तर घोड़ोंकी बहुत बड़ी विराट सेना थी जो अपने वेगसे शीघ्रगामी वायुको शीघ्र ही जीत रही थी। जो अपनी हिनहिनाहटसे तीन लोकके अन्तरालको संयुक्त तथा वियुक्त कर रही थी, और आकाशरूपी समुद्रकी उठती हुई तरङ्गोंके समूहके समान जान पड़ती थी ॥२३॥ तदनन्तर बैलोंकी वह सेना चारों ओर खड़ी थी जो कि सुन्दर मुख, सुन्दर अण्डकोश, नयन कमल, मनोहर कांदौल, पूँछ, शब्द, सुन्दर शरीर, सास्ना, सुवर्ण मय खुर और सींगोंसे युक्त थी तथा अत्यधिक कान्तिसे युक्त चन्द्रमाकी प्रभाको धारण कर रही थी ॥ २४ ॥ तदनन्तर रथोंकी वह सेना भी सुशोभित हो रही थी जो स्वयं सात प्रकारसे विभिन्न होनेपर भी पर्वतोंसे अभेद्य थी, आकाश रूपी सागरमें जो देवोंके यानपात्रके समान जान पड़ती थी, प्रभासे जिसने सूर्यके देदीप्यमान रथको जीत लिया था, जो अत्यन्त मनोहर थी और जिसका घेरा वलयके समान सुशोभित था ॥२५॥ तत्पश्चात् जो चारों ओर जलके छींटोंकी वर्षा कर रहे थे, जिनके शुण्डादण्ड ऊपरकी ओर उठे हुए थे, जो बहुत भारी गर्जना कर रहे थे, जो आकारमें बहुत भारी थे, एवं जो बड़े-बड़े देवोंसे अधिष्ठित थे, ऐसे मेघोंकी समानता धारण करने वाले हाथियोंसे रचित, अनेक प्रकारकी रचनाओंसे युक्त हाथियोंकी सेना भी वर्षा ऋतुकी शोभा विस्तृत कर रही थी ॥२६॥ हाथियोंकी

१. दन्तसत्कमल म०, दन्तदन्तसरकमल ग० । २. योधजं म०, ख० । देवजं घ० । ३. प्रघोषित ग० । ४. कौशिकैर्नयन म० । कौशकैर्नयन ग० । ५. पटैः ग० । ६. अपूर्णभुवनोपरम् म० ।

समस्तरसपुष्टिकं [1]वलयहारिगात्रोत्करैर्मनःकुसुममञ्जरीरमरभूरुहामाहरत् ।
प्रनृत्यद्[2]रुनर्तकीमयमनीकमभ्यम्ब[3]रे नितम्बभरमन्थरं शिथिलमाविरासीत्तदा ॥२८॥
सहस्रगुणितोदिता चतुरशीतिरेषु स्फुटं प्रमाणमपि सप्तसु प्रथमसप्तकक्षास्वतः ।
परं द्विगुणमेतदेव सकलेषु कक्षान्तरेष्वनीकबलकेष्विदं क्रमविदां समासेः स्थितिः ॥२९॥
यथायथमनीकिनः सकलनाकलोकाधिपा जिनेन्द्रजननाभिषेककर[4]णाय यावद्दिवत् ।
वितत्य पुरमाव्रजन्ति मुदितास्तु तावद्दिशां कुमार्य उपकुर्वते निखिलजातकर्मादृताः ॥३०॥
तथाहि विजया स्मृता जगति वैजयन्ती परा परोक्तिरपराजिता प्रवदिता जयन्ती [5]वरा ।
तथैव सह नन्दया भवति चापरानन्दया सनन्द्यभिधवर्धना हृदयनन्दिनन्दोत्तरा ॥३१॥
कुचानिव निजानिमान् विगलदङ्गभृङ्गाररसप्रसेन भरितान् भृशं विपुलतुङ्गभृङ्गारकान् ।
समूहुरभिरामकानमलहारभारोज्ज्वला ज्वलन्मणिविभूषणश्रवणकुण्डलोद्भासिताः ॥३२॥
तथैव सयशोधरा प्रथितसुप्रबुद्धामरी सुकीर्तिरपि सुस्थिता प्रणिधिरत्र लक्ष्मीमती ।
विचित्रगुणचित्रया सह वसुन्धरा चाप्यमू गृहीतमणिदर्पणा दिश इवेन्दुमत्यो बभुः ॥३३॥
इला नवमिकासुरासहितपीतप[6]द्मावती तथैव पृथिवी परप्रवरकाञ्चना चन्द्रिका ।
प्रभास्फुटितसारकाभरणभूषिता भास्वराः सचन्द्ररजनीनिभा धृतसितातपत्रा बभुः ॥३४॥

सेनाके बाद गन्धर्वोंकी वह सेना सुशोभित हो रही थी जिसने मधुर मूर्छनासे कोमल वीणा, उत्कृष्ट बाँसुरी और तालके शब्दसे मिश्रित सातों प्रकारके आश्रित स्वरोंसे जगत्‌के मध्यभागको पूर्ण कर दिया था, जो देव-देवाङ्गनाओंसे सुशोभित थी एवं सबको आनन्द उत्पन्न करनेवाली थी ॥ २७ ॥ गन्धर्वोंकी सेनाके बाद उत्कृष्ट नृत्य करनेवाली नर्तकियोंकी वह सेना भी आकाशमें प्रकट हुई थी जो कि नितम्बोंके भारसे मन्द-मन्द चल रही थी, समस्त रसोंको पुष्ट करनेवाली थी और वलयोंसे सुशोभित अपने शरीरोंसे देव रूपी वृक्षोंके मन रूपी पुष्प-मञ्जरीको ग्रहण कर रही थी ॥२८॥ प्रत्येक सेनामें सात-सात कक्षाएँ थीं। उनमेंसे प्रथम कक्षामें चौरासी हजार घोड़े, बैल आदि थे फिर दूसरी-तीसरी आदि कक्षाओंमें क्रमसे दूने-दूने होते गये थे ॥२९॥

अपनी-अपनी सेनाओंसे युक्त समस्त इन्द्र, भगवान्‌का जन्माभिषेक करनेके लिए आकाशमें व्याप्त हो जब-तक सूर्यपुर आते हैं तब-तक प्रसन्नतासे युक्त एवं आदरसे भरी दिक्कुमारी देवियाँ भगवान्‌का समस्त जातकर्म करने लगीं ॥३०॥ देवियोंमें निर्मल हारोंके धारण करनेसे सुशोभित एवं चमकते हुए मणियोंके आभूषण और कानोंके कुण्डलोंसे विभूषित-जगत्-प्रसिद्ध विजया, वैजयन्ती, अपराजिता, जयन्ती, नन्दा, आनन्दा, नन्दिवर्धना, और हृदयको आनन्दित करनेवाली नन्दोत्तरा नामकी देवियाँ अपने स्तनोंके समान स्थूल, तथा अङ्गसे विगलित होते हुए शृङ्गार रसके समान निर्मल जलसे भरी हुई बड़ी ऊँची झारियाँ लिये हुए थीं ॥३१-३२॥ यशोधरा, सुप्रसिद्धा, सुकीर्ति, सुस्थिता, प्रणिधि, लक्ष्मीमती, विचित्र गुणोंसे युक्त चित्रा और वसुन्धरा ये देवियाँ मणिमय दर्पण लेकर खड़ी थीं और चन्द्रमासे युक्त दिशाओंके समान सुशोभित हो रही थीं ॥ ३३ ॥ इला, नवमिका, सुरा, पीता, पद्मावती, पृथ्वी, प्रवरकाञ्चना और चन्द्रिका नामकी देवियाँ, प्रभासे देदीप्यमान ताराओंके समान आभूषणोंसे सुशोभित तथा देदीप्यमान थीं। ये देवियाँ भगवान्‌की मातापर सफेद छत्र लगाये हुए थीं और चन्द्रमाके सहित रात्रियोंके समान जान पड़ती थीं ॥ ३४ ॥

---

१. वलमहारि- म० । २. प्रनृत्यपुरुनर्तकी म० । ३. मध्यम्बरे- म० । ४. करणाय म० । ५. परा म० । ६. पीठपद्मावती म० ।

श्रिया च धृतिराशया च वरवारुणी पुण्डरीकिणी स्फुरदलम्बुसा च सह मिश्रकेशी ह्रिया ।
सचामरकरा इमा अभ्युदारफेनावलीतरङ्गकुलसङ्कुला इव कुलापगाः सङ्गताः ॥३५॥
कनत्कनकचित्रया सहितया पुनश्चित्रया त्रिलोकसुरविश्रुतत्रिशिरसा च सूत्रामणिः ।
कुमार्य इव विद्युतो विकसितैर्जिनस्यान्तिके तमोनुद इवाम्बुजंलधरस्य विद्युल्लताः ॥३६॥
सहैव रुचकप्रभा रुचकया तदाद्याभया परा च रुचकोज्ज्वला सकलविद्युदग्रेसराः ।
दिशां च विजयादयो युवतयश्चतस्रो वरा जिनस्य विदधुः परं सविधि जातकर्मश्रिताः ॥३७॥
चतुर्विधसुरासुरा लघु समेत्य तावत्परं कुबेरजनिताद्भुतप्रथमशोभमुच्चध्वजम् ।
परीत्य जिनभक्तिलक्षितशनाथलोकश्रियं विजेतुमिव चोद्यतं ददृशुरादृताः सेन्द्रकाः ॥३८॥
प्रविश्य नगरं ततः शतमखः स्वयं सत्सखः शिवास्पदसमीपगः स्थितिविदादिदेशादृताम्[1] ।
शचीं शुचिमचापलां समुपनेतुमीशं शिशुं प्रसूतिगृहमाविशन्निति तदा बभौ सादरा ॥३९॥
विकृत्य सुरमायया शिशुमिहापरं निद्रया प्रयोज्य जिनमातरं प्रणतिपूर्वकं यत्नतः ।
प्रगृह्य मृदुपाणिना शिशुमदादसौ स्वामिने प्रणम्य शिरसा ददावमरराट् कराभ्यां जिनम् ॥४०॥
[2]जितेन्द्रमुखचन्द्रकं विजितपुण्डरीकेक्षणं विशेषविजितासितोत्पलवनश्रियं तं श्रिया ।
निरीक्ष्य जित[3]पद्मपाणिचरणं सहस्रेक्षणः सहस्रगणनेक्षणैरपि ययौ न तृप्तिं तदा ॥४१॥

श्री, धृति, आशा, वारुणी, पुण्डरीकिणी, अलम्बुसा, मिश्रकेशी और ह्री आदि देवियाँ हाथोंपर चामर लिये खड़ी थीं तथा अत्यधिक फेनावली और तरङ्गोंसे युक्त आई हुई कुलनदियों—गङ्गा आदि नदियोंके समान सुशोभित हो रही थीं ॥ ३५ ॥ देदीप्यमान कनकचित्रा, चित्रा, तीन लोकके देवोंमें प्रसिद्ध त्रिशिरा और सूत्रामणि, ये विद्युत्कुमारी देवियाँ उस समय जिनेन्द्र भगवान्‌के समीप अपनी चेष्टाओंसे ऐसी सुशोभित हो रहीं थीं मानो मेघके समीप अन्धकारको नष्ट करने वाली बिजली रूपी लताएँ ही हों ॥३६॥ उस समय समस्त विद्युत्कुमारियोंमें प्रधान रुचकप्रभा, रुचका, रुचकाभा और रुचकोज्ज्वला तथा दिक्कुमारियोंमें प्रधान विजय आदि चार देवियाँ विधिपूर्वक भगवान्‌का जातकर्म कर रही थीं ॥३७॥

भगवान्‌के जन्मोत्सवके पूर्व ही कुबेरने सूर्यपुरकी अद्भुत शोभा बना रक्खी थी। उसके महलोंपर बड़ी ऊँची-ऊँची ध्वजाएँ फहरा रही थीं तथा वह इन्द्रलोककी शोभाको जीतनेके लिए उद्यत सरीखा जान पड़ता था। अपने-अपने इन्द्रों सहित चारों निकायोंके सुर और असुर आदरके साथ शीघ्र ही आकर जिनेन्द्र भगवान्‌की भक्तिसे उस नगरकी तीन प्रदक्षिणाएँ दे उसकी शोभा देखने लगे ॥ ३८ ॥ तदनन्तर सज्जनोंका सखा और मर्यादाको जाननेवाला इन्द्र नगरमें प्रवेश कर शिवादेवीके महलके समीप खड़ा हो गया और वहींसे उसने आदरसे युक्त, पवित्र एवं चञ्चलतासे रहित इन्द्राणीको जात बालकके लानेका आदेश दिया। पतिकी आज्ञानुसार इन्द्राणीने प्रसूतिका-गृहमें प्रवेश किया। उस समय आदरसे भरी इन्द्राणी अत्यधिक सुशोभित हो रही थी ॥ ३९ ॥ वहाँ उसने यत्नपूर्वक जिन-माताको प्रणाम कर मायामयी निद्रामें सुला दिया तथा देव-मायासे एक दूसरा बालक बनाकर उनके समीप लिटा दिया। तदनन्तर इन्द्राणीने कोमल हाथोंसे जिन-बालकको उठा कर अपने स्वामी—इन्द्रके लिए दे दिया और देवोंके राजा इन्द्रने शिरसे जिन-बालकको प्रणाम कर दोनों हाथोंसे उन्हें ले लिया ॥ ४० ॥ जिन्होंने अपने मुख रूपी चन्द्रमाके द्वारा चन्द्रमाको जीत लिया था, नेत्रोंसे पुण्डरीक-सफेद कमलको जीत लिया था, शरीरकी कान्तिसे नील कमलोंके वनकी शोभाको प्रमुख रूपसे पराजित कर दिया था और अपने हाथों तथा पैरोंसे कमलोंको पराभूत कर दिया था ऐसे जिनेन्द्र बालकको उस समय इन्द्र एक हजार नेत्रोंसे भी देख कर तृप्तिको प्राप्त

१. स्थितिविद् + आदिदेश + आहताम् । २. जिनेन्द्रमुख—म०, ग० । ३. जिनपद्म—म० ।

विधाय स सुरद्विपस्फटिकभूभृतो मस्तके जिनेन्द्रशिशुमिन्द्रनीलमणितुङ्गचूडामणिम्[1] ।
चचाल चलचामरातपनिवारणोच्चैश्चिरचलोर्मिकुलसङ्कुलो जलनिधिर्यथा फेनिलः ॥४२॥

सुरेभवदनत्रिके दशगुणे द्वयोश्चाष्ट ते रदाः प्रतिरदं सरः सरसि पद्मिनी तत्र च ।
भवन्ति मुखसंख्यया सहितपद्मपत्राण्यपि प्रशस्तरसभाविता[2] प्रतिदलं नटत्यप्सराः[3] ॥४३॥

तथाविधविभूतिभिः समुपगम्य मेरुं सुराः परीत्य पृथु पाण्डुकाख्यवनखण्डमभ्येत्य ते ।
जिनेन्द्रमतिचन्द्रपाण्डुकशिलातले कोमले सुपञ्चशतकार्मुकोच्चहरिविष्टरेऽतिष्ठपन्[4] ॥४४॥

ततश्च धृतपूजनोपकरणेषु देवाङ्गनागणेषु परितः स्थितेष्वभिनवोत्सवानन्दिषु ।
नटत्सु कृतपोत्कटप्रकटनाटकेषु[5] स्फुटप्रकृष्टरसभावहावलयरञ्जितस्वर्गिषु ॥ ४५ ॥

रटत्पटहशङ्खशब्दहरिनादभेरीरवैर्गिरीन्द्रसुबृहद्गुहाप्रतिनिनादसंवर्धितैः ।
दिगन्तरविसर्पिभिर्जिनगुणैरिव प्रस्फुटैरशेषभुवनोदरे श्रुतिसुखावहैः पूरिते ॥४६॥

नभस्तलमितस्ततः स्थगयति स्फुरत्सौरभे विचित्रपटवासधूपपटले सुपुष्पोत्करे ।
सुगन्धयति बन्धुरे परमगन्धहृद्ये दिशां मुखानि सुखपाण्डुकप्रभवमातरिश्वन्यलम् ॥४७॥

गृहीतबहुविग्रहः सुरपरिग्रहो वासवः समारभत भक्तितो जिनमहाभिषेकं स्वयम् ।
विधातुममराहृतैस्तु मणिहेमकुम्भच्युतैः पयोमयपयोनिधेः शुभपयोभिरुद्गन्धिभिः ॥४८॥

[चतुर्भिः कलापकम्]

नहीं हुआ उसकी देखनेको उत्कण्ठा ज्यों-की-त्यों बनी रही ॥४१॥ वह इन्द्र जिनके मस्तकपर इन्द्रनील मणिका ऊँचा चूडामणि सुशोभित हो रहा था, ऐसे जिन-बालकको ऐरावत हाथी रूपी स्फटिकमय पर्वतके मस्तकपर विराजमान कर चला। उस समय वह इन्द्र चञ्चल चामर और छत्रोंसे अतिशय शोभायमान था और उनसे ऐसा जान पड़ता था मानो चञ्चल तरङ्गोंके समूहसे युक्त फेनसे भरा समुद्र ही चला जा रहा हो ॥४२॥ ऐरावत हाथीके बत्तीस मुख थे, प्रत्येक मुखमें आठ-आठ दाँत थे, प्रत्येक दाँतपर एक-एक सरोवर था, प्रत्येक सरोवरमें एक-एक कमलिनी थी, एक-एक कमलिनीमें बत्तीस-बत्तीस पत्र थे और एक-एक पत्रपर उत्तम रससे भरी हुई एक-एक अप्सरा नृत्य कर रही थी ॥४३॥ उस प्रकार की लोकोत्तर विभूतिके के साथ देव लोग मेरु पर्वतके समीप पहुँचे तथा उसकी परिक्रमा देकर पाण्डुक नामक विशाल वन खण्डमें प्रविष्ट हुए। वहाँ उन्होंने विशाल पाण्डुकशिलाके ऊपर जो पाँच सौ धनुष ऊँचा सिंहासन है उसपर जिन-बालकको विराजमान किया ॥४४॥

तदनन्तर पूजाके उपकरणोंको धारण करनेवाले एवं नवीन उत्सवसे आनन्दित देवाङ्गनाओंके समूह जब चारों ओर खड़े थे, स्पष्ट तथा श्रेष्ठ रस, भाव, हाव और लयसे देवोंको अनुरञ्जित करनेवाले श्रेष्ठ नृत्यकारोंके समूह जब नृत्य कर रहे थे, सुमेरु पर्वतकी सुविशाल गुफाओंसे गूँजनेवाली प्रतिध्वनिसे वृद्धिङ्गत, दिशाओंके अन्तरालमें फैलनेवाले, जिनेन्द्र भगवान्के गुणोंके समान अत्यन्त प्रकट, एवं कानोंको सुख देनेवाले बजते हुए नगाड़ों और शङ्खोंके शब्द तथा सिंहनाद और भेरियोंकी ध्वनियोंसे जब संसारका मध्यभाग परिपूर्ण हो रहा था, प्रकट होती हुई सुगन्धिसे युक्त, नाना प्रकारके पटवास, धूपोंके समूह और उत्तमोत्तम पुष्पोंके समूह जब इधर-उधर आकाशतलको व्याप्त कर रहे थे, और सुखरूपी पाण्डुक वनसे उत्पन्न उत्कृष्ट गन्धसे हृदयको प्रिय लगनेवाली सुन्दर वायु जब दिशाओंके मुखको अत्यन्त सुगन्धित कर रही

१. चूलामणिं क०, ख०, ग० । २. भाविताः म०, ग० । ३. नटन्त्यप्सराः म०, ग० । ४. -मतिष्ठद् म० । ५. नाटकपेटकः (ग० टि०) ।

बहुत्रिदशपङ्क्तिभिः प्रमदपूरिताभिर्नभः स्फुरन्मणिगणोज्ज्वलत्कलशपाणिभिः सर्वतः ।
सुमेरुगिरिदुग्धाम्बुनिधिमध्यमध्यासितं रराज बहुरज्जुभिस्तदिव [1]नीयमानं तदा ॥४९॥
गृहाण कलशं लघु क्षिप नयाशु सन्धारय प्रभुं च मम सन्मुखं त्वमिति कर्णरम्यारवैः ।
करात्करमितस्ततः सुरगणस्य कुम्भावली श्रिया श्रयति पाण्डुकं वनमिवोरुहंसावली ॥५०॥
[2]सुवर्णमणिरत्नरौप्यमयकुम्भकाल्यो बभुः प्रवेगमरुतां[3] वशा रविशशाङ्कमाला यथा ।
सुपक्षपुटदीप्तिभिः खचितदिङ्मुखाः खे रयोत्पतद्गरुडहंसपङ्क्तय इव यथानेकशः ॥५१॥
शताध्वरभुजोद्धृतैर्जलधरैरिवोद्गर्जितैः सहस्रगणनैर्घटैः शुचिपयोभिरावर्जितैः ।
जिनोऽभिषवमाप्नुवन् [4]धवलमद्रिराजं व्यधाद्दधाति धवलात्मतामधवलो हि शुद्धाश्रयात् ॥५२॥
सतोषमपरेऽपि ते निखिल[5]कल्पनाथादयो यथेष्टमभिषेचनं विदधुरम्बुभिर्निर्मलैः ।
जिनस्य जिनशासनाधिगमशस्तरागोदयाः प्रकाशिततनूरुहास्तनुतरात्मजन्मा[6]म्बुधयः ॥५३॥
ततः सुरपतिस्त्रियो जिनमुपेत्य शच्यादयः सुगन्धितनुपूर्वकैर्मृदुकराः समुद्वर्तनम् ।
प्रचक्रुरभिषेचनं शुभपयोभिरुच्चैर्घटैः पयोधरभरैर्निजैरिव समं समावर्जितैः ॥५४॥

थी तब अनेक शरीरोंको धारण करनेवाले इन्द्रने देवोंके साथ भक्ति पूर्वक, देवोंके द्वारा लाये हुए, मणिमय और सुवर्णमय कुम्भोंसे च्युत, अत्यन्त सुगन्धित क्षीरसागरके शुभ जलसे जिनेन्द्र भगवान्का स्वयं महाभिषेक करना शुरू किया ॥४५-४८॥ उस समय सुमेरु पर्वत और क्षीरसागरके मध्य आकाशमें, हर्षसे भरी एवं देदीप्यमान मणियोंके समूहसे उज्ज्वल कलश हाथमें लिये देवोंकी पंक्तियाँ सब ओर खड़ी थीं उनसे उस समय वह आकाश ऐसा जान पड़ता था मानो बहुत-सी रस्सियोंसे बाँधकर कहीं ले जाया जा रहा हो ॥४९॥ उस समय वहाँ 'कलश लो, जल्दी दो, और तुम भगवान्को शीघ्र ही मेरे सम्मुख धारण करो' इस प्रकार कानोंके लिए प्रिय शब्द हो रहे थे। तथा वह कलशोंकी पंक्ति देव-समूहके एक हाथसे दूसरे हाथमें जाती हुई शोभा पूर्वक पाण्डुक वनमें ऐसी प्रवेश कर रही थी मानो बड़े-बड़े हंसोंकी पंक्ति ही प्रवेश कर रही हो ॥५०॥ आकाशमें वेगशाली देवोंके वशीभूत (हाथोंमें स्थित) सुवर्ण, मणि, रत्न और चाँदीसे निर्मित कलशोंकी पंक्तियाँ आकाशमें ऐसी सुशोभित हो रही थीं मानो सुन्दर पङ्खोंकी कान्तिसे दिशाओंको व्याप्त करती हुई वेगसे उड़नेवाले गरुड़ और हंसोंकी अनेक पंक्तियाँ ही हों ॥५१॥ इन्द्रकी भुजाओंके द्वारा उठाये हुए, मेघोंके समान गर्जना करनेवाले एवं उज्ज्वल जलसे भरे हुए हजार कलशोंसे अभिषेकको प्राप्त होनेवाले भगवान्ने मेरुपर्वतको सफेद कर दिया सो ठीक ही है क्योंकि शुद्ध पदार्थके आश्रयसे अशुद्ध भी शुद्धताको प्राप्त हो जाता है। भावार्थ—भगवान्के अभिषेक जलसे मेरु पर्वत सफेद-सफेद दिखने लगा ॥५२॥ जिनशासनकी प्राप्तिसे जिनके प्रशस्त रागका उदय हो रहा था, जिनके शरीरमें रोमाञ्च प्रकट हुए थे और जिनका संसार रूपी सागर अत्यन्त अल्प रह गया था ऐसे अन्य समस्त स्वर्गोंके इन्द्रोंने भी बड़े सन्तोषके साथ इच्छानुसार निर्मल जलसे जिनेन्द्र भगवान्का अभिषेक किया था ॥५३॥ तदनन्तर कोमल हाथोंको धारण करनेवाली शची आदि इन्द्राणियोंने आकर सुगन्धित द्रव्योंसे भगवान्को उद्वर्तन—उबटन किया और अपने ही स्तनोंके समान सुशोभित एक साथ उठाये हुए,

---

१. तदवनीयमानं म० । २. सुवर्णमयरूपकान्तिमय-म० । ३. प्रवेगमरुतां म० । ४. ·माप्नुयाद्धवल-म० । ५. समस्तदेवेन्द्रादयः । ६. जन्माधयः म० ।

दुकूलमणिभूषणस्रगनुलेपनोद्भासितं प्रयोज्य शुभपर्वतं विभुमरिष्टनेम्याख्यया ।
सुरासुरगणास्ततः स्तुतिभिरित्थमिन्द्रादयः परीत्य परितुष्टुवुर्जिनमिमं[1] सुपृथ्वीश्रियाम्[2] ॥५५॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ जन्माभिषेकवर्णनो नामाष्टत्रिंशः सर्गः ॥३८॥

शुभ जलसे परिपूर्ण कलशोंके द्वारा उनका अभिषेक किया ॥५४॥ तदनन्तर इन्द्र आदि समस्त सुर और असुरोंके समूहने उत्तम वस्त्र, मणिमय आभूषण, माला तथा विलेपनसे सुशोभित, कल्याणके पर्वत, एवं अतिशय विशाल लक्ष्मीके स्वामी श्री जिनेन्द्र देवका अरिष्टनेमि नाम रखकर उनकी प्रदक्षिणा दी और उसके बाद नाना प्रकारकी स्तुतियोंसे उनका स्तवन किया ॥५५॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें भगवान्‌के जन्माभिषेकका वर्णन करनेवाला अड़तीसवाँ पर्व समाप्त हुआ ॥३८॥

१. जिनमिति म० । २. श्रियम् म०, ग० ।

एकोनचत्वारिंशः सर्गः

[1]सकलश्रुतमत्यवधिप्रविकासिविशुद्धविलासमिनिद्र विशिष्ट-
विलोचनदृष्टिविदृष्टसमस्तचराचरतत्त्वजगत्त्रितय ।
त्रितयात्मकदर्शनबोधचरित्रविनिर्मलरत्नविराजितपूर्व[2]-
भवोग्रतपोयुतषोडशकारणसंचिततीर्थंकरप्रकृते ॥१॥
प्रकृतेः स्थितितोऽनुभवाच्च विशिष्टतराद्भुतपुण्यमहोदय-
मारुतवेगविचालितदेवनिकायकुलाचलसेवितपादयुग ।
युगमुख्य मुखाम्बुजदर्शनतृप्तिविवर्जितभव्यमधुव्रतधीर-
तरस्तवनध्वनिबृंहितदुन्दुभिनादनिवेदितशुद्धयशः ॥२॥
यशसा धवलीकृतजन्मपवित्रितभारतवर्ष महाहरिवंश-
महोदयशैलशिखामणिबालदिवाकरदीप्तिजितार्कवपुः ।
वपुषाधिककान्तिभृताजितपूर्णशशाङ्क, विभो ! हरिनीलमणि-
द्युतिमण्डलमण्डितदिङ्मुखमण्डल नेमिजिनेन्द्र ! नमो भवते ॥३॥
भवतेह भुवां त्रितये भवता गुरुणा परमेश्वर विश्वजनीन
महेद्धधिया प्रतिपादितमप्रतिमप्रतिमारहितम् ।
हितमुक्तिपथं प्रथितं विधिवत् प्रतिपद्य विधाय[3] तपो विविधं
विधिना प्रविधूय कुकर्ममलं सकलं भुवि भव्यजनः प्रणतः ॥४॥

इन्द्र, नेमिजिनेन्द्रकी इस प्रकार स्तुति करने लगा—हे प्रभो ! आपने समस्त श्रुतज्ञान मतिज्ञान और अवधिज्ञानसे विकसित, शुद्ध चेष्टाओंके धारक, जागरूक एवं विशिष्ट पदार्थोंको दिखलानेवाली दृष्टिके द्वारा समस्त चराचर पदार्थोंसे युक्त तीनों जगत्‌को अच्छी तरह देख लिया है। आपने सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्रके भेदसे त्रिविधताको प्राप्त निर्मल रत्नोंसे सुशोभित पूर्वभव सम्बन्धी उग्र तपसे युक्त सोलह कारण भावनाओंके द्वारा तीर्थंकर नामक पुण्य प्रकृतिका संचय किया है ॥१॥ उसी तीर्थंकर प्रकृतिकी स्थिति तथा अनुभागबन्धके कारण अत्यन्त विशिष्ट एवं अद्भुत पुण्यके महोदय रूपी वायुके वेगसे आपने देव समूह रूपी कुलाचलोंको विचलित किया है। उन्होंने आपके चरण युगलकी सेवा की है। आप युगमें मुख्य हैं तथा आपके मुख कमलके देखने सम्बन्धी तृप्तिसे रहित भव्यजीव रूपी भ्रमरोंके अत्यधिक स्तवनोंको ध्वनिसे वृद्धिंगत दुन्दुभियोंके शब्दसे आपका शुद्ध यश प्रकट हो रहा है ॥२॥ हे नाथ ! आपने यशसे शुक्लीकृत जन्मसे समस्त भारतवर्षको पवित्र किया है। अत्यन्त श्रेष्ठ हरिवंश रूप विशाल उदयाचलके शिखामणि स्वरूप बालदिनकर जैसी कान्तिसे आपने सूर्यके शरीरको जीत लिया है। हे विभो ! आपने अधिक कान्तिको धारण करनेवाले शरीरके द्वारा पूर्णचन्द्रको जीत लिया है एवं इन्द्रनील मणि जैसी कान्तिके समूहसे आपने समस्त दिशाओंके मुख मण्डलको सुशोभित कर दिया है इसलिए हे नेमि जिनेन्द्र ! आपको नमस्कार हो ॥३॥ हे परमेश्वर ! हे विश्वजनीन ! हे अप्रतिम—हे अनुपम ! आप तीनों लोकोंके गुरु हैं, एवं उत्कट बुद्धिके धारक हैं। यहाँ उत्पन्न होते ही आपने अनुपम, प्रसिद्ध एवं मोक्षका जो हितकारी मार्ग बतलाया है उसे स्वीकारकर तथा नाना प्रकारका तपकर भव्यजीव विधिपूर्वक समस्त पाप

१. त्रोटकद्वयनिर्मितः कश्चित् छन्दो-विशेषः (?)। २. तीर्थंकरनाम्नः स्थितेरनुभागोदयाच्च (ग० टि०)। ३. विधायि म०।

प्रणत[1]प्रिय ! संप्रति जन्मजरामरणामयभीममहाभवदुःख-
समुद्रमपारमतीत्य समेष्यति मोक्षमशेषजगच्छिखरम् ।
शिखराग्रसमग्रगुणाश्रयसिद्धमहापरमेष्ठिमहोपचयं
प्र[2]वदन्ति च यं मुनयः परमं पदमेकमिहाक्षरमात्महितम् ॥५॥
महितं महतां महदात्मगतं सततोदयमन्तविवर्जितमूर्जित-
सत्त्वसुखं प्रतिलभ्यमलभ्यमभव्यजनैः खलु यत्र सुखम् ।
सुखमत्र यदीश्वरविश्वजगत्प्रभुताप्रति[3]बद्धमपि प्रिय-
शेन्द्रनरेन्द्रपुरस्सरदेवमनुष्यविशेषमहाभ्युदयप्रभवम् ॥६॥
प्रभवप्रलयस्थितिधर्मपदार्थनिरूपणनैपुणशासन शासन
तावकशासनसेवनयैव भविष्यति नान्यमताश्रयतः ।
श्रयतामिति निश्चयमेत्य भवन्ति भवत्यवि[4]मूर्तिमति[5]प्रवणाः
सततं तनुभृन्निवहा भुवि येऽत्र त एव जिनेन्द्र कृतित्वमिताः ॥७॥
प्रियसर्वहितार्थवचोविभवं विभवं सुरभीकृतदिग्विवरं
वरसंहतिसंस्थितिरूपयुतं युतसर्वसुलक्षणपङ्क्तिरुचिम् ।
रुचिमत्पयसा समदेहरसं रसभावविदं मलमुक्ततनुं
तनुजस्विदिहीनमनन्ततया ततया [6]संहितं भुवि वीर्यतया ॥८॥

तोटकवृत्तम्

यतयात्मधिया[7] जितमात्मभुवं[8] भुवमत्यतरां सुखसस्यभृताम्[9] ।
भृतविश्व ! भवन्तमनन्तगुणं गुणकाङ्क्षितया वयमीश नताः ॥९॥

कर्मरूपी मलको विधिपूर्वक नष्टकर पृथिवीमें वन्दनीय होंगे ॥४॥ हे प्रणतप्रिय ! हे भक्त-वत्सल ! अब आप जन्म जरा मरण रूपी रोगोंसे भयंकर संसार रूपी महादुःखके अपार सागर-को पारकर मोक्षस्वरूप, समस्त लोककी उस शिखरको प्राप्त होंगे जहाँपर उत्कृष्ट सीमाको प्राप्त समस्त गुणोंके आधारभूत सिद्ध भगवान् रूप महा परमेष्ठी विराजमान रहते हैं और जिसे मुनिगण उत्कृष्ट, अद्वितीय, अविनाशी एवं आत्म-हितकारी पद कहते हैं ॥५॥ जहाँका उत्तम, महान्, आत्मगत, निरन्तर उदयमें रहनेवाला, अन्तरहित और अनन्त बलसम्पन्न सुख महापुरुषोंको ही प्राप्त हो सकता है अभव्य जीवोंको नहीं। हे स्वामिन् ! आप उत्पाद व्यय और ध्रौव्य स्वभाववाले पदार्थोंके निरूपण करनेमें निपुण शासनका उपदेश करनेवाले हैं। इस संसारमें समस्त जगत्की प्रभुतासे संबद्ध एवं इन्द्र नरेन्द्र आदि देव और मनुष्योंके विशेष महान् अभ्युदयोंका कारण भूत जो सुख है वह भी आपके शासनकी सेवासे ही प्राप्त होगा। अन्य मतोंके आश्रयसे नहीं। इसलिए सब आपका ही आश्रय लेवें इस प्रकार आपके विषयमें निश्चय—दृढ़ श्रद्धाको प्राप्तकर जो प्राणी इस पृथिवीमें निर्ग्रन्थ बुद्धिके धारण करनेमें प्रवीण होते हैं—निर्ग्रन्थ मुद्रा धारण करते हैं हे जिनेन्द्र ! वे ही प्राणी इस संसारमें कृतकृत्यताको प्राप्त होते हैं ॥६–७॥ हे भगवन् ! आप प्रिय एवं सर्वहितकारी वचनोंके वैभवसे सहित हैं, संसारका अन्त करने वाले हैं, आपने दिशाओंके अन्तरालको सुगन्धित कर दिया है, आप उत्कृष्ट संहनन, उत्कृष्ट संस्थान और उत्कृष्ट रूपसे युक्त हैं, आप समस्त लक्षणोंसे सुशोभित हैं, आपके शरीरका रस—रुधिर दूधके समान है, आप रस और भावको जाननेवाले हैं, आपका शरीर मलसे रहित है, पसीनासे रहित है, आप पृथिवीमें व्याप्त अनन्त बलसे सहित हैं, ॥८॥ अपने संयम रूप आत्म बुद्धिसे कामदेवको जीत लिया है। आप सुख रूपी

१. प्रणतिप्रिय म० । २. प्रविदन्ति म० । ३. प्रतिबुद्धमपि म० । ४. -त्यभिभूति म० । ५. नति ग० । ६. -महितम् ग० । ७. जिनयात्मभुवम् । ८. कामदेवम् (ग० टि०) । ९. सुखसस्यभृतम् ।

दोधकवृत्तम्

योजनभूरिसहस्रसमोच्चं योगकरत्वमिवाचलनाथम् ।
नाथ ! परं स्नपनासनमिद्धमिद्धमतिः कुरुते क उदारः ॥ १० ॥
ईदृशमीश विभुत्वममानं मानधनामरमानवमान्यम् ।
मान्यतमोऽन्यतमो भुवि ना[1] को नाकभवोऽ[2]पि जिनेति यथा त्वम् ॥११॥
शैशव एव जनातिगसत्त्वः सत्त्वहितो भुवनत्रयनूतः ।
नूतनभक्तिभरेण नतानां तानव[3]मानससौख्यकर[4]स्त्वम् ॥१२॥
कामकरीन्द्रमृगेन्द्र नमस्ते क्रोधमहाहिविराज[5] नमस्ते ।
मानमहीधरवज्र नमस्ते लोभमहावनदाव नमस्ते ॥१३॥
ईश्वरताधरधीर नमस्ते विष्णुतया युत देव नमस्ते ।
अर्हदचिन्त्यपदेश नमस्ते ब्रह्मपदप्रतिबन्ध[6] नमस्ते ॥१४॥
सत्यवचोनिवहैः सुरसंघा इत्यभिनुत्य जिनं प्रणिपत्य ।
तारकमुग्रभवादुरमेकं याचितवन्त इनं वरबोधिम् ॥१५॥

सस्यसे परिपूर्ण एवं अत्यन्त रक्षणीय भूमिकी रक्षा करनेवाले हैं। हे सबके रक्षक भगवन्! इस तरह आप अनन्त गुणोंके धारक हैं। हे नाथ! आपके गुणोंकी अभिलाषासे हम आपके प्रति नम्रीभूत हैं—आपको नमस्कार करते हैं ॥९॥ हे नाथ! यह अनेकों हजार योजन ऊँचा पर्वतोंका राजा सुमेरु पर्वत भी मानो आपके योगका साधन हो गया। सो आपके सिवाय प्रचण्ड बुद्धिको धारण करनेवाला ऐसा कौन महापुरुष है जो इसे श्रेष्ठ तथा देदीप्यमान स्नानपीठ बना सकनेको समर्थ है ॥१०॥ हे ईश! यह आपका ऐश्वर्य अपरिमित है, मान-रूपी धनके धारक बड़े-बड़े देव तथा मनुष्योंके द्वारा माननीय है। हे जिनेन्द्र! इस संसारमें स्वर्गमें उत्पन्न होनेवाला भी ऐसा कौन दूसरा माननीय पुरुष है जो आपके समान ऐश्वर्यको प्राप्त कर सके ॥११॥ हे भगवन्! बाल्यकालमें भी आप लोकोत्तर पराक्रमके धारक हैं, प्राणियोंके हितकारक हैं, तीनों लोकोंके द्वारा स्तुत हैं तथा आप नूतन भक्तिके भारसे नम्रीभूत मनुष्योंके लिए शारीरिक और मानसिक सुखके करनेवाले हैं ॥१२॥ हे प्रभो! आप कामरूपी गजराजको नष्ट करनेके लिए सिंहके समान हैं इसलिए आपको नमस्कार हो। आप क्रोधरूपी महानागको वश करनेके लिए पक्षिराज—गरुडके समान हैं इसलिए आपको नमस्कार हो। आप मानरूपी पर्वतको चकनाचूर करनेके लिए वज्रके समान हैं अतः आपको नमस्कार हो और आप लोभरूपी महावनको भस्म करनेके लिए दावानलके समान हैं इसलिए आपको नमस्कार हो ॥१३॥ आप ईश्वरताके धारण करनेमें धीर-वीर हैं अतः आपको नमस्कार हो। हे देव! आप विष्णुतासे युक्त हैं अतः आपको नमस्कार हो। आप अर्हन्त रूप अचिन्त्य पदके स्वामी हैं अतः आपको नमस्कार हो और आप ब्रह्म पदको प्राप्त करनेवाले हैं अतः आपको नमस्कार हो ॥१४॥ इस प्रकार सत्य वचनोंके समूहसे देवोंने भगवान्‌की स्तुति कर उन्हें प्रणाम किया तथा भयंकर संसारसे पार करनेवाले भगवान्‌से उन्होंने यही एक वर माँगा कि हे भगवन्! हम लोगोंको उत्तम बोधिकी प्राप्ति हो ॥१५॥

---

१. ना पुरुषः भटः किंनामधेय इत्यर्थः। २. नाकभुवोऽपि ग०। ३. मानव म०। ४. शारीरिक-मानसिकसौख्यविधायकः। ५. क्रोधमहानागगरुड़। ६. ब्रह्मपथप्रतिबन्ध म०, ग०।

वृत्तानुगन्धिगद्यम्

अथ मथितमहामृताम्भोधिसंशुद्धपीयूषपिण्डातिपानातिदोषाचिराज्जीर्यमाणेष्विवोद्गीर्यमाणेषु तत्खण्ड-खण्डेषु, शङ्खेषु खे खेदमुक्तैः सुरैस्तोषपोषादनीषन्मनीषैर्भृशं पूर्यमाणेषु तथा वाद्यमानोरुगम्भीरभेरीमृदङ्गा-नकादिप्रभूताततातोद्यशब्देषु संवृत्तजैनेन्द्रजन्माभिषेकोत्सवोद्घोषणायेव निःशेषलोकान्तदिक्चक्रवाला[1]न्तरा-क्रान्तिमभ्युत्थितेषु प्रनृत्यत्सु विद्याधरव्रातदेवाङ्गनातुङ्गसंगीतनादाभिरामातिशृङ्गारहास्याद्भुतोद्यद्रसोदारवा[2]गङ्ग-सत्त्वस्फुटाहार्यहार्यात्मदिव्याभिनेयप्रवृत्ताप्सरोवृन्दबन्धेषु, सौधर्मकल्पाधिपः संभ्रमाद्विभ्रमभ्राजमानोद्यदैरावत-स्कन्धमारोप्य संवृत्यधीरं जिनेन्द्रं सितच्छत्रशोभं चलच्चामरालीभिरावीज्यमानं प्रगीताप्सरोलोकसंगीय-मानातिशुद्धात्मकीर्तिं चचालाचलेन्द्राद[3]नीकैरशेषैस्त्वशेषं नभोभागमापूर्[4]य शौर्यं शैलैरलं यादवेन्द्रैर्मृगेन्द्रैरिवाध्या-सितं प्रथितविबुधनिकायैः पथि प्रस्थितैः सप्रमोदैः प्रणामप्रणुतिप्रगीतिप्रयोगप्रवृत्तैर्यथायोगमभिनन्द्यमानो महानन्दमापादयन् पादपद्मोपसेवासनाथस्य नाथस्त्रिलोकामराधीशलोकस्य लोकातिवर्तिप्रवृत्तं परम्पार-मैश्वर्यमत्यद्भुतं संदधानः, शिवानन्दनो, नन्द वर्धस्व जीवेति चेत्यादि पुण्याभिधानैस्तदा स्तूयमानः कुलाद्रिप्रसूतिप्रभूताच्छतोयापगावीचिसन्तानसंसर्गशीतात्मना भोगभूभूरुहाणां विचित्रप्रसूनप्रतानप्रसङ्गेन

अथानन्तर खेद-रहित एवं विशाल बुद्धिके धारक देव संतोषकी अधिकतासे आकाशमें जिन शङ्खोंको अधिक मात्रामें फूँक रहे थे वे ऐसे जान पड़ते थे मानो अमृतके महासागरके मथनेसे जो अत्यन्त शुद्ध अमृतका पिण्ड निकला था उसे अधिक मात्रामें पी जानेके दोषसे देव लोग चिरकाल तक पचा नहीं सके इसलिए उन्होंने उगल दिया हो उसी पीयूष-पिण्डके टुकड़े हों। शङ्खोंके शब्दोंके साथ-साथ बजाये जानेवाले अत्यधिक गम्भीर ध्वनिसे युक्त भेरी, मृदङ्ग तथा पटह आदिको एवं अधिक मात्रासे बजनेवाली बाँसुरी और वीणाके शब्द, 'श्री जिनेन्द्र भगवान्‌के जन्माभिषेकका उत्सव हो चुका है' इसकी घोषणा करनेके लिए ही मानो जब समस्त लोकके अन्त तक एवं समस्त दिशाओंके अन्तरालमें व्याप्त होनेके लिए उठ रहे थे। और जब विद्याधरोंके समूह एवं देवाङ्गनाओंके उन्नत संगीतमय शब्दोंसे सुन्दर श्रेष्ठ शृङ्गार, हास्य और अद्भुत रससे परिपूर्ण वाचिक, आङ्गिक, सात्त्विक और आहार्य इन चार प्रकारके अपने सुन्दर दिव्य अभिनेयोंके प्रकट करनेमें प्रवृत्त अप्सराओंके समूह सुन्दर नृत्य कर रहे थे। तब सौधर्म स्वर्गका इन्द्र, संभ्रम पूर्वक विभ्रमोंसे शोभायमान उठते हुए ऐरावत हाथीके कन्धेपर धीर-वीर जिनेन्द्रको विराजमानकर सुमेरु पर्वतसे उस शौर्यपुरकी ओर चला जो शूरवीरताके पर्वत एवं सिंहोंके समान बलवान् यादववंशी राजाओंसे अधि-ष्ठित था। उस समय जिनेन्द्र भगवान्‌के ऊपर सफेद छत्र सुशोभित हो रहा था, चञ्चल चमरोंकी पंक्तियाँ उनपर ढोरी जा रही थीं, और प्रकृष्ट गीतोंसे युक्त अप्सराओंके समूह उनकी अत्यन्त विशुद्ध कीर्ति गा रहे थे। सौधर्मेन्द्रने उस समय समस्त आकाशको सब प्रकारकी सेनाओंसे पूर्ण कर रखा था। मार्गमें चलते हुए, हर्षसे परिपूर्ण, प्रणाम, स्तुति तथा संगीतके प्रयोगमें लीन प्रसिद्ध देवोंके समूह भगवान्‌का यथायोग्य अभिनन्दन कर रहे थे। त्रिलोक सम्बन्धी इन्द्रोंका समूह भगवान्‌के चरणकमलोंकी सेवामें तत्पर था और भगवान् उसे महान् आनन्द प्राप्त करा रहे थे। इस प्रकार जो लोकोत्तर एवं अत्यन्त आश्चर्य-कारी परम ऐश्वर्यको धारण कर रहे थे, शिवादेवीके पुत्र थे, 'समृद्धिको प्राप्त होओ' 'बढ़ते रहो' 'जीवित रहो' इत्यादि पुण्य शब्दोंसे उस समय जिनकी स्तुति हो रही थी, कुलाचलोंसे उत्पन्न अत्यधिक स्वच्छ जलसे युक्त महानदियोंकी तरंगोंके संसर्गसे शीतल, भोगभूमि सम्बन्धी कल्पवृक्षोंके रंग-विरंगे पुष्प-समूहके संयोगसे आश्चर्यकारी सुगन्धिको धारण करने-

---

१. चक्रवालोत्तराक्रान्ति म० । २. धाराङ्ग म० । ३. -दनेकै-म० । ४. -मापूर्यशैलै-म० ।

सौगन्ध्यमत्यद्भुतं बिभ्रता सम्भ्रमेणातिदूराद् खेदापनोदार्थमभ्युत्थितेनेव मित्रेण गात्रानुकूलेन मन्दानिलेन प्रभुस्तीर्थकृत्कोमलाङ्गः समालिङ्ग्यमानो मनोहारिबाल्यानुरूपाम्बरोद्भासिभूषाविशेषोद्यमाल्योज्ज्वलो बालकल्पद्रुमोद्दामशोभातिशायी घनश्यामभूर्तिः सितोद्गन्धिसच्चन्दनेनोपदिग्धः स्फुरत्सान्द्रचन्द्रातपाश्लिष्ट-सम्प्रेन्द्रनीलाद्रिलक्ष्मीधरो देवसेनावृतः शीघ्रमुल्लङ्घ्य काष्ठामुदीचीमधिष्ठानमात्मीयमुच्चैर्ध्वजव्रातवादित्रधीर-ध्वनिव्याप्तदिक्चक्रवालाम्बरं दिव्यगन्धाम्बुवर्षाभिषिक्तापतत्पुष्पवर्षोपरुद्धोरुरथ्यापथं श्रीनिधानं विधानेन माङ्गल्यसंसक्तिना चारुसौर्यं पुरं प्रापदैश्वर्यमाश्चर्यभूतं भुवि प्राकटं विश्वलोकस्य कुर्वन्नसौ नेमिनाथः।
जिनशिशुमशिशुश्रियं शौरिसौर्यप्रजाशुंभदम्भोजिनीबालभास्वन्तमुत्तुङ्गमातङ्गराजोत्तमाङ्गस्थमादाय तं मातुरुत्सङ्गमानीय शक्रः स्वयंविक्रियाशक्तियुक्तः सहस्रं भुजां भासुरांसस्थलश्रीमुषां स [१]प्रकृत्य प्रसार्यो-रुसौन्दर्यसन्दर्भगर्भामरस्त्रीसहस्राणि चित्रं प्रनृत्यन्ति बिभ्रद्भुजेष्वग्रतो यादवानां मुदा पश्यतां विश्वकाश्यप्य-धीशत्वलाभादपि प्राज्यलाभं हृदि ध्यायतां स्फारिताक्षं क्षणारब्धसत्ताण्डवाखण्डशोभाप्रयोगान्वितं वाद्य[२]जातिप्रतानप्रवृद्धाभिनेयं सभ्रूक्षोभलीलं सदिक्चक्रभेदं सभूमिप्रपातं[३] महानन्दसन्नाटकं राज्यदक्षो ननाट स्फुटीभूतनानारसोदारभावं ततोऽर्हद्गुरुं देवराजः प्रणम्य प्रपूज्यान्यमर्त्यैरनर्घ्यैरलभ्यैर्विभूषादिभिर्भूष-

बाले तथा खेद दूर करनेके लिए संभ्रमपूर्वक बहुत दूरसे सम्मुख आये हुए मित्रके समान, शरीरके अनुकूल मन्द-मन्द समीरसे जिनका आलिङ्गन हो रहा था, जो प्रभु थे, तीर्थंकर थे, कोमल शरीरके धारक थे, जो मनको हरण करनेवाले तथा बाल्य अवस्थाके अनुरूप वस्त्रोंसे सुशोभित विशिष्ट आभूषणोंसे युक्त थे, देदीप्यमान मालाओंसे उज्ज्वल थे, बाल कल्पवृक्षकी उत्कट शोभाको तिरस्कृत करनेवाले थे, मेघके समान श्याममूर्तिके धारक थे, सफेद एवं उत्कृष्ट गन्धसे युक्त उत्तम चन्दनसे लिप्त थे और इसके कारण जो उदित होती हुई सघन चाँदनीसे आलिङ्गित प्रगाढ़ इन्द्रनीलमणिके पर्वतकी शोभाको धारण कर रहे थे, और देवोंकी सेनासे आवृत थे ऐसे नेमिजिनेन्द्र शीघ्र ही उत्तर दिशाको उल्लङ्घ कर अपने उस सौर्यपुर नगरमें जा पहुँचे जहाँकी दिशाओंका अन्तराल और आकाश ऊँची-ऊँची ध्वजाओंके समूह तथा वादित्रोंकी गंभीर ध्वनिसे व्याप्त था, जहाँके बड़े-बड़े मार्ग, दिव्य और सुगन्धित जलकी वृष्टिसे सींचे जाकर फूलोंकी पड़ती हुई वर्षासे रुके हुए थे, जो लक्ष्मीका भण्डार था तथा मङ्गलाचारमय विधि-विधानसे सुन्दर था, उस समय भगवान् नेमिनाथ पृथिवीपर समस्त लोगोंको आश्चर्यमें डालनेवाले आश्चर्यको प्रकट कर रहे थे।

बालक होनेपर भी जिनकी शोभा बालकों जैसी नहीं थी अर्थात् जो प्रकृतिसे वयस्कके समान सुन्दर थे। जो कृष्ण तथा सौर्यपुरकी प्रजारूपी शोभायमान कमलिनीको विकसित करनेके लिए बालसूर्य थे और जो अतिशय ऊँचे ऐरावत-गजराजके मस्तकपर विराजमान थे ऐसे जिन-बालकको लेकर इन्द्रने उन्हें माताकी गोदमें दिया। तदनन्तर विक्रिया शक्तिसे युक्त इन्द्रने स्वयं देदीप्यमान कन्धोंकी शोभाको पुष्ट करनेवाली हजार भुजाएँ बनाकर उन्हें फैलाया तथा उनपर अत्यधिक सौन्दर्यसे युक्त नानाप्रकारका नृत्य करनेवाली हजारों देवियोंको धारण किया। तत्पश्चात् इस लीलाको जब सामने बैठे हुए यादव लोग बड़े हर्षसे देख रहे थे तथा अपने हृदयमें जब इसे समस्त पृथ्वीके स्वामित्वके लाभसे भी अधिक समझ रहे थे तब राज्यमें दक्ष इन्द्रने महानन्द नामका वह उत्तम नाटक किया जिसने सबके नेत्रोंको विस्तृत कर दिया था, अर्थात् जिसे सब टकटकी लगाकर देख रहे थे। उत्सवपूर्वक प्रारम्भ किये हुए उत्तम ताण्डव नृत्यकी अखण्ड शोभाके प्रयोगसे सहित

१. प्रकृत्यपसार्यो म०। २. वाद्यजातिप्रतातप्रवृत्ताभिनेयं म०, वाद्यजातिप्रभानुप्रवृद्धाभिनेयं ग०। ३. प्रयातं म०।

पित्वा जिनस्यामृताहारमु[1]त्कराङ्गुष्ठके दक्षिणे न्यस्य रक्षानिमित्तं वयस्यान् कुमारान् सुराणां सुरेन्द्रः कुमारस्य सम्यग्निरूप्याप्रमत्तं कुबेरं वयोभेदकालर्तुयोग्यं विभोः क्षेमयोग्यं विधेयं समस्तं त्वयेति स्थिरं ज्ञापयित्वा समापृच्छ्य जैनौ गुरू तावनुज्ञां ततः प्राप्य संप्राप्तकामः कृतार्थं निजं मन्यमानो यथायातमन्यैरशेषैः सुरेन्द्रैश्चतुर्भेददेवानुगैर्यातवान् सिद्धयात्रस्ततो दिक्कुमार्योऽपि संवृत्तकार्याः समासाद्य तामार्यपुत्रीं सपुत्रीं शिवां संप्रणम्य प्रहृष्टाः प्रजग्मुर्निजस्थानदेशान् दिशस्ता दश द्योतयन्त्यः शरीरप्रभाभिर्जगन्नेमिचन्द्रोऽपि शुभ्रैर्गुणग्रामसान्द्रांशुजालैः समाह्लादयन् बालभावेऽप्यबालक्रि[2]यो लालितो बन्धुवर्गामरैर्वर्द्धमानो रराज श्रिया।

स्तवनमिदमरिष्टनेमीश्वरस्येष्टजन्माभिषेकाभिसम्बन्धमाक्रान्तलोकत्रयातिप्रभावस्य पापापनोदस्य पुण्यैकमार्गस्य संसारसारस्य मोक्षोपकण्ठस्य भव्यप्रजानां प्रमोदस्य कर्तुः प्रमादस्य हर्तुर्धर्मस्योपनेतुर्मुदा श्रूयमाणस्य स्मर्यमाणस्य च संकीर्त्यमानस्य संकीर्तनं पठ्यमानं समाकर्ण्यमानं सदा

था, नानाप्रकारके वादित्रोंकी जातियोंके समूहसे जिसमें अभिनेय अंश वृद्धिको प्राप्त हो रहे थे, जो भौंहोंके क्षोभकी लीलासे सहित था, दिङ्मण्डलके भेदसे सहित था, पृथ्वीके प्रपातसे सहित था, और नाना रसोंके कारण जिसमें उदार-भाव प्रकट हो रहा था।

तदनन्तर इन्द्रने भगवान्‌के माता-पिताको प्रणाम किया, उनकी पूजा की, अन्य मनुष्योंके लिए दुष्प्राप्य अमूल्य आभूषण आदिसे उन्हें विभूषित किया, रक्षाके निमित्त जिनेन्द्रके दाहिने हाथके अँगूठेमें अमृतमय मुख्य आहार विक्षिप्त किया। क्रीडाके लिए भगवान्‌की समान अवस्थाको धारण करनेवाले देवकुमारोंको उनके पास नियुक्त किया, कुबेरको यह आज्ञा दी कि तुम भगवान्‌की अवस्था, काल और ऋतुके अनुकूल उनके कल्याणके योग्य समस्त व्यवस्था करना। इस प्रकार इन्द्र यह आज्ञा देकर भगवान्‌के माता-पितासे पूछकर तथा उनकी आज्ञा प्राप्तकर अपने आपको कृतकृत्य मानता हुआ चार निकायके देवोंसे अनुगत समस्त इन्द्रोंके साथ जैसा आया था वैसा चला गया। इन्द्रकी यात्रा सफल हुई।

तदनन्तर अपना-अपना कार्य पूरा कर दिक्कुमारी देवियोंने आर्यपुत्री, जिनबालक सहित माता–शिवादेवीके पास आकर उन्हें प्रणाम किया और उसके बाद वे प्रकृष्ट हर्षसे युक्त अपने शरीरकी प्रभाओंसे दशों दिशाओंको देदीप्यमान करती हुई अपने-अपने स्थानोंपर चली गईं। इधर गुण-समूहरूपी किरणोंके समूहसे समस्त जगत्‌को आनन्दित करनेवाले, बालक होनेपर भी वृद्धों जैसी क्रियासे युक्त, बन्धुवर्ग तथा देवोंके द्वारा लालित नेमिजिनेन्द्ररूपी चन्द्रमा दिन-प्रतिदिन बढ़ते हुए लक्ष्मीसे सुशोभित होने लगे।

गौतम स्वामी कहते हैं कि यह स्तवन उन नेमिजिनेन्द्रके जन्माभिषेकसे सम्बन्ध रखनेवाला है जिनके सातिशय प्रभावने तीनों लोकोंको व्याप्त कर रखा है, जो पापको दूर करनेवाले हैं, एक पुण्यका ही मार्ग बतानेवाले हैं, संसारमें सारभूत हैं, मोक्षके निकट हैं, भव्य-जीवोंको हर्ष उत्पन्न करनेवाले हैं, प्रमादको हरनेवाले हैं, धर्मका उपहार देनेवाले हैं, सब लोग बड़े हर्षसे जिनका नाम श्रवण करते हैं, जिनका स्मरण करते हैं और जिनका अच्छी तरह कीर्तन करते हैं। पढ़ा गया, सुना गया और सदा चिन्तवन किया गया यह स्तोत्र इस लोकमें साक्षात् सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूपी सम्पत्तिको करता है, मानसिक और शारीरिक सुख-प्रदान करता है, शान्ति करता है, पुष्टि करता है, तुष्टि और

---

१. मुख्यं म०। २. क्रियोल्लालितो ग०।

चिन्त्यमानं सम्यक्त्वज्ञानचारित्ररत्नत्रयस्याप्तिसंपत्करं [1]चैवत्वारीरसौख्यप्रदं शान्तिकं पौष्टिकं तुष्टिसंप्राप्तिसंपादि साक्षादिहामुत्र चानेककल्याणसंप्राप्तिहेतोः प्रपुण्यास्रवस्य स्वयं कारणं वारणं सर्वपापास्रवाणां सहस्रस्य विध्वंसकरणं दारुणस्यापि पूर्वत्र सर्वत्र चानेहसि स्नेह[2]मोहादिभावेन संचित-स्यैनसः । स्तोत्रमुख्यं जिनेन्द्रे[3] विधेयादिदं भक्तिभारं परम् ।

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ जन्माभिषेके इन्द्रस्तुतिवर्णनो नाम एकोनचत्वारिंशः सर्गः ॥३९॥

सम्पत्तिको सम्पन्न करता है तथा परलोकमें अनेक कल्याणोंकी प्राप्तिमें कारणभूत उत्कृष्ट पुण्यास्रवका स्वयं कारण है, समस्त पाप कर्मोंके हजारों प्रकारके आस्रवोंका निवारण करता है और पूर्वभवमें सर्वदा स्नेह तथा मोह आदि भावोंसे सञ्चित भयंकरसे-भयंकर पापोंका नाश करता है। यह मुख्य स्तोत्र, जिनेन्द्र भगवान्‌में सातिशय भक्ति उत्पन्न करे।

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें जन्माभिषेक के समय इन्द्र द्वारा कृत स्तुतिका वर्णन करनेवाला उनतालीसवाँ सर्ग समाप्त हुआ ॥३९॥

---

१. चैवं म० । २. स्नेहमोदिभावेन म० । ३. जिनेन्द्र ग० ।

चत्वारिंशः सर्गः

अथ श्रुत्वा जरासन्धो भ्रातुर्वधमसौ मृधे[1] । शोकसिन्धौ निमग्नोऽरिक्रोधपोतेन धारितः ॥१॥
समस्तयदुनाशाय समस्तनयपौरुषः । सोऽभ्यमित्रममीर्गन्तुं मित्रवर्गमजिज्ञपत् ॥२॥
प्रभोस्तस्य समादेशान्नानादेशाधिपा नृपाः । चतुरङ्गबलोयुक्ताः श्रिताः स्वामिहितैषिणः ॥३॥
दत्तप्रयाणमेनं स्वमनन्तसैन्याब्धिवर्तिनम् । विविदुर्यदुशार्दूलाश्चतुराश्चारचक्षुषः ॥४॥
ततः श्रुतवयोवृद्धा वृष्णिभोजकुलोत्तमाः । कर्तुमारेभिरे मन्त्रमिति तत्त्वनिरूपिणः ॥५॥
त्रिखण्डाखण्डिताज्ञोऽन्यैः प्रचण्डश्चण्डशासनः । चक्रखड्गगदादण्डरत्नाद्यस्त्रबलोद्धतः ॥६॥
कृतज्ञः कृतदोषेषु प्रणतेषु कृतक्षमः । [2]अस्मास्वनपकारः प्रागुपकारैकतत्परः ॥७॥
जामातृभ्रातृघातोत्थपराभवरजोमलम् । प्रमार्ष्टुं कोपवानस्मान्मागधोऽभ्येत्य बिभ्यतः ॥८॥
दैवपौरुषसामर्थ्यमस्मदीयमतिस्मयः । प्रकटीभूतमप्येष पश्यन्नपि न पश्यति ॥९॥
कृष्णस्य पु[3]ण्यसामर्थ्यं पौरुषं च बलस्य च । बाल्यादारभ्य निःशेषमिदं परमवैभवम् ॥१०॥
नेमितीर्थंकरस्यापि देवेन्द्रासनकम्पिनः । प्रभुत्वं च स्फुटीभूतं बालस्यापि जगत्त्रये ॥११॥

अथानन्तर—युद्धमें भाईका वध सुनकर शोकरूपी सागरमें डूबता हुआ जरासंध, शत्रुओंपर उत्पन्न हुए क्रोधरूपी जहाजके द्वारा बचाया गया था। भावार्थ—भाई अपराजितके मरनेसे जरासन्धको जो दुःख हुआ था उससे वह अवश्य ही मर जाता परन्तु शत्रुओंसे बदला लेनेके क्रोधने उसकी रक्षा कर दी ॥१॥ समस्त नय और पराक्रममें निपुण जरासंधने समस्त यादवोंका नाश करनेके लिए मनमें पक्का विचार कर लिया और निर्भीक हो शत्रुके सन्मुख जानेके लिए मित्रोंके समूहको आज्ञा दे दी ॥२॥ स्वामीकी आज्ञा पाकर उसके हितकी इच्छा करनेवाले नाना देशोंके राजा अपनी-अपनी चतुरङ्ग सेनाओंसे युक्त हो आ पहुँचे ॥३॥ इधर अनन्त सेनारूपी सागरके मध्यमें वर्तमान जरासन्धने जब यादवोंकी ओर प्रयाण किया तब गुप्तचररूपी नेत्रोंको धारण करनेवाले चतुर यादवोंने शीघ्र ही उसका पता चला लिया ॥४॥ तदनन्तर जो शास्त्र और अवस्थामें वृद्ध थे तथा पदार्थका यथार्थ स्वरूप निरूपण करनेवाले थे ऐसे वृष्णिवंश एवं भोजवंशके प्रधान पुरुष इस प्रकार मन्त्र करनेके लिए तत्पर हुए ॥५॥

वे कहने लगे कि तीन खण्डोंमें इसकी आज्ञा अन्य पुरुषोंके द्वारा कभी खण्डित नहीं हुई। यह अत्यन्त उग्र है, इसका शासन भी अत्यन्त उग्र है, चक्र, खड्ग, गदा तथा दण्डरत्न आदि अस्त्रोंके बलसे यह उद्धत है, किये हुए उपकारको माननेवाला है, जो मनुष्य अपराधकर नम्रीभूत हो जाते हैं उनपर यह क्षमा कर देता है, हम लोगोंका इसने पहले कभी अपकार नहीं किया, उपकार करनेमें ही निरन्तर तत्पर रहा है किन्तु अब माता और भाईके वधसे उत्पन्न पराभवरूपी रजके मलको दूर करनेके लिए क्रोध युक्त हुआ है और भयभीत होते हुए हम लोगोंके सम्मुख आ रहा है ॥६–८॥ यह इतना अहंकारी है कि हम लोगोंकी दैव और पुरुषार्थ सम्बन्धी सामर्थ्यको जो कि अत्यन्त प्रकट है देखता हुआ भी नहीं देख रहा है ॥९॥ कृष्णके पुण्यका सामर्थ्य और बलरामका पौरुष—यह सब परम वैभव बालक अवस्था ही से प्रकट हो रहा है। इन्द्रोंके आसनको कम्पित कर देनेवाले नेमिनाथ तीर्थंकर यद्यपि इस समय बालक हैं तथापि उनका प्रभुत्व तीनों जगत्में प्रकट हो चुका है। वह यह भी नहीं सोच रहा

---

१. रणे। २. अस्मास्वनपकारेषु प्रागुपकारतत्परः (म० टि०)। ३. पूर्ण इत्यपि (म० टि०)।

यस्यानुपालनव्यग्राः[1] समग्रा लोकपालिनः । तत्तीर्थकृत्कुले को वा मानुषोऽपकरिष्यति ॥१२॥
करेण कः स्पृशेदज्ञः कृशानुमकृशार्चिषम् । तीर्थकृद्बलकृष्णान् वा कोऽभ्येति विजिगीषया ॥१३॥
प्रतिशत्रुरयं राजा जरासन्धोऽस्य हिंसकौ । ध्रुवमत्र समुद्भूतौ रामनारायणाविमौ ॥१४॥
तदत्र यावदायस्य सपक्षः कृष्णपावके । प्रतिशत्रुपतङ्गोऽयं भस्मीभवति न स्वयम् ॥१५॥
तावदाशु वयं शूरं [2]शौरिमस्मद्वशं परम् । विगृह्यासनयोगेन योजयामो जयोन्मुखम् ॥१६॥
स्वीकृत्य वारुणीमाशां कानिचिद्दिवसानि वै । विगृह्यासनमेवं हि कार्यसिद्धिरसंशया ॥१७॥
आसीनानेवमप्यस्मानभ्येति यदि मागधः । रणातिथ्यं प्रकृत्यैनं प्रेषयामो [3]रणप्रियम् ॥१८॥
इति संमन्त्र्य ते मन्त्रं प्रकाश्य कटके स्वके । [4]आनन्दिनीनिनादेन प्रयाणकमजिज्ञपन् ॥१९॥
भेर्यास्तस्या रवं श्रुत्वा चतुरङ्गबलं ततः । यदुभोजकुलक्ष्माभृत्प्रधानमचलद्बलम् ॥२०॥
माथुर्यः शौर्यपूर्यश्च वीर्यपूर्यः प्रजास्तदा । समं स्वाम्यनुरागेण स्वयमेव प्रतस्थिरे ॥२१॥
प्रजाः [5]प्रकृतिभिः सर्वाश्चातुर्वर्ण्याः सधार्मिकाः । प्रस्थानं मेनिरे स्थानादुद्यानक्रीडया समम् ॥२२॥
अष्टादशेति संख्याताः कुलकोट्यः प्रमाणतः । अप्रमाणधनाकीर्णा निर्यान्ति स्म यदुप्रियाः ॥२३॥
प्रशस्ततिथिनक्षत्रयोगवारादिलब्धयः । सुलब्धसुकुला भूपा अगमुरल्पैः प्रयाणकैः ॥२४॥
देशानुल्लङ्घ्य निःशेषान् प्रतीचीं प्रति गच्छताम् । बभूव विपुलस्तेषामुपान्ते विन्ध्यपर्वतः ॥२५॥
गजकाननरम्यस्य सिंहशार्दूलशालिनः । भृङ्गालीडम्बरस्यास्य श्रीर्जहार मनो नृणाम् ॥२६॥

है कि जिस तीर्थंकरका पालन करनेके लिए समस्त लोकपाल व्यग्र रहते हैं उस तीर्थंकरके कुलका कौन मनुष्य अपकार कर सकेगा ? ऐसा कौन अज्ञानी है जो बड़ी-बड़ी ज्वालाओंको धारण करनेवाली अग्निका हाथसे स्पर्श करेगा और ऐसा कौन बलवान् है जो जीतनेकी इच्छासे तीर्थंकर, बलभद्र और कृष्णका सामना करेगा ? ।।१०–१३।। यह राजा जरासन्ध प्रतिनारायण है और इसके मारनेवाले ये बलभद्र तथा नारायण यहाँ निश्चित ही उत्पन्न हो चुके हैं ।।१४।। इसलिए जबतक यह प्रतिनारायण रूपी पतंग, अपने पक्षों (सहायकों, पक्षमें पङ्खों) के साथ आकर कृष्णरूपी अग्निमें स्वयं भस्म नहीं हो जाता है तबतक हम लोग शीघ्र ही विग्रहके बाद अन्यत्र आसन ग्रहण कर शूर-वीर कृष्णको विजयके सम्मुख करें। इस समय हम लोगोंको पश्चिम दिशाका आश्रयकर कुछ दिनों तक चुप बैठ रहना उचित है क्योंकि ऐसा करनेसे कार्यकी सिद्धि निःसन्देह होगी ।।१५–१७।। हम लोग इस तरह शान्तिसे चुप रहेंगे फिर भी यदि जरासन्ध हमारा सामना करेगा तो हम लोग युद्ध-द्वारा सत्कार कर उसे यमराजके पास भेज देंगे ।।१८।। इस प्रकार परस्पर सलाहकर उन्होंने वह मन्त्रणा अपने कटकमें प्रकट की और भेरीके शब्दसे नगरमें प्रस्थान करनेकी आज्ञा दे दी ।।१९।। भेरीका शब्द सुनकर यादव और भोजवंशी राजाओंकी चतुरङ्ग सेना चल पड़ी ।।२०।। मथुरा, शौर्यपुर और वीर्यपुरकी प्रजाने स्वामीके अनुरागसे साथ ही प्रस्थान कर दिया ।।२१।। धर्मात्माजनोंसे युक्त ब्राह्मण, क्षत्रिय, वैश्य आदि चारों वर्णकी प्रजाने राजा, मन्त्री आदि प्रकृतिके साथ होने वाले उस प्रस्थानको ऐसा माना जैसे अपने स्थानसे वनक्रीड़ाके लिए ही जा रहे हैं ।।२२।। उस समय अपरिमित धनसे युक्त अठारह करोड़ यादव शौर्यपुरसे बाहर निकले थे ।।२३।। उत्तम तिथि, नक्षत्र, योग और वार आदिको प्राप्त हुए वे उच्चकुलीन राजा, छोटे-छोटे पड़ावों-द्वारा गमन करते थे ।।२४।। तदनन्तर अनेक देशोंका उल्लंघन कर जब वे पश्चिम दिशाकी ओर गमन कर रहे थे तो विशाल विन्ध्याचल पर्वत उनके समीपस्थ हुआ अर्थात् क्रमशः गमन करते हुए वे विन्ध्याचलके समीप जा पहुँचे ।।२५।। जो हाथियोंके वनोंसे सुन्दर था,

१. पालने व्यग्राः म० । २. वसुदेवजं कृष्णम् । ३. रणः प्रियो यस्य तं यममित्यर्थः । ४. भेरीशब्देन ।
५. 'स्वाम्यमात्यं सुहृत्कोषराष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च' ॥ इत्यमरः ।

अनुवर्त्मं जरासन्धं समायातं निशम्य ते । प्रत्यैक्षन्त महोत्साहा यादवोऽपि युयुत्सवः ॥२७॥
अल्पमन्तरमालोक्य देवताः सेनयोस्तयोः । भरतार्द्धनिवासिन्यः कालदैवनियोगतः ॥२८॥
विकृत्य दिव्यसामर्थ्यादन्तरे चितिकाश्च ताः । अग्निज्वाला[1]परीतांस्तान् दर्शयाञ्चक्रिरे[2]ऽरये ॥२९॥
चतुरङ्गबलं तत्र दह्यमानमितस्ततः । पश्यति स्म जरासन्धो ज्वालालीलीढविग्रहम् ॥३०॥
ज्वालारुद्धपथस्तत्र विश्रान्तनिजसाधनः । अपृच्छद्रुदतीमेकां स्थविरीभूय देवताम् ॥३१॥
दह्यते विपुलः कस्य स्कन्धावारोऽयमाकुलः । किमर्थं रोदिषि त्वं च वद वृद्धे ! यथास्थितम् ॥३२॥
इति पृष्टा समाचष्टे तस्मायश्राविलेक्षणा । शोकं निगृह्य कृच्छ्रेण रुद्धे कण्ठेऽपि मन्युना ॥३३॥
वदामि शृणु तेजस्विन् ! यथादृष्टं यतो जनः । निवेद्य महते दुःखान्महतोऽपि विमुच्यते ॥३४॥
अस्ति राजगृहे राजा जरासन्ध इति श्रुतिः । सत्यसन्धः स यः शास्ति सागरान्तां वसुन्धराम् ॥३५॥
वाडवार्चिश्छलेनास्य नूनमम्बुनिधावपि । प्रज्वलन्ति द्विषां शान्त्यै प्रतापदहनार्चिषः ॥३६॥
आत्मापराधबाहुल्यात्सशल्यहृदयास्ततः । यादवाः क्वापि सन्त्रस्ताः प्रयान्तः प्रियजीविताः ॥३७॥
ते काश्यप्यामपश्यन्तः सन्तः सशरणं क्वचित् । प्रविश्य दहनं याताः शरणं मरणं परम् ॥३८॥
ततो गणभृदाचख्यावनयोर्नरमुख्ययोः । वृत्तं श्रेणिकभूपाय शुश्रूषावहितात्मने ॥८॥
श्रुतवार्तो जरासन्धः सन्धिं प्रति पराङ्मुखः । प्रमुख्यैर्मन्त्रिभिः सत्रा मन्त्रमारभते स्म[6] सः ॥९॥
उपेक्षिताः कुतो हेतो मन्त्रिणो [7]भणतारयः । वार्धौ प्रवृद्धसन्तानास्तरङ्गा इव भङ्गुराः ॥१०॥
मन्त्रिणो हि प्रभोश्चक्षुर्निर्मलं चारचक्षुषः । ते कथं स्वामिनं स्वं च वञ्चयन्ति पुरः स्थिताः ॥११॥
यदि नाम महैश्वर्यप्रमत्तेन [8]मया द्विषः । नालक्ष्यन्त प्रसन्त्वाना युष्माभिस्तु कथं तु ते ॥१२॥
नोच्छिद्येरन्महोद्योगैर्जातमात्रा यदि द्विषः । दुःखयन्ति दुरन्तास्ते व्याधयः कुपिता इव ॥१३॥

इधर कोई एक वणिक् अपना खरीदा हुआ माल बेचनेके लिए बहुत-से अमूल्य मणि लेकर राजा जरासन्धसे मिला ॥१॥ उन मणियोंको देखकर राजा जरासन्धने उससे पूछा कि ये मणि तुम कहाँ से लाये हो ? इसके उत्तरमें वणिक्ने कहा कि हे स्वामिन् ! ये मणि उस द्वारिकापुरीसे आये हैं जहाँ अत्यन्त पराक्रमी राजा कृष्ण रहते हैं ॥२॥ यादवोंके स्वामी कृष्ण समुद्रविजय और उनकी रानी शिवा देवीके जब नेमिनाथ तीर्थंकर उत्पन्न हुए थे तब पन्द्रह मास तक देवोंने रत्न-वृष्टि की थी ॥३॥ उन्हीं रत्नोंमें-से ये रत्न लाया हूँ । वणिक् तथा मन्त्रियोंसे इस प्रकार यादवोंका माहात्म्य सुनकर जरासन्ध क्रोधसे लाल-लाल नेत्रोंका धारक हो गया ॥४॥ इस प्रकार यादवोंकी वृद्धि सुनकर राजा श्रेणिकने श्रुतज्ञान रूपी नेत्रके धारक गौतम गणधरको नमस्कार कर पूछा कि हे भगवन् ! महागुण रूपी किरणोंसे सुशोभित, समुद्रमें मणियोंकी राशिके समान समस्त लोकमें प्रख्यात अत्यधिक यादवोंमें जब जरासन्धने अनेक युद्धोंमें जिनका दृढ़ पराक्रम परिपूर्णताको प्राप्त हो चुका था ऐसे कृष्णका नाम सुना तब उसकी क्या चेष्टा हुई ? सो कृपा कर कहिए ॥५-७॥

तदनन्तर गौतम गणधर, श्रवण करनेके लिए उत्सुक राजा श्रेणिकके लिए दोनों नर-श्रेष्ठ—जरासन्ध और कृष्णका चरित इस प्रकार कहने लगे—॥८॥

यादवोंका समाचार जानकर जरासन्ध सन्धिसे विमुख हो गया और मुख्य मन्त्रियोंके साथ मन्त्र करने लगा ॥९॥ उसने पूछा कि हे मन्त्रियो ! बताओ तो सही समुद्रमें बढ़ती हुई तरङ्गोंके समान भंगुर शत्रु आजतक उपेक्षित कैसे रहे आये ? ॥९-१०॥ गुप्तचर रूपी नेत्रोंसे युक्त राजाके मन्त्री ही निर्मल चक्षु हैं फिर वे सामने खड़े रहकर स्वामीको तथा अपने-आपको क्यों धोखा देते हैं ? ॥११॥ यदि महान् ऐश्वर्यमें मत्त रहनेवाले मैंने उन शत्रुओंको नहीं देखा तो आप लोगोंसे अदृष्ट कैसे रह गये ? आप लोगोंने उन्हें क्यों नहीं देखा ? ॥१२॥ यदि शत्रु उत्पन्न होते ही महान् प्रयत्नपूर्वक नष्ट नहीं किये जाते हैं तो वे कोपको प्राप्त

१. केनचिद्वणिजा अनर्घ्ये०, म०, ख०, घ० । २. स्वक्रियाणक—म० । ३. 'नारायणः द्वर्मा शास्ति द्वारावत्याः प्रभो बली' म० । ४. कोपारुणो दृशोः ग० । ५. भगवान्मगधाधिपः । ६. -मारभ्यते स्म सः म० । ७. भरतारयः म० । ८. महाद्विषः म० ।

कंसं जामातरं हत्वा भ्रातरं चापराजितम् । प्रविष्टाः शरणं दुष्टा यादवा यादसांपतिम्[1] ॥१४॥
यद्यप्यनवगाह्याब्धिगम्भीरोदरमाश्रिताः । उपायानायभिःकृष्टा वध्यास्ते मे झषा यथा ॥१५॥
[2]द्वारिकामधितिष्ठन्तः संतिष्ठन्ते कुतोऽभयाः । तावदेव हि ते यावन्न मे कोपानलो ज्वलेत् ॥१६॥
इयन्तं कालमज्ञाता ज्ञातिभिः सह सुस्थिताः । ज्ञातानामधुना तेषां सुस्थितिर्मद्द्विषां कुतः ॥१७॥
साम्नश्चोपप्रदानस्य न ते स्थानं कृतागसः । ततो युष्माभिरेकान्तात्स्थाप्यतां भेददण्डयोः ॥१८॥
दण्डोपायप्रधानं तं स्वामिनं मन्त्रिणस्ततः[3] । प्रशाम्य प्रणताः प्रोचुः प्रसादपदवीस्थिताः ॥१९॥
आकर्ण्यतां यथा नाथ विदन्तोऽपि वयं द्विषाम् । द्वारिकायां [4]महावृद्धिं कालयापनया स्थिताः ॥२०॥
यादवान्वयसंभूताः स्वर्भुवामपि [5]दुर्जयाः । श्रीनेमिर्वासुदेवश्च बलदेवश्च ते त्रयः ॥२१॥
स्वर्गावतारकाले यः पूजितो वसुवृष्टिभिः । सुरेन्द्रैरभिषिक्तश्च जिनो जन्मनि [6]मन्दरे ॥२२॥
स कथं युधि जीयेत भवतामररक्षितः । युक्तेनापि समस्तेन राजकेन भुवस्तले ॥२३॥
बलकेशवयोश्चापि सामर्थ्यं भवता न किम् । तच्छ्रुतं बहुयुद्धेषु शिशुपालवधादिषु ॥२४॥
यत्पक्षाः पाण्डवाश्चण्डाः प्रतापार्जितकीर्तयः । विद्याधराश्च बहवो वैवाहिकपथस्थिताः ॥२५॥
कोट्यो यत्र कुमाराणां प्रसिद्धा रणशालिनाम् । स्वामिन्नर्धचतुर्थास्ते जीयन्ते यादवाः कथम् ॥२६॥
अन्तस्थानल्पवर्गा पश्युस्तान् कदाचिदपेक्षया । मज्जीता इति मामंस्था नयमार्गविदो यदून् ॥२७॥

हुई बीमारियोंके समान दुःख देते हैं और उनका अन्त अच्छा नहीं होता ॥१३॥ ये दुष्ट यादव मेरे जमाई कंस और भाई अपराजितको मारकर समुद्रकी शरणमें प्रविष्ट हुए हैं ॥१४॥ यद्यपि वे प्रवेश करनेके अयोग्य समुद्रके मध्यभागमें स्थित हैं तथापि उपाय रूपी जलसे खींचकर मछलियोंके समान मेरे वध्य हैं ॥१५॥ द्वारिकामें रहते हुए वे निर्भय क्यों हैं ? अथवा वे तभीतक निर्भय रह सकते हैं जबतक कि मेरी क्रोधाग्नि प्रज्वलित नहीं हुई है ॥१६॥ इतने समयतक मुझे उनका पता नहीं था इसलिए अपने कुटुम्बीजनोंके साथ वे सुखसे रहे आये पर अब मुझे पता चल गया है इसलिए उनका सुख-पूर्वक रहना कैसे हो सकता है ? ॥१७॥ तीव्र अपराध करनेवाले वे साम और दानके स्थान नहीं हैं इसलिए आपलोग एकान्तरूपसे उन्हें भेद और दण्डके ही पक्षमें रखिए ॥१८॥

तदनन्तर प्रधान रूपसे दण्डको ही उपाय समझनेवाले स्वामी जरासन्धको शान्त कर प्रसादके मार्गमें स्थित मन्त्रियोंने नम्रीभूत हो कहा कि हे नाथ ! हमलोग शत्रुओंकी द्वारिकामें होनेवाली महा वृद्धिको जानते हुए भी समय व्यतीत करते रहे इसका कारण सुनिए ॥१९-२०॥ यादवोंके वंशमें उत्पन्न हुए श्री नेमिनाथ तीर्थंकर श्री कृष्ण और बलदेव ये तीन महानुभाव इतने बलवान् हैं कि मनुष्योंकी तो बात ही क्या देवोंके लिए भी उनका जीतना कठिन है ॥२१॥ स्वर्गावतारके समय जो रत्नोंकी वृष्टिसे पूजित हुआ था, जन्मके समय इन्द्रोंने सुमेरु पर्वतपर जिसका अभिषेक किया था और देव जिसकी सदा रक्षा करते हैं वह नेमि जिनेन्द्र युद्धमें आपके द्वारा कैसे जीता जा सकता है अथवा पृथिवी तलके समस्त राजा भी इकट्ठे होकर उसे कैसे जीत सकते हैं ? ॥२२-२३॥ शिशुपालके वधको आदि लेकर जो अनेक युद्ध हुए उनमें क्या आपने बलदेव और कृष्णकी उस लोकोत्तर सामर्थ्यको नहीं सुना ? ॥२४॥ प्रतापसे कीर्तिको उपार्जित करनेवाले महातेजस्वी पाण्डव तथा विवाह सम्बन्धसे अनुकूलता दिखलानेवाले अनेक विद्याधर इस समय जिनके पक्षमें हैं ॥२५॥ और जिनके साढ़े तीन करोड़ कुमार रणविद्यामें कुशल हैं वे यादव कैसे जीते जा सकते हैं ? ॥२६॥ नय मार्गके जानकार

---

१. प्रति म० । २. द्वारिकामधि तिष्ठन्तः म०, ग० । ३. मन्त्रिणस्तथा म० । ४. महावृद्धिः म० । ५. दुर्जयां म० । ६. मन्दिरे म० । मन्दरे = मेरौ ।

दैवकालबलोपेता देवताकृतरक्षणाः । सुप्तव्याघ्रोपमा देव ! तावत्तिष्ठन्तु यादवाः ॥२८॥
आस्महे वयमप्यत्र कालयापनया प्रभो ! । स्वाज्ञ स्वपरकालानां याप्यावस्था हि शस्यते ॥२९॥
अस्यामवस्थयाऽऽसीने त्वयि तेषां प्रकोपिनाम् । द्विषां प्रतिविधानाय प्रतिपद्यस्व पौरुषम् ॥३०॥
इत्यादि मन्त्रिभिः पथ्यं तथ्यं विज्ञापितं प्रभुः । नाग्रहीत्क्षयकाले हि ग्राही ग्राहं न मुञ्चति ॥३१॥
सचिवानपकर्ण्याशु प्रकोपाय नृपो द्विषाम् । दूतं सोऽजितसेनाख्यं प्राहिणोद्द्वारिकां पुरीम् ॥३२॥
स प्राच्यानां प्रतीच्यानामपाच्यानां च भूभृताम् । उदीच्यानामगस्थानां मध्यदेशाधिवासिनाम् ॥३३॥
चतुरङ्गबलेशानां शासनानतिलङ्घिनाम् । दूतानजीगमत्क्षिप्रमायान्त्विति पराक्रमी ॥३४॥
दूतदर्शनमात्रेण कर्णदुर्योधनादयः । ते संप्राप्ता जरासन्धं सत्यसन्धाहितैषिणः ॥३५॥
नृपैस्तैरनुयातोऽसौ तनयाद्यैर्महाबलैः । निमित्तैर्वार्यमाणोऽपि प्रतस्थेऽरिजिगीषया ॥३६॥
स दूतोऽजितसेनोऽपि स्वामिकार्यहितः पुरीम् । सुद्वारां द्वारिकां प्राप सुकृतीव दिवं कृती ॥३७॥
प्रविश्य नगरीं रम्यामनेकाद्भुतसङ्कुलाम् । दृश्यमानो जनैः पौरैराससाद नृपालयम् ॥३८॥
अशेषयादवाकीर्णां भोजपाण्डवसंयुताम् । सभां स प्राविशद्विष्णोः प्रतीहारनिवेदितः ॥३९॥
कृतप्रणतिरध्यास्य दापितासनमग्रतः । वक्तुं प्रारभत स्वामिबललाभावलेपतः ॥४०॥
आकर्ण्यतां समाधाय मनः सकलयादवैः । यथा शास्ति महाराजो मागधः परमेश्वरः ॥४१॥

यदु किसी समय किसी अपेक्षा समुद्रके मध्य जाकर रहे थे। वे 'हमसे भयभीत हैं' ऐसा मत समझिए ।।२७।। इसलिए हे देव ! जो दैव और कालके बलसे सहित हैं, देव जिनकी रक्षा करते हैं और जो सोते हुए सिंहके समान हैं ऐसे यादव उधर द्वारिकामें सुखसे रहें और इधर हम लोग भी समय व्यतीत करते हुए सुखसे रहें क्योंकि हे उत्तम आज्ञाके धारक ! प्रभो ! जिसमें अपना और परका समय सुखसे व्यतीत हो वही अवस्था प्रशंसनीय कही जाती है ।।२८–२९।। आपके इस अवस्थासे रहनेपर भी यदि वे क्रोध करते हैं तो उनका प्रतिकार करनेके लिए पुरुषार्थको स्वीकृत करो ।।३०।। इसे आदि लेकर मन्त्रियोंने यद्यपि हितकारी एवं सत्य निवेदन किया तथापि जरासन्धने उसे कुछ भी ग्रहण नहीं किया सो ठीक ही है क्योंकि विनाशके समय हठी मनुष्य अपना हठ नहीं छोड़ता ।।३१।।

राजा जरासन्धने मन्त्रियोंको अनसुना कर शत्रुओंको शीघ्र ही कुपित करनेके लिए अजितसेन नामक दूतको द्वारिकापुरी भेजा ।।३२।। पराक्रमी राजा जरासन्धने चतुरङ्ग सेनाओंके स्वामी, एवं आज्ञाका उल्लङ्घन न करनेवाले पूर्व, पश्चिम, दक्षिण और उत्तर दिशाओं, पर्वतों एवं मध्यदेशके निवासी राजाओंको 'आप लोग जल्दी आइए' यह कहकर दूत भेजे ।।३३–३४।। दूतको देखते ही सत्यप्रतिज्ञ एवं हितको चाहनेवाले कर्ण, दुर्योधन आदि राजा, जरासन्धके पास आ पहुँचे ।।३५।। उक्त राजा तथा महाबलवान् पुत्र आदि कुटुम्बीजन जिसके पीछे-पीछे चल रहे थे ऐसा जरासन्ध, खोटे निमित्तोंसे रोके जानेपर भी शत्रुओंको जीतनेकी इच्छासे चल पड़ा ।।३६।।

उधर जिस प्रकार पुण्य कार्य करनेवाला कुशल मनुष्य स्वर्ग जा पहुँचता है उसी प्रकार स्वामीके कार्यमें लगा हुआ अजितसेन दूत भी उत्तमोत्तम द्वारोंसे युक्त द्वारिका नगरीमें जा पहुँचा ।।३७।। अनेक आश्चर्यकारी रचनाओंसे व्याप्त सुन्दर द्वारिकापुरीमें प्रवेशकर नगरवासी-जनोंके द्वारा देखा गया वह दूत क्रम-क्रमसे राजमहलमें पहुँचा ।।३८।। द्वारपालके द्वारा सूचना देनेपर उसने समस्त यादवोंसे व्याप्त एवं भोज और पाण्डवोंसे युक्त श्री कृष्णकी सभा में प्रवेश किया ।।३९।। प्रणाम करनेके बाद आगे दिलाये हुए आसनपर बैठकर उसने स्वामी के बलकी प्राप्तिसे उत्पन्न घमण्डसे इस प्रकार बोलना शुरू किया ।।४०।।

वह बोला कि राजाधिराज महाराज जरासन्ध जो आज्ञा देते हैं उसे समस्त यादव

यूयमेव स्फुटं ब्रूत किमनिष्टं कृतं मया । युष्माकं येन साशङ्काः प्रविष्टाः सागरोदरम् ॥४२॥
सापराधतया यूयं यद्यप्युद्भूतभीतयः । दुर्गं श्रितास्तथाप्यस्मद्भयं नमतैत्य माम् ॥४३॥
अथ दुर्गबलाद्यूयं तिष्ठतानतिवर्जिताः । एषोऽहं सागरं पीत्वा बलैः कुर्वे कदर्थनाम् ॥४४॥
अज्ञातावस्थितीनां च कालदेशबलं बलम् । अधुना ज्ञातवार्तानां कालदेशबलं कुतः ॥४५॥
वचोहरवचः श्रुत्वा कुपिता निखिला नृपाः । कृष्णादयो जगुस्तत्र भृकुटीकुटिलाननाः ॥४६॥
आयात्वासन्नकालोऽसौ समस्तबलसंयुतः । रणातिथ्यं ददामोऽस्मै सङ्ग्रामोत्कण्ठिता वयम् ॥४७॥
इत्युक्त्वा स विसृष्टस्तै रूक्षवाग्वज्रताडितः । गत्वा स्वस्वामिने [1]पूर्वं निवेद्य कृतितां गतः ॥४८॥
विमलामलशार्दूलाः समुद्रविजयं ततः । मन्त्रिणो मन्त्रनिपुणाः संमन्त्र्येति व्यजिज्ञपन् ॥४९॥
शान्तये साम लोकस्य [2]स्यात्स्वपक्षविपक्षयोः । मागधेन समं साम तस्माद्राजन् प्रयुञ्ज्महे ॥५०॥
ज्ञातिवर्गः समस्तोऽयं कुमारनिकरादिकः । अपायबहुले युद्धे संशयः कुशलं प्रति ॥५१॥
सन्ति योधा यथाऽस्माकममोघशरवर्षिणः । साधनो मागधस्यापि तथैव भुवि विश्रुतः ॥५२॥
तदेकस्यापि हि ज्ञातेरपायो रणमूर्धनि । यथा शत्रोस्तथास्माकमतिदुःखकरो भवेत् ॥५३॥
अतो विश्वजनीनार्थं साम तावत्प्रशस्यते । तदर्थं प्रेष्यतां दूतो [3]मागधान्तिकमस्मयात् ॥५४॥

मन स्थिर कर सुनें ॥४१॥ उनका कहना है कि आप ही लोग स्पष्ट बताओ कि मैंने आपका क्या अनिष्ट किया है ? जिससे कि भयभीत हो आप लोग समुद्रके मध्यमें जा बसे हो ॥४२॥ यद्यपि अपराधी होनेके कारण भयभीत हो तुम लोगोंने दुर्गका आश्रय लिया है तथापि मुझसे तुम्हें भय नहीं है तुम लोग आकर मुझे नमस्कार करो ॥ ४३ ॥ यदि दुर्गका बल पा तुम लोग बिना नमस्कार किये यहाँ रहोगे तो यह मैं समुद्रको पीकर सेनाओंके द्वारा तुम्हारी अभी हाल दुर्दशा कर दूँगा ॥४४॥ जबतक तुम्हारे यहाँ रहनेका पता नहीं था तभी तक तुम्हें काल और देशका बल, बल था पर आज पता चल जानेपर काल और देशका बल कैसे रह सकता है ? ॥४५॥

दूतके उक्त वचन सुनकर कृष्ण आदि समस्त राजा कुपित हो उठे और भौंहोंसे मुखको कुटिल करते हुए कहने लगे कि जिसकी मृत्यु निकट आ पहुँची है ऐसा तुम्हारा राजा समस्त सेनाओंके साथ आ रहा है सो युद्धके द्वारा हम उसका सत्कार करेंगे। हम लोग संग्रामके लिए उत्कण्ठित हैं ॥४६–४७॥ इस प्रकार कहकर यादवोंने दूतको विदा किया। वह उनके रूक्ष वचनरूपी वज्रसे ताडित होता हुआ द्वारिकासे चलकर अपने स्वामीके पास गया और सब समाचार कहकर कृतकृत्यताको प्राप्त हुआ ॥४८॥ तदनन्तर दूतके चले जानेपर मन्त्र करनेमें निपुण विमल, अमल और शार्दूल नामक मन्त्रियोंने सलाहकर राजा समुद्रविजयसे इस प्रकार निवेदन किया ॥४९॥

हे राजन् ! क्योंकि साम, स्वपक्ष और परपक्षके लोगोंको शान्तिका कारण होगा इस-लिए हम लोग जरासन्धके साथ सामका ही प्रयोग करें। यह जो कुमारोंका समूह आदि है वह सब स्वजनोंका समूह है। अपायबहुल युद्धमें इन सबकी कुशलताके प्रति सन्देह है ॥५०–५१॥ जिस प्रकार हमारी सेनामें अमोघ बाणोंकी वर्षा करनेवाले योद्धा हैं उसी प्रकार जरासन्धकी सेना भी पृथिवीमें प्रसिद्ध है ॥ ५२ ॥ युद्धके अग्रभागमें यदि एक भी स्वजन की मृत्यु हो जायेगी तो वह जिस प्रकार शत्रुके लिए दुःखका कारण होगी उसी प्रकार हमारे लिए भी दुःखका कारण हो सकती है ॥ ५३ ॥ इसलिए सबकी भलाईके लिए साम ही प्रशंस-नीय उपाय है। अतः अहङ्कारको छोड़कर साम–शान्तिके लिए जरासन्धके पास दूत भेजा

१. पूर्वी म० । २. दण्डस्य म० । ३. माधवान्तिक-म० ।

मागधः शाम्यमानोऽपि साम्ना यदि न शाम्यति । तदा तदुचितं कुर्मः को दोषः सामयोजने ॥५५॥
इति मन्त्रिभिरामन्त्र्य राजा विज्ञापितस्तदा । को दोष इति संमन्त्र्य लोहजङ्घमजीगमत् ॥५६॥
स दक्षः शौर्यसंपन्नः कुमारो नीतिलोचनः । जगाम निजसैन्येन जरासन्धेन सन्धये ॥५७॥
पूर्वमालवमासाद्य कृतसैन्यनिवेशनः । प्राप्तौ कान्तारभिक्षार्थं कान्तारे सार्थयोगिनौ ॥५८॥
मासोपवासिनौ दृष्ट्वा तिलकानन्दनन्दकौ । प्रतिगृह्यान्नपानाद्यैः पञ्चाश्चर्याणि लब्धवान् ॥५९॥
तीर्थं देवावताराख्यं ततः प्रभृति भूतले । भूतं भूतसहस्राणां पापोपशमकारणम् ॥६०॥
दूतो गत्वा जरासन्धं सन्धानं प्रत्यसम्मुखम् । प्रत्यबोधयदेकान्ते प्रतिबोधनपण्डितः ॥६१॥
लोहजङ्घवचोऽत्यन्तप्रसन्नः प्रतिपन्नवान् । स सन्धानं जरासन्धः षण्मासावधिकं ततः ॥६२॥
दूतः पूजां नृपात्प्राप्य स प्राप्य द्वारिकां ततः । समुद्रविजयाद्यर्थं निवेद्य स्थितवान् कृती ॥६३॥
साम्नैव ततो वर्षे सामग्रीप्रत्यपेक्षया । पूर्णे पूर्णमहासन्धो[1] महासामन्तसन्ततिः[2] ॥६४॥
जरासन्धोऽत्र संप्राप्तः सैन्यसागररुद्धदिक् । कुरुक्षेत्रं महाक्षत्रप्रधानप्रधनोचितम् ॥६५॥
पूर्वमभ्येत्य तत्रैव केशवोऽपरसागरः । तस्थावापूर्यमाणः सन् वाहिनीनिवहैर्निजैः ॥६६॥
तत्रापाच्या नृपाः केचिदुदीच्याश्चापरान्तिकाः । संबन्धिनः सृता विष्णुं सकलैः स्वबलैर्युताः ॥६७॥

जाये ॥ ५४ ॥ हाँ, सामके द्वारा शान्त करनेपर भी यदि जरासन्ध शान्त नहीं होता है तो हम लोग फिर उसके अनुरूप कार्य करेंगे। इस प्रकार साम उपायके अवलम्बन करनेमें क्या दोष है ? ॥ ५५ ॥

इस प्रकार मन्त्रकर मन्त्रियोंने जब राजा समुद्रविजयसे कहा तो उन्होंने उत्तर दिया कि 'क्या दोष है ?' दूत भेजा जाये। इस प्रकार सलाह कर उन्होंने लोहजङ्घ कुमारको भिजवा दिया ॥५६॥ कुमार लोहजङ्घ बहुत ही चतुर, शूर-वीर और नीतिरूपी नेत्रका धारक था। वह अपनी सेना ले जरासन्धके साथ सन्धि करनेके लिए चला ॥५७॥ पूर्वमालव देशमें पहुँचकर उसने वहाँके वनमें अपनी सेनाका पड़ाव डाला, वहाँ साथ-साथ बिचरनेवाले तिलकानन्द और नन्दन नामक दो मुनिराज आये। वे दोनों मुनि मासोपवासी थे और 'वनमें आहार मिलेगा तो लेंगे अन्यथा नहीं' यह नियम ले वनमें विहार कर रहे थे। उन्हें देख कुमार लोहजङ्घने उन्हें पड़गाह कर आहार दिया और उसके फलस्वरूप पञ्चाश्चर्य प्राप्त किये ॥५८–५९॥ उसी समयसे वह स्थान पृथिवीतलपर 'देवावतार' नामक तीर्थ बन गया और हजारों प्राणियोंके पाप शान्त होनेका कारण हो गया ॥६०॥

जरासन्ध यद्यपि सन्धि करनेके पक्षमें नहीं था तथापि समझानेमें चतुर दूत लोहजङ्घने जाकर उसे एकान्तमें समझाया ॥६१॥ लोहजङ्घके वचनोंसे जरासन्ध बहुत प्रसन्न हुआ और उसने छह माह तकके लिए सन्धि स्वीकृत कर ली ॥६२॥ तदनन्तर राजा जरासन्धसे सम्मान प्राप्तकर लोहजङ्घ द्वारिका वापस लौट आया और समुद्रविजय आदिके लिए सब समाचार सुनाकर कृतकृत्य हो सुखसे रहने लगा ॥६३॥ तदनन्तर युद्धकी तैयारीका ध्यान रख यादवोंने एक वर्ष शान्तिसे व्यतीत किया। इस प्रकार एक वर्ष पूर्ण हो जानेपर महाप्रतिज्ञाको पूर्ण करनेवाला जरासन्ध बड़े-बड़े सामन्तोंके समूहसे युक्त तथा सेनारूपी सागरसे दिशाओंको व्याप्त करता हुआ बड़े-बड़े राजाओंके युद्धके योग्य कुरुक्षेत्रके मैदानमें आ पहुँचा ॥६४–६५॥ अपनी सेनारूपी नदियोंके समूहसे भरे हुए कृष्णरूपी दूसरे सागर भी पहले ही आकर वहाँ आ जमे थे ॥६६॥ उस समय कृष्णके सम्बन्धी कितने ही दक्षिण-उत्तर और पश्चिमके राजा अपनी-अपनी समस्त सेनाओंके साथ आकर कृष्णसे आ मिले ॥ ६७ ॥

१. पूर्णमहासन्धौ म० । २. महासामन्तसन्नतिः म० ।

दशार्हाः सान्त्वना भोजाः पाण्डवाश्चापि बान्धवाः। अन्ये च नृपशार्दूलाः प्रसिद्धा हरये हिताः॥६८॥
अक्षौहिणीपतिस्तत्र समुद्रविजयो नृपः। उग्रसेनोऽग्रणीः पुंसां तथैवाक्षौहिणीप्रभुः॥६९॥
मेरुरक्षौहिणीस्वामी श्रीमानिक्ष्वाकुवंशजः। अक्षौहिण्यर्धनाथस्तु राष्ट्रवर्धनभूपतिः॥७०॥
तथार्धाक्षौहिणीनाथः सिंहलानामधीश्वरः। राजा पद्मरथश्चापि तत्समानबलो बली॥७१॥
दायादः शकुनेर्वीरश्चारुदत्तः पराक्रमी। अक्षौहिणीचतुर्थांशपतिः कृष्णहितेरितः॥७२॥
बर्बरा यमनाभीराः काम्बोजा द्रविडा नृपाः। अन्ये च बहवः शूराः शौरिपक्षमुपाश्रिताः॥७३॥
अक्षौहिण्यो बहुगुणा[1] जरासन्धमुपागताः। चक्ररत्नप्रभावेण वशीकृतभारतम्॥७४॥
अक्षौहिणीप्रमाणं तु सप्रमाणमुदीरितम्। वाजिवारणपत्तीनां रथानां गणनायुतम्॥७५॥
नवहस्तिसहस्राणि नवलक्षा रथा मताः। नव कोट्यस्तुरङ्गास्तु शतकोट्यो नरा नव॥७६॥[2]
यदुष्वतिरथो नेमिस्तथैव बलकेशवौ। अतिक्रम्य स्थितान् सर्वान् भारतेऽतिरथांस्तु ते॥७७॥
समुद्रविजयो राजा वसुदेवो युधिष्ठिरः। भीमकर्णार्जुना रुक्मी रौक्मणेयश्च सत्यकः॥७८॥
धृष्टद्युम्नोऽप्यनावृष्टिः शल्यो भूरिश्रवा नृपः। राजा हिरण्यनाभश्च सहदेवश्च सारणः॥७९॥
शस्त्रशास्त्रार्थनिपुणाः पराङ्मुखदयापराः। महावीर्या महाधैर्या राजानोऽमी महारथाः॥८०॥

दशार्ह, सान्त्वना देनेवाले भोज और पाण्डव आदि बन्धुजन तथा अन्य अनेक उत्तमोत्तम प्रसिद्ध राजा श्री कृष्णके हितकी इच्छा करते हुए आ मिले॥६८॥ वहाँ राजा समुद्रविजय एक अक्षौहिणीके स्वामी थे, पुरुषोंमें अग्रेसर राजा उग्रसेन भी एक अक्षौहिणीका स्वामी था और इक्ष्वाकुवंशमें उत्पन्न राजा मेरु भी एक अक्षौहिणीका अधिपति था। राष्ट्रवर्धन देशका राजा आधी अक्षौहिणीका स्वामी था॥६९–७०॥ सिंहल देशका राजा आधी अक्षौहिणीका प्रभु था और बलवान् राजा पद्मरथ भी उसीके समान—अर्ध अक्षौहिणी प्रमाण सेनासे युक्त था॥७१॥ शकुनिका भाई वीर पराक्रमी चारुदत्त जो कि कृष्णके हितमें सदा तत्पर रहता था एक चौथाई अक्षौहिणीका स्वामी था॥७२॥ बर्बर, यमन, आभीर, काम्बोज और द्रविड़ आदिके अन्य शूर-वीर राजा कृष्णके पक्षमें आ मिले॥७३॥

उस ओर चक्ररत्नके प्रभावसे भरतक्षेत्रको वश करनेवाले राजा जरासन्धको भी अनेक अक्षौहिणी सेनाएँ प्राप्त थीं॥७४॥ घोड़े, हाथी, पैदल सैनिक तथा रथोंकी गणनासे युक्त अक्षौहिणी सेनाका प्रमाण इस प्रकार कहा गया है॥७५॥ जिसमें नौ हजार हाथी, नौ लाख रथ, नौ करोड़ घोड़े और नौ-सौ करोड़ पैदल सैनिक हों उसे एक अक्षौहिणी कहते हैं॥७६॥ यादवोंमें कुमार नेमि, बलदेव और कृष्ण ये तीनों अतिरथ थे। ये तीनों भारतवर्षमें जितने अतिरथ थे उन सबको अतिक्रान्त कर उन सबमें श्रेष्ठ थे॥७७॥ राजा समुद्रविजय, वसुदेव, युधिष्ठिर, भीम, कर्ण, अर्जुन, रुक्मी, प्रद्युम्न, सत्यक, धृष्टद्युम्न, अनावृष्टि, शल्य, भूरिश्रवस्, राजा हिरण्यनाभ, सहदेव और सारण, ये सब राजा महारथ थे। ये सभी शस्त्र और शास्त्रार्थमें निपुण, पराङ्मुख जीवोंपर दया करनेमें तत्पर, महाशक्तिमान् और महाधैर्यशाली

१. वरगुणा म०। २. अक्षौहिण्यामित्यधिकैः सप्तत्या ह्यष्टभिः शतैः। संयुक्तानि सहस्राणि गजानामेकविंशतिः॥ एवमेव रथानां तु संख्यानं कीर्तितं बुधैः। पञ्चषष्टिसहस्राणि षट्शतानि दशैव तु। संख्यातास्तुरगास्तज्ज्ञैर्विना रथतुरङ्गमैः॥ नृणां शतसहस्राणि सहस्राणि तथा नव। शतानि त्रीणि चान्यानि पञ्चाशच्च पदातयः॥ इत्यमरकोशटीकायाम्। भारते अक्षौहिणीप्रमाणम्—अक्षौहिण्याः प्रमाणं तु खाङ्गाष्टैकद्विकैर्गजैः। रथैरेतैर्हयैस्त्रिघ्नैः पञ्चघ्नैश्च पदातिभिः॥ गजाः २१८७०, रथाः २१८७०, अश्वाः ६५६१०, नराः १०९३५० इति।

अक्षोभ्यपूर्वकाश्चाष्टौ शम्बो भोजो विदूरथः । द्रुपदः सिंहराजोऽपि शल्यो वज्रः सुयोधनः ॥८१॥
पौण्ड्रः पद्मरथश्चापि कपिलो भगदत्तकः । क्षेमधूर्तं इमे सर्वे समाः समरथा रणे ॥८२॥
महानेमिधराक्रूरनिषधोल्मुकदुर्मुखाः । [1]कृतवर्मा वराटाख्यश्चारुकृष्णश्च यादवाः ॥८३॥
शकुनिर्यवनो भानुर्दुश्शासनशिखण्डिनौ । वाह्लीकसोमदत्तश्च देवशर्मा बकस्तथा ॥८४॥
वेणुदारी च विक्रान्तो राजानोऽर्धरथा इमे । विचित्रयोधिनो धीराः संग्रामेष्वपराङ्मुखाः ॥८५॥
अतः परं नृपाः सर्वे कुलमानयशोधनाः । रथिनः प्रथिताश्चामी यथायोग्यं बलद्वये ॥८६॥
अर्णवोपमयोस्तत्र तदाभ्यर्णनिवेशयोः । सेनयोस्तूर्णमागत्य कर्णस्याभ्यर्णमाकुला ॥८७॥
कुन्ती निष्णातसम्बन्धतनयानुमता मता । कानीनस्नेहसम्भारपरायत्तशरीरिका ॥८८॥
कण्ठलग्ना रुदन्ती तं प्रतिबोधयति स्म सा । मातापुत्रत्वसम्बन्धमादिमध्यावसानतः ॥८९॥
ततः कम्बलवृत्तान्तकुरुवंशावतारवित् । कुन्तीपाण्डुसुतत्वं तु निश्चिकायाग्मनस्तदा ॥९०॥
सान्तःपुरेण कर्णेन निर्णीतनिजबन्धुना । पूजिताप्रात्मजं कुन्ती जगाद जनितादरा ॥९१॥
उत्तिष्ठ पुत्र गच्छामो यत्र ते भ्रातरोऽखिलाः । तिष्ठन्त्युत्कण्ठिताश्चान्ये वैकुण्ठप्रमुखा निजाः ॥९२॥
कुरूणामीश्वरः पुत्र त्वमेव भुवि साम्प्रतम् । कृष्णस्य रामभद्रस्य सम्प्रति प्राणवत् प्रियः ॥९३॥
त्वं राजावरजास्ते छत्रधारी युधिष्ठिरः । भीमश्चामरधारी तु मन्त्रिमुख्यो धनञ्जयः ॥९४॥
नकुलः सहदेवेन प्रतीहारः सहस्फुटम् । अहं तु जननी नीत्या नित्यं तव हितोद्यता ॥९५॥

थे ।।७८-८०।। समुद्रविजयसे छोटे और वसुदेवसे बड़े अक्षोभ्य आदि आठ भाई, शम्ब, भोज, विदूरथ, द्रुपद, सिंहराज, शल्य, वज्र, सुयोधन, पौण्ड्र, पद्मरथ, कपिल, भगदत्त और क्षेम-धूर्त ये सब समरथ थे तथा युद्धमें समान शक्तिके धारक थे ।।८१-८२।। महानेमि,-धर, अक्रूर, निषध, उल्मुक, दुर्मुख, कृतवर्मा, वराट, चारुकृष्ण, शकुनि, यवन, भानु, दुश्शासन, शिखण्डी, वाह्लीक, सोमदत्त, देवशर्मा, वक, वेणुदारी और विक्रान्त ये राजा अर्धरथ थे। ये सभी राजा आश्चर्यकारक युद्ध करनेवाले एवं धीर-वीर थे तथा युद्धसे कभी पराङ्मुख नहीं होते थे ।।८३-८५।। इनके सिवाय कुल, मान और यशरूपी धनको धारण करनेवाले समस्त राजा रथी नामसे प्रसिद्ध थे। ये राजा यथायोग्य दोनों ही सेनाओंमें थे ।।८६।।

समुद्रोंके समान दोनों पक्षकी सेनाएँ जब पास-पास आ गयीं तब कुन्ती बहुत घबड़ायी। वह शीघ्र ही कर्णके पास गयी। वहाँ जानेमें उसे युधिष्ठिर आदि पुत्रोंने अनुमति दे दी थी। उस समय कन्या अवस्थाके पुत्र कर्णके ऊपर जो उसका अपार स्नेह था उससे उसका शरीर विवश हो रहा था। उसने कर्णके कण्ठसे लगकर रोते-रोते आदि, मध्य और अन्तमें जैसा कुछ हुआ वह सब अपना माता और पुत्रका सम्बन्ध बतलाया। उसने यह भी बतलाया कि मैंने तुझे उत्पन्न होते ही लोकलाजके भयसे कम्बलमें लपेटकर छोड़ दिया था। कर्ण कम्बलके वृत्तान्तको जानता था और यह भी जानता था कि कुरुवंशमें मेरा जन्म हुआ है। अब कुन्तीके कहनेसे उसने निश्चय कर लिया कि मैं कुन्ती और पाण्डुका पुत्र हूँ ।।८७-९०।। अपने बन्धुजनोंका निर्णय कर कर्णने अपनी समस्त स्त्रियोंके साथ कुन्तीकी पूजा की। तदनन्तर आदर दिखाती हुई कुन्तीने अपने प्रथम पुत्र कर्णसे कहा कि हे पुत्र! उठ, वहाँ चलें जहाँ तेरे सब भाई तथा श्रीकृष्ण आदि अपने अन्य आत्मीय जन तेरे लिए उत्कण्ठित हो रहे हैं ।।९१-९२।। हे पुत्र! इस समय पृथिवीपर कुरुओंका स्वामी तू ही है और कृष्ण तथा बलदेवके लिए प्राणोंके समान प्रिय है ।। ९३ ।। तू राजा है तेरा छोटा भाई युधिष्ठिर तेरे ऊपर छत्र लगावेगा, भीम चँवर ढोरेगा, धनंजय मन्त्री होगा, सहदेव और नकुल तेरे द्वारपाल होंगे और नीति पूर्वक निरन्तर हित करनेमें उद्यत मैं तेरी माता हूँ ।।९४-९५।।

१. कृतवर्मा म० ।

इति मातृवचः श्रुत्वा भ्रातृस्नेहवशोऽपि सः । जरासन्धोपकारैस्तैः स्वामिकार्यपरोऽवदत् ॥९६॥
पितरौ भ्रातरो लोके बान्धवाश्च सुदुर्लभाः । यद्यप्येवं तथाप्यत्र प्रस्तावे समुपस्थिते ॥९७॥
स्वामिकार्यं परित्यज्य बन्धुकार्यमसांप्रतम्[1] । अप्रशस्यं च हास्यं च संमुखे सांप्रतं रणे ॥९८॥
एतावदत्र कार्यं तु युद्धे भ्रातृवधादृते । योद्धव्यमन्ययोधैर्हि स्वामिकार्यकृता मया ॥९९॥
निवृत्ते युधि जीवामो यदि दैववशाद्वयम् । भविता [2]निश्चितोऽस्माकमम्ब भ्रातृसमागमः ॥१००॥
प्रयाहि भ्रातृबन्धूनामेतदेव निवेद्यताम् । इत्युक्त्वा पूजिता गत्वा कुन्ती सर्वं तथाऽकरोत् ॥१०१॥
जरासन्धबले तत्र समभूमागवर्तिनी । चक्रव्यूहो द्विषो [3]जित्यै रचितः कुशलैर्नृपैः ॥१०२॥
चक्रस्यारसहस्रे हि राजैकैकः समास्थितः । तस्य राजसहस्रस्य करिणां तु शतं शतम् ॥१०३॥
एकैकस्य नरेन्द्रस्य द्विसहस्ररथाः स्थिताः । वाजिपञ्चसहस्राणि भटानां तानि षोडश ॥१०४॥
अतश्चतुर्थभागेन संयुताः सपदि स्थिताः । नरेन्द्राः षट् सहस्राणि निविष्टास्तत्र नेमिषु ॥१०५॥
मध्यत्वं च समासाद्य सुस्थितो मागधः स्वयम् । राजपञ्चसहस्रैः स श्रीमान् कर्णपुरस्सरैः ॥१०६॥
तस्यैव मध्यभागे तु सैन्यं गान्धारसैन्धवम् । दुर्योधनसमेतं तु धार्तराष्ट्रशतं स्थितम् ॥१०७॥
मध्ये च मध्यदेशास्तु स्थितास्तत्र नरेश्वराः । पूर्वभागे स्थितास्तस्य शेषा नृपगणास्तथा ॥१०८॥
कुलमानधरा धीरा नरेशा बलशालिनः । पञ्चाशत्सकलव्यूहा [4]नेमिसन्धिष्ववस्थिताः ॥१०९॥
अन्तरान्तरसंस्थास्तु [5]गुल्मैर्गुल्मैर्नरोत्तमैः । व्यूहस्य बाह्यतश्चापि नानाव्यूहैर्नृपाः स्थिताः ॥११०॥

इस प्रकार माताके वचन सुनकर यद्यपि कर्ण भाइयोंके स्नेहसे विवश हो गया परन्तु जरासन्धने उसके प्रति जो उपकार किये थे उनसे स्वामीके कार्यका विचार करता हुआ बोला कि लोकमें माता-पिता, और भाई-बान्धव अत्यन्त दुर्लभ हैं यह बात यद्यपि ऐसी ही है, परन्तु इस अवसरके उपस्थित होनेपर स्वामीका कार्य छोड़ भाइयोंका कार्य करना अनुचित है, अप्रशस्त है और इस समय जब कि युद्ध सामने है हास्यका कारण भी है ॥९६-९८॥ इस समय तो स्वामीका कार्य करता हुआ मैं इतना ही कर सकता हूँ कि युद्धमें भाइयोंको छोड़कर अन्य योद्धाओंके साथ युद्ध करूँ ॥९९॥ युद्ध समाप्त होनेपर यदि भाग्यवश हम लोग जीवित रहेंगे तो हे माँ! हमारा भाइयोंके साथ समागम अवश्य ही होगा। तू जा और भाई-बान्धवोंको इतनी खबर दे दे। इस प्रकार कहकर कर्णने माता कुन्तीकी पूजा की और कुन्तीने जाकर उसके कहे अनुसार सब कार्य किया ॥१००-१०१॥

उधर समान भूभागमें वर्तमान राजा जरासन्धकी सेनामें कुशल राजाओंने शत्रुओंको जीतनेके लिए चक्रव्यूहकी रचना की ॥१०२॥ उस चक्रव्यूहमें जो चक्राकार रचना की गयी थी उसके एक हजार आरे थे, एक-एक आरेमें एक-एक राजा स्थित था, एक-एक राजाके सौ-सौ हाथी थे, दो-दो हजार रथ थे, पाँच-पाँच हजार घोड़े थे और सोलह-सोलह हजार पैदल सैनिक थे ॥ १०३-१०४ ॥ चक्रकी धाराके पास छह हजार राजा स्थित थे और उन राजाओंके हाथी, घोड़ा आदिका परिमाण पूर्वोक्त परिमाणसे चौथाई भाग प्रमाण था ॥१०५॥ कर्ण आदि पाँच हजार राजाओंसे सुशोभित राजा जरासन्ध स्वयं उस चक्रके मध्यभागमें जाकर स्थित था ॥१०६॥ गान्धार और सिन्ध देशकी सेना, दुर्योधनसे सहित सौ कौरव, और मध्यदेशके राजा भी उसी चक्रके मध्यभागमें स्थित थे ॥१०७-१०८॥ कुलके मानको धारण करनेवाले धीर, वीर, पराक्रमी पचास राजा अपनी-अपनी सेनाके साथ चक्रधाराकी सन्धियों पर अवस्थित थे ॥ १०९ ॥ आरोंके बीच-बीचके स्थान अपनी-अपनी विशिष्ट सेनाओंसे युक्त

१. अयुक्तम् । २. निश्चयोऽस्माक—म० । ३. जयनं जितिः तस्यै । नित्यै म० । ४. नेमिसन्धिष्विव स्थिताः म०, ग० । ५. एको रथो गजश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ तिसृभिः पत्तिभिः सेनामुखं, त्रिभिः सेनामुखैर्गुल्मः, गुल्मत्रयेण गणः । इत्यमरटीकायाम् ।

चक्रव्यूहस्तदा मध्ये रचितोऽसौ व्यराजत । स्वसाधनमनस्तोषी परसाधनभीतिकृत् ॥१११॥
चक्रव्यूहं विदित्वा तं वसुदेवो विनिर्मितम् । चकार गरुडव्यूहं तद्भेदाय विशारदः ॥११२॥
अर्धकोटीकुमाराणां [1]मुखे तस्य महात्मनाम् । स्थापिता रणशूराणां नानाशस्त्रास्त्रधारिणाम् ॥११३॥
बली हलधरस्तत्र शार्ङ्गपाणिश्च मूर्धनि । स्थितावतिरथौ वीरौ स्थैर्यनिर्जितभूधरौ ॥११४॥
अक्रूरः कुमुदो वीरः सारणो विजयो जयः । पद्मो जरत्कुमारोऽपि सुमुखोऽपि च दुर्मुखः ॥११५॥
सूनुर्मदनवेगाया दृढमुष्टिर्महारथः । विदूरथोऽप्यनावृष्टिर्वसुदेवस्य [2]येऽङ्गजाः ॥११६॥
रथरक्षान्वितौ रामकृष्णयोः पृष्ठरक्षिणः । रथकोट्या समेतस्तु [3]पृष्ठेभोजः प्रतिष्ठितः ॥११७॥
पृष्ठरक्षानृपास्तस्य भोजस्य नृपतेस्ततः । धारणः सागरश्चान्ये रणशौण्डा व्यवस्थिताः ॥११८॥
दक्षिणं पक्षमाश्रित्य सुतैः साकं महारथैः । समुद्रविजयोऽतिष्ठद्बलेन महता वृतः ॥११९॥
तत्पक्षरक्षणे दक्षाः कुमारा रिपुमारणाः । सत्यनेमिर्महानेमिर्दृढनेमिः सुनेमिना ॥१२०॥
नमिर्महारथश्चापि जयसेनमहीजयौ । तेजःसेनो [4]जयः सेनो नयो मेघो महाद्युतिः ॥१२१॥
दशार्हाश्चापि विख्याताः शतशोऽन्ये च भूभृतः । रथकोटीचतुर्भागसहिताः समवस्थिताः ॥१२२॥
वामपक्षमुपाश्रित्य रामस्य तनयाः स्थिताः । पाण्डवाश्च महात्मानः पण्डिता युद्धकर्मणि ॥१२३॥
उल्मुको निषधश्चापि प्रकृतिद्युतिरप्यतः । सत्यकः शत्रुदमनः श्रीध्वजो ध्रुव इत्यपि ॥१२४॥
राजा दशरथश्चापि देवानन्दोऽथ शन्तनुः । आनन्दश्च महानन्दश्चन्द्रानन्दो महाबलः ॥१२५॥
पृथुः [5]शतधनुश्चापि विपृथुश्च यशोधनः । दृढबन्धोऽनुवीर्यश्च सर्वशस्त्रभृतांवरः ॥१२६॥

राजाओंसे सहित थे। इनके सिवाय व्यूहके बाहर भी अनेक राजा नाना प्रकारके व्यूह बनाकर स्थित थे ॥ ११० ॥ इस प्रकार चतुर राजाओंके द्वारा रचित, अपनी सेनाके मनको सन्तुष्ट करनेवाला और शत्रुकी सेनाके मनमें भय उत्पन्न करनेवाला वह चक्रव्यूह उस समय अत्यधिक सुशोभित हो रहा था ॥१११॥

इधर रचना करनेमें निपुण वसुदेवको जब पता चला कि जरासन्धकी सेनामें चक्रव्यूहकी रचना की गयी है तब उसने भी चक्रव्यूहको भेदनेके लिए गरुड़-व्यूहकी रचना कर डाली ॥११२॥ उदात्तचित्त, रणमें शूर-वीर तथा नाना प्रकारके अस्त्र-शस्त्रोंको धारण करनेवाले पचास लाख यादव कुमार उस गरुड़के मुखपर खड़े किये गये ॥११३॥ धीर-वीर एवं स्थिरतासे पर्वतको जीतनेवाले अतिरथ, पराक्रमी बलदेव और श्रीकृष्ण उसके मस्तकपर स्थित हुए ॥११४॥ अक्रूर, कुमुद, वीर, सारण, विजय, जय, पद्म, जरत्कुमार, सुमुख, दुर्मुख, मदनवेगाका पुत्र महारथ दृढमुष्टि, विदूरथ और अनावृष्टि ये जो वसुदेवके पुत्र थे वे बलदेव और कृष्णके रथकी रक्षा करनेके लिए उनके पृष्ठरक्षक बनाये गये। एक करोड़ रथोंसे सहित भोज, गरुड़के पृष्ठ भागपर स्थित हुआ ॥११५–११७॥ राजा भोजकी पृष्ठ-रक्षाके लिए धारण तथा सागर आदि अन्य अनेक रणवीर राजा नियुक्त हुए ॥११८॥ अपने महारथी पुत्रों तथा बहुत बड़ी सेनासे युक्त राजा समुद्रविजय उस गरुड़के दाहिने पंखपर स्थित हुए ॥११९॥ और उनकी आजू-बाजूकी रक्षा करनेके लिए चतुर, शत्रुओंको मारनेवाले सत्यनेमि, महानेमि, दृढनेमि, सुनेमि, महारथी नमि, जयसेन, महीजय, तेजसेन, जय, सेन, नय, मेघ, महाद्युति, आदि दशार्ह (यादव) तथा सैकड़ों अन्य प्रसिद्ध राजा पच्चीस लाख रथोंके साथ स्थित हुए ॥ १२०–१२२ ॥ बलदेवके पुत्र और युद्ध कार्यमें निपुण महामना पाण्डव गरुड़के बाँये पक्षका आश्रय ले खड़े हुए ॥ १२३ ॥ इन्हींके समीप उल्मुक, निषध, प्रकृतिद्युति, सत्यक, शत्रुदमन, श्रीध्वज, ध्रुव, राजा दशरथ, देवानन्द, शन्तनु, आनन्द, महानन्द, चन्द्रानन्द, महाबल, पृथु, शतधनु, विपृथु, यशोधन, दृढबन्ध और सब प्रकारके शस्त्रोंसे आकाशको भर

१. मुख्ये म० । २. तेऽङ्गजाः म० । ३. पृष्ठभोजः म० । ४. जयसेनो । ५. शतधनश्चापि म० ।

अनेकरथलक्षास्ते शस्त्रास्त्रेषु कृतश्रमाः । [1]धार्तराष्ट्रवधं युद्धे समाधाय व्यवस्थिताः ॥१२७॥
युद्धे चन्द्रयशा भूपः सिंहलो बर्बरोऽपि च । कम्बोजाः केरलाश्चापि कुशला द्रमिलास्तथा ॥१२८॥
रथषष्टिसहस्रैस्तु शान्तनः समवस्थितः । पक्षिणो रक्षिणो ह्येते स्थिता विक्रमशालिनः ॥१२९॥
अशितश्चापि भानुश्च तोमरः समरप्रियः । सञ्जयोऽकम्पितश्चापि भानुर्विष्णुर्बृहद्ध्वजः ॥१३०॥
शत्रुञ्जयो महासेनो गम्भीरो गौतमोऽपि च । वसुधर्मादयश्चापि कृतवर्मा प्रसेनजित् ॥१३१॥
[2]दृढवर्मा च विक्रान्तश्चन्द्रवर्मा च पार्थिवः । एते [3]गणसहायास्तु कुलं रक्षन्ति शार्ङ्गिणः ॥१३२॥
एषोऽसौ गरुडव्यूहो वसुदेवेन निर्मितः । महारथकृतोत्साहश्चक्रव्यूहं बिभित्सति ॥१३३॥

शालिनीछन्दः

चक्रव्यूहे दुर्विगाहे कृतेऽपि [4]व्यूहे व्यूहे पक्षिराजेऽपि दक्षैः ।
युद्धे जेता नायकः कश्चिदेको धर्मात्मायादर्जिताज्जैनमार्गे ॥१३४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ चक्रगरुडव्यूहवर्णनो नाम पञ्चाशत्तमः सर्गः ॥५०॥

देनेवाले अनुवीर्य स्थित थे। ये सभी कुमार अनेक लाख रथोंसे युक्त थे, शस्त्र और अस्त्रों में परिश्रम करनेवाले थे, तथा युद्धमें कौरवोंके वधका निश्चय किये हुए थे॥ १२४–१२७॥ इनके पीछे राजा चन्द्रयश, सिंहल, बर्बर, कम्बोज, केरल, कुशल (कोसल) और द्रमिल देशोंके राजा तथा शान्तन साठ-साठ हजार रथ लेकर स्थित थे। इस प्रकार ये बलशाली राजा उस गरुड़की रक्षा करते हुए स्थित थे॥ १२८–१२९॥ इनके सिवाय अशित, भानु, युद्धका प्रेमी तोमर, सञ्जय, अकम्पित, भानु, विष्णु, बृहद्ध्वज, शत्रुञ्जय, महासेन, गम्भीर, गौतम, वसुधर्मादि, कृतवर्मा, प्रसेनजित्, दृढवर्मा, विक्रान्त और चन्द्रवर्मा आदि राजा अपनी-अपनी सेनाओंसे युक्त हो श्रीकृष्णके कुलकी रक्षा करते थे॥१३०–१३२॥ जिसके भीतर स्थित महारथी राजा उत्साह प्रकट कर रहे थे, ऐसा यह वसुदेवके द्वारा निर्मित गरुड़-व्यूह, जरासन्धके चक्रव्यूहको भेदने की इच्छा कर रहा था॥१३३॥ गौतम स्वामी कहते हैं कि दोनों पक्षके चतुर मनुष्योंने उस ओर यद्यपि दुःखसे प्रवेश करनेके योग्य चक्रव्यूह और इधर गरुड़-व्यूहकी रचना की थी तथापि जिनेन्द्र प्रदर्शित मार्गमें चलकर सञ्चित किये हुए धर्मके प्रभावसे युद्धमें कोई एक नायक ही विजयी होगा ऐसा मैं समझता हूँ॥१३४॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें चक्रव्यूह और गरुड़व्यूहका वर्णन करनेवाला पचासवाँ सर्ग समाप्त हुआ॥५०॥

---

१. धार्तराष्ट्रा वधं म०, ग०। २. दृढवर्या म०। ३. दृढसहायस्तु म०। ४. तर्कयामि।

एकपञ्चाशत्तमः सर्गः

अत्रान्तरे सह प्राप्ताः समुद्रविजयं नृपाः । विद्याधरसमस्तास्ते वसुदेवहितैषिणः ॥१॥
श्वसुरोऽशनिवेगोऽसौ हरिग्रीवो वराहकः । सिंहदंष्ट्रः खगेन्द्रश्च विद्युद्वेगो महोद्यमः ॥२॥
तथा मानसवेगश्च विद्युद्दंष्ट्रः खगाधिपः । राजा पिङ्गलगान्धारो नारसिंहो नरेश्वरः ॥३॥
[1]इत्याद्या ह्यार्यमातङ्गा वासुदेवार्थसिद्धये । वसुदेवं पुरस्कृत्य समुद्रविजयं श्रिताः ॥४॥
तान् सम्मान्य यथायोग्यं समुद्रविजयादयः । सिद्धार्था वयमद्येति प्रहृष्टमनसो जगुः ॥५॥
वसुदेवरिपूणां ते खगानां क्षोभमूचिरे । जरासन्धार्थसिद्ध्यर्थं तेषामागमनं तथा ॥६॥
तच्छ्रुत्वा यादवाः सर्वे सम्मन्त्र्यानकदुन्दुभिम्[2] । प्रद्युम्नशम्बसंयुक्तं सपुत्रं तैरमामुचन् ॥७॥
जिनकेशवरामादीन् परिष्वज्य स वेगवान् । पुत्रनप्तृखगैः साकं खचराचलमाययौ ॥८॥
सिंहविद्यारथं दिव्यं दिव्यास्त्रपरिपूरितम् । धनदेवसमानीतमारुरोह हलायुधः ॥९॥
गारुडं रथमारूढस्तथा गरुडकेतनः । नानाप्रहरणैर्दिव्यैः परिपूर्णं [3]जयावहम् ॥१०॥
मातल्यधिष्ठितं साक्षं सुत्रामप्रहितं रथम् । नेमीश्वरः समारूढो यदूनामर्थसिद्धये ॥११॥
सेनानां नायकं शूरमनावृष्टिं कपिध्वजम् । अभ्यषिञ्चन्नृपाः सर्वे समुद्रविजयादयः ॥१२॥
राजा हिरण्यनाभस्तु मागधेन महाबलः । सेनापतिपदे शीघ्रमभिषिक्तस्तदा मुदा ॥१३॥
युद्धे भेर्यस्तथा शङ्खा नेदुर्धीरं बलद्वये । [4]चतुरंगं बलं योद्धुमाससाद परस्परम् ॥१४॥

अथानन्तर इसी बीचमें वसुदेवका हित चाहनेवाले नीचे लिखे समस्त विद्याधर एक साथ मिलकर समुद्रविजयके पास आ पहुँचे ॥१॥ वसुदेवका श्वसुर अशनिवेग, हरिग्रीव, वराहक, सिंहदंष्ट्र, महापुरुषार्थी विद्युद्वेग, मानसवेग, विद्युद्दंष्ट्र, पिङ्गलगान्धार और नारसिंह इन्हें आदि लेकर आर्य और मातङ्गजातिके अनेक विद्याधर राजा श्रीकृष्णकी भलाईके लिए आ पहुँचे और वसुदेवको आगे कर राजा समुद्रविजयसे जा मिले ॥२-४॥ समुद्रविजय आदि उनका यथायोग्य सम्मान कर हर्षितचित्त होते हुए कहने लगे कि अब हम लोग कृतार्थ हो गये ॥५॥ उन आगत विद्याधरोंने कहा कि इस युद्धसे वसुदेवके विरोधी विद्याधरोंमें बड़ा क्षोभ हो रहा है और वे जरासन्धकी कार्यसिद्धिके लिए आनेवाले हैं ॥६॥ यह सुनकर सब यादवोंने परस्पर सलाह की और विद्याधरोंको शान्त करनेके लिए उन्होंने उन्हीं विद्याधरोंके साथ प्रद्युम्न, शम्ब एवं अनेक पुत्रों-सहित वसुदेवको विजयार्धके लिए छोड़ा ॥७॥ वसुदेव भी भगवान् नेमिनाथ, कृष्ण, बलदेव आदिका आलिङ्गन कर कुछ पुत्रों, पोतों और विद्याधरोंके साथ शीघ्र ही विजयार्धकी ओर चल पड़े ॥८॥ उसी समय कुबेरके द्वारा समर्पित, दिव्य अस्त्रोंसे परिपूर्ण सिंहविद्याके दिव्य रथपर बलदेव आरूढ़ हुए ॥९॥ गरुडाङ्कित पताकासे सुशोभित कृष्ण, नाना प्रकारके दिव्य अस्त्र-शस्त्रोंसे पूर्ण विजय प्राप्त करानेवाले गरुड विद्याके रथपर सवार हुए ॥१०॥ और भगवान् नेमिनाथ, इन्द्रके द्वारा प्रेषित, मातलि नामक सारथिसे युक्त, तथा अस्त्र-शस्त्रसे पूर्ण रथपर यादवोंकी कार्यसिद्धिके लिए आरूढ़ हुए ॥११॥ समुद्रविजय आदि समस्त राजाओंने वानरकी ध्वजासे युक्त, वसुदेवके शूर-वीर पुत्र अनावृष्टिको सेनापति बनाकर उसका अभिषेक किया ॥१२॥

उधर राजा जरासन्धने भी हर्षपूर्वक महाबलवान् राजा हिरण्यनाभको शीघ्र ही सेनापतिके पदपर अभिषिक्त किया ॥१३॥ दोनों ओरकी सेनाओंमें युद्धके समय बजनेवाली भेरियाँ और शङ्ख गम्भीर शब्द करने लगे तथा दोनों ओरकी चतुरङ्ग सेना युद्ध करनेके लिए

१. -ह्यार्य म०, घ० । २. वसुदेवः 'वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः' इत्यमरः । ३. जयावहः म० ।
४. चतुरङ्गबलं म० ।

अन्योन्याह्वानपूर्वं ते योद्धुं लग्ना यथायथम् । [1]राजानः क्रोधसम्भारभ्रूभङ्गविषमाननाः ॥१५॥
गजा गजैः [2]समं लग्नास्तुरङ्गास्तुरगैः सह । रथा रथैः समं योद्धुं पत्तयः पत्तिभिः सह ॥१६॥
ज्यारवै रथनिर्घोषैर्गजानां गर्जितेन च । भटानां सिंहनादैश्च दलन्तीव दिशो दश ॥१७॥
ततः परबलं दृष्ट्वा प्रबलं स्वबलाशनम् । नेमिपार्थबलाधीशा वृषहस्तिकपिध्वजाः ॥१८॥
तार्क्ष्यकेतुमनोभिज्ञाः स्वयं योद्धुं समुद्यताः । ऊरीकृत्य सुसन्नाहाश्चक्रव्यूहस्य भेदनम् ॥१९॥
दध्मौ नेमीश्वरः शङ्खं शाक्रं शत्रुभयावहम् । देवदत्तं पृथापुत्रः सेनानीश्च बलाहकम्[3] ॥२०॥
शङ्खानां निनदं श्रुत्वा ततो व्याप्तदिगन्तरम् । स्वसैन्येऽभून्महोत्साहः परसैन्ये महाभयम् ॥२१॥
मध्यं बिभेद सेनानीर्नेमिर्दक्षिणतः क्षणात् । अपरोत्तरदिग्भागं चक्रव्यूहस्य पाण्डवः ॥२२॥
सेनानीः परसेनान्या नेमिनाथोऽपि रुक्मिणा । पार्थो दुर्योधनेनासौ सधैर्येण पुरस्कृतः ॥२३॥
महायुद्धमभूत्तस्य ततस्तेषां यथायथम् । [4]सगन्धबलयुक्तानां पञ्चायुधविवर्षिणाम् ॥२४॥
नारदोऽप्सरसां संघैर्दूरेण नभसि स्थितः । मुञ्चन् पुष्पाणि तुष्टात्मा ननर्त कलहप्रियः ॥२५॥
निपात्य शरवर्षेण रुक्मिणं चिरयोधनम् । रिपुराजसहस्राणि नेमिश्चिक्षेप संयुगे ॥२६॥
समुद्रविजयाद्याश्च भ्रातरस्तत्सुतास्तथा । यथायथं रणे प्राप्ता निन्युर्मृत्युमुखं रिपून् ॥२७॥
रामकृष्णसुतैः [5]संख्ये निःसंख्यशरवर्षिभिः । यथेष्टं क्रीडितं मेघैः पर्वतेष्विव वैरिषु ॥२८॥
पाण्डवानां सपुत्राणां धृतराष्ट्रसुतैः सह । कदनं यद् बभूवात्र तत्कः कथयितुं क्षमः ॥२९॥

परस्पर एक-दूसरेके सामने आ गयीं ॥१४॥ क्रोधकी अधिकतासे भौंह टेढ़ी हो जानेके कारण जिनके मुख विषम हो रहे थे ऐसे दोनों पक्षके राजा परस्पर एक-दूसरेको ललकार कर यथायोग्य युद्ध करने लगे ॥१५॥ हाथी हाथियोंके साथ, घोड़े घोड़ोंके साथ, रथ रथोंके साथ और पैदल पैदलोंके साथ युद्ध करने लगे ॥१६॥ उस समय प्रत्यञ्चाओंके शब्द, रथोंकी चीत्कार, हाथियोंकी गर्जना और योद्धाओंके सिंहनादसे दशों दिशाएँ फटी-सी जा रही थीं ॥१७॥

तदनन्तर शत्रुसेनाको प्रबल और अपनी सेनाको नष्ट करती देख, बैल, हाथी और वानरकी ध्वजा धारण करनेवाले नेमिनाथ, अर्जुन और अनावृष्टि, कृष्णका अभिप्राय जान स्वयं युद्ध करनेके लिए उद्यत हुए और चक्रव्यूहके भेदन करनेका निश्चय कर पूर्ण तैयारीके साथ आगे बढ़े ॥१८–१९॥ भगवान् नेमिनाथने शत्रुओंको भय उत्पन्न करनेवाला अपना शाक्र (इन्द्रप्रदत्त) नामक शङ्ख फूँका, अर्जुनने देवदत्त और सेनापति अनावृष्टिने बलाहक नामका शङ्ख बजाया ॥२०॥ तदनन्तर इन शङ्खोंके दिगन्तव्यापी शब्द सुनकर अपनी सेनामें महान् उत्साह उत्पन्न हुआ और शत्रुकी सेनामें महाभय छा गया ॥२१॥ सेनापति अनावृष्टिने चक्रव्यूहका मध्य भाग, भगवान् नेमिनाथने दक्षिण भाग और अर्जुनने पश्चिमोत्तर भाग क्षण-भरमें भेद डाला ॥२२॥ सेनापति अनावृष्टिका जरासन्धके सेनापति हिरण्यनाभने, भगवान् नेमिनाथका रुक्मीने और धैर्यशाली दुर्योधनने अर्जुनका सामना किया ॥२३॥ तत्पश्चात् अहंकारपूर्ण सेनासे युक्त एवं पाँचों प्रकारके शस्त्र बरसानेवाले उन वीरोंका यथायोग्य महायुद्ध हुआ ॥२४॥ अप्सराओंके समूहके साथ आकाशमें दूर खड़ा कलहप्रिय नारद पुष्प-वर्षा करता हुआ हर्षसे नाच रहा था ॥२५॥ भगवान् नेमिनाथने चिरकाल तक युद्ध करनेवाले रुक्मीको बाण-वर्षासे नीचे गिराकर हजारों शत्रुराजाओंको युद्धमें तितर-बितर कर दिया ॥२६॥ इसी प्रकार समुद्रविजय आदि भाइयों तथा उनके पुत्रोंने युद्धमें पहुँच कर शत्रुओंको मृत्युके मुखमें पहुँचाया ॥२७॥ युद्धमें असंख्यात बाणोंकी वर्षा करनेवाले बलदेव और कृष्णके पुत्रोंने, पर्वतोंपर बहुत भारी जलवर्षा करनेवाले मेघोंके समान शत्रुओंके बीच इच्छानुसार क्रीड़ा की ॥२८॥ पुत्रोंसहित पाण्डवोंका धृतराष्ट्रके पुत्रोंके साथ जो युद्ध

१. राजानं म० । २. समालग्ना म० । ३. बलाहकः । ४. संबन्ध म०, क०, ग० । ५. युद्धे ।

युधिष्ठिरोऽत्र शल्येन भीमो दुश्शासनेन तु । सहदेवः शकुनिना ह्युलूको नकुलेन हि ॥३०॥
दुर्योधनार्जुनौ योद्धुं लग्नौ युद्धं ततस्तयोः । बभूव भूतवित्रासी शरसन्धानदक्षयोः ॥३१॥
[1]निहताः पाण्डवैः केचिद् धृतराष्ट्रशरीरजाः । रणे दुर्योधनाद्यास्तु केचिज्जीवन्मृताः कृताः ॥३२॥
आकर्णाकृष्टचापौघैः कर्णोऽभिमुखमागतान् । योधान् बिभेद संग्रामे कृष्णपक्षाननेकशः ॥३३॥
द्वन्द्वयुद्धे तदा जाते बहुभूतक्षयावहे । सेनापत्योरभूद्रौद्रं[2] कदनं विविधायुधैः ॥३४॥
हिरण्यनाभवीरेण स सप्तभिः शरैः शतैः । नवत्या सप्तविंशत्याविद्धोऽनावृष्टिराहवे ॥३५॥
प्रजघान शतेनासौ सहस्रेण च पत्रिणाम् । अनावृष्टिर्हिरण्याभं कुशलः प्रतिकर्मणि ॥३६॥
यादवस्य ध्वजं तुङ्गं चिच्छेद रुधिरात्मजः । सोऽपि चास्य बिभेदाशु चापं छत्रं च सारथिम् ॥३७॥
धनुरन्यदुपादाय शरवर्षं ववर्ष सः । परिघं तु यदुः क्षिप्त्वा रथं शत्रोरपातयत् ॥३८॥
खड्गखेटकहस्तं तं आपतन्तमरिर्यदुः । खड्गखेटकहस्तोऽगाद्रथादुत्तीर्य सम्मुखः ॥३९॥
प्रहारवञ्चनादानलाघवातिशयात्मनोः । असियुद्धमभूद्घोरं सेनापत्योस्ततस्तयोः ॥४०॥
वार्ष्णेयखड्गघातेन प्रहृतेन भुजे रिपुः । छिन्नबाहुद्वयोरस्कः पपात वसुधातले ॥४१॥
हते सेनापतौ तत्र चतुरङ्गबलं द्रुतम् । विद्रुतं शरणं प्राप्तं जरासन्धं[3] महारणे ॥४२॥
तुष्टोऽनावृष्टिरप्याशु रथमारुह्य सैनिकैः । स्तूयमानो गतोऽभ्याशं[4] रामकेशवयोस्ततः ॥४३॥
बलकेशववीराभ्यां वृषहस्तिकपिध्वजाः । चक्रव्यूहस्य भेत्तारः परिव्यक्ता महौजसः ॥४४॥

हुआ था उसे कहनेके लिए कौन समर्थ है ? ॥२९॥ युधिष्ठिर शल्यके साथ, भीम दुःशासनके साथ, सहदेव शकुनिके साथ और उलूक नकुलके साथ युद्ध कर रहे थे ॥३०॥ तदनन्तर दुर्योधन और अर्जुन युद्ध करनेके लिए तत्पर हुए सो बाणोंके चढ़ानेमें चतुर उन दोनोंका भूतोंको भयभीत करनेवाला भयंकर युद्ध हुआ ॥३१॥ पाण्डवोंने युद्धमें धृतराष्ट्रके कितने ही पुत्रोंको मार डाला और दुर्योधन आदि कितने ही पुत्रोंको जीवित रहते हुए भी मृतकके समान कर दिया ॥३२॥ कर्णने, युद्धमें आये हुए कृष्णके पक्षके अनेक योद्धाओंको कान तक खींचे हुए बाणोंके समूहसे नष्ट कर डाला ॥३३॥ उस समय जब दोनों ओरसे अनेक प्राणियों का क्षय करनेवाला द्वन्द्व युद्ध हो रहा था तब दोनों पक्षके सेनापतियोंका नाना प्रकारके शस्त्रोंसे भयंकर युद्ध हुआ ॥३४॥ वीर हिरण्यनाभने युद्धमें यादव सेनापति अनावृष्टिको सात-सौ नब्बे बाणों-द्वारा सत्ताईस बार घायल किया ॥३५॥ और बदला लेनेमें कुशल हिरण्यनाभने भी एक हजार बाणों-द्वारा उसे सौ बार घायल किया ॥३६॥ रुधिरके पुत्र हिरण्यनाभने अनावृष्टिकी ऊँची ध्वजा छेद डाली और अनावृष्टिने शीघ्र ही उसके धनुष, छत्र और सारथिको भेद डाला ॥३७॥ हिरण्यनाभने दूसरा धनुष लेकर बाणोंकी वर्षा शुरू की और अनावृष्टिने परिघ फेंककर शत्रुका रथ गिरा दिया ॥३८॥ अब हिरण्यनाभ तलवार और ढाल हाथमें ले सामने आया तो अनावृष्टि भी तलवार और ढाल हाथमें ले रथसे उतर कर उसके सामने गया ॥३९॥ तदनन्तर प्रहारके बचाने और प्रहारके देनेकी बहुत भारी कुशलतासे युक्त दोनों सेनापतियोंमें भयङ्कर खड्गयुद्ध होता रहा ॥४०॥ अन्तमें अनावृष्टिने हिरण्यनाभकी भुजाओंपर तलवारका घातक प्रहार किया जिससे उसकी दोनों भुजाएँ कट गयीं, छाती फट गयी और वह प्राणरहित हो पृथ्वीपर गिर पड़ा ॥४१॥ सेनापतिके मरनेपर उसकी चतुरङ्ग सेना शीघ्र ही भागकर महायुद्धमें जरासन्धकी शरणमें पहुँची ॥४२॥ तदनन्तर सैनिक लोग जिसकी स्तुति कर रहे थे ऐसा अनावृष्टि, सन्तुष्ट हो शीघ्र ही रथपर बैठकर बलदेव और कृष्णके समीप गया ॥४३॥ बलदेव और श्रीकृष्णने चक्रव्यूहको

१ निहिताः म० । २. भयावहं । ३. जरासंधमहारणे म० । ४. समीपं म० ।

पृथ्वीच्छन्दः

विषादविषदूषितं मगधराजसैन्यं ततो निवेशमगमन्निजं[1] लघु दिवाकरेऽस्तङ्गते ।
नितान्तपृथुहर्षपूर्णमतितूर्णमानार्णव-प्रमाणमरिभङ्गतो यदुबलं जिनश्रीयुतम् ॥४५॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ हिरण्यनाभवधवर्णनो नामैकपञ्चाशत्तमः सर्गः ॥५१॥

भेदनेवाले महापराक्रमी नेमिनाथ अर्जुन और अनावृष्टिका आलिङ्गन किया ॥४४॥ तदनन्तर उधर सूर्यास्त होनेपर विषाद रूपी विषसे दूषित जरासन्धकी सेना शीघ्र ही अपने निवास स्थानपर चली गयी और इधर जिनराज श्री नेमिनाथ भगवान्की लक्ष्मीसे युक्त यादवोंकी सेना, शत्रुके नाशसे अत्यधिक हर्षित एवं लहराते हुए समुद्रके समान झूमती हुई अपने निवासस्थानपर आ गयी ॥४५॥ ।

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें हिरण्यनाभके बधका वर्णन करनेवाला इक्यावनवाँ सर्ग समाप्त हुआ ॥५१॥

---

१. -मगमं निजं म० ।

द्वापञ्चाशः सर्गः

अन्येद्युर्द्युमणिद्योतद्योतिते भुवनोदरे । सन्नद्धौ निर्गतौ योद्धुं बलैर्मागधमाधवौ ॥१॥
विधाय पूर्ववद् व्यूहौ बलद्वयमधिष्ठितम् । नानाराजन्यविन्यासमन्योन्यं हन्तुमुद्यतम्[1] ॥२॥
रथस्थो मागधो युद्धे हंसकं निजमन्त्रिणम् । अन्तिकस्थमिति प्राह यादवानभिवीक्ष्य सः ॥३॥
प्रत्येकं नामचिह्नाद्यैर्यदूनां वद हंसक । किमन्यैरत्र निहतैरित्युक्ते संजगाविति ॥४॥
फेनपुञ्जप्रतीकाशैर्हयैः काञ्चनदामभिः । रथोऽर्करथवद्दृश्यः कृष्णस्य गरुडध्वजः ॥५॥
शुकवर्णसमैरश्वैर्युक्तोऽयं स्वर्णशृङ्खलैः । अरिष्टनेमिवीरस्य वृषकेतुर्महारथः ॥६॥
कृष्णदक्षिणपार्श्वस्थारिष्टवर्णैस्तुरङ्गमैः । रथस्तालध्वजो राजन् बलदेवस्य राजते ॥७॥
कृष्णवर्णैर्हयैर्युक्तो भ्राजतेऽयं महारथः । अनीकाधिपतेरत्र कपिकेतूपलक्षितः ॥८॥
नीलकेसरबालाग्रैर्हयैर्हेमपरिष्कृतैः । रथो युधिष्ठिरस्यायं पाण्डवस्य विराजते ॥९॥
शशाङ्कविशदैरश्वैर्मातरिश्वजवैर्वृतः । गजध्वजयुतो भाति सव्यसाचिरथो महान् ॥१०॥
नीलोत्पलनिभैरेष युक्तो[2] यद्युभिरीक्ष्यते । रथो वृकोदरस्यापि मणिकाञ्चनभूषणः ॥११॥
शोणवर्णैर्हयैर्भाति समुद्रविजयस्य हि । मध्ये यादवसैन्यानां महासिंहध्वजो रथः ॥१२॥
अक्रूरस्य कुमारस्य रथोऽसौ कदलीध्वजः । सबलैर्वाजिभिर्भाति रुक्मविद्रुमभास्वरः ॥१३॥

दूसरे दिन जब संसारका मध्य भाग सूर्यके प्रकाशसे प्रकाशित हो गया तब जरासन्ध और कृष्ण युद्ध करनेके लिए तैयार हो अपनी-अपनी सेनाओंके साथ बाहर निकले ॥१॥ तदनन्तर जो पहलेके समान व्यूहोंकी रचना कर स्थित थीं और जिनमें अनेक राजा लोग यथास्थान स्थित थे ऐसी दोनों सेनाएँ परस्पर एक दूसरेका घात करनेके लिए उद्यत हुईं ॥२॥ युद्धके मैदानमें आकर रथपर बैठा जरासन्ध, यादवोंको देखकर अपने समीपवर्ती हंसक मन्त्रीसे बोला कि हे हंसक! यादवोंमें प्रत्येकके नाम चिह्न आदि तो बता और जिससे उन्हींको देखूँ अन्य लोगोंके मारनेसे क्या लाभ है? इस प्रकार कहनेपर हंसक बोला—॥३-४॥

हे स्वामिन्! जिसमें सुवर्णमयी सांकलोंसे युक्त फेनके समान सफेद घोड़े जुते हुए हैं और जिसपर गरुड़की ध्वजा फहरा रही है ऐसा यह सूर्यके रथके समान देदीप्यमान कृष्णका रथ दिखायी दे रहा है ॥५॥ जो सुवर्णमयी सांकलोंसे युक्त तोतेके समान हरे रंगके घोड़ोंसे युक्त है तथा जिसपर बैलकी पताका फहरा रही है ऐसा यह शूर-वीर अरिष्टनेमिका रथ है ॥६॥ हे राजन्! जो कृष्णकी दाहिनी ओर रीठाके समान वर्णवाले घोड़ोंसे जुता हुआ है तथा जिसपर तालकी ध्वजा फहरा रही है ऐसा यह बलदेवका रथ सुशोभित हो रहा है ॥७॥ इधर यह कृष्णवर्णके घोड़ोंसे युक्त एवं वानरकी ध्वजासे सहित जो बड़ा भारी रथ दिखायी दे रहा है वह सेनापतिका रथ है ॥८॥ उधर सुवर्णमयी सांकलोंसे युक्त, गरदनके नीले-नीले बालोंवाले घोड़ोंसे जुता हुआ यह पाण्डु राजाके पुत्र युधिष्ठिरका रथ सुशोभित हो रहा है ॥९॥ जो चन्द्रमाके समान सफेद एवं वायुके समान वेगशाली घोड़ोंसे जुता हुआ है तथा जिसपर हाथीकी ध्वजा फहरा रही है ऐसा यह बड़ा भारी अर्जुनका रथ है ॥१०॥ जो नील कमलके समान नीले-नीले घोड़ोंसे युक्त है तथा जिसपर मणिमय और सुवर्णमय आभूषण सुशोभित हैं ऐसा यह भीमसेनका रथ है ॥११॥ वह यादवोंकी सेनाके बीचमें लाल रंगके घोड़ोंसे जुता हुआ तथा बड़े-बड़े सिंहोंकी ध्वजासे युक्त समुद्रविजयका रथ सुशोभित हो रहा है ॥१२॥ वह कुमार अक्रूरका रथ सुशोभित है जो कदलीकी ध्वजासे सहित है, बलवान् घोड़ोंसे युक्त है तथा सुवर्ण और मूँगाओंसे देदीप्यमान हो रहा है ॥१३॥

---

१. -मुद्यतौ म० । २. अश्वैः ।

हयैस्तित्तिरकल्माषैः सत्यकस्य महारथः । महानेमिकुमारस्य कौमुदैर्वाजिभी रथः ॥१४॥
चामीकरबृहद्दण्डपताकाध्वजभूषितः । [1]शुकतुण्डनिभैरश्वैर्भोजस्यैष महारथः ॥१५॥
अश्वैः कनकपृष्ठ्यैर्यो युक्तैर्भाति महारथः । असौ जरत्कुमारस्य मृगकेतोर्विराजते ॥१६॥
शुक्लः सोमसुतस्यैष सिंहलस्य विराजते । काम्बोजैर्वाजिभिर्युक्तो रथोऽर्करथभास्वरः ॥१७॥
अश्वैरारक्तसबलैर्म[2]रुराजस्य राजते । रथः काञ्चनचित्राङ्गैः शिंशुमाराकृतिध्वजः ॥१८॥
रथः पद्मरथस्यैष पद्माभैस्तुरगैर्युतः । शोभते रणशूरस्य बलानामग्रतः स्थितः ॥१९॥
[3]पारावतनिभैः पत्रैः सारणस्य त्रिहायनैः । तपनीयच्छदैर्भाति रथोऽसौ पुष्करध्वजः ॥२०॥
शशलोहितसंकाशैर्वाजिभिः पञ्चहायनैः । रथो नग्नजितः सूनोर्मेरुदत्तस्य काशते ॥२१॥
वाजिभिः पञ्चवर्णैर्यो रथो भाति [4]रविप्रभः । विदूरथकुमारस्य जवनः कलशध्वजः ॥२२॥
सर्ववर्णनिभैरश्वैर्यादवानां तरस्विनाम् । न शक्यन्ते [5]रथाः प्रोक्तुं शतशोऽथ सहस्रशः ॥२३॥
अस्माकं नृपवीराणां रथान् वेत्सि यथायथम् । कुमाराणां च सर्वेषां नानाचिह्नान्महारथान् ॥२४॥
क्षत्रियैर्बहुभिर्युक्तो नानादेशसमागतैः । शोभते भवतो व्यूहो रिपुसेनाभयङ्करः ॥२५॥
तदाकर्ण्य निजं प्राह सारथिं मगधेश्वरः । यादवान् प्रति शीघ्रं त्वं रथं नोदय सारथे ! ॥२६॥
नोदितेऽथ रथे तेन समाच्छादयितुं नृपेट् । यादवानभितः सर्वान् शरासारैर्निरन्तरैः ॥२७॥

तीतरके समान मटमैले घोड़ोंसे युक्त रथ सत्यकका है और कुमुदके समान सफेद घोड़ोंसे जुता रथ महानेमिकुमारका है ॥१४॥ जो सुवर्णमय विशाल दण्डकी पताकासे शोभित है तथा तोतेकी चोंचके समान लाल-लाल घोड़ोंसे युक्त है ऐसा यह भोजका महारथ है ॥१५॥ जो सुवर्णमय पलानसे युक्त जुते हुए घोड़ोंसे सुशोभित है ऐसा वह हरिणकी ध्वजाके धारक जरत्कुमारका रथ सुशोभित हो रहा है ॥१६॥ वह जो काम्बोजके घोड़ोंसे युक्त, सूर्यके रथके समान देदीप्यमान सफेद रंगका रथ सुशोभित हो रहा है वह राजा सोमके पुत्र सिंहलका रथ है ॥१७॥ जो सुवर्णमय आभूषणोंसे चित्र-विचित्र शरीरके धारक कुछ-कुछ लाल रंगके घोड़ोंसे जुता हुआ है तथा जिसपर मत्स्यकी ध्वजा फहरा रही है ऐसा यह मरुराजका रथ सुशोभित हो रहा है ॥१८॥ यह जो कमलके समान आभावाले घोड़ोंसे जुता, सेनाओंके आगे स्थित है वह रणवीर राजा पद्मरथका रथ सुशोभित है ॥१९॥ वह जो सुवर्णमयी झूलोंसे युक्त कबूतरके समान रंगवाले तीन वर्षके घोड़ोंसे जुता, एवं कमलकी ध्वजासे सहित रथ सुशोभित हो रहा है वह सारणका है ॥२०॥ जो सफेद और लाल रंगके पाँच वर्षके घोड़ोंसे जुता है ऐसा वह नग्नजित्के पुत्र मेरुदत्तका रथ प्रकाशमान है ॥२१॥ जो पाँच वर्णके घोड़ोंसे जुता है, सूर्यके समान देदीप्यमान है और जिसपर कलशकी ध्वजा फहरा रही है ऐसा यह कुमार विदूरथका वेगशाली रथ सुशोभित है ॥२२॥ इस प्रकार बलवान् यादवोंके रथ सब रंगके घोड़ोंसे सहित हैं तथा वे सैकड़ों या हजारोंकी संख्यामें हैं, उनका वर्णन नहीं किया जा सकता ॥२३॥ अपने पक्षके शूर-वीर राजाओं तथा समस्त राजकुमारोंके नाना चिह्नोंसे युक्त रथोंको आप यथायोग्य जानते ही हैं ॥२४॥ नाना देशोंसे आये हुए अनेक क्षत्रियोंसे युक्त आपका यह व्यूह अत्यन्त शोभित हो रहा है तथा शत्रु सेनाके लिए भय उत्पन्न कर रहा है ॥ २५ ॥

यह सुनकर जरासन्धने अपने सारथिसे कहा कि हे सारथि ! तू मेरा रथ शीघ्र ही यादवोंकी ओर ले चल ॥२६॥ तदनन्तर सारथिने रथ आगे बढ़ाया और जरासन्ध लगातार

१. शुकदण्ड- म० । २. मनुराजस्य क०, मेरुराजस्य म० । ३. पारावती म० । ४. बृहद्ध्वजः म०, ख० । ५. रथान् म० ।

जरासन्धसुतास्तत्र यादवैः सह कोपिनः । यथायथं रथादिस्था रणक्रीडां प्रचक्रिरे ॥२८॥
स कालयवनः काल इव स्वयमुपागतः । गजं मलयनामानमारूढो युयुधेऽधिकम् ॥२९॥
सहदेव इति ख्यातो द्रुमसेनो द्रुमस्तथा । जलचित्रादिकौ केतू धनुर्धरमहीजयौ[1] ॥३०॥
स भानुः काञ्चनरथो दुर्धरो गन्धमादनः । सिंहाङ्कश्चित्रमाली च महीपालबृहद्ध्वजौ ॥३१॥
सुवीरादित्यनागाख्यौ सत्यसत्वसुदर्शनौ । धनपालशतानीकौ महाशुक्रमहावसू ॥३२॥
वीराख्यो गङ्गदत्तश्च प्रवरः पार्थिवाभिधः । चित्राङ्गदो वसुगिरिः श्रीमान् सिंहकटिः स्फुटः ॥३३॥
मेघनादमहानादौ सिंहनादवसुध्वजौ । वज्रनाभमहाबाहू जितशत्रुपुरन्दरौ ॥३४॥
अजिताजितशत्रू च देवानन्दशतद्रुतौ । मन्दरो हिमवान्नाम्ना तौ विद्युत्केतुमालिनौ ॥३५॥
कर्कोटकहृषीकेशौ देवदत्तधनञ्जयौ । सगरस्वर्णबाहू च मघवानच्युतोऽपि च ॥३६॥
दुर्जयो दुर्मुखश्चापि तथा वासुकिकम्बलौ । त्रिशिरा धारणाभिख्यो माल्यवान् सम्भवाभिधः ॥३७॥
महापद्मो महानागो महासेनो महाजयः । वासवो वरुणाभिख्यः शतानीकोऽपि भास्करः ॥३८॥
गरुत्मान् वेणुदारी च वासुवेगशशिप्रभौ । वरुणादित्यधर्माणौ विष्णुस्वामी सहस्रदिक् ॥३९॥
केतुमाली महामाली चन्द्रदेवो बृहद्बलिः । सहस्ररश्मिरर्चिष्मान् [3]जह्नुर्मागधसूनवः ॥४०॥
[4]पतन्मनुजमातङ्गतुरङ्गरथसङ्कटे । स कालयवनो युद्धे निरुद्धो वसुदेवजैः ॥४१॥
तेषां तस्य च संग्रामो यशःसंग्रहकारिणाम् । अन्योन्याक्षेपिवाक्यानां प्रवृत्तो वार्त्तसंकथम् ॥४२॥
छिन्ना तेन कुमाराणां शिरोभी रुधिरारुणैः । चक्रनाराचनिर्भिन्नैः पङ्कजैरिव भूरभात् ॥४३॥
सारणेन कुमारेण स कालयवनो रुषा । नीतः खड्गप्रहारेण कालस्य सदनं चिरात् ॥४४॥

बाणोंकी वर्षासे समस्त यादवोंको आच्छादित करने लगा ॥२७॥ रथ आदि वाहनोंपर स्थित क्रोधसे भरे जरासन्धके पुत्र भी यादवोंके साथ यथायोग्य रणक्रीड़ा करने लगे ॥२८॥ राजा जरासन्धका सबसे बड़ा पुत्र कालयवन जो आये हुए साक्षात् यमराजके समान जान पड़ता था, मलय नामक हाथीपर सवार हो अधिक युद्ध करने लगा ॥२९॥ इसके सिवाय सहदेव, द्रुमसेन, द्रुम, जलकेतु, चित्रकेतु, धनुर्धर, महीजय, भानु, काञ्चनरथ, दुर्धर, गन्धमादन, सिंहाङ्क, चित्रमाली, महीपाल, बृहद्ध्वज, सुवीर, आदित्यनाग, सत्यसत्व, सुदर्शन, धनपाल, शतानीक, महाशुक्र, महावसु, वीराख्य, गङ्गदत्त, प्रवर, पार्थिव, चित्राङ्गद, वसुगिरि, श्रीमान्, सिंहकटि, स्फुट, मेघनाद, महानाद, सिंहनाद, वसुध्वज, वज्रनाभ, महाबाहु, जितशत्रु, पुरन्दर, अजित, अजितशत्रु, देवानन्द, शतद्रुत, मन्दर, हिमवान्, विद्युत्केतु, माली, कर्कोटक, हृषीकेश, देवदत्त, धनंजय, सगर, स्वर्णबाहु, मघवान्, अच्युत, दुर्जय, दुर्मुख, वासुकि, कम्बल, त्रिशिरस्, धारण, माल्यवान्, सम्भव, महापद्म, महानाग, महासेन, महाजय, वासव, वरुण, शतानीक, भास्कर, गरुत्मान्, वेणुदारी, वासुवेग, शशिप्रभ, वरुण, आदित्य-धर्मा, विष्णुस्वामी, सहस्रदिक्, केतुमाली, महामाली, चन्द्रदेव, बृहद्बलि, सहस्ररश्मि और अर्चिष्मान् आदि जरासन्धके पुत्र प्रहार करने लगे ॥३०-४०॥ गिरते हुए मनुष्य, हाथी, घोड़े और रथोंसे व्याप्त युद्धमें कालयवनको वसुदेवके पुत्रोंने घेर लिया ॥४१॥ तदनन्तर यशका संग्रह करनेवाले एवं एक-दूसरेके प्रति निन्दात्मक वाक्योंका प्रयोग करनेवाले उन कुमारों और कालयवनका भयंकर संग्राम हुआ। संग्रामके समय वे अहङ्कारवश व्यर्थकी डींगे भी हाँक रहे थे ॥४२॥ कालयवनने चक्र, नाराच आदि शस्त्रोंसे कितने ही कुमारोंके शिर छेद डाले जिससे खूनसे लथ-पथ उन कटे हुए शिरोंसे पृथ्वी ऐसी सुशोभित होने लगी मानो कमलोंसे ही सुशोभित हो रही हो ॥४३॥ यह देख कुमार सारणने क्रोधमें आकर एक ही तलवारके

१. महीधरौ म० । २. विष्णु-म० । ३. जह्नो म० । ४. तपन् म० ।

कृष्णेनाभिमुखीभूता मागधस्य सुताः परे । शूरा मृत्युमुखं नीतास्तेऽर्धचन्द्रैः शिरश्छिदा ॥४५॥
ततः स्वयं जरासन्धः कृष्णस्याभिमुखं रुषा । दधाव धनुरास्फाल्य रथस्थो रथवर्तिनः ॥४६॥
अन्योन्याक्षेपिणोर्युद्धं तयोरुद्धतवीर्ययोः । अस्त्रैः स्वाभाविकैर्दिव्यैरभूदत्यन्तभीषणम्[1] ॥४७॥
अस्त्रं नागसहस्राणां सृष्टप्रज्वलनप्रभम् । माधवस्य वधायासौ क्षिप्रं चिक्षेप मागधः ॥४८॥
असूढमानसः शौरिर्नागनाशाय गारुडम् । अस्त्रं चिक्षेप तेनाशु ग्रस्तं नागास्त्रमग्रतः ॥४९॥
अस्त्रं संवर्तकं रौद्रं विससर्ज स मागधः । तन्महाश्वसनास्त्रेण माधवोऽपि निराकरोत् ॥५०॥
वायव्यं व्यमुचच्छस्त्रमस्त्रविन्मगधेश्वरः । अन्तरिक्षेण वास्त्रेण [2]व्याक्षिपत्तदधोक्षजः ॥५१॥
अग्निसात्करणे सक्तमस्त्रमाग्नेयमुज्ज्वलम् । मागधक्षिप्तमाक्षिप्तं वारुणास्त्रेण शौरिणा ॥५२॥
अस्त्रं वैरोचनं मुक्तं मागधेन्द्रेण रोषिणा । [3]उपेन्द्रेणापि तद्दूरान्माहेन्द्रास्त्रेण दारितम् ॥५३॥
राक्षसास्त्रं रिपुक्षिप्तं क्षिप्रं नारायणो रणे । क्षिप्त्वा नारायणास्त्रेण [4]सोऽरीणां धृतिमाहरत् ॥५४॥
तामसास्त्रं परिक्षिप्तं भास्करास्त्रेण सोऽभिनत् । अश्वग्रीवास्त्रमत्युग्रं [5]ब्रह्मशिरसारुणत् ॥५५॥
दिव्यान्यन्यानि चास्त्राणि क्षिप्तानि प्रतिशत्रुणा । प्रतिक्षिप्य निरायामो वासुदेवोऽवतिष्ठते[6] ॥५६॥
तथा व्यर्थप्रयासोऽसौ क्षितिक्षिप्तशरासनः । रक्ष्यं यक्षसहस्रेण चक्ररत्नमचिन्तयत् ॥५७॥

प्रहारसे कालयवनको चिरकालके लिए यमराजके घर भेज दिया ॥४४॥ जरासन्धके शेष शूर-वीर पुत्र युद्धके लिए सामने आये तो अर्धचन्द्र बाणोंके द्वारा शिर काटनेवाले कृष्णने उन्हें मृत्युके मुखमें पहुँचा दिया ॥४५॥

हरिरतो बलशाम्बमनोभवप्रभृतिभिर्यदुभिः सह सङ्गतः[3] ।
मदनजानयनं प्रति यातवान्[4] खगपबाणपुरं स विहायसा ॥२६॥
नरतुरङ्गरथद्विपसङ्कुले युधि विजित्य स तत्र खगाधिपम् ।
तमनिरुद्धमुषासहितं हि तं निजनिवासपुरं हरिरानयत् ॥२७॥
विरहदुःखमपोह्य ततोऽखिलः शमनिरुद्धसमागमसम्भवम् ।
अनुदिनं स्वजनो जनतासखः सुखमरंस्त समस्तसुखाश्रयः ॥२८॥
निजवधूजनलालितनेमिना हरिरमा नृपपौरपयोधिना ।
कुसुमितोपवनं स मधौ ययौ विदितरैवतकं रमणेच्छया ॥२९॥
पृथुभिरश्वरथै[5]र्युरोश्वरा रुचिरभूषणनेमिबलाच्युताः ।
धृतसितातपवारणहारिणो वृषभतालबृहद्गरुडध्वजाः ॥३०॥
दशदशार्हकुमारगणावृतः करितुरङ्गरथैर्मदयन् जनम् ।
कुसुमबाणधनुर्मकरध्वजैः पथि रथेन ययौ मकरध्वजः ॥३१॥
पुरजनोऽथ यथार्हसुवाहनैर्विविधवस्त्रविभूषणभूषितः ।
हरिपुरस्सरराजवधूजनः पथि जगाम तथा शिविकादिभिः ॥३२॥

सब सत्य है ? या असत्य है ? यथार्थमें सोनेवालोंका मन संसारमें भ्रमण करता रहता है ॥ २३ ॥ अतर्कित वस्तुओंको देखकर कुमार इस प्रकार विचार कर ही रहा था कि इतनेमें चित्रलेखा सखी आयी और सब समाचार बता एकान्तमें कंकण बन्धन कराकर उस कन्याके साथ मिला गयी ॥२४॥ तदनन्तर देव-देवाङ्गनाओंके समान निरन्तर सुरत रूपी अमृतका पान करनेवाले उन दोनों स्त्री-पुरुषोंका समय सुखसे व्यतीत होने लगा। इधर श्रीकृष्णको जब अनिरुद्धके हरे जानेका वृत्तान्त विदित हुआ तब वे बलदेव, शम्ब और प्रद्युम्न आदि यादवों-के साथ मिलकर अनिरुद्धको लानेके लिए आकाशमार्गसे विद्याधरोंके राजा बाणकी नगरी पहुँचे ॥ २५-२६ ॥ और मनुष्य, घोड़े, रथ और हाथियोंसे व्याप्त युद्धमें विद्याधरोंके अधिपति बाणको जीतकर उषासहित अनिरुद्धको अपने नगर वापिस ले आये ॥ २७ ॥ तदनन्तर अनिरुद्धके समागमसे समुत्पन्न सुखको पाकर सब लोगोंका विरहजन्य दुःख दूर हो गया और समस्त सुखोंके आधारभूत स्वजन और पुरजन सुखसे क्रीड़ा करने लगे ॥ २८ ॥

अथानन्तर एक समय वसन्त ऋतु के आनेपर श्रीकृष्ण, अपनी स्त्रियोंसे लालित भगवान् नेमिनाथ, राजा महाराजा और नगरवासी रूपी सागरके साथ, जहाँ उपवन फूल रहे थे ऐसे गिरनार पर्वतपर क्रीड़ा करनेकी इच्छासे गये ॥ २९ ॥ जो धारण किये हुए सफेद छत्रोंसे सुशोभित थे, तथा बैल, ताल और गरुड़की ध्वजाओंसे युक्त थे ऐसे सुन्दर भूषणोंसे विभूषित भगवान् नेमिनाथ, बलदेव और श्रीकृष्ण पृथक्-पृथक् बड़े-बड़े घोड़ोंके रथोंपर सवार हो एकके बाद एक जा रहे थे ॥ ३० ॥ उनके पीछे समुद्रविजय आदि दश यादवोंके कुमारोंसे परिवृत प्रद्युम्न, मार्गमें फूलोंके बाण, धनुष तथा मकर चिह्नाङ्कित ध्वजासे मनुष्यों को आनन्दित करता हुआ हाथी और घोड़ोंके रथोंपर सवार हो जा रहा था ॥ ३१ ॥ उसके पीछे नाना प्रकारके वस्त्राभूषणोंसे विभूषित नगरवासी लोग यथायोग्य उत्तमोत्तम वाहनोंपर

१. चित्रलेखा नाम सखी । २. -र्विदित-म० । ३. संगतैः म० । ४. खगक म० । ५. रथयुतै-म० ।

उपचितो जनताभिरसौ गिरिः श्रियमुवाह सहोपवनैस्तदा ।
सुरगिरेः सुरलोकवधूजनैरुपचितस्य चितस्य वनान्तरैः ॥३३॥
[1]समपनीतयथोचितवाहना वनविहाररसा जनतालिका ।
सपदि कर्तुमसावुपचक्रमे गिरिनितम्बवनेषु यथायथम् ॥३४॥
सुरभिपुष्परजःसुरभौ श्रमव्यपगमव्यसने वसने दिशः ।
वहति शीतलदक्षिणमारुते स्मररतिश्रम एव नृणामभूत् ॥३५॥
[2]रसितचूतलतारसकोकिलाः कलरवाः कलकण्ठतया गिरौ ।
जनमनांस्यपहर्तुमतिक्षमाः परिचुकूजुरिह स्मरदीपिताः ॥३६॥
मधुलिहां मधुपानजुषां कुलैः कुरवका बकुलाः सुभगाः कृताः ।
द्विपदषट्पदभेदवतां रवैः श्रयति चाश्रय [3]आश्रयिणो गुणान् ॥३७॥
करिकटेष्वयुगच्छदगन्धिषु स्थितिमपास्य [4]मदभ्रमराः श्रिताः ।
सहकारसुरद्रुममञ्जरीरभिनवासु रतिर्महती भवेत् ॥३८॥
कुसुमभारभृतः प्रणता भृशं प्रणयभङ्गभियेव नता द्रुमाः ।
युवतिहस्तधुताः[5] कुसुमोच्चयेऽतनुसुखं [6]तरुणा इव भेजिरे ॥३९॥
अनतिनम्रतया निजशाखया कथमपि प्रमदाकरलग्नया ।
तरुगणः कुसुमग्रहणेऽभजद्दृढकचग्रहसौख्यमिव प्रभुः ॥४०॥

सवार होकर चल रहे थे और इनके बाद कृष्ण आदि राजाओंकी स्त्रियाँ पालकी आदिपर सवार हो मार्गमें प्रयाण कर रही थीं ॥ ३२ ॥ उस समय जन-समूहसे व्याप्त और उपवनोंसे सुशोभित गिरनार पर्वत, देव-देवियोंसे व्याप्त एवं नाना वनोंसे युक्त सुमेरु पर्वतकी शोभाको धारण कर रहा था ॥ ३३ ॥ समीप पहुँचनेपर सब लोग यथायोग्य अपने-अपने वाहन छोड़, पर्वतके नितम्बपर स्थित वनोंमें शीघ्र ही इच्छानुसार विहार करने लगे ॥ ३४ ॥ उस समय वासन्ती फूलोंकी परागसे सुगन्धित, श्रमको दूर करनेवाली, ठण्डी दक्षिणकी वायु सब दिशाओंमें बह रही थी इसलिए मनुष्योंके कामभोग-सम्बन्धी श्रम ही शेष रह गया था शेष सब श्रम दूर हो गया था ॥ ३५ ॥ आम्रलताओंके रसका आस्वादन करनेवाली, सुन्दर कण्ठसे मनुष्योंका मन हरण करनेमें अत्यन्त दक्ष और कामको उत्तेजित करनेमें निपुण मधुरभाषी कोकिलाएँ उस समय पर्वतपर चारों ओर कुहू-कुहू कर रहीं थीं ॥ ३६ ॥ मधुपान करनेमें लीन भ्रमरोंके समूहसे कुरवक और मौलिश्रीके वृक्ष तथा द्विपद अर्थात् स्त्री-पुरुष अथवा कोकिल आदि पक्षी और षट्पद अर्थात् भ्रमरोंके शब्दसे वनके प्रदेश, अत्यन्त मनोहर हो गये थे सो ठीक ही है क्योंकि आश्रय, आश्रयी—अपने ऊपर स्थित पदार्थके गुण ग्रहण करता ही है ॥ ३७ ॥ मदपायी भ्रमर, सप्तपर्ण पुष्पके समान गन्धवाले हाथियोंके गण्डस्थलोंपर स्थितिको छोड़कर आम्र और देवदारुकी मञ्जरियोंपर जा बैठी सो ठीक ही है क्योंकि नवीन वस्तुओंमें अल्पाधिक प्रीति होती ही है ॥ ३८ ॥ फूलोंके भारको धारण करनेवाले वृक्ष अत्यन्त नम्रीभूत हो रहे थे और उससे ऐसे जान पड़ते थे मानो स्नेह-भङ्गके भयसे ही नम्रीभूत हो रहे थे। वे ही वृक्ष पुष्पावचयन के समय जब युवतियोंके हाथोंसे कम्पित होते थे तब तरुण पुरुषोंके समान अतनु—बहुत भारी अथवा कामसम्बन्धी सुखको प्राप्त होते थे ॥ ३९ ॥ फूल चुनते समय वृक्षोंकी ऊँची शाखाओंको स्त्रियाँ किसी तरह अपने हाथसे पकड़कर नीचेकी ओर खींच रही थीं उससे वे नायकके समान स्त्री-द्वारा केश खींचनेके सुखका अनुभव कर

१. समय म० । २. रसितः स्वादितः चूतलतारसो यैस्ते, ते च ते कोकिलाश्च इति— । ३. -माश्रयिणो म० । ४. मदं भ्रमराश्रिताः म० । ५. युवतिहस्तधृता म० । ६. अतनुसुखं महासुखं कामसुखं वा ।

[1]वनपरिभ्रमसौख्यमितस्ततः समनुभूय चिरं वनितासखः ।
युवजनः कुसुमोत्करकल्पितेऽभजत तल्पतले सुरतामृतम् ॥४१॥
प्रतिवनं प्रतिगुल्मलतागृहं प्रतितरु प्रतिवापि विहारतः ।
विषयसौख्यमसेवत सौख्यवानखिलयादवपौरजनो मधौ ॥४२॥
द्विगुणिताष्टसहस्रवधूगणैर्बहुगुणीकृतभोगनभोगतः ।
सुमधुमाधवमासममानयत् सुभगताधरमाधवचन्द्रमाः ॥४३॥
पतिनिदेशजुषो हरियोषितो मुषितमानवमानसवृत्तयः ।
सह विजह्रुरधीश्वरनेमिना तरुलतारमणीयवनेषु ताः ॥४४॥
[2]वनलताकुसुमस्तबकोच्चये मधुमदालसमानसलोचना[3] ।
मुखसुगन्धितया मुखरालिभिर्वलयिताऽधृत काचन देवरम् ॥४५॥
उरसि चुम्बति तं कठिनस्तनी स्पृशति काचन जिघ्रति तं परा ।
मृदुकरेण करे परिगृह्य तं शशिमुखं कुरुतेऽभिमुखं परा ॥४६॥
विटपकैरपि सालतमालजैर्व्यजनकैरिव काश्चिदवीजयन् ।
विदधुरस्य परास्त्ववतंसकश्रियमशोकतरोर्नवपल्लवैः ॥४७॥
विरचितां कुसुमैर्विविधैः स्रजं निजपरिष्वजनस्पृहया परा ।
शिरसि मालयति स्म गले परा कुरवकान्यपरा शिरसेऽकिरत् ॥४८॥
इति वसन्तमनन्तमसौ युवा हरिवधूभिरमा प्रतिमानयन् ।
स ऋतुना तदनन्तरभाविना विभुरसेव्यत सेवकवृत्तिना ॥४९॥

रहे थे ॥ ४० ॥ तरुण पुरुष, स्त्रियोंके साथ चिरकाल तक जहाँ-तहाँ वन-भ्रमणके सुखका उपभोग कर फूलोंके समूहसे निर्मित शय्याओंपर सम्भोगरूपी अमृतका सेवन करने लगे ॥ ४१ ॥ उस वसन्त ऋतुमें सुखसे युक्त समस्त यादव, प्रत्येक वन, प्रत्येक झाड़ी, प्रत्येक लतागृह, प्रत्येक वृक्ष और प्रत्येक वापीमें विहार करते हुए विषय-सुखका सेवन कर रहे थे ॥ ४२ ॥ सोलह हजार स्त्रियोंके द्वारा अनेकरूपताको प्राप्त भोगरूपी आकाशमें विद्यमान एवं सौन्दर्यको धारण करनेवाले श्रीकृष्णरूपी चन्द्रमाने भी वसन्तऋतुके उस चैत्र-वैशाख मासको बहुत अच्छा माना था ॥ ४३ ॥ मनुष्यकी मनोवृत्तिको हरण करनेवाली श्रीकृष्णकी स्त्रियाँ, पतिकी आज्ञा पाकर वृक्षों और लताओंसे रमणीय वनोंमें भगवान् नेमिनाथके साथ क्रीड़ा करने लगीं ॥ ४४ ॥ मधुके मदसे जिसका हृदय और नेत्र अलसा रहे थे ऐसी किसी स्त्रीको वन-लताओंके फूलोंके गुच्छे तोड़ते समय मुखकी सुगन्धि-से प्रेरित गुनगुनाते हुए भ्रमरोंने घेर लिया इसलिए उसने भयभीत हो देवर—नेमिनाथको पकड़ लिया ॥ ४५ ॥ कोई कठिनस्तनी वक्षःस्थलपर उनका चुम्बन करने लगी, कोई उनका स्पर्श करने लगी, कोई उन्हें सूँघने लगी, कोई अपने कोमल हाथसे उनका हाथ पकड़ चन्द्रमाके समान मुखके धारक भगवान् नेमिनाथको अपने सम्मुख करने लगी ॥ ४६ ॥ कितनी ही स्त्रियाँ साल और तमाल वृक्षकी छोटी-छोटी टहनियोंसे पङ्खोंके समान उन्हें हवा करने लगीं। कितनी ही अशोक वृक्षके नये नये पल्लवोंसे कर्णाभरण अथवा सेहरा बनाकर उन्हें पहिनाने लगीं ॥४७॥ कोई अपने आलिङ्गनकी इच्छासे नाना प्रकारके फूलोंसे निर्मित माला उनके शिरपर पहनाने लगी, कोई गलेमें डालने लगी और कोई उनके शिरको लक्ष्यकर कुरवकके पुष्प फेंकने लगी ॥ ४८ ॥ इस प्रकार युवा नेमिनाथ कृष्णकी स्त्रियोंके साथ क्रीड़ा करते हुए उस वसन्तको ऐसा समझ रहे थे जैसे उसका कभी अन्त ही आनेवाला न हो। तदनन्तर वसन्तके बाद आनेवाली ग्रीष्म ऋतु

---

१. नवपरिभ्रम-म० । २. वनलताः म० । ३. लोचनाः म० ।

प्रतिदिनं वसति स्म हरिस्तदा खरनिदाघऋतुं प्रतिमानयन् ।
स्वधृतिकारिणि रैवतके गिरौ शिशिरशीकरनिर्झरहारिणि ॥५०॥
हरिवधूनिवहैरुपरोधतः[1] प्रकृतिरागपरागपराङ्मुखः ।
शिशिरवारिणि तत्र जलास्पदे जलविहारमसेवत तीर्थकृत् ॥५१॥
तरणदूरनिमज्जनकक्रियाः सलिलयन्त्रकराश्च परस्परम् ।
यदुनृपस्य मुदा वरयोषितः[2] प्रतिविचिक्षिपुरम्बुमुखाम्बुजे ॥५२॥
विभुमपि प्रति ता व्यकिरन्पयः करतलाञ्जलिभिर्जलयन्त्रकैः ।
प्रलघु तेन तु ताः[3] किरतापगाः जलधिनेव मुहुर्विमुखीकृताः ॥५३॥
अजनि मज्जनकं जनरञ्जनं न खलु केवलमेवमनीदृशम् ।
अपि तु चित्रसमालभनैर्भ्रमत्परिमलैरपि तज्जलरञ्जनम् ॥५४॥
उदतरत् प्रभुणा तरुणीघटा [4]गतनिदाघजघर्मघनश्रमा ।
मृदितपुष्करिणी करिणी चिरादिव महाकरिणा करिणीघटा ॥५५॥
च्युतवतंसविशेषकमाकुलं तरलदृष्टि विधूसरिताधरम् ।
शिथिलमेखलमिष्टकचग्रहं रत इवाप पुरन्ध्रिकुलं श्रियम् ॥५६॥
परिजनाहृतवस्त्रविभूषणैस्तदनुभूषिततोषितयोषितः ।
विभुवपुर्वसनैः सममार्जयन् सुपरिधाय परं परिधानकम् ॥५७॥

सेवककी तरह भगवान्‌की सेवा करने लगीं ॥ ४९ ॥

उस समय तीक्ष्ण गरमीसे युक्त ग्रीष्म ऋतुको अच्छा मानते हुए श्रीकृष्ण उसी गिरनार पर्वतपर प्रतिदिन निवास करने लगे क्योंकि वह उन्हें बहुत ही आनन्दका कारण था और ठण्डे-ठण्डे जलकणोंसे युक्त निर्झरोंसे मनोहर था ॥५०॥ यद्यपि भगवान् नेमिनाथ स्वभावसे ही रागरूपी परागसे पराङ्मुख थे तथापि श्रीकृष्णकी स्त्रियोंके उपरोधसे वे शीतल जलसे भरे हुए जलाशयमें जलक्रीड़ा करने लगे ॥ ५१ ॥ यदु नरेन्द्रकी उत्तम स्त्रियाँ कभी तैरने लगती थीं, कभी लम्बी-लम्बी डुबकियाँ लगाती थीं, कभी हाथमें पिचकारियाँ ले हर्षपूर्वक परस्पर एक-दूसरे के मुखकमलपर पानी उछालती थीं ॥५२॥ वे अपनी हथेलीकी अञ्जलियों और पिचकारियोंसे जब भगवान्‌के ऊपर जल उछालने लगीं तो उन्होंने भी जल्दी-जल्दी पानी उछालकर उन सबको उस तरह विमुख कर दिया जिस तरह कि समुद्र अपने जलकी तीव्र ठेलसे जब कभी नदियोंको विमुख कर देता है—उल्टा लौटा देता है ॥ ५३ ॥ उनका वह ऐसा अनुपम स्नान न केवल जनरञ्जन—मनुष्योंको राग—प्रीति उत्पन्न करनेवाला हुआ था किन्तु फैलती हुई सुगन्धिसे युक्त नाना प्रकारके विलेपनोंसे जल रञ्जन—जलको रँगने वाला भी हुआ था ॥५४॥ जिस प्रकार कमलोंके समूहको मर्दन करनेवाली एक चञ्चल सूँड़से युक्त हस्तिनियोंका समूह जलाशयमें किसी महाहस्तीके साथ चिरकालतक तैरता रहता है उसी प्रकार वह तरुण स्त्रियोंका समूह अपने हाथ चलाता और कमलोंके समूहको मर्दित करता हुआ चिर कालतक तैरता रहा। इस जल-क्रीड़ासे उनका ग्रीष्मकालीन घामसे उत्पन्न समस्त भय दूर हो गया था ॥ ५५ ॥ उस समय स्त्रियोंके कर्णाभरण गिर गये थे, तिलक मिट गये थे, आकुलता बढ़ गयी थी, दृष्टि चञ्चल हो गयी थी, ओंठ धूसरित हो गये थे, मेखला ढीली हो गयी थी और केश खुल गये थे इसलिए वे सम्भोगकाल-जैसी शोभाको प्राप्त हो रही थीं ॥ ५६ ॥ तदनन्तर परिजनोंके द्वारा लाये हुए वस्त्राभूषणोंसे विभूषित स्त्रियोंने, सन्तुष्ट होकर वस्त्रोंसे भगवान्‌का शरीर पोंछा और उन्हें दूसरे वस्त्र पहिनाये ॥ ५७ ॥

१. -रुपरोधितः म०, ङ। २. स्वमुखवारिमुसेकवधूजनाः म०, ङ०। ३. सता म०। ४. गतनिदाघज म०।

सपदि मुक्तजलाम्बरपीलने स्फुटकटाक्षगुणेन विलासिना ।
मधुरिपुस्थिरगौरवभूमिकामतुलजाम्बवतीं समनोदयत् ॥५८॥

कृतककोपविकारकटाक्षिणी सकलितभ्रु विलोक्य तु चक्षुषा ।
विमुमुचावचः पथपण्डिता स्वरितजाम्बवती स्फुटिताधरा ॥५९॥

भुजगकोटिमणिद्युतिमण्डलद्विगुणिताङ्गकिरीटमणिप्रभः ।
समधिरुह्य स कौस्तुभभासुरः स्वहरिवाहमहाशयनं हरिः ॥६०॥

घननिनादततान्बरमम्बुजं[1] जगति पूरयते निजमम्बुमाः[2] ।
कठिनशार्ङ्गधनुः सगुणं करोत्यखिलभूपविभुः सुभगाङ्गनः ॥६१॥

पतिरसौ मम सोऽपि[3] कदाचन प्रति न शास्ति हि वेदशशासनम् ।
तदिह कश्चिदयं किल शास्ति मामपि भवान् सजलाम्बरपीलने ॥६२॥

इति निशम्य नु काश्चन तद्वचः प्रतिजगुर्जगतीपतियोषितः ।
किमिति नाथमधिक्षिपसि त्रिभूप्रभुमनन्तगुणं विगतत्रपे ॥६३॥

कियदिदं जगतीपतिपौरुषं जगति दुष्करमित्यभिधाय सः ।
सरभसं पुरमेत्य नृपालयं द्रुतगतिः प्रविवेश हसन्मुखः ॥६४॥

चलभुजङ्गमभोगविभूषणं तदधिरुह्य महाशयनं हरेः ।
तदकरोद्द्विगुणं सगुणं धनुस्तमपि शङ्खमपूरयदीश्वरः[4] ॥६५॥

भगवान्‌ने जो तत्काल गीला वस्त्र छोड़ा था उसे निचोड़नेके लिए उन्होंने कुछ विलासपूर्ण मुद्रामें कटाक्ष चलाते हुए कृष्णकी प्रेमपात्र एवं अनुपम सुन्दरी जाम्बवतीको प्रेरित किया ॥ ५८ ॥ भगवान्‌का अभिप्राय समझ शीघ्रतासे युक्त तथा नाना प्रकारके वचन बनानेमें पण्डित जाम्बवती बनावटी क्रोधसे विकारयुक्त कटाक्ष चलाने लगी, उसका ओष्ठ कम्पित होने लगा एवं हाव-भावपूर्वक भौंहें चलाकर नेत्रसे भगवान्‌की ओर देखकर कहने लगी कि ॥ ५९ ॥ जिनके शरीर और मुकुटके मणियोंकी प्रभा करोड़ों सर्पोंके मणियोंके कान्तिमण्डलसे दूनी हो जाती है, जो कौस्तुभ मणिसे देदीप्यमान हैं, जो महानागशय्यापर आरूढ़ हो जगत्‌में प्रचण्ड आवाजसे आकाशको व्याप्त करनेवाला अपना शङ्ख बजाते हैं, जो जलके समान नीली आभाको धारण करनेवाले हैं, जो अत्यन्त कठिन शार्ङ्गनामक धनुषको प्रत्यञ्चासे युक्त करते हैं, जो समस्त राजाओंके स्वामी हैं और जिनकी अनेक शुभ-सुन्दर स्त्रियाँ हैं वे मेरे स्वामी हैं किन्तु वे भी कभी मुझे ऐसी आज्ञा नहीं देते फिर आप कोई विचित्र ही पुरुष जान पड़ते हैं जो मेरे लिए भी गीला वस्त्र निचोड़नेका आदेश दे रहे हैं ॥ ६०-६२ ॥ जाम्बवतीके उक्त शब्द सुनकर कृष्णकी कितनी ही स्त्रियोंने उसे उत्तर दिया कि अरी निर्लज्ज ! इस तरह तीन लोकके स्वामी और अनन्तगुणोंके धारक भगवान् जिनेन्द्रकी तू क्यों निन्दा कर रही है ? ॥ ६३ ॥ जाम्बवतीके वचन सुन भगवान् नेमिनाथने हँसते हुए कहा कि तूने राजा कृष्णके जिस पौरुषका वर्णन किया है संसारमें वह कितना कठिन है ? इस प्रकार कह कर वे वेगसे नगरकी ओर गये और शीघ्रतासे राजमहलमें घुस गये ॥ ६४ ॥ वे लहलहाते सर्पोंकी फणाओंसे सुशोभित श्रीकृष्णकी विशाल नागशय्यापर चढ़ गये । उन्होंने उनके शार्ङ्ग धनुषको दूना कर प्रत्यञ्चासे युक्त कर दिया और उनके पाञ्च-

१. शङ्खं । २. पूरयते च निबाम्बुभाः म०, पूरयते च जिनाधिपैः घ०, पूरयते निजमाम्बुभाः ग०, पूरयते निजमाम्बुभाः ङ०, ख० । ३. कोऽपि म० । ४. -दीश्वरम् म० ।

मुखरशङ्खरवेण दिशां मुखाम्बलिकमम्बरमम्बुनिधिश्च भूः ।
निखिलमेतदलीव विपूरितस्फुटदिवस्फुटमाविरभूत्तदा ॥६६॥

पटुमदाः करिणः क्षुभिता निजाननिबमम्भुरितस्तत आश्रवान् ।
त्रुटितबन्धतुरङ्गमकोटयः पुरि सहेषितकास्त्वरितोऽभ्रमन् ॥६७॥

भवनकूटतटान्यपतन् हरिः स्वकमकर्षदसिं क्षुभिता सभा ।
पुरजनः प्रलयागमशङ्कया भयमगात् परमाकुलितस्तदा ॥६८॥

हरिरवेत्य निजाम्बुजनिस्वनं त्वरितमेत्य कुमारमवज्ञया ।
स्फुरदहीशमहाशयने स्थितं परिनिरीक्ष्य नृपैः सुविसिस्मिये ॥६९॥

परुषजाम्बवतीवचसो रुषा स्फुटमवेत्य कुमारकृतं हरिः ।
परितुतोष सबन्धुरधीशितुर्विकृतिरप्यतितोषकरी तदा ॥७०॥

कृतपरिष्वजनः स्वजनैः स तं समभिपूज्य युवानमगाद्गृहम् ।
स्वयुवतिं प्रति दीपितमन्मथं समवबुध्य हरिर्मुमुदेऽधिकम् ॥७१॥

सविधियाचितभोजसुताकरग्रहणहेतुविबोधितबान्धवः ।
नरपतीन् सकलान् सकलत्रकानकृत सन्निहितान् कृतगौरवः ॥७२॥

विहिततत्समयोचितमज्जनौ परमरूपधरौ धृतमण्डनौ ।
पुरि यथास्वमगारमधिष्ठितौ जनमनोऽहरतां सुवधूवरौ ॥७३॥

जन्य शङ्खको जोरसे फूँक दिया ॥ ६५ ॥ शङ्खके उस भयंकर शब्दसे दिशाओंके मुख, समस्त आकाश, समुद्र, पृथिवी आदि सभी चीजें व्याप्त हो गयीं और उससे ऐसी जान पड़ने लगीं मानो शङ्खके शब्दसे व्याप्त होनेके कारण फट ही गयी हों ॥ ६६ ॥ अत्यधिक मदको धारण करनेवाले हाथियोंने क्षुभित होकर जहाँ-तहाँ अपने बन्धनके खम्भे तोड़ दिये। घोड़े भी बन्धन तुड़ाकर हिनहिनाते हुए नगरमें इधर-उधर दौड़ने लगे ॥ ६७ ॥ महलोंके शिखर और किनारे टूट-टूट कर गिरने लगे। श्री कृष्णने अपनी तलवार खींच ली। समस्त सभा क्षुभित हो उठी, और नगरवासी जन प्रलयकालके आनेकी शङ्कासे अत्यन्त आकुलित होते हुए भयको प्राप्त हो गये ॥ ६८ ॥ जब कृष्णको विदित हुआ कि यह तो हमारे ही शङ्खका शब्द है तब वे शीघ्र ही आयुधशालामें गये और नेमिकुमारको देदीप्यमान नागशय्यापर अनादरपूर्वक खड़ा देख अन्य राजाओंके साथ आश्चर्य करने लगे ॥ ६९ ॥ ज्यों ही कृष्णको यह स्पष्ट मालूम हुआ कि कुमारने यह कार्य जाम्बवतीके कठोर वचनोंसे कुपित होकर किया है त्यों ही बन्धुजनोंके साथ उन्होंने अत्यधिक सन्तोषका अनुभव किया। उस समय कुमारकी वह क्रोध-रूप विकृति भी कृष्णके लिए अत्यन्त सन्तोषका कारण हुई थी ॥७०॥ अपने स्वजनोंके साथ कृष्णने युवा नेमिकुमारका आलिङ्गन कर उनका अत्यधिक सत्कार किया और उसके बाद वे अपने घर गये। घर जानेपर जब उन्हें विदित हुआ कि अपनी स्त्रीके निमित्तसे उन्हें कामोद्दीपन हुआ है तब वे अधिक हर्षित हुए ॥ ७१ ॥ श्रीकृष्णने नेमिनाथके लिए विधिपूर्वक भोजवंशियोंकी कुमारी राजीमतीकी याचना की, उसके पाणिग्रहण संस्कारके लिए बन्धुजनोंके पास खबर भेजी और स्त्रियोंसहित समस्त राजाओंको बड़े सम्मानके साथ बुलाकर अपने निकट किया ॥ ७२ ॥ उस समयके योग्य जिनका स्नपन किया गया था, जो परम रूपको धारण कर रहे थे, जिन्होंने उत्तमोत्तम आभूषण धारण किये थे और जो अपने-अपने नगरमें अपने-अपने घर स्थित थे ऐसे उत्तम वधू और वर मनुष्योंका मन हरण कर रहे थे ॥ ७३ ॥

ऋतुरियाय स घर्ममयस्ततो भुवि घनागमकालभयादिव ।
नभसि दीनदृशं घनावली ददृशे पथिकैस्तृषितैरपि ॥७४॥
प्रथमगर्जितशीतपयःकणा जनुषां [1] शिखिचातकसौख्यदाः ।
भुवि बभूवुरमी घनवियोगिनां द्विगुणतापकृतामतिदुःसहाः ॥७५॥
दवदिवाकरदग्धवनावलीप्रथमनिर्गतबाष्पसुसौरभे [2] ।
अभवतामिव सौहृदवृत्तये [3] नभसि वर्षति मेघकदम्बके ॥७६॥
चलतडित्सबलाकबलाहके [4] सुरपचापधरे शरवर्षिणी ।
क्षितिरभात्सुरगोपशतैश्चिता पतितपान्थमनोभिरिवाभितः ॥७७॥
कुटजनीपकदम्बकदम्बकैः कुसुमितैः ककुभैः [5] ककुभोऽखिलाः ।
नवशिलीन्ध्रदलैश्च मनोहराः सवनरन्ध्रगिरिक्षितयो बभुः ॥७८॥
घनघनाघनगर्जिततर्जिता मुखरबाहुलतावलयारवैः ।
युवतयः प्रियकण्ठतटग्रहैर्विदधुरुग्रभयग्रहनिग्रहम् ॥७९॥
गिरिशिलातपयोगविमोचितास्त्रिविधयोगधरा मुनयो वने ।
शिशिरमारुतवर्षसहाः समास्तरुलताभिमुखास्त्ववतस्थिरे ॥८०॥
पृथुरथं चतुरश्वयुतं तदा ध्वजपताकिनमर्करथप्रभम् ।
समधिरुह्य सनेमियुवान्वितो नृपसुतैश्चलितो वनभूमिकाम् ॥८१॥

तदनन्तर अब पृथिवीपर वर्षाकाल आनेवाला है इस भयसे ही मानो ग्रीष्म ऋतु कहीं चली गयी। आकाशमें मेघमाला छा गयी और उसे मरुस्थलके पथिक प्यासे होनेपर भी बड़ी दीनतासे देखने लगे ॥ ७४ ॥ मेघोंकी प्रथम गर्जनाके जो शब्द और शीतल जलके छींटे क्रमसे मयूरों तथा चातकोंको सुखदायी थे वे ही पृथिवीपर दूने संतापको प्राप्त समस्त विरही मनुष्योंके लिए अत्यन्त दुःसह हो रहे थे ॥ ७५ ॥ सावनके महीनेमें जब मेघोंके समूह बरसने लगे तब दावानल और सूर्यके कारण दग्ध वनपंक्तिसे जो सर्व प्रथम बाष्प (भाप) और सोंधी-सोंधी सुगन्धि निकली वह ऐसी जान पड़ने लगी मानो मेघरूपी मित्रके दिखनेसे ही वनावलीके बाष्प—हर्षाश्रु और सुखोच्छ्वासकी सुगन्धि निकलने लगी हो ॥ ७६ ॥ चञ्चल बिजली और बलाकाओंसे सहित, मेघ जब इन्द्रधनुषरूपी धनुषको धारण कर शर अर्थात् बाण (पक्षमें जल) की वर्षा करने लगे तब सैकड़ों इन्द्रगोपोंसे व्याप्त पृथिवी ऐसी जान पड़ने लगी मानो जहाँ-तहाँ पथिक जनोंके गिरे हुए अनुरागी हृदयोंसे ही व्याप्त हो रही हो ॥ ७७ ॥ समस्त दिशाएँ फूले हुए कुटज, कदम्ब और कोहाके वृक्षोंसे मनोहर दिखने लगीं तथा वन, गर्त और पर्वतोंसे सहित समस्त भूमि शिलीन्ध्रके नये-नये दलोंसे सुशोभित हो उठी ॥ ७८ ॥ मेघोंकी घनघोर गर्जनासे डरी हुई युवतियाँ, भुजाओंकी खनकती हुई चूड़ियोंके शब्दसे युक्त पतियोंके कण्ठके दृढालिंगनसे अपने तीव्र भयरूपी पिशाचका निग्रह करने लगीं। भावार्थ–मेघगर्जनासे भयभीत स्त्रियाँ पतियोंके कण्ठका दृढालिङ्गन करने लगीं ॥ ७९ ॥ आतापन, वर्षा और शिशिरके भेदसे तीन प्रकारके योगको धारण करनेवाले मुनियोंका उस समय पर्वत की शिलाओंपर होनेवाला आतापन योग छूट गया था इसलिए वे वनमें शीत, वायु और वर्षाकी बाधा सहन करते हुए वृक्ष और लताओंके नीचे स्थित हो गये। भावार्थ—मुनिगण वृक्षोंके नीचे बैठकर वर्षायोग धारण करने लगे ॥ ८० ॥ ऐसी ही वर्षाऋतुमें एक दिन युवा नेमिकुमार, ध्वजा-पताकाओंसे सुशोभित सूर्यके रथके समान देदीप्यमान एवं चार घोड़ोंसे

१. दिवि चातक क०, भुवि चातक ङ० । २. कर्तृपदम् । ३. श्रावणमासे । ४. सुरचापधरे क०, ङ०, म० । ५. इन्द्रः ककुभोऽर्जुनः इत्यमरः । 'कोहा' इति हिन्दी ।

मुदितभोजसुतानगराङ्गनातृषितलोचनपीतवपुर्जलः ।
विपुलराजपथेन स तैः समं शनकमेव मनोहरदर्शनः ॥८२॥

जलनिधिर्मुखरः स्वतरङ्गकैर्ललितनर्तनदोर्भिरिवाकुलैः ।
अतितरां विबभौ विभुसन्निधौ विधृतनर्तनवर्तकवत्तदा[1] ॥८३॥

उपवनं समुपेत्य वनश्रियं सपदि यूनि विलोकयतीश्वरे ।
विततशाखवनद्रुमजातयो विचकरुः कुसुमाञ्जलिमानताः ॥८४॥

स खलु पश्यति तत्र तदा वने विविधजातिभृतस्तृणभक्षिणः ।
भयविकम्पितमानसगात्रकान् पुरुषरुद्धमृगानतिविह्वलान् ॥८५॥

लघु निरुध्य रथं स हि सारथिं[2] निजनिनादजिताम्बुदनिस्वनः ।
अपि विदन्नवदन्मृगजातयः किमिह रोधमिताः प्रविकम्पिताः ॥८६॥

अकथयत् प्रणतः स कृताञ्जलिः क्षितिभुजामिह मांसभुजां विभो ।
तव विवाहविधौ मृगरोधनं विविधमांसनिमित्तमनुष्ठितम् ॥८७॥

इति निशम्य निशाम्य मृगव्रजान् प्रकृतिभूतदयार्द्रितमानसः ।
नृपसुतानभिवीक्ष्य विबुद्धमानभिनिबोधविजृम्भणसावधिः ॥८८॥

गृहमरण्यमरण्यतृणोदकान्यशनपानमतीव निरागसः ।
मृगकुलस्य तथापि वधो नृभिर्व्रजति पश्यत निर्घृणतां नृणाम् ॥८९॥

जुते रथपर सवार हो अनेक राजकुमारोंके साथ वनभूमिकी ओर चल दिये ॥ ८१ ॥ प्रसन्नतासे युक्त राजीमती तथा नगरकी स्त्रियोंने अपने प्यासे नेत्रोंसे जिनके शरीर रूपी जल-का पान किया था एवं जिसका दर्शन मनको हरण कर रहा था ऐसे नेमिनाथ भगवान्, उन राजकुमारोंके साथ विशाल राज-मार्गमें दर्शकोंपर दया करते हुएके समान धीरे-धीरे गमन कर रहे थे ॥ ८२ ॥ उस समय समुद्र, सुन्दर नृत्यमें व्यस्त भुजाओंके समान अपनी चञ्चल तरङ्गोंसे शब्दायमान हो रहा था और भगवान्के समीप आनेपर नाना प्रकारके नृत्योंको धारण करनेवाले नर्तकके समान अत्यधिक सुशोभित हो रहा था ॥८३॥ उपवनमें पहुँचकर युवा नेमि कुमार शीघ्र ही वन की लक्ष्मीको देखने लगे और वनके नाना वृक्षोंकी पंक्तियाँ अपनी शाखारूप भुजाएँ फैलाकर नम्रीभूत हो उनपर फूलोंकी अञ्जलियाँ बिखेरने लगीं ॥ ८४ ॥ उसी समय उन्होंने वनमें एक जगह, भयसे जिनके मन और शरीर काँप रहे थे, जो अत्यन्त विह्वल थे, पुरुष जिन्हें रोके हुए थे और जो नाना जातियोंसे युक्त थे ऐसे तृणभक्षी पशुओंको देखा ॥ ८५ ॥ यद्यपि भगवान्, अवधिज्ञानसे उन पशुओंको एकत्रित करनेका कारण जानते थे तथापि उन्होंने शीघ्र ही रथ रोककर अपने शब्दसे मेघध्वनिको जीतते हुए, सारथिसे पूछा कि ये नाना जातिके पशु यहाँ किस लिए रोके गये हैं ? ॥ ८६ ॥ सारथिने नम्रीभूत हो हाथ जोड़कर कहा कि हे विभो ! आपके विवाहोत्सवमें जो मांसभोजी राजा आये हैं उनके लिए नाना प्रकारका मांस तैयार करनेके लिए यहाँ पशुओंका निरोध किया गया है ॥ ८७ ॥ इस प्रकार सारथिके वचन सुनकर ज्यों ही भगवान्ने मृगोंके समूहकी ओर देखा त्यों ही उनका हृदय प्राणिदयासे सराबोर हो गया। वे अवधिज्ञानी तो थे ही इसलिए राजकुमारोंकी ओर देखकर इस प्रकार कहने लगे कि वन ही जिनका घर है, वनके तृण और पानी ही जिनका भोजन-पान है और जो अत्यन्त निरपराध हैं ऐसे दीन मृगोंका संसारमें फिर भी मनुष्य

---

१. विधृतनर्तकनर्तन म०, ख० । २. सहसारथिं म० ।

रणमुखेषु रणार्जितकीर्तयः करितुरङ्गरथेष्वपि निर्भयाः ।
अभिमुखानभिहन्तुमभिस्थितानभिमुखाः प्रहरन्ति न हीतरान् ॥९०॥
शरभसिंहवनद्विपयूथपान् प्रकुपितान् परिहृत्य विदूरतः ।
मृगशशान् पृथुकान् प्रहरत्यमून् कथमिवात्र पुमान्न विलज्जते ॥९१॥
चरणकण्टकवेधभयाकुला विदधते परिधानमुपानहाम् ।
मृदुमृगान् मृगयासु पुनः स्वयं निशितशस्त्रशतैः प्रहरन्ति हि ॥९२॥
विषयसौख्यफलप्रदवीरुधः प्रथम एव मृगौघवधोऽधमः ।
अनुभवे पुनरस्य रसप्रदे षडसुकायविनिपीडनमप्यपि ॥९३॥
विपुलराज्यपदस्थितिमिच्छता सकलसत्त्ववधोऽभिमुखीकृतः ।
दुरितबन्धफलस्तु वधो ध्रुवं कटुफला स्थितिरस्य परा[1] यतः ॥९४॥
प्रकृतिदेशरसानुभवस्थिति[2] प्रचितबन्धचतुष्कवशीकृतः ।
भजति दुर्गतिषु क्रमतो भ्रमन् विविधदुःखमयं भवभृद्गणः ॥९५॥
प्रतिभवं भवदुःखखनीसुखैर्विषयजैः[3] कुसुखैरतिभावितः ।
नरभवेऽप्यसुमानतिमोहितो न यतते भवदुःखनिवृत्तये ॥९६॥
भवसुखानि बहिर्विषयोद्भवान्यतिमहान्त्यपि [4]सन्ततिमन्त्यपि ।
भवभृतो न भवन्ति हि तुष्टये जलनिधेरिव सिन्धुशतान्यपि ॥९७॥

वध करते हैं। अहो! मनुष्योंकी निर्दयता तो देखो ॥ ८८-८९ ॥ रणके अग्रभागमें जिन्होंने कीर्तिका संचय किया है ऐसे शूरवीर मनुष्य हाथी, घोड़े और रथ आदिपर सवार हो निर्भयताके साथ मारनेके लिए सामने खड़े हुए लोगों पर ही उनके सामने जाकर प्रहार करते हैं अन्य लोगोंपर नहीं ॥ ९० ॥ जो पुरुष अत्यधिक क्रोधसे युक्त शरभ, सिंह तथा जंगली हाथियों आदिको तो दूरसे छोड़ देते हैं और मृग तथा खरगोश आदि क्षुद्र प्राणियों-पर प्रहार करते हैं उन्हें लज्जा क्यों नहीं आती ? ॥ ९१ ॥ अहा! जो शूरवीर पैरमें काँटा न चुभ जाये इस भयसे स्वयं तो जूता पहिनते हैं और शिकारके समय कोमल मृगोंको सैकड़ों प्रकारके तीक्ष्ण शस्त्रोंसे मारते हैं यह बड़े आश्चर्यकी बात है ॥ ९२ ॥ यह निन्द्य मृग-समूहका वध प्रथम तो विषयसुखरूपी फलको देता है परन्तु जब इसका अनुभाग अपना रस देने लगता है तब उत्तरोत्तर छह कायका विघात सहन करना पड़ता है। भावार्थ—हिंसक प्राणी छहकायके जीवोंमें उत्पन्न होता है और वहाँ नाना जीवोंके द्वारा मारा जाता है ॥ ९३ ॥ यह मनुष्य चाहता तो यह है कि मुझे विशाल राज्यकी प्राप्ति हो पर करता है समस्त प्राणियोंका वध सो यह विरुद्ध बात है क्योंकि प्राणिवधका फल तो निश्चित ही पापबन्ध है और उसके फलस्वरूप कटुक फलकी ही प्राप्ति होती है राज्यादिक मधुर फलकी नहीं ॥९४॥ प्रकृति, प्रदेश, स्थिति और अनुभाग रूप चार प्रकारके बन्धके वशीभूत हुआ यह प्राणियोंका समूह क्रम-क्रमसे दुर्गतियोंमें परिभ्रमण करता हुआ नाना प्रकारके दुःख भोगता रहता है ॥९५॥ यह प्राणी प्रत्येक भवमें भय और दुःखकी खान से युक्त विषय-सम्बन्धी खोटे सुखोंसे प्रभावित रहा है और आज मनुष्यभवमें भी इतना अधिक मोहित हो रहा है कि संसार-सम्बन्धी दुःखको दूर करनेके लिए यत्न ही नहीं करता ॥ ९६ ॥ जिस प्रकार सैकड़ों नदियाँ समुद्रके सन्तोषके लिए नहीं हैं उसी प्रकार बाह्य विषयों-से उत्पन्न, सन्ततिबद्ध, बहुत भारी संसारसुख भी प्राणीके सन्तोषके लिए नहीं हैं ॥ ९७ ॥

१. वधा म० । २. स्थितिः प्रचित म० । ३. विषमजैः म० । ४. सन्ततितान्यपि म० ।

स्वचरदेवनृपामरजन्मजं सुखमजयन्तविमानभवोद्भवम् ।
न हि सुखं[1] बहुसागरजीविनः समनुभूतमभून्मम तृप्तये ॥९८॥
कतिपयाहभवं बत किं पुनः सुखमसारमिदायुरसारकम् ।
भवति तृप्तिकरं मम साम्प्रतं सुखमसारमसारतयायुषः ॥९९॥
अत इदं क्षयि तापकरं सुखं विषयजं प्रविहाय महोद्यमः ।
क्षयविमुक्तमतापजमात्मजं शिवसुखं महता तपसार्जये ॥१००॥
इति तदा मनसा वचसा समं सुपरिचिन्तयति भुवनेश्वरे ।
शशिनिभाः खलु [2]पञ्चमकल्पजास्तुषितवह्न्यरुणार्कसुरस्सराः ॥१०१॥
लघु समेत्य नता भगवत्पदोः कृतकराञ्जलिविग्रहा जगुः ।
समय एष विभो भरतेऽधुना त्वमिह वर्तय तीर्थमिति प्रभुम् ॥१०२॥
प्रतिविबुद्धपथः स्वयमेव स प्रतिविबोधकदेवगिरोऽस्य ताः ।
अनुवदन्त्यपि ताः पुनरुक्ततां फलति चावसरे पुनरुक्तता ॥१०३॥
लघु विसृज्य मृगान् मृगबान्धवो नृपसुतैः प्रविवेश पुरं प्रभुः ।
सपदि तत्र नृपासनभूषणं[3] तुष्टुवुरेत्य पुरेव सुरेश्वराः ॥१०४॥
तमुपवेश्य ततः स्नपनासने समुपनीतपयःपयसा सुरैः ।
समभिषिच्य विभूष्य सुरोचितस्रगनुलेपनवस्त्रविभूषणैः ॥१०५॥
सुहरिविष्टरवर्तितमीश्वरं [4]हरिबलान्वितभूपसुरासुराः ।
बभुरतीव तदा परितः स्थिताः प्रथममेरुमिवोरुकुलाचलाः ॥१०६॥

औरकी बात जाने दो मैंने स्वयं सागरों पर्यन्त विद्याधरेन्द्र, देवेन्द्र और नरेन्द्रके जन्ममें राजाओं तथा जयन्त विमानमें समुत्पन्न सुखका उपभोग किया है पर वह मेरी तृप्तिके लिए नहीं हुआ ॥ ९८ ॥ यद्यपि मुझे लोकोत्तर सुख सुलभ है तथापि वह कुछ ही दिन ठहरनेवाला है, निःसार है और मेरी आयु भी असार है अतः वह मेरे लिए तृप्ति करनेवाला कैसे हो सकता है ? ॥ ९९ ॥ इस लिए मैं इस विनाशीक एवं सन्तापकारी विषयजन्यसुखको छोड़कर महान् उद्यम करता हुआ अत्यधिक तपसे अविनाशी, असन्तापसे उत्पन्न आत्मोत्थ मोक्ष सुखका उपार्जन करता हूँ ॥ १०० ॥ भगवान् उस समय मन-वचनसे इस प्रकारका विचार कर ही रहे थे कि उसी समय पञ्चम स्वर्गमें उत्पन्न, चन्द्रमाके समान श्वेतवर्ण तुषित, वह्नि, अरुण, आदित्य आदि लौकान्तिक देव शीघ्र ही आ पहुँचे और मस्तक झुकाकर तथा हाथ जोड़ कर निवेदन करने लगे कि हे प्रभो ! इस समय भरतक्षेत्रमें तीर्थ प्रवर्तानेका समय है इसलिए तीर्थप्रवृत्ति कीजिए ॥ १०१–१०२ ॥ भगवान् स्वयं ही मार्गको जानते थे इसलिए लौकान्तिक देवोंके उक्त वचन यद्यपि पुनरुक्त बातका ही कथन करते थे तथापि अवसरपर पुनरुक्तता भी फलीभूत होती है ॥ १०३ ॥ मृगोंके हितैषी भगवान्ने शीघ्र ही मृगोंको छोड़ दिया और राजकुमारोंके साथ स्वयं नगरीमें प्रवेश किया। नगरीमें जाकर वे राज्यसिंहासनको अलंकृत करने लगे और इन्द्रोंने पहलेके समान आकर उनकी स्तुति की ॥ १०४ ॥ तदनन्तर इन्द्रोंने उन्हें स्नानपीठपर विराजमान कर देवोंके द्वारा लाये हुए क्षीरोदकसे उनका अभिषेक किया और देवोंके योग्य माला, विलेपन, वस्त्र एवं आभूषणोंसे विभूषित किया ॥१०५॥ उत्तम सिंहासनके ऊपर विराजमान भगवान्को घेरकर खड़े हुए कृष्ण, बलभद्र आदि अनेक राजा और सुर-असुर ऐसे जान पड़ते थे जैसे प्रथम सुमेरुको घेरकर स्थित कुलाचल ही

१. सुखम्भवसागरजीवितः म० । २. पञ्चमस्वर्गोत्पन्ना लौकान्तिकदेवाः । ३. ननृतुरेत्य म०, तस्तुवुरेत्य क० । ४. हरियुगा—म०, ङ० ।

जिगमिषुं तपसे जिनमाप्तता हरिपुरःसरभोजयदूत्तमाः ।
अनुनयैर्न निरोद्धुमलं तदा प्रबलसिंहमिवोद्धृतपञ्जरम् ॥१०७॥
पितृपुरःसरबन्धुजनं जिनः सुपरिबोध्य जगत्स्थितिकोविदः ।
धनदशिल्पिकृतां शिबिकां पदैरगमदुत्तरकुर्वभिधानिकाम्[1] ॥१०८॥
ध्वजसितातपवारणमण्डितां सुमणिभित्तिसुपादितवल्लिकाम् ।
विविधरूपधरामधिरूढवान् विधुरिवोदयभूधरभित्तिकाम् ॥१०९॥
क्षितिभुजः क्षितिजः शिबिकां शिवामुदवहन् प्रथमाः प्रथमं ततः ।
सुरपथे सुरनाथपुरोगमाः सुरवराः सुखमूहुरमुं मुदा ॥११०॥
नभसि पूर्णमुरुमुदा[2] रवः[3] सुरगणैर्विहितो[4] विहितोऽश्रियाम्[5][6] ।
श्रुतिपथोत्तुदती दुःखरोदितो[7] व्यथितभोजगतो[8] अगतोऽगमत् ॥१११॥
ननृतुरप्सरसः[9] सहसा रसैः[10] शिखिनि[11] साप्सरसः[12] सह सारसैः[13][14] ।
[15]यमभिसाम[16] रसंगमताङ्कं तमिव शान्तरसं घनतां[17] गतम् ॥११२॥

हों ॥ १०६ ॥ जिस प्रकार पिञ्जरेको तोड़कर निकलनेवाले बलवान् सिंहको कोई अनुनय-विनयके द्वारा रोकनेमें समर्थ नहीं होता है उसी प्रकार तपके लिए जानेके इच्छुक भगवान्को श्रीकृष्ण भोजवंशी तथा यदुवंशी आदि कोई भी रोकनेमें समर्थ नहीं हो सके ॥ १०७ ॥

तदनन्तर संसारकी स्थितिके जानकार जिनेन्द्र भगवान् पिता आदि परिवारके लोगोंको अच्छी तरह समझाकर कुबेररूप शिल्पीके द्वारा निर्मित उत्तरकुरु नामकी पालकीकी ओर पैदल ही चल पड़े ॥१०८॥ वह पालकी ध्वजाओं और सफेद छत्रसे मण्डित थी, उत्तम मणिमय दीवालोंसे युक्त थी। उत्तमोत्तम बेल-बूटोंसे सहित थी, और विविधरूपको धारण कर रही थी। जिस प्रकार उदयाचलकी भित्तिपर चन्द्रमा आरूढ़ होता है उसी प्रकार भगवान् भी उस पालकीपर आरूढ़ हो गये ॥१०९॥ तदनन्तर सबसे पहले कुछ दूर तक पृथिवीपर तो श्रेष्ठ राजा लोगोंने उस कल्याणकारिणी पालकीको उठाया और उसके बाद इन्द्र आदि उत्तमोत्तम देव उसे बड़े हर्षसे आकाशमें ले गये ॥ ११० ॥ उस समय आकाशमें तो अत्यधिक आनन्दसे देवोंके द्वारा किया हुआ वह शब्द व्याप्त हो रहा था जो श्रीहीन मनुष्योंके लिए हितकारी नहीं था और नीचे पृथिवीपर दुःखसे पीड़ित भोजवंशके लोगोंका जोरदार करुणक्रन्दन मुखसे रुदन करने वाले जगत्के जीवोंके कर्ण-विवरको व्याप्त कर रहा था ॥१११॥ जिनके शरीरको देवोंका समूह नमस्कार कर रहा था तथा जो निबिडताको प्राप्त हुए शान्त रसके समान जान पड़ते थे ऐसे उन भगवान् नेमिनाथके सम्मुख, जिस प्रकार जलके सरोवरके निकट मयूर और सारस नृत्य करते हैं उसी प्रकार अप्सराओंका समूह नाना रसोंको प्रकट करता हुआ बड़ी शीघ्रतासे नृत्य कर रहा था ॥ ११२ ॥ इस प्रकार जो पापोंकी सेनाको जीत रहे थे वे जिनेन्द्र भगवान् कमलके समान कान्तिकी धारक हितकारी देवसेनाके साथ सुमेरु पर्वतके

१. कुर्वभिधातकं म० । २. उत्कटहर्षेण । ३. शब्दः । ४. कृतः । ५. विगतं हितं यस्मात् सः । ६. अश्रियां श्रीरहितानां भाग्यहीनानामित्यर्थः । ७. व्यथितभो म०, ख०, ग०, घ०; व्यथितवो क०, व्यथितवो जगतो म० । ८. जगतः म० । ९. सुराङ्गनाः । १०. झटिति । ११. सशिखमाप्सरसः म०, शिखिभिः सदृशं यथा स्यात्तथा सशिखि मयूरसदृशम् । १२. अप्सिरूपजलान्वितं सरः साप्सरः तस्य । १३. सार्धम् । १४. सारसैः जलपक्षिभिः । १५. यमभि यत्संमुखम् । १६. अमरसङ्घेन नतं अङ्गं यस्य तस्य भावः अमरसङ्गनताङ्गता, तया सहितः तम् । १७. घनतां निबिडतां गतं प्राप्तं शान्तरसमिव ।

[1]गिरिमितः सहितामरसेनया जिनवरः स हि तामरसेन यः ।
समरुचिर्गिरिराड्रुगमूर्जयन्त इति योऽस्ति हि पापचमूर्जयन् ॥११३॥

रविनिशाकरयोरुभया[2]न्तयोर्विचरतोस्तिमिरोरुभयान्तयोः ।
दिवि न यत्र महात्मनिदर्शनं किमिह तुङ्गतयास्य निदर्शनम् ॥११४॥

मुखरनि[3]र्झरपातपतत्त्रिभिर्मुखरसप्रदचूतलताफलैः ।
कुसुमनिर्भरपा[4]दपजातिभिः कुसुमनोरहितोऽतिविराजते ॥११५॥

[5]मणिसुवर्णसुवर्णधराधरे विविधधातुरसौघधराधरे ।
शिखररञ्जितकिन्नरदेवके वनभुवा हृतधीनरदेवके ॥११६॥

उपवने [6]वृजिने शिविकामतः सुमतमाप्य जिनेशिशिविकामतः[7] ।
द्रवति यद्रहितो [8]हरिणा हरिः[9] स निदधे सहितो हरिणा[10] हरिः[11] ॥११७॥

समान कान्तिवाले गिरनार पर्वतपर पहुँचे ॥११३॥ जिस पर्वतपर रात्रि और दिनके अन्तमें अर्थात् प्रातःकाल और सायंकालके समय आकाशमें विचरनेवाले एवं अन्धकारसे होनेवाले विशाल भयका अन्त करनेवाले सूर्य और चन्द्रमाके महान् स्वरूपका दर्शन नहीं हो पाता उस गिरनार पर्वतका यहाँ ऊँचाईमें उदाहरण ही क्या हो सकता है ? अर्थात् कुछ भी नहीं। भावार्थ—यह पर्वत इतना ऊँचा है कि उसपर प्रातःकाल और सायंकालके समय सूर्य और चन्द्रमाका दर्शन ही नहीं हो पाता। वह गिरनार पर्वत कुत्सित फूलोंसे रहित था, और शब्दायमान किरणोंके गिरनेके स्थानमें उड़नेवाले पक्षियों, मुखमें मधुर रसको देनेवाले आम्रलताके फलों एवं फूलोंसे लदे नाना प्रकारके वृक्षोंसे अत्यन्त सुशोभित हो रहा था ॥ ११५ ॥ तदनन्तर जो मणियों और सुवर्णके कारण सुमेरु गिरिके समान जान पड़ता था, जो नाना प्रकारकी धातुओंके रसके समूहसे उपलक्षित भूमिको धारण कर रहा था, जो अपनी शिखरोंसे किन्नर देवोंको अनुरक्त कर रहा था, और जो वनकी वसुधासे मनुष्य तथा देवोंकी बुद्धिको हरण कर रहा था ऐसे गिरनार पर्वतके उस निष्कलङ्क उपवनमें जिसमें कि वानरसे रहित एकाकी सिंह विचरण करता था विष्णु–कृष्णसहित इन्द्रने वीतराग जिनेन्द्रकी

---

१. हि यः पापचमूः पापसेनाः जयन् स हि जिनवरः, या तामरसेन कमलेन समरुचिः सदृशकान्तिः तया, सहितामरसेनया हितेन सहिता सहिता सा चासौ अमरसेना च तया सार्धं गिरिराड्रुचं गिरिराड् मेरुस्तस्य रुगिव रुग्यस्य तं, ऊर्जयन्त इति प्रसिद्धगिरिम् इतः प्राप्तः। २. उभयान्तयोः–उभयोर्निशादिवसयोरन्तयोः। दिवि विचरतोः, तिमिरात् अन्धकारात् यद् उरु विपुलं भयं तस्य अन्तो विनाशो याभ्यां तयोः रविनिशाकरयोः यत्र गिरौ महात्मदर्शनं न विद्यते अस्य गिरेः तुङ्गतया किं निदर्शनं किमुदाहरणम्। ३. निर्झर—म०। ४. कुत्सितपुष्परहितो यो गिरिः मुखरेषु निर्झरपातेषु विद्यमाना पतत्त्रिणः तैः मुखे प्रारम्भे रसप्रदानि यानि चूतलताफलानि तैः, कुसुमानि च, निर्झराश्च, पादपजातयश्च तैः, अतिविराजते नितरां शोभते। ५. मणिभिः सुवर्णैश्च सुवर्णधराधरः यः सुमेरुपर्वतस्तस्मिन्, विविधधातुरसौघेन नानाधातुरससमूहेनोपलक्षिता या धरा तस्या धरः तस्मिन्, शिखरैः रञ्जिताः किन्नरदेवा यस्मिन् तस्मिन्, वनभुवा, कान्तारभूम्या हृतधियः वशीभूता नरदेवा यस्मिन् तस्मिन्। ६. निष्पापे। ७. जिनेशी चासौ शिवामरश्च तस्मात्। ८. मर्कटेन रहितः। ९. सिंहः। १०. विष्णुना। ११. इन्द्रः।

इह जहौ [1]वसुधाशिबिकासनं [2]पृथुतपोऽभि [3]सुधाशितिविकासनम् ।
नमिसमः स [4]शिलातलमाययावपगमाय [5]इलातलमायया ॥११८॥
[6]स्रजमितोऽथ [7]सवस्त्रमलङ्कृतीरपगमय्य सवस्त्रमलङ्कृती ।
प्रविलसत्कमलासनधीरतः प्रियवधूकमलासनधीरतः ॥११९॥
[8]मृदुकराङ्गुलिभीरुचिरासितान्[9] घनकचानतिभीरुचिरासितान्[10] ।
न्युदहरद्दृढपञ्चपरिग्रहैः स रहितः सकृपं च परिग्रहैः ॥१२०॥
[11]नृपसहस्रममा नमिना तपः श्रितमिवैनममानमिनातपः ।
तपति नातपवारणवारितः [12]प्रपतदातपवारणवारितः ॥१२१॥
निकचितां कचसम्पदमात्मना प्रकुटिलां गतकोपदमात्मना[13] ।
व्यपनयन्निव शल्यपरम्परां नृपगणः श्रियमैत् स्वपरम्पराम् ॥१२२॥

सम्मति पाकर वह पालकी रख दी ॥११६-११७॥ उस उपवनमें पहुँचकर भगवान्ने विशाल तप धारण करनेके उद्देश्यसे देवोंको हर्षित करनेवाले पृथ्वीपर विद्यमान पालकी रूपी आसनको छोड़ दिया और स्वयं पृथ्वीतलकी मायाका परित्याग करनेके लिए नमिनाथ भगवान्के समान शिलातलपर जा पहुँचे ॥११८॥ तदनन्तर जो अतिशय बुद्धिमान् थे, जिनकी पद्मासन और धीरता अत्यन्त शोभायमान थी तथा जो प्रियकी, एवं राज्यलक्ष्मीके त्यागकी बुद्धिमें रत-लीन थे ऐसे भगवान् नेमिनाथने परदाके अन्दर माला, वस्त्र और सब अलंकार उतारकर परिग्रहसे रहित तथा दयासे युक्त होकर कोमल अङ्गुलियोंसे युक्त सुदृढ़ पञ्चमुष्टियोंसे उन सघन केशोंको तत्काल उखाड़कर फेंक दिया जो अत्यन्त सुन्दर और काले थे एवं अतिशय भीरु मनुष्य ही अपने शरीरमें जिनका चिरकाल तक स्थान बनाये रखते हैं ॥११९-१२०॥ भगवान् नेमिनाथने जिस तपको धारण किया था उसी तपको एक हजार राजाओंने भी भगवान् नमिनाथके साथ धारण किया था उस समय मानरहित भगवान्को सूर्यका आताप सन्तप्त नहीं कर सका था क्योंकि इन्द्रके द्वारा लगाये हुए छत्रसे वह रुक गया था अथवा छत्ररूपी जल वहाँ पड़ रहा था उसके प्रभावसे सूर्यजन्य आताप उन्हें दुखी करनेमें समर्थ नहीं हो सका था ॥१२१॥ उस समय क्रोधरहित इन्द्रिय-दमनसे युक्त अपने आपके द्वारा शिरपर बद्ध कुटिल केशोंको उखाड़ता हुआ राजाओंका समूह ऐसा सुशोभित हो रहा था मानो चिरकालसे साथ लगी हुई कुटिल शल्योंकी परम्पराको ही उखाड़कर फेंक

---

१. वसुधायां विद्यमानं यत् शिबिकारूपं आसनं तत् । २. विशालतपःसम्मुखम् । ३. देवहर्षकम् । ४. शिलातलम् आययौ इति पदच्छेदः । ५. इलातले या माया तया सह । ६. स्रजमितोऽथ म० । ७. अथ अलम् अत्यर्थं कृती पण्डितः स इनः स्वामी, सवस्त्रं यथा स्यात्तथा वस्त्रस्य नेपथ्यमध्ये इत्यर्थः । स्रजं वस्त्रं अलंकृतीः अलङ्कारांश्च अपगमय्य त्यक्त्वा कथंभूतः इनः ? कमलासनं च धीरता च इति कमलासनधीरते प्रविलसन्त्यौ कमलासनधीरते यस्य सः, प्रियवधूश्च कमला च लक्ष्मीश्च तयोः, असनस्य त्यागस्य धियां रतः तत्परः । ८. मृदवः कराङ्गुल्यो येषु तैः, दृढपञ्चपरिग्रहैः दृढपञ्चमुष्टिभिः । ९. रुचिरा मनोहराः असिताः कृष्णाश्च ये तान् । १०. अति भीरुषु चिरं आसितं स्थानं येषां तान्, घनकचान् सान्द्रकेशान् । ११. नमिनाथेन इव अनेन नेमिनाथेन अमा सह नृपसहस्रं तपः श्रितम् । अमानं मानरहितं एनम् जिनम् इनातपः सूर्यघर्मः न तपति स्म । आतपवारणेन छत्रेण वारितः सन् । १२. आतप-वारणं च तद् वारि च इत्यातपवारणवारि प्रपतच्च तत् आतपवारणवारि च तस्मात् । १३. गतः कोपो यस्मिन् एवंभूतो यो दमः इन्द्रियवशीकारः स आत्मा स्वरूपं यस्य तेन, एवंभूतेन आत्मना शल्यपरम्परामिव; निकचितां निबद्धां कुटिलां वक्रां कचसम्पदं व्यपनयन् दूरीकुर्वन्, नृपगणः स्वपरम्परां श्रियं ऐत् प्रापत् ।

मणिमयांशुकलापककीकृतान् [1]जिनकचान् कुलिशी[2] कलशीकृतान्[3] ।
अकृत दुग्धमये स[4] महोदधौ[5] वपुरकं समये [6]समहो दधौ ॥१२३॥

[7]समवतारमिनोऽखिलकृपावनं स्वकृत वस्त्रमयस्य सुपावनम् ।
सपदि यत्र तदत्र यथाश्रुतं जगति तीर्थमभूत् यथाश्रुतम् ॥१२४॥

यतिषु [8]बोधचतुष्कविराजितत्रिदशकोटिमहाकविराजितः ।
विधुरिवोरुगणग्रहतारकः प्रभुरभादपरिग्रहतारकः[9] ॥१२५॥

[10]नभसि शुक्लतुरीयतया तिथौ क्रमभृतीशिनि षष्ठतयातिथौ ।
विहितनिष्क्रमणे नृसुरासुराः सुविदधुर्महमेषु सुरासुराः ॥१२६॥

मदनभङ्गकृतप्रभवे भवे भयभृतां शरणाय हितेहिते ।
हतरुषे वितृषे सुनये नये स्थितवते नम इत्यसुराः सुराः ॥१२७॥

स्तवनपूर्वममी च समन्ततः प्रणतिमेत्य नृपाश्च समं ततः ।
[11]स्वहृदयस्थतपःस्थितनेमयः स्वपदमीयुररिस्थितनेमयः[12] ॥१२८॥

रहा हो ॥१२२॥ इन्द्रने भगवान्‌के केशोंको इकट्ठाकर मणिसमूहकी किरणोंसे सुशोभित पिटारेमें रखकर उन्हें क्षीरसागरमें क्षेप दिया। उस समय भगवान् अतिशय तेजसे युक्त शरीर धारण कर रहे थे ॥१२३॥ भगवान् नेमिनाथने जिस स्थानपर जीवदयाकी रक्षा करनेवाला, एवं अत्यन्त पवित्र, वस्त्ररूप परिग्रहका त्याग किया था वह शीघ्र ही संसारमें शास्त्र-सम्मत प्रसिद्ध तीर्थस्थान बन गया ॥१२४॥ उस समय चार ज्ञानसे सुशोभित, करोड़ों देव-रूपी महाकवियोंसे विभूषित और परिग्रहरहित मनुष्योंको संसारसे तारनेवाले भगवान् अनेक मुनियोंके बीच, ग्रहों और ताराओंके मध्यमें स्थित चन्द्रमाके समान सुशोभित हो रहे थे ॥१२५॥ अतिथि भगवान्‌ने सावन सुदी चौथके दिन बेलाका नियम लेकर दीक्षा धारण की थी इसलिए उसदिन अनेक उत्तम वस्तुओंका त्याग करनेवाला मनुष्य देव तथा असुरोंने दीक्षा कल्याणकका उत्सव किया था ॥१२६॥ तदनन्तर सुर और असुर भगवान्‌की इस प्रकार स्तुति करने लगे—हे भगवन्! आप कामदेवका पराजय करनेमें समर्थ हैं, हितकारी चेष्टाओंसे युक्त संसारी प्राणियोंके शरणभूत हैं—रक्षक हैं, क्रोधसे रहित हैं, तृष्णासे रहित हैं, उत्तम नयमें स्थित हैं—नयका पालन करनेवाले हैं और मुनि हैं मनन-शील हैं अतः आपको नमस्कार हो। इस प्रकार साथ-साथ स्तुतिकर तथा सब ओरसे नमस्कारकर अपने हृदयोंमें तपस्वी नेमिनाथ भगवान्‌को धारण करनेवाले एवं चक्रमें स्थित नेमि—चक्रधाराके समान प्रवर्तक राजा तथा सुर-असुर अपने-अपने स्थानपर चले गये ॥१२७-१२८॥

१. जिनकचा म० । २. इन्द्रः । ३. पुञ्जीकृतान् । ४. इन्द्रः । ५. दुग्धमये महोदधौ क्षीरसागरे । ६. तस्मिन् समये जिनः, अकमत्यन्तं समहः तेजोयुक्तं वपुः दधौ । ७. स इनः भगवान् अखिलकृपावनं अखिलु या कृपा तस्या अवनं रक्षकं सुपावनं अतिशयपावित्र्यकारणम्, वस्त्रमयस्य वस्त्रादिपरिग्रहस्य, समवतारं त्यागं सपदि, यत्र स्वकृत सुष्ठु अकृत कृतवान्, यथाश्रुतं शास्त्रानुसारं तीर्थमभूत् । ८. मतिषु म० । ९. अपरि-ग्रहाणां तारकः अपरिग्रहतारकः । १०. श्रावणे मासे प्रतिपदादिक्रमयाशुक्लपक्षस्य चतुर्थ्यां तिथौ, अतिथौ ईशिनि नेमिनाथे षष्ठतया दिनद्वयोपवासेन, विहितनिष्क्रमणे कृतत्यागमहे सति नृसुरासुराः महम् उत्सवं सुविदधुः, सुरासु शोभनद्रव्येषु, राः रान्तीति राः दातारः । ११. स्वहृदयस्थः तपःस्थितो नेमिः नेमिजिनेन्द्रः येषां ते । १२. अरि चक्रं तस्मिन् विषये स्थितनेमयः स्थितचक्रधाराः इत्यर्थः एवंभूताः नृपाः स्वपदम् ईयुः ।

पुरि विशति तु तत्र जिनाय ताः सुपरमान्नमथाघजिनाय[1] ताः ।
प्रवरदत्त इतो महिमा हिताः सुरगणैः सुमहामहिमाहिताः ॥१२९॥
पथि तपस्यति तत्र कृते हिते नृपसुता मनसि त्रपितेहिते ।
न्यभृत तापमपारवियोगिनी कुमुदिनीव दिवारवियोगिनी ॥१३०॥
प्रबलशोकवशा प्रविलापिनी शिथिलभूषणकेशकलापिनी ।
परिजनेन वृता प्ररुरोद सा करुणशब्दतता[2] व्युरुरोदसा ॥१३१॥
विधिमुपालभते वरहारिणं[3] वरवधूर्वरमप्यतिहारिणम्[4] ।
जघनपीनपयोधरहारिणी[5] नयनवारिकणाविलहारिणी[6] ॥१३२॥
शमितशोकभरा वचनैर्हितैर्गुरुजनस्य [7]तपोवचनैर्हि तैः[8] ।
मतिमधत्त तपस्यनपायिनि[9] प्रशमसौख्यतपस्यनपायिनि[10] ॥१३३॥

शालिनी-छन्दः

[11]राजीमत्याश्चारुराजीवलक्ष्मी-राजीमत्याः पाणिपादस्य कान्त्या ।
तापस्यान्तं ज्ञातयोऽवेत्य[12] वृत्तं तापस्यान्तं मानसस्यापुरन्ते ॥१३४॥
स्त्रीणामाद्यं पारतन्त्र्यं [13]विदुःखं दौर्लभ्येऽमूर्भर्तुरङ्गं[14] विदुः खम् ॥

तदनन्तर जब पापरहित भगवान् आहार लेनेके लिए द्वारिकापुरीमें आये तब उत्तम तेजके धारक प्रवरदत्तने उन्हें उत्तम खीरका आहार देकर देवसमूहके द्वारा महिमासे युक्त, हितकारी अद्भुत महिमा—प्रतिष्ठा प्राप्त की ॥१२९॥ जब भगवान् नेमिनाथ किये हुए उस हितकारी मार्गमें तपस्या करने लगे तब अपार वियोगसे युक्त राजपुत्री राजीमती अपने लज्जापूर्ण चेष्टासे युक्त मनमें दिनके समय सूर्यके संयोगसे सहित कुमुदिनीके समान सन्तापको धारण करने लगी ॥१३०॥ राजीमती, प्रबल शोकके वशीभूत थी, निरन्तर विलाप करती रहती थी, उसके आभूषण और केशोंका समूह शिथिल हो गया था तथा वह करुण शब्दोंसे आकाश और पृथ्वीके विशाल अन्तरालको व्याप्त करनेवाले परिजनोंसे घिरकर अत्यधिक रोती रहती थी ॥१३१॥ नितम्ब और स्थूल स्तनोंसे सुन्दर तथा अश्रुकणोंसे व्याप्त हारको धारण करनेवाली वह राजीमती कभी तो वरको हरनेवाले अपने दुर्दैवको उलाहना देती थी और कभी अत्यन्त मनोहर वरको दोष देती थी ॥१३२॥ तदनन्तर तप धारण करनेकी प्रेरणा देनेवाले गुरुजनोंके उन हितकारी वचनोंसे जब उसके शोकका भार शान्त हो गया तब उसने अपाय-बाधासे रहित, शान्तिरूप सुखके दायक, एवं दुर्भाग्यको दूर करनेवाले तपमें बुद्धि लगायी—तप धारण करनेका विचार किया ॥१३३॥ हाथों और पाँवोंकी कान्तिसे सुन्दर कमल सम्बन्धी शोभाके समूहको धारण करनेवाली राजीमतीने जो वृत्त—चारित्र धारण किया है वह उसके ताप—दुःखको अन्त करनेवाला है ऐसा जानकर अन्तमें उसके कुटुम्बीजन मानसिक सन्तापके अन्तको प्राप्त हुए ॥१३४॥ गौतम स्वामी कहते हैं कि ये स्त्रियाँ नाना दुःख

---

१. अघजिनाय पापरहिताय ताः इति महिमाशब्दस्य विशेषणम् अत्र आकारान्तमहिमाशब्दः प्रयुक्तः । २. करुणशब्देन तते अतिशयेन व्याप्ते अतीव उरू रोदसी द्यावाभूमी येन स तेन, परिजनेन । ३. वरं हरतीति वरहारी तं विधिम् इत्यस्य विशेषणम् । ४. अतिमनोहरम् । ५. नितम्बस्थूलकुचमनोहरा । ६. नयनवारिकणैः आविलो मलिनो हारो विद्यते यस्याः सा । ७. तपसि विषये वचनं भणनं येषां तैः, तपःप्रेरणादायिभिः । ८. हि निश्चयेन तैः प्रसिद्धैः । ९. स्थायिनि । १०. अपकृष्टः अयो भाग्यं अपायः, न विद्यतेऽपायो यस्मिन् तस्मिन् । ११. चारु राजीवस्य सुन्दरसरोरुहस्य लक्ष्मीराजी शोभापङ्क्तिः विद्यते यस्याः तस्याः । १२. ज्ञात्वा । १३. विविधं दुःखं विदुःखम् । १४. भर्तुरङ्गे क०, अमूः स्त्रियः भर्तुः दौर्लभ्ये सति अङ्गं स्वकीयं शरीरं खं शून्यं व्यर्थमिति यावत् विदुः जानन्ति ।

सापत्न्यं वा पुष्पवत्त्वं च वान्ध्यं[1] वैधव्ये वा सूतिरोगेऽपि [2]वान्ध्यम् ॥१३५॥
दौर्भाग्ये वा भाग्यहीने [3]स्वनाथे स्त्रीगर्भत्वे [4]भर्त्रपत्ये [5]स्वनाथे ।
गर्भस्रावे गर्भभारे वियोगे [6]जीवद्भर्त्रा मर्मरोगाभियोगे ॥१३६॥
स्यान्मिथ्यात्वं स्त्रीत्वहेतुः स्वतन्त्रं [7]वस्त्रस्येवातानतिर्यक् स्वतन्त्रम् ।
स्त्रीदुःखानामन्तकृद्भव्यसत्त्वैर्जैनी दृष्टिः सेव्यतां सेव्यसत्त्वैः ॥१३७॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्निष्क्रमणकल्याणवर्णनो नाम पञ्चपञ्चाशः सर्गः ॥५५॥

उठाती हैं। सबसे पहिले तो इन्हें परतन्त्रताका विशिष्ट दुःख है, फिर पतिके दुर्लभ होनेपर शरीरको शून्य-व्यर्थ समझती हैं। फिर सपत्नीके होनेका ऋतुमती होनेका, वन्ध्या होनेका, विधवा होनेका, प्रसूतिकालमें रोग हो जानेका, अन्धा होनेका, दौर्भाग्य होनेका, भाग्यहीन पतिके मिलनेका, लड़की-लड़की ही, गर्भमें आनेका बार-बार मृत सन्तानके होनेका, बिलकुल अनाथ हो जानेका, गर्भ गिर जानेका, गर्भका भार धारण करनेका, पतिके जीवित रहते हुए भी उसके साथ वियोग होनेका, अथवा किसी मर्मान्तक रोगके हो जानेका दुःख सहन करती है ॥१३५–१३६॥ जिस प्रकार आतान-वितानभूत तन्तु वस्त्रके स्वतन्त्र कारण हैं, उसी प्रकार मिथ्यादर्शन स्त्रीपर्यायका स्वतन्त्र कारण है, इसलिए सेवनीय शक्तिके धारक भव्य-जीवोंको स्त्री-सम्बन्धी दुःखोंका अन्त करनेवाले सम्यग्दर्शनकी सेवा करनी चाहिए ॥१३७॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्यरचित हरिवंशपुराणमें भगवान्‌के दीक्षा-कल्याणका वर्णन करनेवाला पचपनवाँ सर्ग समाप्त हुआ ॥५५॥

१. वन्ध्यायाः भावो वान्ध्यम्। २. आ अथवा आन्ध्याया भावः आन्ध्यम्। ३. स्वभर्तरि। ४. भर्तुः अस्वाधीनम् अपत्यं तस्मिन्। ५. सुष्ठु अनाथः तस्मिन् स्वनाथे सति। ६. जीवंश्चासौ भर्ता च जीवद्भर्ता तेन। ७. वस्त्रस्य यथा आतानभूताः तिर्यग्भूताश्च ये तन्तवः ते स्वतन्त्रं कारणं भवन्ति तथा मिथ्यात्वं स्त्रीत्वस्य स्वतन्त्रं कारणमस्तीत्यर्थः।

षट्पञ्चाशः सर्गः

अथ नेमिमुनीन्द्रोऽपि रत्नत्रयतपःश्रिया । व्रतगुप्तिसमित्युच्चै रेजे सोढपरीषहः ॥१॥
अप्रशस्तमपोह्यासावार्तं रौद्रं[1] च शुद्धधीः । ध्यानं धर्म्यं च शुक्लं च प्रशस्तं ध्यातुमुद्यतः ॥२॥
[2]ध्यानमेकाग्रचिन्ताया घनसंहननस्य हि । निरोधोऽन्तर्मुहूर्तं स्याच्चिन्ता स्यादस्थिरं मनः ॥३॥
ऋतार्तिरर्दनं बाधा आर्तं तत्रभवं पुनः । सुकृष्णनीलकापोतलेश्याबलसमुद्भवम् ॥४॥
लक्षणं द्विविधं तस्य बाह्यमाक्रन्दनादिकम् । परश्रीविस्मयप्रायं[3] विषयासंजनादिकम् ॥५॥
तदात्मनः स्ववेद्यं तत् परेषामानुमानिकम् । आभ्यन्तरं चतुर्भेदं स्वलक्षणसमन्वितम् ॥६॥
विषयस्यामनोज्ञस्य यदनुत्पत्तिचिन्तनम् । उत्पन्नस्य वियोगाय संकल्पाध्यवसायकम् ॥७॥
मनोज्ञविप्रयोगस्य [4]यत्नानुत्पत्तिचिन्तनम् । उत्पन्नस्यान्तचिन्ता च चातुर्विध्यमितीरितम् ॥८॥
तत्रामनोज्ञदुः[5]खस्य साधनं चेतनादिकम् । मर्त्यादि विषशस्त्रादि बाह्यमेतदुदीरितम् ॥९॥
आध्यात्मिकं तु वातादिप्रकोपजमनेकधा । कुक्ष्यक्षिदन्तशूलादिशारीरमतिदुस्सहम् ॥१०॥
शोकारतिभयोद्वेगविषादविषदूषितम् । जुगुप्सादौर्मनस्यादि मानसं दुःखसाधनम् ॥११॥
सर्वस्यास्यामनोज्ञस्य माभूदुत्पत्तिरित्यलम् । चिन्ताप्रबन्ध आद्यं स्यादार्तध्यानं मलाविलम् ॥१२॥

अथानन्तर—व्रत गुप्ति और समितियोंसे उत्कृष्टताको प्राप्त एवं परीषहोंको सहन करनेवाले मुनिराज नेमिनाथ रत्नत्रय और तपरूपी लक्ष्मीसे सुशोभित होने लगे ॥ १ ॥ उज्ज्वल बुद्धिके धारक भगवान्, आर्त्त और रौद्र नामक अप्रशस्त ध्यानको छोड़कर धर्म्यध्यान और शुक्लध्यान नामक प्रशस्त ध्यानोंका ध्यान करनेके लिए उद्यत हुए ॥ २ ॥ उत्तमसंहननके धारक पुरुषको चिन्ताका किसी एक पदार्थमें अन्तर्मुहूर्तके लिए रुक जाना सो ध्यान है और चिन्ताका अर्थ चञ्चल मन है ॥ ३ ॥ पीड़ाको आर्ति कहते हैं। आर्तिके समय जो ध्यान होता है उसे आर्तध्यान कहते हैं। यह आर्तध्यान अत्यन्त कृष्ण, नील और कापोत लेश्याके बलसे उत्पन्न होता है ॥ ४ ॥ बाह्य और आभ्यन्तरके भेदसे आर्तध्यान दो प्रकारका है। उनमें रोना आदि तथा दूसरेकी लक्ष्मी देख कर आश्चर्य करना और विषयोंमें आसक्त होना आदि बाह्य आर्तध्यान है ॥ ५ ॥ अपने-आपका आर्तध्यान स्वसंवेदनसे जाना जाता है और दूसरोंका अनुमानसे। आभ्यन्तर आर्तध्यानके चार भेद हैं जो नीचे लिखे अनुसार अपने-अपने लक्षणोंसे सहित हैं ॥ ६ ॥ अनिष्ट वस्तुकी उत्पत्ति न हो ऐसा चिन्तवन करना सो पहला आर्तध्यान है। यदि अनिष्ट वस्तु उत्पन्न हो चुकी है तो उसके वियोगका बार-बार चिन्तवन करना दूसरा आर्तध्यान है। इष्ट विषयका कभी वियोग न हो ऐसा चिन्तवन करना सो तीसरा आर्तध्यान है और इष्ट विषयका यदि वियोग हो गया है तो उसके अन्तका विचार करना यह चौथा आर्तध्यान है ॥ ७–८ ॥ अमनोज्ञ दुःखके बाह्य साधन चेतन और अचेतनके भेदसे दो प्रकारके हैं। उनमें मनुष्य आदि तो चेतन साधन हैं और विष-शस्त्र आदि अचेतन साधन हैं ॥ ९ ॥ अन्तरङ्ग साधन भी शारीरिक और मानसिकके भेदसे दो प्रकारका है। वात आदिके प्रकोपसे उत्पन्न उदर-शूल, नेत्र-शूल, दन्त-शूल आदि नाना प्रकारकी दुस्सह बीमारियाँ शारीरिक साधन हैं ॥ १० ॥ और शोक, अरति, भय, उद्वेग, विषाद आदि विषसे दूषित जो जुगुप्सा तथा दौर्मनस्य–बेचैनी आदि विकार हैं वे मानसिक दुःखके साधन हैं ॥ ११ ॥ 'सभी प्रकारके अमनोज्ञ—अनिष्ट विषयोंकी उत्पत्ति नहीं हो' इस प्रकार बार-बार चिन्ता करना सो पहला मलिन आर्तध्यान है ॥ १२ ॥

---

१. रौद्रय म० । २. 'उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात्'—त० सू० । ३. विस्मयं प्राप्तं म०, विस्मयप्रायः क० । ४. यथानुत्पत्ति म० । ५. तत्रामनोज्ञस्य दुःखस्य म० ।

उत्पन्नस्यास्य चाभावः कथं मे स्यादितीरणम् । संकल्पाध्यवसानं तु द्वितीयं तत्प्रकीर्तितम् ॥१३॥
पशुपुत्रकलत्रादि मनोज्ञं सुखसाधनम् । बाह्यं स्याद्धनधान्यादि सचेतनमचेतनम् ॥१४॥
आध्यात्मिकं च पित्तादि साम्यादारोग्यमाङ्गिकम् । मानसं सौमनस्यादि रत्यशोकाभयादिकम् ॥१५॥
विप्रयोगश्च मे माभूदैहिकामुत्रिकस्य तु । मनोज्ञस्येति संकल्पस्तृतीयं चार्तमुच्यते ॥१६॥
मनोज्ञविप्रयोगस्य पूर्वोत्पन्नस्य वस्तुनः । अभावेऽध्यवसानं तु तुर्यमार्तमनोज्ञजम् ॥१७॥
अधिष्ठानं प्रमादोऽस्य तिर्यग्गतिफलस्य हि । [1]परोक्षं मिश्रको भावः षड्गुणस्थानभूमिकम् ॥१८॥
रुद्रः क्रूराशयः प्राणी रौद्रं तत्रभवं ततः । हिंसासंरक्षणस्तेयमृषानन्दैश्चतुर्विधम् ॥१९॥
आनन्दोऽभिरुचिर्येषां हिंसादिषु यथायथम् । हिंसानन्दादयस्तेऽतो निरुच्यन्ते समासतः ॥२०॥
लक्षणं द्विविधं तत्र पारुष्याक्रोशनादिकम् । स्वसंवेद्यं परैर्मेयं बाह्यमाध्यात्मिकं पुनः ॥२१॥
स्यात्संरम्भसमारम्भारम्भलक्षणमात्मना । हिंसायां रञ्जनं तीव्रं हिंसानन्दं तु नन्दितम् ॥२२॥
श्रद्धेयं परलोकस्य [2]स्वविकल्पितयुक्तिभिः । विप्रलम्भनसङ्कल्पो मृषानन्दं सुनन्दितम् ॥२३॥
प्रतीक्षया प्रमादस्य परस्वहरणं प्रति । प्रसह्य हरणं ध्यानं स्तेयानन्दमुदीरितम् ॥२४॥
स्वपरिग्रहभेदे तु चेतनाचेतनात्मनि । संरक्षणाभिधानं तु स्वस्वामिस्वामिचिन्तनम् ॥२५॥

यदि किसी प्रकारके अमनोज्ञ—अनिष्ट विषयकी उत्पत्ति हो गयी है तो उसका अभाव किस प्रकार होगा ? इसी बातका निरन्तर संकल्प करना दूसरा आर्तध्यान कहा गया है ॥ १३ ॥ मनोज्ञ सुखके बाह्य साधन चेतन-अचेतनके भेदसे दो प्रकारके हैं। उनमें पशु, स्त्री, पुत्र आदि सचेतन साधन हैं और धन-धान्यादि अचेतन साधन हैं ॥ १४ ॥ आभ्यन्तर साधन भी शारीरिक और मानसिकके भेदसे दो प्रकारके हैं। इनमें पित्त आदिकी समतासे जो आरोग्य अवस्था है वह शारीरिक साधन है और रति, अशोक, अभय आदिसे उत्पन्न जो सौमनस्य आदि है वह मानसिक साधन है ॥ १५ ॥ मुझे इस लोक-सम्बन्धी और परलोक-सम्बन्धी इष्ट विषयका वियोग न हो ऐसा संकल्प करना तीसरा आर्तध्यान कहलाता है ॥१६ ॥ और पहले उत्पन्न इष्ट विषयके वियोगके अभावका संकल्प करना—बार-बार चिन्तवन करना चौथा आर्तध्यान है ॥ १७ ॥ इस आर्तध्यानका आधार, प्रमाद है, फल तिर्यञ्च गति है। यह परोक्ष क्षायोपशमिक भाव है और पहलेसे लेकर छठवें गुणस्थान तक पाया जाता है ॥१८॥

क्रूर अभिप्रायवाले जीवको रुद्र कहते हैं। उसके जो ध्यान होता है वह रौद्रध्यान कहलाता है। यह हिंसानन्द, चौर्यानन्द, मृषानन्द और परिग्रहानन्दके भेदसे चार प्रकारका है ॥ १९ ॥ जिनको हिंसा आदिमें आनन्द अर्थात् अभिरुचि होती है वे संक्षेपसे हिंसानन्द आदि कहे जाते हैं ॥ २० ॥ बाह्य और आभ्यन्तरके भेदसे रौद्रध्यानके दो भेद हैं। उनमें क्रूर व्यवहार करना तथा गाली आदि अशिष्ट वचन बकना, बाह्य रौद्रध्यान है। अपने आपमें पाया जानेवाला रौद्रध्यान स्वसंवेदनसे जाना जाता है—स्वयं ही अनुभवमें आ जाता है और दूसरेमें पाया जानेवाला रौद्रध्यान अनुमानसे जाना जाता है। हिंसा आदि कार्योंमें जो संरम्भ, समारम्भ और आरम्भ रूपी प्रवृत्ति है वह आभ्यन्तर आर्तध्यान है। इसके हिंसानन्द आदि चार भेद हैं जिनके लक्षण इस प्रकार हैं। हिंसामें तीव्र आनन्द मानना सो हिंसानन्द नामक पहला रौद्रध्यान है ॥ २१-२२ ॥ श्रद्धान करने योग्य पदार्थोंके विषयमें अपनी कल्पित युक्तियोंसे दूसरोंको ठगनेका संकल्प करना मृषानन्द नामका दूसरा रौद्र आर्तध्यान है ॥ २३ ॥ प्रमादपूर्वक दूसरेके धनको जबरदस्ती हरनेका अभिप्राय रखना सो स्तेयानन्द नामका तीसरा रौद्रध्यान कहा गया है ॥ २४ ॥ और चेतन, अचेतन दोनों प्रकारके परिग्रहकी रक्षाका निरन्तर अभिप्राय रखना तथा मैं इसका स्वामी हूँ और यह मेरा स्व है इस

१. परोक्षमिश्रको भावः क० । २. सविकल्पित म० ।

सुकृष्णनीलकापोतबलाधानं प्रमादवत्। अधःपञ्चगुणस्थानं रौद्रध्यानचतुष्टयम् ॥२६॥
अन्तर्मुहूर्तकालं तु दुर्धरत्वात्ततः परम्। क्षयोपशमभावस्तु परोक्षज्ञानभावतः ॥२७॥
भावलेश्याकषायत्वात्तत्स्यादौदयिकोऽपि वा। उत्तरं फलमेतस्य नारकी गतिरुच्यते ॥२८॥
परिहृत्यार्तरौद्रे द्वे पापध्याने मुमुक्षवः। धर्म्यशुक्लधियः सन्तु शुद्धभिक्षादिभिक्षवः ॥२९॥
एकान्तं प्रासुकं क्षेत्रं क्षुद्रोपद्रववर्जितम्। दिव्यं संहननं द्रव्यं कालोऽत्युष्णादिवर्जितः ॥३०॥
भावशुद्धिरपि श्रेष्ठा यदा भवति योगिनः। आरभेत तदा ध्यानं सर्वद्वन्द्वसहः स हि ॥३१॥
गम्भीरः स्तम्भमूर्तिः सन् पर्यङ्कासनबन्धनः। नात्युन्मीलनिमीलाक्षो दत्तदन्ताग्रदन्तकः ॥३२॥
निवृत्तकरणग्रामव्यापारः श्रुतपारगः। मन्दं मन्दं प्रवृत्तान्तःप्राणापानादिसञ्चरः ॥३३॥
नाभेरूर्ध्वं मनोवृत्तिं मूर्ध्नि वा हृदि [1]भालिके। मुमुक्षुः प्रणिधायाक्षं ध्यायेद्ध्यानद्वयं हितम् ॥३४॥
बाह्याध्यात्मिकभावानां याथात्म्यं धर्म उच्यते। तद्धर्मादनपेतं यद्धर्म्यं तद्ध्यानमुच्यते ॥३५॥
लक्षणं द्विविधं तस्य बाह्याध्यात्मिकभेदतः। सूत्रार्थमार्गणं शीलं गुणमालानुरागिता ॥३६॥
[2]जृम्भाजृम्भाक्षुतोद्गारप्राणापानादिमन्दता। निभृताङ्गव्रतात्मत्वं तत्र बाह्यं प्रकीर्तितम् ॥३७॥
दशधाऽऽध्यात्मिकं धर्म्यमपायविचयादिकम्। अपायो रहो विचयो मीमांसाऽस्तीति तत्तथा ॥३८॥

प्रकार बार-बार चिन्तवन करना सो परिग्रह संरक्षणानन्द नामका चौथा रौद्रमें चारों प्रकारका ध्यान है ॥ २५ ॥ यह रौद्रध्यान तीव्र कृष्ण, नील तथा कापोत लेश्याके बलसे होता है, प्रमादसे सम्बन्ध रखता है और नीचेके पाँच गुण स्थानोंमें होता है ॥ २६ ॥ इसका काल अन्तर्मुहूर्त है क्योंकि इससे अधिक एक पदार्थमें उपयोगका स्थिर होना दुर्धर है। यह परोक्ष ज्ञानसे होता है अतः क्षयोपशमभाव रूप है ॥ २७ ॥ भावलेश्या और कषायके आधीन होता है इसलिए औदायिकभाव रूप भी है। इस ध्यानका उत्तर फल नरकगति है ॥ २८ ॥ जो पुरुष मोक्षाभिलाषी हैं वे आर्त्तरौद्र नामक दोनों अशुभ ध्यानोंको छोड़ शुद्ध भिक्षाको ग्रहण करनेवाले भिक्षु-मुनि होकर धर्मध्यान और शुक्लध्यानमें अपनी बुद्धि लगावें ॥ २२ ॥ जिस समय एकान्त, प्रासुक तथा क्षुद्र जीवोंके उपद्रवसे रहित क्षेत्र, दिव्य संहनन—आदिके तीन संहनन रूप द्रव्य, उष्णता आदिकी बाधासे रहित काल और निर्मल अभिप्राय रूप श्रेष्ठभाव, इस प्रकार क्षेत्रादि चतुष्टय रूप सामग्री मुनिको उपलब्ध होती है तब समस्त बाधाओंको सहन करनेवाला मुनि प्रशस्त ध्यानका आरम्भ करता है ॥३०–३१॥ ध्यान करनेवाला पुरुष, गम्भीर, निश्चल शरीर और सुखद पर्यङ्कासनसे युक्त होता है। उसके नेत्र न तो अत्यन्त खुले होते हैं और न बन्द ही रहते हैं ॥ ३२ ॥ नीचेके दाँतोंके अग्रभागपर उसके ऊपरके दाँत स्थित रहते हैं, वह इन्द्रियोंके समस्त व्यापारसे निवृत्त हो चुकता है, श्रुतका पारगामी होता है, धीरे-धीरे श्वासोच्छ्वासका सञ्चार करता है ॥३३॥ मोक्षका अभिलाषी मनुष्य अपनी मनोवृत्तिको नाभिके ऊपर मस्तकपर, हृदयमें अथवा ललाटमें स्थिरकर आत्माको एकाग्र करता हुआ धर्म्यध्यान और शुक्लध्यान इन दो हितकारी ध्यानोंका चिन्तवन करता है ॥३४॥ बाह्य और आध्यात्मिक भावोंका जो यथार्थभाव है वह धर्म कहलाता है, उस धर्मसे जो सहित है उसे धर्म्यध्यान कहते हैं ॥३५॥ बाह्य और आभ्यन्तरके भेदसे धर्म्यध्यानका लक्षण दो प्रकारका है। शास्त्रके अर्थकी खोज करना, शीलव्रतका पालन करना, गुणोंके समूहमें अनुराग रखना, अंगड़ाई, जमुहाई, छींक, डकार और श्वासोच्छ्वासमें मन्दता होना, शरीरको निश्चल रखना तथा आत्माको व्रतोंसे युक्त करना, यह धर्म्यध्यानका बाह्य लक्षण है। और आभ्यन्तर लक्षण अपाय विचय आदिके भेदसे *दश प्रकारका है। इनमें अपायका अर्थ त्याग है और

---

१. ललाटे वा। भालके म०, ख०। २. भंजाजृम्भा म०, क्षितोद्गार म०, ख०।

* १. अपाय विचय २. उपाय विचय, ३. जीव विचय ४. अजीव विचय ५. विपाक विचय ६. वैराग्य विचय ७. भव विचय ८. संस्थान विचय ९. आज्ञा विचय और १० हेतु विचय····।

संसारहेतवः प्रायस्त्रियोगानां प्रवृत्तयः । अपायो वर्जनं तासां स मे स्यात्कथमित्यलम् ॥३९॥
चिन्ताप्रबन्धसम्बन्धः शुभलेश्यानुरञ्जितः । अपायविचयाख्यं तत्प्रथमं धर्म्यमीप्सितम् ॥४०॥
उपायविचयं तासां पुण्यानामात्मसात्क्रिया । उपायः स कथं मे स्यादिति संकल्पसन्ततिः ॥४१॥
अनादिनिधना जीवा द्रव्यार्थादन्यथान्यथा । असंख्येयप्रदेशास्ते स्वोपयोगस्वलक्षणाः ॥४२॥
अचेतनोपकरणाः स्वकृतोचितभोगिनः । इत्यादिचेतनाध्यानं यज्जीवविचयं हि तत् ॥४३॥
द्रव्याणामप्य[1] जीवानां धर्माधर्मादिसंज्ञिनाम् । स्वभावचिन्तनं धर्म्यमजीवविचयं मतम् ॥४४॥
यच्चतुर्विधबन्धस्य कर्मणोऽष्टविधस्य तु । विपाकचिन्तनं धर्म्यं विपाकविचयं विदुः ॥४५॥
शरीरमशुचिर्भोगा किंपाकफलपाकिनः । विरागबुद्धिरित्यादि विरागविचयं स्मृतम् ॥४६॥
प्रेत्यभावो भवोऽमीषां चतुर्गतिषु देहिनाम् । दुःखात्मेत्यादिचिन्ता तु [2]भवादिविचयं पुनः ॥४७॥
[3]सुप्रतिष्ठितमाकाशमाकाशे वलयत्रयम् । संस्थानध्यानमित्यादि संस्थानविचयं स्थितम् ॥४८॥
अतीन्द्रियेषु भावेषु बन्धमोक्षादिषु स्फुटम् । जिनाज्ञानिश्चयध्यानमाज्ञाविचयमीरितम् ॥४९॥
तर्कानुसारिणः पुंसः स्याद्वादप्रक्रियाश्रयात् । सन्मार्गाश्रयणध्यानं यद्धेतुविचयं तु तत् ॥५०॥
अप्रमत्तगुणस्थानभूमिकं ह्यप्रमादजम् । पीतपद्मल[4] सल्लेश्याबलाधानमिहात्मिकम् ॥५१॥

मीमांसाका अर्थ विचार है ॥ ३६-३८ ॥ मन, वचन और काय इन तीन योगोंकी प्रवृत्ति ही प्रायः संसारका कारण है सो इन प्रवृत्तियोंका मेरे अपाय—त्याग किस प्रकार हो सकता है ? इस प्रकार शुभ लेश्यासे अनुरञ्जित जो चिन्ताका प्रबन्ध है वह अपाय विचय नामका प्रथम धर्म्यध्यान माना गया है ॥३९-४०॥ पुण्यरूप योग प्रवृत्तियोंको अपने आधीन करना उपाय कहलाता है । यह उपाय मेरे किस प्रकार हो सकता है इस प्रकारके संकल्पोंकी जो सन्तति है वह उपाय विचय नामका दूसरा धर्म्यध्यान है ॥४१॥ द्रव्यार्थिक नयसे जीव अनादि निधन हैं—आदि अन्तसे रहित हैं और पर्यायार्थिक नयसे सादि सनिधन हैं । असंख्यात प्रदेशी हैं, अपने उपयोगरूप लक्षणसे सहित हैं, शरीररूप अचेतन उपकरणसे युक्त हैं और अपने-द्वारा किये हुए कर्मके फलको भोगते हैं"'इत्यादि रूपसे जीवका जो ध्यान करना है वह जीव विचय नामका तीसरा धर्म्यध्यान है ॥४२-४३॥ धर्म-अधर्म आदि अजीव द्रव्योंके स्वभावका चिन्तन करना यह अजीव विचय नामका चौथा धर्म्यध्यान है ॥४४॥ ज्ञानावरणादि आठ कर्मोंके प्रकृति प्रदेश स्थिति और अनुभाग रूप चार प्रकारके बन्धोंके विपाक-फलका विचार करना सो विपाक विचय नामका पाँचवाँ धर्म्यध्यान है ॥४५॥ शरीर अपवित्र है और भोग किंपाक फलके समान तदात्व मनोहर हैं इसलिए इनसे विरक्त बुद्धिका होना ही श्रेयस्कर है"'इत्यादि चिन्तन करना सो विराग विचय नामका छठवाँ धर्म्यध्यान है ॥४६॥ चारों गतियोंमें भ्रमण करनेवाले इन जीवोंकी मरनेके बाद जो पर्याय होती है उसे भव कहते हैं । यह भव दुःख रूप है । इस प्रकार चिन्तवन करना सो भव विचय नामका सातवाँ धर्म्यध्यान है ॥४७॥ यह लोकाकाश अलोकाकाशमें स्थित है तथा चारों ओरसे तीन वातवलयोंसे वेष्टित है इत्यादि लोकके संस्थान-आकारका विचार करना सो संस्थान विचय नामका आठवाँ धर्म्यध्यान है ॥४८॥ जो इन्द्रियोंसे दिखायी नहीं देते ऐसे बन्ध मोक्ष आदि पदार्थोंमें जिनेन्द्र भगवान्की आज्ञाके अनुसार निश्चयका ध्यान करना सो आज्ञा विचय नामका नौवाँ धर्म्यध्यान है ॥४९॥ और तर्कका अनुसरण करनेवाले पुरुष स्याद्वादकी प्रक्रियाका आश्रय लेते हुए समीचीन मार्गका आश्रय करते हैं—उसे ग्रहण करते हैं, इस प्रकार चिन्तवन करना सो हेतु विचय नामका दसवाँ धर्म्यध्यान है ॥५०॥ यह दश प्रकारका धर्म्यध्यान अप्रमत्त गुणस्थानमें होता है, प्रमादके अभावसे उत्पन्न होता है, पीत और पद्मनामक शुभ लेश्याओंके

१. मपि जीवानां म० । २. भावादिविचयं म० । ३. स्वप्रतिष्ठित -क० । ४. पितपद्मस्य सल्लेश्या क० ।

कालभावविकल्पस्थं धर्म्यध्यानं दशान्तरम्। स्वर्गापवर्गफलदं ध्यातव्यं ध्यानतत्परैः ॥५२॥
शुक्लं शुचित्वसम्बन्धाच्छौचं दोषाद्यपोढता। शुक्लं परमशुक्लं च प्रत्येकं ते द्विधा मते ॥५३॥
सवीचारविवीचारपृथक्त्वैकत्ववितर्कके। सूक्ष्मोच्छिन्नक्रियापूर्वप्रतिपातिनिवर्तके ॥५४॥
लक्षणं द्विविधं बाह्यं [1]जृम्भाजृम्भाद्यपोहनम्। प्राणापानप्रचारस्या[2]व्यक्तस्युच्छिन्नताप्रवृत्यतः ॥५५॥
परेषामनुमेयं स्यात्स्वसंवेद्यं यदात्मनः। आध्यात्मिकं तयोरेव लक्षणं [3]प्रतिपाद्यते ॥५६॥
पृथग्भावः पृथक्त्वं हि नानात्वमभिधीयते। वितर्को[4] द्वादशाङ्गं तु श्रुतज्ञानमनाविलम् ॥५७॥
अर्थव्यञ्जनयोगानां वीचारः[5] संक्रमः क्रमात्। ध्येयोऽर्थो व्यञ्जनं शब्दो योगो वागादिलक्षणः ॥५८॥
पृथक्त्वेन वितर्कस्य वीचारोऽर्थादिषु क्रमात्। यस्मिन्नस्ति यथोक्तं तत्प्रथमं शुक्लमिष्यते ॥५९॥
[6]तद्यथा पूर्वविद्ध्यायन्नविक्षिप्तमना मुनिः। द्रव्याणुं चापि भावाणुमेकमालम्ब्य संवृतः ॥६०॥
अतीक्ष्णेनापि शस्त्रेण शनैश्छिन्दन्निव द्रुमम्। मोहस्योपशमं कुर्वन् क्षयं वा बहुनिर्जरः ॥६१॥

बलसे होता है, काल और भावके विकल्पमें स्थित है तथा स्वर्ग और मोक्ष रूप फलको देनेवाला है। ध्यानमें तत्पर मनुष्योंको यह ध्यान अवश्य ही करना चाहिए। भावार्थ—यहाँ उत्कृष्टताकी अपेक्षा धर्म्यध्यानको सातवें अप्रमत्त-गुणस्थानमें बताया है परन्तु सामान्य रूपसे यह चतुर्थ गुणस्थानसे लेकर सातवें गुणस्थान तक होता है और स्वर्गका साक्षात् तथा मोक्षका परम्परासे कारण है ॥ ५१-५२ ॥

जो शुचित्व अर्थात् शौचके सम्बन्धसे होता है वह शुक्लध्यान कहलाता है। दोष आदिकका अभाव हो जाना शौच है। यह शुक्ल और परम शुक्लके भेदसे दो प्रकार है तथा शुक्ल और परम शुक्ल दोनोंके दो-दो भेद माने गये हैं ॥५३॥ पृथक्त्व वितर्क वीचार और एकत्व वितर्क ये दो भेद शुक्लध्यानके हैं और सूक्ष्मक्रिया प्रतिपाति तथा व्युपरत क्रिया निवर्ति ये दो परम शुक्लध्यानके भेद हैं ॥५४॥ बाह्य और आध्यात्मिकके भेदसे शुक्लध्यानका लक्षण दो प्रकारका कहा गया है। इनमें श्वासोच्छ्वासके प्रचारकी अव्यक्त अथवा उच्छिन्नदशासे युक्त मनुष्यके जो अंगड़ाई और जमुहाई आदिका छूट जाना है वह बाह्य लक्षण है एवं अपने-आपको जिसका स्वसंवेदन होता है तथा दूसरेको जिसका अनुमान होता है वह आध्यात्मिक लक्षण है। आगे उन शुक्ल और परम शुक्ल ध्यानोंका आध्यात्मिक लक्षण कहा जाता है ॥५५-५६॥ पृथग्भाव अथवा नानात्वको पृथक्त्व कहते हैं। निर्दोष द्वादशाङ्ग-श्रुतज्ञान वितर्क कहलाता है। अर्थ, व्यञ्जन (शब्द) और योगोंका जो क्रमसे संक्रमण होता है उसे वीचार कहते हैं। जिस पदार्थका ध्यान किया जाता है वह अर्थ कहलाता है, उसके प्रतिपादक शब्दको व्यञ्जन कहते हैं और वचन आदि योग हैं ॥५७-५८॥ जिसमें वितर्क (द्वादशाङ्ग) के अर्थादिमें क्रमसे नानारूप परिवर्तन हो वह पृथक्त्ववितर्क वीचार नामका पहला शुक्लध्यान माना जाता है ॥५९॥ इसका स्पष्टीकरण यह है कि निश्चल चित्तका धारक कोई पूर्वविद् मुनि द्रव्याणु अथवा भावाणुका अवलम्बन कर ध्यान कर रहा है सो जिस प्रकार कोई अतीक्ष्ण—मोथले शस्त्रसे किसी वृक्षको धीरे-धीरे काटता है उसी प्रकार वह विशुद्धताका वेग कम होनेसे मोहनीय कर्मके उपशम अथवा

---

१. जम्भास्तम्भा—म०। २. स्या व्युत्पन्नाप्रवृत्यतः म०। ३. प्रतिपद्यते म०। ४. 'वितर्कः श्रुतम्' त० सू० अ० ९। ५. 'वीचारोऽर्थव्यञ्जनयोगसंक्रान्तिः' त० सू० अ० ९। ६. तत्र द्रव्यं परमाणुं वा ध्यायन्नाहितवितर्कसामर्थ्यादर्थव्यञ्जने कायवचसी च पृथक्त्वेन संक्रामता मनसापर्याप्तबालोत्साहवदव्यवस्थितेनापि शस्त्रेण चिरात्तरुं छिन्दन्निव मोहप्रकृतीरुपशमयन् क्षपयंश्च पृथक्त्ववितर्कवीचारध्यानभाग् भवति।—स. सि. अ. ९।

द्रव्याद्द्रव्यान्तरं याति पर्यायं चान्यपर्ययात् । व्यञ्जनाद् व्यञ्जनं योगाद्योगान्तरमुपैति यत् ॥६२॥
शुक्लं तत्प्रथमं शुक्लतरलेश्याबलाश्रयम् । श्रेणीद्वयगुणस्थानं क्षयोपशमभावकम् ॥६३॥
सर्वपूर्वधरस्येदमन्तर्मौहूर्तिकस्थिति । श्रेणीद्वयवशाद्द्वेधं स्वर्गमोक्षफलप्रदम् ॥६४॥
एकत्वेन वितर्कोऽस्ति यस्मिन्वीचारवर्जिते । तदेकत्ववितर्कावीचारं शुक्लं तदुत्तरम् ॥६५॥
एकमेवाणुपर्यायं [1]विषयीकृत्य वर्तते । [2]मोहादिघातिघातीदं पूर्विणः स कृती ततः ॥६६॥
ज्ञानदर्शनसम्यक्त्ववीर्यचारित्रपूर्वकैः । भासते क्षायिकैर्भावैस्तीर्थकृद्वान्यकेवली ॥६७॥
सोऽर्चनीयोऽभिगम्यश्च त्रिभुवां परमेश्वरः । देशोनां विहरत्येकां पूर्वकोटीं प्रकर्षतः ॥६८॥
अन्तर्मुहूर्तशेषायुः स यदा भवतीश्वरः । तत्तुल्यस्थितिवेद्यादित्रितयश्च तदा पुनः ॥६९॥
समस्तं वाङ्मनोयोगं काययोगं च बादरम् । प्रहाप्याकम्य सूक्ष्मं तु काययोगं स्वभावतः ॥७०॥
तृतीयं शुक्लसामान्यात्प्रथमं तु विशेषतः । सूक्ष्मक्रियाप्रतीपाति ध्यानमास्कन्तुमर्हति ॥७१॥
सोऽन्तर्मुहूर्तशेषायुरधिकान्यत्रिकस्थितिः[3] । यदा भवति योगीशस्तदा स्वाभाव्यतः स्वयम् ॥७२॥
स्वोपयोगविशेषस्य विशिष्टकरणस्य हि । सामायिकसहायस्य [4]महासंवरसङ्गतेः ॥७३॥

शमको धीरे-धीरे करता है। कर्मोंकी अत्यधिक निर्जराको करता हुआ वह मुनि द्रव्यसे द्रव्यान्तरको, पर्यायसे पर्यायान्तरको, व्यञ्जनसे व्यञ्जनान्तरको और योगसे योगान्तरको प्राप्त होता है ॥६०–६२॥ वह प्रथम शुक्लध्यान शुक्लतर लेश्याके बलसे होता है। उपशम-श्रेणी और क्षपकश्रेणी—दोनोंके गुणस्थानोंमें होता है। क्षायोपशमिक भावसे सहित है। समस्त पूर्वोके ज्ञाता मुनिके यह ध्यान अन्तर्मुहूर्त तक रहता है तथा दोनों श्रेणियोंके वशसे यह स्वर्ग और मोक्ष रूप फलको देनेवाला है। भावार्थ—उपशम श्रेणीमें होनेवाला शुक्लध्यान स्वर्गका कारण है और क्षपकश्रेणीमें होनेवाला मोक्षका कारण है ॥६३–६४॥

जिसमें वीचार—अर्थादिके संक्रमणसे रहित होनेके कारण एक रूपमें ही वितर्कका उपयोग होता है अर्थात् वितर्कके अर्थ एवं व्यञ्जन आदिपर अन्तर्मुहूर्त तक चित्तकी गति स्थिर रहती है वह एकत्व वितर्क वीचार नामका दूसरा शुक्लध्यान है ॥६५॥ यह ध्यान एक ही अणु अथवा पर्यायको विषय कर प्रवृत्त होता है। मोह आदि घातिया कर्मोंका घात करनेवाला है, पूर्व धारीके होता है और इस ध्यानके प्रभावसे ध्यान करनेवाला कुशल मुनि ज्ञान, दर्शन, सम्यक्त्व, वीर्य और चारित्र आदि क्षायिक भावोंसे सुशोभित होने लगता है। अब वह तीर्थंकर अथवा सामान्य केवली हो जाता है। वह सबके द्वारा पूज्य एवं सेवनीय हो जाता है और तीन लोकोंका परमेश्वर हो उत्कृष्ट रूपसे देशोन कोटिवर्ष पूर्व तक विहार करता रहता है ॥६६–६८॥

जब उन केवली भगवान्की आयु अन्तर्मुहूर्तकी शेष रह जाती है तथा आयुके बराबर ही वेदनीय आदि तीन अघातिया कर्मोंकी स्थिति अवशिष्ट रहती है तब वे समस्त वचन योग, मनोयोग और स्थूल काय योगको छोड़कर स्वभावसे ही सामान्य शुक्लकी अपेक्षा तीसरे और विशेष—परमशुक्लकी अपेक्षा प्रथम सूक्ष्म क्रिया प्रतिपाति नामक ध्यानको प्राप्त करनेके योग्य होते हैं ॥६९–७१॥ जब उन केवली भगवान्की स्थिति अन्तर्मुहूर्तकी हो और शेष तीन अघातिया कर्मोंकी स्थिति अधिक हो तब वे स्वभाववश अपने-आप चार समयों-द्वारा आत्म प्रदेशोंको फैलाकर दण्ड, कपाट, प्रतर और लोक पूरण कर तथा उतने ही समयोंमें उन्हें संकुचित कर सब कर्मोंकी स्थिति एक बराबर कर लेते हैं। इस क्रियाके

---

१. विषमीकृत्य म० । २. -घातघातीदं म० । ३. स्थितः म० । ४. महासंवरसंगते म० ।

अन्तस्य घातने शेषकर्मणां परिपाचने । दण्डं चापि कपाटं च प्रतरं लोकपूरणम् ॥७४॥
चतुर्भिः समयैः कृत्वा स्वप्रदेशविसर्पणात् । तावद्भिरेव संहृत्य कृतकर्मसमस्थितिः ॥७५॥
पूर्वकायप्रमाणः सन् भूत्वा निष्ठापयन्निदम् । प्रथमं शुक्लमध्यास्ते द्वितीयं परमं पुनः ॥७६॥
स्वप्रदेशपरिस्पन्दयोगप्राणादिकर्मणाम् । समुच्छिन्नतयोक्तं तत्समुच्छिन्नक्रियाख्यया ॥७७॥
सर्वबन्धास्रवाणां हि निरोधस्तत्र यत्नतः । अयोगस्य यथाख्यातचारित्रं मोक्षसाधनम् ॥७८॥
[1]अयोगकेवली आत्मा प्रध्वस्ताखिलकर्मकः । जात्यहेमवदुद्भूतचेतनाशक्तिभास्वरः ॥७९॥
सिद्ध्यन्निहैव संसिद्धस्वोर्ध्वव्रज्यास्वभावतः । पूर्वप्रयोगासंगत्वबन्धच्छेदत्वहेतुतः[2] ॥८०॥
अग्नेः[3] शिखावदाविद्धचक्रालाम्बुवदुत्पतन् । एरण्डबीजवच्चोर्ध्वं लोकं समयतो व्रजेत् ॥८१॥
धर्मास्तिकायाभावाच्च लोकान्तमतिगच्छति । चात्र संतिष्ठतेऽतोऽग्रे सोऽनन्तसुखसन्ततिः ॥८२॥
चतुर्वर्गे हि देहिभ्यो मोक्षोऽतिशयतो हितः । स योगादेव [4]सद्ध्यानात्स्वकर्मक्षयलक्षणः ॥८३॥
कर्मप्रकृत्यभावो हि मोक्षोऽनन्तसुखावहः । स यत्नायत्नसाध्यत्वाद्द्विधा भवति देहिनः ॥८४॥
चरमोत्तमदेहस्य प्रागसत्त्वादयत्नतः । गत्यन्तरायुषामेषामभावो भवतीतरः ॥८५॥
उच्यते तु गुणस्थानात्सम्यग्दृष्टेरसंयतात्[5] । समारभ्याप्रमत्तान्ते[6] क्वचिदेवात्र[7] मानुषः ॥८६॥

समय उनका उपयोग विशेष अपने-आपमें होता है, वे विशिष्ट करण अर्थात् भावका अवलम्बन करते हैं, सामायिक भावसे युक्त होते हैं, महासंवरसे सहित होते हैं—नवीन कर्मोंका आस्रव प्रायः बन्द कर देते हैं और सत्तामें स्थित कर्मोंके नष्ट करने तथा उदयावलीमें लानेमें समर्थ रहते हैं। यह सब करनेके बाद जब वे पुनः पूर्व शरीर प्रमाण हो जाते हैं तब प्रथम परम शुक्लध्यानको पूर्ण कर द्वितीय परमशुक्लध्यानको प्राप्त होते हैं ॥७२–७६॥ आत्मप्रदेशोंके परिस्पन्द रूप योग तथा कायबल आदि प्राणोंके समुच्छिन्न—नष्ट हो जानेसे यह ध्यान समुच्छिन्नक्रिय नामसे कहा गया है ॥७७॥ इस ध्यानके समय यत्नपूर्वक समस्त कर्मोंके बन्ध और आस्रवोंका निरोध हो चुकता है। ध्याता अयोग—योगरहित हो जाता है और उसके मोक्षका साक्षात् कारण परम यथाख्यातचारित्र प्रकट हो जाता है ॥७८॥ वह अयोगकेवली आत्मा, समस्त कर्मोंको नष्ट कर सोलहवानीके स्वर्णके समान प्रकट हुई चेतनाशक्तिसे देदीप्यमान हो उठता है ॥७९॥ इसी समय वह सिद्ध होता हुआ अनादि सिद्ध ऊर्ध्वगमन स्वभाव, पूर्व प्रयोग, असङ्गत्व और बन्धच्छेद रूप हेतुओंसे अग्निशिखा, आविद्धकुलालचक्र, व्यपगतलेपालाबु और एरण्डबीजके समान ऊपरको जाता हुआ एक समय मात्रमें ऊर्ध्वलोकके अन्तमें पहुँच जाता है ॥८०–८१॥ धर्मास्तिकायका अभाव होनेसे सिद्धात्मा लोकान्तको उल्लङ्घन कर आगे नहीं जाता। वह उसी स्थानपर अनन्त सुखका उपभोग करता हुआ विराजमान हो जाता है ॥८२॥ चारों वर्गोंमें प्राणियोंके लिए मोक्ष ही अतिशय हितकारी है, अपने समस्त कर्मोंका क्षय हो जाना मोक्षका लक्षण है और ऐसा मोक्ष ऊपर कहे हुए समीचीन ध्यानसे ही प्राप्त होता है ॥८३॥ कर्मप्रकृतियोंका अभाव हो जाना ही अनन्त सुखका देनेवाला मोक्ष है। वह कर्म प्रकृतियोंका अभाव यत्नसाध्य तथा अयत्नसाध्यकी अपेक्षा दो प्रकारका है। चरमशरीरी जीवके भुज्यमान आयुको छोड़कर अन्य आयुओंका जो अभाव है वह अयत्नसाध्य अभाव है क्योंकि इनकी सत्ता पहलेसे आती नहीं है और चरमशरीरीके नवीन बन्ध होता नहीं है। अब यत्नसाध्य प्रकृतियोंका अभाव किस तरह होता है यह कहते हैं ॥८४–८५॥ असंयत सम्यग्दृष्टि गुणस्थानसे लेकर

---

१. सोऽयोग म० । २. गतिभ्रमैः म० । ३. 'पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च' । त० सू० । 'आविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्च' ॥ त० सू० । ४. सद्ध्यातात् म० । ५. –रसंयतान् म० । ६. समारभ्य प्रवर्तन्ते क० । ७. क्वचिदेकत्र म० ।

मोहस्य प्रकृतीः सप्त क्षपयित्वा विशुद्धधीः । सम्यग्दर्शनमर्काभं क्षायिकं प्रतिपद्यते ॥८७॥
आरोढा क्षपकश्रेणीमप्रमत्तः प्रकृत्य सः । अथाप्रवृत्तकरणमपूर्वकरणं स्वकृत् ॥८८॥
अपूर्वकरणो भूत्वा स पापप्रकृतिस्थितिम् । तनूकृत्यानुभागं चानिवृत्तिकरणाश्रितः ॥८९॥
अनिवृत्तिगुणस्थाने क्षपकव्यपदेशभाक् । शुक्लध्यानानलाक्रान्तकर्मप्रकृतिकक्षकः ॥९०॥
सनिद्रानिद्राप्रचला-प्रचलास्त्यानगृद्धिभिः । दुर्गती सानुपूर्व्यके पूर्वा जातिचतुष्टयीम् ॥९१॥
सस्थावरातपोद्योतसूक्ष्मसाधारणाभिधाः । सहैव क्षपयत्येताः षोडश प्रकृतीः कृती ॥९२॥
[1]अत्रैवातः परं स्थानं कषायाष्टकमस्यति । ततो नपुंसकं वेदं स्त्रीवेदं च ततः परम् ॥९३॥
[2]पुंवेदे नोकषायाणां षट्कं प्रक्षिप्य वै सह । निरस्याक्षिप्य पुंवेदं क्रोधसंज्वलनानले ॥९४॥
मानसंज्वलने तं च मायासंज्वलने स्वसुम् । लोभसंज्वलने स्वेनं निक्षिप्य दहति क्रमात् ॥९५॥
लोभसंज्वलनं सूक्ष्मं कृत्वा सूक्ष्मकषायगः । लोभसंज्वलनस्यान्तमन्ते कृत्वा विमोहकम् ॥९६॥
भूत्वा क्षीणकषायस्योपान्तिमे समयेऽस्यति । निद्रां च प्रचलामन्त्ये ज्ञानावृत्यन्तराययोः ॥९७॥
प्रत्येकं प्रकृतीः पञ्च चतस्रो दर्शनावृतेः । दग्ध्वैकत्ववितर्काग्नेः[3] सयोगः केवली भवेत् ॥९८॥
सद्वेद्यं चाप्यसद्वेद्यं नामदेवगतिश्रुतिः । औदारिकशरीरादिनाम्ना पञ्चतयं तथा ॥९९॥
सङ्घातपञ्चकं चापि पुनर्बन्धकपञ्चकम् । वैक्रियौदारिकाहारकायाङ्गोपाङ्गकत्रिकम् ॥१००॥
संस्थाननामषट्कं च षट्संहनननाम च । वर्णपञ्चकनामापि रसपञ्चकनाम च ॥१०१॥

अप्रमत्त संयत नामक सातवें गुणस्थान तक किसी गुणस्थानमें कर्मभूमिका मनुष्य मोहनीय कर्मकी सात प्रकृतियोंका क्षय कर विशुद्ध बुद्धिका धारक होता हुआ सूर्यके समान क्षायिक सम्यग्दर्शनको प्राप्त होता है ॥८६–८७॥ तदनन्तर सातिशय अप्रमत्तगुणस्थानवर्ती मनुष्य क्षपक श्रेणीमें चढ़कर अथाप्रवृत्तकरण (अधःप्रवृत्तकरण) को करके उसके बाद अपूर्व करणको करता है ॥८८॥ फिर अपूर्वकरण गुणस्थानवर्ती होकर पापप्रकृतियोंकी स्थिति तथा अनुभागको क्षीण करता हुआ अनिवृत्तिकरणको प्राप्त होता है ॥८९॥ तदनन्तर अनिवृत्तिकरण नामक नवम गुणस्थानमें क्षपक संज्ञाको प्राप्त होता हुआ कर्मप्रकृतिरूप वनको शुक्लध्यानरूपी अग्निसे आक्रान्त करता है ॥९०॥ फिर सत्तामें स्थित निद्रानिद्रा, प्रचलाप्रचला, स्त्यानगृद्धि, नरकगति, नरकगत्यानुपूर्वी, तिर्यञ्चगति, तिर्यञ्चगत्यानुपूर्वी, एकेन्द्रियादि चार जातियाँ, स्थावर, आतप, उद्योत, सूक्ष्म और साधारण इन सोलह प्रकृतियोंका एक साथ क्षय करता है ॥९१–९२॥ इसी गुणस्थानमें सोलह प्रकृतियोंके क्षयके बाद अप्रत्याख्यानावरण और प्रत्याख्यानावरण नामक आठ कषायोंको नष्ट करता है। फिर नपुंसकवेद और स्त्रीवेदको नष्ट कर हास्यादि छह नोकषायोंको पुंवेदमें डालकर एक साथ नष्ट करता है। फिर पुंवेदको संज्वलन क्रोधरूपी अग्निमें, संज्वलन क्रोधको संज्वलन मानमें संज्वलन मानको संज्वलन मायामें और संज्वलन मायाको संज्वलन लोभमें डालकर क्रमसे दग्ध करता है ॥९३–९५॥ फिर संज्वलन लोभको और भी सूक्ष्म कर सूक्ष्मसाम्पराय नामक दशम गुणस्थानमें पहुँचता है। इसके अन्तमें संज्वलन लोभका अन्त कर मोहकर्मका बिलकुल अभाव कर चुकता है ॥ ९६ ॥ फिर क्षीणकषायगुणस्थानवर्ती होकर एकत्ववितर्क नामक शुक्लध्यानरूपी अग्निसे इसके उपान्त्य समयमें निद्रा और प्रचलाको तथा अन्त समयमें ज्ञानावरण और अन्तरायकी पाँच-पाँच और दर्शनावरणकी चार प्रकृतियोंको जलाकर सयोग-केवली होता है ॥९७–९८॥ तदनन्तर सयोगकेवली गुणस्थानको उल्लङ्घकर जब आगामी गुण-स्थानको प्राप्त होता है तब अयोगकेवली होकर अर्हन्त अवस्थाके उपान्त्य समयमें साता वेदनीय और असाता वेदनीयमें-से कोई एक, देवगति, औदारिक शरीरको आदि लेकर पाँच शरीर,

1. अत्रैवान्तः परं म० । 2. पुंवेद क० । 3. वितर्काग्निः म० ।

अष्टधा स्पर्शनामापि गन्धनाम पुनर्द्विधा । तत्प्रायोग्यानुपूर्वी च नामदेवगतेः पुनः ॥१०२॥
नामागुरुलघूच्छ्वासपरघातोपघातकम् । प्रशस्ताशस्तभेदस्थं विहायोगति नाम च ॥१०३॥
प्रत्येककायापर्याप्तस्थिरास्थिरशुभाशुभम् । तथा दुर्भगनामापि पुनः सुस्वरदुःस्वरम् ॥१०४॥
अनादेयायशःकीर्तिनाम निर्माणनाम च । प्रकृतीर्द्वासप्ततिं नीचैर्गोत्रेण सुपिण्डिताः ॥१०५॥
सयोगकेवलिस्थानमतीत्य पदमास्थितः । अयोगकेवली हन्ति स्वोपान्त्यसमयेऽर्हतः ॥१०६॥
वेद्यमेकं मनुष्यायुर्मनुष्यगतिरेव च । तत्प्रायोग्यानुपूर्वी च जातिः पञ्चेन्द्रियाभिधा ॥१०७॥
त्रसबादरपर्याप्तसुभगादेयसंज्ञिका । उच्चैर्गोत्रं यशःकीर्तिस्तीर्थंकरनाम च ॥१०८॥
एतास्त्रयोदश ख्याताः प्रकृतीः प्रकृतिस्थिरः । अयोगकेवली हन्ति चरमे समये ततः[1] ॥१०९॥
ह्रस्वोच्चारणावृत्तीः पञ्च स्थित्वा स्वकालतः । सिद्धिः सादिरनन्ता स्यादनन्तगुणसन्निधिः ॥११०॥
धर्म्यध्यानप्रकारं स ध्यायन्नेमिर्यथोचितम् । षट्पञ्चाशदहोरात्रकालं सुतपसानयत् ॥१११॥

पाँच संघात, पाँच बन्धन, औदारिक, वैक्रियिक और आहारक ये तीन अङ्गोपाङ्ग, छह संस्थान, छह संहनन, पाँच वर्ण, पाँच रस, आठ स्पर्श, दो गन्ध, देवगत्यानुपूर्वी, अगुरुलघु, उच्छ्वास, परघात, उपघात, प्रशस्त और अप्रशस्तके भेदसे दो प्रकारकी विहायोगति, प्रत्येक शरीर, अपर्याप्त, स्थिर, अस्थिर, शुभ, अशुभ, दुर्भग, सुस्वर, दुःस्वर, अनादेय, अयशःकीर्ति, निर्माण और नीच गोत्र इन बहत्तर प्रकृतियोंको नष्ट करता है ॥९९-१०६॥ फिर अन्त समयमें साता-वेदनीय असातावेदनीयमें-से एक, मनुष्य आयु, मनुष्यगति, मनुष्यगत्यानुपूर्वी, पञ्चेन्द्रिय जाति, त्रस, बादर, पर्याप्त, सुभग, आदेय, उच्चगोत्र, यशस्कीर्ति और तीर्थङ्कर इन तेरह प्रकृतियों-को नष्ट करता है। अयोगकेवली गुणस्थानमें यह जीव प्रदेशपरिस्पन्दका अभाव हो जानेके कारण स्वभावसे स्थिर रहता है ॥१०७-१०९॥ अ इ उ ऋ लृ इन पाँच लघु अक्षरोंके उच्चारणमें जितना काल लगता है उतने काल तक चौदहवें गुणस्थानमें रहकर यह जीव सिद्ध हो जाता है। जीवकी यह सिद्धि सादि तथा अनन्त है और अनन्त गुणोंके सन्निधानसे युक्त है ॥११०॥

भगवान् नेमिनाथने धर्म्यध्यानके पूर्वोक्त दस भेदोंका यथायोग्य ध्यान करते हुए,

---

१. कर्माभावो द्विविधः—यत्नसाध्योऽयत्नसाध्यश्चेति । तत्र चरमदेहस्य नारकतिर्यग्देवायुषामभावो न यत्नसाध्यः असत्त्वात् । यत्नसाध्य इत ऊर्ध्वमुच्यते—असंयतसम्यग्दृष्ट्यादिषु चतुर्षु गुणस्थानेषु कस्मिंश्चित्सप्त-प्रकृतिप्रक्षयः क्रियते । निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनरकगतितिर्यग्गत्येकद्वित्रिचतुरिन्द्रियजातिनरकगतितिर्य-ग्गतिप्रायोग्यानुपूर्व्यातपोद्योतस्थावरसूक्ष्मसाधारणसंज्ञिकानां षोडशानां कर्मप्रकृतीनामनिवृत्तिबादरसाम्परायस्थाने युगपत्क्षयः क्रियते । नपुंसकवेदः स्त्रीवेदश्च तत्रैव क्षयमुपयाति । नोकषायषट्कं च सहैकेनैव प्रहारेण विनि-पातयति । ततः पुंवेदसंज्वलनक्रोधमानमायाः क्रमेण तत्रैवात्यन्तिकं ध्वंसमास्कन्दन्ति । लोभसंज्वलनः सूक्ष्मसाम्प-रायान्ते यात्यन्तम् । निद्राप्रचले क्षीणकषायवीतरागच्छद्मस्थस्योपान्त्यसमये प्रलयमुपव्रजतः । पञ्चानां ज्ञाना-वरणानां चतुर्णां दर्शनावरणानां पञ्चानामन्तरायाणां च तस्यैवान्त्यसमये प्रक्षयो भवति । अन्यतरवेदनीयदेव-गत्यौदारिकवैक्रियिकाहारकतैजसकार्मणशरीरसंस्थानषट्कौदारिकवैक्रियिकाहारकशरीराङ्गोपाङ्गषट्संहननपञ्चप्रश-स्तवर्णपञ्चाप्रशस्तवर्णगन्धद्वयपञ्चप्रशस्तरसपञ्चाप्रशस्तरसस्पर्शाष्टकदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातो-च्छ्वासप्रशस्ताप्रशस्तविहायोगत्यपर्याप्तकप्रत्येकशरीरस्थिरास्थिरशुभाशुभदुर्भगसुस्वरदुःस्वरानादेयायशःकीर्तिनिर्मा-णनाम नीचैर्गोत्राख्या द्वासप्ततिप्रकृतयोऽयोगकेवलिनमुपान्त्यसमये विनाशमुपयान्ति । अन्यतरवेदनीयमनुष्या-युर्मनुष्यगतिपञ्चेन्द्रियजातिमनुष्यगतिप्रायोग्यानुपूर्व्यत्रसबादरपर्याप्तकसुभगादेययशःकीर्तितीर्थंकरनामोच्चैर्गोत्रसंज्ञि-कानां त्रयोदशानां प्रकृतीनामयोगकेवलिनश्चरमसमये विच्छेदो भवति ।

—सर्वार्थसिद्धि अ. १० सूत्र. २

पूर्वाह्णेऽश्वयुजस्याथ शुक्लप्रतिपदि प्रभुः । शुक्लध्यानाग्निना दग्ध्वा चतुर्घातिमहावनम् ॥११२॥
अनन्तकेवलज्ञानदर्शनादिचतुष्टयम् । त्रैलोक्येन्द्रासनाकम्पि सम्प्रापत्परदुर्लभम् ॥११३॥

स्रग्धरावृत्तम्

घण्टारावोरुसिंहस्फुटपटहरवोदारशङ्खस्वनैस्तां
जैनीं कैवल्यलब्धिं सकलसुरगणा प्राविविदिरथा यथास्वम् ।
इन्द्राः सिंहासनोघैर्मुकुटविचलनैः स्वान् प्रयुज्यावधीन् स्वैः
प्राप्तानीकैः सहागुः क्षुभितसलिलधिव्रातविभिन्नलोक्याः ॥११४॥
आपूर्यावार्यवेगैर्गगनजलनिधिं वाहनानां समूहैः
सप्तानीकै[2]रनेकैर्गिरिमथ पतिगणास्तं परीत्य प्रपेदे ।
प्रोच्चैर्मूर्धावलेपं गिरिपतिमपि सुस्नानकल्याणमात्रं
भूयः कल्याणकण्ठे गुणभरगुणनादूर्जयन्तं जयन्तम् ॥११५॥
मन्दारादिद्रुमाणां सुरभितककुभा पुष्पवृष्ट्या सुराणां
दिव्यस्त्रीगीतमूर्छन्मुखरितभुवनैर्दुन्दुभीनां निनादैः ।
भेत्रा लोकस्य शोकं फलकुसुमभृताशोकशाखाभृता च
श्वेतच्छत्रत्रयेण त्रिभुवनविभुताचिह्नभूतोरुभूम्ना ॥११६॥
हंसालीपातलोलैर्धवलितककुभैश्चामराणां सहस्रैः
भाभिर्भामण्डलेन प्रतिहतविकसद्भानुभामण्डलेन ।

छद्मस्थ अवस्थाके छप्पन दिन समीचीन तपश्चरणके द्वारा व्यतीत किये ॥१११॥ तदनन्तर आश्विन शुक्ल प्रतिपदाके दिन प्रातःकालके समय भगवान्‌ने शुक्लध्यानरूपी अग्निके द्वारा चार घातियारूपी महावनको जलाकर तीन लोकके इन्द्रोंके आसन कँपा देनेवाले एवं अन्य जनदुर्लभ, केवलज्ञान, केवलदर्शन आदि अनन्तचतुष्टय प्राप्त किये ॥११२-११३॥ घण्टाओंके शब्द, विशाल सिंहनाद, दुन्दुभियोंके स्पष्ट शब्द और शंखोंकी भारी आवाजसे समस्त देवोंने शीघ्र ही निश्चय कर लिया कि जिनेन्द्र भगवान्‌को केवलज्ञान प्राप्त हो गया है तथा इन्द्रोंने भी सिंहासन और उन्नत मुकुटोंके कम्पित होनेसे अपने-अपने अवधिज्ञानका प्रयोग कर उक्त बातका ज्ञान कर लिया। तदनन्तर तीनों लोकोंके इन्द्र, समुद्रोंके समूहको क्षुभित करनेवाली अपनी-अपनी सेनाओंके साथ गिरनार पर्वतकी ओर चल पड़े ॥११४॥

उस समय इन्द्रोंने अवार्य वेगसे युक्त वाहनोंके समूह और सात प्रकारकी अनेक सेनाओंसे आकाशरूपी समुद्रको व्याप्त कर दिया और आकर गिरनार पर्वतकी तीन प्रदक्षिणाएँ दीं। उस समय वह पर्वत, ऊँचे शिखरका अभिमान धारण करनेवाले गिरिराज—सुमेरु पर्वतको भी जीत रहा था क्योंकि सुमेरु पर्वत पर तो भगवान्‌का मात्र जन्मकल्याणक सम्बन्धी अभिषेक हुआ था और गिरनार पर्वतपर दीक्षाकल्याणकके बाद पुनः ज्ञानकल्याणक होनेसे अनेक गुण प्रकट हुए थे ॥११५॥ देवलोग, दिशाओंको सुगन्धित करनेवाले मन्दार आदि वृक्षोंके फूलोंकी वर्षा करने लगे। देवाङ्गनाओंके सुन्दर संगीतसे मिश्रित दुन्दुभियोंके शब्द संसारको मुखरित करने लगे। लोगोंके शोकको नष्ट करनेवाला फल और फूलोंसे युक्त अशोक वृक्ष प्रकट हो गया। तीन लोककी विभुताके चिह्नस्वरूप श्वेत छत्रत्रय सिरपर फिरने लगे। हंसावलीके पातके समान सुशोभित एवं पर्वतकी भूमिको सफेद करनेवाले हजारों चमर ढुलने लगे। अपनी कान्तिसे देदीप्यमान सूर्यकी प्रभाके समूहको पराजित करनेवाला भामण्डल प्रकट हो गया। नाना रत्नसमूहकी किरणोंसे इन्द्रधनुषको

---

१. —वह्निः म० । २. —रनीकैः म० ।

नानारत्नौघरोचिर्जनितसुरधनुर्हेमसिंहासनेन
भाषाभेदस्फुरन्त्या स्फुरणविरहितस्वोष्ठयोर्भाषया च ॥११७॥
अष्टाभिः प्रातिहार्यैरतिशमितपरैः स्वैर्विशेषैरशेषैः
कर्मापायस्वभावत्रिदिवपतिसमैस्तैश्चतुस्त्रिंशता च ।
त्रैलोक्योद्धारणाय प्र[1]कृतिधृतधृतिर्नेमिनाथो जगत्यां
हरिवंशो [2]हारिवंशो गुणगणवि[3]ततीर्थकृत्प्रादुरासीत् ॥११८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्नेमिनाथ-केवलज्ञानवर्णनो नाम षट्पञ्चाशः सर्गः ॥५६॥

उत्पन्न करनेवाला स्वर्ण-सिंहासन आविर्भूत हो गया और नाना भाषाओंके भेदसे युक्त एवं ओठोंके स्फुरणसे रहित दिव्यध्वनि खिरने लगी। इस प्रकार पूर्वोक्त आठ प्रातिहार्यों, दूसरोंको अत्यन्त शान्त करनेवाली अपनी समस्त विशेषताओं और केवलज्ञान-सम्बन्धी, जन्म-सम्बन्धी तथा देवकृत चौंतीस अतिशयोंसे विभूषित, तीन लोकके उद्धारके लिए स्वाभाविक धैर्यके धारक और अनेक गुणोंके समूहको प्रकट करनेके लिए सूर्यके समान, हरिवंशके शिरोमणि बाईसवें तीर्थंकर नेमिनाथ भगवान् पृथिवीपर प्रकट हुए ॥११६-११८॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें भगवान् नेमिनाथके केवलज्ञानकी उत्पत्तिका वर्णन करनेवाला छप्पनवाँ सर्ग समाप्त हुआ ॥५६॥

---

१. प्रकृत—म० । २. हरिवंशे भवो हारिवंशः । ३. गुणगुणवृहतात् म०, घ० । जिनगुणगुणभृत् —क० ।

सप्तपञ्चाशः सर्गः

समवादि समापादि शरणं शरणं क्षणात् । त्रिजगज्जन्मिनां देवैः पाकशासनशासनात् ॥१॥
सर्वो द्वारवतीलोको यदुभोजकुलाम्बुधिः । आरुरोह गिरिं भूत्या रामकेशवपूर्वकः ॥२॥
अवलोक्य जिनेन्द्रस्य शरणं समवादिकम् । बहिरन्तःपरं प्रापद्विस्मयं जनसागरः ॥३॥
यादृशी समवस्थानभूमिस्तीर्थकृतामिह । तादृशी श्रोतृलोकस्य समासेन निगद्यते ॥४॥
भूमेः स्वभावभूताया दिव्यारत्निप्रमोच्छ्रितिः । भूमिस्तावत्समुच्छ्राया कल्पभूमिकपर्यंतः ॥५॥
स्वर्गश्रियं श्रिया जेत्री चतुरस्रा सुखप्रदा । सैकान्तद्वादशाद्यात्मयोजना कालदेशतः ॥६॥
उच्चैर्गन्धकुटीदेशकर्णिका पद्ममूर्तिवत्[1] । भाति भूमिरसौ बाह्य[2]भूमीपत्रपरम्परा ॥७॥
इन्द्रनीलमयी भूमिर्बाह्यादर्शतलोपमा । भूयसामपि भूयस्त्वं विशतां विदधाति या ॥८॥
दूरादिन्द्रादयो यस्यां मानयन्ति नमस्यया । मानार्हास्त्रिजगन्नाथं साभूर्मानाङ्गणाभिधा ॥९॥
महादिक्षु चतस्रोऽस्या गव्यूतिद्वयविस्तृताः । वीथ्यस्तन्मध्यगामीयुर्मानपीठान्पुरः[3] प्रभान् ॥१०॥
स्वोत्सेधत्रिगुणात्मीयविस्तराण्युक्तिविस्तरैः । सौवर्णरत्नमूर्तीनि मान्यन्ते नृसुरासुरैः ॥११॥
नृसुरामानवस्तम्भानास्थायार्चन्ति यत्र भूः । सा त्वास्थानाङ्गणाभिख्या ज्वलल्लौहितरत्नभा ॥१२॥
मध्ये[4] वीथि चतस्रोऽत्र त्रिमङ्गा हैमपीठिकाः । मान्त्युरोद्वयसोच्छ्रायाः वृत्ताः क्रोशार्धविस्तृताः ॥१३॥

अथानन्तर देवोंने इन्द्रकी आज्ञासे क्षण-भरमें तीन जगत्के जीवोंके लिए शरणभूत समवशरणकी रचना कर दी ॥१॥ बलदेव और कृष्णको आदि ले यादव और भोजवंशके सागर स्वरूप समस्त द्वारिका निवासी बड़े वैभवके साथ गिरिनार पर्वत पर चढ़े और भीतर-बाहर जिनेन्द्र भगवान्का समवशरण देखकर वह जनताका अपार सागर परम आश्चर्यको प्राप्त हुआ ॥२-३॥ तीर्थंकरोंकी समवसरण भूमि जैसी होती है उसका यहाँ संक्षेपसे श्रोताओंके लिए वर्णन किया जाता है ॥४॥

समवसरणकी दिव्य भूमि स्वाभाविक भूमिसे एक हाथ ऊँची रहती है और उससे एक हाथ ऊपर कल्पभूमि होती है ॥५॥ यह भूमि अपनी शोभासे स्वर्गलक्ष्मीको जीतनेवाली, चौकोर, सुखदायी और देशकालके अनुसार बारह योजनसे लेकर एक योजन तक विस्तारवाली होती है। भावार्थ—समवसरण भूमिका उत्कृष्ट विस्तार बारह योजन और कमसे-कम विस्तार एक योजन प्रमाण होता है ॥६॥ यह भूमि कमलके आकार होती है इसमें गन्धकुटी तो कर्णिकाके समान ऊँची उठी होती है और बाह्य भूमि कमलदलके समान विस्तृत होती है ॥७॥ यह इन्द्रनीलमणिसे निर्मित होती है, इसका बाह्य भाग दर्पणतलके समान निर्मल होता है और प्रवेश करनेवाले बहुतसे जीवोंको एक साथ स्थान देनेवाली रहती है ॥८॥ जिसमें मानके योग्य इन्द्र आदि देव त्रिलोकीनाथ—भगवान्की दूरसे ही पूजा करते हैं वह मानाङ्गण नामकी भूमि है ॥९॥ इस भूमिकी चारों महादिशाओंमें दो-दो कोश विस्तृत चार महावीथियाँ हैं। ये वीथियाँ अपने मध्यमें स्थित चार मानस्तम्भोंके पीठ धारण करती हैं ॥१०॥ ये पीठ अपनी ऊँचाईसे तिगुने चौड़े एवं सुवर्ण और रत्नमयी मूर्तियोंके धारक होते हैं तथा मनुष्य, सुर, असुर सभी आकर इन्हें नमस्कार करते हैं ॥११॥ जहाँ स्थित होकर मनुष्य और देव, मानस्तम्भोंकी पूजा करते हैं वह आस्थानाङ्गणा नामकी भूमि है। यह भूमि देदीप्यमान लाल मणियोंकी कान्तिको धारण करती है ॥१२॥ वीथियोंके मध्यमें तीन कटनीदार चार सुवर्णमयी पीठिकाएँ हैं जो छाती बराबर

१. पद्मरूपवत् क० । २. बाह्यभू म०, बाह्याभू क० । ३. पुरः प्रभाः क०, ख०, ग०, म० । ४. मध्ये वापि म० ।

चापोनपीठिकाव्यासा योजनं[1] त्वधिकोच्छ्रयाः । शुंभिता मानस्तंभाश्चत्वारः पीठिकास्वधि ॥१४॥
द्विषड्योजनदृश्यास्ते पालिकास्वाम्बुजस्थिताः । वज्रस्फटिकवैडूर्यमूलमध्याग्रविग्रहाः ॥१५॥
द्विसहस्राश्रयो नानारत्नरश्मिविमिश्रिताः । चतुर्दिशूर्ध्वसिद्धार्चाः रत्न[2]भूतोरुपालिकाः ॥१६॥
पालिकाम्बुजपद्मस्थवर्णीयस्फुरद्घटाः । घटाग्राबद्धफलकाः श्रीमामाभिषवश्रियः ॥१७॥
श्रीचूडारत्नभाचक्रभास्यविंशतियोजनाः । सामिमानमनोदेवमानवस्तंभना बभुः ॥१८॥
ततः सरांसि चत्वारि[3] फुल्लदम्भोजभांस्यकम्[4] । हंससारसचक्राह्वारावरम्यककुप्तवकम्[5] ॥१९॥
अतो वज्रमयो वप्रो वक्षोदघ्नो घनद्युतिः । द्विगुणीभूतविस्तारः परीवाय समन्ततः ॥२०॥
परीत्य परिखातोऽस्थाज्जलकम्रमणिक्षितिः । जानुदघ्नाम्बुगम्भीरा कृष्णसाटीव भूस्त्रियाः ॥२१॥
हेमाम्भोजरजःपुञ्जपिञ्जरी भाविताम्भसि । स्व[6]च्छायां दिङ्मुखान्यस्यां साङ्गरागाणि चाप्यभात् ॥२२॥
वल्लीवनमतोऽप्यन्तः परीत्य स्थितमित्यभात् । कुसु[7]मामोदिता शान्तं शकुन्तालिकुलाकुलम् ॥२३॥
प्राकारोऽन्तः परीवाय ज्वलत्कनकभास्वरः । विजयादिबृहद्रौप्यचतुर्गोपुरमण्डितः ॥२४॥
तत्र दौवारिका भौमाः कटकादिविभूषणाः । प्रभावोत्सारितायोग्या मुद्गरोद्धतपाणयः ॥२५॥

ऊँची हैं गोल हैं और आधा कोश चौड़ी हैं ॥१३॥ उन पीठिकाओं पर चार मानस्तम्भ सुशोभित हैं जो पीठिकाओंकी चौड़ाईसे एक धनुष कम चौड़े हैं और एक योजनसे कुछ अधिक-ऊँचे हैं ॥१४॥ वे मानस्तम्भ बारह योजनकी दूरीसे दिखायी देते हैं। पालिकाके अग्रभागपर जो कमल हैं उन्हीं पर स्थित हैं, उनका मूलभाग हीराका, मध्यभाग स्फटिकका और अग्रभाग वैडूर्यमणिका बना हुआ है ॥१५॥ हर एक मानस्तम्भ दो-दो हजार कोणोंसे सहित हैं—दो-दो हजार पहलके हैं, नाना रत्नोंकी किरणोंसे मिले हुए हैं, उनकी चारों दिशाओंमें ऊपर सिद्धोंकी प्रतिमाएँ विराजमान हैं तथा उनकी रत्नमयी बड़ी-बड़ी पालिकाएँ हैं ॥१६॥ पालिकाओंके अग्रभाग पर जो कमल हैं उन पर सुवर्णके देदीप्यमान घट हैं, उन घटोंके अग्रभागसे लगी हुई सीढ़ियाँ हैं, तथा उन सीढ़ियों पर लक्ष्मीदेवीके अभिषेककी शोभा दिखलायी गयी है ॥१७॥ वे मानस्तम्भ लक्ष्मीदेवीके चूड़ारत्नके समान अपनी कान्तिके समूहसे बीस योजन तकका क्षेत्र प्रकाशमान करते रहते हैं तथा जिनका मन अहंकारसे युक्त है ऐसे देव और मनुष्योंको वहीं रोक देनेवाले हैं ॥१८॥ उन मानस्तम्भोंकी चारों दिशाएँ हंस, सारस और चकवोंके शब्दोंसे अत्यन्त सुन्दर हैं तथा उनमें खिले हुए कमलोंसे युक्त चार सरोवर हैं ॥१९॥

सरोवरोंके आगे एक वज्रमय कोट है जो छाती बराबर ऊँचा है, अत्यन्त कान्तिसे युक्त है, ऊँचाईसे दूना चौड़ा है और चारों ओरसे घेरे हुए है ॥२०॥ इस कोटको चारों ओरसे घेरकर एक परिखा स्थित है जिसकी भूमि जलके समान कान्तिवाले मणियोंसे निर्मित है, उसमें घुटनों प्रमाण गहरा पानी भरा है तथा वह पृथिवीरूपी स्त्रीकी नीली साड़ीके समान जान पड़ती है ॥२१॥ वह परिखा अत्यन्त स्वच्छ है तथा उसका जल स्वर्णमय कमलोंकी परागके समूहसे पीला-पीला हो रहा है अतएव उसमें प्रतिबिम्बित दिशारूप स्त्रियोंके मुख अङ्गरागसे सहितके समान जान पड़ते हैं ॥२२॥ उसके आगे चारों ओरसे घेरकर स्थित लताओंका वन सुशोभित है जो फूलोंके द्वारा दिशाओंके अन्त भागको सुगन्धित कर रहा है तथा पक्षियों और भ्रमरोंके समूहसे व्याप्त है ॥२३॥ उसके आगे देदीप्यमान सुवर्णके समान चमकीला, एवं विजय आदि चाँदीके बड़े-बड़े चार गोपुरोंसे सुशोभित कोट, चारों ओरसे घेरे हुए है ॥२४॥ उन गोपुरोंपर व्यन्तर जातिके देव द्वारपाल हैं जो कटक आदि

१. योजनान्यधिको—म० । २. रत्नभूतोदपालिकाः ङ० । ऽरत्नभूतोनुपालिका : क० । ३. चत्वारः म० । ४. व्यक्ति । ५. ककुप्चलं क०, ख० । ६. मुखायां क० । मुखयां घ० । ७. कुसुमामादिता सान्तं म० ।

मणितोरणपार्श्वेषु गोपुराणां स्फुरत्त्विषाम् । छत्रचामरभृङ्गारपूर्वाष्टशतकान्यमान् ॥२६॥
तद्गोपुरपुरो भान्ति प्रेक्षाशालास्त्रिभूमिकाः । द्विर्द्विर्वीथ्यंतयोर्नृत्यद्द्वात्रिंशत्सुरकन्यकाः ॥२७॥
भात्यशोकवनं प्राच्यां सप्तपर्णवनं त्वपाक् । प्रतीच्यां चम्पकवनमुदीच्यामाम्रसद्वनम् ॥२८॥
[1]ससिद्धप्रतिमोऽशोकः सप्तपर्णश्च चम्पकः । तथैवाम्रतरुस्तेषां वनानामधिपाः क्रमात् ॥२९॥
त्रिकोणाः मण्डलाकाराश्चतुरस्राश्च वापिकाः । वनेषु रत्नत[2]ट्यस्ताः शुद्धस्फटिकभूमयः ॥३०॥
चित्राः सतोरणाः रम्यास्तीर्थ्यास्तुङ्गैर्व[3]रण्डकैः । मञ्जुलागाहमानेष्वगाधा द्विक्रोशविस्तृताः ॥३१॥
नन्दा नन्दोत्तरानन्दानन्दवत्यभिनन्दिनी । नन्दघोषेत्यमूर्वाप्यः षडशोकवनस्थिताः ॥३२॥
विजयाभिजया जैत्री वैजयन्त्यपराजिताः । जयोत्तरेति षड्वाप्यः सप्तपर्णवनाश्रिताः ॥३३॥
कुमुदा नलिनी पद्मा पुष्करा विश्वोत्पला । कमलेत्यपि षड्वाप्यश्चम्पकाख्यवने मताः ॥३४॥
प्रभासा भास्वती भासा सुप्रभा भानुमालिनी । स्वयम्प्रभेति षड्वाप्यः सहकारवनोदिताः ॥३५॥
उदयो विजयः प्रीतिः ख्यातिश्चेति क्रमोदितैः । फलैः पूर्वादयो वाप्यः पूज्यन्ते तत्फलार्थिभिः ॥३६॥
तद्वापीपुष्पसन्दोहं यथोक्तं प्राप्य भाक्तिकाः । आस्तूपं क्रमशोऽभ्यर्च्य विशन्ति क्रमकोविदाः ॥३७॥
अन्तरेणोदयं प्रीतिं वापीतस्त्रिभुवोऽध्वसु । भान्ति नाटकशालास्ता हाटकोज्ज्वलमूर्तयः ॥३८॥
अध्यर्धक्रोशविस्तारा द्वात्रिंशज्ज्योतिषां स्त्रियः । तद्भुवो रत्ननिर्माणाः स्वच्छस्फटिकभित्तयः ॥३९॥

आभूषणोंसे सुशोभित हैं, अपने प्रभावसे अयोग्य व्यक्तियोंको दूर हटाते रहते हैं तथा जिनके हाथ मुद्गरोंसे उद्धत होते हैं ॥२५॥ देदीप्यमान कान्तिसे युक्त उन गोपुरोंके मणिमय तोरणोंकी दोनों ओर छत्र चमर तथा भृंगार आदि अष्टमङ्गल द्रव्य एक-सौ आठ एक सौ आठ संख्यामें सदा सुशोभित रहते हैं ॥२६॥ उन गोपुरोंके आगे वीथियोंकी दोनों ओर तीन-तीन खण्डकी दो-दो नाट्यशालाएँ हैं जिनमें बत्तीस-बत्तीस देव-कन्याएँ नृत्य करती हैं ॥२७॥ तदनन्तर पूर्वदिशामें अशोक वन, दक्षिणमें सप्तपर्ण वन, पश्चिममें चम्पक वन और उत्तरमें आम्रवन सुशोभित है ॥२८॥ इन चारों वनोंमें अशोक वनका अशोक वृक्ष, सप्तपर्ण वनका सप्तपर्ण वृक्ष, चम्पक वनका चम्पक वृक्ष और आम्रवनका आम्रवृक्ष स्वामी है। ये स्वामी वृक्ष सिद्धकी प्रतिमाओंसे सहित हैं अर्थात् इनके नीचे सिद्धोंकी प्रतिमाएँ विराजमान रहती हैं ॥२९॥ उन वनोंमें तिकोनी, चौकोनी और गोलाकार अनेक वापिकाएँ हैं। उन वापिकाओंके तट रत्ननिर्मित हैं तथा उनकी भूमि शुद्ध स्फटिकसे निर्मित है। ये सभी वापिकाएँ तोरणोंसे युक्त हैं, दर्शनीय हैं, सीढ़ियोंसे युक्त हैं, ऊँचे-ऊँचे वरण्डोंसे सुशोभित हैं, प्रवेश करनेमें गहरी हैं और दो कोश चौड़ी हैं ॥३०-३१॥ नन्दा, नन्दोत्तरा, आनन्दा, नन्दवती, अभिनन्दिनी, और नन्दघोषा ये छह वापिकाएँ अशोक वनमें स्थित हैं ॥३२॥ विजया, अभिजया, जैत्री, वैजयन्ती, अपराजिता और जयोत्तरा ये छह वापिकाएँ सप्तपर्ण वनमें स्थित हैं ॥३३॥ कुमुदा, नलिनी, पद्मा, पुष्करा, विश्वोत्पला और कमला ये छह वापियाँ चम्पक वनमें मानी गयी हैं ॥३४॥ और प्रभासा, भास्वती, भासा, सुप्रभा, भानुमालिनी और स्वयंप्रभा ये छह वापियाँ आम्रवनमें कही गयी हैं ॥३५॥ पूर्व आदि दिशाओंकी वापिकाएँ क्रमसे उदय, विजय, प्रीति और ख्याति नामक फल देती हैं तथा इन फलोंके इच्छुक मनुष्य इन वापिकाओंकी पूजा करते हैं ॥३६॥ क्रमके जाननेवाले भक्तजन उन वापिकाओंसे यथोक्त फूलोंका समूह प्राप्त कर स्तूपोंतक क्रम-क्रमसे जिनेन्द्र प्रतिमाओंकी पूजा करते हुए आगे प्रवेश करते हैं ॥३७॥ उदय और प्रीतिरूप फलको देनेवाली वापिकाओंके बीचके मार्गके दोनों ओर तीन खण्डकी सुवर्णमय देदीप्यमान बत्तीस नाट्यशालाएँ हैं ॥३८॥ ये नाट्यशालाएँ डेढ़ कोश चौड़ी हैं,

1. ससिद्धप्रतिमाशोकः म० । 2. रत्नतटोना म० । 3. धारारण्डकैः ङ० । अण्डकैः हंसादिपक्षिभिः ङ० टि० ।

तासु भक्त्या प्रनृत्यन्ति द्वात्रिंशज्ज्योतिषां स्त्रियः । हावभावविलासाढ्या[1] रसपुष्टिप्रपुष्टयः ॥४०॥
सचतुर्गोपुरास्तोऽपि पर्येति वनवेदिका[2] । दिव्या वज्रमयी वीथीपार्श्वयोर्ध्वजपङ्क्तयः ॥४१॥
त्रिदण्डविस्तृताश्चित्राः पीठिकाः प्रतिभक्तिगाः । योजनार्धोच्छ्रितास्तासु वंशा रत्नात्मपूर्वकाः ॥४२॥
तदग्रपालिकानद्धफलकाधिष्ठिता ध्वजाः । महान्तो दश चित्राः सकिङ्किणीचित्रपट्टकाः ॥४३॥
शिखिहंसगरुत्मत्स्रक्सिंहेभमकराम्बुजैः । वृषरूपेण चक्रेण समधिष्ठितमूर्तयः ॥४४॥
तेषामष्टशतं जातिर्द्वात्रिंशच्च चतुःशती । ध्वजसंख्या भवेदेषां सामान्येन समासतः ॥४५॥
सद्वात्रिंशत्सहस्राः स्युर्लक्षाः पञ्चाशदष्ट च । साधिका ध्वजसंख्येयं सैकदिक्का द्विसंगुणा ॥४६॥
षट्पञ्चाशत्सहस्राणि लक्षा षट्षष्टिरष्टसु । ध्वजकोट्यश्चतस्रः स्युश्चतुर्दिक्ष्वपि साधिकाः ॥४७॥
प्रीतिकल्याणमध्ये स्युरभितः पञ्चभूमिकाः । नृत्तशालाः[3] प्रनृत्यन्ति यत्र भावनयोषितः ॥४८॥
प्राकारोऽन्तः परीताय द्वितीयो हेमनिर्मितः । पञ्चभूमिकरत्नश्रीचतुर्गोपुरभूषितः ॥४९॥
स्फुटद्धाटकपीठस्थाः कम्बुकण्ठगुणोज्ज्वलाः । शातकुम्भमयाः कुम्भाः साम्भोजास्याः सहाम्भसः ॥५०॥
शोभन्ते तद्द्विपार्श्वेषु द्वौ द्वौ मङ्गलदर्शनाः । वेत्रदण्डधरा द्वास्थास्तद्द्वाःसु भवनाधिपाः ॥५१॥
पुरस्ताद्गोपुराणां च द्वे द्वे नाटकवेश्मनी । पुरस्तात्तु ततो हैमौ द्वौ द्वौ धूपघटौ स्फुटौ ॥५२॥
चतुर्दिक्सिद्धरूपाढ्यं द्विर्द्विः सिद्धार्थपादपम् । कल्पवृक्षवनं तत्र वीथ्यन्तेषु यथायथम् ॥५३॥

नाना प्रकारके बेलबूटोंसे सुशोभित हैं और उनकी भूमियाँ रत्नोंकी बनी हैं तथा उनकी दीवालें स्वच्छ स्फटिकसे निर्मित हैं ॥३९॥ उनमें ज्योतिषी देवोंकी बत्तीस-बत्तीस देवाङ्गनाएँ नृत्य करती हैं जो हाव, भाव और विलाससे युक्त तथा शृङ्गार आदि रसोंकी पुष्टिसे सुपुष्ट होती हैं ॥४०॥ उसके आगे चार गोपुरोंसे युक्त अत्यन्त सुन्दर वज्रमयी वनवेदी है जो पूर्वोक्त वनोंको चारों ओरसे घेरे हुए है। चार गोपुरोंके आगे चार वीथियाँ हैं और उनके दोनों पसवाड़ोंमें ध्वजाओंकी पंक्तियाँ फहराती रहती हैं ॥४१॥ प्रत्येक विभागमें उन ध्वजाओंकी पृथक्-पृथक् पीठिकाएँ हैं जो तीन धनुष चौड़ी हैं, चित्र-विचित्र हैं तथा उनपर आधा योजन ऊँचे रत्नमयी बाँस लगे हुए हैं ॥४२॥ उन बाँसोंके अग्रभागपर जो पटिया लगे हैं उनमें दश प्रकारकी रङ्ग-बिरङ्गी, छोटी-छोटी घण्टियों और चित्रपट्टकोंसे युक्त बड़ी ध्वजाएँ फहराती रहती हैं ॥४३॥ वे दस प्रकारकी ध्वजाएँ क्रमसे मयूर, हंस, गरुड, माला, सिंह, हाथी, मकर, कमल, बैल और चक्रके चिह्नसे चिह्नित होती हैं ॥४४॥ एक दिशामें एक जातिकी ध्वजाएँ एक-सौ आठ होती हैं और चारों दिशाओंको मिलकर एक जातिकी चार-सौ बत्तीस होती हैं। यह इनकी सामान्य रूपसे संक्षेपमें संख्या बतलायी है ॥४५॥ विशेष रीतिसे एक दिशामें एक करोड़ सोलह लाख चौंसठ हजार हैं और चारों दिशाओंमें चार करोड़ अड़सठ लाख छत्तीस हजार कुछ अधिक हैं ॥४६-४७॥

प्रीति और कल्याणरूप फल देनेवाली वापिकाओंके बीचके मार्गमें दोनों ओर पाँच खण्डकी नृत्यशालाएँ हैं जिनमें भवनवासी देवोंकी देवाङ्गनाएँ नृत्य करती हैं ॥४८॥ नृत्यशालाओंके आगे पाँच-पाँच खण्डके रत्नमयी चार गोपुरोंसे विभूषित स्वर्णनिर्मित दूसरा कोट है ॥४९॥ गोपुरोंके दोनों पसवाड़ोंमें देदीप्यमान सुवर्णके पीठोंपर स्थित, शङ्खके समान सुन्दर कण्ठोंमें पड़ी मालाओंसे सुशोभित मुखोंपर कमल धारण करनेवाले एवं जलसे भरे स्वर्णनिर्मित मङ्गलकलश दो-दोकी संख्यामें सुशोभित हैं। इस दूसरे कोटके द्वारोंपर भवनवासी देवोंके इन्द्र द्वारपाल हैं जो बेंतकी छड़ी धारण किये हुए पहरा देते हैं ॥ ५०-५१ ॥ गोपुरोंके आगे दो-दो नाट्यशालाएँ हैं और उनके आगे स्वर्णनिर्मित दो-दो धूपघट रखे हुए हैं ॥ ५२ ॥ उससे आगे चारों दिशाओंमें सिद्धोंकी प्रतिमाओंसे युक्त, दो दो सिद्धार्थ

---

१. विलासाढ्या म० । २. वनवेदिका म० । ३. नृत्तशालाः म० ।

सचतुर्गोपुरा ततोऽन्तर्वेदिका वनपातत:[1] । तोरणान्तरिताः सार्वाः स्तूपा नव नवाध्वसु ॥५४॥
पद्मरागमहास्तूपपर्यन्तेषु सभागृहाः । हेमरत्नमयाश्चि[2]त्रा मुनिदेवगणोचिताः ॥५५॥
नभःस्फटिकनिर्माणस्ततः सालस्तृतीयकः । चतुश्चित्र[3]महारत्नसप्तभूमिकगोपुरः ॥५६॥
विजयो विश्रुतं कीर्तिर्विमलोदयविश्वभुक् । वासवीर्यं वरं चेति पूर्वाख्या ख्यापिताष्टधा ॥५७॥
[4]वैजयन्तं शिवं ज्येष्ठं वरिष्ठानघधारणम् । याम्यमप्रतिघं चेति दक्षिणाख्याष्टधा मताः ॥५८॥
जयन्तामितसारं च सुधामाक्षोभ्यसुप्रभम् । वरुणं वरदं चेति पश्चिमाख्याष्टधा स्मृताः ॥५९॥
अपराजितमर्थाख्यमतुलार्थममोघकम् । उदयं चाक्षयं चोदक्कौबेरं पूर्णकामकम् ॥६०॥
सुरत्नासनमध्यस्था द्रष्टृणां भवदर्शिनः । तद्द्वारोभयपार्श्वेषु भान्ति मङ्गलदर्पणाः ॥६१॥
यैः प्रध्वस्तमहाध्वान्तप्रभावलयभास्वरैः । भास्वतो भासमुल्लङ्घ्य भासन्ते गोपुराण्यलम् ॥६२॥
विजयादिपुरद्वाःसु द्वाःस्थास्तिष्ठन्ति कल्पजाः । यथायथं ज्वलद्भूषा जयकल्याणकारिणः ॥६३॥
शालास्त्रयोऽप्यमी त्वेकद्वित्रिक्रोशोच्छ्रयोन्मिताः । मूलमध्योपरि[5]व्यासैस्तदर्धांशसुसम्मिताः ॥६४॥
स्वहस्तित्रयहीनोक्तप्रमाणजगतीतलाः । [6]हस्तोद्विद्धाश्च[7]विस्तीर्णव्यामा[8]र्धकपिशीर्षकाः ॥६५॥
ततोऽप्यन्तर्वणं नानातरुवल्लीगृहाकुलम् । मञ्चप्रेङ्खागिरिप्रेक्षागृहकोटिविराजितम् ॥६६॥
वेदिकाबद्धवीथीषु कल्याणादिजयाजिरम् । कदल्यः कदलीकल्पाः प्रकाशन्तेऽन्तरस्थिताः ॥६७॥

वृक्षोंसे सहित कल्पवृक्षोंका वन वीथियोंके अन्तमें यथारीति स्थित है ॥ ५३ ॥ तदनन्तर चार गोपुरोंसे सहित, वनकी रक्षा करनेवाली अन्तर्वेदिका है और मार्गोंमें तोरणोंसे युक्त, सबका भला करनेवाले नौ-नौ स्तूप हैं ॥ ५४ ॥ वे स्तूप पद्मराग मणियोंसे निर्मित होते हैं तथा उनके समीप स्वर्ण और रत्नोंके बने, मुनियों और देवोंके योग्य नाना प्रकारके सभागृह रहते हैं ॥ ५५ ॥ सभागृहोंके आगे आकाशस्फटिक मणिसे बना, नाना प्रकारके महारत्नोंसे निर्मित सात खण्डवाले चार गोपुरोंसे सुशोभित तीसरा कोट है ॥ ५६ ॥ इस कोटके पूर्व द्वारके विजय, विश्रुत, कीर्ति विमल, उदय, विश्वधुक्, वासवीर्य और वर ये आठ नाम प्रसिद्ध हैं ॥ ५७ ॥ दक्षिण द्वारके वैजयन्त, शिव, ज्येष्ठ, वरिष्ठ, अनघ, धारण, याम्य और अप्रतिघ ये आठ नाम कहे गये हैं ॥ ५८ ॥ पश्चिम द्वारके जयन्त, अमितसार, सुधाम, अक्षोभ्य, सुप्रभ, वरुण और वरद ये आठ नाम स्मरण किये गये हैं ॥ ५९ ॥ और उत्तर द्वारके अपराजित, अर्थ, अतुलार्थ, उदक, अमोघक, उदय, अक्षय और पूर्णकामक ये आठ नाम हैं ॥ ६० ॥ उन द्वारोंके दोनों पसवाड़ोंमें उत्तम रत्नमय आसनोंके मध्यमें स्थित मंगलरूप दर्पण सुशोभित हैं जो देखनेवालोंके पूर्व भव दिखलाते हैं ॥ ६१ ॥ ये दर्पण गाढ़ अन्धकारको नष्ट करनेवाले कान्तिके समूहसे सदा देदीप्यमान रहते हैं और उनसे गोपुर सूर्यकी प्रभाको तिरस्कृत कर अतिशय शोभायमान होते हैं ॥ ६२ ॥ विजयादिक गोपुरोंमें यथायोग्य 'जय हो' 'कल्याण हो' इन शब्दोंका उच्चारण करनेवाले एवं देदीप्यमान आभूषणोंसे युक्त कल्पवासी देव द्वारपाल रहते हैं ॥ ६३ ॥ ये तीनों कोट एक कोश, दो कोश और तीन कोश ऊँचे होते हैं तथा मूल मध्य और ऊपरी भागमें इनकी चौड़ाई ऊँचाईसे आधी होती है ॥ ६४ ॥ इन कोटोंके जगतीतलोंका प्रमाण अपनी ऊँचाईसे तीन हाथ कम कहा गया है और उनके ऊपर बने हुए बन्दरके शिरके आकारके कंगूरे एक हाथ तथा एक वितस्ति चौड़े और आधा वेमा ऊँचे कहे गये हैं ॥ ६५ ॥ उसके आगे नाना वृक्षों और लतागृहोंसे व्याप्त, मञ्च, प्रेङ्खागिरि और प्रेक्षागृहोंसे सुशोभित अन्तर्वण है ॥ ६६ ॥ वेदिकाओंसे बद्ध वीथियोंके बीचमें कल्याणजय नामका आँगन है और उसमें शाल्मली वृक्षके समान

१. वनपाठतः म० (?) । २. चित्रमुनि-म० । ३. चतुश्चित्रा म० । ४. वैजयन्त्यम् । ५. परिण्याहै- म०, क०, ङ० । ६. हस्तोद्विद्धाश्च म० । ७. विस्तीर्णाद्धान्तराः म०, ख० । ८. व्यासार्धं ख० ।

अन्तर्नाटकशाला स्यात्ततः कनकाभासप्रभाः । लोकपालविलासिन्यो यत्र नृत्यन्ति सन्ततम् ॥६८॥
तदन्तरे भवत्यन्यत्पीठं पीठगुणास्पदम् । प्रोद्गुरत्नजालास्ततिमिरावलिमण्डलम् ॥६९॥
सिद्धार्थपादपाः सन्ति सिद्धरूपविराजितैः । विटपैर्व्याप्य दिग्भागमिच्छयेव स्थितास्ततः ॥७०॥
स्तूपा द्वादशभूभूषा[1] भूषयन्त्यथ मन्दिरम् । हिरण्मया महामेरुं चत्वारो मेरवो यथा ॥७१॥
चतुर्दिग्गोपुरद्वारवेदिकालङ्कृताः शुभाः । चतस्रो दिक्ष्वथ ज्ञेयास्तत्स्वपि वापिकाः ॥७२॥
नन्दाभद्राजयापूर्णास्वभिख्याभिः क्रमोदिताः । यज्जलाभ्युक्षिताः पूर्वां जातिं जानन्ति जन्तवः ॥७३॥
ताः पवित्रजलापूर्णसर्वपापरुजाहराः । परापरभवाः सप्त दृश्यन्ते यासु पश्यताम् ॥७४॥
अथ गव्यूतमुद्विद्धं योजनाधिकविस्तृतम् । कटीमात्रवरण्डस्थकदलीध्वजसङ्कुलम् ॥७५॥
निरन्तरविशन्निर्यज्जनद्वारोच्चतोरणम् । त्रिलोकविजयाधानमहो भाति जयाजिरम् ॥७६॥
मुक्तावालुकविस्तीर्णप्रवालसिकतान्तरम् । सुरत्नकुसुमैश्चित्रं हेमाम्भोजैस्तदर्पितैः ॥७७॥
तपनीयरसालिप्तैस्तपनैरिव भूगतैः । तत्र तत्र यथादेशं मण्ड्यन्ते पृथुमण्डलैः ॥७८॥
प्रासादैर्मण्डपैश्चान्यैः सुखावासैः सुशोभते । देवासुरनरापूर्णैस्तत्र तत्र विचित्रितम् ॥७९॥
क्वचिदालेख्यहृद्यानि वेश्मानि क्वचिदन्तरे । पुराणाद्भुतभूतीनि चित्राख्यानान्वितानि च ॥८०॥
क्वचित्पुण्यफलप्राप्त्या पापपाकेन च क्वचित् । धर्माधर्मगतिं साक्षाद्दर्शयन्तीव पश्यतः ॥८१॥

ऊँचे एवं अन्तरसे स्थित केलाके वृक्ष प्रकाशमान हो रहे हैं ॥ ६७ ॥ तदनन्तर उन्हींके भीतर नाटकशाला है जिसमें सुवर्णके समान कान्तिकी धारक लोकपाल देवोंकी देवाङ्गनाएँ निरन्तर नृत्य करती रहती हैं ॥ ६८ ॥ उनके मध्यमें श्रेष्ठ गुणोंका स्थान तथा ऊँची उठनेवाली किरणोंसे सुशोभित रत्नावलीसे अन्धकारके समूहको नष्ट करनेवाला दूसरा पीठ है ॥ ६९ ॥ उसके आगे सिद्धार्थवृक्ष हैं जो सिद्धोंकी प्रतिमाओंसे सुशोभित शाखाओंसे इच्छापूर्वक ही मानो दिशाओंको व्याप्त कर स्थित हैं ॥ ७० ॥ उसके आगे एक मन्दिर है जिसे पृथ्वीके आभरण स्वरूप बारह स्तूप उस तरह सुशोभित करते रहते हैं जिस तरह कि सुवर्णमय चार मेरु पर्वत जम्बूद्वीपके महामेरुको सुशोभित करते रहते हैं ॥ ७१ ॥ इनके आगे चारों दिशाओंमें शुभ वापिकाएँ हैं जो चारों दिशाओंमें बने हुए गोपुर-द्वारों और वेदिकासे अलंकृत हैं ॥ ७२ ॥ नन्दा, भद्रा, जया और पूर्णा ये चार उनके नाम हैं। उन वापिकाओंके जलमें स्नान करनेवाले जीव अपना पूर्व-भव जान जाते हैं ॥ ७३ ॥ वे वापिकाएँ पवित्र जलसे भरी एवं समस्त पापरूपी रोगोंको हरनेवाली हैं। इनमें देखनेवाले जीवोंको अपने आगे-पीछेके सात भव दिखने लगते हैं ॥ ७४ ॥ वापिकाओंके आगे एक जयाङ्गण सुशोभित है जो एक कोश ऊँचा है, एक योजनसे कुछ अधिक चौड़ा है, कटि बराबर ऊँचे वरण्डोंपर स्थित कदली-ध्वजाओंसे व्याप्त है, जिनमें मनुष्य निरन्तर प्रवेश करते और निकलते रहते हैं ऐसे द्वारों और उच्च तोरणोंसे युक्त है, तीन लोककी विजयका आधार है, उसमें बीच-बीचमें मूँगाओंकी लाल-लाल बालूका अन्तर देकर मोतियोंकी सफेद बालू बिछी हुई है, उत्तम रत्नमय पुष्पों और रखे हुए सुवर्ण-कमलोंसे चित्र-विचित्र है। उस जयाङ्गणके भूभाग, जहाँ-तहाँ सुवर्ण रससे लिप्त अतएव पृथिवीपर आये हुए सूर्योके समान दिखनेवाले विशाल वर्तुलाकार मण्डलोंसे सुशोभित हैं। जहाँ तहाँ नाना प्रकारके चित्रोंसे चित्रित वह जयाङ्गण, देव, असुर और मनुष्योंसे परिपूर्ण भवनों, मण्डपों तथा अन्य सुखकर निवासस्थानोंसे सुशोभित है ॥ ७५-७९ ॥ कहीं चित्रोंसे सुन्दर और कहीं पुराणोंमें प्रतिपादित आश्चर्यकारी विभूतिसे युक्त तथा नाना प्रकारके कथानकोंसे सहित भवन बने हैं ॥ ८० ॥ वे भवन कहीं पुण्यके फलकी प्राप्तिसे देखनेवाले लोगोंको धर्मका साक्षात् फल दिखलाते हैं तो कहीं पापका

---

1. भूभागा क० ।

दानशीलतपःपूजाप्रारम्भास्तत्फलानि च । तद्वियोगविपत्तीश्च तानि श्रद्धापयन्त्यमून् ॥८२॥
स्फुरत्पुलकसंसक्तमुक्तादामोर्मिमन्मणिः । पताका घण्टिकारावरम्यवायानिलेरिता[1] ॥८३॥
उदंशुरत्नमालेव स्फुरच्छ्री वीचिरर्णवे । वीक्ष्यते व्योमनीन्द्राद्यैः कौतुकाद्येन चाभितः[3] ॥८४॥
राजतीन्द्रध्वजः सोऽयं तन्मध्ये हेमपीठिकाम्[4] । अलङ्कुर्वन् यथामूर्तो देहो देवजयश्रियः ॥८५॥
ततः स्तम्भसहस्रस्थो मण्डपोऽस्ति महोदयः । नाम्ना मूर्तिमती यत्र वर्तते श्रुतदेवता ॥८६॥
तां कृत्वा दक्षिणे भागे धीरैर्बहुश्रुतैर्वृतः । श्रुतं व्याकुरुते यत्र श्रायसं श्रुतकेवली ॥८७॥
तदर्धमानाश्चत्वारस्तत्परीवारमण्डपाः । आक्षेपण्यादयो येषु कथ्यन्ते कथकैः कथाः ॥८८॥
तत्प्रकीर्णकवासेषु चित्रेष्वाचक्षते स्फुटम् । ऋषयः स्वेष्टमर्थिभ्यः केवलादिमहर्द्धयः ॥८९॥
तपनीयमयं पीठं ततश्चित्रलताचितम् । यत्तद्वस्तूपहारेण यथाकालं समर्च्यते ॥९०॥
[5]पीठार्हश्रीपदद्वारं सरत्नकुसुमोत्करम् । मण्डलैः पूर्यते मध्ये[6] मार्गं चन्द्रार्कसप्रभैः ॥९१॥
अभितः स्वाश्रया द्वौ तं मण्डपौ स्तः प्रभासकौ । अभ्यर्च्यं[7] राजतो यत्र निधीशौ कामदायिनौ ॥९२॥
प्रेक्षाशाले विशाले स्तः प्रमदाख्ये ततोऽन्तरे[8] । यत्र कल्पनिवासिन्यो नृत्यन्त्यप्सरसः सदा ॥९३॥
विजयाजिरकोणेषु विलसत्केतुमालिनः । चत्वारो योजनोद्विद्धा लोकस्तूपा भवन्त्यमी ॥९४॥

परिपाक दिखाकर अधर्मका साक्षात् फल दिखलाते हैं ॥ ८१ ॥ वे भवन, उन दर्शकजनोंको दान, शील, तप और पूजाके प्रारम्भ तथा उनके फलोंकी एवं उनके अभावमें होनेवाली विपत्तियोंकी श्रद्धा कराते हैं ॥ ८२ ॥ उस जयाङ्गणके मध्यमें सुवर्णमय पीठको अलंकृत करता हुआ इन्द्रध्वज सुशोभित होता है जो ऐसा जान पड़ता है मानो भगवान्‌की विजयलक्ष्मीका मूर्तिधारी शरीर ही हो। उस इन्द्रध्वजमें देदीप्यमान गोले, लटकती हुई मोतियोंकी माला और जगमगाते हुए मणियोंसे युक्त एक पताका लगी रहती है। वह पताका वायुसे कम्पित होनेके कारण घंटियोंके शब्दसे अत्यन्त रमणीय जान पड़ती है। ऊपर उठती हुई किरणोंसे युक्त रत्नोंकी मालासे सुशोभित वह पताका जब आकाशमें फहराती है तब ऐसी जान पड़ती है मानो समुद्रमें लहर ही उठ रही हो। इन्द्रादिक देव उसे बड़े कौतुकसे देखते हैं ॥ ८३-८५ ॥

उसके आगे एक हजार खम्भोंपर खड़ा हुआ महोदय नामका मण्डप है जिसमें मूर्तिमती श्रुतदेवता विद्यमान रहती है ॥ ८६ ॥ उस श्रुतदेवताको दाहिने भागमें करके, बहुश्रुतके धारक अनेक धीर-वीर मुनियोंसे घिरे श्रुतकेवली कल्याणकारी श्रुतका व्याख्यान करते हैं ॥८७॥ महोदय मण्डपसे आधे विस्तारवाले चार परिवार मण्डप और हैं जिनमें कथा कहनेवाले पुरुष आक्षेपिणी आदि कथाएँ कहते रहते हैं ॥ ८८ ॥ इन मण्डपोंके समीपमें नाना प्रकारके फुटकर स्थान भी बने रहते हैं जिनमें बैठकर केवलज्ञान आदि महाऋद्धियोंके धारक ऋषि इच्छुकजनोंके लिए उनकी इष्ट वस्तुओंका निरूपण करते हैं ॥ ८९ ॥

उसके आगे नाना प्रकारकी लताओंसे व्याप्त एक सुवर्णमय पीठ रहता है जिसकी भव्यजीव नाना प्रकारकी सामग्रीसे समयानुसार पूजा करते हैं ॥ ९० ॥ उस पीठका श्रीपद नामका द्वार है जो रत्नों और फूलोंके समूहसे युक्त है तथा जो मार्गके बीचमें बने हुए सूर्य और चन्द्रमाके समान देदीप्यमान मण्डलोंसे परिपूर्ण है ॥ ९१ ॥ उस द्वारके दोनों ओर प्रभासक नामके दो मण्डप हैं जिनमें मार्गके सम्मुख, इच्छानुसार फल देनेवाले निधियोंके स्वामी दो देव सुशोभित रहते हैं ॥ ९२ ॥ उनके आगे प्रमदा नामकी दो विशाल नाट्यशालाएँ हैं जिनमें कल्पवासिनी अप्सराएँ सदा नृत्य करती रहती हैं ॥ ९३ ॥ विजयाङ्गणके कोनोंमें चार लोकस्तूप होते हैं जिनपर पताकाओंकी पंक्तियाँ फहराती रहती हैं, तथा जो एक योजन ऊँचे

---

१. –रावो म०,क०,ङ०। २ –लेरिताः म०,क०,ङ० । ३. वीभिता ख०,वीक्षिता म० । ४. हेमपीठका म० । ५. पीठार्हा म०,ङ० । ६. मध्ये मार्गश्चन्द्रार्क—म०,क०,ङ० । ७. अत्यर्घ्यं म० । ८. तमोऽम्बरे म० ।

अधो वेत्रासनाकारा झल्लरीसममध्यगाः । ऊर्ध्वं मृदङ्गसंस्थानाः स्यान्ततालाग्रनालिकाः ॥९५॥
स्वच्छस्फटिकरूपास्ते सुव्यक्तान्तर्निवेशकाः । दृश्यते लोकविन्यासो यत्रादर्शतले यथा ॥९६॥
मध्यलोकस्वरूपाभिव्यक्तनिर्माणमूर्तयः । मध्यलोका इति ख्याताः सन्ति स्तूपास्ततः परे ॥९७॥
मन्दरस्तूपनामानो मन्दराकारभास्वराः । चतुःकाष्ठचतुर्दिक्षु चैत्या भान्ति ततोऽपरे ॥९८॥
ततोऽन्ये कल्पवासाख्याः कल्पवासिनिवेशिनः । स्तूपास्ते कल्पवासर्द्धिं साक्षात्कुर्वन्ति पश्यताम् ॥९९॥
ग्रैवेयकपरास्तेऽन्ये नाम्ना स्तूपास्तथाविधाः । ततो ग्रैवेयकाभिख्यां दर्शयन्तीव मानवान् ॥१००॥
नवानुदिशनामानस्ततः स्तूपा विराजते । नवानुदिशम[1]ध्यक्षं पश्यन्ते[2] यत्र प्राणिनः ॥१०१॥
विजयादिचतुर्दिक्का[3] विमानोद्भासिनस्ततः । सर्वार्थदायिनः सन्ति स्तूपाः सर्वार्थसिद्धयः[4] ॥१०२॥
सिद्धस्तूपाः प्रकाशन्ते ततोऽन्ये स्फटिकामलाः । यत्रैव दर्पणच्छाया दृश्यते सिद्धरूपभाक् ॥१०३॥
भव्यकूटाख्यया स्तूपा भास्वत्कूटास्ततोऽपरे । यानभव्या न पश्यन्ति प्रभावान्धीकृतेक्षणाः ॥१०४॥
प्रमोहा नाम सन्त्यन्ये स्तूपा यत्र प्रमोहिताः । विस्मरन्ति यथाग्राहं[5] चिराभ्यस्तं च देहिनः ॥१०५॥
प्रबोधाख्या भवन्त्यन्ये स्तूपा यत्र प्रबोधिताः । तत्त्वमासाद्य संसारान्मुच्यन्ते[6] साधवो ध्रुवम् ॥१०६॥
एवमन्योऽन्यसंसक्तवेदिकातोरणोज्ज्वलाः । दश स्तूपाः समुत्तुङ्गाः राजन्त्यापरिधेः[7] क्रमात् ॥१०७॥
ततोऽस्ति क्रोशविस्तारः[8] परिधिर्धनुरुच्छ्रितिः । यत्र मण्डलभूभागं परियन्ति नरामराः ॥१०८॥

जीवोंके परिणाम मन्द, मध्यम और तीव्र होते हैं इसलिए हेतुमें भेद होनेसे आस्रव भी मन्द, मध्यम और तीव्र होता है ॥ ८३ ॥ जीवाधिकरण और अजीवाधिकरणके भेदसे आस्रवके दो भेद हैं। जीवाधिकरण आस्रवके मूलमें तीन भेद हैं—१ संरम्भ २ समारम्भ और ३ आरम्भ। इनमें-से प्रत्येकके कृत, कारित, अनुमोदना—तीन, मनोयोग, वचनयोग, काययोग तीन और क्रोध, मान, माया, लोभ रूप कषाय—चार इनसे परस्पर गुणित होनेपर छत्तीस-छत्तीस भेद होते हैं। तीनोंके मिलाकर एक-सौ आठ भेद हो जाते हैं॥ भावार्थ—किसी कार्यके करनेका मनमें विचार करना संरम्भ है। उसके साधन जुटाना समारम्भ है और कार्य रूपमें परिणत करना आरम्भ है। स्वयं कार्य करना कृत है, दूसरेसे कराना कारित है और कोई करे उसमें हर्ष मानना अनुमति है। मनसे किसी कार्यका विचार करना मनोयोग है, वचनसे प्रकट करना वचनयोग है और कायसे कार्य करना काययोग है। क्रोध कषायसे प्रेरित हो किसी कार्यको करना क्रोध कषाय है, मानसे प्रेरित हो करना मान कषाय है, मायासे प्रेरित हो करना माया कषाय है और लोभसे प्रेरित होकर करना लोभ कषाय है। मूलमें संरम्भ आदिके भेदसे आस्रव तीन प्रकारका होता है, इनमें-से प्रत्येक भेद कृत, कारित अनुमोदनाकी अपेक्षा तीन प्रकारका होता है, फिर यही तीन भेद तीन योगके निमित्तसे होते हैं, इसलिए तीनका तीनमें गुणा करनेपर नौ भेद होते हैं। तदनन्तर यही नौ भेद क्रोधादि कषायकी अपेक्षा चार-चार प्रकारके होते हैं इसलिए नौमें चारका गुणा करनेपर छत्तीस भेद होते हैं। छत्तीस भेद संरम्भके, छत्तीस समारम्भके और छत्तीस आरम्भके, तीनोंको मिलाकर एक सौ आठ भेद होते हैं। अथवा दूसरी तरहसे संरम्भादि तीनमें कृत कारितादिका गुणा करनेपर नौ भेद हुए, उनमें तीन योगका गुणा करनेपर सत्ताईस हुए और उसमें क्रोधादि चार कषायका गुणा करनेपर एक-सौ आठ भेद होते हैं। ये सब परिणाम जीवकृत हैं अतः इन्हें जीवाधिकरण आस्रव कहते हैं ॥८४–८५॥ दो प्रकारकी निर्वर्तना, चार प्रकारका निक्षेप, दो प्रकारका संयोग और तीन प्रकारका निसर्ग ये अजीवाधिकरण आस्रवके भेद हैं ॥८६॥ मूलगुण निर्वर्तना और उत्तरगुण निर्वर्तनाके भेदसे निर्वर्तनाके दो भेद हैं। शरीर, वचन, मन तथा श्वासोच्छ्वास आदिकी रचना होना मूलगुण निर्वर्तना है और काष्ठ, पाषाण, मिट्टी आदिसे चित्राम आदिका बनाना उत्तरगुण निर्वर्तना है ॥८७॥ सहसा निक्षेपाधिकरण, दुष्प्रमृष्ट निक्षेपाधिकरण, अनाभोग निक्षेपाधिकरण और अप्रत्यवेक्षित निक्षेपाधिकरण इन चार भेदोंसे निक्षेपाधिकरण चार प्रकारका होता है। शीघ्रतासे किसी वस्तुको रख देना सहसा निक्षेप है। दुष्टतापूर्वक साफ की हुई भूमिमें किसी वस्तुको रखना दुष्प्रमृष्ट निक्षेप है। अव्यवस्थाके साथ चाहे जहाँ किसी वस्तुको रख देना अनाभोग निक्षेप है और बिना देखी-

१. तीव्रमन्दज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः ॥६॥ त० सू० अ० ६ । २. अधिकरणं जीवाजीवाः ॥ ७ ॥ त० सू० अ० ६ । ३. आद्यं संरम्भसमारम्भारम्भयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥ ८ ॥ त० सू० अ० ६ । ४ निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः ॥९॥ त० सू० अ० ६ । ५. परम् साम्प्रत्यवेदितौ म० ।

भक्तपानोपकरणसंयोगद्वितयात्मना । तद्द्वैविध्यं हि संयोगकारणस्य च कीर्तितम् ॥८९॥
यन्निसर्गाधिकरणं तत्त्रैविध्यं प्रपद्यते । वाङ्मनःकायपूर्वैस्तु निसर्गैस्तत्प्रवर्तकैः ॥९०॥
कर्मास्रवाणां भेदोऽयं सामान्येन निरूपितः । भेदः कर्मविशेषाणामास्रवस्य विशिष्यते ॥९१॥
[1]प्रदोषनिह्नवा[2]दानविघ्नासादनदूषणाः । ज्ञानस्य दर्शनज्ञानावृत्त्योरास्रवहेतवः ॥९२॥
[3]दुःखशोकवधाक्रन्दतापाः सपरिदेवनाः । असद्वेद्यास्रवद्वाराः स्वपरोभयवर्तिनः ॥९३॥
[4]दया सकलभूतेषु व्रतिष्वत्यनुरागता । सरागसंयमो दानं क्षान्तिः शौचं यथोदितम् ॥९४॥
अर्हत्पूजादितात्पर्यं बालवृद्धतपस्विषु । वैयावृत्त्यादयो ज्ञेयाः सद्वेद्यास्रवहेतवः ॥९५॥

शोधी भूमिमें किसी वस्तुको रख देना अप्रत्यवेक्षित निक्षेप है॥८८॥ भक्तपान संयोग और उपकरण संयोगके भेदसे संयोगाधिकरण आस्रव दो प्रकारका कहा गया है। भोजन और पानको अन्य भोजन तथा पानमें मिलाना भक्तपान संयोग है तथा बिना विवेकके उपकरणोंका परस्पर मिलाना उपकरण संयोग है जैसे शीतस्पर्श युक्त पीछीसे घाममें संतप्त कमण्डलुका सहसा पोंछना आदि॥८९॥ वाङ्निसर्ग, मनोनिसर्ग और कायनिसर्गके भेदसे निसर्गाधिकरण आस्रव तीन रूपताको प्राप्त होता है। वचनकी स्वच्छन्द प्रवृत्तिको वाङ्निसर्ग कहते हैं, मनकी स्वच्छन्द प्रवृत्तिको मनोनिसर्ग कहते हैं और कायकी स्वच्छन्द प्रवृत्तिको काय निसर्ग कहते हैं॥९०॥ इस प्रकार यह सामान्य रूपसे कर्मास्रवोंका भेद कहा। अब ज्ञानावरणादिके भेदसे युक्त विशिष्ट कर्मोंके आस्रवका भेद कहा जाता है॥९१॥ ज्ञानके विषयमें किये हुए प्रदोष, निह्नव, अदान, विघ्न, आसादन और दूषण ज्ञानावरणके आस्रव हैं और दर्शनके विषयमें किये हुए प्रदोष आदि दर्शनावरणके आस्रव हैं। मोक्षके साधनभूत तत्त्वज्ञानका निरूपण होनेपर कोई मनुष्य चुपचाप बैठा है परन्तु भीतर-ही-भीतर उसका परिणाम कलुषित हो रहा है इसे प्रदोष कहते हैं। किसी कारणसे 'मेरे पास नहीं है' अथवा 'मैं नहीं जानता हूँ' इत्यादि रूपसे ज्ञानको छिपाना निह्नव है। मात्सर्यके कारण देने योग्य ज्ञान भी दूसरेको नहीं देना सो अदान है। ज्ञानमें अन्तराय डाल देना सो विघ्न है। दूसरेके द्वारा प्रकाशमें आने योग्य ज्ञानको काय और वचनसे रोक देना आसादन है और प्रशस्त ज्ञानमें दोष लगाना दूषण है॥९२॥

वेदनीय कर्मके दो भेद हैं—१ असातावेदनीय और २ सातावेदनीय। इनमें-से निज, पर और दोनोंके विषयमें होनेवाले दुःख, शोक, वध, आक्रन्दन, ताप और परिदेवन ये असातावेदनीयके आस्रव हैं। पीड़ारूप परिणामको दुःख कहते हैं। अपने उपकारक पदार्थोंका संबन्ध नष्ट हो जानेपर परिणामोंमें विकलता उत्पन्न होना शोक है। आयु, इन्द्रिय तथा बल आदि प्राणोंका वियोग करना वध है। संताप आदिके कारण अश्रुपात करते हुए रोना आक्रन्दन है। लोकमें अपनी निन्दा आदिके फैल जानेसे हृदयमें तीव्र पश्चात्ताप होना ताप है। और उपकारीका वियोग होनेपर उसके गुणोंका स्मरण तथा कीर्तन करते हुए इस तरह विलाप करना जिससे सुननेवाले दयार्द्र हो जावें उसे परिदेवन कहते हैं॥९३॥ समस्त प्राणियोंपर दया करना, व्रती जनोंपर अनुराग रखना, सरागसंयम, दान, क्षमा, शौच, अर्हन्त भगवान्‌की पूजामें तत्पर रहना और बालक तथा वृद्ध तपस्वियोंकी वैयावृत्ति आदि करना सातावेदनीय-

१. तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥ १० ॥ त० सू० अ० ६। २. निह्नवादाने म०, ङ०। ३. दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थान्यसद्वेद्यस्य ॥११॥ त० सू० अ० ६। ४. भूतव्रत्यनुकम्पादानसरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य ॥१२॥ त० सू० अ० ६।

[1]केवलिश्रुतसंघेषु धर्मदेवेष्ववर्णवाक् । हेतुर्दर्शनमोहस्याप्यास्रवस्य निरूपितः ॥९६॥
[2]उदयात्तु कषायाणां परिणामोऽपि तीव्रकः । हेतुश्चारित्रमोहस्य नानाभेदास्रवस्य तु ॥९७॥
तत्र स्वान्यकषायाणामुत्पादेन समुद्धता । कषायवेदनीयस्य हेतुः सद्वृत्तदूषणम्[3] ॥९८॥
प्रहासशीलतादिः स्याद्धर्मोपहसनादिभिः । सहास्यवेदनीयस्य महास्रवनिबन्धनम् ॥९९॥
विचित्रक्रीडनासक्तिर्व्रतशीलारोचनम् । रत्याख्यवेदनीयस्य हेतुः स्यादास्रवो महान् ॥१००॥
परारतिविधानं च रतेरपि विनाशनम् । अरतेर्वेदनीयस्य हेतुर्दुःशीलसेवनम् ॥१०१॥
स्वशोकोत्पादनं चान्यशोकवृद्ध्यभिनन्दनम्[4] । कुशोकवेदनीयस्य नित्यमास्रवकारणम् ॥१०२॥
भयोत्पादनमन्येषां स्वभयस्य च भावनम् । भयाख्यवेदनीयस्य सन्ततो हेतुरास्रवे ॥१०३॥
कुशलाचरणाचारजुगुप्सापरिवादिता । जुगुप्सावेदनीयस्य हेतुरास्रवगोचरः ॥१०४॥
अतिसंधानपरता परस्यालीकवादिता । प्रवृद्धरागतादि स्त्रीवेदनीयस्य कारणम् ॥१०५॥
सानुत्सेकतनुक्रोधस्वदारपरितोषिताः । हेतुः पुंवेदनीयस्य कर्मणः संसृतौ मतः ॥१०६॥
प्राचुर्यं च कषायाणां गुह्याङ्गव्यपरोपणम् । परस्त्रीसक्तिरन्यस्य वेदनीयस्य हेतवः ॥१०७॥

के आस्रव हैं ॥९४-९५॥ केवली, श्रुत, संघ, धर्म तथा देवका अवर्णवाद करना—झूठे दोष लगाना दर्शन मोहनीय कर्मके आस्रवके हेतु कहे गये हैं। केवली कवलाहारसे जीवित रहते हैं इत्यादि असद्भूत दोषोंका निरूपण करना केवलीका अवर्णवाद है। शास्त्रमें मांस भक्षण आदि निषिद्ध कार्योंका उल्लेख है इत्यादि कहना श्रुतका अवर्णवाद है। ऋषि, मुनि, यति और अनगार इन चार प्रकारके मुनियोंका समूह संघ कहलाता है-इनके दोष कहना अर्थात् ये शरीरसे अपवित्र हैं, शूद्र-तुल्य हैं, नास्तिक हैं आदि कहना संघका अवर्णवाद है। जिनेन्द्र भगवान्‌के द्वारा कहा हुआ धर्म निर्गुण है और उसके पालन करनेवाले असुर होते हैं इत्यादि कहना धर्मका अवर्णवाद है और देव मांस-मदिराका सेवन करते हैं, इत्यादि कहना देवका अवर्णवाद है ॥९६॥ कषायके उदयसे जो तीव्र परिणाम होता है वह चारित्र मोहके नाना-प्रकारके आस्रवोंका कारण है ॥९७॥ चारित्र मोहनीयके कषायवेदनीय और अकषायवेदनीय-की अपेक्षा दो भेद हैं। इनमें-से निज तथा पर को कषाय उत्पन्न कर उद्धत वृत्तिका धारण करना तथा तपस्विजनोंके सम्यक् चारित्रमें दूषण लगाना कषायवेदनीयके आस्रव हैं। धर्मका उपहास आदि करनेसे हास्यरूप स्वभावका होना अर्थात् धर्मकी हँसी उड़ाकर प्रसन्नताका अनुभव करना हास्य अकषायवेदनीयका आस्रव है ॥९८-१००॥ दूसरोंको अरति उत्पन्न करना, रतिको नष्ट करना और दुष्ट स्वभावके धारक जनोंकी सेवा करना रति नामक अकषायवेदनीयके आस्रव हैं ॥१०१॥ अपने-आपको शोक उत्पन्न करना तथा दूसरोंके शोककी वृद्धि देख प्रसन्नता-का अनुभव करना शोक अकषायवेदनीयके आस्रव हैं ॥१०२॥ दूसरोंको भय उत्पन्न करना तथा अपने भयकी चिन्ता करना भय अकषायवेदनीयके आस्रव हैं ॥१०३॥ उत्तम आचरण करनेवाले मनुष्योंके आचारमें ग्लानि करना तथा उनकी निन्दा करना जुगुप्सा अकषाय-वेदनीयका आस्रव है ॥१०४॥ दूसरेको धोखा देनेमें अत्यधिक तत्पर रहना, असत्य बोलना तथा रागकी अधिकता होना स्त्री अकषायवेदनीयके आस्रव हैं ॥१०५॥ नम्रतासे सहित होना, क्रोधकी न्यूनता होना और अपनी स्त्रीमें संतोष रखना ये संसारमें पुंवेद अकषायवेदनीयके आस्रव माने गये हैं ॥१०६॥ कषायोंकी प्रचुरता होना, गुह्य अङ्गोंका छेदन करना तथा परस्त्री-में आसक्ति रखना ये नपुंसक अकषायवेदनीयके आस्रव हैं ॥१०७॥

---

१. केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शनमोहस्य ॥१३॥ त० सू० अ० ६ । २. कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥१४॥ त० सू० अ० ६ । ३. सद्वृत्तभूषणम् म० । ४. निन्दनम् म० ।

[1]नारकस्यायुषो योगो बह्वारम्भपरिग्रहैः । तैर्यग्योनस्य[2] माया तु हेतुरास्रवणस्य सः ॥१०८॥
[3]मानुषस्यायुषो हेतुरल्पारम्भपरिग्रहैः । [4]सन्तुष्टस्याव्रतत्वादि मार्दवं च स्वभावतः[5] ॥१०९॥
[6]सम्यक्त्वं च व्रतित्वं च[7] बालतापस्ययोगिता । अकामनिर्जरा चास्य दैवस्यास्रवहेतवः ॥११०॥
[8]स्वयोगवक्रता चान्यविसंवादनयोगिता । हेतुर्नाम्नोऽशुभस्यैव [9]शुभस्यातिसुयोगता ॥१११॥
[10]तथा नामविशेषस्य तीर्थकृत्त्वस्य हेतवः । सद्दर्शनविशुद्ध्याद्याः षोडशातिविनिर्मलाः ॥११२॥
[11]सद्गुणाच्छादनं निन्दा परेषां स्वस्य शंसनम् । असद्गुणसमाख्यानं नीचैर्गोत्रास्रवावहाः ॥११३॥
[12]सनीचैर्वृत्त्यनुत्सेकौ हेतुरुक्तविपर्ययः । उच्चैर्गोत्रेऽन्तरायस्य[13] दानविघ्नादिकर्तृता ॥११४॥
शुभः पुण्यस्य सामान्यादास्रवः प्रतिपादितः । तद्विशेषप्रतीत्यर्थमिदं तु प्रतिपद्यते ॥११५॥
[14]हिंसानृतवचश्चौर्याब्रह्मचर्यपरिग्रहात् । विरतिर्देशतोऽणु स्यात्सर्वतस्तु महद्व्रतम् ॥११६॥
[15]महाणुव्रतयुक्तानां स्थिरीकरणहेतवः । व्रतानामिह पञ्चानां प्रत्येकं पञ्च भावनाः ॥११७॥

बहुत आरम्भ और बहुत परिग्रह रखना नरकायुका आस्रव है। मायाचार तिर्यञ्च आयुका आस्रव है ॥१०८॥ थोड़ा आरम्भ और थोड़ा परिग्रह रखनेसे मनुष्य आयुका आस्रव होता है। संतोष धारण करते हुए अव्रत अवस्था होना तथा स्वभावसे कोमल परिणामी होना भी मनुष्यायुके आस्रव हैं ॥१०९॥ सम्यग्दर्शन, व्रतीपना, बालतप तथा अकामनिर्जरा ये देवायुके आस्रव हैं ॥११०॥ अपने योगोंकी कुटिलता और दूसरोंके साथ विसंवाद ये अशुभ नामकर्मके आस्रव हैं और अपने योगोंकी सरलता तथा विसंवादका अभाव होना शुभ नामका आस्रव है ॥१११॥ नामकर्मका विशेष भेद जो तीर्थंकर प्रकृति है उसके आस्रव, अत्यन्त निर्मलताको प्राप्त दर्शनविशुद्धि आदि सोलह भावनाएँ हैं ॥११२॥ दूसरोंके विद्यमान गुणोंको छिपाना, अपनी प्रशंसा करना तथा अपने अविद्यमान गुणोंका कथन करना ये नीच-गोत्रकर्मके आस्रव हैं ॥११३॥ विनयपूर्ण प्रवृत्ति करना तथा अहंकार नहीं करना उच्चगोत्रके आस्रव हैं और दान आदिमें विघ्न करना अन्तरायकर्मके आस्रव हैं ॥११४॥

पुण्यकर्मका जो शुभास्रव होता है उसका सामान्यरूपसे वर्णन ऊपर किया जा चुका है। अब उसकी विशेष प्रतीतिके लिए यह प्रतिपादन किया जा रहा है ॥११५॥ हिंसा, झूठ, चोरी, कुशील और अपरिग्रह इन पाँच पापोंसे विरक्त होना सो व्रत है। यह व्रत अणुव्रत और महाव्रतके भेदसे दो प्रकारका है। उक्त पापोंसे एकदेश विरत होना अणुव्रत है और सर्वदेश विरत होना महाव्रत है ॥११६॥ महाव्रत और अणुव्रतसे युक्त मनुष्योंको अपने व्रतमें स्थिर रखनेके लिए उक्त पाँचों व्रतोंमें प्रत्येककी पाँच-पाँच भावनाएँ कही जाती हैं ॥११७॥ सम्यक्

---

१. बह्वारम्भपरिग्रहत्वं नारकस्यायुषः ॥१५॥ २. माया तैर्यग्योनस्य ॥१६॥ ३. अल्पारम्भपरिग्रहत्वं मानुषस्य ॥१७॥ ४. निश्शीलव्रतित्वं च सर्वेषाम् ॥१९॥ ५. स्वभावमार्दवं च ॥१८॥ ६. सम्यक्त्वं च ॥२१॥ ७. सरागसंयमसंयमासंयमकामनिर्जराबालतपांसि दैवस्य ॥२०॥ ८. योगवक्रता विसंवादनं चाशुभस्य नाम्नः ॥२२॥ ९. तद्विपरीतं शुभस्य ॥२३॥ १०. दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतीचारोऽभीक्ष्णज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य ॥२४॥ त० सू० अ० ६। ११. परात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२५॥ १२. तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥२६॥ १३. विघ्नकरणमन्तरायस्य ॥२७॥ त० सू० अ० ६। १४. हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥१॥ देशसर्वतोऽणुमहती ॥२॥ त० सू० अ० ७। १५. तत्स्थैर्यार्थं भावनाः पञ्च पञ्च ॥३॥

[1]सुवाग्गुप्तिमनोगुप्ती स्वकाले वीक्ष्य भोजनम् । ईर्यादाननिक्षेपसमिती प्राग्व्रतस्य ताः[2] ॥११८॥
[3]स्वक्रोधलोभभीरुत्वहास्यहानोद्धभाषणाः । द्वितीयस्य व्रतस्यैता भाविताः पञ्च भावनाः ॥११९॥
[4]शून्यान्यमोचितागारवासान्यानुपरोधिताः । भैक्ष्यशुद्ध्यविसंवादौ तृतीयस्य व्रतस्य ताः ॥१२०॥
[5]स्त्रीरागकथाश्रुत्या रम्याङ्गेक्षाङ्गसंस्कृतः । रसपूर्वरतस्मृत्योस्त्यागास्तुर्यव्रतस्य ताः ॥१२१॥
[6]इष्टानिष्टेन्द्रियार्थेषु रागद्वेषविमुक्तयः । यथास्वं पञ्च विज्ञेयाः पञ्चमव्रतभावनाः ॥१२२॥
[7]हिंसादिष्विह चामुष्मिन्नपायावद्यदर्शनम् । व्रतस्थैर्यार्थमेवात्र भावनीयं मनीषिभिः ॥१२३॥
[8]दुःखमेवेति चाभेदादसद्वेद्यादिहेतवः । नित्यं हिंसादयो दोषा भावनीयाः मनीषिभिः ॥१२४॥
[9]मैत्रीप्रमोदकारुण्यमाध्यस्थ्यं च यथाक्रमम् । सत्त्वे गुणाधिके क्लिष्टे ह्यविनेये च भाव्यते ॥१२५॥
[10]स्वसंवेगविरागार्थं नित्यं संसारभीरुभिः । जगत्कायस्वभावौ च भावनीयौ मनस्विभिः ॥१२६॥
[11]इन्द्रियाद्या दश प्राणाः प्राणिभ्योऽत्र प्रमादिना । यथासंभवमेषां हि हिंसा तु व्यपरोपणम् ॥१२७॥

वचनगुप्ति, सम्यग्मनोगुप्ति, भोजनके समय देखकर भोजन करना (आलोकितपान भोजन) ईर्यासमिति और आदाननिक्षेपण समिति ये पाँच अहिंसा व्रतकी भावनाएँ हैं ॥११८॥ अपने क्रोध,लोभ,भय और हास्यका त्याग करना तथा प्रशस्त वचन बोलना (अनुवोचिभाषण) ये पाँच सत्यव्रतकी भावनाएँ हैं ॥११९॥ शून्यागारावास, विमोचितावास, परोपरोधाकरण, भैक्ष्यशुद्धि और सधर्माविसंवाद ये पाँच अचौर्य व्रतकी भावनाएँ हैं ॥१२०॥ स्त्री—रागकथा श्रवण त्याग, अर्थात् स्त्रियोंमें राग बढ़ानेवाली कथाओंके सुननेका त्याग करना, उनके मनोहर अङ्गोंके देखनेका त्याग करना, शरीरकी सजावटका त्याग करना, गरिष्ठ रसका त्याग करना एवं पूर्व कालमें भोगे हुए रतिके स्मरणका त्याग करना ये पाँच ब्रह्मचर्य व्रतकी भावनाएँ हैं ॥१२१॥ पञ्च इन्द्रियोंके इष्ट-अनिष्ट विषयोंमें यथायोग्य राग-द्वेषका त्याग करना ये पाँच अपरिग्रह व्रतकी भावनाएँ हैं ॥१२२॥ बुद्धिमान् मनुष्योंको व्रतोंकी स्थिरताके लिए यह चिन्तवन भी करना चाहिए कि हिंसादि पाप करनेसे इस लोक तथा परलोकमें नाना प्रकारके कष्ट और पापबन्ध होता है ॥ १२३ ॥ अथवा नीतिके जानकार पुरुषोंको निरन्तर ऐसी भावना करनी चाहिए कि ये हिंसा आदि दोष दुःख रूप ही हैं। यद्यपि ये दुःखके कारण हैं दुःख रूप नहीं परन्तु कारण और कार्यमें अभेद विवक्षासे ऐसा चिन्तवन करना चाहिए ॥१२४॥ मैत्री, प्रमोद, कारुण्य और माध्यस्थ्य ये चार भावनाएँ क्रमसे प्राणी-मात्र, गुणाधिक, दुःखी और अविनेय जीवोंमें करना चाहिए। भावार्थ—किसी जीवको दुःख न हो ऐसा विचार करना मैत्री भावना है। अपनेसे अधिक गुणी मनुष्योंको देखकर हर्ष प्रकट करना प्रमोद भावना है। दुःखी मनुष्योंको देखकर हृदयमें दयाभाव उत्पन्न होना करुणा भावना है और अविनेय-मिथ्यादृष्टि जीवोंमें मध्यस्थ भाव रखना माध्यस्थ्य भावना है ॥ १२५ ॥ अपनी आत्मामें संवेग और वैराग्य उत्पन्न करनेके लिए संसारसे भयभीत रहनेवाले विचारक मनुष्योंको सदा संसार और शरीरके स्वभावका चिन्तवन करना चाहिए ॥१२६॥

इस संसारमें प्राणियोंके लिए यथासंभव इन्द्रियादि दश प्राण प्राप्त हैं। प्रमादी बनकर

१. स्ववाग् म० । २. वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पञ्च ॥ ४ ॥ ३. क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचीभाषणं च पञ्च ॥ ५ ॥ ४. शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसधर्माविसंवादाः पञ्च ॥ ६ ॥ ५. स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पञ्च ॥ ७ ॥ ६. मनोज्ञामनोज्ञेन्द्रियविषयरागद्वेषवर्जनानि पञ्च ॥ ८ ॥ ७. हिंसादिष्विहामुत्रापायावद्यदर्शनम् ॥ ९ ॥ ८. दुःखमेव वा ॥ १० ॥ ९. मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानि च सत्त्वगुणाधिकक्लिश्यमानाविनेयेषु ॥११॥ १०. स्वसंवेगादिरागार्थं म०, जगत्कायस्वभावौ वा संवेगवैराग्यार्थम् ॥ १२ ॥ ११. प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा ॥ १३ ॥

प्राणिनो दुःखहेतुत्वादधर्माय वियोजनम् । प्राणानां तु प्रमत्तस्य समितस्य न बन्धकृत्[1] ॥१२८॥
स्वयमेवात्मनात्मानं हिनस्त्यात्मा प्रमादवान्[2] । पूर्वं प्राण्यन्तराणां तु पश्चात्स्याद्वा न वा वधः[3] ॥१२९॥
सदर्थमसदर्थं च प्राणिपीडाकरं वचः । असत्यमनृतं प्रोक्तमृतं प्राणिहितं वचः ॥१३०॥
[4]अदत्तस्य स्वयं ग्राहो वस्तुनश्चौर्यमीर्यते । संक्लेशपरिणामेन प्रवृत्तिर्यत्र तत्र तत् ॥१३१॥
अहिंसादिगुणा यस्मिन् बृंहन्ति ब्रह्म तत्स्वतः । [5]अब्रह्मान्यत्तु[6] रत्यर्थं स्त्रीपुंसमिथुनेहितम् ॥१३२॥
गवाश्वमणिमुक्तादौ चेतनाचेतने धने । बाह्येऽबाह्ये च रागादौ हेयो[7] मूर्च्छा परिग्रहः[8] ॥१३३॥
तेभ्यो विरतिरूपाण्यहिंसादीनि व्रतानि हि । महत्त्वाणुत्वयुक्तानि यस्य सन्ति व्रती तु सः ॥१३४॥
सत्यपि व्रतसंबन्धे निःशल्यस्तु[9] व्रती मतः[10] । मायानिदानमिथ्यात्वं शल्यं शल्यमिव त्रिधा ॥१३५॥
[11]सागारश्चानगारश्च द्वाविह व्रतिनौ मतौ । [12]सागारोऽणुव्रतोऽत्र स्यादनगारो महाव्रतः ॥१३६॥
सागारो रागभावस्थो वनस्थोऽपि कथञ्चन । निवृत्तरागभावो यः सोऽनगारो गृहोषितः ॥१३७॥
त्रसस्थावरकायेषु त्रसकायाऽपरोपणात् । विरतिः प्रथमं प्रोक्तमहिंसाख्यमणुव्रतम् ॥१३८॥

उनका विच्छेद करना सो हिंसा पाप है ॥१२७॥ प्राणियोंके दुःखका कारण होनेसे प्रमादी मनुष्य जो किसीके प्राणोंका वियोग करता है वह अधर्मका कारण है—पापबन्धका निमित्त है परन्तु समितिपूर्वक प्रवृत्ति करनेवाले प्रमादरहित जीवके कदाचित् यदि किसी जीवके प्राणोंका वियोग हो जाता है तो वह उसके लिए बन्धका कारण नहीं होता है ॥१२८॥ प्रमादी आत्मा अपनी आत्माका अपने-आपके द्वारा पहले घात कर लेता है पीछे दूसरे प्राणियोंका वध होता भी है और नहीं भी होता है ॥१२९॥ विद्यमान अथवा अविद्यमान वस्तुको निरूपण करनेवाला प्राणि-पीड़ाकारक वचन असत्य अथवा अनृत वचन कहलाता है। इसके विपरीत जो वचन प्राणियोंका हित करनेवाला है वह ऋत अथवा सत्यवचन कहलाता है ॥१३०॥ बिना दी हुई वस्तुका स्वयं ले लेना चोरी कही जाती है। परन्तु जहाँ संक्लेश परिणामपूर्वक प्रवृत्ति होती है वहीं चोरी होती है ॥१३१॥ जिसमें अहिंसादि गुणोंकी वृद्धि हो वह वास्तविक ब्रह्मचर्य है। इससे विपरीत संभोगके लिए स्त्री-पुरुषोंकी जो चेष्टा है वह अब्रह्म है ॥१३२॥ गाय, घोड़ा, मणि, मुक्ता आदि चेतन, अचेतनरूप बाह्य धनमें तथा रागादिरूप अन्तरङ्ग विकारमें ममताभाव रखना परिग्रह है। यह परिग्रह छोड़ने योग्य है ॥१३३॥ इन हिंसादि पाँच पापोंसे विरत होना सो अहिंसा आदि पाँच व्रत हैं। ये व्रत महाव्रत और अणुव्रतके भेदसे दो प्रकारके हैं तथा जिसके ये होते हैं वह व्रती कहलाता है ॥१३४॥ व्रतका संबन्ध रहनेपर भी जो निःशल्य होता है वही व्रती माना गया है। माया, निदान और मिथ्यात्वके भेदसे शल्य तीन प्रकारकी है। यह शल्य, शल्य अर्थात् काँटोंके समान दुःख देनेवाली है ॥१३५॥

सागार और अनगारके भेदसे व्रती दो प्रकारके माने गये हैं। इनमें अणुव्रतोंके धारी सागार कहलाते हैं और महाव्रतोंके धारक महाव्रती कहे जाते हैं ॥१३६॥ जो मनुष्य राग-भावमें स्थित है वह किसी तरह वनमें रहनेपर भी सागार—गृहस्थ है और जिसका रागभाव दूर हो गया है वह घरमें रहनेपर भी अनगार है ॥१३७॥ त्रस और स्थावरके भेदसे जीव दो प्रकारके हैं। इनमें-से त्रसकायिक जीवोंके विघातसे विरत होना पहला अहिंसाणुव्रत कहा

---

१. उच्चालिदम्हि पादे इरियासमिदस्स णिग्गमणट्ठाणे। आवादे[धे]ज्जकुलिंगो मरेज्ज तज्जोगमासेज्ज ॥ १ ॥ ण हि तस्स तण्णिमित्तो बंधो सुहुमो वि देसिदो समए। मुच्छापरिग्गहो त्ति य अज्झप्पपमाणदो भणिदो ॥२॥ सर्वार्थसिद्धौ उद्धृतम्। २. प्राणव्यपहरणात् म०। ३. यस्मात्सकषायः सन् हन्त्यात्मा प्रथममात्मनात्मानम्। पश्चाज्जायेत न वा हिंसा प्राण्यन्तराणां तु। पुरुषार्थसिद्ध्युपाय। ४. अदत्तादानं स्तेयम्। ५. मैथुनमब्रह्म। ६. अब्रह्मण्यं तु क०, अब्रह्मान्यस्तु म०, ङ०। ७. हेये म०, ङ०। ८. मूर्च्छा परिग्रहः। ९. निःशल्यो व्रती। १०. यतः म०। ११. अगार्यनगारश्च। १२. अणुव्रतोऽगारी।

यद्रागद्वेषमोहादेः परपीडाकरादिह । अनृताद्विरतिर्यत्र तद्द्वितीयमणुव्रतम् ॥१३९॥
परद्रव्यस्य नष्टादेर्महतोऽल्पस्य चापि यत् । अदत्तस्येऽस्य नादानं तत्तृतीयमणुव्रतम् ॥१४०॥
दारेषु परकीयेषु परित्यक्तरतिस्तु यः । स्वदारेष्वेव सन्तोषस्तच्चतुर्थमणुव्रतम् ॥१४१॥
स्वर्णदासगृहक्षेत्रप्रभृतेः परिमाणतः । [1]बुद्धयेच्छापरिमाणाख्यं पञ्चमं तदणुव्रतम् ॥१४२॥
गुणव्रतान्यपि त्रीणि पञ्चाणुव्रतधारिणः । शिक्ष्या (क्षा) व्रतानि चत्वारि भवन्ति गृहिणः सतः ॥१४३॥
यः प्रसिद्धैरभिज्ञानैः कृतावध्यनतिक्रमः । दिग्विदिक्षु गुणेष्वाद्यं तद् दिग्विरतिव्रतम् ॥१४४॥
ग्रामादीनां प्रदेशस्य परिमाणकृतावधिः । बहिर्गतिनिवृत्तिर्या तद्देशविरतिव्रतम् ॥१४५॥
पापोपदेशोऽपध्यानं[2] प्रमादाचरितं तथा । हिंसाप्रदानमशुभश्रुतिश्चापीति पञ्चधा ॥१४६॥
पापोपदेशहेतुर्योऽनर्थदण्डोऽपकारकः । अनर्थदण्डविरतिर्व्रतं तद्विरतिः स्मृतम् ॥१४७॥
पापोपदेश आदिष्टो वचनं पापसंयुतम् । वणिग्वधकारम्भपूर्वं सावद्यकर्मसु ॥१४८॥
अपध्यानं जयः स्वस्य यः परस्य पराजयः । वधबन्धार्थहरणं कथं स्यादिति चिन्तनम् ॥१४९॥
वृक्षादिच्छेदनं भूमिकुट्टनं जलसेचनम् । इत्याद्यनर्थकं कर्म प्रमादाचरितं तथा ॥१५०॥
विषकण्टकशस्त्राग्निरज्जुदण्डकशादिनः । दानं हिंसाप्रदानं हि हिंसोपकरणस्य वै ॥१५१॥
हिंसारागादिसंवर्धिदुःकथाश्रुतिशिक्षयोः[3] । पापबन्धनिबन्धो यः स स्यात्पापाशुभश्रुतिः ॥१५२॥
माध्यस्थ्यैकत्वगमनं देवतास्मरणस्थितेः[4] । सुखदुःखारिमित्रादौ बोध्यं सामायिकं व्रतम् ॥१५३॥

गया है ॥१३८॥ जिसमें राग, द्वेष मोहसे प्रेरित हो पर-पीड़ाकारक असत्य वचनसे विरति होती है वह दूसरा सत्याणुव्रत है ॥१३९॥ दूसरेका गिरा-पड़ा या भूला हुआ द्रव्य चाहे अधिक हो चाहे थोड़ा, बिना दी हुई दशामें उसको नहीं लेना तीसरा अचौर्याणुव्रत है ॥१४०॥ परस्त्रियोंमें राग छोड़कर अपनी स्त्रियोंमें ही जो संतोष होता है वह चौथा ब्रह्मचर्याणुव्रत है ॥१४१॥ सुवर्ण, दास, गृह तथा खेत आदि पदार्थोंका बुद्धिपूर्वक परिमाण कर लेना इच्छा-परिमाण नामका पाँचवाँ अणुव्रत है ॥१४२॥

पाँच अणुव्रतोंके धारक सद्गृहस्थके तीन गुणव्रत और चार शिक्षाव्रत भी होते हैं ॥१४३॥ दिशाओं और विदिशाओंमें प्रसिद्ध चिह्नों-द्वारा की हुई अवधिका उल्लङ्घन नहीं करना सो दिग्व्रत नामका पहला गुणव्रत है ॥१४४॥ दिग्व्रतके भीतर यावज्जीवनके लिए किये हुए बृहत् परिमाणके अन्तर्गत कुछ समयके लिए जो ग्राम-नगर आदिकी अवधि की जाती है उससे बाहर नहीं जाना सो देशव्रत नामका दूसरा गुणव्रत है ॥१४५॥ पापोपदेश, अपध्यान, प्रमादाचरित, हिंसादान और दुःश्रुति ये पाँच प्रकारके अनर्थदण्ड हैं। जो पापके उपदेशका कारण है वह अपकार करनेवाला अनर्थदण्ड है उससे विरत होना सो अनर्थदण्ड-त्याग नामका तीसरा गुणव्रत है ॥१४६–१४७॥ वणिक् तथा वधक आदिके सावद्य कार्योंमें आरम्भ करानेवाले जो पापपूर्ण वचन हैं वह पापोपदेश अनर्थ दण्ड है ॥१४८॥ अपनी जय, दूसरेकी पराजय तथा वध, बन्धन एवं धनका हरण आदि किस प्रकार हो ऐसा चिन्तन करना सो अपध्यान है ॥१४९॥ वृक्षादिकका छेदना, पृथिवीका कूटना, पानीका सींचना आदि अनर्थक कार्य करना प्रमादाचरित नामका अनर्थदण्ड है ॥१५०॥ विष, कण्टक, शस्त्र, अग्नि, रस्सी, दण्ड तथा कोड़ा आदि हिंसाके उपकरणोंका देना सो हिंसादान नामका अनर्थदण्ड है ॥१५१॥ हिंसा तथा रागादिको बढ़ानेवाली दुष्ट कथाओंके सुनने तथा दूसरोंको शिक्षा देनेमें जो पाप-बन्धके कारण एकत्रित होते हैं वह पापसे युक्त दुःश्रुति नामका अनर्थदण्ड है ॥१५२॥

देवताके स्मरणमें स्थित पुरुषके सुख-दुःख तथा शत्रु-मित्र आदिमें जो माध्यस्थ्य

१. बुद्धेच्छा म०, क०, ङ० । २. पापोपदेशो हेतुर्यो ङ० । ३. शिक्षया म० । ४. स्थितिः म० ।

चतुराहारहानं यन्निरारम्भस्य पर्वसु । स प्रोषधोपवासोऽक्षाण्युपेत्यास्मिन्वसन्ति[1] यत् ॥१५४॥
गन्धमाल्यान्नपानादिरुपभोग उपेत्य यः । भोगोऽन्यः परिभोगो यः परित्यज्यासनादिकः ॥१५५॥
परिमाणं तयोर्यत्र यथाशक्ति यथायथम् । उपभोगपरीभोगपरिमाणव्रतं हि तत् ॥१५६॥
मांसमद्यमधुद्यूतवेश्यास्त्रीनक्तभुक्तितः । विरतिर्नियमो ज्ञेयोऽनन्तकायादिवर्जनम्[2] ॥१५७॥
स संयमस्य वृद्ध्यर्थमततीत्यतिथिः स्मृतः । प्रदानं संविभागोऽस्मै यथाशुद्धियथोदितम् ॥१५८॥
भिक्षौषधोपकरणप्रतिश्रयविभेदतः । संविभागोऽतिथिभ्यस्तु चतुर्विध उदाहृतः ॥१५९॥
सम्यक्कायकषायाणां बहिरन्तर्हि लेखना । सल्लेखनापि कर्तव्या कारणे मारणान्तिकी[3] ॥१६०॥
रागादीनामनुत्पत्तावागमोदितवर्त्मना[4] । अशक्यपरिहारे हि सान्ते सल्लेखना मता ॥१६१॥
अष्टौ निःशङ्कितादीनामष्टानां प्रतियोगिनः । सम्यग्दृष्टेरतीचारास्त्याज्याः शङ्कादयः सताम्[5] ॥१६२॥
पञ्च पञ्च त्वतीचारा व्रतशीलेषु भाषिताः । यथाक्रममभी वेद्याः परिहार्याश्च तद्व्रतैः ॥१६३॥
गतिरोधकरो बन्धो वधो दण्डादिताडना । कर्णाद्यवयवच्छेदो[6]ऽप्यतिभारातिरोपणम्[7] ॥१६४॥

भावकी प्राप्ति है उसे सामायिक नामका पहला शिक्षाव्रत जानना चाहिए ॥१५३॥ दो अष्टमी और दो चतुर्दशी इन चार पर्वके दिनोंमें निरारम्भ रहकर चार प्रकारके आहारका त्याग करना सो प्रोषधोपवास नामका दूसरा शिक्षाव्रत है। जिसमें इन्द्रियाँ बाह्य-संसारसे हटकर आत्माके समीप वास करती हैं वह उपवास कहलाता है ॥१५४॥ गन्ध, माला, अन्न, पान आदि उपभोग हैं और आसन आदिक परिभोग हैं। पास जाकर जो भोगा जाता है वह उपभोग कहलाता है और जो एक बार भोगकर छोड़ दिया जाता है तथा पुनः भोगनेमें आता है वह परिभोग कहलाता है। जिसमें उपभोग तथा परिभोगका यथाशक्ति परिमाण किया जाता है वह उपभोग-परिभोग-परिमाणव्रत है ॥१५५-१५६॥ मांस, मदिरा, मधु, जुआ, वेश्या, तथा रात्रिभोजनसे विरत होना एवं काम आदि जीवोंका त्याग करना सो नियम कहलाता है ॥१५७॥ जो संयमकी वृद्धिके लिए निरन्तर भ्रमण करता रहता है वह अतिथि कहलाता है उसे शुद्धिपूर्वक आगमोक्त विधिसे आहार आदि देना अतिथिसंविभाग व्रत है ॥१५८॥ भिक्षा, औषध, उपकरण और आवासके भेदसे अतिथि संविभाग चार प्रकारका कहा गया है ॥१५९॥ मृत्युके कारण उपस्थित होनेपर बहिरङ्गमें शरीर और अन्तरङ्गमें कषायोंका अच्छी तरह कृश करना सल्लेखना कहलाती है। व्रती मनुष्यको मरणान्तकालमें यह सल्लेखना अवश्य ही करनी चाहिए ॥१६०॥ जब अन्त अर्थात् मरणका किसी तरह परिहार न किया जा सके तब रागादिकी अनुत्पत्तिके लिए आगमोक्त मार्गसे सल्लेखना करना उचित माना गया है ॥१६१॥

निःशङ्कित आदि आठ अङ्गोंके विरोधी शङ्का, कांक्षा आदि आठ दोष सम्यग्दर्शनके अतिचार हैं। सत्पुरुषोंको इनका त्याग अवश्य ही करना चाहिए ॥१६२॥ पाँच अणुव्रत तथा सात शील व्रतोंमें प्रत्येकके पाँच-पाँच अतिचार होते हैं। यहाँ यथाक्रमसे उनका वर्णन किया जाता है। तद्-तद् व्रतोंके धारक मनुष्योंको उन अतिचारोंका अवश्य ही परिहार करना चाहिए ॥१६३॥ जीवोंकी गतिमें रुकावट डालनेवाला बन्ध, दण्ड आदिसे अत्यधिक पीटना-

---

१. इन्द्रियाणि। २. अल्पफलबहुविघातान्मूलकार्द्रकनवनीतकादीनि सन्धानकादीनि, बहुजन्तुयोनिस्थानानि, अतोऽन्यदनिष्टान्निवर्तनम् (क० टि०)। ३. मारणान्तिकीं सल्लेखनां जोषिता-त० सू०। ४. रागादीनां समुत्पत्ता-म०। ५. तत्त्वार्थसूत्रे तु पञ्चैव अतिचाराः प्रतिपादिताः। तथाहि—'शंका-कांक्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतिचाराः'-त० सू०। ६. कर्णाद्यपनयच्छेदो। ७. वधबन्धच्छेदातिभारारोपणान्नपाननिरोधाः ॥२५॥

अन्नपाननिरोधस्तु क्षुद्बाधादिकरोऽङ्गिनाम् । अहिंसाणुव्रतस्योक्ता अतिचारास्तु पञ्च ते ॥१६५॥
अतिसन्धापनं मिथ्योपदेश इह चान्यथा । यदभ्युदयमोक्षार्थक्रियास्वन्यप्रवर्तनम् ॥१६६॥
रहोभ्याख्यानमेकान्तस्त्रीपुंसेहाप्रकाशनम् । कूटलेखक्रियान्येन त्वनुक्तस्य स्वलेखनम् ॥१६७॥
विस्मृतन्यस्तसंख्यस्य स्वल्पं स्वं संप्रगृह्णतः । न्यासापहार एतावदित्यनुज्ञापकं वचः ॥१६८॥
साकारमन्त्रभेदोऽसौ भ्रूविक्षेपादिकेङ्गितैः । पराकूतस्य गुह्यस्याविर्भावनं यदसूयया ॥१६९॥
सत्यस्याणुव्रतस्यामी पञ्चातीचारकाश्चिरम् । परिहार्याः समर्यादैर्विचार्या[1]चार्यवेदिभिः[2] ॥१७०॥
[3]स्वस्तेनप्रयोगस्तैराहृतादानमात्मनः । अन्यो विरुद्धराज्यातिक्रमश्चाक्रमकक्रये ॥१७१॥
हीनेन दानमन्येषा[4]मधिकेनात्मनो ग्रहः । प्रस्थादिमानभेदेन तुलाद्युन्मानवस्तुनः ॥१७२॥
रूपकैः कृत्रिमैः स्वर्णैर्वंचनः प्रतिरूपकः । व्यवहारस्त्वतीचारास्तृतीयाणुव्रतस्य ते[5] ॥१७३॥
[6]परविवाहकरणमनङ्गक्रीडया गती । गृहीतागृहीतेत्वर्योः कामतीव्राभिवेशनम् ॥१७४॥
एते स्वदारसन्तोषव्रतस्याणुव्रतात्मनः । अतीचाराः स्मृताः पञ्च परिहार्याः प्रयत्नतः ॥१७५॥

वध, कान आदि अवयवोंका छेदना, अधिक भार लादना और भूख आदिकी बाधा करनेवाला अन्नपानका निरोध ये पाँच अहिंसाणु व्रतके अतिचार कहे गये हैं ॥१६४–१६५॥ मिथ्योपदेश, रहोभ्याख्यान, कूटलेखक्रिया, न्यासापहार और साकारमन्त्रभेद ये पाँच सत्याणुव्रतके अतिचार हैं। किसीको धोखा देना तथा स्वर्ग और मोक्ष प्राप्त करानेवाली क्रियाओंमें दूसरोंकी अन्यथा प्रवृत्ति कराना मिथ्योपदेश है। स्त्री-पुरुषोंकी एकान्त चेष्टाको प्रकट करना रहोभ्याख्यान है। जो बात दूसरेने नहीं कही है उसे उसके नामपर स्वयं लिख देना कूटलेखक्रिया है। कोई मनुष्य धरोहरमें रखे हुए धनकी संख्या भूलकर उससे स्वल्प ही धनका ग्रहण करता है तो उस समय ऐसे वचन बोलना कि 'हाँ इतना ही था ले जाओ' यह न्यासापहार है। भौंहका चलना आदि चेष्टाओंसे दूसरे रहस्यको जानकर ईर्ष्यावश उसे प्रकट कर देना साकार मन्त्रभेद है। मर्यादाके पालक तथा आचार शास्त्रके ज्ञाता मनुष्योंको विचार कर इन अतिचारोंका अवश्य ही परिहार करना चाहिए ॥१६६–१७०॥ स्तेनप्रयोग, तदाहृतादान, विरुद्ध-राज्यातिक्रम, हीनाधिकमानोन्मान और प्रतिरूपकव्यवहार ये पाँच अचौर्याणुव्रतके अतिचार हैं। कृत कारित अनुमोदनासे चोरको चोरीमें प्रेरित करना स्तेन प्रयोग है। चोरोंके द्वारा चुराकर लायी हुई वस्तुका स्वयं खरीदना तदाहृतादान है। आक्रमणकर्ताकी खरीद होनेपर स्वकीय राज्यकी आज्ञाका उल्लंघन कर विरुद्ध राज्यमें आना-जाना, अपने देशकी वस्तुएँ वहाँ लेजाकर बेचना विरुद्ध-राज्यातिक्रम नामका अतिचार है। प्रस्थ आदि मानमें भेद और तुला आदि उन्मानमें भेद रखकर हीन मानोन्मानसे दूसरोंको देना और अधिक मानोन्मानसे स्वयं लेना हीनाधिक मानोन्मान नामका अतिचार है। कृत्रिम-मिलावटदार सोना, चाँदी आदिके द्वारा दूसरोंको ठगना प्रतिरूपक व्यवहार नामका अतिचार है ॥१७१–१७३॥ परविवाहकरण, अनङ्गक्रीड़ा, गृहीतेत्वरिकागमन, अगृहीतेत्वरिकागमन और कामतीव्राभिनिवेश ये पाँच स्वदार संतोषव्रतके अतिचार हैं। प्रयत्नपूर्वक इनका परिहार करना चाहिए। अपनी या अपने संरक्षणमें रहनेवाली संतानके सिवाय दूसरेकी संतानका विवाह कराना परविवाहकरण है। काम-सेवनके लिए निश्चित अंगोंके अतिरिक्त अंगोंके

---

१. विचार्याचार्यवेदिभिः म०। २. मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ॥२६॥–त० सू० अ० ७। ३. मुष्णन्तं स्वयमेव प्रयुङ्क्ते अन्येन वा प्रयोजयति, प्रयुक्तमनुमन्यते वा यतः स स्तेनप्रयोगः (क० टि०)। ४. मित्येषा-म०, क०, ङ०। ५. स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥ २७ ॥ ६. परविवाहकरणेत्वरिकापरिगृहीताऽपरिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशाः ॥२८॥

[1]हिरण्यस्वर्णयोर्वास्तुक्षेत्रयोर्धनधान्ययोः । दासीदासाश्रयोः पञ्च कुप्यस्यैते व्यतिक्रमाः ॥१७६॥

[2]दिग्विरत्यतिचारोऽधस्तिर्यगूर्ध्वव्यतिक्रमाः । लोभात्स्मृत्यन्तराधानं[3] क्षेत्रवृद्धिश्च पञ्चधा ॥१७७॥

[4]प्रेष्यप्रयोगानयनपुद्गलक्षेपलक्षणाः । शब्दरूपानुपातौ द्वौ तद्देशविरतिव्रते ॥१७८॥

पञ्च कन्दर्पकौत्कुच्यमौखर्याणि तृतीयके । असमीक्ष्याधिकरणोपभोगादिनिरर्थने ॥१७९॥

[5]योगनिःप्रणिधानानि त्रीण्यनादरता च ते । पञ्च स्मृत्यनुपस्थानं स्युः सामायिकगोचराः ॥१८०॥

द्वारा काम सेवन करना अनंग क्रीड़ा है। दूसरेके द्वारा अगृहीत व्यभिचारिणी स्त्रीके यहाँ जाना गृहीतेत्वरिकागमन है। दूसरेके द्वारा अगृहीत व्यभिचारिणी स्त्रीके यहाँ जाना अगृहीतेत्वरिकागमन है। और स्वस्त्रीके साथ भी काम सेवनमें अधिक लालसा रखना कामतीव्राभिनिवेश है ॥१७४-१७५॥ हिरण्य-सुवर्ण, वास्तु-क्षेत्र, धन-धान्य, दासी-दास और कुप्य—बर्तन तथा वस्त्रकी सीमाका उल्लंघन करना ये पाँच परिग्रहपरिमाणव्रतके अतिचार हैं। रुपया, चाँदी आदिको हिरण्य तथा सोना व सोनेके आभूषण आदिको सुवर्ण कहते हैं। रहनेके मकानको वास्तु और गेहूँ, चना आदि के उत्पत्ति-स्थानोंको क्षेत्र कहते हैं। गाय, भैंस आदिको धन तथा गेहूँ, चना आदि अनाजको धान्य कहते हैं। दासी-दास शब्दका अर्थ स्पष्ट है। बर्तन तथा वस्त्रको कुप्य कहते हैं। इनके प्रमाणका उल्लंघन करना सो हिरण्यसुवर्णातिक्रम आदि अतिचार होते हैं ॥१७६॥

अधोव्यतिक्रम, तिर्यग्व्यतिक्रम, ऊर्ध्वव्यतिक्रम, स्मृत्यन्तराधान और क्षेत्रवृद्धि ये पाँच दिग्व्रतके अतिचार हैं। लोभके वशीभूत होकर नीचेकी सीमाका उल्लंघन करना अधोव्यतिक्रम है, समान धरातलकी सीमाका उल्लंघन करना तिर्यग्व्यतिक्रम है। ऊपरकी सीमाका उल्लंघन करना ऊर्ध्वव्यतिक्रम है। की हुई सीमाको भूलकर अन्य सीमाका स्मरण रखना स्मृत्यन्तराधान है तथा मर्यादित क्षेत्रकी सीमा बढ़ा लेना क्षेत्रवृद्धि है ॥१७७॥ प्रेष्य प्रयोग, आनयन, पुद्गल क्षेप, शब्दानुपात और रूपानुपात ये पाँच देशव्रतके अतिचार हैं। मर्यादाके बाहर सेवकको भेजना प्रेष्यप्रयोग है। मर्यादासे बाहर किसी वस्तुको बुलाना आनयन है। मर्यादाके बाहर कंकड़-पत्थर आदिका फेंकना पुद्गलक्षेप है, मर्यादाके बाहर अपना शब्द भेजना शब्दानुपात है और मर्यादाके बाहर काम करनेवाले लोगोंको अपना रूप दिखाकर सचेत करना रूपानुपात है ॥१७८॥ कन्दर्प, कौत्कुच्य, मौखर्य, असमीक्ष्याधिकरण और उपभोगपरिभोगानर्थक्य ये पाँच अनर्थदण्ड व्रतके अतिचार हैं। रागकी उत्कटतासे हास्यमिश्रित चण्ड वचन बोलना कन्दर्प है। शरीरसे कुचेष्टा करना कौत्कुच्य है। आवश्यकतासे बोलना मौखर्य है। प्रयोजनका विचार न रख आवश्यकतासे अधिक किसी कार्यमें प्रवृत्ति करना-कराना असमीक्ष्याधिकरण है और उपभोग-परिभोगकी वस्तुओंका निरर्थक संग्रह करना उपभोगपरिभोगानर्थक्य है ॥१७९॥ मनोयोग दुष्प्रणिधान, वचनयोग दुष्प्रणिधान, काययोग दुष्प्रणिधान, अनादर और स्मृत्यनुपस्थान ये पाँच सामायिक शिक्षाव्रतके अतिचार हैं। मनको अन्यथा चलायमान करना मनोयोगदुष्प्रणिधान है, वचनकी अन्यथा प्रवृत्ति करना—पाठका अशुद्ध उच्चारण करना वचनयोग दुष्प्रणिधान है। कायको चलायमान करना काययोग दुष्प्रणिधान है। सामायिकके प्रति आदर या उत्साह नहीं होना-बेगार समझकर करना अनादर है और चित्तकी एकाग्रता न होनेसे सामायिककी विधि या पाठका भूल जाना अथवा कार्यान्तरमें उलझकर सामायिकके समयका स्मरण

---

१. क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः ॥ २९ ॥ २. ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि ॥ ३० ॥ ३. आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ॥ ३१ ॥ स्मृत्यन्तराध्यानं क० । ४. कन्दर्पकौत्कुच्यमौखर्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि ॥ ३२ ॥ ५. योगदुष्प्रणिधानानादरस्मृत्यनुपस्थानानि ॥३३॥

[1]अनवेक्ष्य मलोत्सर्गादानसंस्तरसंक्रमाः । स्युः प्रोषधोपवासस्य ते ऐकाग्र्यमनादरः[2] ॥१८१॥
[3]सचित्ताहारसंबन्धसन्मिश्राभिषवास्तु ते । उपभोगपरीभोगे दुष्पक्वाहार एव च ॥१८२॥
[4]ते सचित्तेन निक्षेपः सचित्तावरणं परम् । व्यपदेशश्च[5] मात्सर्यं कालातिक्रमतातिथौ ॥१८३॥
[6]आशंसे जीविते मृत्यौ निदानं दीनचेतसः । सुखानुबन्धमित्रानुरागौ सल्लेखनामलाः ॥१८४॥
सम्यग्ज्ञानादिवृद्ध्यादिस्वपरानुग्रहेच्छया । दानं त्यागोऽतिसर्गाख्यः[7] प्रासुकस्वस्य पात्रगम्[8] ॥१८५॥
विधिदेयविशेषाभ्यां दातृपात्रविशेषतः । भेदः फलस्य भूम्यादेर्भेदात्सस्यर्द्धिभेदवत्[9] ॥१८६॥
प्रतिग्रहादिषु प्रायः सादरानादरत्वतः । दानकाले विधौ भेदः फलभेदस्य कारकः ॥१८७॥
तपःस्वाध्यायवृद्ध्यादेर्देयभेदोऽपि हेतुतः[10] । एकं हि साम्यकृद्देयं ततो वैषम्यकृत्परम् ॥१८८॥
[11]अनसूयाविषादादिरसूयादिपरस्त्वयम् । दायकस्य विशेषोऽपि विचित्रा हि मनोगतिः ॥१८९॥

नहीं रखना स्मृत्यनुपस्थान है ॥१८०॥ बिना देखी हुई जमीनमें मलोत्सर्ग करना, बिना देखे किसी वस्तुको उठाना, बिना देखी हुई भूमिमें बिस्तर आदि बिछाना, चित्तकी एकाग्रता नहीं रखना और व्रतके प्रति आदर नहीं रखना ये पाँच प्रोषधोपवास व्रतके अतिचार हैं ॥१८१॥ सचित्ताहार, सचित्त संबन्धाहार, सचित्त सन्मिश्राहार, अभिषवाहार और दुष्पक्वाहार ये पाँच उपभोगपरिभोगपरिमाण व्रतके अतिचार हैं। सचित्त—हरी वनस्पति आदिका आहार करना सचित्ताहार है। सचित्तसे संबन्ध रखनेवाले आहार-पानको ग्रहण करना सचित्त संबन्धाहार है। सचित्तसे मिली हुई अचित्त वस्तुका सेवन करना सचित्तसन्मिश्राहार है। गरिष्ठ पदार्थोंका सेवन करना अभिषवाहार है और अधपके अथवा अधिक पके आहारका ग्रहण करना दुष्पक्वाहार है ॥१८२॥ सचित्त-निक्षेप, सचित्तावरण, परव्यपदेश, मात्सर्य और कालातिक्रमता ये पाँच अतिथिसंविभाग व्रतके अतिचार हैं। हरे पत्ते आदिपर रखकर आहार देना सचित्तनिक्षेप है। हरे पत्ते आदिसे ढका हुआ आहार देना सचित्तावरण है। अन्य दाताके द्वारा देय वस्तुको देना परव्यपदेश है। अन्य दाताओंके गुणको नहीं सहन करना मात्सर्य है और समय उल्लंघन कर देना कालातिक्रम है ॥१८३॥ जीविताशंसा, मरणाशंसा, निदान, सुखानुबन्ध और मित्रानुराग ये पाँच सल्लेखनाके अतिचार हैं। क्षपकका दीनचित्त होकर अधिक समय तक जीवित रहनेकी आकांक्षा रखना जीविताशंसा है। पीड़ासे घबड़ाकर जल्दी मरनेकी इच्छा करना मरणाशंसा है। आगामी भोगोंकी आकांक्षा करना निदान है। पहले भोगे हुए सुखका स्मरण रखना सुखानुबन्ध है और मित्रोंसे प्रेम रखना मित्रानुराग है ॥१८४॥ सम्यग्ज्ञानादि गुणोंकी वृद्धि आदि स्व-परके उपकारकी इच्छासे योग्य पात्रके लिए प्रासुक द्रव्यका देना त्याग कहलाता है, इसका दूसरा नाम अतिसर्ग भी है ॥१८५॥ जिस प्रकार भूमि आदिके भेदसे धान्यकी उत्पत्ति आदिमें भेद होता है उसी प्रकार विधि द्रव्य दाता और पात्रकी विशेषतासे दानके फलमें भेद होता है ॥१८६॥ दानके समय पडगाहने आदिकी क्रियाओंमें आदर या अनादरके होनेसे दानकी विधिमें भेद हो जाता है और वह फलके भेदका करनेवाला हो जाता है ॥१८७॥ तप तथा स्वाध्यायकी वृद्धि आदिका कारण होनेसे देयमें भेद होता है। यथार्थमें एक पदार्थ तो ऐसा है जो लेनेवालेके लिए समताभावका करनेवाला होता है और दूसरा पदार्थ ऐसा है जो विषमताका करनेवाला होता है।

१. अप्रवेक्ष्य ख० । २. अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ॥३४॥ ३. सचित्तसम्बन्धसम्मिश्राभिषवदुष्पक्वाहाराः ॥३५॥ ४. सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः ॥ ३६ ॥ ५. अन्यदातृदेयार्पणं परव्यपदेशः (का० टि०) ६. जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि ॥३७॥ ७. निसर्गाख्यः म० । ८. अनुग्रहार्थं स्वस्यातिसर्गो दानम् ॥३८॥ ९. विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ॥३९॥ १०. हेतुता म०, ङ० । ११. अनसूया म० ।

मोक्षकारणभूतानां दानानां धारणे सताम् । तारतम्यं मनःशुद्धेर्विशेषः पात्रगोचरः ॥१९०॥
पुण्यास्रवः सुखानां हि हेतुरभ्युदयावहः । हेतुः संसारदुःखानामपुण्यास्रव इष्यते ॥१९१॥
[1]मिथ्यादर्शनमात्मस्थं हिंसाद्यविरतिस्तथा । प्रमादश्च कषायश्च योगो बन्धस्य हेतवः ॥१९२॥
तन्मिथ्यादर्शनं द्वेधा निसर्गान्योपदेशतः । मिथ्याकर्मोदयादाद्यं तत्त्वाश्रद्धानलक्षणम् ॥१९३॥
परोपदेशपूर्वं तु चतुर्धा मतभेदतः । क्रियावाद्यक्रियावादिवैनयाज्ञानिकत्वतः ॥१९४॥
एकान्तविपरीतत्वविनयाज्ञानसंशयैः । निमित्तैः पञ्चधा चापि मिथ्यादर्शनमिष्यते ॥१९५॥
द्विषोढाऽविरतिर्ज्ञेया प्रमादोऽनेकधा स्थितः । नवभिर्नोकषायैस्तु कषायाः पञ्चविंशतिः ॥१९६॥
[2]चत्वारः स्युर्मनोयोगा वाग्योगाश्च तथैव ते । काययोगास्तु पञ्चापि मतायोगास्त्रयोदश ॥१९७॥

इस लिए देय द्रव्यमें भेद होनेसे दानके फलमें भी भेद होता है ॥१८८॥ कोई दाता तो ईर्ष्या, विषाद आदि दुर्गुणोंसे रहित होता है और कोई दाता ईर्ष्या आदि दुर्गुणोंसे युक्त होता है। यही दाताकी विशेषता है। यथार्थमें मनकी गति विचित्र होती है ॥१८९॥ मोक्षके कारणभूत दानोंके ग्रहण करनेमें सत्पुरुषोंके मनकी शुद्धिका जो तारतम्य-हीनाधिकता है वह पात्रकी विशेषता है ॥१९०॥ पुण्यास्रव अनेक कल्याणोंकी प्राप्ति करानेवाला होनेसे सुखोंका कारण कहा जाता है और पापास्रव संसारके दुःखोंका कारण माना जाता है ॥१९१॥ इस प्रकार आस्रव तत्त्वका वर्णन होनेके बाद भगवान्‌की दिव्य ध्वनिमें बन्ध तत्त्वका वर्णन प्रारम्भ हुआ।

आत्मपरिणामोंमें स्थित मिथ्यादर्शन, हिंसा आदि अविरति, प्रमाद, कषाय और योग ये बन्धके कारण हैं ॥१९२॥ इनमें मिथ्यादर्शन, निसर्गज (अगृहीत) और अन्योपदेशज (गृहीत) के भेदसे दो प्रकार का है। मिथ्यात्वकर्मके उदयसे जो तत्त्वका अश्रद्धान होता है वह निसर्गज मिथ्यादर्शन है ॥१९३॥ और परोपदेशपूर्वक होनेवाले अतत्त्व श्रद्धानको अन्योपदेशज मिथ्यादर्शन कहते हैं। इसके क्रियावादी, अक्रियावादी, वैनयिक और अज्ञानीके भेदसे चार भेद हैं ॥१९४॥ इनके सिवाय एकान्त, विपरीत, विनय, अज्ञान और संशय इन निमित्तोंकी अपेक्षा मिथ्यादर्शन पाँच प्रकारका भी माना जाता है। वस्तु अनेक धर्मात्मक है परन्तु उसे एक धर्मरूप ही श्रद्धान करना एकान्त मिथ्यादर्शन है, जैसे वस्तु नित्य ही है अथवा अनित्य ही है। वस्तुका जैसा स्वरूप है उससे विपरीत श्रद्धान करना सो विपरीत मिथ्यादर्शन है जैसे हिंसामें धर्म मानना, सग्रन्थवेषसे मोक्ष मानना आदि। देव अदेव, और तत्त्व अतत्त्व का विवेक न रखकर सबको एक-सा मानना तथा सबकी भक्ति करना वैनयिक मिथ्यादर्शन है। हिताहितकी परीक्षा-रहित अज्ञानमूलक रूढिवश श्रद्धान करना सो अज्ञान मिथ्यादर्शन है और सम्यग्दर्शन सम्यग्ज्ञान तथा सम्यक्‌चारित्र मोक्षका मार्ग है या नहीं? अहिंसामें धर्म है या हिंसामें। इस प्रकार संदेह रूप श्रद्धान करना संशय मिथ्यादर्शन है ॥१९५॥ पाँच स्थावर और त्रस इन छह कायके जीवोंकी हिंसाका त्याग नहीं करना, तथा पाँच इन्द्रिय और मनको वश नहीं करना यह बारह प्रकारकी अविरति है। प्रमाद अनेक प्रकारका है और नौ नोकषायोंको साथ मिलाकर अनन्तानुबन्धी क्रोध, मान, माया, लोभ आदिके भेदसे कषायके पच्चीस भेद हैं ॥ १९६ ॥ सत्यमनोयोग, असत्यमनोयोग, उभयमनोयोग और अनुभयमनोयोगके भेदसे मनोयोग चार प्रकारके हैं। सत्यवचनयोग, असत्यवचनयोग, उभयवचनयोग

१. मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः ॥१॥ त० सू० अ० ८। २. चत्वारो मनोयोगाः चत्वारो वाग्योगाः पञ्चकाययोगा इति त्रयोदश विकल्पो योगः। आहारककाययोगाः आहारकमिश्रकाययोगयोः प्रमत्तसंयते सम्भवात् पञ्चदशापि भवन्ति—स० सि० अ० ८।

समस्तव्यस्तरूपास्तु पञ्चैते बन्धहेतवः । मिथ्यादृष्टेर्हि पञ्चोर्ध्वं चत्वारस्त्रिषु पश्चिमाः ॥१९८॥
विरत्यविरतिर्मिश्रा प्रमादाद्यास्त्रयः परे । संयतासंयतस्योक्ताः कर्मबन्धस्य हेतवः ॥१९९॥
प्रमत्तसंयतस्यापि योगाद्यास्त्रय एव ते । तत ऊर्ध्वं चतुर्णां तु कषाययोगसङ्गताः ॥२००॥
शान्तक्षीणकषायौ तौ सयोगकेवली तथा । बन्धका योगमात्राद्वयोगो नैव बन्धकः ॥२०१॥
[1]कषायकलुषो ह्यात्मा कर्मणो योग्यपुद्गलान् । प्रतिक्षणमुपादत्ते स बन्धो नैकधा मतः ॥२०२॥
[2]प्रकृतिश्च स्थितिश्चापि स बन्धोऽनुभवस्ततः । प्रदेशबन्धभेदेन चातुर्विध्यं प्रपद्यते ॥२०३॥
प्रकृतिः स्यात्स्वभावोऽत्र निम्बादेस्तिक्ततादिवत् । कर्मणामिह सर्वेषां यथास्वं नियता स्थिता ॥२०४॥
अज्ञानं प्रकृतिर्ज्ञेया ज्ञानावरणकर्मणः । दृश्यार्थादर्शनं दृश्या दर्शनावरणस्य सा ॥२०५॥
सदसल्लक्षणस्यापि वेदनीयस्य कर्मणः । संवेदनं विदां ज्ञेयं प्रकृतिः सुख-दुःखयोः ॥२०६॥
स्याद्दर्शनमोहस्य तत्त्वाश्रद्धानमेव सा । तथा चारित्रमोहस्य महतोऽसंयमः सदा ॥२०७॥
प्रकृतिः प्रतिपत्ता तु भवधारणमायुषः । देवनारकनामादिकरणं नामकर्मणः ॥२०८॥

और अनुभव वचनयोगके भेदसे वचनयोगके चार भेद हैं। तथा औदारिक काययोग, औदारिक मिश्रकाययोग, वैक्रियिक काययोग, वैक्रियिक मिश्रकाययोग और कार्मण काययोगके भेदसे काययोगके पाँच भेद हैं। इस प्रकार सब मिलाकर योगके तेरह भेद हैं। भावार्थ—प्रमत्त संयत गुणस्थानमें आहारक काययोग और आहारक मिश्रकाययोगकी भी संभावना रहती है इसलिए उन्हें मिलानेपर योगके पन्द्रह भेद हो जाते हैं ॥१९७॥ ये मिथ्यादर्शनादि पाँच समस्त और व्यस्त रूपसे बन्धके कारण हैं। अर्थात् कहीं सब बन्धके कारण हैं और कहीं कम। मिथ्यादृष्टि गुणस्थानमें पाँचों ही बन्धके कारण हैं। उसके तीन गुणस्थानोंमें मिथ्यादर्शनको छोड़कर अन्तिम चार बन्धके कारण हैं ॥१९८॥ संयतासंयत नामक पञ्चम गुणस्थानमें विरति, अविरति, मिश्रित तथा प्रमाद आदि तीन कर्मबन्धके हेतु कहे गये हैं ॥१९९॥ प्रमत्तसंयत नामक छठे गुणस्थानवर्ती जीवके प्रमाद, कषाय और योग ये तीन बन्धके कारण हैं। इसके आगे चार गुणस्थानोंमें अर्थात् सातवेंसे लेकर दसवें गुणस्थान तक कषाय और योग ये दो बन्धके कारण हैं ॥२००॥ उपशान्तमोह, क्षीणमोह और सयोगकेवली इन तीन गुणस्थानोंके जीवमात्र योगके निमित्तसे कर्मबन्ध करते हैं। अयोगकेवली भगवान् योगका भी अभाव हो जानेसे कर्मोंका बन्ध नहीं करते हैं ॥२०१॥

कषायसे कलुषित जीव प्रत्येक क्षण कर्मके योग्य पुद्गलोंको ग्रहण करता है। वही बन्ध कहलाता है। यह बन्ध अनेक प्रकारका माना गया है ॥२०२॥ सामान्यरूपसे बन्ध प्रकृति, स्थिति, अनुभाग और प्रदेशके भेदसे चार भेदोंको प्राप्त होता है ॥२०३॥ प्रकृतिका अर्थ स्वभाव होता है। जिस प्रकार नीम आदिकी प्रकृति तिक्तता आदि है। उसी प्रकार समस्त कर्मोंकी अपनी-अपनी प्रकृति नियतरूपसे स्थित है ॥२०४॥ जैसे ज्ञानावरण कर्मकी प्रकृति अज्ञान अर्थात् पदार्थका ज्ञान नहीं होने देना है। दर्शनावरण कर्मकी प्रकृति पदार्थोंका अदर्शन अर्थात् दर्शन नहीं होने देना है ॥२०५॥ साता, असातावेदनीय कर्मकी प्रकृति ज्ञानी मनुष्योंको क्रमसे सुख और दुःखका वेदन कराना है ॥२०६॥ दर्शनमोहकी प्रकृति तत्त्वका अश्रद्धान कराना है तथा अतिशय महान् चारित्रमोह कर्मकी प्रकृति सदा असंयम उत्पन्न करना है ॥२०७॥ आयुकर्मकी प्रकृति भवधारण करना है। नामकर्मकी प्रकृति जीवमें देव, नारकी

१. सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बन्धः ॥ २ ॥ त० सू० अ० ८। २. प्रकृतिस्थित्यनुभवप्रदेशास्तद्विधयः ॥३॥ त० सू० अ० ८।

गोत्रस्योच्चैश्च नीचैश्च स्थानसंशब्दनं तथा । अन्तरायस्य दानादिविघ्नानां करणं घनम् ॥२०९॥
तदेवं लक्षणं कार्यं यत्तत्क्रियते ततः । प्रकृतिस्तत्स्वभावस्य तथैवाप्रच्युतिः स्थितिः ॥२१०॥
यथाऽजागोमहिष्यादिक्षीराणां स्वस्वभावतः । माधुर्यादच्युतिस्तद्वत्कर्मणां प्रकृतिस्थितिः ॥२११॥
तीव्रमन्दादिभावेन क्षीरे रसविशेषवत् । कर्मपुद्गलसामर्थ्यविशेषोऽनुभवो मतः ॥२१२॥
कर्मत्वपरिणत्यात्मपुद्गलस्कन्धसंहतेः । प्रदेशः परमाण्वात्मपरिच्छेदावधारणा ॥२१३॥
¹प्रकृतेः सप्रदेशाया नित्यं योगनिमित्तता । स्थितेः सानुभवायास्तु स्यात्कषायनिमित्तता ॥२१४॥
अनेनाव्रियते ज्ञानमावृणोतीति वा स्वयम् । ज्ञानावरणमाख्यातं दर्शनावरणं तथा ॥२१५॥
वेद्यते वेदयत्येवं वेदनीयमनेन वा । मोह्यते मोहयत्येवं मोहनीयमपीरितम् ॥२१६॥
नारकादिभवानेति यनेनेत्यायुरित्यपि । नम्यतेऽनेन वाऽऽत्मानं नमयत्यपि नाम तत् ॥२१७॥
गूयते शब्द्यते गोत्रमुच्चैर्नीचैश्च यत्नतः । अन्तरायोऽन्तरं मध्यं देयादेरेति यत्नतः ॥२१८॥
एकात्मपरिणामेन गृह्यमाणा हि पुद्गलाः । नानाकर्मत्वमायान्ति प्रभुक्ताहाररसादिवत् ॥२१९॥
मूलप्रकृतिभेदोऽयमष्टभेदः प्रभाषितः । उत्तरप्रकृतीनां तु भेदोऽतः परमुच्यते ॥२२०॥

आदि संज्ञाएँ उत्पन्न करना है ॥२०८॥ गोत्र कर्मकी प्रकृति उच्च और नीच व्यवहार कराना है तथा अन्तराय कर्मकी प्रकृति दान आदिमें तीव्र विघ्न करना है ॥२०९॥ इसलिए ऐसा लक्षण करना चाहिए कि कर्मोंके द्वारा जो किया जाता है वही प्रकृतिबन्ध है और उनका अपने स्वभावसे च्युत नहीं होना सो स्थितिबन्ध है ॥२१०॥

जिस प्रकार बकरी, गाय तथा भैंस आदिके दूध अपने-अपने स्वभावसे ही माधुर्य गुणसे च्युत नहीं होते हैं उसी प्रकार कर्म भी अपनी-अपनी प्रकृतिसे च्युत नहीं होते हैं ॥२११॥

जिस प्रकार दूधमें रसविशेष, तीव्र अथवा मन्द आदि भावसे रहता है उसी प्रकार कर्मरूप पुद्गलमें भी सामर्थ्य-विशेष तीव्र अथवा मन्द आदि भावसे रहता है। यही अनुभव-बन्ध माना गया है ॥२१२॥ आत्माके कर्मरूप परिणत पुद्गल स्कन्धोंके समूहमें परमाणुके प्रमाणसे कल्पित परिच्छेदों-खण्डोंकी जो संख्या है वह प्रदेशबन्ध कहलाता है ॥२१३॥ प्रकृति और प्रदेशबन्ध योगके निमित्तसे होते हैं तथा स्थिति और अनुभवबन्ध कषायके निमित्तसे माने गये हैं ॥२१४॥

जिसके द्वारा ज्ञान ढँका जाये अथवा जो स्वयं ज्ञानको ढाँके वह ज्ञानावरण कर्म है। इसी प्रकार दर्शनावरण कर्मकी निरुक्ति जानना चाहिए अर्थात् जिसके द्वारा दर्शन ढँका जाये अथवा जो स्वयं दर्शनको ढाँके उसे दर्शनावरण कर्म कहते हैं ॥२१५॥ जिसके द्वारा सुख-दुःखका वेदन-अनुभव कराया जाये अथवा जो स्वयं सुख-दुःखका अनुभव करे वह वेदनीय कर्म है। जिसके द्वारा जीव मोहित किया जाये अथवा जो स्वयं मोहित करे वह मोहनीय कर्म है ॥२१६॥ जीव जिसके द्वारा नारकादि भवको प्राप्त कराया जाये अथवा जो स्वयं नारकादि भवको प्राप्त हो वह आयु कर्म है। आत्मा जिसके द्वारा नाना नामोंको प्राप्त कराया जाये अथवा जो स्वयं आत्माको नाना नामोंसे युक्त करे वह नामकर्म है ॥२१७॥ आत्मा जिसके द्वारा प्रयत्नपूर्वक उच्च अथवा नीच कहा जाता है वह गोत्र कहलाता है और जो यत्नपूर्वक देय आदिके बीचमें आ जाता है वह अन्तराय कर्म है ॥२१८॥ जिस प्रकार एक बार खाया हुआ अन्न रस, रक्त आदि नानारूपताको प्राप्त होता है, उसी प्रकार एक आत्मपरिणामके द्वारा ग्रहण किये हुए पुद्गल नाना कर्मरूपताको प्राप्त हो जाते हैं ॥२१९॥ यह आठ

---

१. जोगा पयडि-पदेसा ठिदिअणुभागा कसायदो होंति । अपरिणदुच्छिण्णेसु य बंधट्ठिदिकारणं णत्थि ॥ गो० कर्म० ॥

पञ्चधा ज्ञानावरणं नवधा दर्शनावृतिः । द्विधा तु वेदनीयं स्यान्मोहोऽष्टाविंशतिस्थितिः ॥२२१॥
आयुश्चतुर्विधं नाम द्विचत्वारिंशदीरितम् । द्विविधं गोत्रमुद्गीतमन्तरायस्तु पञ्चधा ॥२२२॥
मतिश्रुतावधिज्ञानमनःपर्ययकेवलैः । आवृत्यैरावृतीः पञ्च ह्युत्तरप्रकृतीर्विदुः ॥२२३॥
द्रव्यार्थादेशतः [1]शक्तेर्मनःपर्ययकेवली । [2]अभव्योऽप्यस्ति यत्तस्थं ज्ञानावरणपञ्चकम् ॥२२४॥
व्यक्तियोग्यत्वसद्भावापेक्षा भव्यस्य भव्यता । कैवल्यव्यक्त्ययोग्यत्वादभव्यस्य ह्यभव्यता ॥२२५॥
चक्षुषोऽचक्षुषो दृष्टेरवधेः केवलस्य च । चत्वार्यावरणान्येवं निद्राद्यैः पञ्चभिर्नव ॥२२६॥
मदखेदविनोदार्थः स्वापो निद्राभिकल्पतः । उपर्युपरि तद्वृत्तिर्निद्रानिद्राभिधीयते ॥२२७॥

प्रकारका मूल प्रकृतिबन्ध कहा गया है, अब इसके आगे उत्तर प्रकृतियोंके भेद कहे जाते हैं ॥२२०॥

ज्ञानावरण पाँच प्रकारका है, दर्शनावरण नौ प्रकारका है, वेदनीय दो प्रकारका है, मोहनीय अट्ठाईस प्रकारका है, आयु चार प्रकारका है, नाम बयालीस प्रकारका है, गोत्र दो प्रकारका कहा गया है और अन्तराय पाँच प्रकारका है ॥२२१-२२२॥ मतिज्ञान, श्रुतज्ञान, अवधिज्ञान, मनःपर्ययज्ञान और केवलज्ञान ये पाँच आवरण करने योग्य गुण हैं। इन्हें आवरण करनेवाले मतिज्ञानावरण, श्रुतज्ञानावरण, अवधिज्ञानावरण, मनःपर्ययज्ञानावरण और केवलज्ञानावरण ये पाँच ज्ञानावरण कर्मकी उत्तर प्रकृतियाँ हैं ॥२२३॥ द्रव्यार्थिकनयकी अपेक्षा शक्तिरूपसे अभव्य जीव भी मनःपर्यय और केवलज्ञानसे युक्त है, अतः उसके भी ज्ञानावरणके पाँचों भेद स्थित हैं ॥२२४॥ भव्य जीवकी भव्यता उक्त गुणोंके प्रकट होनेकी योग्यताके सद्भावकी अपेक्षा रखती है और अभव्य जीवकी अभव्यता केवलज्ञान तथा मनःपर्ययज्ञानके प्रकट होनेकी योग्यता न होनेकी अपेक्षासे है। भावार्थ—किसीने प्रश्न किया था कि जब भव्य और अभव्य दोनोंके ही मनःपर्यय ज्ञान और केवलज्ञानकी शक्ति विद्यमान है तब इनमें भव्यता और अभव्यताका भेद कैसे हुआ ? इसका उत्तर ग्रन्थकर्ताने दिया है कि भव्य जीवके उन शक्तियोंकी प्रकटता हो जाती है और अभव्य जीवके उनकी प्रकटता नहीं होती ॥२२५॥

चक्षुर्दर्शनावरण, अचक्षुर्दर्शनावरण, अवधिदर्शनावरण और केवलदर्शनावरण ये चार आवरण तथा निद्रा आदिक पाँच अर्थात् निद्रा, निद्रानिद्रा, प्रचला, प्रचलाप्रचला और स्त्यानगृद्धि ये पाँच निद्राएँ सब मिलाकर दर्शनावरण कर्मकी नौ उत्तर प्रकृतियाँ हैं। जो जीवके चक्षुर्दर्शन—चक्षु इन्द्रियसे होनेवाले सामान्य अवलोकनको प्रकट न होने दे वह चक्षुर्दर्शनावरण है। जो अचक्षुर्दर्शन—चक्षुको छोड़ कर अन्य इन्द्रियों तथा मनसे होनेवाले सामान्य अवलोकनको प्रकट न होने दे वह अचक्षुर्दर्शनावरण है। जो अवधिदर्शन—अवधिज्ञानके पहले प्रकट होनेवाले सामान्य अवलोकनको न होने दे वह अवधिदर्शनावरण है और जो केवलदर्शन—केवलज्ञानके साथ होनेवाले सामान्यावलोकनको न होने दे वह केवलदर्शनावरण है ॥ २२६ ॥ मद तथा खेदको दूर करनेके लिए सोना निद्रा कहलाती है। ऊपर-ऊपर अधिक रूपसे निद्राका आना निद्रा निद्रा कही जाती है ॥ २२७ ॥

---

१. शक्तिर्मनः—म०, ख०, ङ० । २. अभव्याऽप्यस्ति क०, ङ० । अत्र चोद्यते—अभव्यस्य मनःपर्ययज्ञानशक्तिः केवलज्ञानशक्तिश्च स्याद्वा न वा ? यदि स्यात् तस्याभव्यत्वाभावः । अथ नास्ति तत्रावरणद्वयकल्पना व्यर्थेति ? उच्यते—आदेशवचनान्न दोषः । द्रव्यार्थादेशान्मनःपर्ययकेवलज्ञानशक्तिसम्भवः । पर्यायार्थादेशात्तच्छक्त्यभावः । यद्येवं भव्याभव्यविकल्पो नोपपद्यते; उभयत्र तच्छक्तिसद्भावात् । न शक्तिभावाभावापेक्षया भव्याभव्यविकल्प इत्युच्यते । कुतस्तर्हि ? व्यक्तिसद्भावासद्भावापेक्षया । स० सि० अ० ८ सूत्र ६ ।

श्रमादिप्रभवात्मानं प्रचला प्रचलयत्यलम् । सा पुनः पुनरावृत्ता प्रचलाप्रचलाभिधा ॥२२८॥
स्त्यानगृद्धिर्ययात्स्याने स्वप्ने गृध्यति दीप्यते । आत्मा यदुदयाद्रौद्रं बहुकर्म करोति सा ॥२२९॥
शारीरं मानसं सौख्यं दुःखं चोदयते ययोः । स्यातां ते वेदनीये स्तः सातासाते यथाक्रमम् ॥२३०॥
सम्यक्त्वं चापि मिथ्यात्वं सम्यग्मिथ्यात्वमित्यदः । इत्थं दर्शनमोहस्य सुत्तरं प्रकृतित्रिकम्॥२३१॥
शुभात्मपरिणामेन निरुद्धस्वरसे स्थिते । मिथ्यात्वे श्रद्दधानस्य सम्यक्त्वप्रकृतिर्भवेत् ॥२३२॥
मिथ्यात्वे त्वर्धसंशुद्धे कोद्रवे मदशक्तिवत् । शुद्धाशुद्धात्मको भावः सम्यग्मिथ्यात्वमुच्यते ॥२३३॥
द्वेधा चारित्रमोहस्तु नोकषायकषायतः । नवधा नोकषायोऽत्र कषायाः षोडशोदिताः ॥२३४॥
उदयाद्यस्य हासाविर्भावो हास्यं तदुत्सुकः । यस्योदयाद्रतिः सा स्यादरतिस्तद्विपर्ययः ॥२३५॥
शोचनं यद्विपाकात्स शोक उद्वेगकृद्भयम् । स्वदोषगोपनं यस्य जुगुप्सा सा जुगुप्सिता ॥२३६॥
भावांस्त्रैण्यान्यतो याति स स्त्रीवेदोऽतिगर्हितः । पुन्नपुंसकवेदौ स्तः पौंस्नान्नापुंसकाद् यतः ॥२३७॥

थकावट आदिसे उत्पन्न होनेवाली जो निद्रा जीवको बैठे-बैठे ही अत्यधिक चपल कर देवे वह प्रचला है। प्रचला जब बार-बार अधिक रूपमें आती है तब प्रचलाप्रचला कहलाने लगती है ॥ २२८ ॥ जिसके द्वारा आत्मा स्त्यान अर्थात् सोते समय गृद्धता करने लगे—किसी कर्ममें सचेष्ट हो जावे और जिसके उदयसे यह जीव अत्यधिक कठिन काम कर ले वह स्त्यानगृद्धि है। यह पाँच प्रकारकी निद्रा, दर्शनावरण कर्मके उदयसे आती है और इन निद्राओंके माध्यमसे दर्शनावरण कर्म आत्माके दर्शनगुणको घातता है ॥ २२९ ॥ वेदनीय कर्मके दो भेद हैं—सातावेदनीय और असातावेदनीय। जिनके उदयसे शारीरिक और मानसिक सुख-दुःख उत्पन्न होते हैं वे यथाक्रमसे सातावेदनीय और असातावेदनीय कहलाते हैं ॥ २३० ॥

मोहनीय कर्मके मूलमें दो भेद हैं—१. दर्शनमोहनीय, २. चारित्रमोहनीय। इनमें-से दर्शनमोहनीयको सम्यक्त्व, मिथ्यात्व और सम्यङ्मिथ्यात्व ये तीन उत्तर प्रकृतियाँ हैं ॥ २३१ ॥ आत्माके शुभ परिणामोंसे जब मिथ्यात्वप्रकृतिका स्वरस—फल देनेकी शक्ति रुक जाती है तब श्रद्धान करनेवाले जीवके सम्यक्त्व प्रकृतिका उदय होता है। इस प्रकृतिके उदयसे आत्माका श्रद्धानगुण तिरोहित नहीं होता किन्तु चल, मल, अगाढ़ दोषोंसे दूषित हो जाता है ॥ २३२ ॥ मिथ्यात्व प्रकृतिके उदयसे श्रद्धान गुण विकृत हो जाता है और अतत्व श्रद्धानरूपी परिणति हो जाती है। अर्ध शुद्ध कोदोंकी मदशक्तिके समान मिथ्यात्व प्रकृतिके अर्द्ध शुद्ध होनेपर जीवका जो शुद्ध और अशुद्ध भाव एक साथ प्रकट होता है वह सम्यङ्मिथ्यात्व कहलाता है। सम्यङ्मिथ्यात्व प्रकृतिके उदयसे जीवके परिणाम दही और गुड़के मिश्रित स्वादके समान श्रद्धान और अश्रद्धान रूप होते हैं ॥ २३३ ॥ नोकषाय और कषायके भेदसे चारित्रमोहके दो भेद हैं। इनमें नोकषायके नौ और कषायके सोलह भेद कहे गये हैं ॥ २३४ ॥ हास्य, रति, अरति, शोक, भय, जुगुप्सा, स्त्रीवेद, पुरुषवेद और नपुंसक वेद ये नौ नोकषायके भेद हैं। इनके लक्षण इस प्रकार हैं—जिसके उदयसे उत्सुक होता हुआ हास्य प्रकट हो वह हास्यकर्म है। जिसके उदयसे रति—प्रीति उत्पन्न हो वह रति कर्म है। जिसके उदयसे अरति—अप्रीति उत्पन्न हो वह अरति है। जिसके उदयसे शोक हो वह शोक है। जो उद्वेग—भय उत्पन्न करनेवाला है वह भय है। जिसके उदयसे अपने दोष छिपानेमें प्रवृत्ति हो वह जुगुप्सा है। जिसके उदयसे यह जीव स्त्रीके भावको अर्थात् पुरुषसे रमनेकी इच्छाको प्राप्त होता है वह स्त्रीवेद है। जिसके उदयसे पुरुषके भावको अर्थात् स्त्रीसे रमनेकी इच्छाको प्राप्त होता है वह पुरुषवेद है। और जिसके उदयसे नपुंसकके भावको—अर्थात् स्त्री-पुरुष दोनोंसे रमनेकी इच्छाको प्राप्त होता है वह

कषायाः क्रोधमानौ च मायालोभौ च घातकाः । सम्यक्त्वस्य सवृत्तस्य तत्रानन्तानुबन्धिनः[1] ॥२३८॥
यदीयोदयतो ह्यात्मा प्रत्याख्यातुं न शक्नुयात् । हिंसादीन्[2]युदयात्ते स्युरप्रत्याख्यानसंज्ञकाः ॥२३९॥
यदीयोदयतो जीवः संयमं न प्रपद्यते । ते क्रोधमानमायाद्याः [3]प्रत्याख्यानविनिःश्रुताः ॥२४०॥
यदीयोदयतो वृत्तं यथाख्यातं न जायते । ज्वलन्तः संयमेनामा ख्याताः [4]संज्वलनास्तु ते ॥२४१॥
नारकं नरकोद्भूतं तैर्यग्योनं च मानुषम् । दैवं चायुर्भवेत्तेषु चतुर्विधमितीरितम् ॥२४२॥
यदीयोदयतो जन्तुर्भवान्तरमियर्ति सा । गतिश्चतुर्विधा देवनरकादिविभेदतः ॥२४३॥
आत्मनो नरकादित्वं यन्निमित्तं प्रजायते । तस्यान्नरकगत्यादि गतिनाम चतुर्विधम् ॥२४४॥
गतिष्वेकीकृतार्था[5] सा साम्येनाव्यभिचारिणा । जातिस्तस्या निमित्तं तु जातिनामात्र पञ्चधा ॥२४५॥
एकेन्द्रियादिकां जातिमुदयाद्यस्य जन्तवः । प्रयान्त्येकेन्द्रियाद्येतज्जातिनामाभिधीयते ॥२४६॥
शरीरपञ्चकस्यास्य निर्वृत्तिर्यस्य चोदयात् । औदारिकशरीरादि नाम पञ्चविधं तु तत् ॥२४७॥
अङ्गोपाङ्गविवेकः स्याच्छरीराणां यतस्तु तत् । त्रिधाङ्गोपाङ्गनामाख्यमौदारिकपुरस्सरम् ॥२४८॥
चक्षुरादीन्द्रियस्थानप्रमाणे जात्यपेक्षया[6] । ये निर्मापयतस्ते स्तो नाम्नी निर्माणनामनी ॥२४९॥

नपुंसक वेद है ॥ २३५-२३७ ॥ कषायके मूलमें अनन्तानुबन्धी, अप्रत्याख्यानावरण, प्रत्याख्यानावरण और संज्वलनके भेदसे चार भेद हैं। फिर प्रत्येकके क्रोध, मान, माया और लोभकी अपेक्षा चार-चार भेद हैं। इस प्रकार कषायके कुल सोलह भेद हैं। इनमें-से अनन्तानुबन्धीसम्बन्धी क्रोध, मान, माया, लोभ, सम्यग्दर्शन तथा स्वरूपाचरण चारित्रके घातक हैं ॥ २३८ ॥ जिसके उदयसे आत्मा हिंसादि रूप परिणतियोंका त्याग करनेमें समर्थ न हो सके वे अप्रत्याख्यानावरण क्रोध, मान, माया, लोभ हैं ॥ २३९ ॥ जिनके उदयसे जीव संयमको प्राप्त न हो सके वे प्रत्याख्यानावरण क्रोध, मान, माया लोभ हैं ॥ २४० ॥ और जिनके उदयसे यथाख्यात चारित्र प्रकट नहीं होता तथा जो संयमके साथ विद्यमान रहते हैं वे संज्वलन क्रोध, मान, माया, लोभ हैं ॥ २४१ ॥

नारक, तैर्यग्योन, मानुष और दैवके भेदसे आयु कर्म चार प्रकारका कहा गया है। आयु कर्मके उदयसे यह जीव नारकादि पर्यायोंमें उत्पन्न होता है ॥ २४२ ॥

जिसके उदयसे जीव भवान्तरको प्राप्त होता है वह गति नाम कर्म है। देव तथा नारकादिके भेदसे गति नाम कर्म चार प्रकारका है ॥ २४३ ॥ जिसके निमित्तसे आत्मामें नरकादि पर्याय प्रकट होती है वह चार प्रकारका नरकादि नाम कर्म है ॥२४४॥ उन नरकादि गतियोंमें जो अविरोधी समान धर्मसे आत्माको एक रूप करनेवाली अवस्था है उसे जाति कहते हैं। उस जातिका जो निमित्त है वह जाति नाम कर्म कहा जाता है इसके एकेन्द्रिय जाति आदि पाँच भेद हैं ॥ २४५ ॥ जिसके उदयसे जीव एकेन्द्रियादि जातिको प्राप्त होते हैं वह एकेन्द्रियादि जाति नाम कर्म कहलाता है ॥ २४६ ॥ जिसके उदयसे औदारिक आदि पाँच शरीरोंकी रचना होती है वह औदारिक शरीरादि पाँच प्रकारका शरीर नाम कर्म है ॥ २४७ ॥ जिसके उदयसे शरीरोंमें अङ्गोपाङ्गका विवेक होता है वह औदारिक शरीराङ्गोपाङ्गको आदि लेकर तीन प्रकारका अङ्गोपाङ्ग नाम कर्म है ॥ २४८ ॥ जो जातिकी अपेक्षा चक्षु आदि इन्द्रियोंके स्थान और प्रमाणका निर्माण करते हैं वे स्थाननिर्माण और प्रमाणनिर्माण-

१. यस्यान्तो नास्ति सोऽनन्तः संसारस्तस्य कारणत्वात् मिथ्यात्वमपि अनन्तं तदनुबध्नन्तीत्यनन्तानुबन्धिनः। २. ईषत्प्रत्याख्यानमप्रत्याख्यानं तस्यावरणं यैस्तेऽप्रत्याख्यानावरणाः। ३. प्रत्याख्यानं चारित्रं तस्यावरणं यैस्ते प्रत्याख्यानावरणाः। ४. नामैकदेशेन सर्वदेशग्रहणात् सम् पदेन संयमस्य ग्रहणं तेन सह ज्वलतीति संज्वलनम्। ५. एकीगतार्था म०। ६. यदपेक्षया म०, ङ०।

कर्मोदयवशोपात्तपुद्गलान्योन्यबन्धनम् । शरीरेषूदयाद्यस्य भवेद्बन्धननाम तत् ॥२५०॥
यस्योदयाच्छरीराणां नीरन्ध्रान्योन्यसंहतिः । संघातनाम तन्नाम्ना संघातानाम[1]नत्ययात् ॥२५१॥
शरीराकृतिनिर्वृत्तिर्यतो भवति देहिनाम् । संस्थाननाम तत् षोढा संस्थानकरणार्थतः ॥२५२॥
समादिचतुरस्रोतो न्यग्रोधपरिमण्डलम् । स्वातिसंस्थाननामापि कुब्जवामनहुण्डकम् ॥२५३॥
यतो भवति सुश्लिष्टमस्थिसंधानबन्धनम् । [2]तत्संहनननामापि नाम्ना षोढा विभज्यते ॥२५४॥
तद्वज्रर्षभनाराचवज्रनाराचकीलकाः । सनाराचार्धनाराचाः सासंप्राप्तसृपाटिकाः ॥२५५॥
स्पर्शनस्योदयाद्यस्य प्रादुर्भावेन भूयते । स्पर्शनाम भवत्येतदविभक्तमिवाष्टधा ॥२५६॥
कथितं कर्कशनामैकं मृदुनाम तथापरम् । गुरुनाम लघुस्निग्धरूक्षशीतोष्णनाम च ॥२५७॥

के भेदसे दो प्रकारके निर्माण नाम कर्म हैं ॥२४९॥* जिसके उदयसे, कर्मोदयके वशसे प्राप्त पुद्गलोंका परस्पर संश्लेष होता है वह बन्धन नाम कर्म है । इसके औदारिक शरीर बन्धन आदि पाँच भेद हैं ॥ २५० ॥ जिसके उदयसे शरीरके प्रदेशोंका परस्पर छिद्ररहित संश्लेष होता है वह संघात नाम कर्म है । संघातोंका कभी अत्यय—विघटन नहीं होता इसलिए संघात नाम सार्थक है । इसके औदारिक शरीर संघात आदि पाँच भेद हैं ॥ २५१ ॥ जिसके उदयसे जीवोंके शरीरकी आकृतिकी रचना होती है वह संस्थान नाम कर्म है । संस्थान अर्थात् आकृतिको करे सो संस्थान है यह संस्थान शब्दको निरुक्ति है । वह संस्थान, समचतुरस्र संस्थान, न्यग्रोध परिमण्डल संस्थान, स्वाति संस्थान, कुब्जक संस्थान, वामन संस्थान और हुण्डक संस्थानके भेदसे छह प्रकारका होता है । जिसके उदयसे सुडौल-सुन्दर शरीरकी रचना हो वह समचतुरस्र संस्थान नाम कर्म है । जिसके उदयसे शरीरके अवयव न्यग्रोध—वट वृक्षके समान नाभिसे नीचे छोटे और नाभिसे ऊपर बड़े हों वह न्यग्रोध परिमण्डल नाम कर्म है । जिसके उदयसे शरीरकी रचना स्वाति--साँपकी वामीके समान नाभिके नीचे विस्तृत और नाभिसे ऊपर संकुचित हो वह स्वाति नाम कर्म है । जिसके उदयसे शरीरमें कूबड़ निकल आवे वह कुब्जक संस्थान है । जिसके उदयसे शरीर वामन—बौना हो वह वामन नाम कर्म है और जिसके उदयसे शरीरकी आकृति बेडौल हो वह हुण्डक संस्थान नाम कर्म है ॥२५२-२५३॥ जिसके उदयसे हड्डियोंका परस्पर मिलन और बन्धन अच्छी तरह होता है वह संहनन नाम कर्म है । इसके वज्रर्षभनाराच संहनन, वज्रनाराचसंहनन, नाराचसंहनन, अर्धनाराचसंहनन, कीलकसंहनन और असंप्राप्तसृपाटिका संहनन ये छह भेद हैं । जिसके उदयसे वज्रके वेष्टन, वज्रकी कीलियाँ और वज्रके हाड़ हों उसे वज्रर्षभनाराच संहनन कहते हैं । जिसके उदयसे कीलियाँ और हाड़ तो वज्रके हों परन्तु वेष्टन वज्रके न हों वह वज्रनाराच-संहनन है । जिसके उदयसे हाड़ तथा संधियोंकी कीलें तो हों परन्तु वज्रमय न हों इसी तरह वेष्टन भी वज्रमय न हो उसे नाराचसंहनन कहते हैं । जिसके उदयसे हड्डियाँ आधी कीलोंसे सहित हों उसे अर्धनाराचसंहनन कहते हैं । जिसके उदयसे हाड़ परस्पर कीलित हों उसे कीलक संहनन कहते हैं और जिसके उदयसे हाड़ोंकी संधियाँ कीलोंसे रहित हों तथा मात्र नसों और मांससे बँधी हों उसे असंप्राप्तसृपाटिका संहनन कहते हैं ॥ २५४-२५५ ॥ जिसके उदयसे शरीरमें स्पर्शकी उत्पत्ति होती है वह स्पर्श नाम कर्म है । यह कड़ा, कोमल, गुरु,

---

१. संघाता नाम सत्यया म० । संघाता नाम सत्वयात् घ०, ङ०, ग० । संघाता नाम सत्वया स० । २. तत्संहारनामापि म० ।

* निर्माण नाम कर्मके दो भेद अवश्य हैं परन्तु बयालीस भेदोंकी गणनामें उसका एक भेद ही परिगणित है ।

यद्धेतुरसभेदः स्याद्रसनाम तदीरितम् । [1]कटुतिक्तकषायाम्लमधुरध्वनिनाम तत् ॥२५८॥
यस्योदयाद्भवेद्गन्धो गन्धनाम तदुच्यते । द्विविधं तत्तु बोद्धव्यं सुरभ्यसुरभीति च ॥२५९॥
यद्धेतुर्वर्णभेदस्तद्वर्णनामाख्यपञ्चधा । कृष्णनीलत्वरक्तत्वपीतशुक्लत्वयोगतः ॥२६०॥
उदयाद्यस्य पूर्वात्मशरीराकृत्यसंक्षयः[2] । चतुर्गत्यानुपूर्व्यं तत्तथागुरुलघूदितम् ॥२६१॥
यस्योदयादयोवत्तु गुरुत्वान्न पतत्यधः । न गच्छति पुमानूर्ध्वं लघुत्वादर्कतूलवत् ॥२६२॥
स्वकृतो बन्धनाद्यैः स्यादुपघातो यतस्तु तत् । उपघातं समुद्दिष्टं परघातं [3]पराद्वधः ॥२६३॥
यदीयोदयनिर्वृत्तं [4]भवत्यातपनं महत् । आदित्यवद्वर्तमानं [5]मतमातपनाम तत् ॥२६४॥
यद्धेतुद्योतनं देहे वेद्यमुद्योतनाम तत् । चन्द्रखद्योतकाद्येषु वर्तमानं यदीक्ष्यते [6]॥२६५॥
उच्छ्वासकारणं यत्तु मतमुच्छ्वासनाम तत् । विहायोगतिराकाशे शस्ताशस्तगतिप्रभुः ॥२६६॥
तत्प्रत्येकशरीराख्यं नाम यत्र शरीरकम् । [7]सदैकात्मोपभोगस्य हेतुर्निर्वर्तते यतः ॥२६७॥
साधारणमनेकेषामेकं यस्माच्छरीरकम् । साधारणशरीराख्यं नाम तद्भोगकारणम् ॥२६८॥
उदयाद्यस्य जीवानां द्वीन्द्रियादिषु जन्म यत् । त्रसनाम विपर्यस्थं स्थावराख्यं तु नाम तत् ॥२६९॥
सर्वप्रीतिकरो यस्मात्प्राणी सुभगनाम तत् । यतोऽप्रीतिकरोऽन्येषां नाम्ना दुर्भग नाम तत् ॥२७०॥

लघु, स्निग्ध, रूक्ष, शीत और उष्णके भेदसे आठ प्रकारका है ॥ २५६-२५७ ॥ जिसके निमित्तसे रसमें भेद होता है वह रस नाम कर्म कहा गया है। इसके कटुक, तिक्त, कषाय, आम्ल और मधुरके भेदसे पाँच भेद हैं ॥ २५८ ॥ जिसके उदयसे गन्ध होता है वह गन्ध नाम कर्म है। इसके सुगन्ध और दुर्गन्धकी अपेक्षा दो भेद जानना चाहिए ॥ २५९ ॥ जिसके निमित्तसे वर्णमें भेद होता है वह वर्ण नाम कर्म है। यह कृष्ण, नील, रक्त, पीत और शुक्लके भेदसे पाँच प्रकारका है ॥ २६० ॥ जिसके उदयसे विग्रह गतिमें पूर्व शरीरकी आकृतिका विनाश न हो वह नरकगत्यानुपूर्व्य आदिके भेदसे चार प्रकारका आनुपूर्व्य नाम कर्म है। जिसके उदयसे यह जीव भारीपनके कारण लोहेके समान नीचे नहीं गिरता है और लघुपनके कारण आककी रुईके समान ऊपर नहीं उड़ता है वह अगुरु लघु नाम कर्म कहा गया है ॥२६१-२६२॥ जिसके उदयसे अपने ही बन्धन आदिसे अपना ही घात होता है वह उपघात नाम कर्म कहा गया है और जिसके उदयसे दूसरोंका घात होता है वह परघात नाम कर्म है ॥ २६३ ॥ जिसके उदयसे शरीरमें सूर्यके समान बहुत भारी आतापकी उत्पत्ति होती है वह आताप नाम कर्म माना गया है इसका उदय सूर्यके विमानमें स्थित बादरपृथिवीकायिक जीवोंके ही होता है। इसकी विशेषता यह है कि यह मूलमें ठण्डा होता है और इसकी प्रभा उष्ण होती है ॥ २६४ ॥ जिसके उदयसे शरीरमें विशिष्ट प्रकारका प्रकाश होता है वह उद्योत नाम कर्म है। यह उद्योत चन्द्रमाके विमानमें स्थित बादरपृथिवीकायिक जीव तथा जुगनू आदिमें देखा जाता है ॥ २६५ ॥ जो उच्छ्वासका कारण है वह उच्छ्वास नाम कर्म माना गया है तथा जो आकाशमें प्रशस्त एवं अप्रशस्त गति करानेमें समर्थ है वह विहायोगति नाम कर्म है ॥ २६६ ॥ जिसके उदयसे ऐसे शरीरकी रचना हो जो सदा एक ही आत्माके उपभोगका कारण हो वह प्रत्येकशरीर नाम कर्म है ॥ २६७ ॥ जिसके उदयसे एक ही शरीर अनेक जीवोंके उपभोगका कारण होता है वह साधारण नाम कर्म है ॥ २६८ ॥ जिसके उदयसे जीवोंका द्वीन्द्रियादिक जीवोंमें जन्म होता है वह त्रसनाम कर्म है। जिसके उदयसे इसके विपरीत सिर्फ एकेन्द्रिय जीवोंमें जन्म हो वह स्थावर नाम कर्म है ॥२६९॥ जिसके निमित्तसे यह जीव

---

१. कट्वातिक्त म० । २. शरीराकृतिसंक्षयः म०, क०, ङ० । ३. परैर्वधः क० । ४. भवत्यापतनं म० । ५. मतं सातप-म०, ङ० । ६. यदीक्षते म० । ७. सदैवात्मोपभोगस्य म०, ङ० ।

मनोज्ञस्वरनिर्वृत्तिर्यतः सुस्वरनाम तत् । अनिष्टस्वरहेतुर्यत्प्रोक्तं दुःस्वरनाम तत् ॥२७१॥
यतस्तु रमणीयत्वं शुभनाम तदीरितम् । अतिवैरूप्यहेतुश्च नाम्नाशुभमशोभनम् ॥२७२॥
[1]यत्तु सूक्ष्मशरीरस्य कारणं सूक्ष्म नाम तत् । परबाधाकृतो हेतुः शरीरस्य तु बादरः ॥२७३॥
यदाहारादिपर्याप्तिभेदनिर्वृत्तिकारणम् । पर्याप्तिनाम तत्षोढा षड्विधमुदितं बुधैः ॥२७४॥
आहारस्य शरीरस्य प्राणापानेन्द्रियस्य च । [2]पर्याप्त्यभावहेतुस्तु [3]भाषाया मनसोऽपरम् ॥२७५॥
कारणं स्थिरभावस्य स्थिरमस्थिरमन्यथा । नामादेयमनादेयं सप्रभाप्रभदेहकृत् ॥२७६॥
हेतुः पुण्यगुणाख्यातेः यशःकीर्तिरितीर्यते । अयशःकीर्तिनामापि तद्विपर्यासकारणम् ॥२७७॥

समस्त प्राणियोंके लिए प्रीति करनेवाला होता है वह सुभग नाम कर्म है। जिसके निमित्तसे दूसरोंको अप्रीति उत्पन्न करनेवाला हो वह दुर्भग नाम कर्म है ॥ २७० ॥ जिससे मनोज्ञ स्वर-की रचना होती है वह सुस्वर नाम कर्म है। जो अनिष्ट स्वरका कारण है वह दुःस्वर नाम कर्म है ॥ २७१ ॥ जिससे शरीरमें रमणीयता प्रकट होती है वह शुभ नाम कर्म है। जो अत्यन्त विरूपताका कारण है वह दुःखदायी अशुभ नाम कर्म है ॥ २७२ ॥ जो सूक्ष्म शरीरका कारण है वह सूक्ष्म नाम कर्म है। जो दूसरोंको बाधा करनेवाले शरीरका हेतु है वह बादर नाम कर्म है ॥ २७३ ॥ जो आहार आदि पर्याप्तियोंकी रचनाका कारण है वह पर्याप्ति नाम कर्म है। विद्वानोंने इसके आहारपर्याप्ति, शरीरपर्याप्ति, इन्द्रियपर्याप्ति, श्वासोच्छ्वासपर्याप्ति, भाषा-पर्याप्ति और मनःपर्याप्ति ये छह भेद कहे हैं ॥ २७४ ॥ जो आहार, शरीर, श्वासोच्छ्वास, इन्द्रिय, भाषा और मन इन छह पर्याप्तियोंके अभावका कारण है वह अपर्याप्ति नाम कर्म है ॥ भावार्थ—विग्रह गतिके बाद उत्पत्ति स्थानमें पहुँचनेपर ग्रहण किये हुए आहार-वर्गणाके परमाणुओंमें खल रसभाग रूप परिणमन करनेकी जीवकी शक्तिकी पूर्णताको आहारपर्याप्ति कहते हैं। जिन परमाणुओंको खल रूप परिणमाया था उन्हें हड्डी आदि कठोर अवयव रूप तथा जिन्हें रस रूप परिणमाया था उन्हें रुधिर आदि तरल अवयव रूप परिणमावनेकी शक्तिकी पूर्णताको शरीरपर्याप्ति कहते हैं। शरीर रूप परिणत परमाणुओंमें स्पर्शनादि इन्द्रियोंके आकार परिणमावनेकी शक्तिकी पूर्णताको इन्द्रियपर्याप्ति कहते हैं। भीतरकी वायुको बाहर छोड़ना और बाहरकी वायुको भीतर खींचनेकी शक्तिकी पूर्णताको श्वासोच्छ्वासपर्याप्ति कहते हैं। भाषावर्गणाके परमाणुओंको शब्द रूप परिणमावनेकी शक्तिकी पूर्णताको भाषापर्याप्ति कहते हैं। और मनोवर्गणाके परमाणुओंको हृदय-क्षेत्रमें स्थित आठ पाँखुड़ीके कमलाकार द्रव्यमनरूप परिणमावनेकी शक्तिकी पूर्णताको मनःपर्याप्ति कहते हैं। इनमें-से एकेन्द्रिय जीवके भाषा और मनको छोड़कर चार पर्याप्तियाँ होती हैं। द्वीन्द्रियसे लेकर असैनीपञ्चेन्द्रिय तक मनको छोड़कर शेष पाँच पर्याप्तियाँ होती हैं और सैनी पञ्चेन्द्रिय जीवके सभी पर्याप्तियाँ होती हैं। जिसके उदयसे ये पर्याप्तियाँ पूर्ण होती हैं वह पर्याप्तक नाम कर्म है और जिसके उदयसे एक भी पर्याप्ति पूर्ण नहीं होती वह अपर्याप्तक नाम कर्म है। यहाँ अपर्याप्तक शब्दसे लब्ध्यपर्याप्तक जीवकी विवक्षा है, निर्वृत्त्यपर्याप्तककी नहीं। क्योंकि वह कर्मोदयकी अपेक्षा तो पर्याप्तक ही है सिर्फ निर्वृत्ति-रचनाकी अपेक्षा लघु अन्तर्मुहूर्तके लिए अपर्याप्तक होता है ॥ २७५ ॥ जो धातु-उपधातुओंकी स्थिरताका कारण है वह स्थिर नाम कर्म है और जो इससे विपरीत अस्थिरताका कारण है वह अस्थिर नाम कर्म है, जो प्रभापूर्ण शरीरका कारण है वह आदेय नाम कर्म है और जो प्रभा-रहित शरीरका कारण है वह अनादेय नाम कर्म है ॥ २७६ ॥ जो पुण्य रूप गुणोंकी प्रसिद्धिका कारण है वह

१. यत्र म०, ख० । २. पर्याप्त्यभावहेतुस्तु क० । ३. भाषायां म० ।

हेतुस्तीर्थंकरत्वस्य तत्तीर्थंकरनाम तत् । नाम्नः प्रकृतिभेदास्त्रिनवतिस्तूत्तरोत्तराः ॥२७८॥
गोत्रमुच्चैश्च नीचैश्च तत्र यस्योदयात्कुले । पूजिते जन्म [1]तदुच्चैर्नीचैर्नीचकुलेषु तत् ॥२७९॥
दीयते दातुकामैर्न लब्धुकामैर्न लभ्यते । यदुदयात्प्रणीतौ तौ दानलाभान्तरायकौ ॥२८०॥
भोक्तुकामोऽपि नो भुङ्क्ते नोपभुङ्क्ते तथेच्छुकः । यदेतावन्तरायौ तौ ज्ञेयौ भोगोपभोगयोः ॥२८१॥
तथोत्सहितुकामो यो यतो नोत्सहते स हि । वीर्यान्तराय एषोऽसौ बन्धः प्रकृतिलक्षणः ॥२८२॥
स्थितिबन्धविकल्पस्तु जघन्योत्कृष्टभेदवान् । अष्टानां कर्मणामेषां द्विविधोऽपि निरूप्यते ॥२८३॥
[2]ज्ञानदर्शनसंवृत्योर्वेदनीयान्तराययोः । सागरोपमकोटीनां कोट्यस्त्रिंशत्परा स्थितिः ॥२८४॥
सप्ततिर्मोहनीयस्य विंशतिर्नामगोत्रयोः । संज्ञिपञ्चेन्द्रियस्यैवं ज्ञेया पर्याप्तकस्य तु ॥२८५॥
आयुषस्तु त्रयस्त्रिंशत्सागरोपमिका परा । स्थितिः सा वेदनीयस्य मुहूर्ता द्वादशावरा ॥२८६॥
साष्टावेव मुहूर्ता स्याज्जघन्या नामगोत्रयोः । पञ्चानामपि शेषाणां स्थितिरन्तर्मुहूर्तिका ॥२८७॥

यशःकीर्ति नामकर्म कहलाता है और जो इससे विपरीत अपयशका कारण है वह अपयशस्कीर्ति नामकर्म है ॥ २७७ ॥ और जो तीर्थंकर पर्यायका कारण है वह तीर्थंकर नामकर्म है यह सातिशय पुण्य प्रकृति है। इस प्रकार नामकर्मकी तिरानबे उत्तर प्रकृतियाँ हैं ॥२७८॥

गोत्रकर्मके दो भेद हैं—१. उच्च गोत्र और नीच गोत्र। जिसके उदयसे लोकपूज्य कुलमें जन्म होता है उसे उच्च गोत्र कहते हैं और जिसके उदयसे नीच कुलोंमें जन्म होता है वह नीच गोत्र है ॥ २७९ ॥

अन्तराय कर्मके पाँच भेद हैं—१. दानान्तराय, २. लाभान्तराय, ३. भोगान्तराय, ४. उपभोगान्तराय और ५. वीर्यान्तराय। जिसके उदयसे जीव दान करनेकी इच्छा करते हुए भी दान न कर सके वह दानान्तराय है। जिसके उदयसे लाभकी इच्छा रखते हुए भी लाभ प्राप्त न कर सकें वह लाभान्तराय है ॥ २८० ॥ जिसके उदयसे जीव, भोगकी इच्छा रखता हुआ भी भोग नहीं सकता वह भोगान्तराय है। जिसके उदयसे उपभोगकी इच्छा रखता हुआ भी उपभोग नहीं कर सकता वह उपभोगान्तराय है ॥ २८१ ॥ और जिसके उदयसे कार्योंमें उत्साहित होता हुआ भी उत्साह प्रकट नहीं कर सकता वह अन्तराय नामका कर्म है। इस प्रकार यह प्रकृतिबन्धका निरूपण किया ॥ २८२ ॥ अब स्थितिबन्धका निरूपण करते हैं। आठों कर्मोंका स्थितिबन्ध, जघन्य और उत्कृष्टकी अपेक्षासे दो प्रकारका कहा जाता है ॥ २८३ ॥

ज्ञानावरण, दर्शनावरण, वेदनीय और अन्तराय इन चार कर्मोंकी उत्कृष्ट स्थिति तीस कोड़ाकोड़ी सागर है ॥ २८४ ॥ मोहनीय कर्मकी सत्तर कोड़ाकोड़ी सागर है और नाम तथा गोत्र कर्मकी बीस कोड़ाकोड़ी सागर है। यह उत्कृष्ट स्थिति संज्ञी पञ्चेन्द्रिय पर्याप्तक जीवके ही बँधती है ॥ २८५ ॥ आयुकर्मकी उत्कृष्ट स्थिति तेतीस सागर है। वेदनीय कर्मकी जघन्य स्थिति बारह मुहूर्त है। नाम और गोत्रकी आठ मुहूर्त है तथा शेष पाँच कर्मोंकी अन्तर्मुहूर्त है ॥ २८६–२८७ ॥

---

१. तदुच्चैः म० । २. आदितस्तिसृणामन्तरायस्य च त्रयस्त्रिंशत्सागरोपमा कोटीकोट्यः परा स्थितिः ॥१४॥ सप्ततिर्मोहनीयस्य ॥ १५ ॥ विंशतिर्नामगोत्रयोः ॥१६॥ त्रयस्त्रिंशत्सागरोपमाण्यायुषः ॥१७॥ अपरा द्वादशमुहूर्ता वेदनीयस्य ॥१८॥ नामगोत्रयोरष्टौ ॥१९॥ शेषाणामन्तर्मुहूर्ता ॥२०॥—त० सू० अ० ८ । तीसं कोडाकोडी तिघादितदियेसु वीसणामदुगे । सत्तरि मोहे सुद्धं उवही आउस्स तेत्तीसं ॥१२७॥ बारस य वेयणीये णामे गोदे य अट्ठ य मुहुत्ता । गो० क० ॥ भिण्णमुहुत्तं तु ठिदी जहण्णयं सेसपंचण्हं ॥१३९॥

कषायतीव्रमन्दादिभावास्रवविशेषतः । विशिष्टपाक इष्टस्तु विपाकोऽनुभवोऽथवा ॥२८८॥
स द्रव्यक्षेत्रकालोरुभवभावविभेदतः । विविधो हि विपाको यः सोऽनुभावः समुच्यते ॥२८९॥
प्रकृष्टोऽनुभवः पुण्यप्रकृतीनां शुभो यथा[2] । अशुभप्रकृतीनां तु निकृष्टोऽनुभवस्तथा ॥२९०॥
अशुभप्रकृतीनां तु परिणामविशेषतः । प्रकृष्टोऽनुभवोऽन्यासां निकृष्टोऽनुभवस्तथा ॥२९१॥
स्वमुखेनानुभूयन्ते मूलप्रकृतयोऽखिलाः । उत्तरास्तुल्यजातीया द्वयाम्मोहायुषी विना[3] ॥२९२॥

कषायोंकी तीव्रता, मन्दता आदि भावास्रवकी विशेषतासे जो उनका विशिष्ट परिपाक होता है उसे अनुभव कहते हैं अथवा द्रव्य, क्षेत्र, काल, भव और भावकी विभिन्नतासे कर्मों-का जो विविध—नाना प्रकारका परिपाक होता है वह अनुभवबन्ध कहलाता है ॥२८८–२८९॥ शुभ परिणामोंसे जिस प्रकार पुण्य प्रकृतियोंका उत्कृष्ट अनुभव बन्ध होता है उसी प्रकार पाप प्रकृतियोंका जघन्य अनुभव बन्ध होता है और अशुभ परिणामोंकी विशेषतासे जिस प्रकार अशुभ प्रकृतियोंका उत्कृष्ट अनुभव बन्ध होता है उसी प्रकार शुभ प्रकृतियोंका जघन्य अनुभव बन्ध होता है ॥ भावार्थ—प्रत्येक समय पुण्य और पाप प्रकृतियोंका अनुभव बन्ध जारी रहता है। जिस समय शुभ परिणामोंकी प्रकर्षता होती है उस समय पुण्य प्रकृतियोंका उत्कृष्ट अनुभव बन्ध होता है और पाप प्रकृतियोंका जघन्य अनुभव होता है। इसी प्रकार जिस समय अशुभ परिणामोंकी विशेषतासे पापप्रकृतियोंका उत्कृष्ट अनुभव होता है उस समय पुण्यप्रकृतियोंका जघन्य अनुभव बन्ध होता है ॥२९०–२९१॥ कर्मोंकी समस्त मूल प्रकृतियाँ स्वमुखसे ही अनुभवमें आती हैं—अपना फल देती हैं और मोहनीय तथा आयुकर्मको छोड़कर शेष कर्मों की तुल्य जातीय प्रकृतियाँ स्वमुख तथा परमुख—दोनों रूपसे अनुभवमें आती हैं—फल देती हैं। भावार्थ—जिस प्रकृतिका जिस रूप बन्ध हुआ है उसका उसी रूप उदय आना स्व-मुखसे उदय आना कहलाता है और अन्य प्रकृति रूप उदय आना परमुखसे उदय आना कहलाता है। कर्मोंकी ज्ञानावरणादि मूल प्रकृतियाँ सदा स्वमुखसे ही उदयमें आती हैं अर्थात् ज्ञानावरणका उदय दर्शनावरणादि रूप कभी नहीं होता है परन्तु उत्तर प्रकृतियोंमें एक कर्मकी प्रकृतियाँ स्वमुख तथा परमुख दोनों रूपसे फल देती हैं। जैसे वेदनीय कर्मकी साता वेदनीय और असाता वेदनीय ये दो उत्तर प्रकृतियाँ हैं। इनमें सातावेदनीयका उदय साता रूप भी आ सकता है और असाता रूप भी आ सकता है। इसी प्रकार असाता वेदनीयका उदय असाता रूप भी आ सकता है और साता रूप भी। जिस समय अपने रूप उदय आता है उस समय स्वमुखसे उदय आना कहलाता है और जिस समय अन्य रूप उदय आता है उस समय परमुखसे उदय आना कहलाता है। विशेषता यह है कि मोहनीय कर्मके जो दर्शन-मोह और चारित्र-मोह भेद हैं उनकी प्रकृतियाँ परस्पर एक दूसरे रूपमें उदय नहीं आतीं—सदा

१. विपाकोऽनुभवः ॥२१॥ त० सू० अ० ८ ॥ विशिष्टो नानाविधो वा पाकोविपाकः । पूर्वोक्त-कषायतीव्रमन्दादिभावास्रव विशेषाद् विशिष्टः पाको विपाकः । अथवा द्रव्यक्षेत्रकालभवभावलक्षणनिमित्तभेद-जनितवैश्वरूप्यो नानाविधः पाको विपाकः । २. 'शुभाद्यथा' इति सम्यक्प्रतिभाति । ३. शुभपरिणामानां प्रकर्षभावाच्छुभप्रकृतीनां प्रकृष्टोऽनुभवः । अशुभप्रकृतीनां निकृष्टः । अशुभपरिणामानां प्रकर्षभावादशुभ-प्रकृतीनां प्रकृष्टोऽनुभवः । शुभप्रकृतीनां निकृष्टः । स एवं प्रत्ययवशादुपात्तोऽनुभवो द्विधा प्रवर्तते स्वमुखेन परमुखेन च । सर्वासां मूलप्रकृतीनां स्वमुखेनैवानुभवः । उत्तरप्रकृतीनां तुल्यजातीयानां परमुखेनापि भवति आयुर्दर्शनचारित्रमोहवर्जानाम् । न हि नरकायुर्मुखेन तिर्यगायुर्मनुष्यायुर्वा विपच्यते । नापि दर्शनमोहश्चा-रित्रमोहमुखेन, चारित्रमोहो वा दर्शनमोहमुखेन । स० सि० सूत्र ॥२१॥

[1]कर्मणोऽनुभवात्सम्यक्तपसश्चापि[2] निर्जरा । विपाकजा तु तत्रैका परा चाप्यविपाकजा ॥२९३॥
संसारे भ्रमतो जन्तोः प्रारब्धफलकर्मणः । क्रमेणैव निवृत्तिर्या निर्जराऽसौ विपाकजा[3] ॥२९४॥
यदुपायविपाच्यं तदाम्रादिफलपाकवत् । अनुदीर्णमुदीर्यास्तु निर्जरा त्वविपाकजा[4] ॥२९५॥
सर्वेष्वात्मप्रदेशेष्वनन्तानन्तप्रदेशकाः । घनाङ्गुलस्यासंख्येयभाग[5]क्षेत्रावगाहिनः ॥२९६॥
एकद्वित्र्यादिसंख्येयसमयस्थितयः सदा । प्रदेशबन्धसन्तानेऽप्यासते कर्मपुद्गलाः[6] ॥२९७॥
[7]शुभायुर्नामगोत्राणि सद्वेद्यं च चतुर्विधः । पुण्यबन्धोऽन्यकर्माणि पापबन्धः प्रपञ्चितः ॥२९८॥
[8]आस्रवस्य निरोधस्तु संवरः परिभाष्यते । स भावद्रव्यभेदाभ्यां द्वैविध्येन निरूप्यते ॥२९९॥
[9]क्रियाणां भवहेतूनां निवृत्तिर्भावसंवरः । तत्कर्मपुद्गलादानविच्छेदो द्रव्यसंवरः ॥३००॥

स्वमुख ही उदय आती हैं परन्तु इन भेदोंकी जो अवान्तर उत्तर प्रकृतियाँ हैं उनका दोनोंसे उदय आता है। इसी प्रकार आयु कर्मकी उत्तर प्रकृतियोंका सदा स्वमुखसे ही उदय आता है परमुखसे नहीं। जैसे नरकायुका सदा नरकायु रूप ही उदय आता है अन्य रूप नहीं ॥ २९२ ॥

विपाकसे और तपसे कर्मोंकी निर्जरा होती है। इस निर्जरामें एक निर्जरा तो विपाकजा है और दूसरी अविपाकजा है। भावार्थ—निर्जराके विपाकजा और अविपाकजाके भेदसे दो भेद हैं ॥ २९३ ॥ संसारमें भ्रमण करनेवाले जीवका कर्म जब फल देने लगता है तब क्रमसे ही उसकी निवृत्ति होती है, यही विपाकजा निर्जरा कहलाती है ॥ २९४ ॥ और जिस प्रकार आम आदि फलोंको उपाय-द्वारा असमयमें ही पका लिया जाता है उसी प्रकार उदयावलीमें अप्राप्त कर्मकी तपश्चरण आदि उपायसे निश्चित समयसे पूर्व ही उदीरणा द्वारा जो शीघ्र ही निर्जरा की जाती है वह अविपाकजा निर्जरा है ॥ २९५ ॥ आत्माके समस्त प्रदेशोंके साथ कर्मपरमाणुओंका जो बन्ध है वह प्रदेशबन्ध कहलाता है। इस प्रदेशबन्धकी सन्ततिमें अनन्तानन्त प्रदेशोंसे युक्त घनांगुलके असंख्येयभाग प्रमाणक्षेत्रमें अवगाढ एक दो, तीन आदि संख्यात समयोंकी स्थितिवाले कर्म रूप पुद्गल आत्माके समस्त प्रदेशोंमें सदा विद्यमान रहते हैं ॥ २९६–२९७ ॥ उपर्युक्त कर्मबन्ध, पुण्यबन्ध और पापबन्धके भेदसे दो प्रकारका है, उनमें शुभ आयु, शुभ नाम, शुभ गोत्र और सद्वेद्य ये चार पुण्यबन्धके भेद हैं और शेष कर्म पापबन्ध रूप हैं ॥ २९८ ॥

आस्रवका रुक जाना संवर कहलाता है। यह भावसंवर और द्रव्यसंवरके भेदसे दो प्रकारका कहा जाता है ॥ २९९ ॥ संसारकी कारणभूत क्रियाओंका रुक जाना भाव

---

१. ततश्च निर्जरा। तपसा निर्जरा च। त० सू० । ३. तत्र चतुर्गतावनेकजातिविशेषावघूर्णिते संसारमहार्णवे चिरं परिभ्रमतः शुभाशुभस्य कर्मणः क्रमेण परिपाककालप्राप्तस्यानुभवोदयावलिस्रोतोऽनुप्रविष्टस्यारब्धफलस्य या निवृत्तिः सा विपाकजा निर्जरा। ४. यत्कर्माप्राप्तविपाककालमौपक्रमिकक्रियाविशेषसामर्थ्यादनुदीर्णं बलादुदीर्योदयावलिं प्रविश्य वेद्यते आम्रपनसादिपाकवत् सा अविपाकजा निर्जरा ॥ स०सि०अ० ८ सू० २३ ॥ ५. भागे क्षेत्रा—क० ङ० म० । ६. नामप्रत्ययाः सर्वतो योगविशेषात्सूक्ष्मैकक्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्वनन्तानन्तप्रदेशाः ॥२४॥—त० सू० अ० ८। 'ते खलु पुद्गलस्कन्धा अभव्यानन्तगुणाः सिद्धानन्तभागप्रमितप्रदेशा घनाङ्गुलस्यासंख्येयभाग क्षेत्रावगाहिनः एकद्वित्रिचतुःसंख्येयासंख्येयसमयस्थितिकाः पञ्चवर्णपञ्चरसद्विगन्धचतुःस्पर्शस्वभावा अष्टविधकर्मप्रकृतियोग्या योगवशादात्मनाऽऽत्मसात् क्रियन्ते ॥ स० सि० ॥ ७. 'शुभायुर्नामगोत्राणि पुण्यम्' ॥२५॥ अतोऽन्यत्पापम् ॥२६॥त०सू० । ८. आस्रवनिरोधः संवरः ॥१॥ त० सू० अ० ९ । ९. तत्र संसारनिमित्तक्रियानिवृत्तिर्भावसंवरः । तन्निरोधे तत्पूर्वकर्मपुद्गलादानविच्छेदो द्रव्यसंवरः ॥ स० सि० ।

[1]त्रिसंख्या गुप्तयः पञ्चसंख्याः समितयस्तथा । दशद्वादशधर्मानुप्रेक्षाश्चारित्रपञ्चकम् ॥३०१॥
द्वाविंशतिभिदा भिन्नपरीषहजयोऽपि च । हेतवः संवरस्यैते सप्रपञ्चाः समन्विताः ॥३०२॥
[2]बन्धहेतोरभावाद्धि निर्जरातश्च कर्मणाम् । कार्त्स्न्येन विप्रमोक्षस्तु मोक्षो निर्ग्रन्थरूपिणः ॥३०३॥
[3]जीवादिसप्ततत्त्वानामेतेषां ज्ञानसंगतम् । श्रद्धानं सच्चरित्रं च साक्षान्मोक्षस्य साधनम् ॥३०४॥
भवेनैकेन मार्गस्थाः केचित्सप्ताष्टभिः परे । भुक्तस्वर्गसुखा भव्याः सिद्ध्यन्ति ध्यायिनः सदा ॥३०५॥
इति श्रुत्वा जिनेन्द्रोक्तं मोक्षमार्गमनाविलम् । प्रणेमुर्द्वादशगणाः [4]प्रकृताञ्जलयो विभुम् ॥३०६॥
ते सम्यग्दर्शनं केचित्संयमासंयमं परे । संयमं केचिदायाताः संसारावासभीरवः ॥३०७॥
द्वे सहस्रे नरेन्द्रास्ते कन्याश्च नृपयोषितः । सहस्राणि बहून्यापुः संयमं जिनदेशितम् ॥३०८॥
[5]शिवा च रोहिणी देवी देवकी रुक्मिणी तथा । देव्योऽन्याश्च सुचारित्रं गृहिणां प्रतिपेदिरे ॥३०९॥
यदुभोजकुलश्रेष्ठा राजानः सुकुमारिकाः । जिनमार्गविदो जाता द्वादशाणुव्रतस्थिताः ॥३१०॥
कृतपूजाः सुरैरिन्द्राः प्रणम्य जिनभास्करम् । प्रयाताः स्वास्पदं रामकेशवाद्याश्च यादवाः ॥३११॥

शार्दूलविक्रीडितम्

विश्वाशा विशदाः शरद्विदधती धौतं पयोदैस्तथा
विस्पष्टग्रहतारकाकुसुमितं रम्यं नभोमण्डलम् ।

संवर है और कर्मरूप पुद्गल द्रव्यके ग्रहणका विच्छेद हो जाना द्रव्यसंवर है ॥ ३०० ॥ तीन गुप्तियाँ, पाँच समितियाँ, दश धर्म, बारह अनुप्रेक्षाएँ, पाँच चारित्र और बाईस परिषह-जय ये अपने अवान्तर विस्तारसे सहित संवरके कारण हैं ॥ ३०१-३०२ ॥ निर्ग्रन्थ मुद्राके धारक मुनिके बन्धके कारणोंका अभाव तथा निर्जराके द्वारा जो समस्त कर्मोंका अत्यन्त क्षय होता है वह मोक्ष कहलाता है ॥ ३०३ ॥ इन जीवादि सात तत्त्वोंका सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र ही मोक्षका साक्षात् साधन है ॥ ३०४ ॥ मोक्षमार्गमें स्थित कितने ही भव्य जीव एक ही भवमें सिद्ध हो जाते हैं और कितने ही भव्य स्वर्गके सुख भोग कर सदा आत्माका ध्यान करते हुए सात-आठ भवमें मोक्ष प्राप्त कर लेते हैं ॥ ३०५ ॥

इस प्रकार नेमि जिनेन्द्रके द्वारा कहा हुआ निर्मल मोक्षमार्ग सुनकर बारह सभाओंके लोगोंने हाथ जोड़कर भगवान्को नमस्कार किया ॥ ३०६ ॥ श्रोताओंमें-से कितने ही लोगोंने सम्यग्दर्शन धारण किया, कितने ही लोगोंने संयमासंयम प्राप्त किया और संसारवाससे डरनेवाले कितने ही लोगोंने पूर्ण संयम—मुनिव्रत स्वीकृत किया ॥ ३०७ ॥ उस समय दो हजार राजाओंने, दो हजार कन्याओंने एवं हजारों रानियोंने जिनेन्द्र भगवान्के द्वारा कहे हुए पूर्ण संयमको प्राप्त किया ॥ ३०८ ॥ शिवा देवी, रोहिणी, देवकी, रुक्मिणी तथा अन्य देवियोंने श्रावकोंका चारित्र स्वीकृत किया ॥ ३०९ ॥ यदुकुल और भोजकुलके श्रेष्ठ राजा तथा अनेक सुकुमारियाँ जिनमार्गकी ज्ञाता बन बारह अणुव्रतोंकी धारक हो गयीं ॥ ३१० ॥ जो देवोंके साथ पूजा कर चुके थे, ऐसे इन्द्र तथा बलभद्र और कृष्ण आदि यादव, जिनेन्द्ररूपी सूर्यको नमस्कार कर अपने-अपने स्थानपर चले गये ॥ ३११ ॥

तदनन्तर जो समस्त दिशाओंको उज्ज्वल कर रही है, मेघोंके द्वारा धुले हुए सुन्दर

---

१. स गुप्तिसमितिधर्मानुप्रेक्षापरिषहजयचारित्रैः ॥२॥ त० सू० अ० ९ । २. बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः ॥ त० सू० अ० १० । ३. सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ त० सू० अ० १ । ४. प्रकृताञ्जलयो म० । ५. ३०९, ३१०, ३११ तमाः श्लोकाः ङ० ख० पुस्तकयोर्न सन्ति क पुस्तकेऽपि पश्चात् योजिताः सन्ति ।

[1]बन्धूकाब्जसुसप्तपर्णसुरभिप्रत्यग्रपुष्पाञ्जलिं
मुञ्चन्ती जिनपादयोरुपगता भक्तेव लोकत्रयी ॥३१२॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ श्रीनेमिनाथधर्मोपदेशवर्णनो नाम अष्टपञ्चाशः सर्गः ॥५८॥

आकाशमण्डलको जो निर्मल ग्रहों और ताराओंसे पुष्पित बना रही थी एवं जो बन्धूक, कमल और सप्तपर्णके सुगन्धित नूतन फूलोंकी अञ्जलि छोड़ रही थी ऐसी शरद् ऋतु, भक्तिसे भरी लोकत्रयीके समान जिनेन्द्रदेवके चरणोंके समीप आयी ॥ ३१२ ॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें श्रीनेमिनाथ भगवान्के धर्मोपदेशका वर्णन करनेवाला अंठावन सर्ग समाप्त हुआ ॥५८॥

---

१. बन्धूकाब्जसुसप्तपर्ण म०, ख० ।

एकोनषष्टितमः सर्गः

विहाराभिमुखेऽगोग्राज्जिनेन्द्रेऽवतरिष्यति । स्वर्गाग्रादिव भूलोकं समुद्धर्तुं भवोदधेः ॥१॥
गृह्यतां गृह्यतां काम्यं यथाकाममिहार्थिभिः । इति नित्यं धनेशेन घुष्यते कामघोषणा ॥२॥
कामदा कामधद्भूमिः कल्प्यते मणिकुट्टिमा । माङ्गल्यविजयोद्योगे विभोः किं वा न कल्प्यते ॥३॥
महाभूतानि सर्वाणि [2]भर्तुर्भूतहितोद्यमे[3] । सर्वभूतहितानि स्युस्तादृशी खलु सार्वता ॥४॥
प्रावृषेण्याम्बुधारेव वसुधारा वसुन्धराम् । दिवोऽन्वर्थाभिधानत्वं नयतीत्यपतत्पथि[4] ॥५॥
[5]प्रादुःष्यन्ति सुराः सद्यः प्रणामचलमौलयः । भासा व्याप्य दिशो भर्तुः प्रभाकारानुरागिणः ॥६॥
ये द्वे [यद् द्वे] पूर्वोत्तरे पंक्ती हेमाम्बुजसहस्रयोः । सहस्रपत्रं तत्पूतं भुवः कण्ठे गुणाकृती ॥७॥
पद्मरागमयं भास्वच्चित्ररत्नविचित्रितम् । प्रभूतप्रतिपत्रस्थपद्माभागमनोहरम् ॥८॥
सहस्राक्षसहस्राक्षिभृङ्गावलिनिषेवितम् । देवासुरनरालोकमधुपापानमण्डकम् ॥९॥
[6]पद्मोद्भासि परं पुण्यं पद्मयानं प्रकाशते । सद्यो योजनविष्कम्भं तच्चतुर्भागकर्णिकम् ॥१०॥
महिमाग्रे सुरेशाष्टमूर्तिस्पष्टगुणश्रियः । वसवोऽष्टौ पुरोधाय वासवं वरिवस्यया ॥११॥

अथानन्तर जिस प्रकार पहले संसार-समुद्रसे प्राणियोंको पार करनेके लिए भगवान् स्वर्गके अग्रभागसे पृथिवी लोकपर अवतीर्ण हुए थे, उसी प्रकार जब विहारके लिए सम्मुख हो गिरनार पर्वतके शिखरसे नीचे उतरनेके लिए उद्यत हुए तब कुबेरने निरन्तर यह मनचाही घोषणा शुरू कर दी कि जिस याचकको जिस वस्तुकी इच्छा हो वह यहाँ आकर उसे इच्छानुसार ले ॥ १–२ ॥ उस समय कामधेनुके समान इच्छित पदार्थ प्रदान करनेवाली मणिमयी भूमि बनायी गयी। सो ठीक ही है क्योंकि भगवान्के मङ्गलमय विजयोद्योगके समय क्या नहीं किया जाता ? अर्थात् सब कुछ किया जाता है ॥ ३ ॥ जब कि भगवान्का समस्त भूतों—प्राणियोंके हितके लिए उद्यम हो रहा था तब पृथिवी, जल, अग्नि और वायु रूप चार महाभूत भी समस्त भूतों—प्राणियोंके हितकर हो गये सो ठीक ही है क्योंकि भगवान्की सर्वहितकारिता वैसी ही अनुपम थी ॥ ४ ॥ धनकी बड़ी मोटी धारा वर्षा ऋतुके मेघकी जलधाराके समान पृथिवीके वसुन्धरा नामको सार्थकता प्राप्त कराती हुई आकाशसे मार्गमें पड़ने लगी ॥ ५ ॥ प्रणाम करनेसे जिनके मस्तक चञ्चल हो रहे थे तथा जो भगवान्की प्रभा और आकारमें अनुराग रखते थे ऐसे देव अपनी कान्तिसे दिशाओंको व्याप्त करते हुए शीघ्र ही प्रकट होने लगे ॥ ६ ॥ सर्व-प्रथम देवोंने एक ऐसे सहस्रदल पवित्र कमलकी रचना की जो पूर्व और उत्तरकी ओर स्वर्णमय हजार-हजार कमलोंकी दो पंक्तियाँ धारण करता था तथा वे पंक्तियाँ ऐसी जान पड़ती थीं मानो पृथिवीरूपी स्त्रीके कण्ठमें पड़ी दो मालाएँ ही हों ॥ ७ ॥ वह कमल पद्मराग मणियोंसे निर्मित था, देदीप्यमान नाना प्रकारके रत्नोंसे चित्र-विचित्र था, प्रत्येक पत्रपर स्थित लक्ष्मीके भागसे मनोहर था, इन्द्रके हजार नेत्ररूपी भ्रमरावलीसे सेवित था, देव धरणेन्द्र और मनुष्योंके नेत्ररूपी भ्रमरोंके लिए मानो मधुगोष्ठीका स्थान था, लक्ष्मीसे सुशोभित था, परम पुण्यरूप था, एक योजन विस्तृत था और उसके चौथाई भाग प्रमाण उसकी कर्णिका-डंठल थी ॥ ८–१० ॥ यह कमल पद्मयानके नामसे प्रसिद्ध था। सेवा-द्वारा इन्द्रको आगे कर आठ वसु उस पद्मयानके आगे-आगे चल रहे थे जो ऐसे जान पड़ते थे मानो इन्द्रके अणिमा, महिमा आदि आठ गुण ही मूर्तिधारी हो चल रहे हों।

---

१. पर्वताग्रात्–गिरनारशिखरतः। २. भर्तु–म० घ०। ३.—द्यते क०। ४. नयतीति पतत्यपि क०। ५. प्राङ्मुख्यन्ति। ६. जयोद्भासि इत्यपि पाठः इति क० पुस्तकपार्श्वे लिखितम्।

जय प्रसीद भर्तुस्ते वेला लोकहितोद्यमे । जाताद्येत्यानमन्नीशं स हि विश्वसृजो विधिः ॥१२॥
ततः प्रक्रमते [1]शम्भुरारोढुं पद्मयानकम् । तत्क्षणं भूयते भूम्या [2]हृष्टसम्भ्रान्तयापि च ॥१३॥
[3]विजयी [4]विहरत्येष विभेशो विश्वभूतये । धर्मचक्रपुरस्सारी त्रिलोकी तेन सम्पदा ॥१४॥
वर्धतां वर्धतां नित्यं निरीतिर्भवतामिति । श्रूयतेऽभ्यम्बुदध्वानः प्रयाणपटहध्वनिः ॥१५॥
वीणावेणुमृदङ्गोरुझल्लरीशङ्खकाहलैः । तूर्यमङ्गलघोषोऽपि पयोधिमधिगर्जति ॥१६॥
सङ्कथाक्ष्वेडितागीताट्टहासैः कलकलोत्तरैः । [5]द्यावापृथिव्यौ प्राप्नोति [6]प्रास्थानिकमहारवः ॥१७॥
[7]वल्गु गायन्ति किन्नर्यो नृत्यन्त्यप्सरसो दिवि । घूर्णन्त्यातोद्यमानर्ता[8] गन्धर्वाद्य इत्यपि ॥१८॥
स्तुवन्ति मङ्गलस्तोत्रैर्जयमङ्गलपूर्वकैः । तत्र तत्र सतां वन्द्यं [9]वन्दिनो नृसुरासुराः ॥१९॥
चित्रैश्चित्तहरैर्दिव्यैर्मानुषैश्च समन्ततः । नृत्यसङ्गीतवादित्रैर्भूतलेऽपि प्रभूयते[10] ॥२०॥
पालयन्ति [11]सदिग्भागैर्लोकपालाः सभूतयः । भर्तृसेवा हि भृत्यानां स्वाधिकारेषु सुस्थितिः ॥२१॥
धावन्ति परितो देवा केचिद्भासुरदर्शनाः । हिंसया[12] व्यापसः सर्वानुत्सार्योत्सार्य दूरतः ॥२२॥
उदस्तैरत्नवलयैर्वीचिहस्तैः कृताञ्जलिः । मन्ये प्रीतस्तदोदन्वान्वेलामूर्ध्ना नमस्यति ॥२३॥

वे वसु यह कहते हुए भगवान्‌को प्रणाम करते जा रहे थे कि हे भगवन् ! आप जयवन्त हों, प्रसन्न होइए, लोकहितके लिए उद्यम करनेका आज समय आया है। यथार्थमें वह सब भगवान्‌का माहात्म्य था ॥ ११—१२ ॥ तदनन्तर उस पद्मयानपर भगवान् जिनेन्द्र आरूढ़ हुए थे और उस समय पृथिवी हर्षसे झूमती हुई-सी जान पड़ती थी ॥ १३ ॥ उस समय मेघों-के शब्दको पराजित करनेवाला देव-दुन्दुभियोंका यह प्रयाणकालिक शब्द सुनायी पड़ रहा था कि धर्मचक्रको आगे-आगे चलानेवाले ये जगत्‌के स्वामी विजयी भगवान् सब जीवोंके वैभवके लिए विहार कर रहे हैं। इनके इस विहारसे तीन लोकके जीव सम्पत्तिसे वृद्धिको प्राप्त हों अर्थात् सबकी सम्पदा वृद्धिंगत हो, और सब अतिवृष्टि आदि ईतियोंसे रहित हों ॥ १४–१५ ॥ उस समय वीणा, बाँसुरी, मृदङ्ग, विशाल झालर, शङ्ख और काहलके शब्दसे युक्त तुरहीका मङ्गलमय शब्द भी समुद्रकी गर्जनाको तिरस्कृत कर रहा था ॥ १६ ॥ प्रस्थान कालमें होनेवाला बहुत भारी शब्द, उत्तम कथा, चिल्लाहट, गीत, अट्टहास तथा अन्य कल-कल शब्दोंसे आकाश और पृथिवीके अन्तरालको व्याप्त कर रहा था ॥ १७ ॥ आकाशमें किन्नरियाँ मनोहर गान गाती थीं, अप्सराएँ नृत्य करती थीं, झूमते हुए गन्धर्व आदि देव तबला बजा रहे थे और नमस्कार करते हुए मनुष्य, सुर तथा असुर, सज्जनोंके द्वारा वन्दनीय भगवान्‌को नमस्कार करते हुए जय-जयकी मङ्गलध्वनिपूर्वक मङ्गलमय स्तोत्रोंसे जहाँ-तहाँ उनकी स्तुति कर रहे थे ॥ १८–१९ ॥ पृथिवीतलपर भी सब ओर मनुष्य चित्तको हरनेवाले नाना प्रकारके दिव्य नृत्य, संगीत और वादित्रोंसे युक्त हो रहे थे ॥ २० ॥ विभूतियोंसे सहित लोकपाल समस्त दिग्भागोंके साथ सबकी रक्षा कर रहे थे। सो ठीक ही है क्योंकि अपने-अपने नियोगों-पर अच्छी तरह स्थित रहना ही भृत्योंकी स्वामि-सेवा है ॥ २१ ॥ देदीप्यमान दृष्टिके धारक कितने ही देव समस्त हिंसक जीवोंको दूर खदेड़कर चारों ओर दौड़ रहे थे ॥ २२ ॥ उस समय प्रसन्नतासे भरा समुद्र, रत्नरूप वलयोंसे सुशोभित ऊपर उठे हुए तरङ्गरूपी हाथोंसे

---

१. क०, ख०, ग०, घ०, ङ०, सर्वपुस्तकेषु 'सिन्धुरारोढु' इति पाठो विद्यते, परं तस्यार्थसंगतिर्न प्रतिभाति। अतः मैसूरस्थित-प्राच्यविद्यासंशोधनमन्दिरस्थितपुस्तके समुपलब्धः 'शम्भुरारोढु' इति पाठः स्वीकृतः। अत्र शम्भुपदं जिनेन्द्रवाचकम्। २. हृष्ट ग०, ङ०, हृष्ट म०, क०। 'हृष्टसंभ्रान्तयापि च' इति पाठोऽपि मैसूरस्थितपुस्तके समुपलब्धः। ३. विजये क०, ङ०, म०। ४. विचरत्येष क०। ५. दिवः-पृथिव्यौ म०, क०, ङ०। ६. प्रस्थानीकमहारवः म०। ७. फल्गु म०। ८. मानार्ता म०, क०, ङ०। ९. वन्दिता म०। १०. प्रभूतये म०। ११. सदिग्भागै-म०। १२. हिंसापापीयसः। हिंसयान्वयि सर्वा क०।

[1]विलम्बितसहस्रार्कयुगपत्पतनोदयैः[2] । नमतानन्दितालोकनामोन्नामैः[3] पदे पदे ॥२४॥
सुराणां[4] भूतलस्पर्शिमुकुटैर्बहुकोटिभिः । भूः पुरःसोपहारेव शोभतेऽम्बुजकोटिभिः ॥२५॥
लौकान्तिकाः पुरो यान्ति लोकान्तव्यापितेजसः[5] । लोकेशस्य यथालोकाः पुरोगा मूर्तिसम्भवाः ॥२६॥
पद्मा सरस्वतीयुक्ता परिवारात्तमङ्गला । पद्महस्ता पुरो याति परीत्य परमेश्वरम् ॥२७॥
[6]प्रसीदेत इतो देवेत्यानम्य प्रकृताञ्जलिः । तद्भूमिपतिभिः सार्धं पुरो याति पुरन्दरः ॥२८॥
एवमीशस्त्रिलोकेशपरिवारपरिष्कृतः । लोकानां भूतये भूतिमुद्वहन् सार्वलौकिकीम् ॥२९॥
पद्मकेतुः पवित्रात्मा परमं पद्मयानकम् । भव्यपद्मैकसद्बन्धुर्यदारोहति तत्क्षणात् ॥३०॥
जय नाथ जय ज्येष्ठ जय लोकपितामह । जयात्मभूर्जयात्मेश जय देव जयाच्युत ॥३१॥
जय सर्वजगद्बन्धो जय सद्धर्मनायक । जय सर्वशरण्यश्रीर्जय पुण्यजयोत्तम ॥३२॥
[7]इत्युदीर्णसुरुद्घोषो रुन्धानो रोदसी स्फुटः । [8]जयत्युच्चोऽतिगम्भीरो घनाघनघनध्वनिः ॥३३॥

अञ्जलि बाँध कर वेलारूपी मस्तकसे मानो भगवान्‌के लिए नमस्कार ही कर रहा था ॥२३॥

उस समय डग-डग पर भगवान्‌को नमस्कार करनेवाले देवोंके करोड़ों देदीप्यमान मुकुटोंका बहुत भारी प्रकाश बार-बार नीचेको झुकता और बार-बार ऊपरको उठता था। उससे ऐसा जान पड़ता था मानो हजारों सूर्योंका एक साथ पतन तथा उदय हो रहा हो। उन्हीं देवोंके जब करोड़ों मुकुट पृथिवीतलका स्पर्श करते थे तब भगवान्‌के आगेकी भूमि ऐसी सुशोभित होने लगती थी मानो उसपर करोड़ों कमलोंकी भेंट ही चढ़ायी गयी हो ॥ २४–२५ ॥ जिनका तेज लोकके अन्त तक व्याप्त था, ऐसे लौकान्तिक देव भगवान्‌के आगे-आगे चल रहे थे और वे ऐसे जान पड़ते थे मानो लोकके स्वामी भगवान् जिनेन्द्रका प्रकाश ही मूर्तिधारी हो आगे-आगे गमन कर रहा था ॥ २६ ॥ जिनके परिवारको देवियोंने मङ्गल द्रव्य धारण कर रखे थे, तथा जिनके हाथोंमें स्वयं कमल विद्यमान थे, ऐसी पद्मा और सरस्वती देवी, भगवान्‌की प्रदक्षिणा देकर उनके आगे-आगे चल रही थीं ॥ २७ ॥ 'हे देव! इधर प्रसन्न होइए, इधर प्रसन्न होइए।' इस प्रकार नमस्कार कर जिसने अञ्जलि बाँध रखी थी ऐसा इन्द्र, तद्-तद् भूमिपतियोंके साथ भगवान्‌के आगे-आगे चल रहा था ॥ २८ ॥

इस प्रकार जो तीनों लोकोंके इन्द्र तथा उनके परिवारसे घिरे हुए थे, लोगोंकी विभूतिके लिए जो समस्त लोककी विभूतिको धारण कर रहे थे, जो कमलकी पताकासे सहित थे, जिनकी आत्मा अत्यन्त पवित्र थी, और जो भव्य जीवरूपी कमलोंको विकसित करनेके लिए उत्तम सूर्यके समान थे, ऐसे भगवान् नेमि जिनेन्द्र जिस समय उस पद्मयानपर आरूढ हुए उसी समय देवोंने मेघ-गर्जनाके समान यह शब्द करना शुरू कर दिया कि हे नाथ! आपकी जय हो, हे ज्येष्ठ! आपकी जय हो, हे लोकपितामह! आपकी जय हो, हे आत्मभू! आपकी जय हो, हे आत्मेश! आपकी जय हो, हे देव! आपकी जय हो, हे अच्युत! आपकी जय हो। हे समस्त जगत्‌के बन्धु! आपकी जय हो, हे समीचीन धर्मके स्वामी! आपकी जय हो, हे सबके शरणभूत लक्ष्मीके धारक! आपकी जय हो, हे पुण्य रूप! आपकी जय हो, हे उत्तम! आपकी जय हो। इस प्रकार उठा हुआ पुण्यात्मा जनोंका जोरदार, अत्यन्त गम्भीर एवं मेघ-गर्जनाकी तुलना करनेवाला वह शब्द आकाश और पृथिवीके अन्तरालको व्याप्त करता हुआ अत्यधिक सुशोभित हो रहा था ॥ २९–३३ ॥

---

१. डलयोरभेदात् विलम्बितपदेन विडम्बितस्य ग्रहणम् । २. पतनोदयोः म० । ३. नन्दितस्य समृद्धस्य आलोकस्य नामोन्नामैः । ४. शूराणाम् म० । ५. लोकान्तस्थापितै– म० । ६. प्रसीदेति इतो देवे क० । ७. इत्युदीर्णसुरुद्घोषः म० । ८. जयत्युच्चेति– म० ।

स देवः सर्वदेवेन्द्रव्या[1]हृतालोकमङ्गलः । तन्मौलिभ्रमरालीढक्रमत्पादपयोरुहः ॥३४॥
तत्पयोरुहवासिन्या पद्मयानन्दयञ्जगत् । [2]व्यहरत् परमोद्भूतिर्भूतानामनुकम्पया ॥३५॥
देवमार्गे स्थिते दिव्ये बिम्बस्याब्जे पदाम्बुजम् । स्वच्छाम्भोवा[3]न्मुखाम्भोजप्रतिबिम्बश्रियि[4] प्रभुः ॥३६॥
उद्यतस्तस्य लोकार्थं [5]राजराजः पुरस्सरः । राजते राजयन्मार्गं पुरोभानोर्यथारुणः ॥३७॥
पदवी जातरूपाङ्गी स्फुरन्मणिविभूषया । श्लाघते सा सती भर्त्रे स्वभर्त्रे भामिनी यथा ॥३८॥
परितः परिमार्जन्ति मरुतो मधुरेरणैः[6] । अवदातक्रियायोगैः स्वां वृत्तिं साधवो यथा ॥३९॥
अभ्युक्षन्ति सुरास्तत्र गन्धाम्भोऽम्बुदवाहनाः[7] । स्फुरत्सौदामिनीदीप्तिभासिताखिलदिङ्मुखाः ॥४०॥
मन्दारकुसुमैर्मत्तभ्रमद्भ्रमरचुम्बितैः । नन्द्यते सुरसङ्घातैर्मार्गो मार्गविदुत्तमं ॥४१॥
ज्योतिर्मण्डलसंकाशैः सौवर्णरसमण्डलैः । सुलग्नैः शोभते मार्गो रत्नचूर्णतलाचितैः[8] ॥४२॥
गुह्यकाश्चित्रपत्राणि चिन्वते कौङ्कुमै रसैः[9] । [10]चित्रकर्मकृतां चित्रां स्वामाचिख्यासवो[11] यथा ॥४३॥
कदलीनालिकेरेक्षुक्रमुकाद्यैः क्रमस्थितैः । [12]सपत्रैर्मार्गसीमापि रम्याऽऽरामायते द्रुमैः ॥४४॥

तदनन्तर समस्त इन्द्र जिनके जय-जयकार और मङ्गल शब्दोंका उच्चारण कर रहे थे, जिनके चलते हुए चरणकमल उन इन्द्रोंके मुकुटरूपी भ्रमरोंसे व्याप्त थे, जो उन कमलोंमें निवास करनेवाली लक्ष्मीसे समस्त जगत्को आनन्दित कर रहे थे, और जो अत्यन्त उत्कृष्ट विभूतिके धारक थे, ऐसे भगवान् नेमि जिनेन्द्र जीवोंपर दया कर विहार करने लगे ॥ ३४–३५॥ वे प्रभु , आकाशमें, स्वच्छ जलके भीतर पड़ते हुए मुख-कमलके प्रतिबिम्बकी शोभाको धारण करनेवाले दिव्य कमलपर अपने चरणकमल रख कर विहार कर रहे थे ॥ ३६ ॥ उस समय भगवानके दर्शन करनेके लिए उद्यत एवं उनके आगे-आगे चलनेवाला कुबेर मार्गको सुशोभित करता हुआ ऐसा जान पड़ता था जैसा सूर्यके आगे चलता हुआ उसका सारथि अरुण हो ॥ ३७ ॥ भगवान्के विहारका वह मार्ग सुवर्णमय था एवं देदीप्यमान मणियोंके आभूषणसे सहित था। इसलिए अपने पतिके लिए स्थित, सुवर्णमय शरीरकी धारक एवं देदीप्यमान मणियोंके आभूषणोंसे सुशोभित पतिव्रता स्त्रीके समान प्रशंसनीय था ॥ ३८ ॥ जिस प्रकार मुनिगण निर्मल क्रियाओंसे अपनी वृत्तिको सदा साफ करते रहते हैं—निर्दोष बनाये रखते हैं उसी प्रकार पवनकुमार देव वायुके मन्द-मन्द झोंकोंसे उस मार्गको साफ बनाये रखते थे ॥ ३९ ॥ कौंदती हुई बिजलीकी चमकसे समस्त दिशाओंके अग्रभागको प्रकाशित करनेवाले मेघवाहन देव उस मार्गमें सुगन्धित जल सींचते जाते थे ॥ ४० ॥ मोक्षमार्गके ज्ञाता भगवान्के विहारकालमें, देवोंके समूह, जिनपर मदोन्मत्त भौंरे मँडरा रहे थे ऐसे मन्दार वृक्षके पुष्पोंसे मार्गको सुशोभित कर रहे थे ॥ ४१ ॥ वह मार्ग, गले हुए सोनेके रसके उन मण्डलोंसे जिनके कि तलभाग रत्नोंके चूर्णसे व्याप्त थे एवं नक्षत्रोंके समूहके समान जान पड़ते थे, अतिशय सुशोभित हो रहा था ॥ ४२ ॥ गुह्यक जातिके देव केशरके रससे नाना प्रकारके बेल-बूटे बनाते जाते थे मानो वे अपनी चित्रकर्मकी नाना प्रकारकी कुशलताको ही प्रकट करना चाहते थे ॥ ४३ ॥ मार्गके दोनों ओरकी सीमाएँ क्रमपूर्वक खड़े किये हुए पत्रोंसे युक्त केला, नारियल, ईख तथा सुपारी आदिके वृक्षोंसे सुन्दर बगीचोंके समान जान पड़तीं

---

१. व्याहृतालोक म०, ङ० । २. विहरत् क०, ङ० । ३. स्वच्छाम्भोवत्– ख० । ४. श्रिति क०, वृश्रिप्रभुः ख० । ५. राजराजपुरस्सरः म० । ६. मनोहरप्रेरणैः । ७. वाहनः म० । ८. तलोच्चितैः म०, तलाञ्चितैः क० । ९. कुंकुमैः म० । १०. चित्रकर्मकृताम् म०, ख०, ङ० । ११. चिद्यासवो यथा म०, घ०, ग० । १२. सपत्रै–म०, ख०, ङ० ।

तत्राक्रीडपदानि स्युः सुन्दराणि निरन्तरम् । यत्र [1]हृष्टाः स्वकान्ताभिराक्रीडयन्ते नरामराः ॥४५॥
भोग्यान्यपि यथाकामं भोगिनां भोगभूमिवत् । सर्वाण्यप्यनूनभूतीनि [2]संभवन्त्यन्तरेऽन्तरे ॥४६॥
योजनत्रयविस्तारो मार्गो मार्गान्तयोर्द्वयोः । सीमान्तौ द्वे अपि [3]ज्ञेये गव्यूतिद्वयविस्तृते ॥४७॥
तोरणैः शोभते मार्गः [4]करणैरिव कल्पितैः । दृष्टिगोचरसम्पन्नैः सौवर्णैरष्टमङ्गलैः ॥४८॥
कामशाला विशालाः स्युः कामदास्तत्र तत्र च । भागवत्यो यथा मूर्ताः कामदा दानशक्तयः ॥४९॥
तोरणान्तरभूतुङ्गसमस्तकदलीध्वजैः । संछन्नोऽध्वा घनच्छायो रुणद्धि सवितुश्छविम् ॥५०॥
वनवासिसुरैर्वन्यमञ्जरीपुञ्जपिञ्जरः । स्वपुण्यप्रचयाकारः कल्प्यते पुष्पमण्डपः ॥५१॥
युक्तो रत्नलताचित्रभित्तिभिः सद्द्वियोजनः । चन्द्रादित्यप्रभारोचिर्मण्डलोपान्तमण्डितः ॥५२॥
[5]घण्टिकाकलनिर्ह्रादैर्घण्टानादैर्निनादयन् । दिशो [6]मुक्तागुणामुक्तप्रान्तमध्यान्तरान्तरः ॥५३॥
सद्गन्धाकृष्टसम्भ्रान्तभृङ्गमालोल्लसद्द्युतिः । वियतीशयशोमूर्तवितानच्छविरीक्ष्यते ॥५४॥
[7]सोत्तम्भस्तम्भसङ्काशैः स्थूलमुक्तागुणोत्करैः । चतुर्भिर्दामभिर्भाति विद्रुमान्तान्तराचितैः[8] ॥५५॥
तस्यान्तस्थो दयामूर्तिः प्रयाति दमिताहितः[9] । हिताय सर्वलोकस्य स्वयमीशः स्वयंप्रभः ॥५६॥

थीं ॥ ४४ ॥ मार्गमें निरन्तर सुन्दर क्रीड़ाके स्थान बने हुए थे जिनमें हर्षसे भरे मनुष्य और देव अपनी स्त्रियोंके साथ नाना प्रकारकी क्रीड़ा करते थे ॥ ४५ ॥ जिस प्रकार भोग-भूमिमें भोगी जीवोंको इच्छानुसार भोग्य वस्तुएँ प्राप्त होती हैं, उसी प्रकार उस मार्गमें भी, बीच-बीचमें भोगी जीवोंको उत्कृष्ट विभूतिसे युक्त सब प्रकारकी भोग्य वस्तुएँ प्राप्त होती रहती थीं ॥ ४६ ॥ भगवान्के विहारका वह मार्ग तीन योजन चौड़ा बनाया गया था तथा मार्गके दोनों ओरकी सीमाएँ दो-दो कोस चौड़ी थीं ॥ ४७ ॥ वह मार्ग, जगह-जगह निर्मित तोरणों तथा दृष्टिमें आनेवाले सुवर्णमय अष्टमङ्गलद्रव्योंसे ऐसा सुशोभित हो रहा था मानो इन्द्रियोंसे ही सुशोभित हो रहा हो ॥ ४८ ॥ मार्गमें जगह-जगह भोगियोंको इच्छानुसार पदार्थ देनेवाली बड़ी-बड़ी कामशालाएँ बनी हुई थीं जो ऐसी जान पड़ती थीं मानो इच्छानुसार पदार्थ देनेवाली भगवान्की मूर्तिमती दानशक्तियाँ ही हों ॥ ४९ ॥ तोरणोंकी मध्यभूमिमें जो ऊँचे-ऊँचे केलेके वृक्ष तथा ध्वजाएँ लगी हुई थीं उनसे आच्छादित हुआ मार्ग इतनी सघन छायासे युक्त हो गया था कि वह सूर्यकी छविको भी रोकने लगा था ॥ ५० ॥ वनके निवासी देवोंने वनकी मञ्जरियोंके समूहसे पीला-पीला दिखनेवाला पुष्पमण्डप तैयार किया था जो उनके अपने पुण्यके समूहके समान जान पड़ता है ॥ ५१ ॥ वह पुष्पमण्डप रत्नमयी लताओंके चित्रोंसे सुशोभित दीवालोंसे युक्त था, दो योजन विस्तारवाला था, चन्द्रमा और सूर्यकी प्रभाके कान्तिमण्डलसे समीपमें सुशोभित था, छोटी-छोटी घण्टियोंकी रुनझुन और घण्टाओंके नादसे दिशाओंको शब्दायमान कर रहा था, उसके दोनों छोर तथा मध्यका अन्तर मोतियोंकी मालाओंसे युक्त था, उत्तम गन्धसे आकर्षित हो सब ओर मँडराते हुए भ्रमरोंके समूहसे उसकी कान्ति उल्लसित हो रही थी, आकाशमें उसका चँदेवा भगवान्के मूर्तिक यशके समान दिखायी देता था, उस मण्डपके चारों कोनोंमें ऊँचे खड़े किये हुए खम्भोंके समान सुशोभित, बड़े-बड़े मोतियोंसे निर्मित तथा बीच-बीचमें मूँगाओंसे खचित चार मालाएँ लटक रही थीं उनसे वह अधिक सुशोभित हो रहा था। दयाकी मूर्ति, अहितका दमन करनेवाले, स्वयं ईश एवं स्वयं देदीप्यमान भगवान् नेमि जिनेन्द्र उस मण्डपके मध्यमें स्थित हो समस्त

१. हृष्टा म० । २. सर्वाण्यनूनभूतीनि ख० । ३. सीमान्तौ द्वावपि ज्ञेयौ क०, ख०, ङ० । ४. कारणै म० । गव्यूतिद्वयविस्तृतौ म०, क०, ङ०, ख० । ५. घटिकाकलनिर्ह्रादी म० । ६. मुक्तागुणामुक्तं प्रान्तमध्यान्तरान्तरः म० । ७. स्वोत्तम्भस्तम्भ- म० । ८ -तराचितैः क० । ९. दयिताहितः म० ।

पश्यन्त्यात्मभवान् सर्वे सप्त सप्त परापरान्। यत्र तत्रालसत्यर्कं पश्चाद्भामण्डलं प्रभोः ॥५७॥
[1]त्रिलोकीवान्तसारात्युपर्युपरि निर्मला। त्रिच्छत्री[2] सा[3] जिनेन्द्रश्रीस्त्रैलोक्येशित्वशंसिनी ॥५८॥
चामराण्यभितो भान्ति सहस्राणि तमीश्वरम्। स्वयंवीज्यानि शैलेन्द्रं हंसा इव नभस्तले ॥५९॥
ऋषयोऽनुव्रजन्तीशं स्वर्गिणः परिवृण्वते। प्रतीहारः पुरो याति वासवो वसुभिः सह ॥६०॥
ततः केवललक्ष्मीवः प्रतिपद्या[4] प्रकाशते। साकं [5]शच्या त्रिलोकोद्भूतिर्लक्ष्मीः समङ्गला ॥६१॥
श्रीसनाथैस्ततः सर्वैर्भूयते पूर्णमङ्गलैः। मङ्गलस्य हि माङ्गल्या यात्रा मङ्गलपूर्विका ॥६२॥
शङ्खपद्मौ ज्वलन्मौलिसार्थीयौ सत्त्वकामदौ। निधिभूतौ प्रवर्तेते हेमरत्नप्रवर्षिणौ ॥६३॥
भास्वत्फणामणिज्योतिर्दीपिका भान्ति पन्नगाः। हतान्धतमसज्ञानदीपदीप्त्यनुकारिणः ॥६४॥
विश्वे वैश्वानरा यान्ति [6]धृतधूपघटोद्धताः। यद्गन्धो याति लोकान्तं जिनगन्धस्य सूचकः ॥६५॥
सौम्याग्नेयगुणा देवभक्ताः सोमदिवाकराः। स्वप्रभामण्डलादर्शमङ्गलानि[7] वहन्त्यहो ॥६६॥
तपनीयमयैश्छत्रैर्नभस्तपनरोधिभिः। [8]तपनैरेव सर्वत्र संरुद्धमिव दृश्यते ॥६७॥

जीवोंके हितके लिए विहार कर रहे थे ॥ ५२–५६ ॥

उसी पुष्पमण्डपमें भगवान्के पीछे सूर्यको पराजित करनेवाला भामण्डल सुशोभित होता था जिसमें सब जीव अपने आगे-पीछेके सात-सात भव देखते हैं ॥ ५७ ॥ भगवान्के शिरपर ऊपर-ऊपर अत्यन्त निर्मल तीन छत्र सुशोभित हो रहे थे जिनमें तीनों लोकोंके द्वारा सार तत्त्व प्रकट किया गया था और उनसे ऐसा जान पड़ता था मानो वह जिनेन्द्र भगवान्की लक्ष्मी तीन लोकके स्वामित्वको सूचित ही कर रही थी ॥ ५८ ॥ भगवान्के चारों ओर अपने-आप दुलनेवाले हजारों चमर ऐसे सुशोभित हो रहे थे जैसे आकाशतलमें मेरु पर्वतके चारों ओर हंस सुशोभित होते हैं ॥ ५९ ॥ ऋषिगण भगवान्के पीछे-पीछे चल रहे थे, देव उन्हें घेरे हुए थे और इन्द्र प्रतिहार बन कर आठ वसुओंके साथ भगवान्के आगे-आगे चलता था ॥ ६० ॥ इन्द्रके आगे तीन लोककी उत्कृष्ट विभूतिसे युक्त लक्ष्मी नामक देवी, मङ्गलद्रव्य लिये शची देवीके साथ-साथ जा रही थी और वह केवलज्ञानरूपी लक्ष्मीके प्रतिबिम्बके समान जान पड़ती थी ॥ ६१ ॥ तदनन्तर श्रीदेवीसे सहित समस्त एवं परिपूर्ण-मङ्गलद्रव्य विद्यमान थे सो ठीक ही है क्योंकि मङ्गलमय भगवान्की मङ्गलमय यात्रा मङ्गल-द्रव्योंसे युक्त होती ही है ॥ ६२ ॥ उनके आगे, जिनपर देदीप्यमान मुकुटके धारक प्रमुख देव बैठे थे ऐसी शङ्ख और पद्म नामक दो निधियाँ चलती थीं। ये निधियाँ समस्त जीवोंको इच्छित वस्तुएँ प्रदान करनेवाली थीं तथा सुवर्ण और रत्नोंकी वर्षा करती जाती थीं ॥ ६३ ॥ उनके आगे फणाओंपर चमकते हुए मणियोंकी किरणरूप दीपकोंसे युक्त नागकुमार जातिके देव चलते थे और वे अज्ञानान्धकारको नष्ट करनेवाले केवलज्ञानरूपी दीपककी दीप्तिका अनुकरण करते हुए-से जान पड़ते थे ॥ ६४ ॥ उनके आगे धूपघटोंको धारण करनेवाले समस्त अग्निकुमार देव चल रहे थे। उन धूपघटोंकी गन्ध लोकके अन्त तक फैल रही थी और वह जिनेन्द्र भगवान्की गन्धको सूचित कर रही थी ॥ ६५ ॥ तदनन्तर शान्त और तेज रूप गुण-को धारण करनेवाले, भगवान्के भक्त, चन्द्र और सूर्य जातिके देव अपनी प्रभाके समूहरूप मङ्गलमय दर्पणके धारण करते हुए चल रहे थे ॥ ६६ ॥ उस समय संतापके रोकनेके लिए सुवर्णमय छत्र लगाये गये थे, उनसे सर्वत्र ऐसा जान पड़ता था मानो आकाश सूर्योंसे ही

---

१. त्रिलोकीवान्तसारा—क०। २. त्रयाणां छत्राणाम् समाहारः त्रिछत्री। ३. त्रिछत्रीशो ख०। ४. प्रतिपद्या ख०। प्रतिप्राज्या क०। ५. साकं सच्या त्रिलोकोद्भूतिलक्ष्मीः क०। ६. धृतधूमघटोद्धताः म०। ७. मङ्गलादर्शमङ्गलानि क०, ङ०। ८. तपनीयैरेव म०, ख०, ङ०।

पताकाहस्तविक्षेपैः संतर्ज्य परवादिनः[1] । दयामूर्ता इवेशांसा[2] नृत्यन्ति जयकेतवः ॥६८॥
[3]वैभवी विजयाख्यातिर्वैजयन्ती पुरेरिता । राजते त्रिजगन्नेत्रकुमुदामलचन्द्रिका ॥६९॥
भुवःस्वर्भूर्निवासिन्यो भुवि यद्व्यन्तरा स्थिताः । नरीनृत्यन्ति देव्योऽग्रे प्रेमानन्दरसाष्टकम् ॥७०॥
आमन्द्रमधुरध्वानाव्याप्तदिग्विदिगन्तरा । धीरं नानद्यते नान्दी[4] जित्वा प्रावृड्घनावलीम् ॥७१॥
जितार्को धर्मचक्रार्कः सहस्रारांशुदीधितिः । [5]याति देवपरीवारो [6]वियत्यातिततमोपहः ॥७२॥
लोकानामेकनाथोऽयमेतैत नमतेति च । घुष्यते स्तनितैरग्रेघोषणाभयघोषणा ॥७३॥
भर्तृप्रभावसदृशा सत्पूर्वं व्याप्य दिक्पथे । प्रकुर्वन्ति जयाह्वानं धावन्तः प्रथमोत्तमाः ॥७४॥
देवयात्रामिमां दिव्यामन्वेत्य परमाद्भुताम् । अद्भुतान्यर्थवृष्ट्यादिसर्वाण्यनुभूतां भुवि ॥७५॥
[7]आधयो नैव जायन्ते व्याधयो व्यापयन्ति न[8] । ईतयश्चाज्ञया भर्तुर्नेति तद्देशमण्डले ॥७६॥
अन्धाः पश्यन्ति रूपाणि शृण्वन्ति बधिराः श्रुतिम् । मूकाः स्पष्टं प्रभाषन्ते विक्रमन्ते[9] च पङ्गवः॥७७॥
नात्युष्णा नातिशीताः स्युरहोरात्रादिवृत्तयः । अन्यथाशुभमप्येषि शुभं सर्वं प्रवर्धते ॥७८॥

व्याप्त हो रहा हो ॥६७॥ जगह-जगह विजय-स्तम्भ दिखायी दे रहे थे, उनसे ऐसा जान पड़ता था मानो पताकारूपी हाथोंके विक्षेपसे पर-वादियोंको परास्त कर दयारूपी मूर्तिको धारण करनेवाले भगवान्‌के मानो कन्धे ही नृत्य कर रहे हों ॥ ६८ ॥ आगे-आगे भगवान्‌की विजय-पताका फहराती हुई सुशोभित थी जो ऐसी जान पड़ती थी मानो तीन जगत्‌के नेत्ररूपी कुमुदोंको विकसित करनेके लिए निर्मल चाँदनी ही हो ॥ ६९ ॥ जो देवियाँ अधोलोक और ऊर्ध्वलोकमें निवास करती हैं तथा पृथिवीपर नाना स्थानोंमें निवास करनेवाली हैं वे भगवान्‌के आगे प्रेम और आनन्दसे आठ रस प्रकट करती हुई नृत्य कर रही थीं ॥७०॥ जिसने अपनी गम्भीर और मधुर ध्वनिसे समस्त दिशाओं और विदिशाओंके अन्तरको व्याप्त कर रखा था ऐसी नान्दी-ध्वनि (भगवत्स्तुतिकी ध्वनि) वर्षा ऋतुकी मेघावलीको जीतकर बड़ी गम्भीरतासे बार-बार हो रही थी ॥७१॥ जिसने अपनी प्रभासे सूर्यको जीत लिया था, जो हजार अररूप किरणोंसे सहित था, देवोंके समूहसे घिरा हुआ था और अत्यधिक अन्धकारको नष्ट कर रहा था ऐसा धर्मचक्र आकाश-मार्गसे चल रहा था ॥७२॥ आगे-आगे चलनेवाले स्तनितकुमार देव अभय घोषणाके साथ-साथ यह घोषणा करते जाते थे कि 'ये भगवान् तीन लोकके स्वामी हैं, आओ, आओ और इन्हें नमस्कार करो' ॥७३॥ उस समय बहुत-से उत्तम भवनवासी देव, भगवान् नेमिनाथके प्रभावके अनुरूप दिशाओं और मार्गको अच्छी तरह व्याप्त कर दौड़ते हुए जय-जयकार करते जाते थे ॥७४॥ जो जीव अनेक आश्चर्योंसे भरी हुई भगवानकी इस दिव्ययात्रामें साथ-साथ जाते थे, पृथिवीपर उन्हें अर्थ-वृष्टिको आदि लेकर समस्त आश्चर्योंकी प्राप्ति होती थी। भावार्थ—उन्हें चाहे जहाँ धन दिखायी देना आदि अनेक आश्चर्य स्वयं प्राप्त हो जाते थे ॥७५॥ जिस देशमें भगवानका विहार होता था उस देशमें भगवान्‌की आज्ञा न होने-से ही मानो किसीको न तो आधि-व्याधि—मानसिक और शारीरिक पीड़ाएँ होती थीं और न अतिवृष्टि आदि ईतियाँ ही व्याप्त होती थीं ॥७६॥ वहाँ अन्धे रूप देखने लगते थे, बहरे शब्द सुनने लगते थे, गूँगे स्पष्ट बोलने लगते थे और लँगड़े चलने लगते थे ॥७७॥ वहाँ न अत्यधिक गरमी होती थी, न अत्यधिक ठण्ड पड़ती थी, न दिन-रातका विभाग होता था, और न अन्य अशुभ कार्य अपनी अधिकता दिखला सकते

---

१. परिवादिनः म० । २. इवेशांशा म० । ३. विभोरियं वैभवी । ४. 'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥' ५. यति म०, क० । ६. वियतीत म० । ७. आवयोर्नैव म० । ८. नः म० । ९. विक्रमन्ते च म० ।

भूवधूः सर्वसम्पन्नसस्यरोमाञ्चकञ्चुका । करोत्यम्बुजहस्तेन भर्तुः पादग्रहं मुदा ॥७९॥
जिनार्कपादसम्पर्कप्रोत्फुल्लकमलावलीम्[1] । प्रथयत्युद्वहन्ती[2] द्यौरस्थायिसरसीश्रियम् ॥८०॥
[3]सर्वेऽत्युक्ताः समारब्धाः समदृष्टेश्वरेक्षिताः । ऋतवः सममेधन्ते [4]निर्विकल्पा हि सेशिता ॥८१॥
निधानानि निधीन्खान्याकराण्यमृतानि च । सूयते[5] तेन विख्याता रत्नसूरिति मेदिनी ॥८२॥
[6]अन्तकोऽन्तकजिद्वीर्यपराजितपराक्रमः । धर्मचक्रोर्जिते लोके नाकाले करमिच्छति ॥८३॥
कालः कालहरस्याज्ञामनुकूलभयादिव । प्रविहाय स्ववैषम्यं पूज्येच्छामनुवर्तते ॥८४॥
[7]त्रसस्थावरकाः सर्वे सुखं विन्दन्ति देहिनः । सैषा विश्वजनीना हि विभुता भुवि वर्तते ॥८५॥
जन्मानुबन्धवैरो यः सर्वोऽहिनकुलादिकः । तस्यापि जायतेऽजर्यं संगतं सुगताज्ञया ॥८६॥
गन्धवाहो वहद्गन्धं भर्तुस्तं कथमाप्नुयात्[8] । अचण्डः सेवते[9] सेवां शिक्षयन्ननुजीविनः ॥८७॥
रजस्तिमिरिकापायनैर्मल्याभरणत्विषः । दिक्कन्याः पुष्पजालैस्तं पूजयन्ति दिशां पतिम् ॥८८॥

थे। सब ओर शुभ-ही-शुभ कार्योंकी वृद्धि होती थी ॥७८॥ उस समय सर्व प्रकारकी फली-फूली धान्यरूपी रोमाञ्चको धारण करनेवाली पृथिवीरूपी स्त्री कमलरूपी हाथोंके द्वारा बड़े हर्षसे भगवान्‌रूपी भर्तारके पादमर्दन कर रही थी ॥७९॥ जिनेन्द्ररूपी सूर्यके पादरूपी किरणों-के सम्पर्कसे फूली हुई कमलावलीको धारण करनेवाला आकाश उस समय चलते-फिरते तालाबकी शोभाको विस्तृत कर रहा था ॥८०॥ उस समय बिना कहे ही समस्त ऋतुएँ एक साथ वृद्धिको प्राप्त हो रही थीं, सो ऐसी जान पड़ती थीं मानो समदृष्टि भगवान्‌के द्वारा अवलोकित होनेपर वे समरूपी ही हो गयी थीं। यथार्थमें स्वामीपना तो वही है जिसमें किसीके प्रति विकल्प—भेदभाव न हो ॥८१॥ उस समय पृथिवी जगह-जगह अनेक खजाने, निधियाँ, अन्न, खानें और अमृत उत्पन्न करती थीं इसलिए 'रत्नसू' इस नामसे प्रसिद्ध हो गयी थी ॥८२॥ अन्तकजित्—यमराजको जीतनेवाले भगवान्‌के वीर्यसे जिसका पराक्रम पराजित हो गया था ऐसा यमराज, धर्मचक्रसे सबल संसारमें असमयमें करग्रहण करनेकी इच्छा नहीं करता था। भावार्थ—जहाँ भगवान्‌का धर्मचक्र चलता था वहाँ किसीका अस-मयमें मरण नहीं होता था ॥८३॥ काल (यम) को हरनेवाले हैं (पक्षमें समयको हरनेवाले) भगवान्‌की आज्ञाके विरुद्ध आचरण न हो जाये, इस भयसे काल (समय) अपनी विष-मताको छोड़कर सदा भगवान्‌की इच्छानुसार ही प्रवृत्ति करता था। भावार्थ—काल, सर्दी-गरमी, दिन-रात आदिकी विषमता छोड़ सदा एक समान प्रवृत्ति कर रहा था ॥८४॥ भगवान्‌के विहार-क्षेत्रमें स्थित समस्त त्रस, स्थावर जीव सुखको प्राप्त हो रहे थे सो ठीक ही है क्योंकि संसारमें विभुता वही है जो सबका हित करनेवाली हो ॥८५॥ जो साँप, नेवला आदि समस्त जीव जन्मसे ही वैर रखते थे उन सभीमें भगवान्‌की आज्ञासे अखण्ड मित्रता हो गयी थी ॥८६॥ भगवान्‌की बहती हुई गन्धको, पवन किस प्रकार प्राप्त कर सकता है इस प्रकार अनुजीवी जनोंको सेवाकी शिक्षा देता हुआ वह शान्त होकर भगवान्‌की सेवा कर रहा था। भावार्थ—उस समय शीतल, मन्द सुगन्धित पवन भगवान्‌की सेवा कर रहा था सो ऐसा जान पड़ता था मानो वह सेवकजनोंको सेवा करनेकी शिक्षा ही दे रहा था ॥८७॥ धूलिरूपी अन्धकारके नष्ट हो जानेसे प्रकट हुई निर्मलतारूपी आभरणोंकी कान्तिसे युक्त

१. कमलावली म० । २. प्रथयन्त्युद्वहन्तो म०, क०, ङ० । ३. स्वर्वेत्युक्ताः म० । सर्वे अत्युक्ताः इति पदच्छेदः, उक्तं अतिक्रान्ता इति अत्युक्ताः अकथिता एवेत्यर्थः । ४. निर्विकल्पा म०, क०, ख०, ङ० । ५. सूयन्ते म०, क०, ख०, ङ० । ६. अन्ते कौन्तकजिद् म० । ७. तत्र स्थावरकाः म० । ८. तत्कथाप्नुयात् म० । तत्कथयाऽनुयात् क० । ९. सेव्यते क० । सेहते ख० ।

नभः स्वच्छतरं स्पष्टतारातरलभासुरम् । सरः शरत्प्रसन्नाम्भः कुमुद्वदिव दृश्यते ॥८९॥
दूराद्बाल्पधियः सर्वे [1]नमन्ति किमुतेतरे । चतुरास्यश्चतुर्दिक्षु छायादिरहितो विभुः ॥९०॥
भुक्त्यभावो जिनेन्द्रस्योपसर्गस्य तथैव च । अहो लोकैकनाथस्य माहात्म्यं महदद्भुतम् ॥९१॥
शुभंयवो नमन्त्येत्याहंयवोऽपि प्रवादिनः । अवसानाद्भुतं चैतन्निर्द्वन्द्वं प्राभवं हि तत् ॥९२॥
यस्यां यस्यां दिशीशः स्यात्त्रिदशेशपुरस्सरः । तस्यां तस्यां दिगीशाः स्युः प्रत्युद्याताः सपूजनाः ॥९३॥
यतो [2]यतश्च यातीशस्तद्दीशाश्च समङ्गलाः । [3]अनुयान्त्याश्च सीमानः सार्वभौमो हि तादृशः ॥९४॥
त्रिमार्गगा [4]प्रयात्येवं देवसेना त्वमार्गगा । पवित्रयति भूलोकं पवित्रेण प्रभाविता ॥९५॥
तस्यामेकः समुत्तुङ्गो भादण्डो दण्डसंनिभः । अधरोपरिलोकान्तः प्राप्तः प्रत्यागतांशुभिः ॥९६॥
त्रिगुणीकृततेजस्कः स्थूलदृश्यः स्वतेजसा । भासते [5]भास्करादन्याज्ज्योतिष्टोमतिरस्करः ॥९७॥
आलोको यस्य लोकान्तव्यापी निःप्रतिबन्धनः । ध्वस्तान्धतमसो भास्वत्प्रकाशमतिवर्तते ॥९८॥
तस्यान्तस्तेजसो भर्ता तेजोमय इवापरः । रश्मिमालिसहस्रैकरूपाकृतिरनाकृतिः[6] ॥९९॥

दिशारूपी कन्याएँ फूलोंके जापसे भगवान्की पूजा कर रही थीं ॥८८॥ अत्यन्त स्वच्छ और जगमगाते हुए ताराओंसे देदीप्यमान आकाश, उस सरोवरके समान दिखायी देता था जिसका जल शरद् ऋतुके कारण स्वच्छ हो गया था तथा जिसमें कुमुदोंका समूह विद्यमान था ॥८९॥ उस समय अन्यकी तो बात ही क्या थी अल्पबुद्धिके धारक तिर्यञ्च आदि समस्त प्राणी भगवान्को दूरसे ही नमस्कार करते थे। भगवान् चतुर्मुख थे इसलिए चारों दिशाओंमें दिखायी देते और छाया आदिसे रहित थे ॥९०॥ भगवान् नेमि जिनेन्द्रके भोजन तथा सब प्रकारके उपसर्गोंका अभाव था सो ठीक ही है क्योंकि लोकके अद्वितीय स्वामीका ऐसा आश्चर्यकारी अद्भुत माहात्म्य होता ही है ॥९१॥ जिनका कल्याण होनेवाला था ऐसे प्रवादी लोग, अहङ्कारसे युक्त होनेपर भी आ-आकर भगवान्को नमस्कार करते थे सो ठीक ही है क्योंकि उन जैसा प्रभाव अन्तमें आश्चर्य करनेवाला एवं प्रतिपक्षीसे रहित होता ही है ॥९२॥ जिनके आगे-आगे इन्द्र चल रहा था ऐसे भगवान् जिस-जिस दिशामें पहुँचते थे उसी-उसी दिशाके दिक्पाल पूजनकी सामग्री लेकर भगवान्की अगवानीके लिए आ पहुँचते थे ॥९३॥ भगवान् जिस-जिस दिशासे वापिस जाते थे उस-उस दिशाके दिक्पाल मङ्गल द्रव्य लिये हुए अपनी-अपनी सीमा तक पहुँचाने आते थे सो ठीक ही है क्योंकि भगवान् उसी प्रकारके सार्वभौम थे—समस्त पृथिवीके अधिपति थे ॥९४॥ त्रिमार्गगा अर्थात् गङ्गानदी अपने निश्चित तीन मार्गोंसे चलती हैं परन्तु वह देवोंकी सेना बिना मार्गके ही चल रही थी—उसके चलनेके मार्ग अनेक थे। इस तरह वह सेना अतिशय पवित्र भगवान्से प्रभावित हो पृथिवीलोकको पवित्र कर रही थी ॥९५॥ उस देवसेनाके बीच दण्डके समान एक बहुत ऊँचा कान्तिदण्ड विद्यमान था जो नीचेसे लेकर ऊपर लोकके अन्त तक फैला था और वापिस आयी हुई किरणोंसे युक्त था ॥९६॥ अन्य तेजधारियोंकी अपेक्षा उस कान्तिदण्डका तेज तिगुना था। अपने तेजके द्वारा वह बड़ा स्थूल दिखायी देता था और सूर्यके सिवाय अन्य ज्योतिषियोंके समूहको तिरस्कृत करनेवाला था ॥९७॥ उस कान्तिदण्डका प्रकाश लोकके अन्त तक व्याप्त था, रुकावटसे रहित था, गाढ अन्धकारको नष्ट करनेवाला था, और सूर्यके प्रकाशको अतिक्रान्त करनेवाला था ॥९८॥ उस कान्तिदण्डके बीचमें पुरुषाकार एक ऐसा दूसरा कान्तिसमूह दिखायी देता था जो तेजका धारक था, अन्य तेजोमयके समान जान पड़ता था, एक

१. नयन्ति म० । २. अनुयान्त्या स्वसीमानः ख० । अनुयान्त्या स्वसीमानः म० । ३. यातश्च क० । यातस्य ङ० । ४. प्रयान्त्येव क० । ५. भास्करादन्याज्ज्योतिष्टमतिरस्करः म०, ख० । ६. नराकृतिः ङ० ।

परितो [1]भामिरुत्सर्पद्घनो भर्तुर्महोदयः । [2]भासिगव्यूतिविस्तारो युक्तोच्छ्रायस्तनूद्भवः[3] ॥१००॥
दृश्यते दृष्टिहारीव सुखदृश्यः सुखावहः । पुण्यमूर्तिस्तदन्तस्थः पूज्यते पुरुषाकृतिः ॥१०१॥
काधियोऽपुण्यजन्मानः स्वापुण्यजरुषान्विताः । न पश्यन्ते च तद्भासं भानुभासमुलूकवत् ॥१०२॥
तिरयन्ती रवेस्तेजः पूरयन्ती दिशोऽखिलाः । तत्प्रभा भानवीयेव पूर्वं व्याप्नोति भूतलम् ॥१०३॥
तस्याश्चानुपदं याति लोकेशो लोकशान्तये । लोकानुद्भासयन् सर्वानतिदीधितिमत्प्रभः ॥१०४॥
आसंवत्सरमात्माङ्कैः प्रथयन्प्राभवीं गतिम् । भासते [4]रत्नवृष्ट्याध्वामरोस्यैरावतो यथा ॥१०५॥
अनुबन्धावनिभ्रव्यं दिवि मार्गादि दृश्यते । त्रिलोकातिशयोद्भूतं तद्धि [5]प्राभवमद्भुतम् ॥१०६॥
पटूभवन्ति मन्दाश्च सर्वे [6]हिंस्रास्त्वपर्धयः । [7]खेदस्वेदार्तिचिन्तादि न [8]तेषामस्ति तत्क्षणे ॥१०७॥
विहारानुगृहीतायां भूमौ न डमरादयः । [9]दशाभ्यस्तयुगं(?)भर्तुरहोऽत्र महिमा महान् ॥१०८॥
विभूत्योद्धतया भूत्यै जगतां जगतां विभुः । विजहार भुवं भव्यान् बोधयन् बोधदः क्रमात् ॥१०९॥

हजार सूर्यके समान कान्तिका धारक था, जिससे बढ़कर और दूसरी आकृति नहीं थी, जो चारों ओर फैलनेवाली कान्तिसे घन रूप था, भगवान्‌के महान् अभ्युदयके समान था, जिसकी कान्तिका विस्तार एक कोस तक फैल रहा था, जो भगवान्‌की ऊँचाईके बराबर ऊँचा था, दृष्टिको हरण करनेवाला था, सुखपूर्वक देखा जा सकता था, सुखको उत्पन्न करनेवाला था, पुण्यकी मूर्ति स्वरूप था और सबके द्वारा पूजा जाता था ॥९९-१०१॥ जिस प्रकार उल्लू सूर्यकी प्रभाको नहीं देख पाते हैं उसी प्रकार दुर्बुद्धि, पापी एवं अपने पापसे उत्पन्न क्रोधसे युक्त पुरुष उस कान्ति-समूहको नहीं देख पाते हैं ॥१०२॥ उस कान्ति-समूहमें-से एक विशेष प्रकारकी प्रभा निकलती थी जो सूर्यके तेजको आच्छादित कर रही थी, समस्त दिशाओंको पूर्ण कर रही थी और सूर्यकी प्रभाके समान पृथिवीतलको पहलेसे व्याप्त कर रही थी ॥१०३॥ उस प्रभाके पीछे, जो समस्त लोकोंको प्रकाशित कर रहे थे तथा जिनकी प्रभा अत्यधिक किरणोंसे युक्त थी ऐसे भगवान् नेमि जिनेन्द्र, लोकशान्तिके लिए—संसारमें शान्तिका प्रसार करनेके लिए बिहार कर रहे थे ॥१०४॥ जिस मार्गमें भगवान्‌का विहार होता था वह मार्ग, अपने चिह्नोंसे एक वर्षतक यह प्रकट करता रहता था कि यहाँ भगवान्‌का विहार हुआ है तथा रत्नवृष्टिसे वह मार्ग ऐसा सुशोभित होता था जैसा नक्षत्रोंके समूहसे ऐरावत हाथी सुशोभित होता है ॥१०५॥ जिस प्रकार विहारसे सम्बन्ध रखनेवाली पृथिवीमें मार्ग आदि दिखलायी देते हैं उसी प्रकार आकाशमें भी मार्ग आदि दिखायी देते हैं सो ठीक ही है क्योंकि तीन लोकके अतिशयसे उत्पन्न भगवान्‌का वह अतिशय ही आश्चर्यकारी था॥ १०६॥ उस समय मन्द बुद्धि मनुष्य तीक्ष्ण बुद्धिके धारक हो गये थे। समस्त हिंसक जीव प्रभावहीन हो गये थे और भगवान्‌के समीप रहनेवाले लोगोंको खेद, पसीना, पीड़ा तथा चिन्ता आदि कुछ भी उपद्रव नहीं होता था॥१०७॥ भगवान्‌के विहारसे अनुगृहीत भूमिमें दो सौ योजन तक विप्लव आदि नहीं होते थे। अथवा दशसे गुणित युग अर्थात् पचास वर्ष तक उस भूमिमें कोई उपद्रव आदि नहीं होते थे। भावार्थ—जिस भूमिमें भगवान्‌का विहार होता था वहाँ ५० वर्ष तक कोई उपद्रव-दुर्भिक्ष आदि नहीं होता था। यह भगवान्‌की बहुत भारी महिमा ही समझनी चाहिए ॥१०८॥ इस प्रकार उत्कृष्ट विभूतिसे युक्त, बोधको देनेवाले जगत्‌के स्वामी भगवान् नेमिनाथने भव्य जीवोंको संबोधित करते हुए, जगत्‌के वैभवके लिए क्रमसे पृथिवीपर

१. भाति तूत्सर्पद्घनो ख०, म०, ङ० । २. राशिगव्यूत–क०, ख०, म० । ३. युक्तोच्छ्रायतनूद्भवः म० । ४. रत्नवृष्ट्या वा परीत्यैरावतो म०, ख० । रत्नवृष्ट्या वा भरतैरावतो यथा क० । ५. प्रभोरिदं प्राभवम् प्रभुसम्बन्धीत्यर्थः । ६. हिंस्रास्त्वपर्धयः म०, ख०, ङ०, क० । ७. खेदः स्वेदार्ति- म० । ८. न चैषामस्ति म० । ९. देशाभ्यस्तयुगं ङ० । द्विशतयोजनं (म० टि०) अत्र 'शताभ्यस्तयुगं' इति पाठः सम्यक् प्रतिभाति ।

सुराष्ट्रमत्स्यलाटोरुसूरसेनपटच्चरान् । कुरुजाङ्गलपाञ्चालकुशाग्रमगधाञ्जनान् ॥११०॥
अङ्गवङ्गकलिङ्गादीन् नानाजनपदान् जिनः । विहरन् जिनधर्मस्थांश्चक्रे क्षत्रियपूर्वकान् ॥१११॥
ततो मलयनामानं देशमागत्य स क्रमात् । सहस्राम्रवने तस्थौ पुरे भद्रिलपूर्वके ॥११२॥
पूर्ववद्रचिते तत्र चतुर्भेदैः सुरासुरैः । समवस्थानभूभागे जिनोऽभाद् गणवेष्टितः ॥११३॥
तत्पुराधिपतिः पौण्ड्रः पौरलोकसमन्वितः । सस्तुतिर्जिनमानम्य समासीनः कृताञ्जलिः ॥११४॥
देवक्यास्तनया ये षट् सुदृष्ट्यलकयोः स्थिताः । पुत्रप्रीतिं प्रकुर्वाणास्तेऽपि तत्रैव संगताः ॥११५॥
प्रत्येकं योषितस्तेषां द्वात्रिंशद्गणना गुणैः । रूपादिभिरपीन्द्रस्य जयन्त्यः शुचयः शचीम् ॥११६॥
अवतीर्य रथेभ्यस्ते षड्भ्यः षडपि सोदराः । नत्वा नुत्वा जिनं राज्ञा सहासीना महौजसः ॥११७॥
जिनः श्रावकधर्मं च सम्यग्दर्शनभूषितम् । यतिधर्मं च कर्मघ्नं जगाद सदसे तदा ॥११८॥
ततो विदिततत्त्वार्थाः श्रुत्वा धर्मामृतं जिनात् । जातसंसारनिर्वेदा बन्धुभ्यो विनिवेद्य ते ॥११९॥
जिनपादान्तिके दीक्षां मोक्षलक्ष्मीविधायिनीम् । भ्रातरः सहनिस्संगाः षडपि प्रतिपेदिरे ॥१२०॥
द्वादशाङ्गं श्रुतज्ञानं लब्धबीजादिबुद्धयः । अधिगम्य तपो घोरं चक्रुस्ते राजसूनवः ॥१२१॥
षष्ठाद्यः सहामीषां धारणापारणाः सह । योगास्त्रैकालिकाः साकं साकं शय्यासनक्रियाः ॥१२२॥
तेषां चरमदेहानां तपतां परमं तपः । देहानां परमा कान्तिः पूर्वतोऽपि विवर्धते ॥१२३॥
उपमानोपमेयत्वमन्योन्यस्य तपस्यमी । सबाह्याभ्यन्तरे प्रापुस्तीर्थकृत्पदसेवकाः ॥१२४॥

विहार किया ॥१०९॥ सुराष्ट्र, मत्स्य, लाट, विशाल शूरसेन, पटच्चर, कुरुजाङ्गल, पाञ्चाल, कुशाग्र, मगध, अञ्जन, अङ्ग, वङ्ग तथा कलिङ्ग आदि नाना देशोंमें विहार करते हुए भगवान्ने क्षत्रिय आदि वर्णोंको जैनधर्ममें स्थित किया ॥११०–१११॥

तदनन्तर विहार करते-करते भगवान् मलय नामक देशमें आये और उसके भद्रिलपुर नगरके सहस्राम्रवनमें विराजमान हो गये ॥११२॥ पहलेकी तरह चारों प्रकारके देवोंने वहाँपर भी समवसरणकी रचना कर दी और उसमें गणधरोंसे वेष्टित भगवान् सुशोभित होने लगे ॥११३॥ उस नगरका राजा पौण्ड्र, नगरवासियोंके साथ समवसरणमें आया और हाथ जोड़ स्तुति करता हुआ जिनेन्द्र भगवान्को नमस्कार कर मनुष्योंके कोठेमें बैठ गया ॥११४॥ देवकीके जो छह पुत्र सुदृष्टि सेठ और अलका सेठानीकी पुत्रप्रीतिको बढ़ाते हुए उनके यहाँ रहते थे वे भी समवसरणमें आये ॥११५॥ उनमें-से प्रत्येककी बत्तीस-बत्तीस स्त्रियाँ थीं जो अत्यन्त उज्ज्वल थीं और अपने रूप आदि गुणोंसे इन्द्रकी इन्द्राणीको भी जीतती थीं ॥११६॥ बहुत भारी तेजको धारण करनेवाले वे छहों भाई अपने-अपने पृथक्-पृथक् छह रथोंसे नीचे उतरकर समवसरणमें गये और जिनेन्द्र भगवान्को नमस्कार कर तथा उनकी स्तुति कर राजाके साथ मनुष्योंके कोठेमें बैठ गये ॥११७॥ उस समय भगवान्ने सभामें स्थित लोगोंके लिए सम्यग्दर्शनसे सुशोभित श्रावकधर्म और कर्मोंका नाश करनेवाले मुनिधर्मका उपदेश दिया ॥११८॥ तदनन्तर जिनेन्द्र भगवान्से धर्मरूप अमृतका श्रवण कर जिन्होंने तत्त्वके वास्तविक स्वरूपको जान लिया था ऐसे छहों भाई संसारसे विरक्त हो उठे और बन्धुजनोंको इसकी सूचना दे जिनेन्द्र भगवान्के चरणोंके समीप निर्ग्रन्थ हो एक साथ मोक्ष-लक्ष्मीको प्रदान करनेवाली दीक्षाको प्राप्त हो गये ॥११९–१२०॥ जिन्हें बीज-बुद्धि आदि ऋद्धियाँ प्राप्त हुई थीं ऐसे उन राजकुमारोंने द्वादशाङ्ग श्रुतज्ञानका अभ्यास कर घोर तप किया ॥१२१॥ इन छहों मुनियोंके बेला आदि उपवास, उनकी धारणाएँ, पारणाएँ, त्रैकालिक योग तथा शयन, आसन आदि क्रियाएँ साथ-साथ ही होती थीं ॥१२२॥ उत्कृष्ट तप तपनेवाले उन चरमशरीरी मुनियोंके शरीरकी उत्कृष्ट कान्ति पहलेसे भी अधिक बढ़ गयी थी ॥१२३॥ तीर्थंकर भगवान्के चरणोंकी सेवा करनेवाले ये छहों मुनि, बाह्याभ्यन्तर तपमें परस्पर एक-दूसरेके उपमानोपमेय-

तथाविधमहाभूत्या विहृत्य स महीं जिनः । आगत्य समवस्थानेनोर्जयन्तमभूषयत् ॥१२५॥
इन्द्राद्यैस्त्रिदशैस्तस्मिन्नुपेन्द्राद्यैश्च यादवैः । द्वारिकापौरलोकेन सेव्यमानो जिनो बभौ ॥१२६॥
एकादश गणाधीशा वरदत्तादयस्तदा । श्रुतज्ञानसमुद्रान्तर्दर्शिनोऽत्र विरेजिरे ॥१२७॥
चतुःशतानि तत्रान्ये मान्याः पूर्वधराः सताम् । एकादशसहस्राष्टशतसंख्यास्तु शिक्षकाः ॥१२८॥
शतान्यवधिनेत्रास्तु केवलज्ञानिनोऽपि च । ते पञ्चदशसंख्यानाः प्रत्येकमुपवर्णिताः ॥१२९॥
मत्या विपुलया युक्ता शतानि नव संख्यया । वादिनोऽष्टौ शतानि स्युरेकादश तु वैक्रियाः ॥१३०॥
चत्वारिंशत्सहस्राणि राजीमत्या सहार्यिकाः । लक्षैकैकोनसप्तत्या सहस्रैः श्रावकाः स्मृताः ॥१३१॥
षट्त्रिंशच्च सहस्राणि लक्षाणां त्रितयं तथा । सम्यग्दर्शनसंशुद्धाः श्राविकाः श्रावकव्रताः ॥१३२॥
पूर्ववत्तीर्थकृन्मेघस्तृषितान् भव्यचातकान् । वर्षन् धर्मामृतं दिव्यं दिव्यध्वनिरतर्पयत् ॥१३३॥

इति दुरापमहोदयपर्वते जिनरवौ स्थितवत्यमितोदये ।
विकसति प्रकृताञ्जलिकुड्मलं सकललोकसरोजबुधाम्बुजम् ॥१३४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवद्विहारवर्णनो नामैकोनषष्टितमः सर्गः ॥५९॥

को प्राप्त हो रहे थे ॥१२४॥

तदनन्तर उस प्रकारकी महाविभूतिके साथ पृथिवीपर विहार कर भगवान् ऊर्जयन्त गिरि—गिरनार पर्वतपर आये और समवसरणके द्वारा उसे सुशोभित करने लगे ॥१२५॥ इन्द्रादिक देवों, कृष्ण आदि यादवों और द्वारिकावासी नागरिक जनोंसे जिनकी सेवा हो रही थी ऐसे भगवान् नेमि जिनेन्द्र उस ऊर्जयन्त गिरिपर अत्यधिक सुशोभित हो रहे थे ॥१२६॥ उस समय समवसरणमें श्रुतज्ञानरूपी समुद्रके भीतरी भागको देखनेवाले वरदत्त आदि ग्यारह गणधर सुशोभित थे ॥१२७॥ भगवान्‌के समवसरणमें सज्जनोंके माननीय चार सौ पूर्वधारी, एक हजार आठ सौ शिक्षक, पन्द्रह सौ अवधिज्ञानी, पन्द्रह सौ केवलज्ञानी, नौ सौ विपुलमति मनःपर्ययज्ञानी, आठ सौ वादी और ग्यारह सौ विक्रिया ऋद्धिके धारक मुनिराज थे ॥१२८-१३०॥ राजीमतीको साथ लेकर चालीस हजार आर्यिकाएँ, एक लाख उनहत्तर हजार श्रावक और सम्यग्दर्शनसे शुद्ध तथा श्रावकके व्रत धारण करनेवाली तीन लाख छत्तीस हजार श्राविकाएँ वहाँ विद्यमान थीं ॥१३१-१३२॥ दिव्यध्वनिके धारक भगवान् तीर्थंकर-रूपी मेघ, धर्मरूपी दिव्य अमृतकी वर्षा करते हुए, प्यासे भव्यजीवरूपी चातकोंको पहलेकी तरह तृप्त करने लगे ॥१३३॥

इस प्रकार अपरिमित अभ्युदयके धारक नेमिजिनेन्द्ररूपी सूर्यके दुर्लभ महोदयसे युक्त ऊर्जयन्त पर्वतरूपी उदयाचलपर स्थित होते ही अञ्जलिरूपी कमलको धारण करने-वाले समस्त लोकरूपी सरोवरमें उत्पन्न हुए विद्वज्जनरूपी कमल प्रफुल्लित हो गये ॥१३४॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त जिनसेनाचार्य रचित हरिवंशपुराणमें भगवान्‌के विहारका वर्णन करनेवाला उनसठवाँ सर्ग समाप्त हुआ ॥५९॥

षष्टितमः सर्गः

अथ धर्मकथाच्छेदे प्रणिपत्य जिनेश्वरम् । कृताञ्जलिरपृच्छत् सा देवकी विनयं श्रिता ॥१॥
भगवन् भवने मेऽद्य जातरूपमनोहरम् । मुनियुग्मं प्रविश्य [1]त्रिरपर्युपरि भुक्तवान् ॥२॥
भगवन् भुक्तिवेलायामेकस्यामेकभुक्तये । बहुकृत्वो [2]गृहं त्वेकं यतयः प्रविशन्ति किम् ॥३॥
अथातिशयरूपत्वाद्यतियुग्मत्रयं मया । भ्रान्त्या नालक्षि मे स्नेहो देहजेष्विव तेष्वभूत् ॥४॥
इत्युक्तेऽकथयन्नाथस्तनयास्ते षडप्यमी । युग्मत्रयतया सूता भवत्या कृष्णपूर्वजाः ॥५॥
देवेन रक्षिताः कंसात् सुदृष्ट्यलकयोः पुनः । सुतत्वेन च वृद्धास्ते पुरे भद्रिलनामनि ॥६॥
धर्मं श्रुत्वा समं सर्वे मम शिष्यत्वमागताः । कृत्वा कर्मक्षयं सिद्धिं यास्यन्त्यत्रैव जन्मनि ॥७॥
स्नेहोऽपत्यकृतोऽमीषु भवत्याः समभूदतः । धर्मचारिषु सर्वेषु स्नेहः किमुत सूनुषु ॥८॥
प्रणनाम ततस्तुष्टा देवकी देहजान्मुनीन् । यादवाश्च समस्तास्ते कृष्णाद्यास्तुष्टुवुर्नताः ॥९॥
प्रणम्यात्मभवान् पृष्टो जिनेन्द्रः सत्यभामया । यदुलोकामराध्यक्षं दिव्यचक्षुर्जगाविति ॥१०॥
प्राग्भद्रिलपुरेऽत्राभून्मरीचिकपिलासुतः । काव्यकृत्पण्डितम्मन्यो विप्रो मुण्डशलायनः ॥११॥

अथानन्तर धर्मकथा पूर्ण होनेपर विनयको धारण करनेवाली देवकीने हाथ जोड़कर भगवान्को नमस्कार किया और उसके बाद यह पूछा कि भगवन्! आज सुवर्णके समान सुन्दर दो मुनियोंका युगल मेरे भवनमें तीन बार आया और फिर-फिरसे उसने तीन बार आहार लिया। हे प्रभो! जब मुनियोंके भोजनकी वेला एक है और एक ही बार वे भोजन करते हैं तब मुनि एक ही घरमें अनेक बार क्यों प्रवेश करते हैं? ॥ १–३ ॥ अथवा यह भी हो सकता है कि वह तीन मुनियोंका युगल हो और अत्यन्त सदृश रूप होनेके कारण मैं भ्रान्तिवश उन्हें देख नहीं सकी हूँ। परन्तु इतना अवश्य है कि मेरा उन सबमें पुत्रोंके समान स्नेह उत्पन्न हुआ था ॥ ४ ॥

देवकीके इस प्रकार कहनेपर भगवान्ने कहा कि ये छहों मुनि तेरे पुत्र हैं और कृष्णके पहले तीन युगलके रूपमें तूने इन्हें उत्पन्न किया था ॥ ५ ॥ देवने कंससे इनकी रक्षा की और भद्रिलपुर नगरमें सुदृष्टि सेठ तथा अलका सेठानीके यहाँ पुत्ररूपसे इनका लालन-पालन हुआ ॥ ६ ॥ धर्म श्रवण कर ये सबके सब एक साथ मेरी शिष्यताको प्राप्त हो गये—मुनि हो गये और कर्मोंका क्षयकर इसी जन्ममें सिद्धिको प्राप्त होंगे ॥ ७ ॥ तेरा इन सबमें जो स्नेह हुआ था वह अपत्यकृत था—पुत्र होनेसे किया गया था सो ठीक ही है क्योंकि समस्त धर्मात्मा जनोंमें प्रेम होता है फिर जो पुत्र होकर धर्मात्मा हैं उनका तो कहना ही क्या है? ॥ ८ ॥ तदनन्तर देवकीने संतुष्ट होकर उन पुत्ररूप मुनियोंको नमस्कार किया तथा कृष्ण आदि समस्त यादवोंने भी नम्रीभूत होकर उनकी स्तुति की ॥ ९ ॥

तत्पश्चात् कृष्णकी पट्टरानी सत्यभामाने भगवान्को प्रणाम कर अपने पूर्वभव पूछे। उत्तरमें दिव्य नेत्र—केवलज्ञानके धारक भगवान् यादवों और देवोंके समक्ष इस प्रकार उसके पूर्वभव कहने लगे ॥ १० ॥

पहले भद्रिलपुर नगरमें मुण्डशलायन नामका एक ब्राह्मण रहता था जो मरीचि ब्राह्मण और कपिला ब्राह्मणीका पुत्र था, काव्यकी रचनामें निपुण था और अपने आपको पण्डित

---

१. वारत्रयम्। २. गृहेत्वेकम् म०।

पुष्पदन्तजिनेन्द्रस्य तीर्थे व्युच्छेदभावतः । अभावे जिनमार्गज्ञभव्यानां भरतक्षितौ ॥१२॥
गोभूकन्याहिरण्यादिदानानि विषयातुरः । पापबन्धनिमित्तानि विप्रः प्रख्याप्य सोऽवनौ ॥१३॥
मोहयित्वा जडं लोकं राजलोकपुरोऽगमत्[1] । प्रवृत्तः पापसूत्रेषु सप्तमीं पृथिवीमितः ॥१४॥
उद्धृत्यापि परिभ्रम्य तिर्यङ्नारकयोनिषु । काकतालीययोगेन मानुषत्वमुपागतः ॥१५॥
गन्धावतीसरित्तीरे गन्धमादनपर्वते । व्याधः पर्वतको नाम्ना वल्लरीवल्लभोऽभवत् ॥१६॥
श्रीधरं धर्मसंज्ञं च [2]चारणश्रमणौ गिरौ । दृष्ट्वोपशमकृत्वाभ्यां प्रोषितं धर्मकालभाक् ॥१७॥
ज्योतिर्मालाख्यखेचर्यामलकायां महाबलात् । जातः शतबलिभ्राता स पुत्रो हरिवाहनः ॥१८॥
राजा राज्ये नियोज्यैतौ प्रव्रज्य श्रीधरान्तिके । प्रव्रज्यायाः फलं मुख्यं मोक्षसौख्यमवाप सः ॥१९॥
निर्वासितो विरोधस्थो ज्येष्ठेन हरिवाहनः । भगलीदेशशैलेऽस्थादम्बुदावर्तनामनि ॥२०॥
श्रीधर्मानन्तवीर्याख्यौ चारणौ वीक्ष्य तत्र सः । प्रव्रज्याराध्य स प्रापत् कल्पमैशानमेव च ॥२१॥
भुक्त्वा देवसुखं देवश्च्युत्वा संक्लेशभावतः । जाता स्वयंप्रभागर्भे भामा त्वं हि सुकेतुतः ॥२२॥
अत्र जन्मनि कृत्वान्ते तपो भूत्वाऽमरोत्तमः । च्युत्वा जैनं तपः कृत्वा निर्वाणसुखमाप्स्यति ॥२३॥
आकर्ण्यात्मभवानेवं ज्ञात्वात्मासन्ननिर्वृतिम् । आननाम जिनाधीशं सत्यभामा प्रमोदिनी ॥२४॥

मानता था ॥ ११ ॥ श्री पुष्पदन्त जिनेन्द्रके तीर्थमें धर्मका व्युच्छेद हो जानेसे जब भरत-क्षेत्रकी भूमिमें जिनमार्गके ज्ञाता भव्य जीवोंका अभाव हो गया तब उस विषयोंसे पीड़ित ब्राह्मणने पृथिवीपर पापबन्धमें कारण भूत गाय, कन्या तथा सुवर्ण आदिसे दानकी प्रवृत्ति चलायी ॥ १२-१३ ॥ मूर्ख जनोंको मोहित कर वह राजपुरुषोंके आगे तक पहुँच गया अर्थात् क्रम-क्रमसे उसने राजा प्रजा सभीको अपने चक्रमें फँसा लिया और पापाचारमें प्रवृत्त हो अन्तमें वह सातवें नरक गया ॥ १४ ॥ वहाँसे निकलकर भी तिर्यञ्च और नारकियोंकी योनिमें परिभ्रमण करता रहा । तदनन्तर कदाचित् काकतालीयन्यायसे मनुष्य पर्यायको प्राप्त हुआ ॥ १५ ॥ गन्धावती नदीके किनारे गन्धमादन पर्वतपर वह वल्लरी नामक स्त्रीका स्वामी पर्वतक नामका भील हुआ ॥१६॥ कदाचित् उस पर्वतपर श्रीधर और धर्म नामके दो चारणऋद्धिधारी मुनि आये । उनके दर्शन कर इसके परिणामोंमें कुछ शान्ति आयी जिससे मुनियोंने उससे उपवास कराया । अन्तमें वह धर्मपूर्वक मरणको प्राप्त हो विजयार्ध पर्वतकी अलका नगरीमें महाबल नामक विद्याधरसे ज्योतिर्माला नामकी विद्याधरीमें शतबलीका भाई हरिवाहन नामका पुत्र हुआ ॥ १७-१८ ॥ कदाचित् राजा महाबल, शतबली और हरिवाहन नामक दोनों पुत्रोंको राज्य-कार्यमें नियुक्त कर श्रीधर गुरुके पास दीक्षित हो गया और दीक्षाका मुख्य फल जो मोक्षसम्बन्धी सुख उसे प्राप्त हो गया ॥ १९ ॥ किसी कारण वश शतबली और हरिवाहनमें विरोध पड़ गया जिससे बड़े भाई शतबलीने उसे निकाल दिया। निर्वासित हरि-वाहन भगलीदेशके अम्बुदावर्त नामक पर्वतपर स्थित था ॥ २० ॥ उसी समय वहाँ श्री-धर्म और अनन्तवीर्य नामक दो चारणऋद्धिधारी मुनि आये । उनके दर्शन कर हरिवाहनने दीक्षा ले ली और अन्तमें सल्लेखना धारण कर वह ऐशान स्वर्गको प्राप्त हुआ ॥ २१ ॥ हरि-वाहनके जीव देवने वहाँ देवोंके सुखोंका उपभोग किया परन्तु संक्लेशमय परिणाम होनेके कारण वहाँसे च्युत होकर वह राजा सुकेतुकी रानी स्वयंप्रभाके गर्भमें तू सत्यभामा नामकी कन्या हुई ॥ २२ ॥ इस जन्ममें तपकर तू अन्तमें उत्तम देव होगी और वहाँसे च्युत हो जिनेन्द्र प्रणीत तपकर मोक्ष सुखको प्राप्त होगी ॥ २३ ॥ इस प्रकार अपने भव सुनकर तथा निकट कालमें हमें मोक्ष प्राप्त होनेवाला है यह जानकर सत्यभामाने हर्षित हो भगवान्को नमस्कार किया ॥ २४ ॥

---

१. पुरोगमम् म० । २. चारणश्रमणौ म०, ङ० ।

रुक्मिण्यापि ततः पृष्टः पूर्वजन्मानि सर्ववित् । अवोचदिति [1]लोकेऽसौ प्रणिधानपरे स्थिते ॥२५॥
अत्रैव भरतक्षेत्रे विषये मगधाभिधे । ब्राह्मणी सोमदेवस्य लक्ष्मीग्रामेऽग्रजन्मनः ॥२६॥
आसील्लक्ष्मीमती नाम्ना लक्ष्मीरिव सुलक्षणा । रूपाभिमानतो मूढा पूज्याश्च प्रतिमन्यते ॥२७॥
धृतप्रसाधना वक्त्रं कदाचिच्चित्तहारिणी । नेत्रहारिणि चन्द्राभे पश्यन्ती मणिदर्पणे ॥२८॥
समाधिगुप्तनामानं तपसातिकृशीकृतम् । साधुं भिक्षागतं दृष्ट्वा निनिन्द विचिकित्सिता ॥२९॥
मुनेर्निन्दातिपापेन सप्ताहाभ्यन्तरे च सा । क्लिष्टोदुम्बरकुष्ठेन प्रविश्याग्निमगान्मृतिम् ॥३०॥
[2]सहार्ता सा खरी भूत्वा मृत्वा लवणभारतः । शूकरी मानदोषेण जाता राजगृहे पुरे ॥३१॥
वराकी मारिता मृत्वा गोष्ठेऽ[3]जायत कुक्कुरी । गोष्ठागतेन सा दग्धा परुषेण दवाग्निना ॥३२॥
त्रिपदाख्यस्य मण्डूक्यां मण्डूकग्रामवासिनः । मत्स्यबन्धस्य जाता सा दुहिता पूतिगन्धिका ॥३३॥
मात्रा त्यक्ता स्वपापेन पितामह्या प्रवर्धिता । निष्कुटे वटवृक्षस्य जालेनाच्छादयन्मुनिम् ॥३४॥
बोधितावधिनेत्रेण प्रभाते करुणावता । धर्मं समाधिगुप्तेन प्रोक्तपूर्वमथाग्रहीत् ॥३५॥
पुरं [4]सोपारकं याता तत्रार्याः [5]समुपास्य सा । ययौ राजगृहं ताभिः कुर्वाणाचाम्लवर्धनम् ॥३६॥

तदनन्तर रानी रुक्मिणीने भी अपने पूर्वभव पूछे सो समस्त पदार्थोंके ज्ञाता भगवान् नेमिनाथ, इस प्रकार कथन करने लगे। उस समय समस्त लोग सुननेके लिए एकाग्रचित्त होकर बैठे थे ॥ २५ ॥

इसी भरत क्षेत्रके मगध देशमें एक लक्ष्मी नामका ग्राम है। उसमें एक सोमदेव नामका ब्राह्मण रहता था। उसकी लक्ष्मीमती नामकी ब्राह्मणी थी जो कि लक्ष्मीके समान उत्तम लक्षणोंकी धारक थी और अपने रूपके अभिमानसे मूढ होकर पूज्य जनोंको भी कुछ नहीं समझती थी ॥ २६-२७ ॥ चित्तको हरण करनेवाली वह लक्ष्मीमती, एक दिन आभूषण धारण कर नेत्रोंको प्रिय तथा चन्द्रमाके समान आभावाले मणिमय दर्पणमें अपना मुख देख रही थी उसी समय तपसे अतिशय कृश समाधिगुप्त नामके मुनि भिक्षाके लिए आये। उन्हें देख ग्लानियुक्त हो उसने उनकी निन्दा की ॥ २८-२९ ॥ मुनिनिन्दाके बहुत भारी पापसे वह सात दिनके भीतर ही उदुम्बर कुष्ठसे पीड़ित हो गयी और इतनी अधिक पीड़ित हुई कि वह अग्निमें प्रवेश कर मर गयी ॥ ३० ॥ आर्तध्यानके साथ मरकर वह गधी हुई। उस पर नमक लादा जाता था। सो उसके भारसे मरकर वह मान कषायके दोषसे राजगृह नगरमें शूकरी हुई ॥३१॥ उस बेचारीको भी लोगोंने मार दिया जिससे मरकर वह गोष्ठ—गायोंके रहनेके स्थानमें कुत्ती हुई। एक दिन उस गोष्ठमें भयंकर दावाग्नि लग गयी जिससे वह कुत्ती उसी दावाग्निमें जल गयी ॥ ३२ ॥ और मरकर मण्डूकग्राममें रहनेवाले त्रिपद नामक धीवरकी मण्डूकी नामक स्त्रीसे पूतिगन्धिका नामक पुत्री हुई ॥ ३३ ॥ अपने पापके उदयसे माताने उसे छोड़ दिया अर्थात् उसकी माता मर गयी जिससे दादीने उसका पालन-पोषण किया। एक दिन इसके घरके उपवनमें वही समाधिगुप्त मुनिराज विहार करते हुए आये और वट वृक्षके नीचे विराजमान हो गये। रात्रिके समय शीतकी अधिकता देख पूतिगन्धाने उन मुनिराजको जालसे ढक दिया ॥ ३४ ॥ मुनिराज अवधिज्ञानरूपी नेत्रके धारक थे इसलिए उन्हें उसकी दशा देख दया आ गयी। उन्होंने उसे समझाया और उसके पूर्व भव सुनाये जिससे उसने धर्म धारण कर लिया ॥ ३५ ॥ एक बार वह पूतिगन्धा सोपारक नगर गयी। वहाँ आर्यिकाओंकी उपासना कर वह उन्हींके साथ आचाम्ल नामका तप करती हुई

---

१. लोकेशो म० । २. सा आर्तेन ख०, ङ०, म० । ३. जाताथ म०, घ० । ४. सोपानकम् क० । ५. समुपास्यथा म०, क०, ङ०, ख० ।

तत्र [1]सिद्धशिलां वन्द्यां वन्दित्वा च स्थिता सती । कृत्वा नीलगुहायां सा सती सल्लेखनां मृता ॥३७॥
अच्युतेन्द्रमहादेवी नाम्ना गगनवल्लभा । वल्लभाऽभवदुत्कृ[2]ष्टस्त्रीस्थितिस्तत्र देव्यसौ ॥३८॥
ततोऽवतीर्य भीष्मस्य श्रीमत्यां त्वं सुताऽभवः । नगरे कुण्डिनाभिख्ये रुक्मिणो रुक्मिणः स्वसा ॥३९॥
कृत्वा चात्र भवे भव्ये प्रव्रज्यां विबुधोत्तमः । च्युत्वा तपश्च कृत्वात्र नैर्ग्रन्थ्यं मोक्ष्यसे ध्रुवम् ॥४०॥
भीष्मजा भीष्मसंसारभीकराकर्ण्य सा भवान् । ज्ञात्वासन्नस्वमोक्षाप्तिं[3] प्रणनाम प्रभुं मुदा ॥४१॥
जाम्बवत्या जिनः पृष्टस्तस्याः प्राह पुराभवम् । संसारभयभीतानां सन्निधौ निखिलाङ्गिनाम् ॥४२॥
सुतासीत् पुष्कलावत्यां जम्बूद्वीपस्य देविलात् । नगर्यां वीतशोकायां देवमत्यां यशस्विनी ॥४३॥
गृहपत्यात्मजायासौ [4]गृहपस्य शरीरजा । दत्ता सुमित्रसंज्ञाय मृते तत्र सुदुःखिता ॥४४॥
जैनेन जिनदेवेन जिनधर्मोपदेशिना । शाम्यमाना न सम्यक्त्वं लेभे मोहोदयादसौ ॥४५॥
दानोपवासविधिना लौकिकेन मृता सती । नन्दने व्यन्तरस्यासीत् सा भार्या मेरुनन्दना ॥४६॥
त्रिंशद्वर्षसहस्राणि लक्षाशीतियुतानि तत् । भोगं भुक्त्वा चिरं कालं संसारं संससार सा ॥४७॥
द्वीपेऽत्रैरावतक्षेत्रे पुरे विजयपूर्वके । बन्धुषेणस्य भूपस्य बन्धुमत्याः सुताऽभवत् ॥४८॥
नाम्ना बन्धुयशाः कन्या श्रीमत्या प्रोषधव्रतम् । कन्यया जिनदेवस्य प्रतिपद्य मृताऽभवत् ॥४९॥
धनदस्य प्रिया पत्नी नामतः सा स्वयंप्रभा । च्युत्वातः पुण्डरीकिण्यां जम्बूद्वीपे पृथौ पुरि ॥५०॥

राजगृह नगर चली गयी ॥ ३६ ॥ वहाँ वन्दना करने योग्य जो सिद्धशिला थी उसकी वन्दना कर वह वहीं नीलगुहामें रहने लगी और सल्लेखना धारण कर मृत्युको प्राप्त हुई ॥ ३७ ॥ मरकर वह सोलहवें स्वर्गमें अच्युतेन्द्रकी गगनवल्लभा नामकी अतिशय प्रिय महादेवी हुई । सोलहवें स्वर्गमें स्त्रियोंकी उत्कृष्ट स्थिति पचपन पल्यकी है सो वह उसी उत्कृष्ट स्थितिकी धारक हुई थी ॥ ३८ ॥ वहाँसे चय कर तू कुण्डिनपुरमें राजा भीष्मकी श्रीमती रानीसे रुक्मी-की बहिन रुक्मिणी नामकी पुत्री हुई है ॥ ३९ ॥ इस उत्तम पर्यायमें तू दीक्षा धारणकर उत्तम देव होगी और वहाँसे च्युत हो निर्ग्रन्थ तपश्चरण कर निश्चित ही मोक्ष प्राप्त करेगी ॥ ४० ॥ अपने पूर्व भव सुनकर रुक्मिणी भयंकर संसारसे भयभीत हो गयी और अपने लिए निकट कालमें मोक्ष प्राप्त होगा यह जानकर बड़े हर्षसे उसने भगवान्‌को नमस्कार किया ॥ ४१ ॥

तदनन्तर कृष्णकी तीसरी पट्टरानी जाम्बवतीने श्री नेमिजिनेन्द्रसे अपने पूर्वभव पूछे सो संसारसे भयभीत समस्त प्राणियोंके समक्ष वे उसके पूवभव इस प्रकार कहने लगे ॥४२॥ जम्बूद्वीपकी पुष्कलावती देशमें एक वीतशोका नामकी नगरी थी । उसमें देविल नामका एक गृहस्थ रहता था । उसकी देवमती नामकी स्त्रीसे तू यशस्विनी नामकी पुत्री हुई थी ॥ ४३ ॥ यशस्विनी, गृहपति (गहोई) की लड़की थी और गृहपति (गहोई) के पुत्र सुमित्रके लिए दी गयी थी । परन्तु पतिके मर जानेपर वह बहुत दुःखी हुई ॥ ४४ ॥ जिनधर्मका उप-देश देनेवाले किसी जिनदेव नामक जैनने उसे उपदेश देकर शान्त किया परन्तु मोहके उदयसे वह सम्यग्दर्शनको प्राप्त नहीं कर सकी ॥ ४५ ॥ वह पतिव्रता लौकिक दान तथा उपवास करती रही और उनके प्रभावसे मरकर नन्दन वनमें व्यन्तर देवकी मेरुनन्दना नामकी स्त्री हुई ॥ ४६ ॥ तीस हजार अस्सी वर्ष तक वहाँके भोग भोग कर वह चिर काल तक संसारमें परिभ्रमण करती रही ॥ ४७ ॥ तदनन्तर इसी जम्बूद्वीपके ऐरावत क्षेत्रमें विजयपुर नगरके राजा बन्धुषेणकी बन्धुमती नामक स्त्रीसे बन्धुयशा नामकी कन्या हुई । बन्धुयशाने कन्या अवस्थामें ही श्रीमती नामक आर्यिकासे जिनदेव प्ररूपित प्रोषधव्रत धारण किया था इसलिए वह मरकर कुबेरकी स्वयंप्रभा नामकी स्त्री हुई । आयुके अन्तमें वहाँसे च्युत हो जम्बूद्वीपकी

---

१. सिद्धशिला वन्द्या म० । २.–दुत्कृष्टा म०, क०, ङ० । ३. मोक्षाप्तिः म० । ४. गृहपतेः ङ० ।

वज्रमुष्टेः सुभद्रायां सुमतिस्तनयाऽभवत् । [1]सुन्दर्यार्यिकया पार्श्वे कृत्वा रत्नावलीतपः ॥५१॥
सा त्रयोदशपल्यायुर्ब्रह्मेन्द्राग्र्याङ्गनाऽभवत् । च्युताऽसौ दक्षिणश्रेण्यां विजयार्धस्य भारते ॥५२॥
नगरे जाम्बवाभिख्ये जाम्बवस्य खगेशिनः । जाम्बवत्यां प्रियायां त्वं जाता जाम्बवती सुता ॥५३॥
तपस्तपस्विनी कृत्वा भूत्वा कल्पामरोत्तमः । च्युत्वा नृपात्मजो भूत्वा तपसा सिद्धिमेष्यति ॥५४॥
सेत्युक्ते त्यक्तसंशीतिः शीलालंकृतिशालिनी । प्रणम्य जिनमासीना मन्वाना भवनिर्गमम् ॥५५॥
भवनानि जिनो पृष्टो विनयेन सुसीमया । सभाजनमनोह्लादजननध्वनिनाऽब्रवीत् ॥५६॥
धातकीखण्डपूर्वार्धमेरुपूर्वविदेहजे । [2]विषये मङ्गलावत्यां नगरे रत्नसंचये ॥५७॥
भूपतिर्विश्वसेनोऽभूद्भार्यास्यानुन्धरीरिता । अमात्यः श्रावकोऽस्यैव विश्रुतः सुमतिश्रुतिः ॥५८॥
पद्मसेनेन निहतोऽयोध्याधिपतिना युधि । विश्वसेनोऽस्य जायायै सोऽमात्यो धर्ममब्रवीत् ॥५९॥
मोहादप्राप्तसम्यक्त्वा विजयद्वारवासिनः । मृत्वा ज्वलितवेगाभूद् व्यंतरी विजयस्य सा ॥६०॥
दशवर्षसहस्राणि भुक्त्वा तत्र सुखं ततः । च्युता चिरं परिभ्रम्य भीमं संसारसागरम् ॥६१॥
जम्बूद्वीपविदेहेऽस्तः[3] सीताया दक्षिणे तटे । रम्ये रम्याभिधे क्षेत्रे शालिग्रामे महाधने ॥६२॥

पुण्डरीकिणी नामक विशालपुरीमें वज्रमुष्टिकी सुभद्रा स्त्रीसे सुमति नामकी पुत्री हुई। वहाँ उसने सुन्दरी नामक आर्यिकासे प्रेरित हो उनके समीप रत्नावली नामका तप किया जिसके प्रभावसे मरकर वह तेरह पल्यकी आयुकी धारक ब्रह्मेन्द्रकी प्रधान इन्द्राणी हुई। तदनन्तर वहाँसे भी च्युत होकर भरतक्षेत्र सम्बन्धी विजयार्ध पर्वतकी दक्षिण श्रेणीमें जाम्बव नामक नगरके विद्याधर राजा जाम्बवकी जाम्बवती नामक रानीसे तू जाम्बवती नामकी पुत्री हुई ॥ ४८-५३ ॥ इस भवमें तू तपस्विनी होकर तप करेगी और स्वर्गका उत्तम देव होकर वहाँसे च्युत हो राजपुत्र होगी। तदनन्तर तपके द्वारा मोक्षको प्राप्त होगी ॥ ५४ ॥ इस प्रकार भगवान्के द्वारा अपने पूर्वभव कहे जानेपर जिसका सब संशय दूर हो गया था तथा जो शील रूपी अलंकारसे सुशोभित थी ऐसी जाम्बवती रानी जिनेन्द्र देवको प्रणाम कर 'मैं संसारसे पार हो गयी' ऐसा मानती हुई सुखसे आसीन हुई ॥ ५५ ॥

तदनन्तर सुशीला नामक चौथी पट्टरानीने विनयपूर्वक जिनेन्द्र भगवान्से अपने भवान्तर पूछे सो भगवान् सभासदोंके मनको आनन्द उत्पन्न करनेवाली दिव्यध्वनिसे उसके भवान्तर इस प्रकार वर्णन करने लगे—

धातकीखण्ड द्वीपके पूर्वार्धमें जो मेरु पर्वत है उससे पूर्वकी ओरके विदेह क्षेत्रमें एक मङ्गलावती नामका देश है। उसके रत्नसञ्चय नामक नगरमें किसी समय विश्वसेन राजा रहता था उसकी स्त्रीका नाम अनुन्धरी था। इसी राजाका एक सुमति नामका प्रसिद्ध मन्त्री था जो श्रावक धर्मका प्रतिपालक था ॥ ५६-५८ ॥ कदाचित् अयोध्याके राजा पद्मसेनने राजा विश्वसेनको युद्धमें प्राणरहित कर दिया जिससे उसकी स्त्री अनुन्धरी बहुत दुःखी हुई। सुमति मन्त्रीने उसे धर्मका उपदेश दिया परन्तु मोहके कारण वह सम्यग्दर्शनको प्राप्त नहीं हो सकी और आयुके अन्तमें मरकर विजयद्वारपर निवास करनेवाले विजय नामक व्यन्तर देवकी ज्वलनवेगा नामकी व्यन्तरी हुई ॥ ५९-६० ॥ दश हजार वर्ष तक वहाँके सुख भोगकर वह वहाँसे च्युत हुई और चिरकाल तक भयंकर संसार-सागरमें परिभ्रमण करती रही ॥ ६१ ॥ तदनन्तर जम्बूद्वीपके विदेह क्षेत्रमें सीता नदीके दक्षिण तटपर एक रम्य नामका सुन्दर क्षेत्र है। उसके महाधनसम्पन्न शालिग्राम नामक नगरमें एक यक्षिल नामका गृहपति

---

१. सुन्दर्यार्यिकायाः ख० । २. विजयो म० (?) । ३. विदेहेन्तः म० ।

सुताऽभूद् देवसेनायां यक्षिलस्य गृहेशिनः । यक्षाराधनतो लब्ध्या यक्षदेवी स्वनामतः ॥६३॥
सा यक्षगृहपूजार्थमन्यदा प्रगताऽत्र च । धर्मसेनगुरोरन्ते धर्मं शुश्राव गौरवात् ॥६४॥
आहारदानमस्मै सा पात्रायातिथयेऽन्यदा । दत्त्वा भक्तिमती कन्या पुण्यबन्धं बबन्ध च ॥६५॥
सखीभिः क्रीडितुं याता कदाचिद्विमलाचलम् । तत्र चाकालवर्षेण पीडिता प्राविशद् गुहाम् ॥६६॥
तत्र सिंहेन संत्रस्ता मृत्वा त्यक्तात्मविग्रहा । बभूव हरिवर्षेऽसौ द्विपल्योपमजीविता ॥६७॥
ज्योतिर्लोकमतो गत्वा पल्योपमसमस्थितिः । तच्च्युत्वा पुष्कलावत्यां जम्बूद्वीपस्य भारते ॥६८॥
वीतशोकाभिधानायामशोकस्य महीपतेः । श्रीमत्यामभवत् कन्या श्रीकान्ता नामतः सुता ॥६९॥
जिनदत्तार्यिकोपान्ते विनिष्क्रम्य कुमारिका । रत्नावलिं तपः कृत्वा माहेन्द्राधिपतेः प्रिया ॥७०॥
भूत्वैकादशपल्यायुर्भुक्त्वा स्वर्गसुखं च्युता । सुज्येष्ठायां सुराष्ट्रेषु राष्ट्रवर्धनभूभृतः ॥७१॥
सुसीमा तनयाभूस्त्वं नगरे गिरिपूर्वके । देवो भूत्वा तपःशक्त्या मोक्ष्यसे नृभवे ततः ॥७२॥
निशम्यात्मभवानित्थं सुसीमा सौम्यमानसा । प्रकृष्टासन्ननिष्ठेति निष्ठितार्थं ननाम सा ॥७३॥
पृष्टो लक्ष्मणया नत्वा जिनः प्रोवाच तद्भवान् । जिनाः सर्वहिताः सर्वे यत्प्रश्नोत्तरवादिनः ॥७४॥
द्वीपेऽस्मिन् कच्छकावत्यां सीताया उत्तरे तटे । राजारिष्टपुरे ह्यासीद्वासवो वासवोपमः ॥७५॥
सुमित्राख्या प्रियास्यासौ वन्दितुं साङ्गनो ययौ । गुरुं सागरसेनाख्यं सहस्राम्रवनस्थितम् ॥७६॥

रहता था। उसकी स्त्रीका नाम देवसेना था। ज्वलनवेगाका जीव इन्हीं दोनोंके एक पुत्री हुआ। वह पुत्री चूँकि यक्षकी आराधनासे प्राप्त हुई थी इसलिए उसका यक्षदेवी यही नाम प्रसिद्ध हो गया ॥ ६२-६३ ॥ किसी समय वह यक्षदेवी, यक्षगृहकी पूजाके लिए गयी थी। वहाँ उसने धर्मसेन गुरुके समीप बड़े गौरवसे धर्मका उपदेश सुना ॥ ६४ ॥ किसी दिन उस भक्तिमती कन्याने उक्त मुनिके लिए आहार दान दिया और उसके फलस्वरूप पुण्यबन्ध बाँधा ॥ ६५ ॥ किसी समय वह यक्षदेवी सखियोंके साथ क्रीड़ा करनेके लिए विमल नामक पर्वतपर गयी थी वहाँ अकाल वर्षासे पीड़ित होकर वह एक गुफामें घुस गयी ॥ ६६ ॥ उस गुफामें पहलेसे सिंह बैठा था सो उस सिंहने देखते ही यक्षदेवीको खा लिया। यक्षदेवी अपना शरीर छोड़ हरिवर्ष क्षेत्रमें दो पल्यकी आयुकी धारक आर्या हुई ॥ ६७ ॥ वहाँसे चयकर वह ज्योतिष लोकमें एक पल्यकी आयुवाली देवी हुई। तदनन्तर वहाँसे च्युत हो जम्बूद्वीप सम्बन्धी भरतक्षेत्रके पुष्कलावती देशमें वीतशोका नामक नगरीके राजा अशोककी श्रीमती नामक रानीसे श्रीकान्ता नामकी पुत्री हुई ॥ ६८-६९ ॥ श्रीकान्ताने कुमारी अवस्था में ही जिनदत्ता आर्यिकाके पास दीक्षा लेकर रत्नावली नामका तप किया और उसके फल स्वरूप वह माहेन्द्रस्वर्गके इन्द्रकी ग्यारह पल्यकी आयुवाली प्रिय देवी हुई। स्वर्गके सुख भोगकर वहाँसे च्युत हुई और सुराष्ट्र देशके गिरिनगरमें राष्ट्रवर्धन राजाकी सुज्येष्ठा नामक रानीसे तू सुसीमा नामकी पुत्री हुई है। अब तू तपकी शक्तिसे देव होगी और तदनन्तर मनुष्य पर्याय प्राप्तकर मोक्ष प्राप्त करेगी ॥ ७०-७२ ॥ इस प्रकार अपने भव श्रवण कर तथा अपना संसार अत्यन्त निकट जानकर सुसीमा बहुत प्रसन्न हुई और उसने कृतकृत्य भगवान् नेमिजिनेन्द्रको नमस्कार किया ॥ ७३ ॥

तदनन्तर लक्ष्मणा नामक पाँचवीं पट्टरानीने नमस्कार कर भगवान्से अपने पूर्व भव पूछे सो भगवान् उसके पूर्वभव कहने लगे। चूँकि समस्त तीर्थंकर भगवान् प्रश्नोंका उत्तर, निरूपण करते हैं इसलिए वे सर्वहितकारी कहलाते हैं ॥७४॥ उन्होंने कहा कि इसी जम्बूद्वीपकी सीता नदीके उत्तर तटपर एक कच्छकावती नामका देश है। उसके अरिष्टपुर नगरमें किसी समय इन्द्रकी उपमाको धारण करनेवाला एक वासव नामका राजा रहता था। उसकी सुमित्रा नामकी वल्लभा थी। एक दिन वह अपनी वल्लभाके साथ, सहस्राम्र

धर्मं श्रुत्वा गुरो राजा राज्ये विन्यस्य देहजम् । वसुसेनमदीक्षिष्ट न पत्नी पुत्रमोहतः ॥७७॥
पतिपुत्रवियोगोग्रशोकदुःखहता मृता । [1]पुलिन्दीत्वं गता दृष्ट्वा नन्दिभद्रं सचारणम्[2] ॥७८॥
अवधिज्ञानिनं श्रुत्वा तस्मात्पूर्वभवं हि सा । स्मृतपूर्वभवा [3]मृत्वा त्रिदिनानशनव्रता ॥७९॥
नारदस्याभवद्देवी नामतो मेघमालिनी । च्युत्वा च भरतक्षेत्रे रौप्याद्रेर्दक्षिणे तटे ॥८०॥
सानुन्धर्यां महेन्द्रस्य पुरे चन्दनपूर्वके । सुता कनकमालाभूद्विद्याधरमनोहरा ॥८१॥
हरिवाहनविद्येशं महेन्द्रनगरेश्वरम्[4] । वृत्वा स्वयंवरे कन्या मान्या जाताऽस्य वल्लभा ॥८२॥
अन्यदा चैत्यपूजार्थं सिद्धकूटमियं गता । श्रुत्वा च चारणाज्जातिमार्या मुक्तावलीं तपः ॥८३॥
कृत्वा सनत्कुमारेन्द्रवल्लभाऽभूत् सुराङ्गना । नवपल्योपमायुष्का सौख्यं भुक्त्वा ततश्च्युता ॥८४॥
जाताऽत्र श्लक्ष्णरोम्णस्त्वं कुरुमत्यां सुता भवे । तृतीये मुक्तिरित्युक्ते लक्ष्मणा प्रणता प्रभुम् ॥८५॥
स गान्धार्यां कृते प्रश्ने तद्भवान्भगवान् जगौ । नगर्यां कोशलेष्वासीदयोध्यायां महीपतेः ॥८६॥
महिषी रुद्रदत्तस्य विनयश्रीः श्रुताख्यया । श्रीधराय ददौ दानं पत्या सिद्धार्थके वने ॥८७॥
मृत्वोत्तरकुरुष्वासीद्दानात्पल्यत्रयस्थितिः । पल्याष्टभागतुल्यायुः सातश्चन्द्रमसः प्रिया ॥८८॥

वनमें स्थित सागरसेन नामक मुनिराजकी वन्दना करनेके लिए गया ॥७५-७६॥ राजा वासव, मुनिराजसे धर्मश्रवण कर विरक्त हो गया और वसुसेन नामक पुत्रको राज्यभार सौंपकर दीक्षित हो गया। राजा तो दीक्षित हो गया परन्तु पुत्रके मोहसे रानी सुमित्रा दीक्षा नहीं ले सकी ॥७७॥ कदाचित् पुत्रका भी वियोग हो गया अतः पति और पुत्रके वियोगजन्य तीव्र शोकसे उत्पन्न दुःखसे पीड़ित होकर वह मर गयी और मरकर भीलिनी पर्यायको प्राप्त हुई। एक दिन उस भीलिनीने अवधिज्ञानके धारक नन्दिभद्र नामक चारण ऋद्धिधारी मुनिराजके दर्शन कर उनसे अपने पूर्वभव सुने। पूर्वभवोंको स्मरण कर उसने तीन दिनका अनशन किया और मरकर नारद नामक देवकी मेघमालिनी नामकी स्त्री हुई। वहाँसे च्युत होकर भरत क्षेत्रके दक्षिण तटपर चन्दनपुर नामक नगरमें राजा महेन्द्रकी अनुन्धरी रानीसे विद्याधरोंके मनको हरण करनेवाली कनकमाला नामकी पुत्री हुई ॥७८-८१॥ कनकमाला स्वयंवरमें महेन्द्र नगरके राजा हरिवाहन विद्याधरको वरकर उसकी माननीय वल्लभा हो गयी ॥८२॥ किसी समय कनकमाला जिन-प्रतिमाओंकी पूजा करनेके लिए सिद्ध-कूट गयी थी। वहाँ चारण ऋद्धिके धारक मुनिराजसे अपने पूर्वभव श्रवणकर वह आर्यिका हो गयी और मुक्तावली नामका तप कर सनत्कुमार स्वर्गके इन्द्रकी प्रिय देवी हुई। वहाँ उसकी नौ पल्यकी आयु थी। सुख भोगकर वह वहाँसे च्युत हो यहाँ राजा श्लक्ष्णरोमकी कुरुमती रानीसे लक्ष्मणा नामकी पुत्री हुई है। तीसरे भवमें तेरी मुक्ति होगी। इस प्रकार भवान्तर कहे जानेपर लक्ष्मणा रानीने भगवान् नेमिजिनेन्द्रको नमस्कार किया ॥८३-८५॥

तदनन्तर कृष्णकी छठी पट्टरानी गान्धारीके द्वारा प्रश्न किये जाने पर भगवान् उसके पूर्वभव कहने लगे। उन्होंने कहा कि कोशल देशकी अयोध्या नगरीमें किसी समय रुद्रदत्त नामका राजा रहता था। उसकी विनयश्री नामकी रानी थी। उसने एक समय सिद्धार्थक नामक वनमें अपने पतिके साथ, श्रीधर नामक मुनिराजके लिए आहार दान दिया ॥८६-८७॥ दानके प्रभावसे मरनेके बाद वह उत्तरकुरुमें तीन पल्यकी आयुकी धारक आर्या हुई। उसके बाद पल्यके आठवें भाग बराबर आयुकी धारक चन्द्रमाकी प्रिया

१. शबरीपर्यायं। २. चारणमुनिं। ३. मृत्वा निन्दितानशनव्रता म०। ४. कृत्वा म०।

तत्रैवात्रोत्तरश्रेण्यां पुरे गगनवल्लभे । विद्युद्वेगस्य कन्याऽभूद्विद्युन्मत्यां महाद्युतिः ॥८९॥
विनयश्रीर्गुणैः ख्याता नित्यालोकपुरेशिनः । महेन्द्रविक्रमस्यैषा योषिद्गुणसमन्विता ॥९०॥
चारणश्रमणाभ्यां तु धर्मं श्रुत्वा स मन्दरे । राज्ये नियोज्य निष्क्रान्तो नन्दनं हरिवाहनम् ॥९१॥
विनयश्रीस्तु कृत्वाऽसौ सर्वभद्रमुपोषितम् । पञ्चपल्यस्थितिर्जाता सौधर्मेन्द्रस्य वल्लभा ॥९२॥
पुर्यां त्वं पुष्कलावत्यां गान्धारेषु दिवश्च्युता । गान्धारीन्द्रगिरे राज्ञो मेरुमत्यामभूत्सुता ॥९३॥
तृतीयभवसिद्धिस्त्वमित्युक्ते सानमज्जिनम् । गौर्या विज्ञापितो नत्वा तद्भवानाह विश्ववित्[1] ॥९४॥
इभ्यस्येभ्यपुरेऽत्राभूद्धनदेवस्य कामिनी । यशस्विनी स्थिता हर्म्ये चारणौ वीक्ष्य साम्बरे ॥९५॥
सस्मार स्वभवान् सर्वान् धातकीखण्डमण्डले । पूर्वस्य मन्दरस्यासं विदेहेष्वपरेष्वहम् ॥९६॥
आनन्दश्रेष्ठिनः पत्नी नन्दशोकपुरेऽर्हते । मितसागरनाम्नेऽत्र दानं दत्त्वा सभर्तृका ॥९७॥
पञ्चाश्चर्याण्यहं प्रापं कृतानि त्रिदशैर्मुदा । पीत्वाकाशोदकं भर्त्रा सविषं मृतवत्यमा ॥९८॥
भूत्वा देवकुरुष्वासमैशानेन्द्रप्रिया ततः । जाताऽत्राहमिति ज्ञात्वा सा संवेगपरा यतिम् ॥९९॥
नत्वा सुभद्रनामानं प्रोषधव्रतमग्रहीत् । मृत्वा शक्रस्य देव्यासीत्पञ्चपल्यसमस्थितिः ॥१००॥

हुई ॥८८॥ तदनन्तर इसी विजयार्धकी उत्तर श्रेणीमें गगनवल्लभ नगरके स्वामी राजा विद्युद्वेगकी विद्युन्मती नामक रानीसे महाकान्तिकी धारक विनयश्री नामकी कन्या हुई। यह कन्या गुणोंसे अत्यन्त प्रसिद्ध थी और नित्यालोक नगरके स्वामी राजा महेन्द्रविक्रमकी गुणवती स्त्री हुई। कदाचित् सुमेरु पर्वतपर चारण ऋद्धिके धारक युगल मुनियोंसे धर्म श्रवण कर राजा महेन्द्रविक्रम संसारसे विरक्त हो गया और उसने हरिवाहन नामक पुत्रको राज्य कार्यमें नियुक्त कर दीक्षा धारण कर ली ॥८९-९१॥ विनयश्रीने भी संसारसे विरक्त हो सर्वभद्र नामक उपवास किया और उसके प्रभावसे वह पाँच पल्यकी स्थितिकी धारक सौधर्मेन्द्रकी देवी हुई ॥९२॥ अब तू स्वर्गसे च्युत होकर गान्धार देशकी पुष्कलावती नगरीमें राजा इन्द्रगिरिकी मेरुमती नामक रानीसे गान्धारी नामकी पुत्री हुई है ॥९३॥ तू तीसरे भवमें मोक्ष प्राप्त करेगी। इस प्रकार अपने भवान्तरके कहे जानेपर गान्धारीने जिनेन्द्र भगवान्‌को नमस्कार किया। तदनन्तर कृष्णकी सातवीं पट्टरानी गौरीने नमस्कार कर अपने पूर्वभव पूछे सो समस्त पदार्थोंको जाननेवाले भगवान् इस प्रकार उसके पूर्वभव कहने लगे ॥९४॥

इस भरत क्षेत्रके इभ्यपुर नगरमें किसी समय धनदेव नामका एक सेठ रहता था। उसकी यशस्विनी नामकी स्त्री थी। एक दिन यशस्विनी अपने महलकी छतपर खड़ी थी वहाँ उसने आकाशमें जाते हुए दो चारण ऋद्धिधारी मुनि देखे ॥९५॥ उन्हें देखते उसे अपने समस्त पूर्वभवोंका स्मरण हो गया। उसे मालूम हो गया कि मैं धातकीखण्ड द्वीपके पूर्व मेरुकी पश्चिम दिशामें विद्यमान विदेह क्षेत्रके अन्तर्गत नन्दशोक नामक नगरमें आनन्द नामक सेठकी पत्नी थी। वहाँ मैंने अपने पतिके साथ, मितसागर नामक मुनिराजके लिए आहार दान दिया। जिसके फलस्वरूप मैंने हर्षपूर्वक देवोंके द्वारा किये हुए पञ्चाश्चर्य प्राप्त किये थे। कदाचित् हम दोनोंने आकाशसे पड़ता हुआ वर्षाका पानी पिया। वह पानी विष-सहित था इसलिए पतिके साथ मेरा मरण हो गया ॥९६-९८॥ मरकर मैं देवकुरुमें आर्या हुई। उसके बाद ऐशानेन्द्रकी प्रिया हुई और उसके बाद यहाँ यशस्विनी हुई हूँ। इस प्रकार जानकर संसारसे भयभीत होती हुई यशस्विनीने सुभद्र नामक मुनिराजको नमस्कार कर उनसे प्रोषधव्रत ग्रहण किया। तदनन्तर मरकर पाँच पल्यकी आयुकी धारक प्रथम स्वर्गके

---

१. सर्वज्ञः, नेमिजिनेन्द्रः।

च्युत्वाऽभूदिह कौशाम्ब्यां सुमित्रायां सुभद्रतः । इभ्याद्धर्ममतिर्नाम्ना कन्या धर्ममतिः सदा ॥१०१॥
जिनमत्यार्यिकापार्श्वे तपो जिनगुणाभिधम् । गृहीत्वोपोष्य जातासि महाशुक्रेन्द्रवल्लभा ॥१०२॥
एकविंशतिपल्यायुश्च्युत्वा चन्द्रमतिप्रियाम् । गौरी त्वं वीतशोकायां मेरुचन्द्रादभूत्सुता ॥१०३॥
भवैः सिद्धिस्त्रिभिस्ते स्यादित्युक्ते सा नता विभुम् । प्रणिपत्य ततः पृष्टः पद्मावत्या भवान् जगौ ॥१०४॥
उज्जयिन्यामिहैवासीदपराजितभूभृतः । तनया विनयश्रीः सा विजयावनिताङ्गजा ॥१०५॥
हस्तिशीर्षपुराधीशं हरिषेणमसौ पतिम् । प्राप्ता पतियुता दानं वरदत्ताय संददौ ॥१०६॥
कालागुरुकधूपेन भर्त्रा गर्भगृहे मृता । भूत्वा हैमवते भुक्त्वा सुखं पल्यसमस्थितिः ॥१०७॥
जाता चन्द्रप्रभादेवी ततश्चन्द्रस्य वल्लभा । पल्योपमाष्टभागायुस्ततश्च्युत्वा तु[1] भारते ॥१०८॥
ग्रामेऽभूच्छाल्मलीखण्डे मगधेषु गृहेशिनोः । दुहिता पद्मदेवीति देविलाजयदेवयोः ॥१०९॥
[2]आचार्याद्वरधर्माख्यादेकदा व्रतमग्रहीत् । यावज्जीवं न भक्ष्यं मे फलमज्ञातमप्यसौ ॥११०॥
[3]प्रचण्डः शाल्मलीखण्डे ग्रामेऽवस्कन्ददानतः[4] । अकाण्डे चण्डबाणाख्यो व्याधमुख्योऽहरज्जनम् ॥१११॥
बन्दिगेहे गृहीत्वा तां पद्मदेवीं स्वदारताम् । निनीषुः शीलवत्यासौ प्रत्याख्यातोऽनया नयात् ॥११२॥
स राजगृहनाथेन राज्ञा सिंहरथेन तु । हठेन निहतोऽरण्येऽशरण्ये[5] जनताऽभ्रमत् ॥११३॥

इन्द्रकी इन्द्राणी हुई ॥९९-१००॥ वहाँसे च्युत हो कौशाम्बी नगरीमें सुभद्र सेठकी सुमित्रा नामक स्त्रीसे सदा धर्ममें बुद्धि लगानेवाली धर्ममति नामकी कन्या हुई ॥१०१॥ धर्ममतिने जिनमति आर्यिकाके पास जिनगुण नामका तप लेकर उपवास किये और उनके फलस्वरूप वह महाशुक्र स्वर्गके इन्द्रकी वल्लभा हुई ॥१०२॥ वहाँ उसकी इक्कीस पल्यकी आयु थी। वहाँसे च्युत होकर अब तू वीतशोका नगरीमें राजा मेरुचन्द्रकी चन्द्रमति स्त्रीसे गौरी नामकी पुत्री हुई है ॥१०३॥ तीन भवमें तुझे मुक्तिकी प्राप्ति होगी। इस प्रकार कहे जानेपर गौरीने नम्रीभूत होकर भगवान्को प्रणाम किया। तदनन्तर कृष्णकी आठवीं पट्टरानी पद्मावतीने भी अपने पूर्वभव पूछे जिसके उत्तरमें भगवान् उसके पूर्वभव इस प्रकार कहने लगे ॥१०४॥

इसी भरत क्षेत्रकी उज्जयिनी नगरीमें किसी समय अपराजित नामका राजा रहता था। उसकी स्त्री विजया थी और उन दोनोंके विनयश्री नामकी पुत्री थी ॥१०५॥ विनयश्री हस्तिनापुरके राजा हरिषेण पतिको प्राप्त हुई थी अर्थात् उसका विवाह हस्तिनापुरके राजा हरिषेणके साथ हुआ था। एक दिन उसने पतिके साथ, वरदत्त मुनिराजके लिए आहार दान दिया ॥१०६॥ कदाचित् वह अपने पतिके साथ गर्भगृहमें शयन कर रही थी कि कालागुरुकी धूपसे उसका प्राणान्त हो गया। मरकर वह हैमवत क्षेत्रमें एक पल्यकी आयुवाली आर्या हुई। वहाँके सुख भोग कर वह चन्द्रदेवकी चन्द्रप्रभा नामकी देवी हुई। वहाँ पल्यके आठवें भाग उसकी आयु थी। वहाँसे च्युत हो भरतक्षेत्रके मगध देशसम्बन्धी शाल्मली खण्ड नामक ग्राममें देविला और जयदेव नामक दम्पतीके पद्मदेवी नामकी पुत्री हुई ॥१०७-१०९॥ एक समय उसने वरधर्म नामक आचार्यसे यह व्रत लिया कि मैं जीवन पर्यन्त अज्ञात फलका भक्षण नहीं करूँगी ॥ ११० ॥ किसी एक दिन असमयमें चण्डबाण नामक शक्तिशाली भील शाल्मली खण्ड ग्रामपर आक्रमण कर वहाँकी समस्त प्रजाको हर ले गया ॥ १११ ॥ साथ ही पद्मदेवीको भी पकड़कर अपने कारागारमें ले गया। वह उसे अपनी स्त्री बनाना चाहता था परन्तु शीलवती पद्मदेवीने किसी नीतिसे उसका निराकरण कर दिया ॥ ११२ ॥ उसी समय राजगृहके राजा सिंहरथने हठपूर्वक उस भीलको मार डाला जिससे

---

१. नु म० । २. आचार्याद्भूतधर्माख्यात् क०, ख०, ग०, ङ०, आचार्याद्वरधर्माख्यात् म० । ३. प्रचण्डशाल्मली म०, क०, ख०, ङ० । ४. ऽवस्कन्दनामतः म०, क०, ङ० । ५. स्तरण्ये क० ।

क्षुत्पीडिता वनान्तेऽत्र दिङ्मूढा मूढबुद्धयः । मृगा इव मृता दुःखात् किंपाकफलभक्षिणः ॥११४॥
अनास्वाद्य फलान्येषा [1]पद्मदेवी दृढव्रता । प्रत्याख्यायैकपल्यायुरन्ते हैमवतेऽभवत् ॥११५॥
देवी स्वयंप्रभस्यासौ व्यन्तरस्य स्वयंप्रभा । स्वयम्भूरमणद्वीपे स्वयंप्रभगिरावभूत् ॥११६॥
ततश्चागत्य भरते जयन्तनगरेशिनः । श्रीमत्यां विमलश्रीः सा श्रीधरस्य सुताभवत् ॥११७॥
प्रादायि मेघनादाय सा भद्रिलपुरेशिने । लेभे च तनयं ख्यातं मेघघोषाख्ययाऽवनौ ॥११८॥
भर्तरि स्वर्गते साऽपि पद्मावत्यार्यिकान्तिके । आचाम्लवर्धमानाख्यं तपः कृत्वा दिवं ययौ ॥११९॥
सा सहस्रारकल्पस्य पत्युर्मुख्याग्रकामिनी । नवपञ्चकपल्यैस्तु तुल्यं कालमजीगमत् ॥१२०॥
जातास्यत्र ततश्च्युत्वा त्वमरिष्टपुरेशिनः । श्रीमत्यां स्वर्णनाभस्य सुता पद्मावती श्रुता ॥१२१॥
तपसा नाकमारुह्य देवश्च्युत्वा तपोबलात् । सेत्स्यति त्वमिति प्रोक्ते श्रुत्वा सा जिनमानमत् ।१२२।
रोहिणीदेवकीपूर्वा देव्योऽन्येऽपि च यादवाः । पृष्ट्वा श्रुत्वा स्वजन्मानि जाता संसारभीरवः ॥१२३॥
[2]नुत्वा नत्वा जिनेन्द्रं तं सुराऽसुराश्च यादवाः । यान्ति स्वस्थानमायान्ति पूजनार्थं पुनः पुनः ।१२४।
विजहार पुनर्देशान् जिनो भव्यहिताय सः । सूर्यस्येव हि चर्यासीज्जगत्कार्याय [3]वैभवी ॥१२५॥
इतश्च वसुदेवाभं वासुदेवमनःप्रियम् । सुतं गजकुमाराख्यं देवकी सुषुवे शुभम् ॥१२६॥

उसके बन्धनमें स्थित शाल्मलीखण्ड ग्रामकी समस्त जनता छूटकर शरणरहित वनमें इधर-उधर भ्रमण करने लगी ॥ ११३ ॥ मूढबुद्धि लोग दिशाभ्रान्ति होनेसे उस वनमें मृगोंकी भाँति भटक गये और भूखसे पीड़ित हो किंपाक फल खाकर दुःखसे मर गये ॥ ११४ ॥ पद्मदेवी अपने व्रतमें दृढ़ थी इसलिए उसने अज्ञात फल होनेसे उन फलोंको नहीं खाया और संन्यास मरण कर वह अन्तमें हैमवत क्षेत्रमें एक पल्यकी आयुवाली आर्या हुई ॥ ११५ ॥ तदनन्तर स्वयंभूरमण द्वीपके स्वयंप्रभ नामक पर्वतपर स्वयंप्रभ नामक व्यन्तर देवकी स्वयंप्रभा नामकी देवी हुई ॥ ११६ ॥ वहाँसे आकर भरत क्षेत्रसम्बन्धी जयन्त नगरके स्वामी राजा श्रीधरकी श्रीमती नामक रानीसे विमलश्री नामकी पुत्री हुई ॥ ११७ ॥ विमलश्री, भद्रिलपुरके राजा मेघनादके लिए दी गयी। उसके संयोगसे उसने पृथिवीपर मेघघोष नामसे प्रसिद्ध पुत्र प्राप्त किया ॥ ११८ ॥ कदाचित् पतिका स्वर्गवास हो जानेपर उसने पद्मावती आर्यिकाके समीप दीक्षा लेकर आचाम्लवर्धननामका तप तपा और उसके प्रभावसे वह स्वर्ग गयी ॥ ११९ ॥ स्वर्गमें वह सहस्रार स्वर्गके इन्द्रकी प्रधान देवी हुई और पैंतालीस पल्य प्रमाण वहाँका काल व्यतीत करती रही ॥ १२० ॥ अब वहाँसे च्युत होकर तू अरिष्टपुरके राजा स्वर्णनाभकी श्रीमती रानीसे पद्मावती नामकी पुत्री हुई है ॥ १२१ ॥ तपकर तू स्वर्गमें देव होगी और वहाँसे च्युत हो तपके सामर्थ्यसे मोक्ष प्राप्त करेगी। इस प्रकार कहे जानेपर अपने भवान्तर सुन पद्मावतीने नेमि जिनेन्द्रको नमस्कार किया ॥ १२२ ॥

रोहिणी, देवकी आदि देवियों और अन्य यादवोंने भी अपने-अपने भव पूछे तथा श्रवण कर वे संसारसे भयभीत हुए ॥ १२३ ॥ इस प्रकार सुर, असुर तथा यादव लोग जिनेन्द्र भगवान्की स्तुति कर तथा उन्हें नमस्कार कर अपने-अपने स्थानपर चले जाते थे और पूजाके लिए बार-बार आ जाते थे ॥ १२४ ॥ तदनन्तर नेमि जिनेन्द्रने भव्य जीवोंके हितके लिए पुनः अनेक देशोंमें विहार किया सो ठीक ही है क्योंकि उनकी चर्या सूर्यके समान जगत्के हितके लिए ही थी ॥ १२५ ॥

इधर देवकीने कृष्णके पश्चात् गजकुमार नामका एक दूसरा पुत्र उत्पन्न किया जो वसुदेवके समान कान्तिका धारक था, श्रीकृष्णको अत्यन्त प्रिय था एवं अत्यन्त शुभ था ॥१२६॥

---

१. पद्मादेवी म० । २. बुद्ध्वा म० । ३. बिभोरियं वैभवी ।

यौवनं स परिप्राप्तः कन्याजनमनोहरम् । ततोऽस्मै वरयाञ्चक्रे चक्री राजकुमारिकाः ॥१२७॥
अभिरूपतरां कन्यां सोमशर्मद्विजन्मनः । प्रजातां क्षत्रियायां च सोमाख्यां वृतवान् हरिः ॥१२८॥
विवाहारम्भसमये मुदिताखिलयादवे । आते जिनपतिः प्राप्तो विहरन् द्वारिकां तदा ॥१२९॥
समागत्योपविष्टं तमग्रौ रैवतिके विभुम् । वन्दितुं [1]निर्ययुः सर्वे यादवा बहुमङ्गलाः ॥१३०॥
दृष्ट्वा गजकुमारस्तमाटोपं द्वारिकोद्भवम् । [2]पृष्ट्वा कञ्चुकिनं चैवं विवेद हितमादितः ॥१३१॥
ततो गजकुमारोऽपि प्रयातो वन्दितुं जिनम् । रथेनादित्यवर्णेन हर्षाद्रोमाञ्चमुद्वहन् ॥१३२॥
आर्हन्त्यविभवोपेतं गणैर्द्वादशभिर्वृतम् । जिनं नत्वोपविष्टोऽसौ कुमारश्चक्रपाणिना ॥१३३॥
अगाद् भगवांस्तत्र नृसुराऽसुरसंसदि । संसारतरणोपायं धर्मं रत्नत्रयोज्ज्वलम् ॥१३४॥
प्रस्तावे हरिरप्राक्षीज्जिनेन्द्रं प्रणिपत्य सः । अत्यन्तादरपूर्णेच्छः श्रोतृलोकहितेच्छया ॥१३५॥
[3]अर्हतां चक्रिणामर्धचक्रिणां सीराधरिणाम्[4][5] । [6]उत्पत्तिं [7]प्रतिशत्रूणां जिनानामन्तराणि[8] च ॥१३६॥
यथाप्रश्नमितस्तस्मै संभूतिं विष्णवे ततः । त्रिषष्टियुगमुख्यानां प्रोवाच पुरुषेशिनाम् ॥१३७॥
आद्यो वृषभनाथोऽभूदजितः संभवः प्रभुः । अभिनन्दननाथश्च सुमतिः पद्मसंप्रभः ॥१३८॥
सुपार्श्वनामधेयोऽन्यश्चन्द्रप्रभ इतीश्वरः । सुविधिः शीतलः श्रेयान् वासुपूज्यश्च पूजितः ॥१३९॥

जब गजकुमार कन्याओंके मनको हरण करनेवाले यौवनको प्राप्त हुआ तब कृष्णने उत्तमोत्तम राजकुमारियोंके साथ उसका विवाह कराया ॥ १२७ ॥ सोमशर्मा ब्राह्मणकी एक सोमा नामकी अत्यन्त सुन्दर कन्या थी जो उसकी क्षत्रिया स्त्रीसे उत्पन्न हुई थी। श्रीकृष्णने गजकुमारके लिए उसका भी वरण किया ॥ १२८ ॥ जब उसके विवाहके प्रारम्भका समय आया तब समस्त यादव अत्यन्त प्रसन्न हुए और उसी समय विहार करते हुए भगवान् नेमिनाथ द्वारिकापुरी आये ॥ १२९ ॥ जब भगवान् आकर गिरनार पर्वतपर विराजमान हो गये तब समस्त यादव अनेक मङ्गल द्रव्य लिये हुए उनकी वन्दना करनेके लिए नगरसे बाहर निकले ॥ १३० ॥ द्वारिकामें होनेवाले इस आटोप (हलचल) को देखकर गजकुमारने किसी कञ्चुकीसे पूछा और प्रारम्भसे ही जिनेन्द्र भगवान्‌की समस्त हितकारी चेष्टाको जान लिया ॥ १३१ ॥ तदनन्तर गजकुमार भी हर्षसे रोमाञ्च धारण करता हुआ सूर्यके समान वर्णवाले रथपर सवार हो जिनेन्द्र भगवान्‌की वन्दना करनेके लिए गया ॥ १३२ ॥ वहाँ आर्हन्त्य लक्ष्मीसे युक्त तथा बारह सभाओंसे घिरे हुए जिनेन्द्र भगवान्‌को नमस्कार कर गज-कुमार श्रीकृष्णके साथ मनुष्योंकी सभामें बैठ गया ॥ १३३ ॥ भगवान् नेमि जिनेन्द्रने, मनुष्य, सुर तथा असुरोंकी उस सभामें उस धर्मका निरूपण किया जो संसार-सागरसे पार होनेका एकमात्र उपाय था एवं जो सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूपी रत्नत्रयसे उज्ज्वल था ॥ १३४ ॥ अवसर आनेपर अत्यन्त आदरसे पूर्ण इच्छाके धारक श्रीकृष्णने जिनेन्द्र भगवान्‌को नमस्कार कर श्रोताओंके हितकी इच्छासे तीर्थंकरों, चक्रवर्तियों, अर्ध चक्रवर्तियों, बलभद्रों और प्रतिनारायणोंकी उत्पत्ति तथा तीर्थंकरोंके अन्तरालको पूछा ॥ १३५–१३६ ॥

तदनन्तर भगवान् प्रश्नके अनुसार श्रीकृष्णके लिए श्रेष्ठ शलाकापुरुषोंमें प्रमुख चौबीस तीर्थंकरोंकी उत्पत्ति इस प्रकार कहने लगे ॥ १३७ ॥ उन्होंने कहा कि इस युगमें सबसे पहले तीर्थंकर वृषभ नाथ हुए। उनके पश्चात् क्रमसे अजितनाथ, संभवनाथ, अभि-नन्दननाथ, सुमतिनाथ, पद्मप्रभ, सुपार्श्वनाथ, चन्द्रप्रभ, सुविधिनाथ, शीतलनाथ, श्रेयोनाथ,

---

१. निर्ययौ म० । २. दृष्ट्वा म० । ३. तीर्थकृताम् । ४. नारायणानाम् । ५. बलभद्राणाम् । ६. उत्पत्तिः म० । ७. प्रतिनारायणानाम् । ८. च विशेषतः म०, घ० ।

विमलोऽनन्तजिद्धर्मः शान्तिः कुन्थुररो जिनः । मल्लिः शल्यकुशोद्धारो मुनीन्द्रो मुनिसुव्रतः ॥१४०॥
नमिश्च निर्वृतो नेमिर्वर्तमानोऽहमत्र तु । पार्श्वश्चापि महावीरो भवितारौ जिनेश्वरौ ॥१४१॥
जम्बूद्वीपविदेहेऽष्टौ भरते पञ्च ते जिनाः । सप्तैव धातकीखण्डे चत्वारः पुष्करार्धजाः ॥१४२॥
प्राग्भवे पुण्डरीकिण्यां वृषभः शान्तिरीश्वरः । अजितस्तु सुसीमायां क्षेमपुर्यामरो जिनः ॥१४३॥
रत्नसञ्चयजः कुन्थुः संभवश्चाभिनन्दनः । मल्लिश्च वीतशोकायां जम्बूद्वीपविदेहजाः ॥१४४॥
चम्पायामिह कौशाम्ब्यां गजाह्वनगरेऽपि ते-ऽयोध्यायां भरतक्षेत्रे छत्राकारपुरे क्रमात् ॥१४५॥
मुनिसुव्रतनाथश्च नमिर्नेमिजिनस्तथा । पार्श्वाख्यश्च महावीरः पञ्चामी पूर्वजन्मनि ॥१४६॥
पुण्डरीकिण्यखण्डश्रीः सुसीमाक्षेमपुर्यपि । धातकीखण्डपूर्वार्धे सक्रमं रत्नसञ्चयम् ॥१४७॥
सुमत्यादिचतुर्णां च पुरः पूर्वत्र जन्मनि । सुविध्यादिचतुर्णां च पूर्वपुष्करजास्त्रयम् ॥१४८॥
तथैव धातकीखण्डे पश्चादैरावतक्षितौ । अनन्तजिद्भूत्पूर्वमरिष्टपुरसंभवः ॥१४९॥
पूर्वार्धभारते तस्य विमलस्तु महापुरे । भद्रिलाख्ये पुरे धर्मस्तत्र नामान्यमूनि तु ॥१५०॥
वज्रनाभिरभूदाद्यो विमलस्तदनन्तरः । विपुलो वाहनान्तोऽन्यो महाबल इतीरितः ॥१५१॥
परोऽतिबल इत्यासीदपराजित इत्यतः । नन्दिषेणस्तथा पद्मो महापद्मः स्मृतः परः ॥१५२॥
पद्मगुल्मोऽपि नलिनगुल्मः पद्मोत्तरः परः । पद्मासनः पुनः पद्मस्तथा दशरथो नृपः ॥१५३॥
राजा मेघरथः सिंहरथो धनपतिः परः । नाम्ना वैश्रवणो राजा श्रीधर्माख्यस्ततः [1]परः ॥१५४॥

वासुपूज्य, विमलनाथ, अनन्तजित्, धर्मनाथ, शान्तिनाथ, कुन्थुनाथ, अरनाथ, शल्यरूपी कुशको निकालनेवाले मल्लिनाथ, मुनियोंके स्वामी मुनि सुव्रतनाथ और नमिनाथ तीर्थंकर हुए हैं। ये सभी निर्वाणको प्राप्त हो चुके हैं। बाईसवाँ तीर्थंकर मैं नेमिनाथ अभी वर्तमान हूँ और पार्श्वनाथ तथा महावीर ये दो तीर्थंकर आगे होंगे ॥ १३८–१४१ ॥ इन तीर्थंकरोंमें-से आठ तीर्थंकर पूर्वभवमें जम्बूद्वीपके विदेहक्षेत्रमें पाँच भरतक्षेत्रमें, सात धातकीखण्डमें और चार पुष्करार्धमें उत्पन्न हुए थे ॥ १४२ ॥ जम्बूद्वीपके विदेह क्षेत्रमें उत्पन्न हुए आठ तीर्थङ्करोंका विवरण इस प्रकार है—वृषभनाथ और शान्तिनाथ पूर्वभवमें जम्बूद्वीपसम्बन्धी विदेहक्षेत्रकी पुण्डरीकिणी नगरीमें, अजितनाथ सुसीमा नगरीमें, अरनाथ क्षेमपुरीमें, कुन्थुनाथ, संभवनाथ और अभिनन्दननाथ रत्नसंचय नगरमें और मल्लिनाथ वीतशोका नगरीमें उत्पन्न हुए थे ॥ १४३–१४४ ॥ भरतक्षेत्रमें उत्पन्न हुए पाँच तीर्थंकर इस प्रकार हैं—मुनि सुव्रतनाथ चम्पापुरीमें, नमिनाथ कौशाम्बी नगरीमें, नेमिनाथ हस्तिनापुरमें, पार्श्वनाथ अयोध्यामें और महावीर छत्राकारपुरमें पूर्वभवमें उत्पन्न हुए थे ॥ १४५–१४६ ॥ धातकीखण्ड द्वीपके पूर्वार्धमें जन्म लेनेवाले सुमतिनाथ, पद्मप्रभ, सुपार्श्वनाथ और चन्द्रप्रभ, इन चार तीर्थंकरोंकी पूर्वभवकी नगरियाँ क्रमसे अखण्ड लक्ष्मीकी धारक पुण्डरीकिणीपुरी, सुसीमापुरी, क्षेमपुरी और रत्नसंचयपुरी थीं। सुविधिनाथ, शीतलनाथ, श्रेयोनाथ और वासुपूज्य इन चार तीर्थङ्करोंकी पूर्व जन्मकी नगरियाँ क्रमसे पूर्व पुष्करार्धसम्बन्धी पुण्डरीकिणी, सुसीमा, क्षेमपुरी और रत्नसंचयपुरी थीं ॥ १४७–१४८ ॥ अनन्तजित् (अनन्तनाथ) भगवान् पूर्वभवमें धातकीखण्ड द्वीपके पश्चिम ऐरावत क्षेत्रसम्बन्धी अरिष्टपुर नगरमें उत्पन्न हुए थे ॥ १४९ ॥ विमलनाथ पूर्वार्धसम्बन्धी भरतक्षेत्रके महापुर नगरमें और धर्मनाथ भद्रिलपुर नगरमें उत्पन्न हुए थे। इन तीर्थंकरोंके पूर्वभवके नाम इस प्रकार हैं—१. वज्रनाभि, २. विमल, ३. विपुलवाहन, ४. महाबल, ५. अतिबल, ६. अपराजित, ७. नन्दिषेण, ८. पद्म, ९. महापद्म, १०. पद्मगुल्म, ११. नलिनगुल्म,

---

१. पद्मः म० ।

सिद्धार्थः सुप्रतिष्ठोऽहमानन्दो नन्दनो नृपः । पूर्वजन्मनि नामानि जिनानामानुपूर्वतः ॥१५५॥
चक्री पूर्वधरः पूर्वो महामाण्डलिकाः परे । एकादशाङ्गिनः स्वाङ्गैः[1] सर्वेऽपि कनकप्रभाः ॥१५६॥
सिंहनिष्क्रीडितं कृत्वा प्रायोपगमनं गताः । मासक्षपणतः सर्वे यथास्वं स्वर्गलोकगाः ॥१५७॥
वज्रसेन इति ख्यातस्तथारिन्दमसंज्ञकः । स्वयंप्रभाभिधश्चान्यः परो विमलवाहनः ॥१५८॥
सूरिः सीमन्धराभिख्यो गुरुश्च पिहितास्रवः । अरिन्दममुनिर्मान्यो वन्दनीयो युगन्धरः ॥१५९॥
सार्वः सर्वजनानन्दोऽप्युभयानन्दनामकः । वज्रदत्तोऽपरो वेद्यो वज्रनाभिरभिष्टुतः ॥१६०॥
सर्वगुप्तस्त्रिगुप्ताख्यश्चित्तरक्षाभिधः परः । विमलाचारसंपन्नो मान्यो विमलवाहनः ॥१६१॥
गुरुर्घनरथाभिख्यः संवरः संवरान्वितः । वरधर्मस्त्रिलोकीड्यः सुनन्दो नन्दसंज्ञकः ॥१६२॥
व्यतीतशोकनामाख्यो दामरः प्रौष्ठिलः परः । जिनानां गुरवोऽमी च क्रमेणातीतजन्मनि ॥१६३
वृषो धर्मश्च शान्तिश्च कुन्थुः सर्वार्थसिद्धितः । चत्वारः प्रच्युता ज्ञेया विजयादभिनन्दनः ॥१६४॥
चन्द्रप्रभसुमत्याख्यौ वैजयन्ताज्जयन्ततः । नेम्यरौ नमिमल्लीशावपराजिततश्च्युतौ ॥१६५॥
आरणात्पुष्पदन्तेशः शीतलेशोऽच्युताच्च्युतः । पुष्पोत्तरविमानेशः श्रेयोऽनन्तौ च सन्मतिः ॥१६६॥
सहस्रारात्तु विमलश्रीपार्श्वमुनिसुव्रताः । क्रमात्संभवसुपार्श्वपद्मप्रभजिनाः पुनः ॥१६७॥
अधो मध्योपरिप्रख्यग्रैवेयकपरिच्युताः । वासुपूज्यो महाशुक्रादिति तीर्थकृतां दिवः ॥१६८॥
वृषभश्चैत्रकृष्णस्य नवम्यामुदपद्यत । माघशुक्लनवम्यां तु तथैवाऽजिततीर्थकृत् ॥१६९॥

---

१. दिव्यवाद म० । २. पवित्रितमस्य म० ।

वाक्यं त्रिकालविषयार्थनिरूपणार्थमाकर्ण्य कर्णसुखमित्थमिनस्य भूपाः ।
कृष्णादयो हरिरविप्रमुखाश्च देवा नत्वा जिनं स्वपदमीयुरुपात्ततत्त्वाः ॥५७४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ त्रिषष्टिपुरुषजिनान्तरवर्णनो नाम षष्टितमः सर्गः ॥६०॥

इस प्रकार भगवान् नेमिनाथकी कर्णोंको सुख उपजानेवाली एवं त्रिकालविषयक पदार्थोंका वर्णन करनेवाली दिव्यध्वनि सुनकर कृष्ण आदि राजा तथा इन्द्र और सूर्य आदि देव, धर्मके यथार्थ तत्त्वको ग्रहण कर एवं नेमि जिनेन्द्रको नमस्कार कर अपने-अपने स्थानपर चले गये ॥५७४॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्यरचित हरिवंशपुराणमें त्रेशठ शलाकापुरुषोंका चरित्र तथा तीर्थंकरोंके अन्तरालका वर्णन करनेवाला साठवाँ सर्ग समाप्त हुआ ॥ ६० ॥

एकषष्टितमः सर्गः

आकूतं श्रेणिकस्याथ ज्ञात्वा गणभृदग्रणीः । वृत्तं गजकुमारस्य जगादेति जगत्स्तुतम् ॥१॥
श्रुत्वा गजकुमारोऽसौ जिनादिचरितं तथा । विमोच्य सकलान् बन्धून् पितृपुत्रपुरस्सरान् ॥२॥
संसारभीरुरासाद्य जिनेन्द्रं [1]प्रश्रयान्वितम् । गृहीत्वाऽनुमतो दीक्षां तपः कर्तुं समुद्यतः ॥३॥
निरूपितास्तु याः कन्याः कुमाराय गजाय ताः । प्रभावत्यादयः सर्वा निर्वेदिन्यः प्रवव्रजुः ॥४॥
कुमारश्रमणस्याथ गजस्यैकान्तवर्तिनः । निशीथे प्रतिमास्थस्य सर्वद्वन्द्वसहस्य सः ॥५॥
सोमशर्मा सुतात्यागक्रोधाग्निकणदीपितः[2] । अदीदिपदुदाराग्निं शिरसि स्थिरचेतसः ॥६॥
दह्यमानशरीरोऽसौ शुक्लध्यानेन कर्मणाम् । अन्तं कृत्वा ययौ मोक्षमन्तकृत्केवली मुनिः ॥७॥
तस्य [3]देहमहं चक्रुः समुपेत्य सुराऽसुराः । यक्षकिन्नरगन्धर्वमहोरगपुरोगमाः ॥८॥
ज्ञात्वा तन्मरणं [4]दुःखाद् यादवा बहवस्तथा । दशार्हाश्च विहायान्त्यं दीक्षिता मोक्षकांक्षिणः ॥९॥
देव्यः शिवादयो बह्व्यो देवकीं रोहिणीं विना । वसुदेवस्त्रियो विष्णोः कन्याश्चापि प्रवव्रजुः ॥१०॥
ततः [5]सुरनराभ्यर्च्यो नानाजनपदान् जिनः । विजहार महाभूत्या भव्यराजीं प्रबोधयन् ॥११॥
उदीच्यान्नृपशार्दूलान् मध्यदेशनिवासिनः । प्राच्यानपि प्रजायुक्तान् स धर्मे स्थापयन् बहून् ॥१२॥

अथानन्तर श्रेणिकका अभिप्राय जानकर गणधरोंके अधिपति श्री गौतम स्वामीने जगत्के द्वारा स्तुत गजकुमारका वृत्तान्त इस प्रकार कहना शुरू किया ॥ १ ॥ वे कहने लगे कि इस प्रकार गजकुमार, तीर्थंकर आदिका चरित्र सुनकर संसारसे भयभीत हो गया और पिता, पुत्र, आदि समस्त बन्धुजनोंको छोड़कर बड़ी विनयसे जिनेन्द्र भगवान्‌के समीप पहुँचा और उनसे अनुमति ले दीक्षा ग्रहण कर तप करनेके लिए उद्यत हो गया ॥ २-३ ॥ गजकुमारके लिए जो प्रभावती आदि कन्याएँ निश्चित की गयी थीं उन सभीने संसारसे विरक्त हो दीक्षा धारण कर ली ॥ ४ ॥

तदनन्तर किसी दिन गजकुमार मुनि रात्रिके समय एकान्तमें प्रतिमायोगसे विराजमान हो सब प्रकारकी बाधाएँ सहन कर रहे थे कि सोमशर्मा अपनी पुत्रीके त्यागसे उत्पन्न क्रोधरूपी अग्निके कणोंसे प्रदीप्त हो उनके पास आया और स्थिर चित्तके धारक उन मुनिराजके शिरपर तीव्र अग्नि प्रज्वलित करने लगा ॥ ५-६ ॥ उस अग्निसे उनका शरीर जलने लगा। उसी अवस्थामें वे शुक्लध्यानके द्वारा कर्मोंका क्षय कर अन्तकृत्केवली हो मोक्ष चले गये ॥ ७ ॥ यक्ष, किन्नर, गन्धर्व और महोरग आदि सुर और असुरोंने आकर उनके शरीरकी पूजा की ॥ ८ ॥ गजकुमार मुनिका मरण जानकर दुःखी होते हुए बहुत-से यादव तथा वसुदेवको छोड़कर शेष समुद्रविजय आदि दशार्ह मोक्षकी इच्छासे दीक्षित हो गये ॥ ९ ॥ शिवा आदि देवियों, देवकी और रोहिणीको छोड़कर वसुदेवकी अन्य स्त्रियों तथा कृष्णकी पुत्रियोंने भी दीक्षा धारण कर ली ॥ १० ॥

तदनन्तर देव और मनुष्योंसे पूजित भगवान् नेमिजिनेन्द्रने, भव्य जीवोंके समूहको प्रबोधित करते हुए, नाना देशोंमें बड़े वैभवके साथ विहार किया ॥ ११ ॥ उन्होंने उत्तर दिशाके, मध्यदेशके तथा पूर्व दिशाके प्रजासे युक्त अनेक बड़े-बड़े राजाओंको धर्ममें स्थिर

---

१. प्रश्रयान्वितं यथा स्यात्तथा। २. दीपितः म०। ३. शरीरपूजाम्। ४. दुःखा म०। ५. सुरवराभ्यर्च्यो म०।

विहृत्य चिरमीशानः पुनरागत्य पूर्ववत् । गिरौ रैवतके तस्थौ समवस्थानमण्डनः ॥१३॥
तत्र स्थितं जिनेन्द्रं तं देवेन्द्राः सान्द्रतेजसः । प्राप्य नत्वा नतिं कृत्वा निजस्थानेषु सुस्थिताः ॥१४॥
वसुदेवो बलः कृष्णः सान्तःपुरसुहृज्जनः । द्वारिकाप्रजया युक्तः[1] प्रद्युम्नादिसुतान्वितः ॥१५॥
विभूत्या परयागत्य शैवेयं[2] मभिवन्द्यते । आसीनाः समवस्थाने[3] धर्मं [4]शुश्रुवुरीश्वरात् ॥१६॥
तत्र धर्मकथान्तेऽसौ जिनं नत्वा हलायुधः । पप्रच्छ वस्तुचित्तस्थं करकुड्मलिताञ्जलिः ॥१७॥
नाथ वैश्रवणेनेयं निर्मिता द्वारिकापुरी । कियतानेहसान्तोऽस्याः कृतका हि विनश्वराः ॥१८॥
निमज्जेत् स्वत एवेयं किमु कालान्तरेऽम्बुधौ । निमित्तान्तरसांनिध्ये केनचिद्वा[5] विनाङ्क्ष्यते ॥१९॥
स्वान्तकाले निमित्तत्वं को वा कृष्णस्य यास्यति । जातानां हि समस्तानां जीवानां नियता मृतिः ॥२०॥
संयमप्रतिपत्तिर्वा[6] कालेन कियता प्रभो । कृष्णस्नेहमहापाशबद्धचित्तस्य मे भवेत्[7] ॥२१॥
इति पृष्टो जिनोऽगादीद्दृष्टाशेषपरापरः । याथातथ्यं यथाप्रश्नं यत्प्रश्नोत्तरवागसौ ॥२२॥
पुरीयं द्वादशे वर्षे राममद्येन हेतुना । द्वैपायन[8]कुमारेण मुनिना धक्ष्यते रुषा ॥२३॥
[9]कौशाम्बवनसुप्तस्य कृष्णस्य परमायुषः । प्रान्ते जरत्कुमारोऽपि संहारे हेतुतां व्रजेत् ॥२४॥
[10]अभ्यन्तरस्य सांनिध्ये हेतोः परिणतेर्वशात् । बाह्यो हेतुर्निमित्तं हि जगतोऽभ्युदये क्षये ॥२५॥

करते हुए विहार किया था ॥ १२ ॥ चिरकाल तक विहार कर भगवान् पुनः आये और रैवतक (गिरनार) पर्वतपर समवसरणको सुशोभित करते हुए विराजमान हो गये ॥ १३ ॥ प्रबल तेजको धारण करनेवाले इन्द्र वहाँ विराजमान जिनेन्द्र भगवान्के पास आये और नमस्कार तथा स्तुति कर अपने-अपने स्थानोंपर बैठ गये ॥ १४ ॥

अन्तःपुरकी रानियों, मित्रजन, द्वारिकाकी प्रजा तथा प्रद्युम्न आदि पुत्रोंसे सहित वसुदेव, बलदेव तथा कृष्ण भी बड़ी विभूतिके साथ आये और भगवान् नेमिनाथको नमस्कार कर समवसरणमें यथास्थान बैठ भगवान्से धर्म श्रवण करने लगे ॥१५-१६॥ तदनन्तर धर्मकथाके बाद जिनेन्द्र भगवान्को नमस्कार कर बलदेवने हाथ जोड़ ललाटसे लगा, अपने हृदयमें स्थित बात पूछी ॥ १७ ॥ उन्होंने पूछा कि हे भगवन् ! यह द्वारिकापुरी कुबेरके द्वारा रची गयी है सो इसका अन्त कितने समयमें होगा । क्योंकि कृत्रिम वस्तुएँ अवश्य ही नश्वर होती हैं ॥ १८ ॥ यह द्वारिकापुरी कालान्तरमें क्या अपने-आप ही समुद्रमें डूब जावेगी अथवा निमित्तान्तरके सन्निधानमें किसी अन्य निमित्तसे विनाशको प्राप्त होगी ? कृष्णके अपने अन्तकालमें निमित्तपनेको कौन प्राप्त होगा ? क्योंकि उत्पन्न हुए समस्त जीवोंका मरण निश्चित है । हे प्रभो ! मेरा चित्त कृष्णके स्नेहरूपी महापाशसे बँधा हुआ है अतः मुझे संयमकी प्राप्ति कितने समय बाद होगी ? ॥ १९–२१ ॥ इस प्रकार बलदेवके पूछनेपर समस्त परापर पदार्थोंको देखनेवाले नेमि जिनेन्द्र, प्रश्नके अनुसार यथार्थ बात कहने लगे, सो ठीक ही है क्योंकि भगवान् प्रश्नोंका उत्तर निरूपण करनेवाले ही थे ॥ २२ ॥

उन्होंने कहा कि हे राम ! यह पुरी बारहवें वर्षमें मदिराके निमित्तसे द्वैपायन मुनिके द्वारा क्रोधवश भस्म होगी ॥ २३ ॥ अन्तिम समयमें श्रीकृष्ण कौशाम्बीके वनमें शयन करेंगे और जरत्कुमार उनके विनाशमें कारणपनेको प्राप्त होगा ॥ २४ ॥ अन्तरङ्ग कारणके रहते हुए परिणतिवश बाह्य हेतु जगत्के अभ्युदय तथा क्षयमें कारण होते हैं इसलिए वस्तुके

१. युक्ताः म० । २. शिवाया अपत्यं पुमान् शैवेयस्तं नेमिनाथम् । ३. धर्मस्थाने म० । ४. 'शुश्रुवुरीश्वरात्' इति पाठेन भवितव्यम् । ५. –द्वाविनाश्यते म० । ६. का केन म० । ७. मेऽभवत् म० । ८. द्वीपायन म० । ९. कौशाम्बीवन—ख० । १०. अनन्तरस्य म० ।

जानन्तो वस्तुसद्भावमतोऽभ्युदयनाशयोः । हर्षं भुवि विषादं च न गच्छन्ति मनस्विनः ॥२६॥
भवतोऽपि तपःप्राप्तिस्तन्निमित्तात्तदा भवेत् । भवपद्धतिभीतस्य ब्रह्मलोकोपपादिनः ॥२७॥
द्वैपायनकुमारोऽसौ रोहिण्याः सोदरो यतिः । तदाकर्ण्य वचो जैनं निर्वेदी तपसि स्थितः ॥२८॥
अवधेः पूरणाय्यातः पूर्वदेशमुपेत्य सः । तपश्चरितुमारब्धः कषायतनुशोषणम् ॥२९॥
दुःखी जरत्कुमारश्च दुःखितान् भ्रातृबान्धवान् । परित्यज्य गतः क्वापि स हरिर्यत्र नेक्ष्यते ॥३०॥
जरत्कुमारे प्रगते वनमेकाकिनि स्थिते । हरिः स्नेहाकुलो मेने शून्यमात्मानमात्मनि ॥३१॥
चचार मृगसामान्यं विजनो विजनं वनम् । [2]हरिप्राणप्रियः प्राणान् प्रियान् हातुमनाः क्वचित् ॥३२॥
इतोऽपि जिनमानम्य यादवा विविशुः पुरीम् । आगामिदुःखसंभारचिन्तासंतप्तमानसाः ॥३३॥
घोषणां कारयामास चक्री पुरि बलान्वितः । मद्याङ्गानि च मद्यानि विसृज्यन्तामिति द्रुतम् ॥३४॥
पिष्टकिण्वादिमद्याङ्गैस्ततो मद्यानि मद्यपैः । क्षिप्तानि सशिलाकुण्डे[3] कादम्बगिरिगह्वरे ॥३५॥
कदम्बवनकुण्डेषु[4] मुक्ता कादम्बरी तु या । साश्मपाकविशेषस्य हेतुत्वेनावतिष्ठते ॥३६॥
तथान्या घोषणा दायि कृष्णेन हितबुद्धिना । द्वारिकायां महापुर्यां स्त्रीणां पुंसां च शृण्वताम् ॥३७॥
पिता मे यदि वा माता सुता चान्तःपुराङ्गना । तपस्यन्तु मते जैने वारयामि न तानहम् ॥३८॥

स्वभावको जाननेवाले उत्तम मनुष्य अभ्युदय तथा क्षयके समय पृथिवीपर कभी हर्ष और विषादको प्राप्त नहीं होते ।। २५-२६ ।।

संसारके मार्गसे भयभीत रहनेवाले आपको भी उसी समय कृष्णकी मृत्युका निमित्त पाकर तपकी प्राप्ति होगी तथा तपकर आप ब्रह्मस्वर्गमें उत्पन्न होंगे ।।२७।। द्वैपायनकुमार रोहिणीका भाई—बलदेवका मामा था सो उस समय भगवान्‌के वचन सुनकर वह संसारसे विरक्त हो मुनि होकर तप करने लगा ।।२८।। वह बारह वर्षकी अवधिको पूर्ण करनेके लिए यहाँसे पूर्व देशकी ओर चला गया और वहाँ कषाय तथा शरीरको सुखानेवाला तप करने लगा ।।२९।। 'मेरे निमित्तसे कृष्णकी मृत्यु होगी' यह जानकर जरत्कुमार भी बहुत दुःखी हुआ और दुःखसे युक्त भाई-बन्धुओंको छोड़कर वह कहीं ऐसी जगह चला गया जहाँ कृष्ण दिखायी भी न दें ।।३०।। जब जरत्कुमार वनमें जाकर अकेला रहने लगा तब स्नेहसे आकुल श्रीकृष्णने अपने-आपमें अपने-आपको सूना अनुभव किया ।।३१।। जो कृष्णको प्राणोंके समान प्यारा था ऐसा जरत्कुमार कहीं प्रिय प्राणोंको छोड़नेकी इच्छासे अकेला ही मृगोंके समान निर्जन वनमें भ्रमण करने लगा ।।३२।। इधर आगामी दुःखके भारकी चिन्तासे जिनके मन संतप्त हो रहे थे ऐसे यादव लोग भगवान्‌को नमस्कार कर नगरीमें प्रविष्ट हुए ।।३३।। बलदेवके साथ कृष्णने नगरमें यह घोषणा करा दी कि मद्य बनानेके साधन और मद्य शीघ्र ही अलग कर दिये जायें ।।३४।। घोषणा सुनते ही मद्यपायी लोगोंने पिष्ट, किण्व आदि मदिरा बनानेके साधनोंके साथ-साथ समस्त मदिराको शिलाओंके बीच बने हुए कुण्डसे युक्त कादम्ब गिरिकी गुहामें फेंक दिया ।।३५।। कदम्ब वनके कुण्डोंमें जो मदिरा छोड़ी गयी थी वह अश्मपाक विशेषके कारण उन कुण्डों-में भरी रही। भावार्थ—पत्थरकी कुण्डियोंमें जिस प्रकार कोई तरल पदार्थ स्थिर रहा आता है उसी प्रकार कदम्ब वनके शिलाकुण्डोंमें वह मदिरा स्थिर रही आयी ।।३६।। हितकी इच्छा रखनेवाले कृष्णने समस्त स्त्री-पुरुषोंके सुनते समय द्वारिकापुरीमें दूसरी घोषणा यह दी कि यदि मेरे पिता, माता, पुत्री अथवा अन्तःपुरकी स्त्री आदि कोई भी जिनेन्द्र भगवान्‌के मतमें दीक्षित हो तप करना चाहें तो मैं उन्हें मना नहीं करता हूँ—उन्हें तप करनेकी मेरी ओरसे

---

१. द्वीपायन–म०, ख० । २. हरिः प्राणप्रियः म० । ३. सशिलाकुण्डकादम्ब—क० । ४. मुक्ता म० ।

ततः प्रद्युम्नभान्वाद्याः कुमाराश्चरमाङ्गकाः । अन्ये च बहवो यातास्तपोवनमसङ्गिनः ॥३९॥
रुक्मिणीसत्यभामाद्या महादेव्योऽष्ट सस्नुषाः । लब्धानुज्ञा हरेः स्त्रीभिः सपत्नीभिः प्रवव्रजुः ॥४०॥
सिद्धार्थसारथिर्भ्राता बलदेवेन याचितः[1] । बोधनं व्यसने स्वस्य [2]प्रतिपद्य तपोऽगृहीत् ॥४१॥
ततः संघेन महता जिनः पल्लवदेशभाक् । बभूव भव्यबोधार्थं भव्याम्भोरुहभास्करः ॥४२॥
राजस्त्रीनरसंघातो यावान् प्रव्रजितस्तदा । जिनेनैव समं [3]सोऽयादुत्तरापथमुद्यमी ॥४३॥
[4]वर्षं द्वादश चोद्दिश्य पुर्याः लोकः क्वचिद्वने । कृत्वा वासं पुनस्तत्र स्वागतश्च विधेर्वशात् ॥४४॥
इतो [5]द्वारवतीलोकः परलोकभयान्वितः । व्रतोपवासपूजासु सुतरां निरतोऽभवत् ॥४५॥
[6]द्वैपायनोऽपि महता तपसा सहितस्ततः । व्यतीतं द्वादशं वर्षं मन्वानो भ्रान्तिहेतुना ॥४६॥
व्यतिक्रान्तो जिनादेश इति ध्यात्वा विमूढधीः । संप्राप्तो द्वादशे वर्षे सम्यग्दर्शनदुर्बलः ॥४७॥
धृतातापनयोगश्च तस्थौ प्रतिमया पथि । द्वारिकाबहिरभ्याशे कदाचिन्निकटे गिरेः ॥४८॥
वनक्रीडापरिश्रान्ताः पिपासाकुलिता जलम् । इति कादम्बकुण्डेषु [7]शम्बाद्यास्तां सुरां पपुः ॥४९॥
कदम्बवनसंन्यस्तां कदम्बकतया स्थिताम् । पीत्वा कादम्बरीं मृष्टां कुमारा विकृतिं गताः ॥५०॥

पूर्ण कूट है ।।३७-३८।। घोषणा सुनते ही प्रद्युम्नकुमार तथा भानुकुमारको आदि लेकर चरम-शरीरी कुमार और अन्य बहुत-से लोग परिग्रहका त्याग कर तपोवनको चले गये ।।३९।। रुक्मिणी और सत्यभामा आदि आठ पट्टरानियोंने भी आज्ञा प्राप्त कर पुत्रवधुओं तथा अन्य सौतोंके साथ दीक्षा धारण कर ली ।।४०।। सिद्धार्थ नामका सारथि जो बलदेवका भाई था जब दीक्षा लेनेके लिए उत्सुक हुआ तब बलदेवने उससे याचना की कि कदाचित् मैं मोहजन्य व्यसनको प्राप्त होऊँ तो मुझे संबोधित करना। बलदेवकी इस प्रार्थनाको स्वीकृत कर उसने तप ग्रहण कर लिया ।।४१।।

तदनन्तर जो भव्यरूपी कमलोंको विकसित करनेके लिए सूर्यके समान थे ऐसे भगवान् नेमिजिनेन्द्र, भव्य जीवोंको संबोधनेके लिए बड़े भारी संघके साथ पल्लव देशको प्राप्त हुए ।।४२।। उस समय जो राजा-रानियों और मनुष्योंका समूह दीक्षित हुआ था वह जिनेन्द्र भगवान्के साथ-ही-साथ उत्तरापथकी ओर चलनेके लिए उद्यमी हुआ ।।४३।। द्वारिकाके लोग द्वारिकासे बाहर जाकर बारह वर्ष तक कहीं वनमें रहते आये परन्तु भाग्यकी प्रबलतासे वे वहाँ निवास कर फिर वहीं वापस आ गये ।।४४।। इधर द्वारिकामें जो लोग रहते थे वे परलोकके भयसे युक्त हो व्रत, उपवास तथा पूजा आदि सत्कार्योंमें निरन्तर संलग्न रहते थे ।।४५।। तदनन्तर बहुत भारी तपसे युक्त जो द्वैपायन मुनि थे वे भी भ्रान्तिवश बारहवें वर्षको व्यतीत हुआ मानते हुए बारहवें वर्षमें वहाँ आ पहुँचे। 'जिनेन्द्र भगवान्का आदेश पूरा हो चुका है' यह विचार कर जिनकी बुद्धि विमूढ हो रही थी तथा जो सम्यग्दर्शनसे दुर्बल थे ऐसे द्वैपायन मुनि बारहवें वर्षमें वहीं आ पहुँचे ।। ४६-४७ ।। वे किसी समय द्वारिकाके बाहर पर्वतके निकट, मार्गमें आतापन योग धारण कर प्रतिमायोगसे विराजमान थे ।।४८।। उसी समय वनक्रीड़ासे थके एवं प्यासससे पीड़ित शम्ब आदि कुमारोंने कादम्ब वनके कुण्डोंमें स्थित उस शराबको पी लिया ।।४९।। कदम्ब वनमें छोड़ी एवं कदम्ब रूपसे डबरोंके रूपमें स्थित उस मधुर मदिराको पीकर वे सब कुमार विकार भावको प्राप्त

---

१. बलदेवनयान्वितः म० । २. प्रतिपाद्य क०, ख०, घ०, म० । ३. पाया- म०, याया ख०, घ० । ४. वर्षान् द्वादश क०, वर्षे द्वादश म० । ५. द्वारवतीम् म० । ६. द्वीपायनोऽपि म० । ७. सुस्वाद्यां तां क० ।

वारुणी सा पुराणापि परिपाकवशाद्वशान् । तरुणानकरोद्गाढं तरुणीवारुणेक्षणान् ॥५१॥
असंबद्धानि गायन्तो नृत्यन्तः स्खलितक्रमाः । मुक्तकेशाः कृतोत्तंसाः कण्ठालम्बिवनस्रजः॥५२॥
आगच्छन्तः पुरः सर्वे दृष्ट्वार्काभिमुखं मुनिम् । प्रत्यभिज्ञाय चाबोचन् घूर्णमाननिरीक्षणाः ॥५३॥
सोऽयं द्वैपायनो योगी द्वारवत्याः किलान्तकृत् । । भवितास्माकमद्याग्रे क्व प्रयाति वराककः ॥५४॥
इत्युक्त्वा तं कुमारास्ते लोष्टुभिः सर्वतोऽश्मभिः । प्रजघ्नुर्निर्घृणास्तावद्यावत्पतति भूतले ॥५५॥
क्रोधाधिक्यात्ततो दध्रे दष्टोष्ठो भ्रूकुटीकुटीम् । प्रलयाय यदूनां सः प्रायः स्वतपसोऽपि च ॥५६॥
प्रविष्टास्तु पुरीं व्याला व्याला इव चलाचलाः । कुमाराः कैश्चिदुक्तं तु दुर्वृत्तं लघु विष्णवे ॥५७॥
बलनारायणौ श्रुत्वा द्वैपायनमुपश्रुतम् । द्वारिकायाः क्षयं प्राप्तं मेनाते जिनभाषितम् ॥५८॥
संभ्रमेण परिप्राप्तौ परित्यक्तपरिच्छदौ । मुनिं क्षमयितुं क्रोधाज्ज्वलन्तमिव पावकम् ॥५९॥
दृष्टः संक्लिष्टधीस्ताभ्यां भ्रूभङ्गविषमाननः । दुर्निरीक्ष्येक्षणः क्षीणः कण्ठप्राणो विभीषणः ॥६०॥
कृताञ्जलिपुटाभ्यां स प्रणिपत्य महादरात् । याच्यते याचना वन्ध्यं जानद्भ्यामपि मोहतः ॥६१॥
रक्ष्यतां रक्ष्यतां साधो चिरं सुपरिरक्षितः । क्षमामूलस्तपोभारो धक्ष्यते क्रोधवह्निना ॥६२॥
मोक्षसाधनमप्येष तपो दूषयति क्षणात् । चतुर्वर्गरिपुः क्रोधः क्रोधः स्वपरनाशकः ॥६३॥

हो गये ॥ ५० ॥ यद्यपि वह मदिरा पुरानी थी तथापि परिपाकके वशसे उसने तरुण स्त्रीके समान, लाल-लाल नेत्रोंको धारण करनेवाले उन तरुण कुमारोंको अत्यधिक वशीभूत कर लिया ॥५१॥ फलस्वरूप वे सब कुमार असंबद्ध गाने लगे, लड़खड़ाते पैरोंसे नाचने लगे, उनके केश बिखर गये, आभूषण अस्त-व्यस्त हो गये और उन्होंने अपने कण्ठोंमें जंगली फूलोंकी मालाएँ पहिन लीं ॥ ५२ ॥ जब वे सब नगरकी ओर आ रहे थे तब उन्होंने सूर्यके सम्मुख खड़े हुए द्वैपायन मुनिको पहचान लिया। पहचानते ही उनके नेत्र घूमने लगे। उन्होंने आपसमें कहा कि यह वही द्वैपायन योगी है जो द्वारिकाका नाश करनेवाला होगा। आज यह बेचारा हम लोगोंके आगे कहाँ जायेगा ? ॥ ५३—५४ ॥ इतना कहकर उन निर्दय कुमारोंने लुड्डों और पत्थरोंसे उन्हें तबतक मारा जबतक कि वे घायल होकर पृथिवीपर नहीं गिर पड़े ॥ ५५ ॥ तदनन्तर क्रोधकी अधिकतासे मुनि अपना ओठ डँसने लगे तथा यादवों और अपने तपको नष्ट करनेके लिए उन्होंने भ्रुकुटी चढ़ा ली ॥५६॥ मदमाते हाथियोंके समान अत्यन्त चञ्चलकुमार जब द्वारिकापुरीमें प्रविष्ट हुए तब उनमें-से किन्हींने यह दुर्घटना शीघ्र ही कृष्णके लिए जा सुनायी ॥५७॥ बलदेव तथा नारायणने द्वैपायनसे सम्बन्ध रखने-वाली इस घटनाको सुनकर समझ लिया कि जिनेन्द्र भगवान्‌ने जो द्वारिकाका क्षय बतलाया था वह आ पहुँचा है—अब शीघ्र ही द्वारिकाका क्षय होनेवाला है ॥५८॥ बलदेव और नारायण घबड़ाहटवश सब प्रकारका परिकर छोड़, क्रोधसे अग्निके समान जलते हुए मुनिको शान्त करनेके लिए, उनसे क्षमा माँगनेके लिए उनके पास दौड़ गये ॥५९॥ जिनकी बुद्धि अत्यन्त संक्लेशमय थी, भ्रुकुटीके भंगसे जिनका मुख विषम हो रहा था, जिनके नेत्र दुःखसे देखने योग्य थे, जिनके प्राण कण्ठगत हो रहे थे और जो अत्यन्त भयंकर थे ऐसे द्वैपायन मुनिको बलदेव और कृष्णने देखा। उन्होंने हाथ जोड़कर बड़े आदरसे मुनिको प्रणाम किया और 'हमारी याचना व्यर्थ होगी' यह जानते हुए भी मोहवश याचना की ॥६०—६१॥ उन्होंने कहा कि, 'हे साधो ! आपने चिरकालसे जिसकी अत्यधिक रक्षा की है तथा क्षमा ही जिसकी जड़ है ऐसा यह तपका भार क्रोधरूपी अग्निसे जल रहा है सो इसकी रक्षा की जाये, रक्षा की जाये ॥६२॥ यह क्रोध मोक्षके साधनभूत तपको क्षण-भरमें दूषित कर देता है, यह धर्म, अर्थ, काम और मोक्ष इन चारों वर्गोंका शत्रु है तथा निज और परको नष्ट करनेवाला है ॥६३॥

क्षम्यतां क्षम्यतां मूढैः प्रमादबहुलैः कृतम् । दुर्विचेष्टितमस्मभ्यं प्रसादः क्रियतां यते ॥६४॥
इत्यादिप्रियवादिभ्यां प्रार्थ्यमानोऽनिवर्तकः । सप्राणिद्वारिकादाहे पापधीः कृतनिश्चयः ॥६५॥
संज्ञयाऽदर्शयत्ताभ्यामङ्गुलीद्वयदर्शनम् । युवयोरेव मोक्षोऽत्र नान्यस्येति परिस्फुटम् ॥६६॥
[1]अनिवर्तकरोषं तं विदित्वा विदितक्षयौ । विषण्णौ तौ पुरीं यातौ किंकर्तव्यत्वविह्वलौ ॥६७॥
शम्बाद्यास्तु तदाऽनेके यादवाश्चरमाङ्गकाः । पुर्या निष्क्रम्य निष्क्रान्तास्तस्थुर्गिरिगुहादिषु ॥६८॥
मृत्वा क्रोधाग्निनिर्दग्धतपःसारधनश्च[2] सः । बभूवाग्निकुमाराख्यो मिथ्यादृग्भवनामरः ॥६९॥
अन्तर्मुहूर्तकालेन पर्याप्तः प्रतिबुद्धवान् । विभङ्गेन विकारं स्वं कृतं यदुकुमारकैः ॥७०॥
रौद्रध्यानं स दध्यौ मे तपस्थस्य निरागसः । हिंसकानां पुरीं सर्वां दहामि सह जन्तुभिः ॥७१॥
इति ध्यात्वा [3]स दुर्वारो यावदायाति दारुणः । द्वारावत्यां महोत्पातास्तावज्जाताः क्षयावहाः ॥७२॥
बभूवुः प्रत्यगारं च रोमहर्षविकारिणः । प्रजानां निशि सुप्तानां स्वप्नाश्च भयशंसिनः ॥७३॥
प्राप्य पापमतिश्चासौ पुरीमारभ्य बाह्यतः । कोपी दग्धुं समारेभे तिर्यग्मानुषपूरिताम् ॥७४॥
धूमज्वालाकुलान्[4] वृद्धस्त्रीबालपशुपक्षिणः । नश्यतोऽग्नौ[5] क्षिपत्येष कारुण्यं पापिनः कुतः ॥७५॥
प्राणिजातस्य सर्वस्य जातवेदसि मज्जतः । आक्रन्दनस्वना जाता येऽत्र जाता न जातुचित् ॥७६॥

हे मुनि राज ! प्रमादसे भरे हुए मूर्ख कुमारोंने जो दुष्ट चेष्टा की है उसे क्षमा कीजिए, क्षमा कीजिए, हम लोगोंके लिए प्रसन्न होइए' ॥६४॥ इत्यादि प्रियवचन बोलनेवाले बलदेव और कृष्णने द्वैपायनसे बहुत प्रार्थना की पर वे अपने निश्चयसे पीछे नहीं हटे । उनकी बुद्धि अत्यन्त पापपूर्ण हो गयी थी और वे प्राणियों-सहित द्वारिकापुरीके जलानेका निश्चय कर चुके थे ॥६५॥ उन्होंने बलदेव और कृष्णके लिए दो अंगुलियाँ दिखायीं तथा इशारेसे स्पष्ट सूचित किया कि तुम दोनोंका ही छुटकारा हो सकता है, अन्यका नहीं ॥६६॥

जब बलदेव और कृष्णको यह विदित हो गया कि इनका क्रोध पीछे हटनेवाला नहीं है तब वे द्वारिकाका क्षय जान बहुत दुःखी हुए और किंकर्तव्य-विमूढ हो नगरीकी ओर लौट आये ॥६७॥ उस समय शम्बकुमार आदि अनेक चरमशरीरी यादव, नगरीसे निकल कर दीक्षित हो गये तथा पर्वतकी गुफा आदिमें विराजमान हो गये ॥६८॥ क्रोधरूपी अग्निके द्वारा जिनका तपरूपी श्रेष्ठ धन भस्म हो चुका था ऐसे द्वैपायन मुनि मरकर अग्निकुमार नामक मिथ्यादृष्टि भवनवासी देव हुए ॥६९॥ वहाँ अन्तर्मुहूर्तमें ही पर्याप्तक होकर उन्होंने यादव कुमारोंके द्वारा किये हुए अपने अपकारको विभङ्गावधिज्ञानके द्वारा जान लिया ॥७०॥ उन्होंने इस रौद्रध्यानका चिन्तवन किया कि, 'देखो, मैं निरपराधी तपमें लीन था फिर भी इन लोगोंने मेरी हिंसा की अतः मैं इन हिंसकोंकी समस्त नगरीको सब जीवोंके साथ अभी हाल भस्म करता हूँ ।' इस प्रकार ध्यान कर क्रूर परिणामोंका धारक वह दुर्वार देव ज्यों ही आता है त्यों ही द्वारिकामें क्षयको उत्पन्न करनेवाले बड़े-बड़े उत्पात होने लगे ॥७१—७२॥ घर-घरमें जब प्रजाके लोग रात्रिके समय निश्चिन्ततासे सो रहे थे तब उन्हें रोमाञ्च खड़े कर देनेवाले भयसूचक स्वप्न आने लगे ॥७३॥ अन्तमें उस पापबुद्धि क्रोधी देवने आकर बाहरसे लेकर तिर्यञ्च और मनुष्यों-से भरी हुई नगरीको जलाना शुरू कर दिया ॥७४॥ वह धूम और अग्निकी ज्वालाओंसे आकुल हो नष्ट होते हुए वृद्ध, स्त्री, बालक, पशु तथा पक्षियोंको पकड़-पकड़ कर अग्निमें फेंकने लगा सो ठीक ही है क्योंकि पापी मनुष्यको दया कहाँ होती है ? ॥७५॥ उस समय अग्निमें जलते हुए समस्त प्राणियोंकी चिल्लाहटके जो शब्द हुए थे वैसे शब्द इस पृथिवीपर कभी नहीं हुए थे

---

१. अनिवर्तक–म० । २. धनश्च यः म० । ३. सुदुर्वारो म० । ४. ज्वालाकरान् म० । ५. अग्नौ ।

दिव्येन दह्यमानायां दहनेन तदा पुरि । नूनं क्वापि गता देवा दुर्वारा भवितव्यता ॥७७॥
अन्यथा देवराजस्य राजराजेन शासनात् । निर्मिता [1]रक्षिता चासौ दह्यते कथमग्निना ॥७८॥
रक्षतां बलकृष्णौ नः[2] चिरेणाग्निभयार्दितान्[3] । इति स्त्रीबालवृद्धानामालापा बभुराकुलाः ॥७९॥
आकुलौ बलकृष्णौ च भित्त्वा प्राकारमम्बुधेः । विध्यापयितुमारब्धौ प्रवाहैस्तं हुताशनम् ॥८०॥
सागराम्बु हलाकृष्टं हलिना बलशालिना । अज्वाल ज्वलनस्तेन तैलभावमुपेयुषा ॥८१॥
असाध्यतां विदित्वाग्नेर्जनन्यौ जनकं जनम् । सुबहुं रथमारोप्य संयोज्य गजवाजिनः ॥८२॥
रथं नोदयतोः क्षोण्यां रथचक्राणि पङ्कवत् । निमज्जन्ति विपत्काले क्व गजा वाजिनः क्व च ॥८३॥
स्वयमेव रथं दोर्भ्यामाकृष्य प्रयतोस्तयोः । निरुद्धः कीलयित्वाऽसाविन्द्रकीलेन[4] पापिना ॥८४॥
अवष्टभ्नाति पादेन यावत्कीलं हलायुधः । पिहितं गोपुरद्वारं तावद्दैत्येन कोपिना ॥८५॥
कपाटं पादघातेन ताभ्यां पातितमाशु तत् । द्विषोक्तं निर्गमोऽन्यस्य युवाभ्यां नानुविद्यते ॥८६॥
ततः पित्रा च मातृभ्यां पुत्रौ यातमितीरितौ । विनिश्चित्योपसंहारमात्मीयमिति दुःखिभिः ॥८७॥
भवतोः जीवतोः पुत्रौ कदाचिद्वंशसन्ततिः । न क्षम्येदप्यतो [5]यातमिति तद्वाक्यमस्तकौ ॥८८॥
तान्प्रशाम्य गतौ दीनौ दुःखितौ दुःखपीडितान् । प्रणत्य पादयोर्यातौ गुरुवाक्यकरौ पुरः ॥८९॥

॥७६॥ दिव्य अग्निके द्वारा जब नगरी जल रही थी तब जान पड़ता था कि देव लोग कहीं चले गये थे सो ठीक ही है क्योंकि भवितव्यता दुर्निवार है ॥७७॥ अन्यथा इन्द्रकी आज्ञासे कुबेरने जिस नगरीकी रचना की थी तथा कुबेर ही जिसकी रक्षा करता था वह नगरी अग्निके द्वारा कैसे जल जाती ? ॥७८॥ 'हे बलदेव और कृष्ण ! हम लोग चिरकालसे अग्निके भयसे पीडित हो रहे हैं, हमारी रक्षा करो' इस प्रकार स्त्री, बालक और वृद्धजनोंके घबराहटसे भरे शब्द सर्वत्र व्याप्त हो रहे थे ॥७९॥ घबड़ाये हुए बलदेव और कृष्ण कोट फोड़कर समुद्रके प्रवाहोंसे उस अग्निको बुझाने लगे ॥८०॥ बलशाली बलदेवने अपने हलसे समुद्रका जल खींचा परन्तु वह जल तेलरूपमें परिणत हो गया और उससे अग्नि अत्यधिक प्रज्वलित हो उठी ॥८१॥ जब बलदेव और कृष्णको इस बातका निश्चय हो गया कि अग्नि असाध्य है—बुझायी नहीं जा सकती तब उन्होंने दोनों माताओंको, पिताको तथा अन्य बहुतसे लोगोंको रथपर बैठाकर तथा रथमें हाथी और घोड़े जोत कर रथको पृथिवीपर चलाया परन्तु रथके पहिये जिस प्रकार कीचड़में फँस जाते हैं उस प्रकार पृथिवीमें फँस गये सो ठीक ही है क्योंकि विपत्तिके समय कहाँ हाथी और कहाँ घोड़े काम आते हैं ? ॥८२—८३॥ हाथी और घोड़ोंको बेकार देख जब दोनों भाई स्वयं ही भुजाओंसे रथ खींचकर चलने लगे तब उस पापी देवने वज्रमय कीलसे कील कर रथको रोक दिया ॥८४॥ जबतक बलदेव पैरके आघातसे कीलको उखाड़ते हैं तब तक उस क्रोधी दैत्यने नगरका द्वार बन्द कर दिया ॥८५॥ जब दोनों भाइयोंने पैरके आघातसे द्वारके कपाटको शीघ्र ही गिरा दिया तबतक शत्रुने कहा कि तुम दोनोंके सिवाय किसी अन्यका निकलना नहीं हो सकता ॥८६॥

तदनन्तर अब हम लोगोंका विनाश निश्चित है यह जानकर दोनों माताओं और पिताने दुःखी होकर कहा कि 'हे पुत्रो ! तुम जाओ। कदाचित् तुम दोनोंके जीवित रहते वंश घातको प्राप्त नहीं होगा। इस प्रकार गुरुजनोंके वचन मस्तकपर धारण कर दोनों भाई अत्यन्त दुःखी हुए तथा दुःखसे पीड़ित दीन माता-पिताको शान्त कर और उनके चरणोंमें गिर कर उनके वचनोंको मानते हुए नगरसे बाहर निकल आये ॥८७—८९॥

१. रक्षता म० । २. च ख० । ३. भयार्दिताः म०, ख० । ४. वज्रवत्कीलकेन (ङ० टि०) । ५. पात क०, ख०, ङ० ।

निर्गत्य निर्गती पुर्या ज्वालालीढवेश्मनः । रुदित्वा कण्ठलग्नौ तौ दक्षिणां दिशमाश्रितौ ॥९०॥
इतोऽपि वसुदेवाद्या यादवाश्च तदङ्गनाः । प्रायोपगमनं प्राप्ताः संप्राप्ता बहवो दिवम् ॥९१॥
केचिच्चरमदेहास्तु बलदेवसुतादयः । गृहीतसंयमा नीता जृम्भकैर्जिनसन्निधिम् ॥९२॥
बहूनां यादवीनां च धर्म्यध्यानवशात्मनाम् । सम्यग्दर्शनशुद्धानां प्रायोपगममाश्रिताम् ॥९३॥
बहूनां दह्यमानानामपि देहविनाशनः । [3]जातो हुताशनो रौद्रो न तु ध्यानविनाशनः ॥९४॥
आर्तध्यानकरः प्रायो मिथ्यादृष्टिषु जायते । उपसर्गश्चतुर्भेदो न सद्दृष्टेस्तु जातुचित् ॥९५॥
आगाढे चाप्यनागाढे मरणे समुपस्थिते । न मुह्यन्ति जना जातु जिनशासनभाविताः ॥९६॥
मिथ्यादृष्टेः सतो जन्तोर्मरणं शोचनाय हि । न तु दर्शनशुद्धस्य समाधिमरणं शुचे ॥९७॥
मृतिर्जातस्य[4] नियता संसृतौ नियतेर्वशात् । सा समाधियुजो भूयादुपसर्गेऽपि देहिनः ॥९८॥
धन्याः शिखिशिखाजालकवलीकृतविग्रहाः । अपि साधुसमाधाना ये त्यजन्ति कलेवरम् ॥९९॥
तपो वा मरणं वापि शस्तं स्वपरसौख्यकृत् । [5]न च द्वैपायनस्येव स्वपरासुखकारणम् ॥१००॥
परस्यापकृतिं कुर्वन् कुर्यादेकत्र जन्मनि । पापी परवधं स्वस्य जन्तुर्जन्मनि जन्मनि ॥१०१॥
कषायवशगः प्राणी हन्ता स्वस्य भवे भवे । संसारवर्धनोऽन्येषां भवेद्वा वधको न वा ॥१०२॥

ज्वालाओंके समूहसे जिसके महल जल रहे थे ऐसी नगरीसे निकलकर दोनों भाई पहले तो गतिहीन हो गये—इस बातका निश्चय नहीं कर सके कि कहाँ जाया जाये ? वे बहुत देर तक एक-दूसरेके कण्ठसे लगकर रोते रहे । तदनन्तर दक्षिण दिशाकी ओर चले ॥९०॥ इधर वसुदेव आदि यादव तथा उनकी स्त्रियाँ—अनेक लोग संन्यास धारण कर स्वर्गमें उत्पन्न हुए ॥९१॥ बलदेवके पुत्रोंको आदि लेकर जो कुछ चरमशरीरी थे उन्होंने वहीं संयम धारण कर लिया और उन्हें जृम्भकदेव जिनेन्द्रभगवान्‌के पास ले गये ॥९२॥ जिनकी आत्मा धर्मध्यान-के वशीभूत थी—जो सम्यक्‌दर्शनसे शुद्ध थे, तथा जिन्होंने प्रायोपगमन नामक संन्यास धारण कर रखा था ऐसे बहुत-से यादव और उनकी स्त्रियाँ यद्यपि अग्निमें जल रही थीं तथापि भयंकर अग्नि केवल उनके शरीरको नष्ट करनेवाली हुई, ध्यानको नष्ट करनेवाली नहीं ॥९३-९४॥ मनुष्य, तिर्यञ्च, देव और जड़के भेदसे चार प्रकारका उपसर्ग प्रायः मिथ्या-दृष्टि जीवोंको ही आर्तध्यानका करनेवाला होता है, सम्यग्दृष्टि जीवको कभी नहीं ॥ ९५ ॥ जो मनुष्य जिनशासनकी भावनासे युक्त हैं वे संभावित और असंभावित किसी भी प्रकारका मरण उपस्थित होनेपर कभी मोहको प्राप्त नहीं होते ॥९६॥ मिथ्यादृष्टि जीवका मरण शोकके लिए होता है परन्तु सम्यग्दृष्टि जीवका समाधिमरण शोकके लिए नहीं होता ॥ ९७ ॥ संसार का नियम ही ऐसा है कि जो उत्पन्न होता है उसका मरण अवश्य होता है, अतः सदा यह भावना रखनी चाहिए कि उपसर्ग आनेपर भी समाधिपूर्वक ही मरण हो ॥ ९८ ॥ वे मनुष्य धन्य हैं जो अग्निकी शिखाओंके समूहसे ग्रस्तशरीर होनेपर भी उत्तम समाधिसे शरीर छोड़ते हैं ॥ ९९ ॥ जो तप और मरण निज तथा परको सुख करनेवाला है वही उत्तम है—प्रशंसनीय है, जो तप द्वैपायनके समान निज और परको दुःखका कारण है वह उत्तम नहीं है ॥ १०० ॥

दूसरेका अपकार करनेवाला पापी मनुष्य, दूसरेका वध तो एक जन्ममें कर पाता है पर उसके फलस्वरूप अपना वध जन्म-जन्ममें करता है ॥१०१॥ यह प्राणी दूसरोंका वध कर सके अथवा न कर सके परन्तु कषायके वशीभूत हो अपना वध तो भव-भवमें करता है

१. दिव: म० । २. गमनाश्रिताम् क० । ३. यातो म० । ४.- र्यातस्य म० । ५. तच्च म० ।

परं हन्मीति संजातं लोहपिण्डमुपाददत् । दहत्यात्मानमेवादौ कषायवशगस्तथा ॥१०३॥
संसारान्तकरं पुंसामेकेषां परमं तपः । द्वैपायनस्य तज्जातं दीर्घसंसारकारणम् ॥१०४॥
जन्तोः को वापराधोऽत्र स्वकर्मवशवर्तिनः । यत्नवानपि यज्जन्तुर्मोह्यते मोहवैरिणा ॥१०५॥
[1]अपाक्रियेतापि परः कथञ्चिदतितिक्षुणा[2] । उपक्रियेत यथात्मा तथेहपरलोकयोः ॥१०६॥
परदुःखविधानेन यत्स्वदुःखपरम्परा । अवश्यम्भाविनी तस्मात्तितिक्षैवातिभाव्यताम्[3] ॥१०७॥

शार्दूलविक्रीडितम्

क्रोधान्धेन विधेर्वशेन नगरी द्वैपायनेनाखिला
बालस्त्रीपशुवृद्धलोककलिता द्वाराकुला द्वारिका ।
मासैः षड्भिरशोषिता विलसिता संत्यज्य जैनं वचो
धिक् क्रोधं स्वपरापकारकरणं संसारसंवर्धनम् ॥१०८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ द्वारावतीविनाशवर्णनो नामैकषष्टितम सर्गः ॥६१॥

तथा अपने संसारको बढ़ाता है ॥१०२॥ जिस प्रकार तपाये हुए लोहेके पिण्डको उठानेवाला मनुष्य पहले अपने-आपको जलाता है पश्चात् दूसरेको जला सके अथवा नहीं। उसी प्रकार कषायके वशीभूत हुआ प्राणी 'दूसरेका घात करूँ' इस विचारके उत्पन्न होते ही पहले अपने-आपका घात करता है पश्चात् दूसरेका घात कर सके या नहीं कर सके ॥१०३॥ किन्हीं मनुष्यों-के लिए यह परम तप संसारका अन्त करनेवाला होता है पर द्वैपायन मुनिके लिए दीर्घ संसार-का कारण हुआ ॥१०४॥ अथवा इस संसारमें अपने कर्मके अनुसार प्रवृत्ति करनेवाले प्राणीका क्या अपराध है ? क्योंकि यत्न करनेवाला प्राणी भी मोहरूपी वैरीके द्वारा मोहको प्राप्त हो जाता है ॥१०५॥ असहनशील पुरुष दूसरेका अपकार किसी तरह कर भी सकता है परन्तु उसे अपने-आपका तो इस लोक और परलोकमें उपकार ही करना चाहिए ॥१०६॥ क्योंकि दूसरोंको दुःख पहुँचानेसे अपने-आपको भी दुःखकी परम्परा प्राप्त होती है, इसलिए क्षमा अवश्यम्भावी है-अवश्य ही धारण करने योग्य है ऐसा निश्चय करना चाहिए ॥१०७॥ गौतम स्वामी कहते हैं कि देखो, विधिके वशीभूत हुए क्रोधसे अन्धे द्वैपायनने जिनेन्द्र भगवान्‌के वचन छोड़कर बालक, स्त्री, पशु और वृद्धजनोंसे व्याप्त एवं अनेक द्वारों से युक्त शोभायमान द्वारिका नगरी-को छह मासमें भस्म कर दिया सो निज और परके अपकारका कारण तथा संसार-को बढ़ानेवाले इस क्रोधको धिक्कार है ॥१०८॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्यरचित हरिवंशपुराणमें द्वारिकाके नाशका वर्णन करनेवाला इकसठवाँ सर्ग समाप्त हुआ ॥६१॥

---

१. अपि क्रियेतापि म० । २. अविचक्षणः ग०, अतितिक्षुणः म०, ख०, ङ० । ३. भाव्यताम् म० ।

द्विषष्टितमः सर्गः

पुण्योदयात्पुरा [1]प्राप्तावुन्नतिं यौ जगातिगाम् । चक्रादिरत्नसंपन्नौ बलिनौ बलकेशवौ ॥१॥
पुण्यक्षयात्तु तावेव रत्नबन्धुविवर्जितौ । प्राणमात्रपरीवारौ शोकभारवशीकृतौ ॥२॥
प्रस्थितौ दक्षिणामाशां जीविताशावलम्बिनौ । क्षुत्पिपासापरिश्रान्तौ यातौ [2]सत्कांक्षिणौ पथि ॥३॥
उद्दिश्य पाण्डवान् [3]यान्तौ मधुरां दक्षिणामुमौ । हस्तवप्रं पुरं प्राप्तौ तत्रोद्याने हरिः स्थितः ॥४॥
गतोऽन्नपानमानेतुं कृतसंकेतकोऽग्रजः । वस्त्रसंवृतसर्वाङ्गः प्रविष्टश्च [4]ततः पुरम् ॥५॥
अच्छदन्तो नृपस्तत्र धार्तराष्ट्रोऽवतिष्ठते । पृथिव्यां प्रथितो धन्वी यदुरन्ध्रदुरन्तधीः ॥६॥
जनैर्जनितसंघट्टैः रूपपाशवशीकृतैः । प्रविश्य तत्पुरीं वीरो दृश्यमानः सविस्मयैः ॥७॥
[5]कण्टकं कुण्डलं चापि दत्वा कस्यचिदापणे । अन्नपानमुपादाय निर्गच्छन् वीक्ष्य रक्षकैः ॥८॥
विज्ञाय बलदेवोऽयमिति राज्ञे निवेदितः । ततस्तेन वधायास्य प्रेषितं सकलं बलम् ॥९॥
संघट्टोऽभूत्पुरद्वारे सैन्यस्य बलरोधिनः । बलेन संज्ञयाऽऽहूतः कृष्णश्च द्रुतमागतः ॥१०॥
[6]अन्नपानं सुसंस्थाप्य गजस्तम्भं बलोऽग्रहीत् । कृष्णस्तु परिघं घोरं किञ्चित्कुपितमानसः ॥११॥

जो बलदेव और कृष्ण पहले पुण्योदयसे लोकोत्तर उन्नतिको प्राप्त थे, चक्र आदि रत्नोंसे सहित थे, बलवान् थे, बलभद्र एवं नारायण-पदके धारक थे। वे ही अब पुण्य क्षीण हो जानेसे रत्न तथा बन्धुजनोंसे रहित हो गये, प्राणमात्र ही उनके साथी रह गये और शोकके वशीभूत हो गये ॥ १-२ ॥ केवल जीवित रहनेकी आशा रखनेवाले दोनों भाई दक्षिण दिशाकी ओर चले। वहाँ वे भूख-प्याससे व्याकुल हो मार्गमें किसी उत्तम आश्रयकी इच्छा करने लगे ॥ ३ ॥ पाण्डवोंको लक्ष्य कर वे दक्षिण मथुराकी ओर जा रहे थे कि मार्गमें हस्तवप्र नामक नगरमें पहुँचे। वहाँ कृष्ण तो उद्यानमें ठहर गये और बलदेव संकेत कर तथा वस्त्रसे अपना समस्त शरीर ढँक कर अन्न-पानी लेनेके लिए नगरमें प्रविष्ट हुए ॥ ४-५ ॥ उस नगरमें अच्छदन्त नामका राजा रहता था, धृतराष्ट्रके वंशका था, जो पृथिवीमें प्रसिद्ध धनुर्धारी और यादवोंके छिद्र ढूँढ़नेवाला था ॥ ६ ॥ वीर बलदेवने ज्यों ही उस नगरमें प्रवेश किया त्यों ही उनके रूप-पाशसे वशीभूत हुए लोगोंके झुण्डके-झुण्ड आश्चर्यसे चकित हो उन्हें देखने लगे ॥ ७ ॥ बलदेवने बाजारमें किसीके लिए अपना कड़ा और कुण्डल देकर उससे अन्न-पान—खाने-पीनेकी सामग्री खरीदी और उसे लेकर जब वे नगरके बाहर निकल रहे थे तब राजाके पहरेदारोंने देखकर तथा 'यह बलदेव है' इस प्रकार पहचान कर राजाके लिए खबर कर दी। फिर क्या था, राजाने उनके वधके लिए अपनी समस्त सेना भेज दी ॥ ८-९ ॥ नगरके द्वारपर बलदेवको रोकनेवाली सेनाकी बड़ी भीड़ इकट्ठी हो गयी। बलदेवने संकेतसे कृष्णको बुलाया और वे शीघ्र ही वहाँ आ गये ॥ १० ॥ बलदेवने अन्न-पानको किसी जगह अच्छी तरह रखकर हाथी बाँधनेका एक खम्भा लिया तथा कृष्णने कुछ क्रुद्धचित्त हो भयं-

१. प्राप्तावुन्नतिं म० । २. यत्कांक्षिणौ म०, ख०, ङ० । ३. यातौ ख०, ङ०, म० । ४. 'स तत्पुरं' ख० । ५. कण्ठकं म० । ६. अन्नं पानं च सुस्थाप्य म० । अन्नं पानं च संस्थाप्य ख० ।

चतुरङ्गं ततः सैन्यं सनायकमितस्ततः । हन्यमानं नमाकाभ्यां विह्वलीभूतमानसम् ॥१२॥
समादायान्नपानं तौ निर्गत्य नगरात्ततः । वनं विजयमागत्य सरो रम्यमपश्यताम् ॥१३॥
स्नात्वा सरसि तौ तत्र जिनं नत्वा मनःस्थितम् । विश्रम्याभ्यवहृत्यान्नं पयः पीत्वातिशीतकम् ॥१४॥
विश्रम्य च क्षणं वीरौ प्रयान्तौ[1] दक्षिणां दिशम् । कौशाम्ब्याख्यं वनं भीमं प्रविष्टौ परदुर्गमम् ॥१५॥
खगरावखराराव[2]मुखरीकृतदिग्मुखम् । तृष्णार्तमृगयूथानां गम्यं प्रोन्मृगतृष्णकम् ॥१६॥
ग्रीष्मोग्रतापपरुषवहन्मारुतदुस्सहम् । दावदग्धलताजालगुल्मपादपखण्डकम् ॥१७॥
असंभाव्याम्भसि भ्राम्यच्छ्वापदश्वासशब्दके । वने वनेचरोद्भिन्नकुम्भिकुम्भास्तमौक्तिके ॥१८॥
आरोहति वियन्मध्यं सुतीव्रे तीव्ररोचिषि । जगौ जनार्दनो ज्येष्ठं गुणज्येष्ठमिति श्रमी ॥१९॥
पिपासाकुलितोऽत्यर्थमार्य शुष्कौष्ठतालुकः । शक्नोमि पदमप्येकं न च यातुमतः परम् ॥२०॥
तत्पायय पयः शीतमार्य तृष्णापहारि माम् । सद्दर्शनमिवानादौ संसारे सारवर्जिते ॥२१॥
इत्युक्ते स्नेहसञ्चारसमार्द्रीकृतमानसः[3] । स जगाद बलः [4]कृष्णमुष्णनिश्वासमोचिनम् ॥२२॥
[5]तात शीतलमानीय पानीयं पाययाम्यहम् । त्वं जिनस्मरणाम्भोभिस्तावत्तृष्णां विमर्दय ॥२३॥
निरस्यति पयस्तृष्णां स्तोकां वेलामिदं पुनः । जिनस्मरणपानीयं पीतं तां मूलतोऽस्यति ॥२४॥

कर अर्गल उठाया ॥ ११ ॥ तदनन्तर इन दोनोंके द्वारा मार पड़नेपर वह चतुरङ्ग सेना अपने सेनापतिके साथ विह्वलचित्त हो इधर-उधर भाग गयी ॥ १२ ॥

तदनन्तर अन्न-पान लेकर दोनों भाई नगरसे निकल विजय नामक वनमें आये। वहाँ उन्होंने एक सुन्दर सरोवर देखा ॥ १३ ॥ सरोवरमें स्नान कर हृदयमें स्थित जिनेन्द्र भगवान्‌को नमस्कार कर नाना प्रकारका भोजन किया, अत्यन्त शीतल पानी पिया और क्षण-भर विश्राम किया। विश्रामके बाद दोनों वीर फिर दक्षिण दिशाकी ओर चले और चलते-चलते दूसरोंके लिए अत्यन्त दुर्गम कौशाम्बी नामके भयंकर वनमें प्रविष्ट हुए ॥ १४–१५ ॥ उस वनकी समस्त दिशाएँ पक्षियों तथा शृगालोंके शब्दोंसे शब्दायमान थीं, प्याससे पीड़ित मृगोंके झुण्ड वहाँ इधर-उधर फिर रहे थे, बड़ी ऊँची मृगतृष्णा वहाँ उठ रही थी, ग्रीष्मके उग्र संतापसे कठोर बहती हुई वायुसे वह वन अत्यन्त असह्य था, तथा दावानलसे वहाँकी लताओंके समूह, झाड़ियाँ और वृक्षोंके समूह जल गये थे ॥१६–१७॥ जहाँ पानीके मिलनेकी कोई संभावना नहीं थी, जहाँ दौड़ते हुए जङ्गली जानवरोंकी श्वासका शब्द हो रहा था, तथा जहाँ वनेचरोंके द्वारा विदीर्ण किये हुए हाथियोंके गण्डस्थलोंसे बिखरकर मोती इधर-उधर पड़े थे, ऐसे वनमें पहुँच कर जब अत्यन्त तीक्ष्ण सूर्य आकाशके मध्यमें आरूढ़ हो रहा था तब थके हुए कृष्णने गुणोंसे श्रेष्ठ बड़े भाई—बलदेवसे कहा कि 'हे आर्य ! मैं प्याससे बहुत व्याकुल हूँ, मेरे ओठ और तालु सुख गये हैं, अब इसके आगे मैं एक डग भी चलनेके लिए समर्थ नहीं हूँ ॥१८–२०॥ इसलिए हे आर्य ! अनादि एवं सारहीन संसारमें सम्यग्दर्शनके समान तृष्णाको दूर करनेवाला शीतल जल मुझे पिलाइए' ॥२१॥ इस प्रकार कहनेपर स्नेहके संचारसे जिनका मन आर्द्र हो रहा था ऐसे बलदेवने गरम-गरम श्वास छोड़नेवाले कृष्णसे कहा कि 'हे भाई ! मैं शीतल पानी लाकर अभी तुम्हें पिलाता हूँ तुम तबतक जिनेन्द्र भगवान्‌के स्मरणरूपी जलसे प्यासको दूर करो ॥ २२–२३ ॥ यह पानी तो थोड़े समय तकके लिए

१. प्रयातौ म० । २. सूर्ये । ३. मानसं म० । । ४. कृष्णं दीर्घनिःश्वास ग० । ५. ततः म०

छायायामस्य वृक्षस्य शीतलायामिहास्यताम् । आनयामि जलं तेऽहं शीतलं शीतलाशयात् ॥२५॥
अग्रजः प्रतिपाद्यैवमनुजं मनसा वहन् । जगाम जलमानेतुं निजं श्रममचिन्तयन् ॥२६॥
कृष्णोऽपि च यथोद्दिष्टां तरुच्छायां घनां श्रितः । क्षितौ मृदुमृदि श्लक्ष्णवाससा संवृताङ्गकः[1] ॥२७॥
वामे जानुनि विन्यस्य दक्षिणं चरणं क्षणम् । [2]श्रमव्यपोहनायासावशेत गहने हरिः ॥२८॥
तं प्रदेशं स [3]दैवासौ जरासूनुर्यदृच्छया । एकाकी पर्यटन्प्राप्तो मृगयाव्यसनप्रियः ॥२९॥
यो हरिस्नेहसंभारो हरिप्राणरिरक्षया । द्वारिकाया विनिर्गत्य प्राविशन्मृगवद्वनम् ॥३०॥
स तत्र विधिनानीय तदानीं विनियोजितः । अद्राक्षीद्दूरतोऽस्पष्टं किंचिदग्रे धनुर्धरः ॥३१॥
मरुच्चलितवस्त्रान्तजनितभ्रान्तिरन्तिके । प्रसुप्तमृगकर्णोऽयं चलतीति विचिन्त्य सः ॥३२॥
गुल्मगूढवपुर्गाढमाकर्णाकृष्टकार्मुकः । विव्याध व्याधधीस्तीक्ष्णशरेण चरणं हरेः ॥३३॥
[4]विद्धपादतलः शौरिरुत्थाय सहसाखिलाः । दिशो निरीक्ष्य सोऽदृष्ट्वा परमुच्चैर्जगाविति ॥३४॥
विद्धपादतलोऽहं भो केनाकारणवैरिणा । कथ्यतां कुलमात्मीयं नाम च स्फुटमत्र मे ॥३५॥
अज्ञातकुलनामानं नरं नावधिषं रणे । कदाचिदपि योऽहं हा किं ममेदमुपागतम् ॥३६॥
तद् ब्रवीतु भवान् को भो [5]योऽज्ञातकुलनामकः । अज्ञातवैरसंबन्धो वने जातो ममान्तकः ॥३७॥

ही प्यासको दूर करता है पर जिनेन्द्र भगवान्‌का स्मरणरूपी पानी पीते ही के साथ उस तृष्णाको जड़-मूलसे नष्ट कर देता है ॥ २४ ॥ तुम यहाँ इस वृक्षकी शीतल छायामें बैठो, मैं तुम्हारे लिए सरोवरसे शीतल पानी लाता हूँ ॥२५॥

इस प्रकार छोटे भाई कृष्णसे कहकर उसे अपने हृदयमें धारण करते हुए बलदेव अपने श्रमका विचार न कर पानी लेनेके लिए गये ॥ २६ ॥ इधर कृष्ण भी बतायी हुई वृक्षकी सघन छायामें जा पहुँचे और कोमल वस्त्रसे शरीरको ढँक कर मृदु मृत्तिकासे युक्त पृथिवीपर पड़ रहे। उसी सघन वनमें वे थकावट दूर करनेके लिए बायें घुटनेपर दाहिना पाँव रखकर क्षण-भरके लिए सो गये ॥ २७-२८ ॥ शिकार-व्यसनका प्रेमी जरत्कुमार अकेला उस वनमें घूम रहा था, सो अपनी इच्छासे उसी समय उस स्थानपर आ पहुँचा ॥ २९ ॥ भाग्यकी बात देखो कि कृष्णके स्नेहसे भरा जो जरत्कुमार उनके प्राणोंकी रक्षाकी इच्छासे द्वारिकासे निकलकर मृगकी तरह वनमें प्रविष्ट हो गया था वही उस समय विधाताके द्वारा लाकर उस स्थानपर उपस्थित कर दिया गया। धनुर्धारी जरत्कुमारने दूरसे आगे देखा तो उसे कुछ अस्पष्ट-सा दिखायी दिया ॥ ३०-३१ ॥ उस समय कृष्णके वस्त्रका छोर वायुसे हिल रहा था इसलिए जरत्कुमारको यह भ्रान्ति हो गयी कि यह पास ही में सोये हुए मृगका कान हिल रहा है। फिर क्या था झाड़ीसे जिसका शरीर छिपा हुआ था और शिकारीके समान जिसकी क्रूर बुद्धि हो गयी थी ऐसे जरत्कुमारने बड़ी मजबूतीसे कान तक धनुष खींचकर तीक्ष्ण बाणसे कृष्णका पैर वेध दिया ॥ ३२-३३ ॥ पदतलके विद्ध होते ही श्रीकृष्ण सहसा उठ बैठे और सब दिशाओंमें देखनेके बाद भी जब कोई दूसरा मनुष्य नहीं दिखा तब उन्होंने जोरसे इस प्रकार कहा कि किस अकारण वैरीने मेरा पादतल वेधा है। वह यहाँ मेरे लिए अपना कुल तथा नाम साफ-साफ बतलाये ॥ ३४-३५ ॥ जिस मुझने युद्धमें कभी भी अज्ञात-कुल और अज्ञात नामवाले मनुष्यका वध नहीं किया आज उस मुझके लिए यह क्या विपत्ति आ पड़ी ? ॥ ३६ ॥ इसलिए कहो कि अज्ञातकुल नामवाले आप कौन हैं ? तथा जिसके वैरका पता नहीं ऐसा कौन इस वनमें मेरा घातक हुआ है ? ॥ ३७ ॥

१. संभृताङ्गकः ख०, क० । २. श्रमव्यपोहनाय + असौ + अशेत । ३. तदेवासौ म० । ४. विद्धतल-पदः म० । ५. यज्ञज्ञात म०, क०, ङ० ।

इत्युक्ते सोऽब्रवीदस्ति हरिवंशोद्भवो नृपः । वसुदेव इति ख्यातः पिता मे हलिचक्रिणोः ॥३८॥
सूनुर्जरत्कुमारोऽस्मि तस्याहमतिवल्लभः । एकवीरो भ्रमाम्यत्र वने भीरुदुरासदे ॥३९॥
सोऽहं नेमिजिनादेशभीरुर्वनचरो वने । द्वादशाब्दप्रमाणं च वसाम्यत्र प्रियानुजः ॥४०॥
इयन्तं वसता कालमरण्ये वचनं मया । आर्यलोकस्य कस्यापि न श्रुतं को भवानिह ॥४१॥
इति श्रुत्वा हरिर्ज्ञात्वा भ्रातरं स्नेहकातरः । एह्येहि भ्रातरत्रेति संभ्रमेण तमाह्वयत् ॥४२॥
सोऽपि ज्ञात्वानुजं प्राप्तो हाकारमुखराननः । क्षितिक्षिप्तधनुर्बाणो निपत्यास्याथ पादयोः ॥४३॥
उत्थाप्य तं हरिः प्राह कण्ठलग्नं महाशुचम् । मातिशोकं कृथा ज्येष्ठ दुर्लङ्घ्या भवितव्यता ॥४४॥
प्रमादस्य निरासाय निरस्तसुखसंपदा । चिरं पुरुषशार्दूल सेविता वनवासिता ॥४५॥
करोति सज्जनो यत्नं दुर्यशःपापभीरुकः । दैवे तु कुटिले तस्य स यत्नः किं करिष्यति ॥४६॥
ततस्तेन हरिः पृष्टो वनागमनकारणम् । आदितोऽकथयद्वृत्तं द्वारिकादाहदारुणम् ॥४७॥
श्रुत्वा [1]गोत्रक्षयं सोऽपि प्रलापमुखरोऽवदत् । हा भ्रातः कृतमातिथ्यं मया ते चिरदर्शनात् ॥४८॥
किं करोमि क्व गच्छामि क्व लभे चित्तनिर्वृतिम् । दुःखं च दुर्यशो लोके हन्त्रा ते हा मयार्जितम् ॥४९॥
इत्यादि प्रलपन्नुक्तः कृष्णेनासौ सुचेतसा । प्रलापं त्यज राजेन्द्र कृत्स्नं स्वकृतभुग् जगत् ॥५०॥

श्रीकृष्णके इस प्रकार कहनेपर जरत्कुमारने कहा कि हरिवंशमें उत्पन्न हुए एक वसुदेव नामके राजा हैं जो बलदेव और कृष्णके पिता हैं। मैं जरत्कुमार नामका उन्हींका अतिशय प्यारा पुत्र हूँ। जहाँ कायर मनुष्य प्रवेश नहीं कर सकते ऐसे इस वनमें मैं अकेला ही वीर घूमता रहता हूँ। नेमिजिनेन्द्रने आज्ञा की थी कि जरत्कुमारके द्वारा कृष्णका मरण होगा सो मैं उनकी इस आज्ञासे डरकर बारह वर्षसे इस वनमें रह रहा हूँ। मुझे अपना छोटा भाई कृष्ण बहुत ही प्यारा था, इसलिए इतने समयसे यहाँ रह रहा हूँ, इस बीचमें मैंने किसी आर्यका नाम भी नहीं सुना। फिर आप यहाँ कौन हैं ? ॥ ३८–४१ ॥

जरत्कुमारके यह वचन सुन कृष्णने जान लिया कि यह हमारा भाई है तब स्नेहसे कातर हो उन्होंने 'हे भाई! यहाँ आओ, यहाँ आओ' इस प्रकार संभ्रमपूर्वक उसे बुलाया ॥ ४२ ॥ जरत्कुमारने भी जान लिया कि यह हमारा छोटा भाई है तब 'हाय हाय' शब्दसे मुखको शब्दायमान करता हुआ वह वहाँ आया और धनुष-बाणको पृथिवीपर फेंक श्रीकृष्ण-के चरणोंमें आ गिरा ॥ ४३ ॥ कृष्णने उसे उठाया तो वह कण्ठमें लगकर महा शोक करने लगा। कृष्णने कहा कि हे बड़े भाई! अत्यधिक शोक मत करो, होनहार अलङ्घनीय होती है ॥ ४४ ॥ हे श्रेष्ठ पुरुष! आपने प्रमादका निराकरण करनेके लिए समस्त सुखसम्पदाओंको छोड़ चिरकाल तक वनमें निवास करना स्वीकृत किया। अपयश और पापसे डरनेवाला सज्जन पुरुष बुद्धिपूर्वक प्रयत्न करता है परन्तु दैवके कुटिल होनेपर उसका वह यत्न क्या कर सकता है ? ॥ ४५–४६ ॥

तदनन्तर जरत्कुमारने कृष्णसे वनमें आनेका कारण पूछा तो उन्होंने प्रारम्भसे लेकर द्वारिकादाह तकका सब दारुण समाचार कह सुनाया ॥ ४७ ॥ गोत्रका क्षय सुनकर जरत्कु-मार प्रलापसे मुखर होता हुआ बोला कि हा भाई! चिरकालके बाद आप दिखे और मैंने आपका यह अतिथि-सत्कार किया! ॥ ४८ ॥ मैं क्या करूँ ? कहाँ जाऊँ ? चित्तकी शान्ति कहाँ प्राप्त करूँ ? हा कृष्ण! तुझे मारकर मैंने लोकमें दुःख तथा अपयश दोनों प्राप्त किये ॥ ४९ ॥ इत्यादि रूपसे विलाप करते हुए जरत्कुमारसे उत्तम हृदयके धारक कृष्णने कहा कि

---

१. गोत्रक्षयः म० ।

सुखं वा यदि वा दुःखं दत्ते कः कस्य संसृतौ । मित्रं वा यदि वामित्रः स्वकृतं कर्म तत्त्वतः ॥५१॥
तोयार्थं मे गतो रामो यावन्नायाति सत्वरम् । व्रजाहि तावदक्षान्तिः कदाचित्स्यात्त्वयि प्रभौ[1] ॥५२॥
गच्छ त्वमादितो वार्तां पाण्डवेभ्यो निवेदय । हितास्तेऽस्मत्कुलस्याप्ताः करिष्यन्ति तव स्थितिम् ॥५३॥
उक्त्वेति कौस्तुभं तस्मै दत्त्वाभिज्ञानमादरात् । परावृत्यान्तरं स्तोकं व्रजेति प्रतिपादितः ॥५४॥
उक्त्वाऽसौ क्षम्यतां देव ममेति करकौस्तुभः । शनैरुद्धृत्य तं बाणं परावृत्तपदोऽगमत् ॥५५॥
तस्मिन्याते हरिस्तीव्रव्रणवेदनयार्दितः[2] । उत्तराभिमुखो भूत्वा कृतपञ्चनमस्कृतिः ॥५६॥
कृत्वा नेमिजिनेन्द्राय वर्तमानाय साञ्जलिः । पुनः पुनर्नमस्कारं गुणस्मरणपूर्वकम् ॥५७॥
जिनेन्द्रविहृतिध्वस्त[3]समस्तोपद्रवा यतः । ततः कृतशिराः शौरिः क्षितिशय्यामधिश्रितः ॥५८॥
वस्त्रसंवृतसर्वाङ्गः सर्वसङ्गनिवृत्तधीः । सर्वत्र मित्रभावस्थः शुभचिन्तामुपागतः ॥५९॥
पुत्रपौत्रकलत्राणि ते भ्रातृगुरुबान्धवाः । अनागतविधातारो धन्या ये तपसि स्थिताः ॥६०॥
अन्तःपुरसहस्राणि सहस्राणि सुहृद्गणाः । [4]अविधाय तपः कष्टं कष्टं वह्निमुखे मृताः ॥६१॥
कर्मगौरवदोषेण मयापि न कृतं तपः । सम्यक्त्वं मेऽस्तु संसारपातहस्तावलम्बनम् ॥६२॥

हे राजेन्द्र ! प्रलापको छोड़ो, समस्त जगत् अपने किये हुए कर्मको अवश्य भोगता है ॥ ५० ॥ संसारमें कौन किसके लिए सुख देता है ? अथवा कौन किसके लिए दुःख देता है ? और कौन किसका मित्र है अथवा कौन किसका शत्रु है ? यथार्थमें अपना किया हुआ कार्य ही सुख अथवा दुःख देता है * ॥ ५१ ॥ बड़े भाई राम मेरे लिए पानी लानेके लिए गये हैं सो जबतक वे नहीं आते हैं तबतक तुम शीघ्र ही यहाँसे चले जाओ। संभव है कि वे तुम्हारे ऊपर अशान्त हो जायें ॥ ५२ ॥ तुम जाओ और पहलेसे ही पाण्डवोंके लिए सब समाचार कह सुनाओ। वे अपने कुलके हितकारी आप्तजन हैं अतः तुम्हारी अवश्य रक्षा करेंगे ॥ ५३ ॥ इतना कहकर उन्होंने पहचानके लिए उसे आदरपूर्वक अपना कौस्तुभमणि दे दिया और कुछ थोड़ा मुड़कर कहा कि जाओ। हाथमें कौस्तुभमणि लेते हुए जरत्कुमारने कहा कि हे देव ! मुझे क्षमा कीजिए। इस प्रकार कह कर और धीरेसे वह बाण निकाल कर वह उलटे पैरों वहाँसे चला गया ॥ ५४–५५ ॥

जरत्कुमारके चले जानेपर कृष्ण व्रणकी तीव्र वेदनासे व्याकुल हो गये। उन्होंने उत्तराभिमुख होकर पञ्च-परमेष्ठियोंको नमस्कार किया ॥ ५६ ॥ वर्तमान तीर्थंकर श्रीनेमिजिनेन्द्रको हाथ जोड़कर गुणोंका स्मरण करते हुए बार-बार नमस्कार किया ॥ ५७ ॥ क्योंकि जिनेन्द्र भगवान्के विहारसे पृथिवीके समस्त उपद्रव नष्ट हो चुके हैं इसलिए शिर रखकर वे पृथिवीरूपी शय्यापर लेट गये ॥ ५८ ॥ तदनन्तर जिन्होंने वस्त्रसे अपना समस्त शरीर ढक लिया था, सब परिग्रहसे जिनकी बुद्धि निवृत्त हो गयी थी और जो सबके साथ मित्रभावको प्राप्त थे ऐसे श्रीकृष्ण इस प्रकारके शुभ विचारको प्राप्त हुए ॥ ५९ ॥ वे पुत्र, पोते, स्त्रियाँ, भाई, गुरु और बान्धव धन्य हैं जो भविष्यत्का विचार कर अग्निके उपद्रवसे पहले ही तपश्चरण करने लगे ॥ ६० ॥ बड़े कष्टकी बात है कि हजारों स्त्रियाँ और हजारों मित्रगण तपका कष्ट न कर अग्निके मुखमें मृत्युको प्राप्त हो गये ॥ ६१ ॥ कर्मके प्रबल भारसे मैंने भी तप नहीं किया इसलिए मेरा सम्यग्दर्शन ही मुझे संसारपातसे बचानेके लिए हस्तावलम्बन-

---

१. प्रभो क० । २. वेदनमार्दितः म० । ३. विनतिध्वस्त-म० । ४. अभिधाय म०, क०, ख०, ग०, घ० ।

* को सुख को दुख देत है कर्म देत झकझोर ।
उरझै सुरझै आप ही ध्वजा पवनके जोर ॥

इत्यादि शुभचिन्तात्मा भविष्यत्तीर्थकृद्धरिः । बद्धायुष्कतया मृत्वा तृतीयां पृथिवीमितः ॥६३॥

शार्दूलविक्रीडितम्

दक्षो दक्षिणभारतार्धविभुतामुद्भाव्य [1]भव्यप्रजा-
बन्धुर्बन्धुजनाम्बुधेरहरहर्वृद्धिं विधाय प्रभुः ।
पूर्णं वर्षसहस्रमेकमगमत्संजीव्य कृष्णो गतिं
भोगी स्वाचरणोचितो जिनतया[2] यो भोत्स्यते दर्शनात् ॥६४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ हरिगत्यन्तरवर्णनो नाम द्वाषष्टितमः सर्गः ॥६२॥

रूप हो ॥ ६२ ॥ इत्यादि शुभ विचार जिनकी आत्मामें उत्पन्न हो रहे थे, और जो भविष्यत् कालमें तीर्थंकर होनेवाले थे ऐसे श्रीकृष्ण पहलेसे ही बद्धायुष्क होनेके कारण मरकर तीसरी पृथिवीमें गये ॥ ६३ ॥ गौतम स्वामी कहते हैं कि जो आगे चलकर सम्यग्दर्शनके कारण तीर्थंकर पदसे युक्त होंगे वे नीतिनिपुण, भव्य प्रजाके परम बन्धु, भोगी कृष्ण, दक्षिण भरतार्धकी विभुताको प्रकट कर, प्रतिदिन बन्धुजनरूपी सागरकी वृद्धिको बढ़ाकर एवं एक हजार वर्ष तक जीवित रहकर अपने आचरणके अनुरूप तीसरी पृथिवीमें गये ॥ ६४ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें कृष्णके परलोकगमनका वर्णन करनेवाला बासठवाँ पर्व समाप्त हुआ ॥६२॥

---

१. सेव्यप्रजां बन्धु क० । २. जनतया म० ।

त्रिषष्टितमः सर्गः

रथोद्धतावृत्तम्

स्नेहवानथ जलार्थमाकुलो विष्णुमात्मनि वहन् हलायुधः ।
वारितोऽप्यपशकुनैः[1] पदे पदे दूरमन्तरमितो वनान्तरे ॥१॥
धावतोऽस्य मृगयूथवर्त्मना लोभितस्य मृगतृष्णिकाम्भसा ।
प्रत्यभासत दिशां कदम्बकं प्रोत्तरङ्गसरसीमयं तदा ॥२॥
अभ्यलोकि कलिता कलस्वनैश्चक्रवाककलहंससारसैः ।
सीरिणाथ सरसी तरङ्गिणी भृङ्गनादितसरोजसंकुला ॥३॥
चेतसास्य सहसा तदीक्षणाद्दीर्घमुच्छ्वसितमङ्गसङ्गिना ।
मारुतेन शिशिरेण सौहृदं सम्मुखेन गदितं सुगन्धिना ॥४॥
संपतद्भिरभितः पिपासुभिः श्वापदैः सभयमीक्षितस्ततः ।
आससाद सरसीं स सादरो वन्यहस्तिमदवारिवासिताम् ॥५॥
वारि तीर्थमवगाह्य शीतलं संप्रपाय निरपास्य तृड्व्यथाम् ।
पद्मपत्रपुटिकां स वारिणा संप्रपूर्य परिवृत्य वाससा ॥६॥
आदधाव पदधूतधूलिभिर्धूसरीकृतशरीरमूर्धजः ।
कम्पमानहृदयः स शंकया प्रत्यपायबहुले वने हरौ ॥७॥

अथानन्तर स्नेहसे भरे बलदेव जल प्राप्त करनेके लिए बहुत व्याकुल हुए। वे हृदयमें कृष्णको धारण किये हुए आगे बढ़े जाते थे। यद्यपि अपशकुन उन्हें पद-पदपर रोकते थे तथापि वे दूसरे वनमें बहुत दूर जा पहुँचे ॥ १ ॥ जिस मार्गसे मृगोंके झुण्ड जाते थे बलदेव उसी मार्गसे दौड़ते जाते थे और वे जगह-जगह मृगतृष्णाको जल समझकर लुभा जाते थे। उस समय उन्हें समस्त दिशाएँ ऐसी जान पड़ती थीं मानो लहराते हुए तालाबोंसे युक्त ही हों ॥ २ ॥ तदनन्तर बलदेवको एक तालाब दिखा जो मधुर शब्द करनेवाले चक्रवाक, कलहंस और सारस पक्षियोंसे युक्त था, तरङ्गोंसे व्याप्त था एवं भ्रमर गुंजित कमलोंसे सहित था ॥ ३ ॥ तालाबके देखते ही बलदेवके हृदयने एक लम्बी साँस ली और उसकी शीतल सुगन्धित वायु सम्मुख आकर इनके शरीरसे लग गयी जिससे ऐसा जान पड़ता था मानो उसने अपनी मित्रता ही प्रकट की हो ॥ ४ ॥

तदनन्तर चारों ओरसे आनेवाले प्यासे जंगली जानवर जिन्हें भयपूर्ण दृष्टिसे देख रहे थे ऐसे बलदेव जंगली हाथियोंके मदजलसे सुवासित उस सरोवरपर बड़े आदरसे आ पहुँचे ॥ ५ ॥ उन्होंने घाटमें अवगाहन कर शीतल पानी पिया, अपनी प्यासकी व्यथा दूर कर और कमलके पत्तोंका एक पात्र बनाकर उसे पानीसे भरा तथा कपड़ेसे उसे ढँक लिया ॥ ६ ॥ पानी लेकर वे बड़े वेगसे दौड़े। उस समय पैरोंके आघातसे उड़ी धूलिसे उनके शिरके बाल धूसरित हो गये थे और 'मैं अनेक विघ्नोंसे भरे वनमें कृष्णको अकेला छोड़ आया हूँ' इस आशङ्कासे उनका हृदय बार-बार कम्पित हो रहा था ॥ ७ ॥ तदनन्तर वक्षके द्वारा

---

१. वारितोऽपि शकुनैः म० ।

दूरतस्तमथ तत्र दृष्टवान् संवृताङ्गमजितोऽम्बरेण सः ।
आस्त एव भुवि यत्र शायितः शूरशौरिरिति[1] दीर्घनिद्रया ॥८॥
सुप्त एव सुखनिद्रया हरिः सुप्रबोधमुपगच्छतु स्वयम् ।
[2]इत्युपेक्ष्य हरिबोधनं तदा तत्प्रबोधनमसौ प्रतीक्षते[3] ॥९॥
वीर ! किं स्वपिषि दीर्घमित्यलं स्वापमुज्झ पिब तोयमिच्छया ।
इत्युदीर्णमधुरस्वरः पुनः सकृद्विरुद्ध[4]वचनोऽवतिष्ठते ॥१०॥
सीरिणा क्षतजगन्धतस्ततः कृष्णसंवरणवाससोऽन्तरे ।
संप्रवेशनिजनिर्गमाकुला[5] प्रैक्षि तीक्ष्णमुखकृष्णमक्षिका[6] ॥११॥
[7]संकटोद्घटिततन्मुखो हरिं वीक्ष्य शान्तजनकान्तजीवितम् ।
हा हतोऽस्मि मृत एव तृष्णया विष्णुरित्युपरि तस्य सोऽपतत् ॥१२॥
मोहमूढमनसोऽस्य मूर्छया प्रासबोपकृतमप्यनिष्टया ।
स्नेहपाशदृढबन्धनो हली प्राणहानमकरिष्यदन्यथा ॥१३॥
बोधमाप्य परितः परामृशन् केशवस्य वपुरात्मपाणिना ।
पश्यति स्म चरणव्रणजं तीव्रगन्धरुधिरारुणक्षमम् ॥१४॥
सुप्त एव विषमेषुणा हरिः विद्ध [8]एष चरणेन केनचित् ।
दुष्प्रबोधहरिमारकोऽत्र कोऽपूर्वमथ मृगयाफलं श्रितः ॥१५॥

सब ओरसे जिनका शरीर ढँका था ऐसे कृष्णको बलदेवने दूरसे देखा। देखकर वे सोचने लगे कि मैं शूरवीर कृष्णको जिस भूमिमें सुला गया था यह वहाँ गहरी नींद्में सो रहा है ॥ ८ ॥ पास आनेपर उन्होंने विचार किया कि अभी यह सुखनिद्रासे सो रहा है इसलिए स्वयं ही जगने दिया जाये। इस प्रकार कृष्णको जगानेकी उपेक्षा कर वे स्वयं ही उनके जागनेकी प्रतीक्षा करने लगे ॥ ९ ॥ जब कृष्ण बहुत देर तक नहीं जगे तब बलदेवने कहा, 'वीर ! इतना अधिक क्यों सो रहे हो ? बहुत हो गया, निद्रा छोड़ो और इच्छानुसार जल पिओ'। इस प्रकार मधुर स्वरमें एक-दो बार कहकर वे पुनः वचन रोककर चुप बैठ रहे ॥ १० ॥

तदनन्तर बलभद्रने देखा कि तीक्ष्ण मुखवाली काली एक मक्खी रुधिरकी गन्धसे कृष्णके ओढ़े हुए वस्त्रके भीतर घुस तो गयी पर परन्तु निकलनेका मार्ग न मिलनेसे व्याकुल हो रही है ॥ ११ ॥ यह देख उन्होंने शीघ्र ही कृष्णका मुख उघाड़ा और उन्हें निष्प्राण देख 'हाय मैं मारा गया' यह कहकर वे एक दम चीख पड़े। 'हाय हाय यह कृष्ण प्याससे मर ही गया है' यह सोच वे उनके शरीरपर गिर पड़े ॥ १२ ॥ कृष्णके मोहसे जिनका मन अत्यन्त मोहित हो रहा था ऐसे बलदेवको तत्काल मूर्च्छा आ गयी। यद्यपि मूर्च्छाका आना अनिष्ट था तथापि उस समय उसने इ..का बड़ा उपकार किया। अन्यथा स्नेहरूपी पाशसे दृढ़ बँधे हुए बलदेव अवश्य ही प्राण त्याग कर देते ॥ १३ ॥ सचेत होनेपर वे अपने हाथसे चारों ओर कृष्णके शरीरका स्पर्श करने लगे। उसी समय उन्होंने तीव्र गन्धसे युक्त रुधिरसे लाल लाल पैरका घाव देखा ॥ १४ ॥ और देखते ही निश्चय कर लिया कि सोते समय ही किसीने तीक्ष्ण बाणसे इसे पैरमें प्रहार किया है। जिनका जागना कठिन है ऐसे कृष्णको मारनेवाला

---

१. सूरिसौरि म० । २. इत्यपेक्ष्य म० । ३. प्रतीक्ष्यते म० । ४. सन्निरुध्य वचनो म०, क०, ङ० । ५.– माकुलाः म० । ६. मक्षिकाः म०, ङ० । ७. संघटोद्घटित– म०, घ० । ८. एव म० ।

इत्युदीर्य कुपितो हली बली सिंहनादमकरोद्भयङ्करम् ।
व्यापिनं विपिनदुर्गसञ्चरद्व्याघ्रसिंहकरिदर्पशातनम् ॥१६॥
संगतो च शयितो ममानुजः छद्मना विधिविधानयोगतः ।
येन केनचिदहेतुवैरिणा संददातु लघु सोऽद्य दर्शनम् ॥१७॥
सुप्तमाप्तमपशस्त्रमानतं[1] मुक्तमानमसकृत्पलायिनम् ।
प्रत्यवाययुतमङ्गनां शिशुं घ्नन्ति शत्रुमपि नो यशोधनाः ॥१८॥
उच्चकैरिति गदन् समन्ततः संप्रधाव्य कियदप्यथान्तरम् ।
सोऽन्यदीयपदवीमनाप्नुवन्नेत्य कृष्णमुपगृह्य रोदिति ॥१९॥
हा जगत्सुभग ! हा जगत्पते ! हा जनाश्रयण ! हा जनार्दन !
हाऽपहाय गतवानसि क्व मां हानुजेहि लघु हेति चारुदत् ॥२०॥
हारि वारि परितापहारि तं पाययत्यपि विचेतनं मुहुः ।
क्राम्यतीषदपि तच्च तद्गले दूरभव्यमनसीव दर्शनम् ॥२१॥
मार्ष्टि मार्दवगुणेन पाणिना सन्मुखं मुखमुदीक्षते मुदा ।
लेढि जिघ्रति विमूढधीर्वचः श्रोतुमिच्छति धिगात्ममूढताम् ॥२२॥
द्यौरिवोरुविभवाग्निभस्मिता द्वारिकेति किमिवासि तप्तवान् ।
अक्षयैर्बहुविधाकरैश्रिता प्रागिवास्ति ननु भारतावनिः ॥२३॥

कौन पुरुष आज यहाँ शिकारके फलको प्राप्त हुआ है ? ॥ १५ ॥ इस प्रकार कहकर बलवान् बलदेवने कुपित हो ऐसा भयंकर सिंहनाद किया जो समस्त वनमें व्याप्त हो गया तथा जिसने वनके दुर्गम स्थानोंमें चलनेवाले व्याघ्र, सिंह और हाथियोंका गर्व नष्ट कर दिया ॥ १६ ॥ उन्होंने कहा कि भाग्यके फेरसे सोते हुए मेरे छोटे भाईको जिस किसी अकारण वैरीने छलसे मारा है वह आज शीघ्र ही मुझे दर्शन दे—मेरे सामने आवे ॥ १७ ॥ यशरूपी धनको धारण करनेवाले शूरवीर ऐसे शत्रुको भी नहीं मारते जो सो रहा हो, शस्त्ररहित हो, नम्रीभूत हो, मानरहित हो, बार-बार पीठ दिखाकर भाग रहा हो, अनेक विघ्नोंसे युक्त हो, स्त्री हो अथवा बालक हो ॥ १८ ॥ इस प्रकार जोर-जोरसे कहते हुए वे इधर-उधर कुछ दूर तक दौड़े भी परन्तु जब उन्हें किसी दूसरेका मार्ग नहीं मिला तब वे कृष्णके पास वापिस आकर तथा उन्हें गोदमें लेकर रोने लगे ॥ १९ ॥

हाय जगत्के प्रिय ! हा जगत्के स्वामी ! हा समस्त जनोंको आश्रय देनेवाले ! हा जनार्दन ! तू मुझे छोड़ कहाँ चला गया ? हा भाई ! तू जल्दी आ, जल्दी आ—इस प्रकार कहते हुए वे चिरकाल तक रोते रहे ॥ २० ॥ वे चेतना शून्य—निर्जीव कृष्णको सुन्दर एवं सन्तापको दूर करनेवाला पानी बार-बार पिलाते थे परन्तु जिस प्रकार दूरानुदूर भव्यके हृदयमें सम्यग्दर्शन नहीं प्रवेश करता है उसी प्रकार उनके गलेमें वह जल थोड़ा भी प्रवेश नहीं करता था ॥ २१ ॥ मूढबुद्धि बलदेव सामने बैठकर कोमल हाथोंसे उनका मुख धोते थे, हर्षपूर्वक उसे देखते थे, चूमते थे, सूँघते थे, और वचन सुननेकी इच्छा करते थे। आचार्य कहते हैं कि ऐसी आत्म-मूढ़ताको धिक्कार है ॥ २२ ॥ 'स्वर्गके समान विशाल वैभवसे युक्त द्वारिकापुरी अग्निसे भस्म हो गयी है इसलिए अब जीनेकी क्या आवश्यकता है' ? यह सोचकर क्या तू तप्त हो रहा है ? अरे नहीं भाई ! नाना प्रकारकी अविनाशी खानोंसे युक्त भरत क्षेत्रकी भूमि

---

१. सुप्तमत्त क० ।

भोजराजकुलयादवक्षये अबन्धुरिति किं विमुह्यसि ।
सत्यसन्ध मयि ते मम त्वयि प्राणितीह सकलास्ति बन्धुता ॥२४॥
पूर्वजन्मसु बहुष्वनारतं पश्यतो हि तव मामिहापि च ।
एकतानयनस्य नोदभूत्तृप्तिरद्य किमिवासि तृप्तवान् ॥२५॥
त्वां पयोर्थमपहाय मोहतो हा गतेन[1] नररत्नभूषणम् ।
लोकसारमपहारितं मया सन्निधौ तु मम कोऽस्य हारकः ॥२६॥
कंसकोपमदपर्वताशनिर्भूमगोचरविपक्षपन्नगः ।
पीतमागधयशोऽम्बुधेरभूद्गोष्पदे बत निमज्जनं तव ॥२७॥
बकुशः सोपकरणो बहूपकरणप्रियः । शरीरबकुशः कायसंस्कारं प्रतिसेवते ॥७२॥
प्रतिसेवनाकुशील उत्तरेषु विराधनाम्[2] । गुणेषु सेवते कांश्चिदविराधितमूलकः ॥७३॥
स्युः कषायकुशीलास्तु रहितप्रतिसेवनाः । निर्ग्रन्थाः स्नातकाश्चापि ते सर्वे सर्वतीर्थजाः ॥७४॥
[3]भावलिङ्गं प्रतीत्यामी निर्ग्रन्थाः पञ्च लिङ्गिनः । प्रतीत्य द्रव्यलिङ्गं तु भजनीया मनीषिभिः ॥७५॥

ग्रहसे युक्त होते हैं वे प्रतिसेवनाकुशील हैं, जिनके अन्य कषाय शान्त हो गये हैं सिर्फ संज्वलनका उदय रह गया है वे कषायकुशील कहलाते हैं ।।६१–६२।। जिनके जलमें खींची गयी दण्डकी रेखाके समान कर्मोंका उदय अव्यक्त—अप्रकट रहता है तथा जिन्हें एक मुहूर्तके बाद केवलज्ञान उत्पन्न होनेवाला है वे निर्ग्रन्थ कहलाते हैं ।।६३।। और जिनके घातियाकर्म नष्ट हो गये हैं, ऐसे केवली भगवान् स्नातक कहलाते हैं । ये पाँचों ही मुनि नैगमादि नयोंकी अपेक्षा निर्ग्रन्थ माने जाते हैं ।।६४।। साध्यसाधनके भेदसे युक्त वे पुलाक आदि मुनि संयम आदि आठ अनुयोगोंके द्वारा साध्य हैं ।।६५।। पुलाक, बकुश और प्रतिसेवना कुशील मुनि प्रारम्भके सामायिक और छेदोपस्थापना इन दो संयमोंमें, कषायकुशील यथाख्यातको छोड़ कर शेष चार संयमोंमें और निर्ग्रन्थ तथा स्नातक यथाख्यात संयममें स्थित हैं । अब पाँचों मुनियोंके श्रुत आदिका भी यथाक्रमसे कथन किया जाता है ।।६६–६७।। प्रतिसेवना कुशील, पुलाक और बकुश ये उत्कृष्ट रूपसे अभिन्न दशपूर्व श्रुतको धारण करते हैं ।।६८।। जो कषाय-कुशील और निर्ग्रन्थ नामक मुनि हैं वे सब चौदह पूर्वको धारण करते हैं ।।६९।। जघन्यकी अपेक्षा पुलाकमुनिके आचारवस्तुरूप श्रुत होता है और निर्ग्रन्थपर्यन्त समस्त मुनियोंके पाँच समिति, तीन गुप्तिरूप अष्टप्रवचन मातृका प्रमाणश्रुत होता है ।।७०।। प्रतिसेवनाकी अपेक्षा पुलाक मुनि पाँच महाव्रत तथा रात्रिभोजन त्याग इनमें-से किसी एकका कभी दूसरोंका बलपूर्वक जबर्दस्तीसे सेवन करनेवाला होता है ।।७१।। बकुशके सोपकरणबकुश और शरीरबकुशकी अपेक्षा दो भेद होते हैं । इनमें सोपकरणबकुश अनेक उपकरणोंके प्रेमी होते हैं और शरीरबकुश शरीरसंस्कारकी अपेक्षा रखते हैं—शरीरकी शोभा बढ़ाना चाहते हैं ।।७२।। प्रतिसेवनाकुशील मूल गुणोंमें विराधना नहीं करते किन्तु उत्तर गुणोंमें कभी कोई विराधना कर बैठते हैं ।।७३।। कषायकुशील निर्ग्रन्थ और स्नातकप्रतिसेवनासे रहित होते हैं । तीर्थकी अपेक्षा पुलाक आदि पाँचों मुनि सभी तीर्थकरोंके तीर्थमें होते हैं ।।७४।। लिङ्गके भाव और द्रव्यकी अपेक्षा दो भेद होते हैं । भावलिङ्गकी अपेक्षा पुलाक आदि पाँचों मुनि

---

१. संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थानविकल्पतः साध्याः ॥ ४७ ॥ त०, सू०, नवमाध्याय ।
२. विराधनं म० । ३. भावलिङ्गं प्रतीत्य पञ्च निर्ग्रन्था लिङ्गिनो भवन्ति । द्रव्यलिङ्गं प्रतीत्य भाज्याः । स०सि० ।

पुलाकस्योत्तरास्तिस्रो बकुशप्रतिसेवन । कुशीलस्योभ [1]षड्लेश्याः कषाये चतुरुत्तराः ॥७६॥
स्यात्सूक्ष्मसाम्पराये च निर्ग्रन्थस्नातकेऽपि च । शुक्लैव केवला लेश्याऽयोगाः लेश्याविवर्जिताः ॥७७॥
पुलाकस्योपपादः स्यात्सहस्रारे परायुषः । प्रतिसेवनाकुशीलबकुशस्यारणेऽच्युते ॥७८॥
तथा सर्वार्थसिद्धौ तु निर्ग्रन्थान्त्यकुशीलयोः । द्विसागरोपमायुष्काः सौधर्मे ते जघन्यतः ॥७९॥
संयमस्थानभेदास्तु स्युः कषायनिमित्तकाः । असंख्येयसमानन्तगुणसंयमलब्धयः ॥८०॥
तत्र सर्वजघन्यानि लब्धिस्थानानि सर्वदा । स्युः कषायकुशीलस्य पुलाकस्य च योगिनः ॥८१॥
गच्छतस्तावसंख्येयस्थानानि युगपत्ततः । व्युच्छिद्यते पुलाकोऽन्यस्त्वसंख्येयानि गच्छति ॥८२॥
बकुशेन कुशीलौ द्वौ स्थानानि युगपत्ततः । असंख्यानि च तौ यातौ बकुशस्त्वत्र हीयते ॥८३॥
असंख्येयानि गत्वातः स्थानानि प्रतिसेवना । कुशीलो हीयते तस्मात्तः कषायकुशीलकः ॥८४॥
स्थानान्यतोऽकषायाणि निर्ग्रन्थः प्रतिपद्यते । सोऽसंख्येयानि गत्वातो व्युच्छेदमुपगच्छति ॥८५॥
स्थानमेकमतस्तूर्ध्वं गत्वानन्तगुणर्धिकः । स्नातकः [2]कृतकर्मान्तो निर्वाणं प्रतिपद्यते ॥८६॥

निर्ग्रन्थ लिङ्गके धारक हैं और द्रव्यलिङ्गकी अपेक्षा विद्वानोंके द्वारा भजनीय हैं ॥७५॥ लेश्याकी अपेक्षा पुलाकमुनिके आगेकी तीन अर्थात् पीत, पद्म और शुक्ल ये तीन, बकुश और प्रतिसेवनाकुशीलके छहों, कषायकुशीलके आगेकी चार अर्थात् कापोत, पीत, पद्म और शुक्ल ये चार एवं सूक्ष्मसाम्पराय, निर्ग्रन्थ और स्नातकके एक शुक्ललेश्या ही होती है। अयोग-केवली स्नातक लेश्यासे रहित होते हैं ॥७६–७७॥ उपपादकी अपेक्षा पुलाकका उपपाद सहस्रार स्वर्गमें होता है और वह वहाँ उत्कृष्ट आयुका धारक होता है। प्रतिसेवनाकुशील और बकुशका उपपाद आरण और अच्युत स्वर्गमें होता है। निर्ग्रन्थ (ग्यारहवें गुणस्थान-वर्ती) और कषायकुशीलका उपपाद सर्वार्थसिद्धिमें होता है और जघन्यकी अपेक्षा पुलाक आदि पाँचों मुनियोंका उपपाद सौधर्मस्वर्गमें होता है और वहाँ वे दो सागरकी आयुके धारक होते हैं ॥७८–७९॥ प्रारम्भमें, संयममें जो स्थानभेद होते हैं वे कषायके निमित्तसे होते हैं तथा उनमें असंख्येय और अनन्तगुणी संयमकी प्राप्ति होती है ॥८०॥ इनमें सर्व-जघन्य लब्धिस्थान कषायकुशील और पुलाक मुनिके होते हैं। ये दोनों मुनि असंख्येय स्थानों तक साथ-साथ जाते हैं, उसके बाद पुलाकमुनि नीचे विच्छिन्न हो जाता है—नीचे रह जाता है और कषायकुशील असंख्येय स्थान तक आगे चला जाता है ॥८१–८२॥ तदनन्तर बकुश और दोनों प्रकारके कुशील साथ-साथ असंख्यात स्थानों तक जाते हैं, उसके बाद बकुश नीचे रह जाता है और दोनों कुशील आगे बढ़ जाते हैं। तदनन्तर असंख्येय स्थान तक साथ-साथ जाकर प्रतिसेवनाकुशील नीचे छूट जाता है और कषायकुशील असंख्येय स्थान आगे चला जाता है। इसके आगे कषायकुशील भी निवृत्त हो जाता है। तदनन्तर कषायरहित संयमके स्थान प्रकट होते हैं और उन्हें निर्ग्रन्थ मुनि प्राप्त करता है। वह असंख्येय स्थानों तक जाकर पीछे छूट जाता है ॥८३–८५॥ इसके आगे संयमका एक स्थान रहता है जिसे अनन्तगुण रूप ऋद्धियोंको धारण करनेवाला स्नातक प्राप्त करता है और वह वहाँ कर्मोंका अन्त कर निर्वाणको प्राप्त होता है ॥८६॥

---

१. कृष्णलेश्यादित्रितयं तयोः कथमिति चेदुच्यते—तयोरुपकरणासक्तिसंभवात् आर्तध्यानं कदाचित्संभवति, आर्तध्यानेन च कृष्णादि लेश्यात्रितयं संभवतीति । २. कृतकर्मांतो म० ।

[1]क्षेत्रकालादिभिः सिद्धाः साध्या द्वादशभिस्तु ते । अनुयोगैर्यथायोग्यं नयद्वयविवक्षया ॥८७॥
सिद्धिक्षेत्रे मता सिद्धिरात्माकाशप्रदेशयोः । प्रत्युत्पन्नप्रतिग्राहिनययोगाद्विशिनाम् ॥८८॥
कर्मभूमिषु सर्वासु जन्म प्रति च संहृतिम् । संसिद्धिर्मानुषे क्षेत्रे भूतग्राहिनयेक्षया ॥८९॥
एकस्मिन् समये कालात्प्रत्युत्पन्ननयेक्षया । भूतग्राहिनयेनातो जन्मतोऽस्त्यविशेषतः ॥९०॥
उत्सर्पिण्यवसर्पिण्योर्जातः सिद्धयति जन्मवान् । विशेषेणावसर्पिण्यां तृतीयान्तचतुर्थयोः ॥९१॥
दुःषमायां तु संजातो दुःषमायां न सिद्धयति । उत्सर्पिण्यवसर्पिण्योः संहारात्सर्वदा पुनः ॥९२॥
सिद्धिः सिद्धिगतौ ज्ञेया सुमनुष्यगतौ यथा । अवेदत्वेन लिङ्गेन भावतस्तु त्रिवेदतः ॥९३॥
न द्रव्याद्द्रव्यतः सिद्धिः पुल्लिङ्गेनैव निश्चिता । निर्ग्रन्थेन च लिङ्गेन सग्रन्थेनाथवा न वा ॥९४॥
तीर्थसिद्धिर्द्विधा तीर्थकारीतरविकल्पतः । सति तीर्थकरे सिद्धा असतीतीतरे द्विधा ॥९५॥
सिद्धिरव्यपदेशेन यथाख्येन वा पुनः । चतुर्भिः पञ्चभिर्वापि चारित्रैरुपजायते ॥९६॥

क्षेत्र, काल आदि बारह अनुयोगोंके द्वारा सिद्धोंमें भूतपूर्व प्रज्ञापन और प्रत्युत्पन्न-ग्राही नयकी अपेक्षा भेद सिद्ध करने योग्य हैं ॥ ८७ ॥ क्षेत्रअनुयोगसे जब विचार करते हैं तब प्रत्युत्पन्नग्राही नयकी अपेक्षा मुक्त जीवोंकी सिद्धि, सिद्धिक्षेत्रमें अथवा आत्मप्रदेशमें अथवा आकाशके प्रदेशोंमें होती है ॥ ८८ ॥ और भूतग्राही नयकी अपेक्षा जन्मसे पन्द्रह कर्मभूमियोंमें तथा संहरणसे मनुष्यलोक अर्थात् अढाई द्वीपमें होती है ॥८९॥ कालअनुयोग-से विचार करनेपर यह जीव प्रत्युत्पन्न नयकी अपेक्षा एक समयमें सिद्ध होता है और भूत-ग्राही नयकी अपेक्षा जन्मसे सामान्यतया उत्सर्पिणी और अवसर्पिणीमें उत्पन्न हुआ जीव सिद्ध होता है और विशेष रूपसे अवसर्पिणीको तृतीय कालके अन्तमें तथा चतुर्थ कालमें सिद्ध होता है। चतुर्थ कालका उत्पन्न हुआ जीव दुःषमा नामक पञ्चम कालमें सिद्ध हो सकता है परन्तु दुःषमाका उत्पन्न हुआ दुःषमामें सिद्ध नहीं होता। संहरणकी अपेक्षा उत्सर्पिणी अवसर्पिणीके सभी कालोंमें सिद्ध होता है। भावार्थ—जिस समय भरत और ऐरावतक्षेत्रमें प्रथम आदिकाल विद्यमान रहते हैं उस समय यदि कोई व्यन्तरादि देव किसी विदेहक्षेत्रके मुनिको संहरण कर भरत अथवा ऐरावतक्षेत्रमें छोड़ दे तो उनकी वहाँसे सिद्धि हो सकती है ॥९०–९२॥ गतिअनुयोगसे विचार करनेपर सिद्धिगतिमें अथवा मनुष्यगतिमें सिद्धि होती है। लिङ्गअनुयोगसे विचार करनेपर प्रत्युत्पन्नग्राही नयकी अपेक्षा अवेदसे सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा भाववेदसे तीनों वेदोंमें सिद्धि होती है। द्रव्यवेदकी अपेक्षा तीनों वेदोंसे सिद्धि नहीं होती सिर्फ पुरुषवेदसे ही होती है। अथवा लिङ्गका अर्थ वेष भी हो सकता है इसलिए प्रत्युत्पन्न नयकी अपेक्षा निर्ग्रन्थ लिङ्गसे ही सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा सग्रन्थ लिङ्गसे होती भी है और नहीं भी होती है ॥९३–९४॥ तीर्थअनुयोगसे विचार करनेपर सिद्धि दो प्रकारकी होती है, कोई तीर्थंकर होकर सिद्ध होता है और कोई सामान्य केवली होकर सिद्ध होता है। अथवा कोई तीर्थंकरके विद्यमान रहते सिद्ध होता है और कोई तीर्थंकरके मोक्ष चले जानेपर उनके तीर्थमें सिद्ध होता है ॥९५॥ चारित्रअनुयोगकी अपेक्षा विचार करनेपर प्रत्युत्पन्नग्राही नयकी अपेक्षा एक यथाख्यात चारित्रसे ही सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा चार अथवा पाँच चारित्रोंसे होती है। भावार्थ—यथाख्यातके पहले सामायिक, छेदोपस्थापना और सूक्ष्म-

---

1. 'क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसंख्याल्पबहुत्वतः साध्याः।' ॥ ९ ॥ त० सू०, दशमाध्याय ।

सिद्धिः प्रत्येकबुद्धानां स्वतो बोधिमुपेयुषाम् । तथा बोधितबुद्धानां परतो बोधिकामिनाम् ॥९७॥
[1]सिद्धिर्ज्ञानविशेषैः स्यादेकद्वित्रिचतुष्ककैः । अवगाहेन चोत्कृष्टजघन्यान्तर्भिदावता ॥९८॥
अवगाहनमुत्कृष्टमूनं पञ्चधनुःशती । [2]पञ्चविंशा च देशोनारत्नयोऽर्धचतुर्थकाः ॥९९॥
मध्येऽनेकविकल्पास्तु यथासंभवमीरिताः । तत्र सिद्ध्यति चैतस्मिन्नेकस्मिन्नवगाहने ॥१००॥
अन्तरः शून्यकालः स्यादन्तरं सिद्ध्यतां पुनः । जघन्येनैकसमयो मासानां षट्कमन्यथा ॥१०१॥
जघन्येनैक एवैकसमये सिद्ध्यति ध्रुवम् । तथोत्कर्षेणाष्टशतसंख्यास्ते संख्यया स्मृताः ॥१०२॥
क्षेत्रादिभेदभिन्नानां संख्याभेदः परस्परम् । यस्तदल्पबहुत्वं च सिद्धिक्षेत्रे न विद्यते ॥१०३॥
भूतपूर्वव्यपेक्षातश्चिन्त्यते तत्तु तद्यथा । जन्मतः संहृतेश्चेति क्षेत्रसिद्धा द्विधा मताः[3] ॥१०४॥
अल्पे संहारसिद्धास्ते जन्मसिद्धास्तु तत्त्वतः । स्युः संख्येयगुणाः सर्वे सार्वसर्वज्ञशासने ॥१०५॥
ऊर्ध्वलोकस्य सिद्धा ये स्तोकास्तेऽधो जगद्गताः । स्युः संख्येयगुणास्तिर्यग्लोकसिद्धास्तथा ततः ॥१०६॥

साम्परायचारित्र अनिवार्य रूपसे सभीके होते हैं और परिहारविशुद्धि किन्हीं-किन्हींके होता है इसलिए जिनके परिहारविशुद्धि नहीं होगा उनके चार चारित्रोंसे और जिनके परिहारविशुद्धि होगा उनके पाँच चारित्रोंसे सिद्धि होती है, यह भूतार्थग्राही नयकी अपेक्षा है। प्रत्युत्पन्नग्राही नयकी अपेक्षा चौदहवें गुणस्थानमें एक परमयथाख्यात चारित्र ही होता है इसलिए एक चारित्रसे ही सिद्धि प्राप्त होनेका कथन है ॥ ९६ ॥ प्रत्येक बुद्ध और बोधितबुद्ध-अनुयोगसे विचार करनेपर प्रत्येक बुद्ध जो कि अपने-आप रत्नत्रयको प्राप्त होते हैं और बोधित बुद्ध जो कि दूसरोंके उपदेशसे रत्नत्रय प्राप्त करते हैं—दोनोंको सिद्धि प्राप्त होती है—दोनों ही मोक्ष जाते हैं ॥९७॥ ज्ञान अनुयोगसे विचार करनेपर प्रत्युत्पन्नग्राही नयकी अपेक्षा एक केवलज्ञानसे ही सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा दो, तीन और चार ज्ञानोंसे सिद्धि होती है। भावार्थ—किन्हीं जीवोंकी केवलज्ञानके पूर्व मति और श्रुतमें दो ज्ञान होते हैं। किन्हींको मति, श्रुत, अवधि अथवा मति, श्रुत, मनःपर्यय ये तीन ज्ञान होते हैं। और किन्हींको मति, श्रुत, अवधि, मनःपर्यय ये चार ज्ञान होते हैं। अवगाहना अनुयोगसे विचार करनेपर अवगाहनाके उत्कृष्ट, जघन्य और मध्यमके भेदसे तीन भेद होते हैं। इनमें मुक्त जीवोंकी उत्कृष्ट अवगाहना कुछ कम पाँच-सौ पचीस धनुष है और जघन्य अवगाहना कुछ कम साढ़े तीन हाथ है। मध्यम अवगाहनाके यथासम्भव अनेक विकल्प कहे गये हैं। इन अवगाहनाओंमें-से जीव किसी एक अवगाहनासे सिद्ध होता है ॥९८–१००॥ अन्तर अनुयोगकी अपेक्षा विचार करनेपर अन्तरका अर्थ शून्यकाल—विरहकाल होता है सो सिद्ध होनेवाले जीवोंमें जघन्य अन्तर एक समयका और उत्कृष्ट अन्तर छह माहका होता है ॥१०१॥ संख्या अनुयोगकी अपेक्षा विचार करनेपर जघन्यरूपसे एक समयमें एक ही जीव सिद्ध होता है और उत्कृष्टतासे एक सौ आठ जीव तक सिद्ध होते हैं ॥१०२॥ अल्पबहुत्व अनुयोगकी अपेक्षा विचार करनेपर क्षेत्रादि भेदोंसे भिन्न जीवोंमें जो परस्पर संख्याका भेद है वह अल्पबहुत्व कहलाता है। यह अल्पबहुत्व प्रत्युत्पन्नग्राही नयकी अपेक्षा सिद्धिक्षेत्रमें नहीं है किन्तु भूतार्थग्राही नयकी अपेक्षा उसका कुछ विचार किया जाता है। क्षेत्रसिद्ध जीव जन्म और संहरणकी अपेक्षा दो प्रकारके माने गये हैं। इनमें संहरणसिद्ध थोड़े हैं और जन्मसिद्ध, सर्वहितकारी सर्वज्ञ जिनेन्द्रके शासनमें संहरण सिद्धोंकी अपेक्षा संख्यातगुणे बतलाये गये हैं ॥ १०३–१०५ ॥ ऊर्ध्वलोकसे सिद्ध होनेवाले थोड़े हैं, उनसे संख्यातगुणे अधोलोकसे सिद्ध होनेवाले हैं और उनसे संख्यातगुणे तिर्यग्लोकसे

---

१. सिद्धिर्ज्ञानविशेषैरेकद्वित्रिचतुष्ककैः म० । २. पञ्चविंशा म०, पञ्चविंशाव ख० । ३. मता म० ।

स्तोकाः समुद्रसिद्धास्तु स्युः संख्येयगुणाः पुनः । द्वीपसिद्धा इतीहेत्थमविशेषेण[1] भाषिताः ॥१०७॥
[2]लवणोदेऽत्र ये सिद्धाः सर्वस्तोकास्तु ते स्तुताः । कालोदसिद्धा बोद्धव्यास्तत्संख्येयगुणाः सदा ॥१०८॥
ये जम्बूद्वीपसिद्धास्ते स्युः संख्येयगुणास्तथा । धातकीखण्डसिद्धाश्च पुष्करद्वीपगास्तथा ॥१०९॥
यथा क्षेत्रविभागेन प्रोक्ताल्पबहुता तथा । सा कालादिविभागेन वेदितव्या यथागमम्[3] ॥११०॥
इति दृग्ज्ञानचारित्रतपसामत्युपासकाः । सोमदत्तादयोऽन्त्ये ते पञ्च भूत्वारणाच्युते ॥१११॥
देवाः सामानिका भोगं द्वाविंशत्यब्धिजीविनः । भुञ्जानास्तस्थुरत्यन्तशुद्धदर्शनदर्शनाः ॥११२॥
नागश्रीरपि भूत्वाप फलं धूमप्रभावनौ । अनुभूय महादुःखं सा सप्तदशसागरम् ॥११३॥
भूत्वा स्वयंप्रभद्वीपे दुष्टो दृष्टिविषोरगः । त्रिसागरोपमायुष्कां मृत्वागाद्वालुकाप्रभाम् ॥११४॥
तत्रानुभूय [4]दुःखौघांश्चिरादुद्धृत्य पापतः । [5]त्रसस्थावरकायेषु सानयत्सागरद्वयम् ॥११५॥
ततो मातङ्गकन्याभूच्चम्पायां साऽन्यदा मुनेः । समाधिगुप्ततः कृत्वा मधुमांसादिवर्जनम् ॥११६॥
जीवितान्ते सुबन्धोः स्याच्चम्पायामेव वैश्यतः । धनवत्यां सुता जाता नाम्ना च सुकुमारिका ॥११७॥
पापानुबन्धदोषेण सुदुर्गन्धशरीरिका । रूपवत्यपि विद्वेष्या जाता युवजनस्य सा ॥११८॥
वैश्यस्य धनदेवस्याशोकदत्तासमुद्भवौ । तनयौ जिनदेवश्च जिनदत्तश्च विश्रुतौ ॥११९॥
कन्यां तामपि दुर्गन्धां वृतां बन्धुभिरग्रजः । परित्यज्य प्रवव्राज सुव्रतः सुव्रतान्तिके ॥१२०॥

सिद्ध होनेवाले हैं ॥१०६॥ समुद्रसे सिद्ध होनेवाले थोड़े हैं, इनसे संख्यातगुणे द्वीपसे सिद्ध होनेवाले हैं, यह सामान्यकी अपेक्षा कथन है, विशेषकी अपेक्षा लवणसमुद्रमें जो सिद्ध होते हैं, वे सबसे थोड़े हैं, उनसे संख्यातगुणे कालोदधिसे सिद्ध होनेवाले हैं ॥१०७-१०८॥ जो जम्बूद्वीपसे सिद्ध होते हैं वे संख्येयगुणे हैं, उनसे संख्यातगुणे धातकीखण्डसे होनेवाले सिद्ध हैं और उनसे संख्यातगुणे पुष्करद्वीपसे होनेवाले सिद्ध हैं ॥१०९॥ जिस प्रकार क्षेत्रविभागकी अपेक्षा अल्पबहुत्वका कथन किया है उसी प्रकार आगमके अनुसार काल आदि विभागकी अपेक्षा भी जानना चाहिए ॥११०॥

इस प्रकार सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्रकी अत्यन्त उपासना करनेवाले सोमदत्त आदि पाँचों जीव अन्त समय मरकर आरण अच्युत स्वर्गमें सामानिक जातिके देव हुए। वहाँ बाईससागरकी उनकी आयु थी। अत्यन्त शुद्ध सम्यग्दर्शनको धारण करनेवाले वे देव उत्तम भोग भोगते हुए वहाँ बाईस सागर तक स्थित रहे ॥१११-११२॥ विषमिश्रित भोजन देनेवाली नागश्री भी मरकर धूमप्रभानामक पाँचवें नरकके फलको प्राप्त हुई। वह सत्तरह सागर तक वहाँके महादुःख भोगकर निकली और स्वयंप्रभद्वीपमें दृष्टिविष नामका दुष्ट सर्प हुई। तदनन्तर मरकर तीन सागरकी आयुवाली वालुकाप्रभा नामक तीसरी पृथ्वीमें पहुँची ॥११३-११४॥ वहाँ पापके फलस्वरूप चिरकाल तक दुःखोंका समूह भोगकर निकली और त्रसस्थावर पर्यायमें दो सागर तक भटकती रही ॥११५॥ तदनन्तर चम्पापुरीमें एक चण्डालकी कन्या हुई। वहाँ उसने एक दिन समाधिगुप्त नामक मुनिराजके पास मधु-मांसादिका त्याग किया ॥११६॥ जिससे अन्त समय उसी चम्पापुरीमें सुबन्धु वैश्यकी धनवती स्त्रीसे सुकुमारिका नामकी पुत्री हुई ॥ ११७ ॥ पापके पूर्व संस्कारसे उसके शरीरसे तीव्र दुर्गन्ध आती थी इसलिए रूपवती होनेपर भी वह युवाजनोंके द्वेषका पात्र हुई ॥ ११८ ॥ उसी नगरीमें धनदेव वैश्यकी अशोकदत्ता नामक स्त्रीसे उत्पन्न जिनदेव और जिनदत्त नामक दो पुत्र रहते थे ॥ ११९ ॥ जिनदेवके कुटुम्बी जनोंने उस दुर्गन्धा कन्याके साथ उसका विवाह

१. —मध्यभेदेन म० । २. लवणोदे त्रयः म० । ३. एष सर्व उल्लेखः 'क्षेत्रकालगति—इत्यादिसूत्रस्य सर्वार्थसिद्धिटीकानुप्राणितो वर्तते । ४. दुःखौघं क० । ५. तत्र स्थावर—म० ।

कनीयान् जिनदत्तस्तां बन्धुवाक्योपरोधतः[1] । परिणीयापि तत्याज दुर्गन्धामतिदूरतः ॥१२१॥
आत्मानमपि निन्दन्ती सोपवासान्यदा च सा । क्षान्त्यार्यामार्यिकायुक्तां भोजयित्वातिभक्तितः ॥१२२॥
अभिवन्द्य तदापृच्छदार्यिके केन हेतुना । इमे परमरूपिण्यौ स्थिते तपसि दुष्करे ॥१२३॥
सेति पृष्टा जगौ हेतुमार्ययोस्तपसस्तयोः । प्रबोधनाय तस्याश्च करुणापरिनोदिता ॥१२४॥
श्रूयतां सुकुमारि त्वं सुकुमारकुमारिके । हेतुर्या येन तापस्ये तपस्विन्यौ व्यवस्थिते ॥१२५॥
सौधर्माधिपतेर्देव्याविमे पूर्वत्र जन्मनि । विमला सुप्रभा चेति सुप्रसिद्धे बभूवतुः ॥१२६॥
ते नन्दीश्वरयात्रायां जिनपूजार्थमागते । कथञ्चिज्जातसंवेगे चिन्तान्तरमिति श्रिते ॥१२७॥
मनुष्यभवसंप्राप्तौ करिष्यावो महत्तपः । आवां स्त्रीत्वनिमित्तं तु येन दुःखं न दृश्यते ॥१२८॥
इति संगीर्य ते देव्यौ दिवः प्रच्युत्य भूपतेः । श्रीषेणस्येह साकेते श्रीकान्तायां सुयोषिति ॥१२९॥
हरिषेणा सुता ज्येष्ठा श्रीषेणा च कनीयसी । जाते जाते च कान्ते ते यौवनश्रीविभूषिते ॥१३०॥
स्वयंवरविधौ स्मृत्वा पूर्वं जन्म च संगरम् । बन्धुलोकं परित्यज्य कुमार्यौ तपसि स्थिते ॥१३१॥
इति श्रुत्वार्यिकावाक्यं निर्विण्णा सुकुमारिका । तदन्ते सा प्रवव्राज संसारभयवेदिनी ॥१३२॥
तपस्विनीभिरन्याभिस्तपस्यन्ती तपस्विनी । कालं नीतवती नीत्या तपसा शोषिताङ्गिका ॥१३३॥

करना चाहा पर उसे वह स्वीकृत नहीं था इसलिए वह उस कन्याको छोड़ सुव्रत मुनिके समीप दीक्षित हो गया ॥ १२० ॥ बन्धुजनोंके उपरोधसे छोटे भाई जिनदत्तने यद्यपि उसके साथ विवाह कर लिया परन्तु दुर्गन्धके कारण उसे दूरसे ही छोड़ दिया ॥ १२१ ॥ इस घटनासे सुकुमारिकाने अपनी बहुत निन्दा की। एक दिन उसने उपवास किया तथा अनेक आर्यिकाओं-से युक्त क्षान्ता नामकी आर्यिकाको बड़ी भक्तिसे भोजन कराया ॥ १२२ ॥ क्षान्ता आर्यिकाके साथ दो आर्यिकाएँ परम रूपवती तथा कठिन तपन तपनेवाली थीं उन्हें देख उसने क्षान्ता आर्याको नमस्कार कर उनसे पूछा कि हे आर्ये ! ये दो रूपवती आर्यिकाएँ कठिन तपमें किस कारण स्थित हैं ? ॥ १२३ ॥ इस प्रकार पूछे जानेपर दयासे प्रेरित क्षान्ता आर्याने सुकुमा-रिकाको सम्बोधन करनेके लिए उन दो आर्यिकाओंके तपका कारण कहा ॥१२४॥ उन्होंने कहना प्रारम्भ किया—कि हे सुकुमारि ! सुन, ये सुकुमार कुमारिकाएँ जिस कारण तपस्विनी बनकर तप करनेमें लगी हुई हैं ॥ १२५ ॥

ये दोनों पूर्व भवमें सौधर्म स्वर्गके इन्द्रकी विमला और सुप्रभा नामकी देवियाँ थीं ॥ १२६ ॥ एक दिन ये नन्दीश्वर पर्वकी यात्रामें जिनपूजाके लिए आयी थीं कि किसी कारण संसारसे विरक्त हो चित्तमें इस प्रकारका विचार करने लगीं कि यदि हम मनुष्यभवको प्राप्त हों तो महातप करेंगी। ऐसा महातप कि जिससे फिर यह स्त्री-पर्यायसम्बन्धी दुख दिखायी नहीं देगा ॥ १२७-१२८ ॥ इस प्रकार प्रतिज्ञा कर वे देवियाँ स्वर्गसे च्युत हुईं और यहाँ अयोध्या नगरीके राजा श्रीषेणकी श्रीकान्ता नामक स्त्रीसे हरिषेणा नामकी बड़ी और श्रीषेणा नामकी छोटी पुत्री हुईं। समय पाकर ये दोनों ही रूपवती और यौवनरूपी लक्ष्मीसे सुशो-भित हो गयीं ॥ १२९-१३०॥ इन दोनों कुमारियोंका स्वयंवर हो रहा था कि उसी समय इन्हें अपने पूर्व जन्म तथा की हुई प्रतिज्ञाका स्मरण हो आया जिससे ये बन्धुजनोंको छोड़ तत्काल तप करने लगीं ॥ १३१ ॥

क्षान्ता आर्यिकाके उक्त वचन सुन सुकुमारिका भी विरक्त हो गयी और संसारसे भयभीत हो उन्हींके समीप दीक्षित हो गयी ॥१३२॥ अन्य तपस्विनियोंके साथ तप करती हुई

१.-रोधनः म० ।

वसन्तसेनां गणिकां कामुकैः परिवेष्टिताम् । दृष्ट्वा वनविहारेऽसावेकदा क्रीडनोद्यताम् ॥१३४॥
निदानमकरोत्क्लिष्टा दुर्यशःप्राप्तिकारणम् । सौभाग्यमीदृशं [1]मेऽन्यजन्मन्यस्त्विति सादरा ॥१३५॥
स्वभर्तुः सोमभूतेस्तु मृत्वाभूदारणाच्युते । देवी सा पञ्चपञ्चाशत्पल्यतुल्यनिजस्थितिः ॥१३६॥
च्युत्वा ते पाण्डुराजस्य सोमदत्तादयस्त्रयः । कुन्त्यां युधिष्ठिरो भीमः पार्थश्चेत्यभवन्[2] सुताः ॥१३७॥
धनश्रीपूर्वको देवो मित्रश्रीपूर्वकस्तथा । नकुलः सहदेवश्च माद्र्यां जातौ शरीरजौ ॥१३८॥
सा कुमारी दिवश्च्युत्वा द्रुपदस्य शरीरजा । जाता दृढरथाख्यायां स्त्रियां द्रौपद्यभिख्यया ॥१३९॥
द्रौपद्यर्जुनयोर्योगः पूर्वस्नेहेन साम्प्रतम् । सुव्यक्तं साम्प्रतं जातो राधावेधपुरस्सरः ॥१४०॥
ज्येष्ठानां भविता सिद्धिस्त्रयाणामिह जन्मनि । सर्वार्थसिद्धिर्हि तयोरन्त्यपाण्डवयोरिह ॥१४१॥
सम्यग्दर्शनशुद्धाया द्रौपद्यास्तपसः [3]फलात् । आरणाच्युतदेवत्वपूर्विका सिद्धिरिष्यते ॥१४२॥
इत्थं ते पाण्डवाः श्रुत्वा धर्मं पूर्वभवांस्तथा । संवेगिनो जिनस्यान्ते संयमं प्रतिपेदिरे ॥१४३॥
कुन्ती च द्रौपदी देवी सुभद्राद्याश्च योषितः । राजीमत्याः समीपे ताः समस्तास्तपसि स्थिताः ॥१४४॥
ज्ञानदर्शनचारित्रैर्व्रतैः समितिगुप्तिभिः । आत्मानं भावयन्तस्ते पाण्डवाद्यास्तपोऽचरन् ॥१४५॥

शार्दूलविक्रीडितम्

[4]कुन्ताग्रेण वितीर्णभैक्ष्यनियमः क्षुत्क्षामगात्रैः[5] क्षमः
षण्मासैरथ भीमसेनमुनिपो[6] निष्ठाप्य स्वान्तक्लमम्[7] ।

वह समय व्यतीत करने लगी। नीतिपूर्वक—आगमानुकूल तप करनेसे उसका शरीर सूख गया ॥ १३३ ॥

एक दिन उसी गाँवकी गणिका वसन्तसेना कामीजनोंसे वेष्टित हो वन-विहारके लिए आयी। क्रीड़ा करनेमें उद्यत उस गणिकाको देखकर आर्यिका सुकुमारिकाने क्लिष्ट परिणामोंसे युक्त हो बड़े आदरसे अपयशकी प्राप्तिमें कारणभूत यह निदान किया कि अन्य जन्ममें मुझे भी ऐसा सौभाग्य प्राप्त हो ॥ १३४-१३५ ॥ आयुके अन्तमें मरकर वह आरणाच्युत युगलमें अपने पूर्व भवके पति सोमभूति देवकी पचपन पल्यकी आयुवाली देवी हुई ॥ १३६ ॥ सोमदत्त आदि तीनों भाइयोंके जीव स्वर्गसे च्युत हो पाण्डु राजाकी कुन्ती नामक स्त्रीमें युधिष्ठिर, भीम और अर्जुन नामक पुत्र हुए ॥ १३७ ॥ और धनश्री तथा मित्रश्रीके जीव देव भी उन्हीं पाण्डु राजाकी माद्री नामक दूसरी स्त्रीसे नकुल और सहदेव नामक पुत्र हुए ॥ १३८ ॥ सुकुमारिकाका जीव भी स्वर्गसे च्युत हो राजा द्रुपदकी दृढरथा नामक स्त्रीसे द्रौपदी नामकी पुत्री हुई ॥१३९॥ पूर्व भवके स्नेहके कारण इस भवमें भी राधावेध पूर्वक द्रौपदी और अर्जुनका संयोग हुआ है ॥ १४० ॥ तीन ज्येष्ठ पाण्डव—युधिष्ठिर, भीम और अर्जुन इसी जन्ममें मोक्षको प्राप्त होंगे और अन्तिम दो पाण्डव—नकुल और सहदेवको सर्वार्थसिद्धि प्राप्त होगी ॥ १४१ ॥ सम्यग्दर्शनसे शुद्ध द्रौपदी तपके फलस्वरूप आरणाच्युत युगलमें देव होगी और उसके बाद मनुष्यपर्याय रख मोक्ष जायेगी ॥ १४२ ॥

इस प्रकार वे पाण्डवधर्म तथा पूर्व भव श्रवण कर संसारसे विरक्त हो श्री नेमि जिनेन्द्रके समीप संयमको प्राप्त हो गये ॥ १४३ ॥ कुन्ती, द्रौपदी तथा सुभद्रा आदि जो स्त्रियाँ थीं वे सब राजीमती आर्यिकाके समीप तपमें लीन हो गयीं ॥ १४४ ॥ सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र, महाव्रत, समिति तथा गुप्तियोंसे अपनी आत्माके स्वरूपका चिन्तवन करते हुए वे पाण्डव आदि तप करने लगे ॥१४५॥ उन सब मुनियोंमें भीमसेन मुनि बहुत ही शक्तिशाली

---

१. मेऽन्ये जन्मन्यस्त्विति म० । २. –त्यभवत्सुताः म० । ३. क्रमात् म० । ४. कुन्तमग्रेण म०, ख० । ५. क्षुत्क्षामगात्रक्षमः क० । ६. मुनिपो इति पाठः प्रतिभाति । मुनिभिर्निष्ठाप्य क०, ख०, ङ०, म० । ७. स्वान्तकर्म म०, ङ०, सान्तकर्मं क० ।

षष्ठाद्यैरुपवासभेदविविधैर्भिक्षाभिमुख्यैः स्थितै-
ज्येष्ठार्यैर्विजहार योगिभिरिलां जैनागमाम्भोधिभिः ॥१४६॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ युधिष्ठिरादिपञ्चपाण्डवप्रव्रज्यावर्णनो नाम चतुःषष्टितमः सर्गः ॥६४॥

थे। उन्होंने भालेके अग्रभागसे दिये हुए आहारको ग्रहण करनेका नियम लिया था, क्षुधासे उनका शरीर अत्यन्त दुर्बल हो गया था और छह महीनेमें उन्होंने इस वृत्ति परिसंख्यात तप-को पूरा कर हृदयका श्रम दूर किया था। युधिष्ठिर आदि मुनियोंने भी बड़ी श्रद्धाके साथ वेला तेला आदि उपवास किये थे। इस प्रकार मुनिराज भीमसेनने जैनागमके सागर युधिष्ठिर आदि मुनियोंके साथ पृथिवीपर विहार किया ॥ १४६ ॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्यरचित हरिवंशपुराणमें युधिष्ठिर आदि पाँच पाण्डवोंकी दीक्षाका वर्णन करनेवाला चौसठवाँ सर्ग समाप्त हुआ ॥६४॥

पञ्चषष्टितमः सर्गः

अथ सर्वामराकीर्णस्तीर्थकृत्कृतदेशनः । उत्तरापथतो देशं सुराष्ट्रमभितो ययौ ॥१॥
उत्तरायणमुत्क्रम्य दक्षिणायनमागते । जिनार्के तेजसो वृत्तिः प्राग्वत्सर्वत्रगाभवत् ॥२॥
आर्हन्त्यविभवोपेते महीं विहरतीश्वरे । दक्षिणा दक्षिणा देशा रेजिरे[1] स्वर्गविभ्रमाः ॥३॥
तत्रोर्जयन्तमन्तेऽसावन्तकल्याणभूतिभाक् । आरुरोह स्वभावेन नृसुरासुरसेवितः ॥४॥
पूर्ववत्समवस्थानभूमिस्तत्राभवत्प्रभोः । तिर्यग्मानवदेवौघैरनघैः समधिष्ठिता ॥५॥
धर्मं तत्र जिनोऽवोचद्रत्नत्रितयपावनम् । स्वर्गापवर्गसौख्यैकसाधनं साधुसम्मतम् ॥६॥
निषद्यायां यथाद्यायां पूर्वं सर्वहितो जिनः । अन्त्यायां च तथा धर्मं स सविस्तरमब्रवीत् ॥७॥
ऊर्ध्वज्वलनमुष्णत्वं यथाग्नेः शीतताप्यपाम् । जवनं मरुतस्तिर्यग्भास्वरत्वं च तेजसः ॥८॥
अमूर्तत्वं यथा व्योम्नः स्वभावाद्[2]धारणं क्षितेः । कृतार्थस्य जिनेन्द्रस्य तथा धर्मस्य देशनम् ॥९॥
अघातिकर्मणामन्तं ततो योगनिरोधकृत् । कृत्वानेकशतैः सिद्धिं जिनेन्द्रो मुनिभिर्ययौ ॥१०॥
परिनिर्वाणकल्याणपूजामन्त्यशरीरगाम् । चतुर्विधसुरा जैनीं चक्रुः शक्रपुरोगमाः ॥११॥

अथानन्तर समस्त देवोंसे युक्त भगवान् नेमिनाथ उपदेश करते हुए उत्तरापथसे सुराष्ट्र देशकी ओर आये ॥१॥ जिनेन्द्ररूपी सूर्य यद्यपि उत्तरायणको उल्लंघन कर दक्षिणायनको प्राप्त हुए थे तथापि उनके तेजकी वृत्ति पहले ही-के समान सर्वत्र व्याप्त थी ॥ भावार्थ—जब सूर्य उत्तरायणसे दक्षिणायनकी ओर आता है तब उसका तेज कुछ कम हो जाता है परन्तु नेमिजिनेन्द्ररूपी सूर्यका तेज उत्तरायण—उत्तर दिशासे दक्षिणायन—दक्षिण दिशामें आनेपर भी कम नहीं हुआ था, पहले ही के समान सर्वत्र व्याप्त था ॥२॥ समवसरणकी विभूतिसे युक्त नेमिजिनेन्द्र जब दक्षिण दिशामें विहार करते थे तब वहाँके देश स्वर्गके समान सुशोभित हो रहे थे ॥३॥ तदनन्तर जब अन्तिम समय आया तब निर्वाणकल्याणककी विभूतिको प्राप्त होनेवाले नेमिजिनेन्द्र मनुष्य, सुर और असुरोंसे सेवित होते हुए अपने-आप गिरनार पर्वतपर आरूढ हो गये ॥४॥ वहाँ पहले ही के समान फिरसे कलुषतारहित तिर्यञ्च मनुष्य और देवोंके समूहसे युक्त समवसरणकी रचना हो गयी ॥५॥ समवसरणके बीच विराजमान होकर जिनेन्द्र भगवान्ने स्वर्ग और मोक्षकी प्राप्तिका एक साधन, रत्नत्रयसे पवित्र एवं साधुसंमत धर्मका उपदेश दिया ॥६॥ जिस प्रकार सर्वहितकारी जिनेन्द्र भगवान्ने केवलज्ञान उत्पन्न होनेके बाद पहली बैठकमें विस्तारके साथ धर्मका उपदेश दिया था उसी प्रकार अन्तिम बैठकमें भी उन्होंने विस्तारके साथ धर्मका उपदेश दिया ॥७॥ जिस प्रकार अग्निमें ऊर्ध्वज्वलन और उष्णता, पानीमें शीतलता, वायुमें वेग, सूर्य चन्द्र आदि तेजस्वी पदार्थोंमें सब ओरसे प्रकाशमानता, आकाशमें अमूर्तिकपना और पृथिवीमें किसी पदार्थको धारण करनेकी क्षमता स्वभावसे ही होती है, उसी प्रकार कृतकृत्य जिनेन्द्र भगवान्का धर्मोपदेश भी स्वभावसे होता था किसीकी प्रेरणासे नहीं ॥८-९॥ तदनन्तर योगनिरोध करनेवाले भगवान् नेमिजिनेन्द्र अघातिया कर्मोंका अन्त कर अनेक सौ मुनियोंके साथ निर्वाण धामको प्राप्त हो गये ॥१०॥ जिनके आगे-आगे इन्द्र चल रहे थे ऐसे चारों निकायके देवोंने, भगवान्के

---

१. भ्रेजिरे क०, भेजिरे म० । २. स्वभावाद्वारणं म० ।

गन्धपुष्पादिभिर्दिव्यैः पूजितास्तनवः क्षणात् । जैनाद्या द्योतयन्त्यो द्यां विलीना विद्युतो यथा ॥१२॥
स्वभावोऽयं जिनादीनां शरीरपरमाणवः । मुञ्चन्ति स्कन्धतामन्ते क्षणात्क्षणरुचामिव ॥१३॥
ऊर्जयन्तगिरौ वज्री वज्रेणालिख्य [1]पाविनीम् । लोके सिद्धिशिलां चक्रे जिनलक्षणपङ्क्तिभिः[2] ॥१४॥
वरदत्तादिसंघं च वन्दित्वा वासवादयः । देवा नृपतयश्चापि ययुः सर्वे यथायथम् ॥१५॥
दशार्हादयो मुनयः षट्सहोदरसंयुताः । सिद्धिं प्राप्तास्तथान्येऽपि शम्बप्रद्युम्नपूर्वकाः ॥१६॥
ऊर्जयन्तादिनिर्वाणस्थानानि भुवने ततः । तीर्थयात्रागतानेकभव्यसेव्यानि रेजिरे ॥१७॥
ज्ञात्वा भगवतः सिद्धिं पञ्च पाण्डवसाधवः । शत्रुञ्जयगिरौ धीराः प्रतिमायोगिनः स्थिताः ॥१८॥
दुर्योधनान्वयस्तत्र स्थितो [3]क्षुयवरोधनः । श्रुत्वागत्याकरोद्वैरादुपसर्गं सुदुस्सहम् ॥१९॥
तप्तायोमयमूर्तीनि मुकुटानि ज्वलन्त्यलम् । कटकैः कटिसूत्रादि तन्मूर्धादिष्वयोजयत् ॥२०॥
रौद्रं दाहोपसर्गं ते मेनिरे हिमशीतलम् । धीराः कर्मविपाकज्ञाः कर्मक्षयकृतौ क्षमाः ॥२१॥
शुक्लध्यानसमाविष्टा भीमार्जुनयुधिष्ठिराः । कृत्वाष्टविधकर्मान्तं मोक्षं जग्मुस्त्रयोऽक्षयम् ॥२२॥
नकुलः सहदेवश्च ज्येष्ठदाहं निरीक्ष्य तौ । [4]अनाकुलितचेतस्कौ जातौ सर्वार्थसिद्धिजौ ॥२३॥

अन्तिम शरीरसे सम्बन्ध रखनेवाली निर्वाणकल्याणककी पूजा की ॥११॥ दिव्य गन्ध तथा पुष्प आदिसे पूजित, तीर्थंकर आदि मोक्षगामी जीवोंके शरीर, क्षण-भरमें बिजलीकी नाईं आकाशको देदीप्यमान करते हुए विलीन हो गये ॥१२॥ क्योंकि यह स्वभाव है कि तीर्थङ्कर आदिके शरीरके परमाणु अन्तिम समय बिजलीके समान क्षण-भरमें स्कन्धपर्यायको छोड़ देते हैं ॥१३॥ गिरनार पर्वतपर इन्द्रने वज्रसे उकेरकर इस लोकमें पवित्र सिद्धशिलाका निर्माण किया तथा उसे जिनेन्द्र भगवान्के लक्षणोंके समूहसे युक्त किया ॥१४॥ तदनन्तर वरदत्त आदि मुनियोंके संघकी वन्दना कर इन्द्रादि देव और राजा लोग सब यथायोग्य अपने-अपने स्थानपर चले गये ॥१५॥ समुद्रविजय आदि नौ भाई, देवकीके युगलिया छह पुत्र तथा शंब और प्रद्युम्नकुमार आदि अन्य मुनि भी गिरनार पर्वतसे मोक्षको प्राप्त हुए। इसलिए उस समयसे गिरनार आदि निर्वाण स्थान संसारमें विख्यात हुए और तीर्थयात्राके लिए आनेवाले अनेक भव्य जीवोंके द्वारा सेवित होते हुए सुशोभित होने लगे ॥१६-१७॥

धीर-वीर पाँचों पाण्डव मुनि, भगवान्को मोक्ष हुआ जान शत्रुञ्जय पर्वतपर प्रतिमायोगसे विराजमान हो गये ॥१८॥ उस समय वहाँ दुर्योधनके वंशका क्षुयवरोधन नामका कोई पुरुष रहता था। ज्यों ही उसने वहाँ पाण्डवोंका आना सुना त्यों ही आकर उसने वैर वश उनपर घोर उपसर्ग करना शुरू कर दिया ॥१९॥ उसने तपाये हुए लोहेके मुकुट, कड़े तथा कटिसूत्र आदि बनवाये और उन्हें अग्निमें अत्यन्त प्रज्वलित कर उनके मस्तक आदि स्थानोंमें पहिनाये ॥२०॥ पाण्डव मुनिराज अत्यन्त धीर-वीर थे, कर्मके उदयको जाननेवाले थे एवं कर्मोंका क्षय करनेमें समर्थ थे, इसलिए उन्होंने दाहके उस भयंकर उपसर्गको हिमके समान शीतल समझा था ॥२१॥ भीम, अर्जुन और युधिष्ठिर ये तीन मुनिराज तो शुक्लध्यानसे युक्त हो आठों कर्मोंका क्षय कर मोक्ष गये परन्तु नकुल और सहदेव बड़े भाईकी दाहको देख कुछ-कुछ आकुलितचित्त हो गये इसलिए सर्वार्थसिद्धिमें उत्पन्न हुए ॥२२-२३॥

१. पावनीं ख०, पावनं म० । २. युक्तिभिः म०, घ० । ३. युधवरोधनः घ०,म० । ४. ईषदाकुलितं चेतो ययोस्तौ ईषदर्थे नञ्प्रयोगः ।

नारदोऽपि नरश्रेष्ठः प्रव्रज्य तपसो बलात् । कृत्वा भवक्षयं मोक्षमक्षयं समुपेयिवान्[1] ॥२४॥
अन्येऽपि बहवो भव्याः सुरत्नत्रयधारिणः । मोक्षं प्राप्ताः परे स्वर्गमासन्नभवसंक्षयाः[2] ॥२५॥
तुङ्गिकाशिखरारूढो बलदेवोऽपि दुष्करम् । तपो नानाविधं चक्रे भवचक्रक्षयोद्यतः ॥२६॥
एकद्वित्र्यादिषण्मासपर्यन्तोपोषितैरसौ । कषायवपुषां चक्रे शोषणं पोषणं धृतेः ॥२७॥
कान्तारभिक्षया प्राणधारणां कर्तुमुद्यतः । भ्रमन् कान्तारमध्येऽन्यैर्व्यलोकि शशिविभ्रमः ॥२८॥
पुरग्रामादिषु क्ष्मातां श्रुत्वा वार्तां तथाविधाम् । पर्यन्तवासिनो भूपाः प्राप्ताः क्षुभितमानसाः ॥२९॥
शङ्काविषसमापन्नान्नानाप्रहरणान्वितान् । सिद्धार्थस्तान् तथालोक्य ससृजे सिंहसन्ततिम् ॥३०॥
मुनिपादसमीपे तान् सिंहानालोक्य भूभृतः । ते ज्ञातमुनिसामर्थ्याः प्रणम्योपशमं ययुः ॥३१॥
ततः प्रभृत्यसौ लोके नरसिंह इति श्रुतिम् । सिंहोरस्को हली प्राप्तः सिंहानुचरसंयतः ॥३२॥
एकं वर्षशतं कृत्वा तपो हलधरो मुनिः । समाराध्य परिप्राप्तः ब्रह्मलोके सुरेशताम् ॥३३॥
तत्र पद्मोत्तरे नाम्नि विमाने रत्नभास्वरे । देवदेवीगणाकीर्णे प्रासादोद्यानमण्डिते ॥३४॥

मनुष्योंमें श्रेष्ठ नारद भी दीक्षा ले तपके बलसे संसारका क्षय कर अविनाशी मोक्षको प्राप्त हुए ॥२४॥ समीचीन रत्नत्रयको धारण करनेवाले अन्य अनेक भव्य जीव भी मोक्षको प्राप्त हुए तथा निकट कालमें जिनके संसारका क्षय होनेवाला था ऐसे कितने ही जीव स्वर्ग गये ॥२५॥

तुङ्गीगिरिकी शिखरपर स्थित बलदेवने भी संसार-चक्रका क्षय करनेमें उद्यत हो नाना प्रकारका तप किया ॥२६॥ वे एक दिन, दो दिन, तीन दिनको आदि लेकर छह माह तकके उपवासोंसे कषाय और शरीरका शोषण तथा धैर्यका पोषण करते थे ॥२७॥ वनमें मिलनेवाली भिक्षासे प्राण धारण करनेके लिए उद्यत बलदेव मुनिराज, वनमें विहार करने लगे और चन्द्रमाका भ्रम उत्पन्न करनेवाले उन मुनिराजको लोगोंने देखा ॥२८॥ 'बलदेव वनमें विहार कर रहे हैं' यह बात नगरों तथा गाँवोंमें फैल गयी उसे सुन समीपवर्ती राजा क्षुभितचित्त हो वहाँ आ पहुँचे ॥२९॥ शङ्कारूपी विषसे युक्त तथा नाना प्रकारके शस्त्रोंसे सुसज्जित उन राजाओंको जब देव सिद्धार्थने देखा तो उस वनमें उसने सिंहोंके समूह रच दिये ॥३०॥ जब उन आगत राजाओंने मुनिराजके चरणोंके समीप सिंहोंको देखा तब वे उनकी सामर्थ्य जान नमस्कार कर शान्त भावको प्राप्त हो गये ॥३१॥ उसी समयसे बलदेव मुनिराज लोकमें नर-सिंह इस प्रसिद्धिको प्राप्त हो गये। वे सिंहके समान चौड़े वक्षःस्थलसे सुशोभित थे तथा सिंहरूपी सेवकोंसे युक्त थे ॥३२॥ इस प्रकार एक-सौ वर्ष तक तप कर बलदेव मुनिराजने अन्तमें समाधि धारण की और उसके फलस्वरूप ब्रह्मलोकमें इन्द्रके पदको प्राप्त हुए ॥३३॥ वहाँ देव-देवियोंके समूहसे युक्त, महल और उद्यानोंसे सुशोभित तथा रत्नोंके समान देदीप्यमान पद्म नामक विमानमें वे कोमल उपपाद शय्यापर उस प्रकार देव उत्पन्न हुए जिस प्रकार

---

१. नारदस्य मोक्षप्राप्तिरन्यदिगम्बरग्रन्थाद्विरुद्धा वर्तते, तेषु तस्य नरकगामित्वदर्शनात्। 'कलहप्पिया कदाइं धम्मरदा वासुदेवसमकाला। भव्वा णिरयगदिं ते हिंसादोसेण गच्छंति'। त्रिलोकसार गाथा ८३५॥ 'एदावइ अइरुद्दा पावणिहाणा हवंति सव्वे वे। कलहमहा जुज्झपिया अधोगया वासुदेवव्व' ॥१४७० त्रि० प्र० अथवा अत्र नारदपदेन वसुदेवस्य सोमश्रीजीवमुत्पन्नः पुत्रो ग्राह्यः-नारदो मरुदेवोऽपि सोमश्रीतनयौ वरौ। सर्ग ४८, श्लोक ५७ हरिवंशपुराणे। २. आसन्नभवसंक्षयाः म०।

उपपादशय्यायामुदपादि सकोऽमरः । महामणिरिवोदाररत्नाकरमहाक्षितौ ॥३५॥
भाषामनःशरीराक्षप्राणाहारप्रसिद्धिभिः । षड्भिः पर्याप्तिभिः सद्यः पर्याप्तोऽभूत्सुरोत्तमः ॥३६॥
शयने सर्वतोभद्रे वस्त्राभरणभूषितः । विबुधः सुखनिद्रान्ते यथाऽस्थ नवयौवनः ॥३७॥
विलोकमानमालोक्य सर्वैरमरयोषिताम् । सुराणामनुरक्तानामप्यसावभिनन्दितः ॥३८॥
चन्द्रादित्याधिकोदारप्रभावलयदेहभृत् । इति दध्यौ धृतध्यानः प्रमदापूर्णमानसः ॥३९॥
कोऽयं रम्यतमो देशः कोऽयं प्रमुदितो जनः । कोऽहं कात्र भवोऽयं मे धर्मः को वार्जितो मया ॥४०॥
बोधितः सुरमुख्यैः स भवप्रत्ययावधिः । विवेद सहसा देवः पौर्वापर्यमशेषतः ॥४१॥
ज्ञातपूर्वभवाशेषबन्धुर्बन्धुहितोद्यतः । प्राप्ताभिषेककल्याणः स्वीकृतात्मपरिच्छदः ॥४२॥
अवधिज्ञातकृष्णश्च गत्वाऽसौ वालुकाप्रभाम् । दृष्ट्वाऽनुजं निजं देवो दुःखितं दुःखितोऽभवत् ॥४३॥
महाप्रभावसंपन्ने देवे तत्र तथास्थिते । शब्दगन्धरसस्पर्शाः शुभतामशुभा ययुः ॥४४॥
एह्येहि कृष्ण योऽहं ते भ्राता ज्येष्ठो हलायुधः । ब्रह्मलोकाधिपो भूत्वा त्वत्समीपमिहागतः ॥४५॥
इत्युक्त्वा तं समुद्धृत्य स्वर्लोकं नेतुमुद्यते । देवे तस्य व्यलीयन्त गात्राणि नवनीतवत् ॥४६॥
ततः कृष्णो जगौ देव भ्रातः किं व्यर्थचेष्टितैः । किन्न ज्ञातं यथा सर्वे जीवाः स्वकृतभोगिनः ॥४७॥
यद्येन यादृशं कर्म संसारे समुपार्जितम् । तत्तेन तादृशं भ्रातर्नियमादनुभूयते ॥४८॥

कि विशाल रत्नाकरकी महाभूमिमें महामणि उत्पन्न होता है ॥३५॥ वह उत्तम देव वहाँ शीघ्र ही आहार, शरीर, इन्द्रिय, श्वासोच्छ्वास, भाषा और मन इन छह पर्याप्तियोंसे पूर्ण हो गया ॥३६॥ नवयौवनसे युक्त एवं वस्त्राभरणसे विभूषित वह देव, सर्वतोभद्र नामक शय्यापर ऐसा उठकर बैठ गया जैसा मानो सुखनिद्रा पूर्ण होनेपर ही उठा हो ॥३७॥ जब इस देवने चारों ओर देखा तब अनुरागसे युक्त देवाङ्गनाओं और देवोंके शब्दोंने इसका अभिनन्दन किया ॥३८॥ चन्द्रमा और सूर्यसे भी अधिक उत्कृष्ट प्रभावलयसे युक्त शरीरको धारण करनेवाला वह देव, हर्षसे पूर्ण हृदय होता हुआ इस प्रकारका ध्यान करने लगा कि यह अत्यन्त सुन्दर देश कौन है ? ये हर्षसे भरे जन कौन हैं ? मैं कौन हूँ ? मेरा यहाँ कहाँ जन्म हुआ है ? और मैंने किस धर्मका संचय किया है ? ॥३९–४०॥

तदनन्तर मुख्य-मुख्य देवोंने उसे समझाया—सब वस्तुओंका परिचय दिया जिससे तथा भवप्रत्यय अवधिज्ञानसे युक्त हो उसने शीघ्र ही आगे-पीछेका सब वृत्तान्त जान लिया ॥ ४१ ॥ तदनन्तर जिसने पूर्वभवके सब बन्धुओंको जान लिया था, जो भाईका हित करनेमें उद्यत था, जिसे अभिषेकरूप कल्याण प्राप्त हुआ था, जिसने वस्त्राभूषणादि सब सामग्री प्राप्त की थी, और अवधिज्ञानसे जिसने कृष्णका समाचार जान लिया था ऐसा वह देव बालुकाप्रभा पृथिवीमें गया और अपने छोटे भाई कृष्णको दुःखी देख स्वयं बहुत दुःखी हुआ ॥ ४२-४३ ॥ महाप्रभावसे सम्पन्न वह देव जब वहाँ जाकर खड़ा हो गया तब वहाँके अशुभ शब्द गन्ध रस और शब्द शुभरूपताको प्राप्त हो गये ॥ ४४ ॥ वह कहने लगा कि हे कृष्ण ! आओ आओ, जो मैं तुम्हारा बड़ा भाई बलदेव था वही ब्रह्मलोकका अधिपति होकर यहाँ तुम्हारे पास आया हूँ ॥ ४५ ॥ यह कहकर वह देव ज्यों-ही कृष्णके जीवको उठाकर स्वर्गलोकमें ले जानेके लिए उद्यत हुआ त्यों-ही उसका शरीर मक्खनके समान गलकर विलीन हो गया ॥ ४६ ॥

तदनन्तर कृष्णने कहा कि हे देव ! हे भाई ! व्यर्थकी चेष्टाओंसे क्या लाभ है ? क्या आप यह नहीं जानते कि सब जीव अपने कियेका फल भोगते हैं ॥ ४७ ॥ संसारमें जिसने जैसा कर्म उपार्जन किया है, हे भाई ! नियमसे उसे वैसा ही फल भोगना पड़ता है ॥ ४८ ॥

शक्नुयुः सुखमाहर्तुं हर्तुं वा दुःखमङ्गिनाम् । देवा यदि ततो घ्नन्ति मृत्युदुःखं निजं न किम् ॥४९॥
भ्रातर्याहि ततः स्वर्गं भुङ्क्ष्व पुण्यफलं निजम् । आयुषोऽन्तेऽहमप्येमि मोक्षहेतुं मनुष्यताम् ॥५०॥
आवां तत्र तपः कृत्वा जिनशासनसेवया । मोक्षसौख्यमवाप्स्यावः कृत्वा कर्मपरिक्षयम् ॥५१॥
[1]आवां पुत्रादिसंयुक्तौ महाविभवसंगतौ । भारते दर्शयान्येषां विस्मयव्याप्तचेतसाम् ॥५२॥
शङ्खचक्रगदापाणिमदीयप्रतिमागृहैः । भारतं व्यापय क्षेत्रं मत्कीर्तिपरिवृद्धये ॥५३॥
इत्यादि वचनं तस्य प्रतिपद्य सुरेश्वरः । सम्यक्त्वे शुद्धिमत्रयाप्य भारतं क्षेत्रमागतः ॥५४॥
भ्रातृस्नेहवशो देवो यथोद्दिष्टं स विष्णुना । चक्रे दिव्यविमानस्थौ[2]चक्रिकाङ्ककदर्शनम् ॥५५॥
वासुदेवगृहैश्चक्रे नगरादिनिवेशितैः । विष्णुमोहमयं लोकं स्नेहात्किं वा न चेष्टते ॥५६॥
ब्रह्मलोकं [3]समासाद्य कृतजैनमहामहः । विन्दन् सुरसुखं सोऽस्थात्सुरस्त्रीनिवहावृतः ॥५७॥

स्रग्धरा

उच्चैर्देशस्थितोऽपि प्रतिभयपतनं याति पातालमूलं
भुङ्क्ते नैवोपलब्धं विषयसुखरसं सारसंसारसारम् ।
स्नेहाधिक्यादधीतं स्मरति न तनुभृत्सेवते प्रत्यनीकं
धिक् धिक् स्वर्मोक्षसौख्यप्रतिघमतिघनस्नेहमोहं जनानाम् ॥५८॥

देव, यदि दूसरे प्राणियोंके लिए सुख देने और दुःख हरनेमें समर्थ हैं तो फिर अपना ही मृत्युरूपी दुःख क्यों नहीं नष्ट कर लेते हैं ॥ ४९ ॥ इसलिए भाई ! स्वर्गको जाओ और अपने पुण्यका फल भोगो। मैं भी आयुके अन्तमें मोक्षका कारण जो मनुष्यपर्याय है उसे प्राप्त करूँगा ॥ ५० ॥ हम दोनों उस मनुष्यपर्यायमें तप करेंगे और जिनशासनकी सेवासे कर्मोंका क्षय कर मोक्ष प्राप्त करेंगे ॥५१॥ हाँ, एक काम आप अवश्य करें कि 'भरत क्षेत्रमें हम दोनों-को लोग पुत्र आदिसे सहित तथा महावैभवसे युक्त देखें और हम लोगोंको देखकर दूसरोंके चित्त आश्चर्यसे व्याप्त हो जावें ॥ ५२ ॥ मेरी कीर्तिकी वृद्धिके लिए आप शङ्ख, चक्र तथा गदा हाथमें लिये मेरी प्रतिमाओंके मन्दिरोंसे समस्त भरत क्षेत्रको व्याप्त कर दें'। बलदेवका जीव देवेन्द्र कृष्णके पूर्वोक्त वचन स्वीकार कर तथा उसे सम्यग्दर्शनमें शुद्धता रखनेका उपदेश दे भरत क्षेत्र आया ॥ ५३-५४ ॥ भाईके स्नेहके वशीभूत हुए उस देवने कृष्णका कहा सब काम किया। उसने दिव्य विमानमें स्थित कृष्ण और बलदेवका सबको दर्शन कराया ॥ ५५ ॥ तथा नगर-ग्राम आदिमें बनवाये हुए कृष्णके मन्दिरोंसे संसारको कृष्णविषयक मोहसे तन्मय कर दिया सो ठीक ही है क्योंकि स्नेहसे क्या-क्या चेष्टा नहीं होती है ? ॥ ५६ ॥ तदनन्तर देवने ब्रह्मस्वर्ग जाकर जिनेन्द्र भगवान्‌की पूजा की और वहाँ वह स्त्रियोंके समूहसे आवृत हो देवों-के सुखका उपभोग करता हुआ रहने लगा ॥ ५७ ॥ गौतम स्वामी कहते हैं कि देखो स्नेहकी अधिकतासे यह जीव उच्च स्थानमें स्थित होता हुआ भी भयपूर्ण पातालके मूलमें जाता है, श्रेष्ठ संसारके सारभूत प्राप्त हुए विषयसुखका उपभोग नहीं करता है, पहले अध्ययन किये हुए शास्त्रका स्मरण नहीं रखता है और विपरीत काम करने लगता है इसलिए स्वर्ग और मोक्ष-

---

१. सम्यग्दृष्टिर्बद्धतीर्थंकरनाम प्रकृतिः कृष्णस्य जीवः, एवं मिथ्यात्ववर्धनं कार्यं कारयतीति विचित्रोऽयमुल्लेखः प्रतिभाति । २. दिव्यविमानस्थं चक्रि म०, क०, ङ० । ३. समाक्रम्य क० ।

शार्दूलविक्रीडितम्

तीर्थे नेमिजिनस्य तत्र वहति व्यामोहविच्छेदने
संजाते वरदत्तनामनि मुनौ कैवल्यचक्षुष्मति ।
राजासौ हरिवंशसन्ततिधरो धीरो जरायाः सुतो
दध्रे राज्यधुरां धुरन्धरधराधीशश्रियं धारयन् ॥५९॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्निर्वाणवर्णनो नाम पञ्चषष्टितमः सर्गः ॥६५॥

सुखके बाधक प्राणियोंके अत्यधिक स्नेहसम्बन्धी मोहको धिक्कार हो ॥५८॥ तदनन्तर मोहको नष्ट करनेवाले नेमिजिनेन्द्रके उस प्रचलित तीर्थमें वरदत्त नामक मुनिको केवलज्ञान हुआ और हरिवंशकी सन्ततिको धारण करनेवाला धीर वीर जरत्कुमार धुरन्धर राजलक्ष्मीकी रक्षा करता हुआ राज्यका भार सँभालने लगा ॥ ५९ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें भगवान् नेमिनाथके निर्वाणका वर्णन करनेवाला पैंसठवाँ सर्ग समाप्त हुआ ॥ ६५ ॥

षट्षष्टितमः सर्गः

वंशस्थवृत्तम्

प्रतापवश्याखिलराजके नृपे प्रशासति क्ष्मातलमुग्रशासने ।
जरत्कुमारे जनितादराः प्रजाः प्रकाममापुः प्रमदं धरातले ॥१॥
कलिङ्गराजस्य नृपस्य देहजा जरत्कुमारस्य वधूर्वधूत्तमा ।
सुखेन लेभे जगतः सुखावहं वसुध्वजं राजकुलध्वजं सुतम् ॥२॥
स तत्र यूनि व्यवसायिनि क्षितिं जरत्कुमारो हरिवंशशेखरे ।
निधाय यातस्तपसे वनं सतां कुलव्रतं तीव्रतपोनिषेवणम् ॥३॥
सुतोऽभवच्चन्द्र इव प्रजाप्रियो [1]वसुध्वजाख्यात्सुवसुर्वसूपमः ।
स भीमवर्मास्य कलिङ्गपालकस्तदन्वयेऽतीयुरनेकशो नृपाः ॥४॥
कपिष्टनामान्वयभूषणस्त्वभूदजातशत्रुस्तनयस्ततोऽभवत् ।
स शत्रुसेनोऽस्य जितारिरङ्गजस्तदङ्गजोऽयं जित[2]शत्रुरीश्वरः ॥५॥
भवान्न किं श्रेणिक वेत्ति भूपतिं नृपेन्द्रसिद्धार्थकनीयसीपतिम् ।
इमं प्रसिद्धं जितशत्रुमाख्यया प्रतापवन्तं जितशत्रुमण्डलम् ॥६॥
जिनेन्द्रवीरस्य समुद्भवोत्सवे तदागतः कुण्डपुरं सुहृत्परः ।
सुपूजितः कुण्डपुरस्य भूभृता नृपोऽयमाखण्डलतुल्यविक्रमः ॥७॥
यशोदयायां सुतया यशोदया पवित्रया वीरविवाहमङ्गलम् ।
अनेककन्यापरिवारयाऽऽरुहत्समीक्षितुं तुङ्गमनोरथं तदा ॥८॥

तदनन्तर प्रतापके द्वारा समस्त राजाओंको वश करनेवाला, उग्रशासनका धारक राजा जरत्कुमार जब पृथिवीका शासन करने लगा तब उसके प्रति प्रजाने बहुत आदर किया और पृथिवीतलपर अधिक हर्ष प्राप्त किया ॥१॥ कलिङ्ग राजाकी पुत्री जरत्कुमारकी उत्तम पट्टरानी थी, उससे उसने जगत्‌को सुख देनेवाला एवं राजकुलकी ध्वजास्वरूप वसुध्वज नामका पुत्र प्राप्त किया ॥२॥ व्यवसायी तथा हरिवंशके शिरोमणि उस युवापर पृथिवीका भार रख जरत्कुमार तपके लिए वनको चला गया सो ठीक ही है क्योंकि तीव्र तपका सेवन करना सत्पुरुषोंका कुलव्रत है ॥३॥ वसुध्वजके चन्द्रमाके समान प्रजाको आनन्द देनेवाला कुबेरतुल्य सुवसु नामका पुत्र हुआ। सुवसुके कलिङ्ग देशकी रक्षा करनेवाला भीमवर्मा नामका पुत्र हुआ और उसके वंशमें अनेक राजा हुए ॥४॥ तदनन्तर उसी वंशका आभूषण कपिष्ट नामका राजा हुआ, उसके अजातशत्रु, अजातशत्रुके शत्रुसेन, शत्रुसेनके जितारि और जितारिके यह जितशत्रु नामका पुत्र हुआ है ॥५॥ हे राजन् श्रेणिक! क्या तुम इस जितशत्रुको नहीं जानते? जिसके साथ भगवान् महावीरके पिता राजा सिद्धार्थकी छोटी बहिनका विवाह हुआ है, जो अत्यन्त प्रतापी और शत्रुओंके समूहको जीतनेवाला है ॥६॥ जब भगवान् महावीरका जन्मोत्सव हो रहा था तब यह कुण्डपुर आया था और कुण्डपुरके राजा सिद्धार्थने इन्द्रके तुल्य पराक्रमको धारण करनेवाले इस परम मित्रका अच्छा सत्कार किया था ॥७॥ इसकी यशोदया रानीसे उत्पन्न यशोदा नामकी पवित्र पुत्री थी। अनेक कन्याओंसे सहित उस

---

१. वसुध्वजाख्यासुवसु- म०। २. यन्त्रितशत्रु- म०।

[1]स्थितेऽथ नाथे तपसि स्वयंभुवि प्रजातकैवल्यविशाललोचने।
जगद्विभूत्यै विहरत्यपि क्षितिं क्षितिं विहाय स्थितवांस्तपस्ययम् ॥९॥
अमुष्य [2]जाताय तपोबलान्मुनेरवाप्तकैवल्यफला मनुष्यता।
मनुष्यभावो हि महाफलं भवे भवेद्यं प्राप्तफलस्तपःफलात् ॥१०॥
इतीरितेयं हरिवंशसत्कथा समासतः श्रेणिक लोकविश्रुता।
त्रिषष्टिसंख्यानपुराणपद्धतिप्रदेशसम्बन्धवती श्रियेऽस्तु ते ॥११॥
[3]सुगौतमात्पुण्यपुराणपद्धतिं सपार्थिवैः श्रेणिकपार्थिवस्तदा।
सुदृष्टिराकर्ण्य सकर्णतां गतो गतः पुरं [4]प्रीतमतिः कृतानतिः ॥१२॥
चतुर्णिकायामरखेचरादयो जिनं परीत्य प्रणिपत्य भक्तितः।
यथायथं जग्मुरजन्मकाङ्क्षिणः प्रसिद्धसद्धर्मकथानुरागिणः ॥१३॥
विहृत्य पूज्योऽपि महीं [5]महीयसां महामुनिर्मोचितकर्मबन्धनः।
इयाय मोक्षं जितशत्रुकेवली निरन्तसौख्यप्रतिबद्धमक्षयम् ॥१४॥
जिनेन्द्रवीरोऽपि विबोध्य सन्ततं समन्ततो भव्यसमूहसन्ततिम्।
प्रपद्य पावानगरीं गरीयसीं मनोहरोद्यानवने तदीयके ॥१५॥
चतुर्थकालेऽर्धचतुर्थमासकैर्विहीनताविश्चतुरब्दशेषके।
स कार्तिके स्वातिषु कृष्णभूतसुप्रभातसन्ध्यासमये स्वभावतः ॥१६॥

यशोदाका भगवान् महावीरके साथ विवाह-मङ्गल देखनेकी यह उत्कट अभिलाषा रखता था। परन्तु स्वयंभू भगवान् महावीर तपके लिए चले गये और केवलज्ञानरूपी विशाल नेत्र प्राप्त कर जगत्‌का कल्याण करनेके लिए पृथिवीपर विहार करने लगे, तब यह स्वयं भी पृथिवीको छोड़ तपमें लीन हो गया ॥८-९॥ आज मुनि जितशत्रुको तपके फलस्वरूप केवलज्ञान उत्पन्न हुआ है और उससे उनका मनुष्यपर्याय सार्थक हुआ है सो ठीक ही है, क्योंकि संसारमें मनुष्यपर्याय महाफलरूप तभी होता है जब वह तपके फलस्वरूप इस केवलज्ञानरूपी फलको प्राप्त कर लेता है ॥ १० ॥ गौतम स्वामी कहते हैं कि हे श्रेणिक! मैंने यह लोकप्रसिद्ध तथा त्रेसठशलाका पुरुषोंके पुराणपद्धतिसे सम्बन्ध रखनेवाली हरिवंशकी कथा संक्षेपसे कही है सो तुझे लक्ष्मीकी प्राप्तिके लिए हो ॥११॥ सम्यग्दर्शनसे सुशोभित राजा श्रेणिक अनेक राजाओंके साथ गौतमगणधरसे इस पवित्र पुराणका वर्णन सुन अपने कानोंको सफल मानने लगा तथा नमस्कारकर प्रसन्न होता हुआ अपने नगरको चला गया ॥१२॥ मोक्षकी इच्छा रखनेवाले एवं प्रसिद्ध समीचीन धर्मकथाके अनुरागी चारों निकायके देव और विद्याधर जिनेन्द्र भगवान्‌को प्रदक्षिणा देकर तथा प्रणाम कर अपने-अपने स्थानोंपर चले गये ॥१३॥ बड़े-बड़े पुरुषोंके द्वारा पूज्य महामुनि जितशत्रु केवली भी पृथिवीपर विहार कर अन्तमें कर्मबन्धनसे रहित हो अनन्त सुखसे युक्त अविनाशी मोक्षपदको प्राप्त हुए ॥१४॥ भगवान् महावीर भी निरन्तर सब ओरके भव्यसमूहको संबोधकर पावानगरी पहुँचे और वहाँके 'मनोहरोद्यान' नामक वनमें विराजमान हो गये ॥१५॥ जब चतुर्थकालमें तीन वर्ष साढ़े आठ मास बाकी रहे तब स्वाति नक्षत्रमें कार्तिक अमावास्याके दिन प्रातःकालके समय स्वभावसे ही योग निरोध कर घातियाकर्मरूप ईन्धनके समान अघातियाकर्मोंको भी नष्ट कर बन्धनरहित हो संसारके प्राणियोंको

---

१. स्थितेऽथ म०। २. यताय क०, ख०, ङ०, म०। ३. सुगौतमायुष्यपुराण- म०। ४. स्फीतमतिः म०, महाप्रीतमतिः ख०। ५. महीयसीं क०।

अघातिकर्माणि निरुद्धयोगको विधूय घातीन्धनवद्विबन्धनः ।
विबन्धनस्थानमवाप शंकरो निरन्तरायोरुसुखानुबन्धनम् ॥१७॥
स पञ्चकल्याणमहामहेश्वरः प्रसिद्धनिर्वाणमहे चतुर्विधैः ।
शरीरपूजाविधिना विधानतः सुरैः समभ्यर्च्यत सिद्धशासनः ॥१८॥
ज्वलत्प्रदीपालिकया प्रवृद्धया सुरासुरैः दीपितया प्रदीप्तया ।
तदा स्म पावानगरी समन्ततः प्रदीपिताकाशतला प्रकाशते ॥१९॥
तथैव च श्रेणिकपूर्वभूभुजः[1] प्रकृत्य कल्याणमहं सहप्रजाः ।
प्रजग्मुरिन्द्राश्च सुरैर्यथायथं प्रयाचमाना जिनबोधिमर्थिनः ॥२०॥
ततस्तु लोकः प्रतिवर्षमादरात्प्रसिद्धदीपालिकयात्र भारते ।
समुद्यतः पूजयितुं जिनेश्वरं जिनेन्द्रनिर्वाणविभूतिभक्तिभाक् ॥२१॥
त्रयः क्रमात्केवलिनो जिनात्परे द्विषष्टिवर्षान्तरभाविनोऽभवन् ।
ततः परे पञ्च समस्तपूर्विणस्तपोधना वर्षशतान्तरं गताः ॥२२॥
त्र्यशीतिके वर्षशते तु [2]रूपयुक् दशैव गीता दशपूर्विणः शते ।
द्वये च विंशेऽङ्गभृतोऽपि पञ्च ते शते च साष्टादशके चतुर्मुनिः ॥२३॥
गुरुः सुभद्रो जयभद्रनामकः परो[3] यशोबाहुरनन्तरस्ततः ।
महार्हलोहार्यगुरुश्च ये दधुः प्रसिद्धमाचारमहाङ्गमत्र ते ॥२४॥

सुख उपजाते हुए निरन्तराय तथा विशाल सुखसे सहित निर्बन्ध—मोक्ष स्थानको प्राप्त हुए ॥१६—१७॥ गर्भादि पाँचों कल्याणकोंके महान् अधिपति, सिद्धशासन भगवान् महावीरके निर्वाण महोत्सवके समय चारों निकायके देवोंने विधिपूर्वक उनके शरीरकी पूजा की ॥१८॥ उस समय सुर और असुरोंके द्वारा जलायी हुई बहुत भारी देदीप्यमान दीपकोंकी पंक्तिसे पावानगरीका आकाश सब ओरसे जगमगा उठा ॥१९॥ श्रेणिक आदि राजाओंने भी प्रजाके साथ मिलकर भगवान्के निर्वाण कल्याणककी पूजा की। तदनन्तर बड़ी उत्सुकताके साथ जिनेन्द्र भगवान्के रत्नत्रयकी याचना करते हुए इन्द्र देवोंके साथ-साथ यथास्थान चले गये ॥ २० ॥ उस समयसे लेकर भगवान्के निर्वाणकल्याणकी भक्तिसे युक्त संसारके प्राणी इस भरतक्षेत्रमें प्रतिवर्ष आदरपूर्वक प्रसिद्ध दीपमालिकाके द्वारा भगवान् महावीरकी पूजा करनेके लिए उद्यत रहने लगे। भावार्थ—उन्हींकी स्मृतिमें दीपावलीका उत्सव मनाने लगे ॥२१॥

भगवान् महावीरके निर्वाणके बाद बासठ वर्षमें क्रमसे गौतम, सुधर्म और जम्बूस्वामी ये तीन केवली हुए। उनके बाद सौ वर्षमें समस्त पूर्वोंको जाननेवाले पाँच* श्रुतकेवली हुए ॥२२॥ तदनन्तर एक सौ तेरासी वर्षमें † ग्यारह मुनि दश पूर्वके धारक हुए। उनके बाद दो सौ बीस वर्षमें पाँच‡ मुनि ग्यारह अङ्गके धारी हुए। तदनन्तर एक सौ अठारह वर्षमें सुभद्रगुरु, जयभद्र, यशोबाहु और महापूज्य लोहार्यगुरु ये चार मुनि प्रसिद्ध आचाराङ्गके धारी हुए ॥२३—२४॥

---

१. पूर्वभूभृतः म० । २. एकाधिका दश एकादशेत्यर्थः । ३. जयभद्रनामा- म०, ख०, ङ०, म० ।

*. १ नन्दी, २ नन्दिमित्र, ३ अपराजित, ४ गोवर्धन और ५ भद्रबाहु । †. १ विशाख, २ प्रोष्ठिल, ३ क्षत्रिय, ४ जय, ५ नाग, ६ सिद्धार्थ, ७ धृतिषेण, ८ विजय, ९ बुद्धिल, १० गङ्गदेव और ११ सुधर्म । ‡. १ नक्षत्र, २ जयपाल, ३ पाण्डु, ४ ध्रुवसेन और ५. कंसार्य ।

महातपोभृद्विनयंधरः[1] श्रुतामृषिश्रुतिं गुप्तपदादिकां दधत् ।
मुनीश्वरोऽन्यः शिवगुप्तसंज्ञको गुणैः स्वमर्हद्बलिरप्यधाद्धरन् ॥२५॥
स मन्दरार्योऽपि च मित्रवीरवि[2] गुरू तथान्यौ बलदेवमित्रकौ ।
विवर्धमानाय त्रिरत्नसंयुतः श्रियान्वितः सिंहबलश्च वीरवित् ॥२६॥
स पद्मसेनो गुणपद्मखण्डभृद् गुणाग्रणीर्व्याघ्रपदादिहस्तकः ।
स नागहस्ती जितदण्डनामभृत्सनन्दिषेणः प्रभुदीपसेनकः ॥२७॥
तपोधनः श्रीधरसेननामकः सुधर्मसेनोऽपि च सिंहसेनकः ।
सुनन्दिषेणेश्वरसेनकौ प्रभू सुनन्दिषेणाभयसेननामकौ ॥२८॥
स सिद्धसेनोऽभयभीमसेनकौ गुरू परौ तौ जिनशान्तिषेणकौ ।
अखण्डषट्खण्ड[3]मखण्डितस्थितिः समस्तसिद्धान्तमधत्त योऽर्थतः ॥२९॥
दधार कर्मप्रकृतिं श्रुतिं च यो जिताक्षवृत्तिर्जयसेनसद्गुरुः ।
प्रसिद्धवैय्याकरणप्रभाववानशेषराद्धान्तसमुद्रपारगः ॥३०॥
तदीयशिष्योऽमितसेनसद्गुरुः पवित्रपुन्नाटगणाग्रणीर्गणी ।
जिनेन्द्रसच्छासनवत्सलात्मना तपोभृता वर्षशताधिजीविना ॥३१॥
सुशास्त्रदानेन वदान्यतामुना वदान्यमुख्येन भुवि प्रकाशिता ।
[4]यदग्रजो धर्मसहोदरः शमी समग्रधीधर्म इवात्तविग्रहः ॥३२॥
तपोमयीं कीर्तिमशेषदिक्षु यः क्षिपन् बभौ कीर्तितकीर्तिषेणकः ।

उनके बाद महातपस्वी विनयंधर, गुप्तश्रुति, गुप्तऋषि, मुनीश्वर शिवगुप्त, अर्हद्बलि, मन्दरार्य, मित्रवीरवि, बलदेव, मित्रक, बढ़ते हुए पुण्यसे सहित रत्नत्रयके धारक एवं ज्ञान-लक्ष्मीसे युक्त सिंहबल, वीरवित्, गुणरूपी कमलोंके समूहको धारण करनेवाले पद्मसेन, गुणोंसे श्रेष्ठ व्याघ्रहस्त, नागहस्ती, जितदण्ड, नन्दिषेण, स्वामी दीपसेन, तपोधन श्रीधरसेन, सुधर्मसेन, सिंहसेन, सुनन्दिषेण, ईश्वरसेन, सुनन्दिषेण, अभयसेन, सिद्धसेन, अभयसेन, भीमसेन, जिनसेन और शान्तिसेन आचार्य हुए। तदनन्तर जो अखण्ड मर्यादाके धारक होकर परिपूर्ण षट्खण्डों (१ जीवस्थान, २ क्षुद्रबन्ध, ३ बन्धस्वामी, ४ वेदनाखण्ड, ५ वर्गणाखण्ड और ६ महाबन्ध) से युक्त समस्त सिद्धान्तको अर्थरूपसे धारण करते थे अर्थात् षट्खण्डागमके ज्ञाता थे, कर्मप्रकृतिरूप श्रुतिके धारक थे और इन्द्रियोंकी वृत्तिको जीतनेवाले थे ऐसे जयसेन नामक गुरु हुए। उनके शिष्य अमितसेन गुरु हुए जो प्रसिद्ध वैयाकरण, प्रभावशाली और समस्त सिद्धान्तरूपी सागरके पारगामी थे। ये पवित्र पुन्नाट गणके अग्रणी—अग्रेसर आचार्य थे। जिनेन्द्र शासनके स्नेही, परमतपस्वी, सौ वर्षकी आयुके धारक एवं दाताओंमें मुख्य इन अमितसेन आचार्यने शास्त्रदानके द्वारा पृथिवीमें अपनी वदान्यता—दानशीलता प्रकट की थी। इन्हीं अमितसेनके अग्रज धर्मबन्धु कीर्तिषेण नामक मुनि थे जो बहुत ही शान्त थे, पूर्ण बुद्धिमान् थे, शरीरधारी धर्मके समान जान पड़ते थे और जो अपनी तपोमयी कीर्तिको समस्त दिशाओंमें प्रसरित कर रहे थे। उनका प्रथम शिष्य मैं जिनसेन हुआ। मोक्षके उत्कृष्ट सुखका उपभोग करनेवाले अरिष्टनेमि जिनेन्द्रकी भक्तिसे युक्त मुझ जिनसेन सूरिने अपने सामर्थ्यके अनुसार अल्पबुद्धिसे इस हरिवंशपुराणकी रचना की

---

१. विनयंधरश्रुतां म०, विनयंधरश्रुतीं ख० । २. मित्रवीरविं क०, ख०, ग०, ङ० । ३. षट्खण्ड-सुमण्डितस्थितिः म० । ४. तदग्रजो म० ।

तदग्रशिष्येण शिवाग्रसौख्यभागरिष्टनेमीश्वरभक्तिभाविना ।
स्वशक्तिभाजा जिनसेनसूरिणा धियाल्पयोक्ता हरिवंशपद्धतिः[1] ॥३३॥
यदत्र किञ्चिद्रचितं प्रमादतः परस्परव्याहतिदोषदूषितम्[2] ।
तदप्रमादास्तु पुराणकोविदाः सृजन्तु जन्तुस्थितिशक्तिवेदिनः ॥३४॥
प्रशस्तवंशो हरिवंशपर्वतः क्व मे मतिः क्वाल्पतराल्पशक्तिका ।
अनेन पुण्यप्रभवस्तु केवलं जिनेन्द्रवंशस्तवनेन वाञ्छितः ॥३५॥
न काव्यबन्धव्यसनानुबन्धतो न कीर्तिसन्तानमहामनीषया ।
न काव्यगर्वेण न [3]चान्यवीक्षया जिनस्य भक्त्यैव कृता कृतिर्यथा ॥३६॥
जिनाश्चतुर्विंशतिरत्र कीर्तिताः सुकीर्तयो द्वादश चक्रवर्तिनः ।
नवत्रिधा सीरिहरिप्रतिद्विषस्त्रिषष्टिरित्थं पुरुषाः पुराणगाः ॥३७॥
अवान्तरेऽनेकशतानि पार्थिवा महीचरा व्योमचराश्च भूरिशः ।
क्षितौ चतुर्वर्गफलोपभोगिनः पुराणमुख्येऽत्र यशस्विनः स्तुताः ॥३८॥
अगण्यपुण्यं हरिवंश[4]कीर्तनाद्यदत्र गण्यं गुणसञ्चितं मया ।
फलादमुष्मान्नु मनुष्यलोकजा भवन्तु भव्या जिनशासनस्थिताः ॥३९॥
जिनस्य नेमेश्चरितं चराचरप्रसिद्धजीवादिपदार्थभासनम् ।
प्रवाच्यतां वाचकमुख्यसज्जनैः समागतैः श्रोत्रपुटैः प्रपीयताम् ॥४०॥
जिनेन्द्रनामग्रहणं भवत्यलं ग्रहादिपीडापगमस्य कारणम् ।
प्रवाच्यमानं दुरितस्य दारणं सतां समस्तं चरितं किमुच्यते ॥४१॥

